श्रीमद्विनयविजयोपाध्यायविरचितः
पं.श्रीगम्भीरविजयगणिकृत्सरलाख्यटीकासमेतः
द्विशताधिककथासमन्वितः

# शान्तसुधारसः



संपादक - संयोजकाश्च

**आचार्यश्रीजयानन्दसूरीश्वराः**



श्रीमद्विनयविजयोपाध्यायविरचितः

पं. श्रीगम्भीरविजयगणिकृतसरलाख्यटीकासमेतः ।

# ।। श्रीशान्तसुधारसः ।।

## द्विशताधिककथासमन्वितः

अनित्यादिद्वादशमैत्र्यादिचतुष्टयभावनानां
यथास्थितस्वरूपप्रदर्शकोऽमूल्यो ग्रन्थः

: सम्पादक-संयोजकाश्च

**आचार्यश्रीजयानन्दसूरीश्वराः**

: प्रकाशक :

**श्री गुरु रामचंद्र प्रकाशन समिति - भीनमाल**

# प्राप्तिस्थान

- **श्री गुरु रामचंद्र प्रकाशन समिति**

  **C/o. शा. देवीचंद छगनलालजी**

  सुमति दर्शन, नहेरु पार्क के सामने, माघ कोलोनी, भीनमाल-३४३ ०२९ (राज.)

  फोन : (०२९६९) २३० ३८७

- **श्री आदिनाथ राजेन्द्र जैन पेढ़ी**

  साँथु-३४३ ०२६, जिला : जालोर (राज.)

  फोन : (०२९७३) २५४ २२१

- **श्री विमलनाथ जैन पेढ़ी**

  बाकरा गाम-३४३ ०२५ (राज.)

  फोन : (०२९७३) २५१ १२२, मो. ९४१३४६५०६८

- **महाविदेह भीनमाल धाम**

  तलेटी हस्तगिरि लिंक रोड, पालिताणा-३६४ २७०.

  फोन : (०२८४८) २४३ ०१८

- **श्री तीर्थेन्द्रसूरि स्मारक संघ ट्रस्ट**

  तीर्थेन्द्रनगर, बाकरा रोड-३४३०२५. जिला : जालोर (राज.)

  फोन : (०२९७३) २५१ १४४.

- **श्री सीमंधर जिन राजेन्द्रसूरि गुरु मंदिर**

  शंखेश्वर तीर्थ मंदिर के पास, शंखेश्वर. जि. महेसाणा

: द्रव्यसहायक (ज्ञानद्रव्य से) :

# श्री शंखेश्वर पार्श्वनाथ राजेन्द्र जैन ट्रस्ट

## (श्री अरविन्दकुंज तारदेव जैन संघ)

अरविन्दकुंज को. ऑप. सोसायटी लिमिटेड
तारदेव रोड, तारदेव, मुंबई-४०००३४

### मुख्य संरक्षक

**(१) श्री संभवनाथ राजेन्द्रसूरि श्वे. ट्रस्ट**
कंदुलावारी स्ट्रीट, विजयवाडा.

**(२) मुनिराज श्री जयानंद विजयजी आदि ठाणा की निश्रा में**
वि. २०६५ में शत्रुंजय तीर्थेचातुर्मास एवं उपधान करवाया उस निमित्ते
**लेहर कुंदन ग्रुप** - मुंबई, दिल्ली, चेन्नई, हरियाणा
**श्रीमती गेरीदेवी जेठमलजी बालगोता परिवार मेंगलवा.**

**(३) एक सद्गृहस्थ - भीनमाल**

**(४) संघवी उत्तमकुमार, सन्तोषदेवी, कुणाल, मेघा-पोता**
**रीखबचंदजी ताराजी नागोत्रा सोलंकी परिवार,**
बाकरा-राजस्थान
R.T. SHAH & Co. 9-c, Prince Paladise, 75, Jermiah Road,
Near Vepery Police Station, VEPERY, CHENNAI-7

# संरक्षक

१. एस. के. नाहर २०१, सुमेर टॉवर, लवलेन, मझगांव-मुंबई.
२. मीलियन ग्रुप, सूराणा, राज., मुंबई. दिल्ली, विजयवाडा
३. एम. आर इम्पेक्स, लेमीग्टन रोड, मुंबई-७. फोन : ०२२-४३६८८६११
४. महाविदेह भीनमालधाम, पालीताणा.
५. कल्पतरु ज्वेलर्स, स्टेशन रोड, थाना, मुंबई.
६. अमृतलाल चीमनलाल दोशी - थराद.
७. अरिहन्त नोवेल्हटी-कालुपुर, अहमदाबाद-तिरचिरापली.
८. मधुबेन कांतिलाल भणशाली, थराद - मुंबई.
९. कांतिलाल केवलजी गांधी, सियाना-विजयवाडा.
१०. लहेर कुंदन ग्रुप, मेंगलवा-दिल्ली-मुंबई-चेन्नई-हरियाणा.
११. 'जय चिंतामणी' संतापेट नेल्लूर-गुडा.
१२. नाकोडा गोल्ड-कालबादेवी, मुंबई-२.
१३. राजरतन गोल्ड प्रोड. अरुंडलपेट, गुन्टूर.
१४. एक सद्गृहस्थ, धाणसा.
१५. कोठारी गुलाबचन्द, डॉ. राजकुमार छगनराजजी-आहोर, अमेरिका.
१६. शांतिरूपचंदजी मिलापचंदजी - जालोर.
१७. शा. शांतिलाल प्रवीणकुमार-रामगोपाल स्ट्रीट, विजयवाडा.
१८. नवकार टाइम, नाकोडा स्टेट, मुंबई-३.
१९. राजेन्द्र मार्केटींग, आहोर, विजयवाडा.
२०. राजेन्द्र ज्वेलर्स, ताडदेव, मुंबई - पांथेडी.
२१. जे. जी. इम्पेक्स प्रा.लि. - नारायण मुदली स्ट्रीट चेन्नई-७६.
२२. शा. हस्तीमलजी भलाजी नागोत्रा सोलंकी परिवार, बाकरा
२३. लहेर कुंदन ग्रुप आराधक गण.
२४. कुंदन ग्रुप - मेंगलवा, चेन्नई, दिल्ली, मुंबई.
२५. शा. सुमेरमलजी नरसाजी-मेंगलवा, मुंबई.
२६. मंगल आर्ट. दोशी बिल्डींग ३-भोईवाडा, भूलेश्वर, मुंबई-२.

२७. श्रीसुपर स्पेअर्स रोड, विजयवाडा-धाणसा.
२८. कलांजली ज्वेलर्स, ब्राडी पेठ, गुन्टूर-आहोर.
२९. शा. प्रतापजी कालूजी कांकरीया, गुन्टूर, मोधरा.
३०. एक सद्गृहस्थ ( खाचरौद )
३१. हितेन्द्र मार्केटींग, चेन्नई-बाकरा.
३२. पी. टी. जैन, रोयल सम्राट, मुंबई-६२ धाणसा.
३३. गोल्ड मेडल इंडस्ट्रीज, मुंबई - विजयवाडा.
३४. राज राजेन्द्र टेक्सटाईल्स, मुंबई-मोधरा.
३५. कोठारी मार्केटींग चितुरी कोम्प्लेक्ष, विजयवाडा.
३६. अलका स्टील, भवानी पेठ, पुना-५२-धाणसा.
३७. श्रीमती हंजादेवी सुमेरमलजी नागोरी आहोर/बेंगलोर.
३८. श्रीमती मेतीदेवी पेराजमलजी रतनपुरा बोहरा मोधरा.
३९. संघवी इलेक्ट्रीक कंपनी, आलासण/चेन्नई.
४०. राजेश इलेक्ट्रीकल्स, राजा बिल्डींग, तिरुनेलवेली
४१. शा. कान्तीलाल मंगलचन्द हरण, दाँसपा, मुंबई.
४२. के. सी. आई. वायर्स प्रा. लि. गोवीन्दाप्पा नायक स्ट्रीट, चेन्नई.
४३. अरुण एन्टरप्राईजेस, ब्राडी, पेठ, गुन्टूर-सायला.
४४. फूलचंद भंवरलाल, गोवीन्दाप्पा नायकन स्ट्रीट, चेन्नई, सांधु
४५. मंगल मोती सिन्डीकेट, एम. पी. लेन, बेंगलोर.
४६. बह्लु गगलदास, वीरचंदभाई-थराद, मुंबई.
४७. फेंसी डायमंड, नं. २, ओपेरा हाउस, घानेरा, मुंबई
४८. देसाई शांतिलाल उत्तमचन्द थराद-मुंबई.
४९. मेघराजजी फूसाजी आइदाप्पा, नायकेन स्ट्रीट, चेन्नई-७९, धाणसा.
५०. श्रीमती बदामीदेवी दीपचन्दजी गेनाजी मांडवला, चेन्नई.
५१. मैसुर पेपर सपलायर्स सुलतानपेट सर्कल, बेंगलोर-५३, आहोर.
५२. एक सदग्रहस्थ बाकरा ( राज. )
५३. माइनोक्स मेटल प्रा.लि., मुंबई, चेन्नई, अहमदावाद.
५४. श्रीमती प्यारीबाई भेरमलजी जेठाजी श्रीश्रीश्रीमाल अग्नि गौत्र, सरत.
५५. हीरा नोवेल्टीस, फलॉवर स्ट्रीट, बल्लारी, आहोर.
५६. हालचंदभाई वीरचंदभाई परिवार थराद, सुरत.
५७. ताराचंद ॲण्ड कंपनी ए-१८, भारतनगर, ग्रान्ट रोड, मुंबई.

५८. मु. जयानंद वि. की निश्रा में तीन नव्वाणु, तीन परिवार
५९. महावीर पेपर अॅण्ड जनरल स्टोर्स, गुन्टुर
६०. श्री राजेन्द्रा होजीयरी सेन्टर, मामुल पेट, बेंग्लोर.
६१. शा. सुमेरमल मांगीलाल, मामुलपेट, बेंग्लोर, रेवतडा.
६२. स्व. सुमटीबाई घेवरचंदजी शेषमलजी श्रीश्रीश्रीमाल चन्द्रावण आहोर.
६३. कान्ति ज्वेलर्स एवं आर. फन. सिटी, घेलादेवजी चौक कल्याण, आहोर.
६४. भूरमलजी खीमराजजी कटारिया संघवी परिवार आहोर, गुन्टुर.
६५. एक सद्गृहस्थ - जालोर ( राज. )
६६. शा गटमल कपूरचन्दजी छत्रीया वोरा, बाकरा.
६७. श्रीमति सुबटीबाई छगनराजजी कंकु चोपडा, बेंग्लोर.
६८. स्व. विक्रमकुमार नेणचंदजी घेवरचंदजी छत्रीया वोरा, सूराणा.

## -: सह संरक्षक :-

१. शा. तीलोकचंद मायाचंद, गुलालवाडी, मुंबई-४, आहोर.
२. नरेन्द्रकुमार एण्ड कुं. पहला भोईवाडा लेन, मुंबई-२, आहोर.
३. प्रविण एण्ड कं. बेगम बाजार, हैदराबाद.
४. सुन्दर फर्नीचर, ७६४, सदाशीव पेठ, बाजीराव रोड, पूना.
५. सुबोधभाई उत्तमलाल महेता धानेरा निवासी, कलकाता.
६. राजेन्द्र स्टील हाउस, ब्राडी पेठ, गुन्टुर.
७. श्री राजेन्द्र टॉवर नं. १३, समुद्र मुद्दाली स्ट्रीट, चेन्नई, रेवतडा.
८. एम. के. लाइट, ८६७, अविनाशी रोड, कोइम्बटूर.
९. वैभव ए टु झेड डोलर शोप, वासवी महल रोड, चित्रदूर्गा, सायला.
१०. महेन्द्र ग्रुप, विजयवाडा ( आ.प्र. )
११. श्री मानमलजी भीमाजी छत्रिया वोरा कोइम्बटूर, सूराणा.
१२. पीरचंद महावीरकुमार मैन बाजार, गुन्टुर, जालोर.
१३. जैन इन्टरनेशनल, ६५, गोवींदाप्पा नायकन स्ट्रीट, चेन्नई, सियाणा.
१४. अशोकभाई शांतिलाल शाह बोरीवली मुंबई.
१५. अशोक गोल्ड, ७, काका साहेब गाडमील मार्ग, खेड गली, मुंबई
१६. एम्पायर मेटल्स इन्डिया, मुंबई.
१७. राजगुरु इन्टरप्राईज, चेन्नई
१८. श्रीमती जमनादेवी भोमचंदजी भंसाली - भीनमाल मुंबई.
१९. मुकेश टेक्सटाईल्स, रायपुर, अहमदाबाद.

# अनुक्रमणिका


| क्रम संख्या | विषय | पृष्ठः |
|---|---|---|
| १ | प्रस्तावना | ८-९ |
| २ | प्रस्तावना (गुजराती भाषांतर) | १०-११ |
| ३ | किञ्चिद् प्रास्ताविकम् | १२ |
| ४ | प्रथमप्रकाश (अनित्यभावना) | १ |
| ५ | द्विितीयाप्रकाश (अशरणभावना) | २२ |
| ६ | तृतीयाप्रकाश (संसारभावना) | ३९ |
| ७ | चतुर्थीप्रकाश (एकत्वभावना) | ५३ |
| ८ | पञ्चमीप्रकाश (अन्यत्वभावना) | ६८ |
| ९ | षष्ठीप्रकाश (अशुचिभावना) | ८३ |
| १० | सप्तमीप्रकाश (आश्रवभावना) | ९५ |
| ११ | अष्टमीप्रकाश (समवंभावना) | ११९ |
| १२ | नवमीप्रकाश (निर्जराभावना) | १३८ |
| १३ | दशमीप्रकाश (धर्मस्वाख्यातभावाना) | १५७ |
| १४ | एकादशीप्रकाश (लोकस्वरूपभावना) | १७९ |
| १५ | द्वादशीप्रकाश (बोधीदुर्लभभावना) | १८९ |
| १६ | त्रयोदशीप्रकाश (मैत्रीभावना) | २१० |
| १७ | चतुर्दशीप्रकाश (प्रमोदभावना) | २२५ |
| १८ | पञ्चदशीप्रकाश (कारुण्यभावना) | २४८ |
| १९ | षोडशीप्रकाश (माध्यस्थभावना) | २७१ |
| २० | परिशिष्ट - १ (कथानुक्रमणिका) | २८९ |
| २१ | परिशिष्ट - २ (उपयुक्तग्रन्थाणि) | २९७ |
| २२ | शुद्धिपत्रक | २९८ |

# प्रस्तावना

विदाङ्कुर्वन्तु विविविदिषावन्तः सन्तः शमामृतनिःस्यन्दोदन्वदुन्मज्जिष्णवः शान्तसुधारसनामाऽन्वर्थतामितोऽयं ग्रन्थो भव्यजनमनआरामोल्लासनामृतवर्ष इति । सुप्रसिद्धाश्चास्य प्रणेतारः पर्युषणपर्वपठ्यमानश्रीकल्पसूत्रसुखबोधिकाभिधटीकारचयितृत्वेनोपाध्यायोपाध्युपधारिणः श्रीमद्विनयविजयनामानः। मन्दमतिसत्त्वोपचिकीर्षया चैभिः पूज्यवरैः श्रीसिद्धहेमशब्दानुशासनान्तर्गतोपयुक्ततमसूत्रसन्दर्भमाकृष्य सन्ध्यादिप्रकरणानुक्रमेण व्याकृतं श्रीहेमलघुप्रक्रियाख्यं व्याकरणं पञ्चत्रिंशत्सहस्र श्लोकप्रमाणस्वोपज्ञटीकासमलङ्कृतम् । द्रव्यानुयोगगणितानुयोगप्रकाशकलोकप्रकाशाख्यविंशतिसहस्रानुष्टुप्श्लोकप्रमितस्वग्रथितग्रन्थप्रकाशितप्रावीण्यानामपूर्ववैदुष्यवतामेषां सुविख्यातमनुयोगचतुष्टय-गोचरं पाण्डित्यम् । किं चैतच्छान्तसुधारसग्रन्थप्रतिष्ठितमैत्र्यादिभावनाचतुष्टयोपेतानित्यादिभावनाद्वादशकाभिधप्रस्तावषोडशकं गुर्जरभाषोचितविविधच्छन्दोभिरप्युपनिबद्धमपि सन्धिविभक्तिसमासादिदोषलेशवर्जितमिति चित्रीयन्ते चेतांसि चेतनावतां सुधियां संस्कृतवैषयिकतदपूर्ववैदुष्या, यद्वा किमाश्चर्यं नूतनव्याकरणव्याकर्तॄणां तादृशां गीर्वाणभाषासरसीसरभसक्रीडने।

रचितोऽयं ग्रन्थः सं० १७२३ वर्षे खंभातसमीपवर्तिगन्धारनगरे श्रीविजयप्रभसूरिशासने । पूज्यपादाश्चेमे न्यायविशारदोपाध्यायपदभूषितश्रीयशोविजयसमकालीनाः, यतः काश्यामुभाविमौ सहाध्यायिनावास्ताम्, किं च सिद्धचक्रमहात्म्यप्रतिपादकश्रीपालनृपरासकं संपूर्णमनिर्मायैवैते कालं कृतवन्तो विनयविजयोपाध्याय-वराः समाप्तवन्तश्चश्रीयशोविजयोपाध्यायाः ।

एतद्ग्रन्थप्रणेतृभिरन्येऽपि ग्रन्था ग्रथिता भविष्यन्तीति तर्कयामहे, परं न जानीम इत्यत्र तुदुल्लेखलिखनासमर्था वयम् । ग्रन्थान्तप्ररूपितप्रशस्त्यैव तत्पट्टपरम्पराज्ञानसंभवाद्विरमामहे तदुल्लेखायासात् ।

उपयुक्ततमस्यास्योपर्येकापि टीका भूतपूर्वा नाभूदतो-भव्यजीवोपकारकत्वेन मन्दमतिजनापेक्षितत्वेन च शान्तमूर्त्तिमुनि-वरश्रीवृद्धिचन्दान्तेवासि-पं० श्रीगम्भीरविजयगणिभी रचितेयं टीकैतदग्रन्थोपन्यस्ता सं० १९६८ वर्षे । एतट्टीकाप्रत्याः सर्वत्र दुष्प्रापत्वेन प्रतिलेखनव्ययबाहुल्येनापि शुद्धत्वसन्देहत्वेन सुपत्रोपर्यङ्कनद्वारा प्राकट्यकरणं निर्णीतं संसदाऽल्पमूल्येन लाभदायकत्वं शुद्धत्वादिकं च विचार्य ।

मुद्रापणो चास्य गीर्वाणभाषाविदुष्याः साध्व्याः श्रीलाभश्रिया उपदेशन भावपुरस्थश्राविकावर्गेणामुककार्यसञ्चितद्रव्यसमर्पणोदारता दर्शिता, संसदा च तत्स्वीकृत्य सटीको मुद्राप्य प्रकटितोऽयम् । श्राविकावर्गहितायोत्तममुनिवराणां साध्वीनां पुस्तकभाण्डागाराणां चार्थे मूल्यादुपदीकरिष्यते ।

ग्रन्थेऽस्मिन्नङ्कितुर्द्रष्टुर्वा यत्किमपि स्खलितं दृष्टिगोचरं भवेच्छ्रीमतां विदुषां वाचकानां तदाधाय कृपां

पत्रद्वारा निवेदनीयं संसदे यतो द्वितीयावृत्तिमुद्रापणवेलायां तच्छुद्धौ यत्येतेत्यर्थना क्षमायाचनपूर्वकम् । शोधनेऽस्य संसच्छास्त्रिणा जेठालालशर्मणा हरिभाईतनुजेन कृतः प्रयासो यथाशक्त्यतस्तस्य धन्यवादं दद्महे। साध्व्याः श्रीलाभश्रिया उपदेशेनात्रत्यश्राविकावर्गस्येदृशे ज्ञानोपचयकार्ये प्रवृत्तिं द्रव्यव्यय च दृष्ट्वा महोपकारं मन्यामहे शुद्धान्तःकरणेनास्या अन्वर्थनाम्न्याः साध्व्याः ।

पूज्याश्चटीकाकाराः पं० श्रीगम्भीरविजयनामानोऽर्वाङ्मुद्रणसमाप्तेरस्मिन्नेव वर्षे पौषकृष्णाष्टम्यां रात्रौ कालधर्मं प्राप्य स्वर्गमगमन्नित्यत्र स्थाने स्थानेऽस्माकं शोकप्रदर्शनम् । ग्रन्थमिमं प्रकाशितं दिदृक्षवोऽप्येते पूज्या द्रष्टुं नाशकंस्तथापि तदिच्छानुसारेण मुद्रितं तल्लाभं लभमानान् भव्यांश्चदृष्ट्वा स्वात्मनः स्वास्थ्यं लप्स्यन्त इति तर्कयित्वैषा लघ्वी प्रस्तावना समाप्यते । परमात्मा तदात्मनः शान्तिं वितनुतात् , तेषां चैतट्टीकारचनप्रशस्तप्रयासो-ऽस्मन्मुद्रणायासश्चफलेग्रहिर्भूयादिति । तथास्तु ।।

श्रीजैनधर्मप्रसारकसभा. ज्येष्ठशुक्लप्रतिपद्.
संवत् १९६६. भावनगर.

# प्रस्तावनानुं गुजराती भाषांतर

आ *शांतसुधारस* ग्रंथ खरेखरा गुणनिष्पन्न नामवालो छे, अने भव्यजनोना अन्तःकरणमां अमृतनी वृष्टि करीने तेने नवपल्लव बनावे तेवो छे. आ ग्रन्थना कर्त्ता *श्रीमद् विनयविजयजी* उपाध्याय छे, के जेओ समुदायमां पर्युषण पर्वमां सर्वत्र वंचाती तेमनी करेली *कल्पसूत्र उपरनी सुखबोधिका* टीकाना कारणथी सुप्रसिद्धछे. एओ साहेब *श्रीसिद्धहेम शब्दानुशासन* उपरथी अल्पमति जीवोना हितने माटे *हेमलघुप्रक्रिया* (व्याकरण) ना रचनारा छे, अने तेनी उपर तेमणे पोतेज ३५००० श्लोक प्रमाण टीका रचेली छे. उपाध्याय अपूर्व विद्वत्ता धरावनारा हता, चारे अनुयोगमां प्रवीण हता, तेमनी द्रव्यानुयोग अने गणितानुयोगमां प्रवीणता *लोकप्रकाश* नामनो तेमनो करेलो ग्रंथ बतावी आपे छे. ए ग्रंथ पण २०००० श्लोक प्रमाण अनुष्टुप् वृत्तमां बनावेलो छे. आ शांतसुधारस ग्रंथमां अनित्यादिक बार अने मैत्र्यादि चार मली १६ भावनाना १६ प्रस्ताव छे, ते दरेक जुदी जुदी ढालमां बनावेला छे. संस्कृत भाषामां एवी ढालबंध रचना करवी, अने तेमा संधि, विभक्ति, प्रत्यय के समासादिकनो पण दोष आववा न देवो, ए तेमना संस्कृत भाषाना पूर्ण परिज्ञानने बतावी आपे छे. परंतु संस्कृत भाषामां व्याकरण बनावनारनो ए भाषा उपर एवो प्रबल काबु होवानुं संभवित ज छे.

आ ग्रंथ संवत् १७२३ मां खंभात पासे आवेला *गंधार* नगरमां *श्री विजयप्रभ सूरिना* शासनमां कर्त्ताए रचेलो छे. न्यायशास्त्रविशारद उपाध्यायजी *श्री यशोविजयजी* महाराजना एओ समकालीन हता, बहुधा साथे रहीने ज एमणे विद्याभ्यास करेलो छे. *काशी* जइने विद्याभ्यास करवामां पण साथेज हता. *सिद्धचक्रना* महात्म्यसूचक *श्रीपाल राजानो* रास बनावतां अपूर्ण स्थितिमां एओ कालधर्म पाम्या छे. ए रास पाछलथी यशोविजयजी महाराजे पूर्ण करेलो छे. उपर सूचन करायेला ग्रंथो उपरांत बीजी तेओ साहेबनी कृति होवानो संभव छे, परंतु ते अमारा जाणवामां न होवाथी अत्रे तेनो उल्लेख करी शकता नथी. ग्रंथकारे ग्रंथांते प्रशस्ति लखेली होवाथी तेमनी पट्टपरंपरा संबंधी विशेष लखवापणुं रहेतुं नथी.

आ अत्युत्तम ग्रंथ उपर एक पण टीका प्रथम थयेली नहोती, अने ग्रंथ भव्य जीवोने परम हित करे तेवों होवा छतां सामान्य बुद्धिवालाने टीकानी अपेक्षा रहेती हती, तेथी शांतमूर्ति मुनिराज *श्री वृद्धिचंदजी* महाराजना शिष्य पंन्यासजी *श्री गंभीरविजयजी* गणिअे संवत् १९६८ मां आ ग्रंथ साथे प्रगट करवामां आवेली टीका रचेली छे. ते टीकानी लखेली प्रत मलवानी मुश्केली जणावाथी तेमज एक प्रत लखावतां सुमारे दश बार रुपीयानो खर्च थाय तेम होवाथी अने ते पण शुद्धहोवानुं असंभवित जणावाथी सामान्य स्थितिवाला पण अल्प किंमतमां तेनो लाभ लई शके, सहेजे मली शके अने शुद्धताने माटे निःसंदेहपणुं रहे, इत्यादि लाभना कारणो विचारी तेने शुद्धकरी सारा

कागल उपर छपावी पुस्तकाकारे प्रगट करवानो सभा तरफथी निर्णय करवामां आव्यो. आ कार्यपरत्वे संस्कृत भाषाना अभ्यासी अने गुणवान् साध्वीजी *श्री लाभश्रीजी* महाराजे भावनगरना श्राविका समुदायने उपदेश आप्यो, जेथी ते वर्ग तरफथी अमुक कार्य प्रसंगे एकठी करवामां आवेली रकम आ कार्यमां आपी देवानी भावना बताववामां आवी, सभाए तेनो स्वीकार कर्यो अने तेना परिणामे आ ग्रंथ टीकासहित शुद्धसारा कागल उपर छपावीने प्रगट करवामां आव्यो छे. आ ग्रंथ उत्तम मुनिमहाराज अने साध्वीवर्गने अहींना श्राविकावर्गना हितार्थे वगर मूल्ये भेट तरीके आपवानुं मुकरर करवामां आव्युं छे. पुस्तकभंडारमां पण अर्पण करवानुं ठराव्युं छे.

आ ग्रंथनी अंदर प्रुफ तपासवा विगेरेमां जे कांई दोष रही गयो होय तेने माटे विद्वानो पासे क्षमा याचना करवामां आवे छे, अने ते लखी मोकलवानी कृपा थशे तो बीजी आवृत्ति वखते सुधारी लेवानी कबुलात आपवामां आवे छे. आ ग्रंथनी शुद्धता परत्वे सभाना *शास्त्री जेठालाल हरिभाईनो* सारो प्रयास होवाथी तेमने माटे अत्र संतोष बताववामां आवे छे. *साध्वी श्री लाभश्रीजीना* उपदेशथी भावनगरनो श्राविका समुदाय आवा ज्ञानवृद्धिना कार्यमां भाग लेवा लाग्यो छे, अने पोताना द्रव्यनो आवा कार्यमां सदुपयोग करवा लाग्यो छे, तेथी ए उत्तम साध्वीजीनो अहीं अंतःकरणपूर्वक आभार मानवामां आवे छे.

टीका कर्त्ता पंन्यासजी श्री गंभीरविजयजी महाराज आ ग्रंथ पूर्ण छपाइने प्रसिद्धथया अगाउ चालु वर्षना पोष वद ८ नी रात्रीए स्वर्गवासी थवाथी ते संबंधी अहीं खेद प्रदर्शित करवामां आवे छे. तेओ साहेब जो के आ ग्रंथ प्रसिद्धथयेलो दृष्टि जोवा उत्कंठित हता, छतां जोइ शक्या नथी; परतुं हवे ते ग्रंथ तेमनी धारणा अनुसार प्रगट थयो छे, एम जाणी अने भव्य सत्त्वोने तेनो लाभ लेतां देखी तेमना आत्माने शांति प्राप्त थशे, एम कल्पना करी आ टुंकी प्रस्तावना समाप्त करवामां आवे छे. परमात्मा तेमना आत्माने शांति आपो, अने तेमनो आ ग्रंथनी टीका रचवानो तेमज अमारो छपावीने प्रगट करवानो प्रशस्त प्रयास फलिभूत थाओ. तथास्तु.

**जेठ सुदी १**
**संवत् १९६९.**

**श्री जैनधर्मप्रसारक सभा.**
**भावनगर.**

# किञ्चित् प्रास्ताविकम्

भो जिनवचनैकप्रवणाः ! प्रस्तुत काव्यरचना तु अत्यन्तप्रसिद्धा जैनवाङ्मयेषु । श्रमणसङ्घे तु अस्याः पठनादिकमपि भूरि प्रचलितं, वैराग्यनिर्झरकल्पत्वात् । अनुबोभूयन्ते हि मुनिवृन्दा एतत्काव्यस्वाध्यायनिमग्ना आनन्दकल्लोलामपूर्वशमरससागरसमापत्तिं । पठ्यते पाठ्यते च वैराग्यसंवर्धन-संरक्षणार्थं । प्रयच्छन्ति परार्थवासितान्तःकरणा उपदेशका जनेभ्यः संसारनिःसारतारसपानमस्मात् सुधारसोदधिसकाशात् । सङ्कलिता अत्र सर्वेऽपि विचार-चिन्तनपथा यान् लब्ध्वा भव्यैरतीते सम्यग्दर्शनादिकं प्राप्तं, अधुना प्राप्यन्ते आयति तु ये प्राप्स्यन्ते । नैतद् बहिरेकोऽपि अन्यः चिन्तनपथं यदत्र न सङ्कलितः । विलक्षणता तु अस्या अन्यवैराग्योत्पादकरचनेभ्यः तु अस्या लयबद्धगेयपद्धतिः यद् गान-श्रवणरसिकानामनादिवज्रदुर्भेद्यसंसाररागस्यापि द्रवीकरणक्षमतां प्रापयति ।

रचनाकार-विद्वद्कुलावतन्स-महोपाध्यायश्रीविनयविजयानां विस्तृतजीवनचरित्रं तत्तत्पुस्तेकेषु प्रसिद्धं एव तस्मात् नात्र लिख्यते । तेषां अन्याऽपि कल्पसूत्रसुबोधिकावृत्ति-लोकप्रकाश-श्रीपालरासादिरचनाः सङ्घे तत्तत्प्रसङ्गे महतादरेण पठ्यन्ते । पंन्यासश्रीगम्भीरविजयगणिवरेणापि एतदुपरि टीका कृता ।

अधुनैव इदं ग्रन्थरत्नं द्वाभ्यां सम्पादक-प्रकाशकाभ्यां पृथक् प्रकाशितं एव तथापि न एषः प्रयासो निरर्थको यस्मात् अत्र प्रतिगाथोपरि तद्गाथाभावानुरूपा कथापि सङ्कलिता, यत्स्वाध्यायभावनादिषु अत्यन्तोपयोगी भविष्यति । न च शङ्कनीयं यदुत "Copy-Paste" प्रयासो एव इदं यस्मात् प्रतिकथाविषये नानाग्रन्थेषूपलब्धा तदेव कथा शोधिता अवलोकिता च, यद्रसपूर्णा गाथाभावानुरूपा आभाता सैव गृहीता । केचित् स्थलेषु एककथोपरि दशाधिकथाग्रन्था विलोकिताः । तत्तत्कथास्थलं तु परिशिष्टे उल्लिखितमेव । मौलिकरचना तु तेषां पुरातनमुनिपुङ्गवानामेव ।

प्रकाशनावसरे मद्विनेय-दिवङ्गतमुनिश्रीतत्त्वानन्दविजयस्य स्मरणमपि साम्प्रतमेव । यस्य कल्पना-सङ्कलना-यत्नमेवाधुना प्रकाश्यते । मुनिस्तु एकवाहनाकस्मान्निमित्तं प्राप्य एतत्भवापूर्णसाधनां पूर्णीकरणार्थं परलोके प्रयातः । वर्तमाने यत्रापि सो भूयात् तत्रापि आराधना-समाधिं लभेत् इति कामये ।

प्रकाशने तु छद्मस्थतावशात् अनाभोगवशात् अज्ञानतावशाच्च ये केऽपि त्रुट्योऽत्र सन्ति ते मैत्री-माध्यस्थपरायणविद्वज्जनाः शोधयन्तु मार्जयन्तु ज्ञापयन्तु च । भविका ग्रन्थपठनपाठनाभ्यां निर्मलचित्तवृत्तिं समासादयित्वा सिद्धिसुखं प्राप्यन्तु येन एतत्शुभप्रयत्नः सफलो भवेत् ।

**– जयानन्दः**

# ॥ अथ शान्तसुधारसः ॥

## । सटीकः ।

## । प्रथमः प्रकाशः ।

विदितसकलविद्या योगिनो वन्दनीया विजितसकलदोषश्रेणयो येन जाताः ।
मुनिशिवपथयाने स्यन्दनं शीघ्रयायि प्रतिदिनरसनीयं शान्तपीयूषपानम् ॥
शान्तसुधारसग्रन्थः श्रीविनयविजयवाचकवरविहितः ।
व्याख्यायते किञ्चिन्मया स्वल्पमतिभव्योपकाराय ॥

इह हि सर्वेणापि हितैषिणा संसारिजन्तुना सर्वदुःखपरिजिहीर्षया मोक्षसाधने प्रयतितव्यम् । मोक्षसाधनेषु सर्वेषु मनःशान्तिरेव प्रधाना, सा चानित्यादिशुभभावनाभावितमनोभिः प्राप्यतेऽतस्तदर्थिभिरनन्तरसूचिता भावना भावनीयाः । ताश्च प्रकरणादिषु निबद्धाः सुखं भावनीयाः सम्पद्यन्ते । अतः पाठकवर्याः स्वपरोपकाराय षोडशभिः प्रकाशैः शान्तसुधारसाभिधानेन शास्त्रेण भावयन्ति । तत्रादौ विघ्नोपशान्तये चिकीर्षितशास्त्रपरिसमाप्तिकामनया चाशीर्मङ्गलमाह–

( शार्दूलविक्रीडितं वृत्तम् )

नीरन्ध्रे भवकानने परिगलत्पञ्चाश्रवाम्भोधरे,
नानाकर्मलतावितानगहने मोहान्धकारोद्धुरे ।
भ्रान्तानामिह देहिनां स्थिरकृते[1] कारुण्यपुण्यात्मभि
स्तीर्थेशैः प्रथितास्सुधारसकिरो, रम्या गिरः पान्तु वः ॥१॥

व्याख्या– *इह भवकानने भ्रान्तानां देहिनां स्थिरकृते कारुण्यपुण्यात्मभिस्तीर्थेशैः प्रथिताः सुधारसकिरो रम्या गिरो वः पान्तु* इति क्रियासण्टङ्कः, इहास्मिन् प्रत्यक्षानुभूयमानेऽनेकदुःखपूर्णे चतुर्गत्यात्मक इति यावत्, *भवकानने* संसारारण्ये, *भ्रान्तानां* असुखाद्यात्मकेष्वपि भोगादिषु सुखत्वबुद्धिविपर्यासवशेन भ्रान्ता दिङ्मूढभावप्राप्तत्वेन धावमानास्तेषां, *देहिनां* संसारोदरवर्तिप्राणिनां, *स्थिरकृते* शुद्धधर्मप्रापणोपायपूर्वकजन्माद्यभावसंपादनेन मोक्षस्वरूपेऽचलनिवासे स्थितिस्थापनाय, निर्देशस्य भावप्रधानत्वादेवं व्याख्या । *कारुण्यपुण्यात्मभिः करुणा* सर्वेषां दुःखिनां सकलदुःखेभ्यः समुद्धरणस्वभावस्तद्भावः कारुण्यं तेन *पुण्यो* हीनोत्तमादिषु समानोपकारस्वभावतया पवित्रो निर्मल इति यावत्, आत्माऽनन्तज्ञानादिमयचेतनस्वभावो येषां तैः, *तीर्थेशैः* सर्वतीर्थस्वाम्यर्हद्भिः, *प्रथिता*याः समवसृतौ समग्रद्वादशाङ्गीरूपेणोपदिश्य त्रिभुवने विस्तारितास्ताः, *सुधारसकिरः* सुधारसो जन्मादिसकल–रोगसन्तापपापहारित्वादमृतरसस्तस्य तुल्यः (याः) किरः प्रसरो (राः) व्याप्तयो यासां ताः, *रम्या* आनन्दोत्पादनेन शब्देन मधुरललितत्वेन च श्रवणमनसोः परमविनोदकारिण्यो गिरोऽर्हद्वाण्यो, *वो* युष्मान्, अनन्तरवक्ष्य–माणतादृग्भवकानने निपतनात् *पान्तु* रक्षां कुर्वन्तु, कीदृशीत्युत्तरार्धेनाह–*नीरन्ध्र* इति *नितरां* बाहुल्येनाभावं प्राप्तं रन्ध्रमन्तरालं यस्माज्जन्तूनां निर्गमहेतुमार्गस्तस्मिन् । अत्रायं भावः– निगोदवर्तिजीवानामेकस्मिन्श्वासोच्छ्वासकाले

*सप्तदश* हितकृते इत्यपि पाठः जन्मानि भवन्त्यतो जन्मजरामरणानामन्तरालस्यालक्ष्यमाणत्वेन प्रतिसमयमभिनवकर्मबन्धाच्च नीरन्ध्रो भवः, तस्मिन्, नीरन्ध्रत्वे हेतुः शास्त्रकारः स्वयमेवाह–*परिगलत्पञ्चाश्रवाम्भोधरे* परि सर्वतः सन्ततं सर्वदेति यावत्, *गलन्तो* वर्षन्त एव, पञ्चाश्रवाः प्राणातिपातानृतभाषणास्तेयवृत्तिमैथुनधन–कुटुबादिममत्वानि त *एवाम्भोधराः* पर्जन्यादयो मेघा यस्मिन्, अनेन भवकाननस्य सदा नवपल्लवता सूचिता । *नानाकर्मलतावितानगहने* नाना ज्ञानावरणादिघात्यघातिदेशसर्वघातिजीवक्षेत्रपुद्गलविपाकादीनि *कर्माणि* ज्ञानादिगुणाच्छादनस्वभावानि तान्येव *लता* मूलोत्तरप्रकृत्यादिभेदभिन्नकर्मवृक्षाणां शाखाप्रशाखावल्लीतन्तुरूपास्तासां वितानाश्चतुर्दिग्भ्यः परस्परसंमिलितप्रदेशास्तैर्गहनमुत्क्षिप्तपदमुञ्चनावकाशाभावाद् गुपिलं, तस्मिन् । *मोहान्धकारोद्धुरे मोहो* मिथ्यात्वमोहनीयादिभेदभिन्नसमग्रमोहनीयकर्मरूपः स *एवान्धकारो* ज्ञानादिदृशो व्याघातकारी तेनोद्धुरमतिनिबिडतया व्याप्तं, तस्मिन् निपतनाद्रक्षन्त्वित्यर्थः ।।१।।

यथा जिनवचः पाति तदेव दर्शयति यथोक्तं श्रीहेमविजयगणिरचित कथा– रत्नाकरे

राजगृहे नगरे श्रीश्रेणिको नाम राजा, तस्याऽभयो मन्त्री, तत्र च सुमहत्तरे वैभारगिरिकन्दरे वसन् प्रान्तकाले लोहखुरेण पित्रा वीरवचः श्रवणे कारितनिषेधो रौहिणेयाऽभिधस्तस्करो राजगृहं स्वैरं मुमोष ।

एकदा चौर्यं विधाय स्वपुरमागच्छन् रौहिणेयोऽन्तराले भगवतः समवसरणं मत्वेति दध्यौ, अस्मिन् पथि गच्छतो मम वीरवाक्श्रवणेन पितुराज्ञाभङ्गः, किं चाऽन्यः कोऽपि पन्था नास्ति, तेन तस्मिन्नेव पथि पाणिभ्यां कर्णौ पिधाय गच्छतस्तस्य पादे कण्टको भग्नः, तदा चौत्सुक्येन पादात्कण्टकं निष्कासयितुं, कण्टके च सति क्रमोऽपि चलितुमशक्तः स यावदेकेन पाणिना चरणात्कण्टकं निष्कासयति तावद्योजनविस्तारिणी सर्वजीवभाषानुकारिणी पञ्चत्रिंशद्गुणधारिणी भागवती वाणी तस्य कर्णे न्यपतत् । यथा–

अणिमिसनयणा मणकज्ज–साहणा पुप्फदामअमिलाणा ।
चउरंगुलेण भूमिं, न छिबंति सुरा जिणा बिंति ।।

हा, मयेदं बहुश्रुतमिति मां धिग् । कृतपठितविस्मरणोपायेनाऽप्यविस्मृतभगवद्वचसातेन राजगृहे सदा बाढं मुषितैर्नागरैर्विज्ञप्तेन राजा दण्डपाशिकः साक्षेपमुक्तः दण्डपाशिकः स्माह–हे देव ! मार्गं निरुध्य स्थितेष्वप्यस्मासु वायुरिव रौहिणेयस्तस्करो याति, तेन तं धर्त्तुमहं नाऽलम् । इति तेनोक्तेऽभयो मन्त्री तं दण्डपाशिकं प्रोचे–चतुरङ्गिण्या सेनया बाह्यातः पिहितगोपुरं वेष्टयित्वा स्थितेन त्वया वप्रमुत्प्लवमानः स चौरो ग्राह्यः इति प्रेरितेन नगररक्षकेण तथाकृतं तदा च तेन तथैव स्थितेन पुरीरोधमजानानस्तथैव रौहिणेयो धृत्वा राज्ञोऽग्रे नीतः, निहन्यतामयं चौर इति राजाऽऽदिष्टाऽभयः प्रोचे हे स्वामिन्नलोप्त्रोऽयं न निग्रह–मर्हति । तेन विचार्याऽस्य निग्रहः कर्त्तव्य कस्त्वमिति राज्ञाक्ते सोऽवोचत् – हे देव ! शालिग्रामवासी दुर्गचण्डाह्वोऽहं कुटुम्बिकः, कार्येणाऽत्राऽऽगतः पुरीरोधे सति भयभीरुरहं वप्रं लङ्घयित्वा व्रजन्नारक्षकैर्धृतः, नाऽहं चौरो, निरपराधोऽस्मीति वादी स राज्ञा कारायां निक्षिप्य तत्र चरः प्रैषि, चरोऽपि तत्र गत्वा जनांस्तं वृत्तान्तं पृच्छति स्म । चौरेण पूर्वसङ्केतितैस्तद्ग्रामवासिभिः प्रोचे–यदत्र दुर्गचण्डो वसति, स च कार्येण ग्रामं गतोऽस्तीति । ततः समेत्य चरेणोक्तमाकर्ण्य **दम्भविजृम्भितं दुस्तरमिति** मन्यमानेनाऽभयेन विमानप्रतिमाने सप्तभूमिके सौधे देवीभिरिव रमणीयाभी रमणीभिः परिवृते पल्यङ्के पायितमद्यः परिधापितचीनांशुकः स शायितः क्रमेणोत्तीर्णमद्यस्तां दिव्यर्द्धिमवलोक्य विस्मितः सोऽभयाऽऽदिष्टैर्नरैर्जयजयनन्देति मङ्गलानि

भणद्भिरभाणि–हे देव ! अत्र विमाने त्वं सुरोऽभूरेते वयं च तव दासाः, एताश्चाऽप्सरसस्तव पत्न्यः, तेनाऽस्मानादेशेनाऽनुगृहाण, इमाभिरप्सरोभिः सह रमस्व । इदं सर्वं भवतः पुण्यैर्ढौकितं, यावत्ते सङ्गीतकं कुर्वन्ति, तावदेकेन सुवर्णदण्डभृता द्वाःस्थेनाऽऽगत्याऽभिदधे – देव ! प्रेक्षणकं पश्चादवलोकनीयमादौ स्वर्गस्थितिरियं विधीयतां, तथाहि–

योऽत्र देवः सञ्जायते स चादौ प्राक्तने सुकृतासुकृते वदति, तदनु च भोगाननुभवति, तेन तथा कुरुष्वेत्यभिहितो रौहिणेयो दध्यौ, लोहखुरात्मजो रोहिणीप्रभवो रौहिणेय एवाहं, न चाऽहं मृतः तेन नूनमभयेनाऽयं मां धर्तुं प्रपञ्चो रचितोऽस्तीति स्मृतपूर्वाऽऽकर्णितगाथाऽर्थेन महीमिलितचरणान्, स्वेदमलिनकरणान्, म्लानमाल्यान्, सनिमेषेक्षणमालांस्तान्, विलोक्य कपटोऽयमिति ज्ञात्वा प्रोचे – मया पूर्वस्मिन् जन्मनि सप्तक्षेत्र्यां धनमवापि, दानशीलतपोभावरूपो धर्मो निरमायि, शत्रुञ्जयादिमहातीर्थयात्रा व्यधायीति वदन् स पुनस्तैरूचे, हे स्वामिन्निदं सत्यं, किन्तु चौर्यपारदारिकादि च स्वं दुश्चरित्रमपि कथय । स जगौ साधुसङ्गवता मया तच्चौर्यादि किमपि कृतं नास्तीति । तदुक्तं ते मन्त्रिणो जगुः, ईदृशेनाऽपि दम्भेन यो न गृह्यते स चौरोऽपि मोचनीय इति नीतिपरेण मन्त्रिणा विज्ञप्तेन राज्ञा स मुमुचे । धिक् पितुरादेशं, येनेयन्तं कालं सुधापानादिव भगवद्वचनाद्वञ्चितोऽस्मि, येनेह विनाप्येकशः श्रुतेन श्रीवीरवचनेन तरण्डेन समुद्रमिवाऽभय–मन्त्रिमतिसरित्पतिमुत्तीर्णवानस्मि ।

किञ्चाऽथ सम्यग् भगवदुक्तमाकर्ण्य स्वजनुः सफलं करोमीति ध्यात्वा रौहिणेयः श्रेणिकस्य पुरः स्वं नामवंशकर्मादि निवेद्य गिरिकन्दरादिषु निहितं पौराणां धनं दत्त्वा श्रीवीरान्तिके प्रव्रज्य च दिवं ययौ ।।

( द्रुतविलम्बितं वृत्तम् )

**अथानुत्पन्नोऽपि शान्तसुधारसो येनावश्यमुत्पद्यते तं हेतुमाह–**

स्फुरति चेतसि भावनया विना, न विदुषामपि शान्तसुधारसः ।
न च सुखं कृशमप्यमुना विना, जगति मोहविषादविषाकुले ।।२।।

व्याख्या– *भावनया विना विदुषामपि चेतसि शान्तसुधारसो न स्फुरति* इति संटङ्कः । भावनया भाव्यते भववैराग्यादिसमुत्पादनाय पुनः पुनर्मनसि स्मरणेनात्मा मोक्षाभिमुखीक्रियते यया सा भावना–ऽनित्यादिद्वादशविधा मैत्र्यादिचतुर्विधा तया, *विना* स्मरणाभ्यासरहितानां *विदुषामपि* भूरिसिद्धान्तादि–शास्त्रनैपुण्यवतामपि (शान्तसुधारसो न स्फुरति), तर्ह्यन्येषां किमुच्येत ? *शान्तसुधारसः* यो रागद्वेष–कषायविषयपरिणामाभाववान् केवलयथार्थज्ञानशुद्धश्रद्धानादिपरिणतिमयोजीवपरिणामः स शान्तो भावः स एव विवेकवतामजरामरसमसमाधिविधायित्वात्सुधावत्प्रेमविनोदोत्पादकः सुधारसश्च*चेतसि* हृदये । *नेति* नैव । *स्फुरति* जागर्ति । तथा *अमुना विना*ऽनन्तरोक्तजागरायमाणशान्तसुधारसं विना *मोहविषादविषाकुले मोहो*ऽज्ञानकामक्रोधाद्यापादितबुद्धिविपर्यासो *विषादो* रोगशोकादिजनितोऽनेक–विधसन्तापः *क्लेश* इति यावत्, तावेव *विषं* धर्मसुखरूपप्राणापहारित्वाद्धालाहलं तेन आकुलं व्याकुलं निबिडतया भृतं यत्तस्मिन्, जगति भुवनत्रयविभक्ते लोके, *कृशमपि* तुच्छादपि तुच्छं लेशमात्रमपि

सुखरूपमतिभ्रमं विहायान्यदित्यर्थः । *सुखमा*नन्दो *न च* नैव भवति । तस्मात्पारमार्थिकानन्ददायि-श्रीशान्तसुधारसप्राप्तये वक्ष्यमाणभावनाहर्निशं प्रयत्नेन भावनीयेत्यर्थः ॥२॥

❋ ❋ ❋

**अथोद्दिष्टकार्यसिद्धये समुपदिशति-**

यदि भवभ्रमखेदपराङ्मुखं, यदि च चित्तमनन्तसुखोन्मुखम् ।
शृणुत तत्सुधियः शुभभावनाभृतरसं मम शान्तसुधारसम् ॥३॥

व्याख्या-भो भोः *सुधियः !* सूक्ष्मभावग्रहणे शोभनाध्यानधारणादिषु नैपुण्यवती धीर्बुद्धिर्येषां ते सुधियस्तेषां सम्बोधनं, *यदि* संसारनैर्गुण्यदर्शनेन भवतां *चित्तं* मनः *भवभ्रमखेदपराङ्मुखं भवेषु* नारकतिर्यङ्नरामरजन्मसु यो *भ्रमो*[1]ऽन्याऽन्यावतररूपावर्तो जलभ्रमे तृणभ्रमिवत् तज्जनितो यः *खेदः* सन्तापस्तस्मात् *पराङ्मुखं* भवभ्रमणपरिश्रान्तत्वेन विमुखमुद्विग्नं वर्तते इत्यर्थः, च पुनर्यदि भवन्मनो*ऽनन्तसुखोन्मुखं अनन्त*मविनाशिस्वाधीनदुःखांशाकलङ्कितोत्कण्ठावर्जितसर्वकालस्थायि-त्वेनापरिमितं *सुखं* सहजानन्दो विद्यते यस्मिन् सोऽनन्तसुखो मोक्षस्तं प्रत्युन्मुखं सोत्कण्ठितं वर्तते, *तद*नन्तरोक्तखेदहरणाय सुखप्राप्तये *शुभभावनाभृतरसं शुभा* निर्जराप्रापणपुण्यसंपादनस्वभावा या *भावनाः* पुनः पुनरनित्यतादिसंस्मरणपरिणतयस्तद्रूपो *भृतः* स्वाङ्गतया धारितो *रसो* रमणरतिस्वादो येन स तथा तं, क्वचिदादर्शे भावनामृतरसमिति पाठः स त्वनुचितः सुगमश्च । ममेत्यस्मच्चित्ते निष्पन्नो बहिः क्रियमाणं *शान्तसुधारसं* पूर्वोक्तशान्तसुधारससमुत्पादनाभिधानो ग्रन्थस्तं *शृणुत* श्रवणक्रिया-विषयीकुरुत, कृत्वा च प्रतिदिनं चेतसा विभाव्यतामित्यर्थः ॥३॥

❋ ❋ ❋

**अथ प्रथमतो भावनाकार्यं दर्शयन्नाह-**

सुमनसो मनसि श्रुतपावना निदधतां द्व्यधिकादशभावनाः
यदिह रोहति मोहतिरोहिता-ऽद्भुतगतिर्विदिता समतालता ॥४॥

व्याख्या- शोभनं परद्रोहचिन्तनादिरहितं *मनो*ऽन्तःकरणं येषां तेषां सम्बोधनं हे *सुमनसः !* *द्व्यधिकादशभावना* मनसि *निदधतां,* याः द्वाभ्यामधिका *द्व्यधिका* दशभिः संख्येया भावना *दशभावनाः* द्व्यधिकाश्च ता दशभावनाश्चेति द्वादशभावनाः, *मनसि* चेतसि ध्यानचिन्तनविषये *निदधतां* नितरां धार्यतां कण्ठे मनोहररत्नमालामिव । कथम्भूतास्ताः ? *श्रुतपावनाः श्रुतं* जिनागमादि यथार्थशास्त्रज्ञानं तेन पावना यथार्थवस्तुस्वरूपविचारमयोत्पन्नत्वेन पवित्राः, यद्वा यस्यायथार्थग्राहिश्रुतज्ञानं भवति तस्यापि भाविताः सत्यो यथार्थग्राहि श्रुतं कुर्वन्ति वर्धयन्तीति *श्रुतपावनाः*, यद्वा शास्त्रनिबद्धाः साधुभिरुपदिश्यमानाः श्रुताः सत्यो रागादिमलिनं श्रोतृहृदयं श्रवणमात्रेण पवित्रयन्तीति *श्रुतपावनाः*, एवं प्रभावाः कुतो भवन्तीत्यत आह-यद् यस्मात्, *इह* भावनाभावितजनहृदये, *मोहतिरोहिताद्भुतगतिः मोहेन* मिथ्यात्वमोहनीयादिना

---

१. न्योऽन्या

*तिरोहिता* समाच्छादिताऽद्भुता चमत्कृतिकारिणी केवलज्ञानाद्युत्पादिका *गतिः* शक्तिर्यस्याः सा तथा, *विदिता* जिनागमे योगिजने च सुप्रसिद्धा प्रकटप्रभावा न तु नामश्रवणमात्रा *समतालता समता* सर्वत्र प्राणिगणे द्रव्यक्षेत्रादिपदार्थे रागद्वेषममत्वाभावेन तुल्यपरिणतिरूपा सैव *लता* सर्वेष्टसाधिका सुरतरुशाखा *रोहति* शुभभावनाभाविते हृदये सरसभूप्रदेशे कल्पद्रोरङ्कुरवत्समुत्पद्यते । ततोऽसंशयं सर्वप्रभावसिद्धिरतो मनसि भावनाऽवश्यमेव भाव्येत्यर्थः ।।४।।

एतद्विषये श्रीहरिभद्रसूरिकथानकं यथोक्तं 'मन्नहजिणाणं' टीकायां –

श्रीचित्रकूटे हरिभद्रो विप्रश्चतुर्दशविद्याज्ञानज्ञः । विद्ययोदरं स्फुटतीति उदरे पट्टः, जालं, कुद्दालो निःश्रेणी ( च, तैः ) सह चलति । यत्पठितमहं न जानामि तस्य शिष्यो भवामीति प्रतिज्ञा । एकदा चतुष्पथासन्नभूमिमव्रजत् । तत्र याकिनी नाम साध्वी आसीत्, तया

''चक्किदुगं हरिपणगं पणगं केसवो चक्की ।
केसव चक्की केसव दु चक्की केसी य चक्की य ।।''

इति गाथा पेठे । न च तेन बुद्धा । अग्रे गत्वोक्तम् – मातः ! खरं चिकचिकापितं । साध्व्योक्तं नवं लिप्तम् । अहो ! अनयाऽहमुत्तरेणापि जितः– इति तां ववन्दे । त्वच्छिष्योऽस्मि । गाथार्थं ब्रूहि मातः । सा प्राह स्म–मम गुरवः सन्ति । हरिभद्रः प्राह– क्व ते ? ( अत्र सन्ति । ततः केनापि श्रावकेण स ) चैत्यं नीतः । जिनदर्शनं तत्प्रथमं हर्षः ।

एवं स्तुत्वा पश्चाज्जिनभट्टाचार्यदर्शनं । प्रतिपत्तिः । चारित्रं । सूरिपदवी । रहस्यपुस्तका देवताभ्यो लब्धाः । ते चादरेण जितदिक्पटाचार्याच्छिन्न ८४ ( चतुरशीति–) मठप्रतिबद्धचउरासीनामकप्रासादस्तम्भे विविधौषधनिष्पन्ने जलज्वलनाद्यसाध्ये क्षिप्ताः ।

एकदा भागिनेयौ हंस–परमहंसौ पाठयति प्रभुः । निष्पन्नौ परं बौद्धतर्कांस्तन्मुखेन पिपठिषतः । गुरुणा ज्ञानिना वार्यमाणावपि तत्पार्श्वं गतौ । जरतीगृहे उत्तारकः । बौद्धाचार्यान्तिके तद्वेषस्थौ पठतः । कपलिकायां रहस्यानि लिखितः । प्रतिलेखनादिसंस्कारवशाद्दयालू इव ज्ञात्वा गुरुणाऽचिन्ति–ध्रुवं श्वेतामबरावेतौ । द्वितीयाह्ने सोपानश्रेणौ खट्याऽर्हद्बिम्बमालिलिखे । तदासन्नायातौ तौ पादौ न दत्तौ । ( यतः, नरकफलमिदं न कुर्वहे श्रीजिनपतिमूर्द्धनि पादयोर्निवेशम् ।) रेखात्रयाङ्कस्तत्कण्ठश्चक्रे । बुद्धोऽयं जात इति कृत्वा उपरि पादो दत्तः । उपरि चटितौ । गुरुणा दृष्टौ । गुरोः समक्षं निषण्णौ तौ । गुर्वास्यच्छायापरावर्तं दृष्ट्वा तत्कैतवं तत्कृतमेव मत्वा जठरपीडामिषेण ततो निरक्रामताम् । कपलिकां लात्वा गतौ । तौ चिरान्नायातौ । विलोकापितौ न स्तः । राजाग्रे कथितम्–सितपटावुत्कटकपटौ तत्त्वं लात्वा यातः । कपालिकामानायय । पृष्ठे सैन्यमल्पं गतं । दृष्टिदृष्टिः । द्वावपि सहस्रयोधौ तौ । ताभ्यां निहतं राजसैन्यम् । उद्वृत्तनष्टैरुपराजां गत्वा कथितं तत्तेजः । पुनर्बहुसैन्यप्रैषः । दृष्टिमेलापकः । युद्धमेकः करोति । अपरः कपलिकापाणिर्नष्टः । हंसस्य शिरश्छित्त्वा राज्ञे दर्शितं तैः । तेनापि गुरवे दत्तम् । गुरुराह–किमनेन, कपलिकामानायय । गता भटाः । रात्रौ चित्रकूटे प्राकारकपाट्योर्दत्तयोस्तदासन्ने सुप्तस्य परमहंसस्य शिरश्छित्त्वा तैस्तत्रार्पितम् । तेषां बौद्धानां तत्सूरेश्च सन्तोषः । प्रातः श्रीहरिभद्रसूरिभिः शिष्यकबन्धो दृष्टः । कोपः । तैलकटाहाः कारिताः । अग्निना तापितं तैलम् । १४४४ बौद्धा होतुं खे आकृष्टाः ( शकुनिकारूपेण पतन्ति ) । गुरुभिर्वृत्तान्तो ज्ञातः (प्रतिबोधाय)

साधू प्रहितौ । ताभ्यां चत्वारो गाथा दंत्ताः –

बोधः । शान्तिः । १४४४ ग्रन्थाः प्रायश्चित्तपदे कृताः । चित्रकूटतलहट्टिकास्थेन तैलवणिजा प्रतयः कारिताः । तत्प्रथमं याकिनीधर्मसूनुरिति हारिभद्रग्रन्थेष्वन्तेऽभूत् । १४४० पुनर्भवविरहान्तता । 'गुणसेणअग्गिसम्मा' इत्यादिगाथात्रयप्रतिबद्धं समरादित्यचरित्रं नव्यं शास्त्रं क्षमावल्लीबीजं कृतम् । १०० शतक–पश्चाशत्–षोडशक–अष्टक–पञ्चलिङ्गी–अनेकान्तजयपताका–न्यायावतारवृत्ति–पञ्चवस्तुक–पञ्चसूत्रक–श्रावकप्रज्ञप्ति–नाणायत्तकप्रभृतीनि हारिभद्राणि ।

❋ ❋ ❋

अथ समतोत्पादविरोधिमनोवृत्तिपरिहारायोपदिशति–

( रथोद्धतावृत्तम् )

आर्तरौद्रपरिणामपावक–प्लुष्टभावुकविवेकसौष्ठवे ।
मानसे विषयलोलुपात्मनां, क्व प्ररोहतितमां समाङ्कुरः ॥५॥

व्याख्या- *विषयलोलुपात्मानां विषयाः* शब्दरूपगन्धरसस्पर्शास्तेषां विलासेषु *लोलुपो*ऽतिगाढ–तरलम्पट *आत्मा* मनोद्वारा जीवो येषां तेषां, *आर्तरौद्रपरिणामपावकप्लुष्टभावुकविवेकसौष्ठवे मानसे आर्तं* च *रौद्रं* च आर्तरौद्रे तयोर्यः स्वपरपीडाकर इष्टनाशा १ ऽनिष्टसंयोग २ रोगप्रतिकाराकुल ३ निदानकरण ४ चिन्तारूपैकाग्र्यानुबन्धी चतुर्विध *आर्तपरिणामः*, जीवेषु मारणताडनाङ्कनादि ५ पैशून्याद्यनृतभाषण ६ परस्त्रीपरधनादिहरण ७ सकलविषयसाधनधनसंरक्षण ८ चिन्तारूपैकाग्र्यानुबन्धी चतुर्विधो *रौद्रपरिणामः* स एव *पावको* जलाद्यभावशान्तिस्वभावोऽग्निस्तेन *प्लुष्टं* दग्धं भस्मरूपकृतमिति यावत्, *भावुकं* मङ्गलभावनायुक्त–मीदृशं, *विवेकस्य* सदसत्स्वपरहेयोपादेयवस्तुविभिन्नताकारिज्ञानस्य यत्सौष्ठवं चातुर्यं सौन्दर्यं च यत्र तस्मिन्नीदृशे तेषां *मानसे* हृदयस्थले *समाङ्कुरः समः* सर्वत्र निर्विकारसदृशपरिणामस्तस्याङ्कुरः प्रथमैकांशोत्पत्तिः सोऽपि *क्व प्ररोहतितमां* अतिशयप्रयत्नेनाऽपि न प्ररोहतीत्यर्थः, ततः का पुष्पफलाद्याशा, अनन्तरश्लोकद्वयेऽयमाशयः- शुभभावनाभावितजनमानसे शान्तसुधारससंभवोऽस्ति विषयलम्पटार्तरौद्रपरिणामपरिणते नास्तीति तदर्थिभिः शुभभावना भावयितव्या इत्यर्थः ॥५॥

उक्तं हि आचार्यलक्ष्मीसूरिभिः उपदेशप्रासादे –

षट्खण्ड साधयित्वा ब्रह्मदत्तः चक्रवर्ती बभूव । पुरा तस्यैकाकिनोऽटव्यां भ्रमतो द्विजेनैकेन नीरं पायितमभूत् । स द्विजस्तं चक्रवर्तिपदप्राप्तं ज्ञात्वा बहुसैन्ये मां कथं ज्ञास्यतीति ध्यात्वा जीर्णसूर्पटकपादरक्षणकादिना विसदृशं रूपं कृत्वा भ्रमति । तद्दृष्ट्वा राज्ञा स्वसेवकादानायितः । तमुपलक्ष्य तुष्टो राजा वरं ददौ । स्त्रीवचसा विप्रो भोजनं दीनारयुगं च ययाचे गृहे गृहे । तेन तथा कृतम् । एकदा विप्रेणोक्तम्–त्वद्भोज्यं दापय । चक्रिणोक्तम् मद्भोजनं ममैव जरति । विप्रेणोक्तं कृपणोऽसि, दातुं न शक्तोऽसि । ततो राज्ञा सकुटुम्बः स भोजितः । मदनोन्मत्तो जातः । रात्रौ मात्रादिषु मिथः पशुवत्प्रवृत्तः । मदे समत्तीर्णे लज्जितः । ततः सर्वमनेन कृतमिति रुषैकदा तेनाजापालकं पिप्पलकपत्राणि धनुर्गोलिकाप्रयोगेण

सच्छिद्राणि कुर्वन्तं वीक्ष्य तस्मै किञ्चित्समर्प्य चक्रवर्तिनयनापनयनं कारितम् । स निगृहीतो हन्तुमारब्धः । रे कथमित्थं समाचरितं त्वयेत्युक्ते तेन विप्रो दर्शितः । तदा सहकुटुम्बः स मारितः । तदनु विप्रजातौ रुष्टेन चक्रिणादिष्टम्–प्रतिदिनं द्विजाक्षीणि निष्कास्यानय । मन्त्री तान्यानीय दर्शयति । चक्री करेण मर्दयित्वा मुञ्चति । ततो मन्त्रिणा बहुजीववधं मत्वा वटगुन्दकैर्निर्बीजैः सशीर्ष स्थालं भृत्वा नृपाग्रे मुक्तम् । राजा तु मदरातीनां चक्षूंषीमानीति क्रोधबुद्ध्या हन्ति । एवं षोडशवर्षान्ते रौद्रध्यानेन मृत्वा सप्तमवनौ गतः ।

* * *

**अथ शुभभावनापि यस्मिन् सुसंभवास्ति तमाह–**

( वसन्ततिलकावृत्तम् )

यस्याशयं श्रुतकृतातिशयं विवेक–पीयूषवर्षरमणीयरतमं श्रयन्ते ।
सद्भावनासुरलता न हि तस्य दूरे लोकोत्तरप्रशमसौख्यफलप्रसूतिः ।।६।।

**व्याख्या– *यस्य* भाग्यशालिनो भव्यस्य, *श्रुतकृतातिशयं श्रुतेन* जिनागमाध्ययनश्रवणचिन्तने–श्रद्दधानरूपाभ्यासेन कृत उत्पादितोऽ*तिशयो*ऽतिसूक्ष्मभावावगमकारिबोधनैपुण्याधिक्यं यस्य तं, *सद्भावनासुरलताः सत्यः* स्वपरिहतस्वभावत्वेन समीचीना भावनाः शुभविचारमयचित्तवृत्तयस्ता एव *सुरलताः* कल्पवल्लयस्ताः, यदा *विवेकपीयूषवर्षरमणीयरमं विवेकः* स्वपरसदसद्धेयोपादेयादिवस्तुस्वरूपभिन्न–ताकारिज्ञानं तद्रूपं यत्पीयूषममृतं तस्य यो *वर्षो* वृष्टिः श्रुतकृतातिशयप्राप्तत्वेन पीयूषवर्षशीतलतया *रमणीयो*ऽस्माकं क्रीडनयोग्योऽस्तीति मत्वा यत्नेनैव समुद्भूय *रमः* प्रियवल्लभः पतिस्तं रमं, *श्रयन्ते* सुरपादपवद्वेष्टयन्ति, *तस्य* प्रोक्तविशेषणविशिष्टतावतो भव्यस्य, *लोकोत्तरप्रशमसौख्यफलप्रसूतिर्दूरे न हि लोके* नरसुरनिवासेऽप्युत्तरमनन्यसदृशत्वेन प्रधानं, *प्रकर्षेण शमः* शान्तिक्षमावैराग्यकारुण्यपरिणामप्राप्तिः प्रशमस्तेन जनितं यत्सुखस्य भावः *सौख्यं* सहजानन्दविलासिता तदेव *फलं* शुभभावनासुरलताभ्यो लभ्यं तस्य *प्रसूतिः* समुद्भवः सा दूरे प्रभूतभवभ्रमणारूपप्रचुरकालान्तरे भाविनी *न हि* स्यात् किन्तु स्वल्पतरभवैर्भाविन्येव संभाव्यते । इतरथा भावनाभिराशयस्य संवेष्टनं न संभवतीत्यर्थः ।।६।।**

**एतद् हि अभयकुमारकथानकेन ज्ञाप्यते यथोक्तं उपदेशप्रासादे योगशास्त्रे च –**

एवं बुद्धिमहाम्भोधिः पितृभक्तिपरोऽभयः । निरीहो धर्मसंसक्तो राज्यमन्वशिषत् पितुः ।।
वर्त्तमानः स्वयं धर्मे स प्रजा अप्यवर्त्तयत् । प्रजानां च पशूनां च गोपायत्ताः प्रवृत्तयः ।।
राजचक्रे जजागार यथा द्वादशधा स्थिते । तथा श्रावकधर्मेऽसावप्रमद्वरमानसः ।।
बहिरङ्गान् यथाऽजैषीद् दुर्जयानपि विद्विषः । अन्तरङ्गानपि तथा स लोकद्वयसाधकः ।।
तमूचे श्रेणिकोऽन्येद्युर्वत्स ! राज्यं त्वमाश्रय । अहं श्रयिष्ये श्रीवीरशुश्रूषासुखमन्वहम् ।।
पित्राज्ञाभङ्ग–संसारभीरुरित्यभयोऽब्रवीत् । यदादिशत तत् साधु प्रतीक्षध्वं क्षणं परम् ।।
इतश्च भगवान् वीरः प्रव्राज्योदायनं नृपम् । मरुमण्डलतस्तत्राभ्यागत्य समवासरत् ।।
ततो गत्वाऽभयो नत्वा पप्रच्छ चरमं जिनम् । राजर्षिः कोऽन्तिमोऽथाख्यत्तत्रैवोदायनं प्रभुः ।।
गत्वोचे श्रेणिकं सोऽस्मि राजा चेन्न ऋषिस्तदा । श्रीवीरोऽन्तिमराजर्षिः शशंसोदायनं यतः ।।

श्रीवीरं स्वामिनं प्राप्य प्राप्य त्वत्पुत्रतामपि । नो छेत्स्ये भवदुःखं चेन्मत्तः कोऽन्योऽधमस्ततः ।।
नाम्नाऽहमभयस्तात ! सभयोऽस्मि भवाद् भृशम् । भुवनाभयदं वीरं तच्छ्रयामि समादिश ।।

अथ तं निशन्य नृपः प्राह–''यदाहं रुषा भवन्तं जल्पामि–आः पाप ! मत्पुरतो याहि, मुखं मा दर्शयेति तदा त्वं वत्स व्रतमाददीथाः'' । ततोऽभयस्तातवाक्यं स्वीकृत्य भक्त्या भूपं निषेवते । अथैकदा दुर्धरशीतर्तुसमये श्रीवीरजिनो गुणशिलचैत्ये समवासार्षीत् । श्रेणिकस्तं परमेश्वरं नत्वा धर्मं श्रुत्वा चेलणादेवीयुतः पश्चाद्ववले । वर्त्मनि नद्युपकण्ठे साधुमेकं कायोत्सर्गस्थितं शान्तं दान्तं नत्वाऽपराह्ने स्वगृहमाजगाम । तदनु रात्रौ वासवेश्मनि चेलणया सह रतिजं सौख्यं निषेव्य दोर्भ्यां परिरभ्य राजा सुप्तः । तदा देव्या हस्तो बहिराजागम । तत्करे शीतेन व्यथिते सा विनिद्राऽभूत् । सीत्कारपरा सा तं करं संवृतिमध्ये द्राग् निनाय । तदा निरावृत्तं तं मुनिं स्मृत्वा प्राह–'अहो ! एवंविधे प्राणान्तकरे शीते पतति स कथमधुना भावी' । इदं प्रियावचः श्रेणिकोऽकस्मात्जागरितः श्रुत्वेदं दध्यौ–''मम प्रिया दुराचारिणी विद्यते । अस्या मत्तोऽप्यपरो नरो वल्लभो विद्यते । ततो नूनं दुःशीलेयं, तर्हि अन्या अपि दुःशीलाः ।

बिभ्रदेष इति चेतसि रोषं, गोपतिर्गमयंति स्म निशां ताम् ।
प्रायशो भवति वल्लभजा निर्नेर्ष्यया विरहितो विदुरोऽपि ।।

एवं ध्यायति राज्ञि सूर्य उदीयाय । प्रातराहूयाभयं प्रति जगौ 'इदं मदीयमन्तः पुरं दुराचारं विद्यते, तेनान्तः पुरं द्रुतं प्रज्वाल्यतां तत्श्रुत्वाभयोऽवक्–''तात ! तव वचनं प्रमाणं' । ततः श्रेणिको जिनपार्श्वे जगाम । श्रुत्वा धर्मं वीरं प्रपन्नः–'भगवन् ! चेटकपुत्रीयं किमेकपत्नी किं वाऽनेकपत्नी ?' ।

स्वामी जगौ श्रेणिक ! तावकीनाः सत्यः समस्ता अपि धर्मपत्न्यः ।
जगाद शीते निशि चेलणा तु, स्मृत्वा मुनिस्तं भविता कथं सः ।।

निशम्येति पुरं प्रति सद्योऽधावत् । इतोऽभयो दध्यौ–'मम तातेन यदादिष्टं तत्कार्यं सहसा कृतं विषादाय भविष्यति' । इति विमृश्यान्तः पुरोपान्ते तृणगृहाण्युद्वसानि कृत्वाऽभयेन ज्वलितानि । ततः समवसरणाभिमुखं स निः ससार । वर्त्मनि नृपोऽभयं दृष्ट्वा प्राह–'किं कृतं त्वया ?' । अभयोऽवक् –'त्वदुक्तं कृतं मया' । भूमीशो जगाद–''गच्छ पुरो मद्दशो, मुखं मा दर्शय, एवं कोऽविचार्य कृत्यं करोति' । तच्श्रुत्वाऽभयः–'तातवाक्यं प्रमाणं' इत्युक्त्वाऽग्रतो गत्वा वीरपार्श्वे दीक्षां जग्राह । इतो भूपस्तत्र तृणकुटीरकाणि ज्वलितानि वीक्ष्य दध्यौ–'अहो ! अहं वाहितस्तेन च्छद्मना, तेन दीक्षा गृहीता भाविनी' । ततो मुष्टिं बद्ध्वा यावत्समवसरणे याति तावदभयं गृहीतव्रतं दृष्ट्वा प्राह श्रेणिकः– 'त्वयाहं वाहितः' इत्युक्त्वा पदयोः प्रणम्य क्षमयित्वा गृहे जगाम । अभयः प्रभुपादमूले तपस्तप्त्वा सर्वार्थसिद्धिं प्राप ।

❋ ❋ ❋

**एवं कृतप्रस्तावना वाचकेन्द्रा अधिकृतभावनाः समुद्देष्टुकामा इदमाह–**

**( अनुष्टुब-वृत्तम् )**

अनित्यत्वाशरणते भवमेकत्वमन्यताम् । अशौचमाश्रवं चात्मन् संवरं परिभावय ।।७।।
कर्मणो निर्जरां धर्मसूक्ततां लोकपद्धतिम् । बोधिदुर्लभतामेता भावयन्मुच्यसे भवात् ।।८।।

**व्याख्या– हे *आत्मन् !* त्वमेता अनन्तरवक्ष्यमाणस्वरूपा द्वादश भावना *भावयन्*निरन्तरमात्मानं वासयन्**

भावनापरिणाम–परिणतं कुर्वन् तिष्ठसे इति यावत्, तदा त्वं शीघ्रं *भवा*च्चतुर्गतिपरिभ्रमणदुःखात् *मुच्यसे* सर्वद्रव्यभावबन्धनरहितपरमपदनिवासी भवसीति द्वितीयश्लोकेन संबन्धः । ताः का इत्याह *अनित्यत्वाशरणते* अनित्यत्वं चाशरणता चानित्यत्वाशरणते नित्यं सदास्थायित्वं यस्य नास्ति स सर्वोऽपि पदार्थसार्थोऽनित्योऽवलोकनीयः तद्भावस्तत्त्वं, सर्वानपि संयोगानित्यत्वेन भावयन्निति प्रथमा १ । शरणं संकटापहारिस्वास्थ्यकारि, न शरणम*शरणं*, सर्वोऽपि पौद्गलिकपदार्थस्तथाऽवलोकयन् तद्भावस्तत्तेति द्वितीया २ । *भवं* भवन्त्यस्मिन्नघटनीयत्वेन जीवा, इति भवस्वभावं चिन्तयन् ३। *एकत्वमा*त्मा सर्वत्रैकोऽसहायश्च ४ । *अन्यत्वमा*त्मनो देहादिभ्योऽन्यत्वमवधारयन् ५ । *अशौचं* शरीरस्याशुचिप्रभावादि भावयन् ६। *आश्रवं* मिथ्यात्वादीनां नवकर्मबन्धहेतुत्वं भावयन् ७। *संवरं* समितिगुप्त्यादीनां नवकर्मबन्धस्य विरोधित्वं भावयन् ८। *कर्मणो निर्जरां कर्मणः* पूर्वबद्धस्य द्वादशविधेन तपसा *निर्जरां* देशतो हानिं भावयन् ९ । *धर्मसूक्ततां धर्मस्य* रत्नत्रयरूपमोक्षमार्गस्य सकलवस्तुस्वरूपस्य *सुष्ठु* सर्वविरोधपरिहारवत्*युक्ति*रुपदेशित्वं तद्भावस्तत्ता तां "अर्हतां सदृशा अन्ये तदुपदेशका न भूता न सन्ति न भविष्यन्तीत्येवं" भावयन् १० । *लोकपद्धतिं* चतुर्दशरज्ज्वात्मकस्य *लोकस्य* सर्वाकाशपङ्क्तिष्वात्मनो जन्मस्थितिमरणानि भावयन् ११ । *बोधिदुर्लभतां* अनादितो जीवस्य सूक्ष्मेतरैकेन्द्रियादिष्वतिप्रभूतकालनिर्गमात् सम्यक्त्वादिधर्मसामग्री दुष्प्राप्या तद्भावस्तत्ता तां भावयन् १२ भवान्मुच्यस इत्यर्थः ॥७–८॥

✲ ✲ ✲

अथ यथोद्देशस्तथा निर्देश इति न्यायात्प्रथममनित्यभावनां निर्दिशति । तत्रापि तावच्छरीरानित्यतां भावयन्नाह–

( पुष्पिताग्रावृत्तम् )

वपुरवपुरिदं विदभ्रलीला, परिचितमप्यतिभङ्गुरं नराणाम् ।
तदतिभिदुरयौवनाविनीतं, भवति कथं विदुषां महोदयाय ॥९॥

व्याख्या– वेत्तीति वित् पण्डितस्तत्सम्बोधनं हे *वित्* ! विद्वन् ! आत्मन् ! *इदं* प्रत्यक्षं दृश्यमानं, *अभ्रलीलापरिचितं* अपः सलिलं बिभर्ति धारयतीत्य*भ्रं* मेघस्तस्य या *लीला* वायुतरङ्गैः क्षणदृष्टनष्टता तया *परिचितम*तिशयेन व्याप्तं सदृशस्वभावमिति यावद्, यद्वा भिन्नमेतत्पदं तदा *परिचितं* यदाहारवस्त्रालङ्कारैर्नित्यं *परि*अतिशयेन त्वया चितं पूजितं सेवितं तत्, *वपुः* शरीरं, *अवपुरेव* पुञ्जीभूतविनश्वरपरमाणुराशिरशरीरमेव जानीहि । यद्वाऽ*वपुः* सर्वानादरपरिभवनीयतादिनिवासनगरीं ज्ञात्वा तनुमोहपरिहरः ईदृशमपि *नराणां* मनुष्याणां *अतिभङ्गुरं* स्वयं विनश्वरशीलं वर्तते । *तदतिभिदुर–यौवनाविनीतं तद*नन्तरोक्तस्वरूपं शरीरमतिभिदुरोऽतिक्रान्तो भिदुरो वज्रो येन, वज्रादपि दुर्भेद्यकाम–विकारभृतेन यौवनेन तारुण्येनाविनीतमुद्धतं वर्तते, *तद्विदुषां पण्डितानां महोदयाय* मोक्षादिकल्याणाय *कथं* केन प्रकारेण *भवति*, न कथञ्चिदपि । अतः शरीरमोहं विहाय तपःसंयमादिषु नियोजय येन महोदयाय स्यादित्यर्थः॥९॥

अयं भावः तु भरतचक्रिणः कथया भाव्यते । उक्तं श्री आसडकविकृतविवेकमञ्जर्यां टीकाकार–

श्रीबालचन्द्राचार्यैः—

सांसारिकसुखाम्भोधिमग्नो भरतभूपतिः । विभोर्मोक्षदिनात् पञ्चपूर्वलक्षाण्यवाहयत् ।। 107 ।।

अन्येद्युः स्नात्रनिर्णिक्तगात्रयष्टिरिलापतिः । अन्तरन्तः पुरावासं भूरिभूषणभूषितः ।। 108 ।।

रत्नादर्शगृहं प्राप वारस्त्रीपरिवारितः । तारिकानिकरोद्भासी शशीव गगनाङ्गणम् (यु.) ।। 109 ।।

तदा विलोकमानस्य नृपस्य मणिदर्पणम् । रूपादप्रतिरूपस्य प्रतिरूपमजायत ।। 110 ।।

न्यस्तं मोहेन हिञ्जीरमिव तस्य महीशितुः । तदा लीलालुलत्पाणेर्निर्जगामाङ्गुलीयकम् ।। 111 ।।

विना तेनाङ्गुलीयेन तदादर्शे कनिष्ठिका । निःश्रीका निष्कलेवेन्दुमूर्तिस्तेन विलोकिता ।। 112 ।।

सौभाग्यं भूषणैरेव बिभर्ति वपुरङ्गिनाम् । निश्चेतुमिति मोक्तुं स प्रारेभे भूषणावलीम् ।। 113 ।।

एवं विमुक्तालङ्कारं सोऽपश्यद् वपुरप्रभम् । फाल्गुने मासि विस्रस्तपलाशमिव पादपम् ।। 121 ।।

अचिन्तयच्च देहोऽयं भूषणैरेव भासते । पलालपूरिता चर्मवर्णकैरिव गब्दिका ।। 122 ।।

शरीरं मलमञ्जूषा बहिर्दुर्गन्धभीरुभिः । मूढैः कर्पूरकस्तुरीचन्दनैरधिवास्यते ।। 123 ।।

मलोत्पन्नाद् मलैः पूर्णदतोऽङ्गाल्लीनमन्तरा । बोधिजं ज्ञानमादेयं सरसो जलजं यथा ।। 124 ।।

स्वकीयान् बान्धवानेव मन्ये धन्यतमानिमान् । यैरिदं राज्यमुत्सृज्य लेभे लोकोत्तरं पदम् ।। 125 ।।

अहं तु विषयास्वादपङ्कनिःशूकशूकरः । गणयामि न नामैवमात्मानं मानुषेष्वपि ।। 126 ।।

चिन्तयन्नित्ययं धीमानपूर्वकरणक्रमात् । भावनां भवनाशाय भावयामास भूपतिः ।। 127 ।।

अथोच्चैः सिद्धिसौधाग्रसङ्गजायन्मनोरथः । क्षितीशः क्षपकश्रेणीनिः श्रेणीमारुरोह सः ।। 128 ।।

मुनिस्तदानीमानीतकेवलश्रीकरग्रहः । उत्सवोत्सुकचित्तेन सुरेन्द्रेणाभ्यगम्यत ।। 129 ।।

ख्यापयित्वा बलीयस्त्वं व्यवहारनयस्य सः । शक्रेणाभिदधे दीक्षालिङ्गग्रहणहेतवे ।। 130 ।।

केशसंभारमुत्पाट्य मुष्टिभिः पञ्चभिर्नृपः । दत्तं देवतया शेषं मुनिवेषमुपाददे ।। 131 ।।

***

**अथ सांसारिकाः सर्वे पदार्था अनित्या एवेति दर्शयन्नाह—**

**( शार्दूलविक्रीडितं वृत्तद्वयम् )**

आयुर्वायुतरत्तरङ्गतरलं, लग्नापदः संपदः ।
सर्वेऽपीन्द्रियगोचराश्च चटुलाः सन्ध्याभ्ररागादिवत् ।।
मित्रस्त्रीस्वजनादिसंगमसुखं, स्वप्नेन्द्रजालोपमं,
तत्किं वस्तु भवे भवेदिहमुदामालम्बनं यत्सताम् ।।१०।।

**व्याख्या— भो भव्या ! भवद्भिर्नेत्राणि संमील्य हृदये सम्यगालोच्यतां, आलोच्य कथ्यताम् *इहास्मिन्* प्रत्यक्षदृश्यमाने सचराचरे *भवे* संसारे, *तत्तेषु* प्रत्यक्षपरोक्षेषु सर्वेषु *किमिति* किं नामकं *वस्तु* पदार्थो *भवेद्*भविष्यति । *यद्वस्तु सतां* प्रधानपुरुषाणाम् आनन्दाय शाश्वतसुखाय *आलम्बनमा*श्रयणीयं स्यात् । तत्तु रत्नत्रयं विहाय भवेऽन्यन्न पश्यामः । कुत एवं ? यतो *भवे आयुर्वायुतरत्तरङ्गतरलम् आयुः* सकलसाधनाधारभूतं प्राणिनां जीवितं तत् *वायुतरत्तरङ्गतरलं वायु*रनिलस्तस्य ये तरत्तरङ्गा अस्थिरस्वभावाः कल्लोलास्तेभ्योऽपि *तरलं* चञ्चलतरं वर्ततेऽतो नानन्दालम्बनं, *संपदः* स्थावरजङ्गमसर्वविभूतयो, *लग्नाः* सन्ततसंबद्धाः सर्वाङ्गेन व्याप्ता *आपदो***

विपत्तयो यासां तास्तथाविधाः, कथमानन्दालम्बनम् ! *सर्वेऽपीन्द्रियगोचराश्च सन्ध्याभ्ररागादिवच्चटुलाः सर्वेऽपि* समस्ता अपि न तु कियन्त एव *इन्द्रियगोचराः* स्पर्शनादीन्द्रियाणां रमणस्थलभूताः स्पर्शादिपञ्चविषयाश्च *सन्ध्याभ्ररागादिवत् सन्ध्या* प्रातःकालसायङ्कालसंबन्धिनी द्वे तयोरवसरे जाताः पञ्चवर्णमनोहरा येऽ*भ्रा* वार्दलास्ते यथा क्षणरमणीया दृष्टनष्टा भवन्ति तद्वदेतेऽपि , आदिपदादिन्द्रजालस्वप्नसंपन्मृगतृष्णाविद्युदादिवच्चटुलाश्चञ्चला बोध्याः, अतो नानन्दालम्बनम् । *मित्रस्त्रीस्वजनादिसङ्गमसुखं स्वप्नेन्द्रजालोपमं मित्राणि* सखायः, *स्त्रियः* प्रमदाः, *स्वजना* जननीजनकभ्रातृभगिन्यादयः, तेषां यः *संगमः* संयोगस्तेन यत्*सुखं* विनोदधीः तदपि *स्वप्नेन्द्रजाल*दृष्टवस्तुवदसत्, जीवे संयोगस्याविद्यमानत्वान्नानन्दालम्बनमित्यर्थः ।।१०।।

तदेवं श्रीशुभशीलगणीकृतप्रबन्धपञ्चशतीकथानकेन भाव्यते–

भोजराजोऽन्यदा रात्रेर्मध्ये काव्यपदत्रयमेवं पुनः पुनरुच्चैर्जजल्पेति–

चेतोहरा युवतयः स्वजनोऽनुकूलः, सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः ।
वल्गन्ति दन्तिनिवहास्तरलास्तुरङ्गा,............. ।।

पदत्रयं भूपेन प्रोच्यमानं पुनः पुनः श्रुत्वा चौरः पूर्वं गृहान्तः प्रविष्टो जगौ–

सम्मीलने नयनयोर्नहि किञ्चिदस्ति ।।

ततो राजा तं चौरं मत्वा भृत्यापार्श्वात् धृत्वा प्रातस्तं विज्ञं लक्ष्मीदानेन सम्मानयामास ।।

प्रातर्भ्रातरिहावदातरुचयो, ये चेतनाचेतना,
दृष्टा विश्वमनःप्रमोदविदुरा भावाः स्वतःसुन्दराः ।
तांस्तत्रैव दिने विपाकविरसान्, – "हा तश्याः पश्यत"
श्चेतः प्रेतहतं जहाति न भवप्रेमानुबन्धं मम ।।११।।

व्याख्या– हे *भ्रातर्हे* बन्धो ! चेतन ! *इह* मनुष्यलोके, ये *चेतनाचेतना विश्वमनःप्रमोदविधुराः भावा स्वतः सुन्दराः प्रातरवदातरुचयो दृष्टा* इति संबन्धः । *ये*ऽतिप्रभूतत्वेन नामग्राहं वक्तुमशक्याः *चेतनाश्च* स्त्रीपुरुषहस्त्यश्ववृक्षादयोऽ*चेतनाश्च* सदनस्यन्दनवस्त्रालङ्कारादयः *विश्वमनःप्रमोदविधुरा विश्वस्य* जगज्जनस्य *यन्मनो* हृदयं तस्य यः *प्रमोदो* हर्षप्रकर्षस्तज्जनने *विधुरा* व्याप्ता जननयनमनोऽभिवेष्टितत्वादतिरमणीयत्वेन *भावाः* सौम्यतेजःकान्तिदीप्तपदार्थाः *स्वतो*ऽनलङ्कृतस्वरूपाकारमात्रतः, *सुन्दराः* सुशोभितमनोहराः, उक्त-विशेषणसमग्राः *प्रातरवदातरुचयः प्रात*र्दिवसस्य पूर्वार्धे *अवदाताः* सुविशुद्धा धवलपीतवर्णा *रुचयः* कान्तिप्रकाशा *दृष्टा* अवलोकिताः, *तान् विपाकविरसान् तत्रैव दिने नश्यतः पश्यतो हा प्रेतहतं मम चेतः भवप्रेमानुबन्धं न जहाति तान*नन्तरोक्तपदार्थान्, *विपाकश्चे*तनानां कर्मोदयेनेतरेषां स्वस्थिति-परिपाकेनान्यरूपप्रापणं तेन *विरसान्* विनष्टप्रेमो-त्पादकमाधुर्यस्वभावान्, *तत्रैव दिने* यस्मिन् दिने रमणीया दृष्टास्तस्मिन्नेव पश्चिमार्धे, *नश्यतो* विनाशं गच्छतः, *पश्यतो* विलोकयतोऽपि, *हा* महाखेदकरं, *प्रेतो* नरकस्तत्प्रायोग्य-क्लिष्टकर्मोदयः पिशाचश्च तेन *हतं* नष्टविशिष्टविवेकं ईदृग् *मम* चेतो ममात्मा मन्मानसं वा, *भवप्रेमानुबन्धं* भवसुखं प्रेमानुबन्धो भवप्रेमानुबन्धो विषयरागाखण्डधारावत्त्वं, *न जहाति*

**न त्यजति । किं कुर्मोऽनित्यानपि शाश्वतान्मन्यत इत्यर्थः ।।११।।**

उक्तं हि श्रीलक्ष्मीसूरिभिः उपदेशप्रासादे प्रत्येकबुद्ध "नग्गति" कथानकं तच्चेदम् –:

गान्धारनरेशो नग्गतिनृपः कार्तिकराकायां सैन्यसंयुतो नरेन्द्रो नगराद्राजपाटिकायै विनिर्ययौ । तदा ताम्रपल्लवं मञ्जरीपुञ्जरं छत्राकारं सदाफलमेकमाम्रमद्राक्षीत् । तस्य कान्तस्य चूतस्य मङ्गलार्थमेकां मञ्जरीं नृप आददे । ततः सर्वे सैन्यलोकाः पत्रपल्लवमञ्जरीरादाय दारुशेषं तं वितेनिरे । ततः क्षणान्तरे नृपस्तत्रायातः । स आम्रःकुत्रेति नृपो मन्त्रिणं पप्रच्छ । मन्त्रिणा तस्मिन् काष्ठशेषे प्रदर्शिते पुनरपृच्छत्–"ईदृशोऽसौ कथमभूत् ?" । सचिवोऽवक्–"स्वामिन् ! अस्य महातरोः पूर्वं मञ्जर्येका युष्माभिर्जगृहे, ततः सैनिकाः सर्वे पत्रपुष्पफलादिकं गृहीत्वाऽश्रीकं धनिनं तस्करा इव चक्रुः" । तदाकर्ण्य नृपो दध्यौ–"अहो । श्रियां चञ्चलत्वम् ! यत्तादृशोऽप्यसावाम्रः क्षणान्निःश्रीकतां गतः । यतः–

यदेव तुष्टिकृत् पूर्वे, स्यात्तदेव क्षणान्तरे । जायतेऽनीदृशं वान्ति–वमितं भोजनं यथा ।।
यथा हि बुद्बुदाटोपः, सन्ध्यारागश्च न स्थिरः । संपदोपि तथा सर्वा, न स्थिरा इति निश्चितम् ।।

एवं विमृश्यादृतसाधुधर्मः, प्रत्येकबुद्ध–श्चतुर्थः ।
गान्धारराड् नग्गतिनामधेयः, पृथ्व्यां व्यहार्षीत्सुरदत्तवेषः ।।

❋ ❋ ❋

## अथ विषयमोहमूढं मानसं संबोधयन् गेयपद्याष्टकेनानित्यभावनां स्वयं भावयति–

मूढ मुह्यसि मुधा मूढ मुह्यसि मुधा, विभवमनुचिन्त्य हृदि सपरिवारम् ।
कुशशिरसि नीरमिव गलदनिलकम्पितं विनय जानीहि जीवितमसारम्, मूढ० ।।१२।।

**व्याख्या– *मूढ !* हे अज्ञ ! आत्मन् ! त्वं *सपरिवारं* सह परिवारेण पुत्रवनितादिपरिजनेन सहितं *विभवं* धनसंपदादिपदार्थं *हृदि* मनसि मदीयमेतदिति *अनुचिन्त्य* सदैव रागवशस्वकीयं परिकल्पयन् *मुधा* व्यर्थमेव हितफलप्राप्त्यभावेऽपि *मुह्यसि* मोहाज्ञानवशादेव तत्रासक्तिं यासि न तत्त्वदीयं, सर्वथाऽन्यत्वादित्यर्थः। दूरेऽस्तु परिजनविभवादिकं त्वज्जीवितमप्यसारं वर्तते तच्चिन्तयेत्याह *विनय ! गलदनिलकम्पितं कुशशिरसि नीरमिव जीवितमसारं जानीहि ।* विनयनं विनिवर्तनं मोक्षाभिलाषो विनयस्तत्सम्बोधनं हे विनय ! *अनिलकम्पितम् अनिलो* वायुस्तेन *कम्पितं* धूनितमान्दोलितमिति यावत्, *गलत्पतदेव, कुशशिरसि कुशानि* दर्भाणि तृणानि च तेषां *शिरः* शिखाग्रभागस्तत्र स्थितं यत् *नीरं* जलकणस्त*दिव* तेन सदृशं *जीवितं* सकलकार्याधारभूतमायुर*सारं* सारो दार्ढ्यं न सारमसारमदृढं, रोगादिप्रवाहैः स्वभावतोऽपि काचभाजनवत्क्षणभङ्गुरं *जानीहि,* ज्ञात्वा शीघ्रं निजात्महितमनेन साधयेत्यर्थः ।।१२।।**

दृश्यं च राम–लक्ष्मणवृतान्तं –

रामो हनूमन्तं प्रव्रजितं ज्ञात्वा दध्यौ–'भोगसुखं हित्वा किमयं कष्टप्रदां दीक्षामाददे' । सौधर्मेन्द्रश्चाऽ–वधेस्तज्ज्ञात्वा सभायामूचे–'अहो ! कर्मगतिश्चित्रा, चरमदेहोऽपि रामः स्वयं धर्मं हसति, विषयजं सुखं च प्रशंसति । अथवा ज्ञातं, यदनयो राम–लक्ष्मणयोः कोऽपि गाढतरः स्नेहः, यो भवानिर्वेदकारणम्' । ततः कौतुकाद् द्वौ देवौ तयोः स्नेहं परीक्षितमयोध्यामागत्य लक्ष्मणस्य सद्मनि मायया सर्वमन्तःपुरं करुणस्वरमाक्रन्दद्

दर्शयामासतुः । हा रामेत्यादि बहु विलपन्तीरन्तः पुरवधूः प्रेक्ष्य विषण्णो लक्ष्मणोऽवदत्–'मम जीवितस्याऽपि जीवितं भ्राता मृतः । छलघातिना कृतान्तेन किं कृतम् ? एवं वदतश्च लक्ष्मणस्य वचसा सह जीवितं निर्ययौ', तं च मृतं दृष्ट्वा मिथस्तौ सुरौ विषण्णावूचतुः– 'अहो ! आवाभ्यां किमिदं कृतम् ! विश्वाधारोऽसौ नरः किमावाभ्यां हतः ! एवं स्वं निन्दन्तौ तौ स्वं कल्पं जग्मतुः ।

पश्य भङ्गुरमिदं विषयसुखसौहृदं,पश्यतामेव नश्यति सहासम् ।
एतदनुहरति संसाररूपं रयाज्ज्वलज्जलदबालिकारुचिविलासम् मू० ।।१३।।

व्याख्या- हे चेतन ! *इदं* प्रत्यक्षमनुभूयमानं, भङ्गुरं स्वतो विनश्वरशीलं, *विषयसुखसौहृदं विषयेभ्यो यत्सुख*मानन्दस्तस्य *यत्सौहृदं* सुहृद्बन्धुर्मित्रं च तद्भावः सौहृदं बन्धुतां मैत्रीं च, *पश्य* हृदयदृष्ट्या सम्यग्विलोकय, *सहासं* हसनं हासो हासेन सहितं हस्ततालीदानं तत्सहासं, *पश्यतां* बन्धुमित्राणां विलोकयतां अवगणनां कुर्वन्, *नश्यति* सुतरामदृश्यो (यः) भवतीत्यत *एतत्*प्रत्यक्षं वर्तमानं *संसाररूपं* भवे सर्वाकारं, *रयाज्ज्वलज्जलदबालिकारुचिविलासमनुहरति रयाद*तिवेगवत्त्वेन *ज्वलन्ती* सप्रकाशा *सती या जलदबालिका जलदो मेघस्तस्य बालिकेव बालिका तत्र जातत्वात्तत्पुत्री विद्युत्तस्या या रुचिः* कान्तिस्तस्या यो *विलासो*ऽतिशीघ्रदृष्टनष्टत्वं तम*नुहरति* तेन सदृशतां करोति । तत्र तव कोऽयं प्रतिबन्धोऽनुचित एवेत्यर्थः ।।१३।।

एतद् भावं श्रीआसडकविकृत विवेकमञ्जर्याम् टीकाकृत्श्री बालचन्द्राचार्यैः ख्यापितं भवति श्रीरामचन्द्रकथया

अथो नृपः पङ्क्तिरथो महात्मा तपोवनेषु प्रवया यियासुः ।
रामं निजे राज्यपदेऽभिषेक्तुमुच्चैरुपाक्रंस्त शुभे ग्रहेऽह्नि ।।1 ।।

( उपजातिच्छन्दः )

कैकेय्यथो मन्थरया तमाह न्यासीकृतो योऽस्ति वरस्त्वया मे ।
तेनाद्य भर्तुर्भरतस्य राज्यं प्रयच्छ सत्यं यदि राघवेषु ।।2 ।।
श्रुत्वेति वाक्यं नृपतिः सदम्भं दम्भोलिनेव प्रहतो गिरीन्द्रः ।
पपात मूर्च्छाकुलितो नृसिंहः सिंहासनाद् मीलितलोचनान्तः ।।3 ।।
श्रीखण्डतो यैर्व्यजनानिलैश्च मूर्च्छापनीतास्यपरिच्छदेन ।
आस्थाय सिंहासनमन्तरेति नरेश्वरश्चिन्तितवान् विवेक्ता ।।4 ।।
स्त्रीवाचया चेद् भरतं स्वराज्ये निवेशये स्यादयशस्तदा मे ।
प्रतिश्रुतं चेच्च न पालये स्वं तदा कलङ्कः प्रथमः कुलेऽस्मिन् ।।5 ।।
तदस्त्वकीर्तिर्मम, किन्तु मा भूदभूतपूर्वोऽत्र कुले कलङ्कः ।
ध्यात्वेति निःश्वस्य च दीर्घमुष्णमाकारयामास नृपोऽथ रामम् ।।6 ।।

आहूतमात्रः समुपेत्य रामः प्रणम्य तातस्य पुरो न्यविक्षत् ।
स्नेहस्पृशा साश्रुदृशाऽभिपश्यन् पितापि तं गद्गदवागुवाच ॥7॥
स्वयंवरे वत्स ! पुरा मयाऽस्याः सारथ्यतुष्टेन वरः प्रदत्तः ।
तं याचते केकयराजपुत्री स्वपुत्रराज्येन किमत्र युक्तम् ? ॥8॥
रामोऽप्यभाषिष्ट सुहृष्टचेतास्तातार्थितं युक्तमिदं जनन्या ।
यद् बन्धवे मे भरताय राज्यं धिनोति योऽस्मान् विधुनोति शत्रून् ॥9॥
तथापि तातः सुतवत्सलत्वादतिप्रसादादिति मामपृच्छत् ।
रघुप्रसूतेर्विनयातिपातसंसूचकं तत्तु मनो दुनोति ॥10॥
यस्मै च कस्मैचन राज्यमेतत् तातः प्रसादीकुरुतेऽर्थिनेऽपि ।
कश्चिद् निषेधेऽनुमतौ च तत्र त्वत्पत्तिमात्रस्य न मे विकारः ॥11॥
सुतावुभौ ते भरतोऽप्यहं च दृशाविवावां तुलितानुभावौ ।
निवेश्यतां तद् भरतोऽत्र राज्ये प्रमोदसंपद्भरतो मतं मे ॥12॥
श्रुत्वेति रामाद् मुदितोऽथ यावादिक्ष्वाकुपतिर्नियुक्तान् ।
तावद् बभाषे भरतोऽस्तु राज्यं तातानुयास्यामि तपोवनं त्वाम् ॥13॥
उवाच राजा मम च प्रतिज्ञां स्वमातुराज्ञां च मनुष्व वत्स ! ।
असौ वरं दत्तवरं मयाद्य त्वद्राज्यदानेन यतो ययाचे ॥14॥
अथाह रामो भरतं विभिन्नं सद्वृत्तिशोभस्तव चेन्न लोभः ।
सुसत्त्व ! सत्यापयितुं तथापि तातं गृहाणेदमनिन्द्यराज्यम् ॥15॥
अथो सबाष्पं भरतः प्रणम्य सगद्गदं राममिदं जगाद ।
तातार्ययोर्युक्तमिह प्रदातुं साम्राज्यमादातुमिदं तु मे न ॥16॥
तातस्य सूनुः किमहं न हन्त ! किमार्य ! ये नावरजोऽस्मि शंस ।
सत्येन तन्मातृमुखोऽस्मि सिद्धः समृद्धिमर्थं यदि चिन्तयामि ॥17॥
अथाह रामो नृपतिं मयीह सत्येष राज्यं न ग्रहीष्यते तत् ।
वनं प्रयामीति वदंश्च नत्वा विनिर्ययौ तूणधनुः सहायः ॥18॥
कर्मणो हि प्रधानत्वं, कि कुर्वन्ति शुभा ग्रहाः ।
वशिष्ठदत्तलग्नोऽपि, रामः प्रव्रजितो वने ॥19॥

हन्त हतयौवनं पुच्छमिव शौवनं, कुटिलमति तदपि लघुदृष्टनष्टम् ।
तेन बत परवशा परवशा हतधियः, कटुकमिह किं न कलयन्ति कष्टम्, मू० ॥१४॥

व्याख्या- हन्तेति कोमलामन्त्रणे हे मन्दबुद्धिचेतन ! *हतयौवनं* सुखनिराशास्थानतपोरहितत्वेन दुर्बुद्धिविनाशितं ईदृशं *यद्यौवनं* तारुण्यं तत्, *शौवनं पुच्छमिव अतिकुटिलं* शुन इदं *शौवनं पुच्छमिव* तल्लाङ्गूलवद*तिकुटिलं* वक्राकारं वर्तते । *तदपि* तथाविधमपि *लघुदृष्टनष्टं लघु* शीघ्रमेव *दृष्टं सन्नष्टं* नश्वरशीलं तत्तथा वर्तते । *बत* खेदेऽहो विवेकिचित्तदुःखदं वृत्तं *यत्तेनो*क्तलक्षणेन यौवनेन *परवशाः*

पराधीना जनाः *परवशाः परेषामि*तरजनानां *वशाः* वशवर्तिनः यद्वा *परेषां* पुरुषाणां *वशाः* स्त्रियस्ताभि*र्हतधियः* इति एकं पदं । *हतधियो हता* विनष्टा पापोदयवती पापकारिणी *धी*र्बुद्धिर्येषां ते *हतधियः* । *इह किं कटुकं कष्टं न कलयन्ति* । इह वर्तमानजन्मन्यपि *किमि*ति किंनामकं तत्क*टुकम*तिशयेनासह्यं *कष्टं* कृच्छ्रजीवनकारिणीं पीडां *न कलयन्ति* न प्राप्नुवन्ति सर्वानिष्टं प्राप्नुवन्तीति ज्ञात्वाऽनित्ये यौवनेऽपि धर्मोद्यमो विधेय इत्यर्थः ।।१४।।

यौवनस्य क्षणविलसितं श्रीलक्ष्मीसूरिभिः करकण्डूप्रत्येकबुद्धकथया ज्ञाप्यते उपदेशप्रासादे–

करकण्डुनृपः सनयं राज्यद्वयमन्वशात् । स चान्यदा गोकुलान्यवेक्षमाण एकं तारगौरं तर्णकमद्राक्षीत् । ततस्तस्मिन् जातप्रेमा भूमान् गोदुहमूचे–"एतन्मातुः पयोऽस्यैव देयं, किं त्वन्यासामपि धेनूनां पयोऽप्यन्वहमस्य पातव्यम्" । गोपालोऽपि तथैव विदधे । अथ स वत्सः शशित्विषा स्पर्धमानः पलोपचयेन दुर्लक्ष्यश्चाभूत् । क्ष्मापोऽपरैर्वृषभैः समं तमयोधयत्, परं कोऽपि शाङ्करस्तं नाजैषीत् । पुनः कालान्तरे गोकुलमीक्षितुं नृपो गतः पङ्कुकाद्यैः संघट्यमानमेकं जरद्गवं ददर्श । "महोक्षः स महावीर्यः क" इति गोदुहमपृच्छत् । सोऽवादीत्–"देव ! स एवायं जरातुरो वृषभः" । तन्निशम्य नृपोऽध्यासीत्–"अहो ! अनित्यता सर्वभावानाम् ! यस्य हम्भारवेण ज्याटङ्कारवेण पक्षिण इव बलिनोऽपि बलिवर्दा नेशुः द्रुतं, सोऽधुना पङ्कुकैः कृतां परिघट्टनां सहते । यतः

यद्रूपं पश्यतां नेन्दुदर्शनेऽप्यादरोऽभवत् । सोऽप्यद्य तनुते दृष्ट्योर्जुगुप्सां हि पुरीषवत् ।।

तस्मादिदं विक्रमवयोरूपविभवादिकं पताकाञ्चलचञ्चलं प्रत्यक्षमेव वीक्ष्यते । एवं सत्यपि जनोऽज्ञानाद्यथास्थितं न जानाति । ततोऽहं जन्म सार्थकं स्वभावधर्मानुयायिनं करोमि"।

ध्यात्वेति कृत्वा स्वयमेव लोचं, बिभ्रन्मुनेर्वेषममर्त्यदत्तम् ।<br>
प्रत्येकबुद्धो जिनधर्मरागी, भुवि व्यहार्षीत् करकण्डुराजः ।।

❋ ❋ ❋

यदपि पिण्याकतामङ्गमिदमुपगतं, भुवनदुर्जयजरापीतसारम् ।<br>
तदपि गतलज्जमुज्झति मनो नाङ्गिनां, वितथमति कुथितमन्मथविकारम् ।।१५।।

व्याख्या– अहो मनोदुष्टतां कियद् ब्रूमः । *यदपि भुवनदुर्जयजरापीतसारमिदमङ्गं पिण्याकतामुपगतम् भुवने* त्रिजगति या दुःखेन जेया भुवनः *दुर्जया* निवारयितुमशक्या *जरा* वयोहानिस्तया *पीतो* भक्षितः *सारः* सामर्थ्यं यस्य तत्तथाभूतं *इदं* प्रत्यक्षम् *अङ्गं* शरीरं, *पिण्याको* यन्त्रपीडिततिलानां कल्कः 'खल' इति लोके तत्तां *उपगतं* प्राप्तं, *तदपि* तदापि *वितथमतिगतलज्जमङ्गिनां मनो कुथितमन्मथविकारं नोज्झति* । *वितथा*ऽन्यथास्थिते पदार्थेऽन्यथाग्राहिणी विपर्यस्ता *मतिः* परिणतिर्यस्य तत्तथाभूतं, *गता*ऽपनष्टा *लज्जा*ऽनुचिताकृत्यप्रवृत्तिभ्यो निवृत्तिहेतुपरिणतिर्यस्मात्तत्तथाभूतम्, *अङ्गिनां* देहधारिजीवानां *मनो* हृदयं *कुथितमन्मथविकारं कुथितो* जराप्राप्तत्वेन दुर्गन्धविरस ईदृशो *मन्मथः* कामस्तस्य *विकारो* दुष्टपरिणामस्तं, *नेति* नैव *उज्झति* परित्यजति । शरीरशक्त्यभावेऽपि कामिजनाः मरणान्तपर्यन्तमनोविकारेण दह्यमाना दुःखिनो भवन्तीत्यर्थः ।।१५।।

❋ ❋ ❋

सुखमनुत्तरसुरावधि यदतिमेदुरं, कालतस्तदपि कलयति विरामम् ।
कतरदितरत्तदा वस्तु सांसारिकं, स्थिरतरं भवति चिन्तय निकामम् मू०॥१६॥

व्याख्या– हे चेतन ! *निकामं* भृशमेकाग्रमनसा *चिन्तय, विचारय,* संसारे सर्वोत्कृष्टं *अतिमेदुरं* स्वरूपपुष्टव्याघातवर्जितरोगशोकनिद्रारहितसमग्रसाधनसामग्रीसदासमन्वितप्रभूतकालस्थायितयाऽत्यानन्दघनम् *अनुत्तरसुरावधि अनुत्तरं* सांसारिके श्रेष्ठं, सुरविमानं सर्वार्थसिद्धनामक*मवधी*कृत्य भवनपतिपर्यन्तं देवानां *यत् सुखं* शर्म, *तदपि कालतो* देवायुःस्थितिपर्यन्तप्राप्तेः *विरामम*वसानं *कलयति* प्राप्नोति । *तदा सांसारिकं* संसारे समुद्भवं नरादिजन्मस्त्रीपुत्रधनादिकं, *इतरत्* देवेभ्यो देवसुखेभ्यो व्यतिरिक्तं, *कतरत्* कियत्तरं किं नामकं *वस्तु* पदार्थः *स्थिरतरं* देववस्तुभ्योऽधिकतरकालस्थायि *भवति* ? तन्न किञ्चिदस्तीत्यर्थः ॥१६॥

अनित्यताविषये प्रत्येकबुद्धद्विमुखकथा वाच्या यथा उक्तं श्रीलक्ष्मीसूरिभिः उपदेशप्रासादे–

काम्पिल्यपुरे हरिवंशे यवाभिधो भूपोऽभवत् ।.तस्य गुणमाला प्रियाऽऽसीत् । अन्यदाऽऽस्थानस्थः देशान्तरादागतं दूतं पप्रच्छ–"अन्येषां राज्ये विद्यमानं मद्राज्ये किं न विद्यते ?" । दूतोऽवादीत्–"हे विभो ! तव राज्ये चित्रसभा नास्ति" । ततो नृपः स्थपतीन् चित्रकारानाकार्य जगौ–"मम चित्रसभा क्रियताम्" ।प्रमाणमिति प्रोच्य शुभे क्षणे सभान्यासेच्छया भुवः खातं प्रारेभिरे ।पञ्चमे दिने तस्माद्भूतलात्तेजसा ज्वलन्मौलिः प्रादुरभूत् । रत्नमयं तं वीक्ष्य हृष्टः स्थपत्यादीन् वस्त्रादिभिरपूजयत् । तेऽपि सुरसभासमां शालभञ्जिकादिभिः शालिनीं सभां शीघ्रं वितेनिरे ।ततः शुभे दिने तं दिव्यं मौलिं निजमौलौ संस्थाप्य संसदि तस्थौ ।तन्मौलिमहिम्ना राज्ञ आनने द्वे अभूतां, ।

अन्यदा शक्रमह उपस्थिते द्विमुखो नागरान् 'इन्द्रध्वजः संस्थाप्यताम्" इत्यादिदेश । ततः शुभध्वजपटं माल्यमालिनं किङ्किणीमालभारीणं नादनिर्घोषपूर्वकं पौराः पौरन्दरध्वजमुत्तम्भयामासुः । तं पुष्पफलादिभिः प्रपूज्य केचिन्ननृतुः केचिद्गीतानि विदधुः, एवं महोत्सवैरागात् पूर्णिमा ।सप्तमे दिने नृपोऽपि भूरिविभूत्या तमपूजयत्, सम्पूर्णे चोत्सवे वस्त्रभूषणादि निजं निजमादाय पौराः काष्ठशेषं तमपातयत् । परेद्युस्तं विण्मूत्रलिप्तं कुस्थानसंस्थितं बालाद्यैराक्रम्याणं बहिर्गतो भूपोऽपश्यत् । ततः संवेगमापन्न एवं दध्यौ–"य एवं गतेऽहनि सर्वैर्लोकैः पूज्यमानोऽभूत् स एवाद्य महाकेतुर्विडम्बनां महतीं प्राप्नोति, श्रीशोभा तु क्षणिका दृश्यते, यतः–

आयाति याति च क्षिप्रं, या संपत् सिन्धुपूरवत् ।पांसुलायामिव प्राज्ञास्तस्यां को नाम रज्यते ॥

विडम्बनाप्रायामेनां राज्यसंपदं त्यक्त्वा निःश्रेयसकरीं शमसाम्राज्यसंपदं श्रये" ॥

❋ ❋ ❋

यैः समं क्रीडिता ये च भृशमीडिता, यैः सहाकृष्महि प्रीतिवादम् ।
तान् जनान् वीक्ष्य बत भस्मभूयङ्गतान्, निर्विशङ्काः स्म इति धिक् प्रमादम्, मू० ॥१७॥

व्याख्या– *बते*ति खेदे किं वयं विज्ञाः *स्मः* ? न किञ्चित् । कुत एवम् ? यतो वयं *यैः* सुहृद्बन्धुवनितादिभिः *समं* सार्धं *क्रीडिता* जलाशयवनभुवनशय्यादिषु सविलासं सपरिहासं खेलिताः, *च* पुन *र्ये* जननीजनकपुत्रादयः *भृशमीडिताः भृश*मतिशयेन भोजनाच्छादनालङ्कारस्तुतिभि*रीडिताः* पूजिताः, *यै*र्वनितासुतविद्वद्भिः *सह* साकं

*प्रीतिवादं* विनोदवार्तां *अकृष्महि* अकुर्म । *तानुक्त*विशेषणविशिष्टान् *जनान् भस्मभूत्वं* गतान् रक्षापुञ्जत्व-प्राप्तान् *वीक्ष्य* दृष्ट्वापि *निर्विशङ्काः स्मः नितराम*तिशयेन *विगता* निर्गता *शङ्का* मरणभयं येषां ते निर्विशङ्का अजरामरवन्निश्चिन्ताः स्म इति यावत् । इति प्रोक्तप्रकारेण स्थितेऽपि स्वहितोद्यमरहिता अतो रागादि*प्रमादं धिगस्तु* इत्यर्थः ॥१७॥

उक्तं हि आचार्यलक्ष्मीसूरिभिः उपदेशप्रासादे सगरपुत्रकथा –

अयोध्यायां जितशत्रुनृपोऽभूत् । तस्य पत्नी विजया । तयोः सुतोऽजितजिनेश्वरो बभूव । जितशत्रोरनुजः सुमित्रविजयाह्वयः । तस्य महिषी यशोमती । तयोस्तनयः सगरचक्री अजनि । तस्य चक्रिणः षष्टि–सहस्राणि तनया जज्ञिरे । तेषु जह्नुर्ज्येष्ठोऽभवत् । सोऽन्यदा नृपमप्रीणयत् । ततः पित्रा वरे दत्ते सोऽवादीत्–''त्वत्प्रसादतो भ्रातृयुक्तो दण्डादिरत्नवान् पृथ्वीं दिदृक्षेऽहम्'' । ततश्चक्रिणानुज्ञातः ससैन्यः प्रस्थितः अग्रे चतुर्योजनविस्तृतं योजनाष्टकमुन्नतमष्टापदं वीक्ष्य सर्वैः सहोदरैः सह तमारुरोह । तत्र क्रोशद्वयपृथुलं क्रोशत्रयोच्चं योजनायतं चतुर्मुखं रत्नमयं चैत्यं ददर्श । तत्र स्वस्वमानादिशोभिता ऋषभाद्यर्हतां प्रतिमा भरतादीनां शतं स्तूपांश्च ननाम । तच्छैलशोभां विलोक्य सगराङ्गजो जहर्ष । ततोऽमात्यं केनेदं कारितं चैत्यमिति पृष्टवान् । सोऽप्यूचे–''युष्माकं पूर्वजेन भरतचक्रिणा कारितम्'' । अथ जह्नुः सेवकानाख्यत्– ''ईदृशमपरमद्रिं भरते पश्यत यथाऽस्माभिरीदृशं चैत्यं तत्र कार्यते'' । ते तु चतुर्दिक्षु प्रेक्ष्य प्रेक्ष्यागत्योचुः–''अन्योऽद्रिरीदृशो नास्ति'' । ततो जह्नुर्जगाद–''अस्यैव रक्षां कुर्महे, अग्रे कालानुभावतो जना लुब्धा भाविनः, ते ह्यत्रोपद्रविष्यन्ति, अतोऽस्य रक्षा महाफला'' । इत्युक्त्वा जह्नुस्तं गिरिं परितः सहस्रयोजनोद्वेधां परिखां दण्डरत्नेन क्षणाद्विदधे । तदा च तेन दण्डरत्नेन महीं दारयता नागानां क्रीडागेहानि मृत्पात्राणीव पुस्फुटुः । तत् प्रेक्ष्योपद्रवभीता भुजङ्गाः स्वप्रभुं ज्वलनप्रभुमुपेत्य सौधभङ्गव्यतिकरं जगुः ।

सोऽपि क्रुद्ध एत्य सगराङ्गजानूचे–''भो जडाः ! किमेतत्पृथ्वीभेदनं कृतम् ? ते नागाः क्रुद्धा हनिष्यन्ति'' । जह्नुर्जगौ–''तीर्थरक्षाकृतेऽस्माभिरदः कृतम्, हे भोगीन्द्र ! अज्ञानजमेनद् मत्वा क्षमस्व, नैवं पुनरिदं करिष्यामः'' । इति श्रुत्वाऽहीन्द्रः स्वभुवनेऽगात् । ततो जह्नुरनुजैः सह दध्यौ–''असौ परिखा वारि विना पांसुभिः, पूरिष्यते तदेनां मन्दाकिनीजलैः पूरयाम'' । सर्वैः स्वीकृतम् । ततः स दण्डेनाकृष्य जाह्नवीं तत्र चिक्षेप । भूयोऽपि भोगिगेहास्तदम्भसोपाद्रूयन्त । पुनर्नागलोकं क्षुभितं वीक्ष्य कोपवशाज्ज्वलनप्रभस्तद्वधाय महोरगान् दृष्टिविषान् प्रैषीत् । तैश्च निर्गत्य विषवृष्टिभिर्दृष्टिभिर्दृष्टास्ते सर्वेऽपि सगरात्मजा भस्मतां भेजुः ।

✲ ✲ ✲

**असकृदुन्मिष्य निमिषन्ति सिन्धूर्मिवच्चेतनाचेतनाः सर्वभावाः ।**
**इन्द्रजालोपमाः स्वजनधनसङ्गमास्तेषु रज्यन्ति मूढस्वभावाः, मू० ॥१८॥**

व्याख्या– हे आत्मन् ! अस्मिँल्लोकोदरे *चेतनाचेतनाः सर्वभावाः सिन्धूर्मिवदसकृदुन्मिष्य निमिषन्ति* । *चेतना* एकन्द्रियादिपञ्चेन्द्रियपर्यन्तजीवानां सूक्ष्मबादरजीवशरीरभाषामनः–समुच्छ्वासादयः, *अचेतना* निर्जीवगृहासनरथशिबिकाभाजनवस्त्राभरणधनादयः, द्वन्द्वे कृते ते तथाभूताः *सर्वभावाः* समग्रपदार्थाः, *सिन्धूर्मिवत् सिन्धुः* समुद्रस्तस्य ये *ऊर्मयः* कल्लोलप्रकारा यथा निरन्तरमुत्पद्यन्ते विलीयन्ते तद्वत् चेतनाचेतनसर्वभावा *असकृत्* एकस्मिन्मुहूर्तयामदिनाहोरात्रवर्षयुगादिकेऽनेकशः *उन्मिष्य* समुत्पद्य

**समुत्पद्य, *निमिषन्ति* विलीयन्ते, विनश्य न जानीमः क्व यान्तीत्यर्थः। तर्हि य *इन्द्रजालोपमाः स्वजनधनसंगमाः* क्षणदृष्टत्वेनेन्द्रजालसदृशाः सन्ति ततस्तेषु *ये रज्यन्ति* प्रसक्ता भवन्ति ते *मूढस्वभावा* अज्ञातज्ञेया एव सन्तीत्यर्थः ।।१८।।**

चन्दनमलयगिरिकथा दृश्या यथोक्ता लक्ष्मीसूरिभिः उपदेशप्रासादे–

कुसुमपुरे चन्दननृपो राज्यं पालयति, तस्य पत्नी सुशीला मलयागिरिनामा, तयोः सुतौ सायरनीराख्यौ स्तः, अन्यदा वासवेश्मस्थं नृपं कुलदेव्येत्य प्राह –

अहो राजँस्तवावस्था विषमा भाविनी, अतो झटिति राज्यं त्यक्त्वाऽन्यत्र गच्छ, यतः–

प्राप्तव्यमर्थं लभते मनुष्यो देवोऽपि तं लङ्घयितुं न शक्तः ।

तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं न हि तत्परेषाम् ।।

श्रुत्वेति नृपोऽचिन्तयत्–

आपत्तिमित्रशत्रूणामवश्यंभाविनां भटैः, सन्मुखैरेव गन्तव्यं नश्यतां हीनसत्त्वता ।।

द्विपुत्रः स्त्रीयुतो नृपो रात्रावेव निःसृत्य पर्यटन् क्रमात् कुशस्थलपुरमाययौ चन्दनस्तु देवार्चको मलयागरी तु वनादिन्धनानि लात्वा नगरे विक्रीणाति । अन्येद्युः कस्यचित्सार्थेशस्य दृक्पथे सागता, तद्रूपस्वरेण मोहितो नित्यमिन्धनानां मूल्याधिकदानेन तां विश्वास्य प्रयाणसमये मूल्यदानमिषेणाग्रे कृत्वा प्रपञ्चात्प्रलोभ्य प्रसह्य रथमारोप्य गृहीत्वा निर्ययौ, सा पतिवियोगाकुला निःश्वासानमुञ्चत् । तदा सार्थप आह हे सुभ्रु ! मया सह सुखं भुङ्क्ष्व, मत्कामतापं निर्वापय, ततः साऽवोचत्, यतः–

अगनि मज्झी झखो भलो, भलओ ज विषको पान ।
शील खंडवो नहि भलो, नहि कुछ शील समान ।
अहो वीर मोहि छारदे, कहा निपट ले अंत ।
इण भव शील न खंड हुं, जउ कोपे किरतंत ।।

इतश्च चन्दनेन सर्वत्र गवेषिता, तामलभमानो भृशं पुत्राभ्यां सह स विललाप, यतः–

प्रतिकूले विधौ किं वा सुधापि हि विषायते । रज्जुः सर्पीभवेदाखुबिलं पातालतां व्रजेत् ।

ततस्तच्छुद्ध्यर्थं तत्पुरं विहाय सपुत्रो भूमिं पर्यटन्नेकत्र नदीपूरं दृष्ट्वा एकं पुत्रं वृक्षमूले बद्ध्वा एकं सुतं स्कन्धे कृत्वा नदीमुत्तीर्यापरतटे मुमोच, भूयो द्वितीयमानेतुं नदीमविशत्, अन्तराले गतस्तावन्नदीपूरेण पातितः, तदा स्त्रीपुत्रविरहार्त्तः प्राह–

किहां चन्दन मलयागरी, किहां सायर किहां नीर । जा जा पडे विपत्तडी, सा सा सहे सरीर ।।

तत इतस्ततो बाहू कुर्वन् काण्ठैकखण्डं प्राप्य बहिर्निसृत्य दध्यो । अहो मया राज्यं भुक्तं तद्विपाकाय जातं दैवात् । अतः किं मम जीवितव्येन, भूयोऽपि अचिन्त्यत्–मृतेऽपि कर्माणि न मुञ्चन्ति जीवं । तत आनन्दपुरे एकत्र धाम्नि विशश्राम । तत्र एका स्त्री तं दृष्ट्वा प्रतिपत्तिं चकार । तं श्रुत्वा व्रतभङ्गभीरुः यत्किञ्चित् उत्तरं ददौ – अस्थिरचित्त – दुखार्तनौः सह कः प्रीतिविलासस्तव इति उत्तरं दत्त्वाऽन्यत्र गच्छन् श्रीपुरासन्नतरोरधः स्थितो निद्रां प्राप, तदा तत्रापुत्रे राज्ञि विपन्ने सचिवैः पञ्च दिव्यानि कृतानि, तेभ्यो राज्यं जातं, तन्न्यायेन शास्ति, प्रधानादिभिश्चरणयोर्निपत्य भणितोऽप्यन्यस्त्रीपाणिग्रहणं नाकरोत् ।

अथ कश्चित्सार्थवाहस्तरङ्गिणीपूर्वापरतटस्थवृक्षमूलबद्धौ सायरनीरौ वीक्ष्यासौ स्वपुत्रवत्तयोः परिचर्या चकार, तौ गृहीत्वा स्वपुरे गतः, क्रमेण तौ पूर्णयौवनौ जातौ, सार्थपमापृष्ठ्य श्रीपुरे गत्वा दुर्गपालसेवां चक्रतुः, तत्र स्वपितू राज्यमस्ति । एकदा मलयागरीयुतस्तत्सार्थपतिस्तत्पुरमेत्यानेकोपायनानि नृपस्य पुरो मुमोच, हृष्टो नृप आचष्ट यत्तव रोचते तन्मार्गय, तदा स निजसार्थस्य रक्षार्थं निशि यामिकान् ययाचे, ततो राज्ञादिष्टस्तलारक्षो तौ भ्रातरौ प्रैषीत्, तत्र रात्रौ विनोदाय यामिकाः स्वस्वचरितं प्रोचुः । तदा तावपि यथाजातवृत्तं प्रोचतुः, तद्वृत्तं मध्यस्था पटकुट्यन्तरतो मलयागरी श्रुत्वा स्वसुतौ मत्वा कटिति आलिलिङ्ग, पुत्रावपि निजमातरं नत्वा स्वरूपं शुश्रुवतुः । हे मातः ! प्रभाते सर्वं सुस्थं भावि, मा चिन्तां विधेहि इत्युक्त्वा तामसान्त्वयेताम् प्रभाते मातृसुतै राज्ञे स्वावदातः प्रोक्ताः, भूपः स्वपरिच्छदं दृष्ट्वाऽन्यायकारिणं सार्थपं निर्भर्त्स्य नगरान्निष्कासितवान्, तेषां द्वादशवर्षात्मको विरहो विगतः, राज्यद्वयमनुभवन् सुखेन तस्थौ, दम्पती शीलं प्रपाल्य स्वर्गं गतौ ।

सादृश्यधर्मा वनिता विलासं, प्राप्नोति मर्त्यः शुभपुण्ययोगात् ।
दुःखेऽपि तौ पश्य निजात्तशीलं, नामुञ्चतां तेन यशोऽस्ति विश्वे ॥१॥

❋ ❋ ❋

**कवलयविरतं जङ्गमाजङ्गमं, जगदहो नैव तृप्यति कृतान्तः ।**
**मुखगतान् खादतस्तस्य करतलगतैर्न कथमुपलप्स्यतेऽस्माभिरन्तः, मू० ॥१९॥**

**व्याख्या– *अहो* महाश्चर्यं ! यदयं *कृतान्तः कृतो* विहितोऽ*न्तो* जीवानां प्राणविनाशो येन स कृतान्तो मरणं, सः अनादित आरभ्य *अविरतं जङ्गमाजङ्गमं जगत् कवलयन् नैव तृप्यति, अविरतं* समयाद्यन्तराभावेन निरन्तरं, *जङ्गमं* द्वीन्द्रियादिरूपत्रसजीवगणम्, *अजङ्गमं* पृथिव्यादिस्थावरं तद्रूपं, यज्जगज्जीवराशिः तत् *कवलयन्* भक्षयन्नपि *नैव तृप्यति* नैव सन्तुष्यति । *तस्य मुखगतान् खादतः करतलगतैरस्माभिः कथमन्तो नोपलप्स्यते* । *तस्य* मरणस्य किं कुर्वतः ? *मुखगतान् खादतः* ये मुखे दंष्ट्रामध्य *आगताः* प्राप्ताः प्राणिनस्तान् *खादतश्चर्वयतस्तस्य करतलगतैः* हस्ततले कवलरूपतां प्राप्तैः *अस्माभिर*तिप्रमद्वरैः *कथं* केनोपायेन *अन्तो* विनाशो *नोपलप्स्यते* ? नास्त्येव भवे स उपायस्तस्माल्लप्स्याम एवेत्यर्थः ॥१६॥**

उक्तं हि जयघोषद्विजकथानकं उपदेशप्रासादे –

वाराणस्यां युग्मजसोदरौ काश्यपौ जयघोषविजयघोषाह्वावभूताम् । अन्यदा जयघोषो गङ्गां स्नातुं गतो मुखोपात्तरटन्मण्डूकभक्षकं सर्पमेकं व्यलोकत, कुररपक्षिणा स भुजङ्गोऽपि द्रुतं गृहीत्वोत्क्षिप्याधः क्षितौ क्षिप्तो भक्षयितुं प्रारेभे । तेन पक्षिणा भक्ष्यमाणोऽप्यहिः संदंशदेशीयदंष्ट्रात्रोटितविग्रहं रटन्तं तं भेकं जघास । एवं मिथो ग्रसन्तौ तौ प्रेक्ष्य जयघोषो दध्यौ–"अहो ! संसृतिस्वरूपम् । यतः–

यो हि यस्मै प्रभवति, ग्रसते तं स मीनवत् । न तु गोपयति स्वीयशक्तिं कोऽपि नदीनवत् ॥
कृतान्तस्तु महाशक्तिरिति स ग्रसतेऽखिलम् । तदसारेऽत्र संसारे, का नामास्था मनीषिणाम् ॥

❋ ❋ ❋

**अथानित्यभावनामुपसंहरन्नाह-**

नित्यमेकं चिदानन्दमयमात्मनो, रूपमभिरूप्य सुखमनुभवेयम् ।
प्रशमरसनवसुधापानविनयोत्सवो, भवतु सततं सतामिह भवेऽयम्, मू० ।।२०।।

।। इति महोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्याय-*श्रीविनयविजयगणि*विरचिते शान्तसुधारसगेयकाव्येऽनित्यभावना-विभावनो नाम प्रथमः प्रकाशः ।।

व्याख्या- हे विनय ! *चिदानन्दमयमात्मनो रूपमभिरूप्य नित्यमेकं सुखमनुभवेयम् चिदानन्दमयं* ज्ञानानन्देन पूर्णम् *आत्मनो रूपं* निजचेतनस्वरूपं *अभिरूप्य* चेतसा सम्यग् हल्लक्ष्ये निधाय *नित्यं* निरन्तरं शाश्वतम् *एकं* दुःखांशेनाकलङ्कितं निष्केवलं न तु सांसारिकवद्दुःखेन मिश्रितमिति यावत् । ईदृक् *सुखं* परमानन्दम् *अनुभवेयं* स्वानुभवप्रत्यक्षं कुर्याम् । तथा वाचकवरः सज्जनानभिनन्दयति *इह भवे सतामयं प्रशमरसनवसुधापानविनयोत्सवः सततं भवतु* । एतच्छास्त्राध्ययनश्रवणमननाद् *इह* जिनशासने *भवे* संसारे शेषेऽवशिष्यमाणे सति *सतां* साधुपुरुषाणां *अयमु*क्तवक्ष्यमाणस्वरूपः *प्रशमरसनवसुधापानविनयोत्सवः प्रशमरसः* शान्तस्वभावे रतिः स एव *नव*मपूर्वं *सुधापानं* तस्मिन् *विनयो*ऽनुनयः प्रार्थना तद्रूप *उत्सवो* मङ्गलं *सततं* निरन्तरं *भवत्वि*त्यर्थः ।।२०।।

तत्तु श्रीशुभशीलगणिकृतप्रबन्धपञ्चशत्याम् अर्जुनमालाकारदृष्टान्तेन ज्ञेयम्-

राजगृहे बहिरन्येद्युर्मुद्गरपाणियक्षसदने पुष्पकरण्डकं भृत्वा अर्जुनमालिको मालिकायुतो दिनात्यये स्थितः । तदाऽकस्मात्तत्र षट् स्तेनाः सुरभिपुष्पगन्धतः समाययुः । तदा ते चौरास्तां मालिकां दिव्यरूपां दृष्ट्वाऽर्जुनमालिकं बद्ध्वा यक्षाऽर्जुनमालिकयोः पश्यतोः सतोर्भोगं कर्तुं लग्नाः तदाऽर्जुनो यक्षं प्रत्यवग्-भो यक्ष ! तव पश्यतः सतो मम पत्नीम् एते भुञ्जते त्वं मम सारां न कुरुषे । पत्नीं तेभ्यो भोगं ददानां दृष्ट्वा रुष्टः पत्नीं प्रत्यपि तदा मुद्गरपाणियक्षोऽर्जुनदेहेऽवतीर्य प्रियायुतान् षडपि स्तेनान् जघान । ततोऽर्जुनो प्रतिदिनं षड् नरान् सप्तमीं स्त्रियं हत्वैव देवगृहं याति । ततो मार्गगतान् षट् पुरुषान् एकां स्त्रियं च हत्वैव तिष्ठति । ततः पुरजनाः पुरः प्रतोलीं दत्त्वा कोटस्योपरिस्थाः षट् नरान् स्त्रियमेकां हतान् दृष्ट्वा प्रतोल्या बहिः निर्गच्छन्ति, ततः सदैवं पापं करोति ।

अत्रान्तरे सुदर्शनश्रेष्ठी चतुर्दश्यां पौषधोपवासपारणे भगवन्तं श्रीवीरं बहिरुद्याने समवसृतं श्रुत्वाऽभिग्रहं ललौ, अद्य प्रभुं प्रणम्य पारणं कर्तव्यं मया, ततः प्रातः स काल एव सुदर्शनश्रेष्ठी प्रभुं नन्तुं निर्गच्छन्त दृष्ट्वा लोका जगुः भो श्रेष्ठिन् ! क्षणं तिष्ठ, यावत् स यक्षः स्वस्थाने याति । ततः श्रेष्ठी लोकवचनमवगणय्य प्रतोल्या बहिर्निर्ययौ तदा यक्षः सुदर्शनं दृष्ट्वा मुद्गरमुत्पाट्य दधाव हन्तुं तदा तत्र सुदर्शनश्रेष्ठी नमो अरिहंताणं इत्युच्चैः स्वरं कृत्वा तस्थौ । ततो नमस्कारप्रभावात् यक्षोऽर्जुनशरीरं मुक्त्वा स्वं स्थानकं ययौ । अर्जुनो निश्चेष्टकाष्ठो भुवि पपात । क्षणात्सचेतनोऽभूत् । सुदर्शनेन पृष्टं भो अर्जुन ! त्वया बहु जनहननात् भूरिपापं कृतम् । कथं छुटिष्यत्यस्मात्पापात् ? अर्जुनोऽवग्अहं न जाने, किन्तु मुद्गरयक्षेण सर्वं कृतं, स्वसम्बन्धः

प्रोक्तः । श्रीवीरप्रभुपार्श्वं गत्वा जिनवाणी श्रुत्वा प्राप्तवैराग्योऽर्जुनमालिकः प्रभुं प्रणम्य दीक्षां लात्वा तस्मिन्नेव पुरे भिक्षायै भ्रमति, षण्मासीं यावद्बुभुक्षितो लोकाक्रोशान् सहित्वा सर्वकर्मक्षयान्मुक्तिं ययौ ।

**इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणिसतीर्थ्यतिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां शान्तसुधारसटीकायामनित्यभावनाविभावनो नाम प्रथमः प्रकाशः समजनि ।।**

**यत् स्वयमेव अनित्यं तत् कथं शरणदं भवति इति अनेन सम्बन्धेन आयाता अशरण भावना प्रारम्यते ।**

❀ ❀ ❀

# ॥ द्वितीयः प्रकाशः ॥

प्रथमप्रकाशेऽनित्यभावना विभाविता । अनित्याश्च पदार्थाः शरणदा न भवन्तीत्यनेन संबन्धेनायातामशरणभावनां विभावयन्नाह । तस्याश्चायमादिमः श्लोकः—

( शार्दूलविक्रीडितम् )

ये षट्खण्डमहीमहीनतरसा निर्जित्य बभ्राजिरे,
ये च स्वर्गभुजो भुजोर्जितमदा मेदुर्मुदा मेदुराः ।
तेऽपि क्रूरकृतान्तवक्त्ररदनैर्निर्दल्यमाना हठा-
दत्राणाः शरणाय हा दश दिशः प्रैक्षन्त दीनाननाः ॥१॥ [२१]

व्याख्या- हे चेतन ! मरणे समागते सति तव कः शरणं भविष्यतीति हृदये निभालय । कृतान्ताग्रे बलिनोऽपि शृगालकल्पाः। यतो *ये* भुजादिबलोद्धताश्चक्रवर्तिनः, *अहीनतरसा षट्खण्डमहीं निर्जित्य बभ्राजिरे । अहीनतरसा* न हीन*महीनं* मनुष्यजात्यपेक्षया परिपूर्णं, *तरो* बलं देहसामर्थ्यं सैन्यं च तेनाहीनतरसा, यद्वा-ऽहीनतरसा परिपूर्णशीघ्रजयनक्रियया ब्रह्मदत्तापेक्षया वर्षशतमात्रेणापि, *षट्खण्डमहीं* हैमवद्वर्षधरपर्वतादारभ्य समुद्रमेखलापर्यन्तपरिपूर्णभरतक्षेत्रभूमिं *निर्जित्य* देवतानमनुष्यवशान् स्ववशीकृत्य *बभ्राजिरे* नवनिधानचतुर्दशरत्नादिभिः शुशुभिरे तेऽपि। तथा *ये च भुजोर्जितमदा मुदा मेदुराः स्वर्गभुजः । च* पुनर्ये त्रिभुवने सिद्धान्तोक्ताः प्रसिद्धा, *भुजोर्जितमदा भुजाभ्यामर्जितो* वृद्धिं गतो *मदो* येषां ते तथा, *मुदा मेदुराः मुदा* आनन्दविशेषेण हर्षप्रकर्षेण वा *मेदुरा* विमानर्द्धिसुराङ्गनादिषु पुष्टप्रेमभराः *स्वर्गभुजः* सुरेन्द्रादयो देवा *मेदुः* सविलासा बभूवुः । *तेऽपि* प्राणान्तसमये *अत्राणास्त्रा*णेन रक्षणसमर्थाश्रयेण रहिताः *क्रूरकृतान्तवक्त्ररदनै-र्हठान्निर्दल्यमाना हा शरणाय दीनानना दश दिशः प्रैक्षन्त । क्रूरो* दुष्टभयङ्करस्वभावः *कृतान्तो* मरणं तस्य *यद्वक्त्रं* मुखं तस्मिन् ये *रदना* दन्तास्तै*र्हठा*द्बलात्कारेण *निर्दल्यमाना* नितरां चर्व्यमाणा, *हा कष्टं* तेऽपि *शरणाय* मरणाद्रक्षणाय *दीनानना* दीनवदनाः सन्तो *दश दिशः* स्वशरीरादूर्ध्वाधस्तिर्यक्षु *प्रैक्षन्त* विलोकयन्ति स्म । तर्हि मरणे समागते तव क आधार इति चिन्तयेत्यर्थः ॥१॥

गाथोक्तभावः कथ्यते सुभूमचकवर्तीकथया यथा उपदेशमालायाम् –

द्वयोः देवयोः श्रेष्ठधर्मविषये विवादं जातं । तस्मात् परिक्षार्थं आगतौ जीर्णो जटाधारी तीव्रं तपस्तप्यन् ध्यानाधिरूढो यमदग्निनामा तापसो दृष्टः तत्परीक्षाये चटकचटकिकयोः स्वरूपं कृत्वा तत्श्मश्रूणि कुलायं बद्ध्वा तौ स्थितौ, तत्र स्थितश्चटको मनुष्यभाषया प्रोवाच भो बाले ! त्वमत्र सुखं तिष्ट, अहं हिमवत्पर्वते गत्वा समागच्छामि तदा चटकिकयोक्तं भो प्राणेश्वर ! अहं त्वा गन्तुं न ददामि, यतो यूयं पुरूषा यत्र गच्छथ तत्रैव लुब्धा भवथ, यदि पश्चान्नगच्छथ तदामम का गतिः ? अहमबलैकाकिनी कथमत्र तिष्ठामि ? त्वद्वियोगः कथं मया सोढं शक्यते ? तदाकर्ण्य चटकेनोक्तं हे बाले ! किमर्थं कदाग्रहं करोषि ? यदि नागच्छामि, तदा मम

ब्रह्मस्त्रीभ्रुणगोघातपातक, तदापक्षिण्योक्तमहमेनं शपथं नानुमन्ये, परं चेद्यदि यमदग्नितापसपातक शिरसि गृह्णीयास्तदाज्ञां समर्पयामि । तदा तेनोक्तं मैवं वद ? एतत्पापं कोंगीकरोति ? एतत् श्रुत्वा यमदग्निर्ध्यानाच्चलितः, क्रोधवशो भूत्वा चटकं चटकिकां च गृहीत्वा कथयतिस्म किमियन्मम पातकमस्ति ? चटकिकयोक्तं भो मुने ! त्वं क्रोधं मा करु ? भवतो धर्मशास्त्राण्यवलोकय ? यतः-अपुत्रस्य गतिर्नास्ति । स्वर्गो नैव च नैव च । तस्मात्पुत्रमुखं दृष्ट्वा, स्वर्गे गच्छन्ति मानवा ।।१।।इति।।

अतो अपुत्रिणो भवतः कथं शुभा गतिर्भाविनी ? ततस्तव पातकं महदित्युक्त्वा परीक्षां कृत्वा देवौ स्वस्थानं गतौ मिथ्यादृगपि परमजैनो जातः, पश्चाद्यमदग्निरपि पक्षिणो मुखात् श्रुत्वा मनसि विचारयति सत्यमेतत्, स्त्रीकरपीडनं कृत्वा पुत्रमुत्पादयामि तदा मम गतिर्भवति । इति संचिंत्यं कोष्टकनगरपतिजित-शत्रुसमीपमागत्य तेन कन्या मार्गिता, राज्ञोक्तं मम पुत्रीणां शतं, तासां मध्ये या भवतमभिलषती ता गृहाण । तदाकर्ण्य सोऽन्तःपुरमागतः, तत्र स्थिताभिः कन्याभिर्जटाजूटधारिणं दुर्बलंमलमलिनगात्रं विपरीतरूपं यमदग्निमालोक्य थूत्कारः कृतः, क्रोधवशेन तेन सर्वा अपि ताः कुब्जाकृतयः कृताः, स पश्चाद्वलितः, राजगृहांगणे धूलिक्रीडां कुर्वत्येका राजपुत्री तेन दृष्टा, तस्या बीजपूरकं च दर्शितं, तद्गृहणाय तया करः प्रसारितः, तदा तेन राज्ञोऽग्रे निरूपितं यदियं मामभिलषतीति कथयित्वा गृहीता पश्चाद्रीतेन राज्ञा सहस्त्रगवां गोकुलेन दासीवृन्देन च सहिता सा तस्मै दत्ता । तुष्टेन तेनाऽवशिष्टया तपशक्त्या सर्वा अपि राजपुत्र्यः सज्जीकृताः एवं सर्वमपि तपः क्षपयित्वा रेणुका बालामादाय स वनमागतः, तत्र चाश्रमोटजानि विधाय स स्थितः ।

क्रमेण सा यौवनं प्राप्ता, परिणीता च प्रथमर्त्तुकाले यमदग्निस्तस्यै कथयतिस्म, भो सुलोचने ! श्रृणु ? त्वदर्थमहं चरुं मन्त्रेणाभिमन्त्र्य समर्पयामि, येन तव चारुपुत्रो भवेत्, ततो रेणुकयोक्तं भो स्वामिन् ! द्वौ चरू ममार्पय ? येनैकेन ब्राह्मणः पुत्रो भवेत्, एकेन च क्षत्रियः, क्षत्रियचरुं हस्तिनागपुराधिपाऽनंत-वीर्यनृपपरिणीतायाः स्वभगिन्या अनङ्गसेनाया अहं समर्पयिष्यामि । द्वितीयं चाहं भक्षयिष्यामि एवं रेणुकाया कथनेन तेन चरुद्वयं मन्त्रित, स्वस्त्रियै च समर्पितं । पश्चाद्रेणुकया चिंतितं, मदीयः पुत्रः शूरो भवेत्तदा वरमिति विचार्य तया क्षत्रियचरुभक्षणं कृतं । द्वितीयो ब्राह्मणचरुरनङ्गसेनायाः प्रेषितस्तया च भक्षितः, तस्याः पुत्रो जातः, तस्य च कीर्त्तिवीर्य इति नाम दत्तं, रेणुकायाः पुत्रस्य राम इति नाम दत्तं । यौवनमनुप्राप्तः तदवसरे कश्चिदतीसाररोगपीडितो विद्याधरस्तदाश्रममागतः, रामेण तस्य प्रतिपत्तिः कृता, औषधप्रयोगेण तस्य स्वास्थ्यं कृतं । हृष्टेन विद्याधरेण रामाय परशुविद्या दत्ता, तेन च सा साधिता, ततस्तस्य परशुराम इति नाम प्रसिद्धं जातं देवताधिष्टितं कुठारयुधं गृहीत्वा स यतस्ततः परिभ्रमति केनाप्यजेयः, एतदवसरे परशुरामजननी रेणुका हस्तिनागपुरे स्वभगिन्या मिलनार्थं गता, तत्र तस्याः स्वभगिनीपतिनाऽनन्तवीर्येण सार्द्धं सम्बन्ध जातः, रेणुकायाः कुक्षौ कोऽपि जीवो गर्भत्वेनोत्पन्नः, क्रमेण पुत्रो जातः, पश्चात्पुत्रवती रेणुका यमदग्निना स्वाश्रममानीता परशुरामेण मातुश्चरित्रं ज्ञात्वा सा हता । पुत्रवती जननी निधनं प्रापिता, इयं प्रवृत्तिरनंतवीर्येण राज्ञा ज्ञाता । तेन तत्रागत्य यमदग्नितापसो मारितः, परशुरामेण परशुशक्त्या कीर्त्तिवीर्यं हत्वा गजपुरराज्यं गृहीतं, तदवसरे कीर्तिवीर्यराज्ञ एका तारानाम्नी स्त्री चतुर्दशस्वप्नसूचितं गर्भं दधाना भर्तृमरणसमये नष्टा वनमध्ये तापसोटजे समागता, सर्वमपि स्वस्वरूपं कथितं, दयार्द्रचित्तैस्तापसैः प्रच्छन्नं भूमिगृहे सा

स्थापिता, क्रमेण तस्यास्तत्रैव पुत्रो जातः तस्य च सुभूम इति नाम दत्तं, क्रमेण स वर्द्धते, परशुरामेणापि क्षत्रियोपरि क्रोधं कृत्वा सप्तवारां पुनः पुनः क्षत्रियरहिता पृथ्वी विहिता, मारितक्षत्रियाणां दंष्ट्रा एकीकृत्यैकं महत्स्थालं भृत्वा मुक्तं, एकदा भ्रमन् परशुरामस्तापसोटजमागतः, तत्परशुमध्याज्ज्वाला निःसृता, तदा परशुरामेण तापसानां पृष्टं, यूयं सत्यं वदत ? कोऽप्यत्र क्षत्रियो वर्त्तते ? यतो मदीयपरशुमध्यादङ्गारवर्षणं जायते तदा तैरुक्तं वयमेव क्षत्रियाः तापसत्वान्मुक्ताः, एवं सर्वान् क्षत्रियान्मारयित्वा स निष्कण्टकं गजपुराधिपत्यं भुंक्ते स्म, एकदा परशुरामेण कोऽपि नैमित्तिकः पृष्टः, मम मारकः को भविष्यतीति नैमित्तिकेनोक्तं यं दृष्ट्वा क्षत्रियदंष्ट्राः क्षैरेयी भोजनं भविष्यन्ति, तद्भोक्ता तव मारको भविष्यति । तत् श्रुत्वा परशुरामेण तदभिज्ञानार्थं दानशाला निर्मिता, तत्र च सिंहासने दंष्ट्रापूर्णस्थालं मुक्तं, तदवसरे वैताढ्यवासिना मेघनादविद्याधरेण नैमित्तिककथनतो भाविनं स्वपुत्रीवरं सूभूमं ज्ञात्वा, तत्रागत्य स्वपुत्री सुभूमायार्पिता, स्वयं च सुभूमस्य सेवको भूत्वा तिष्ठति, एकवारं सुभूमेन स्वमातुः पृष्टं, भो मातः ! कथय भूमिः किमेतावत्येवास्ति ? एतत्पुत्रवाक्यं श्रुत्वाऽश्रुधाराविललोचना सा गद्गदस्वरं तारा राज्ञी सर्वमपि पूर्वस्वरूपं कथयामास भो पुत्र ! तव पितरं पितामहं च हत्वा, सर्वक्षत्रियाणां विनाशं कृत्वा आत्मीयं राज्यं परशुरामो भुंक्ते, आवां तद्भयेन नष्टौ तापसशरणमाश्रित्य स्थितौ भूमिगृहवर्त्तिनौ स्वमातृमुखादेतदाकर्ण्य सरोषः सुभूमो भूमिगृहान्निर्गतः, मेघनादसहितो गजपुरपरिसरे दानशालायामागतः, तावत्तद्दंष्ट्रास्थालं सुभूमदृष्टौ पतितं, क्षैरेयी जाता सुभूमो भक्षितुं लग्नः, तावत्तत्परशुरामेण ज्ञातं, सन्नद्धो भूत्वा ज्वलदंगारं परशुमादाय स बहिरागतः, सुभूमं दृष्ट्वा तत्पुण्यप्राग्भारतो निस्तेजः परशुरामायुधं जातं, पश्चाद्भोजनानन्तरमुत्थितेन सुभूमेन स्थालं परशुरामोपरि क्षिप्तं, तत्स्थालं च सहस्रदेवताधिष्ठितं चक्रं जातं, तेन च चक्रेण परशुरामस्य शिरच्छिन्नं, तदा तस्य चक्रवर्त्तिपदोदयो जातः, जयजयशब्दो जातः, देवैः पुष्पवृष्टिः कृता, क्षत्रियमारणवैरं स्मृत्वा तेनैकविंशतिवारां निर्ब्राह्मणा भूमिर्निर्मिता चक्रबलेन षट्खण्डानि निर्जित्य लोभाभिभूतः स परतो घातकीखंडस्थितभरतक्षेत्रसाधनार्थं चलितः, तत्राष्टचत्वारिंशत्क्रोशविस्तृत–चर्मरत्नोपरि स्वकटकं स्थापयित्वा लवणसमुद्रान्तर्गच्छन् समकालं सहस्रसंख्यैरपि देवैर्मुक्तचर्मरत्नो दलसहितो जले निपत्य मृतः, पापकर्मयोगात्सप्तम्यां च गतः।

❋ ❋ ❋

( स्वागतावृत्तम् )

तावदेव मदविभ्रममाली, तावदेव गुणगौरवशाली ।
यावदक्षमकृतान्तकटाक्षै–र्नेक्षितो विशरणो नरकीटः ॥२॥ [२२]

व्याख्या– *विशरणो नरकीटः* न विद्यते *शरण*माश्रयो यस्य स तथा, *नरो* मनुष्यः स एव *कीटो* जन्तुः, जातावेकवचनं, *मदविभ्रममाली तावदेव, मद* आनन्दविनोदो जातिकुलबलरूपाद्यभिमानश्च तेन *माली* सविलासशोभमानः तेन संयुक्तो वा, *तावदेव* साकल्येन कालतो भवति । तथा *गुणगौरवशाली तावदेव गुणा* रूपसौभाग्यकलाचातुर्यसौन्दर्यज्ञानादयस्तैर्गौरवमादरभक्तिसत्कारस्तेन शाली शोभितः *तावत्* साकल्येन कालतस्तावन्मात्रमेव भवति । *यावदक्षमकृतान्तकटाक्षैर्नेक्षितः याव*न्मात्रमेव कालं

*अक्षमा* असह्यस्वभावत्वेन केनापि क्षन्तुमशक्याः *कृतान्तस्य* मरणस्य *कटाक्षाः* वक्ररोषारुणविकूणित-नेत्रप्रान्तास्तैः नेति नैव *ईक्षितो* विलोकितः । अतः शरणं गवेषयेत्यर्थः ।।२।।

उक्तं हि श्रीकलिकालसर्वज्ञैः श्रीत्रिषष्टिशलाकापुरुषचरित्रे श्रीनेमिजिनचरित्रे अपराजितभवप्रस्तावे-
इतश्च प्रत्यग्विदेहे विजये पद्मनामनि । अस्ति सिंहपुरं नाम पुरं सुरपुरोपमम् ।।२६१।।
तत्रासीज्जगदानन्दी हरिणन्दीति भूपतिः । मन्दीकृतान्यतेजस्कोऽधिपतिस्तेजसामिव ।।२६२।
बभूव महिषी तस्य नामतः प्रियदर्शना । दर्शनेनापि पीयूषस्पन्दिनी कौमुदीव या ।।२६३।।
जीवश्चित्रगतेः सोऽथ च्युत्वा माहेन्द्रकल्पतः । कुक्षाववातरत्तस्या महास्वप्नोपसूचितः ।।२६४।
पूर्णे च काले सुषुवे सा देवी प्रियदर्शना । पाण्डुकोर्वीव कल्पद्रुं तनयं प्रियदर्शिनम् ।। २६५।।
अपराजित इत्याख्यां तस्य चक्रे महीपतिः । धात्रीभिर्लाल्यमानश्च स क्रमेण व्यवर्धत।।२६६।।
अथान्यदा हरिणन्दी राज्यं न्यस्यापराजिते । प्रवव्राज तपस्तप्त्वा प्रपेदे च परं पदम् ।।४३४।।
पुराप्याक्रान्तभूपालः पृथ्वीं सुखमपालयत् । भोगांश्चाभुक्त निर्विघ्नमपराजितभूपतिः ।।४३६।।
चैत्यानि च विचित्राणि रथयात्राश्च लक्षशः । कुर्वाणोऽगमयत्कालं स पुमर्थैरवञ्चितः ।।४३७।।
स गतोऽन्येद्युरुद्याने ददर्शैकं महर्द्धिकम् । मूर्त्यानङ्गमिवानङ्गदेव सार्थपतेः सुतम् ।।४३८।।
तमावृतं सवयोर्दिव्यनेपथ्यधारिभिः । क्रीडन्तं रमणीयाभी रमणीभिश्च भूरिशः ।।४३९।।
ददानमर्थिनामर्थं स्तूयमानं च बन्दिभिः । गीतासक्तं प्रेक्ष्य राजापृच्छत्कोऽसाविति स्वकान् ।।४४०।।
असौ समुद्रपालस्य सार्थवाहस्य न्नदनः । महेभ्योऽनङ्गदेवाख्य इत्याख्यान् पार्थिवाय ते ।।४४१।।
धन्योऽस्मि यस्य वणिजोऽपीत्युदारा महर्द्धयः । एवं प्रशंसन्वेश्मागात् पुनरप्यपराजितः ।।४४२।।
द्वितीयेऽह्नि बहिर्गच्छन्सोऽपश्यन्मृतकं व्रजन् । नृभिश्चतुर्भिरुत्क्षिप्तं रसद्विरसडिण्डिमम् ।।४४३।।
अन्वीयमानं रामाभिराघ्नानाभिरुरःस्थलम् । मुक्तकेशं रुदन्तीभिर्मूर्च्छन्तीभिः पदे पदे ।।४४४।।
कोऽयं मृत इति राज्ञा पृष्टेऽशंसंश्च सेवकाः । स एवानङ्गदेवोऽयं द्राग्विसूचिकया मृतः ।।४४५।।
अहो असारः संसारो धिग्धिग्विश्वस्तधुग्विधिः । हा प्रमादः प्राणभाजां मोहनिद्रान्धचेतसाम् ।। ४४६ ।।
एवं महान्तं संवेगं धारयन्नपराजितः । जगाम स्वगृहं खिन्नस्तस्थौ चाहानि कत्यपि ।।४४७।।
यः प्राक् कुण्डपुरे दृष्टः केवली तत्र सोऽन्यदा । आगात्तस्योपकाराय योग्यं ज्ञानेन तं विदन् ।।४४८।।
श्रुत्वा धर्मं च तत्पार्श्वे पुत्रं प्रीतिमतीभवम् । पद्मं निधाय राज्ये स्वे प्राव्राजीदपराजितः ।।४४९।।
सा च प्रिया प्रीतिमती सूरः सोमश्च बान्धवौ । मंत्री विमलबोधश्च सर्वेऽनुप्राव्रजंस्तदा ।।४५०।।
ते सर्वेऽपि तपस्तप्त्वा मृत्वा कल्पेऽयुरारणे । इन्द्रसामानिकाः प्रीतिभाजोऽभूवन् परस्परम्।।४५१।।

❋ ❋ ❋

( शिखरिणीवृत्तम् )

प्रतापैर्व्यापन्नं गलितमथ तेजोभिरुदितै र्गतं धैर्योद्योगैः श्लथितमथ पुष्टेन वपुषा ।
प्रवृत्तं तद्द्रव्यग्रहणविषये बान्धवजनैर्जने कीनाशेन प्रसभमुपनीते निजवशम् ।।३।।[२३]

व्याख्या- *कीनाशेन भृशं निजवशमुपनीते जने प्रतापैर्व्यापन्नं*, *कीनाशः* कुत्सितमनिष्टं नाशयतीति कीनाशो मरणं तेन, भृशमतिशयेन *निजवशं* स्वाधीनं *उपनीते* अत्यन्ततया प्रापिते सति *जने* प्राणिनि

*प्रतापैस्तेजोभिः* शक्तिप्रभावैरिति यावंत्, व्यापन्नं स्वयमेव विनष्टं भवति। *अथा*नन्तर*मुदितैः* संपद्यौवनादि-भिरुद्भूतैस्*तेजोभिः* सप्रकाशमहिमाभिः *गलितं* स्वयमेव विलयं प्राप्तं भवति । तथा *धैर्योद्योगैर्गतं धैर्यं* विपत्सु निर्विकारव्याकुलतारहितचित्तस्थैर्यं, *उद्योगाः* प्रारब्धधर्मकार्यादेः संपादनोद्यमास्तैः *गतं* स्वयमेव दूरतरं विनष्टम् । *अथानन्तरं पुष्टेन वपुषा श्लथितं, पुष्टेन* इष्टभोजनरसायनपुण्यसामर्थ्यबलिष्ठेन *वपुषा* शरीरेण *श्लथितं* स्वयमेव सर्वसामर्थ्यराहित्यं प्राप्तं, *बान्धवजनैस्तद्द्रव्य-ग्रहणविषये प्रवृत्तं, बान्धवा* गोत्रिणस्त एव *जना* लोकास्तैः, *तद्द्रव्यं* म्रियमाणस्य धनं तस्य यद् *ग्रहणं* स्वायत्तीकरणं तस्य *विषयः* तस्मिन् *प्रवृतं* स्वयमेव गृहीतं भवतीत्यतो धर्मशरणागतो भवेदित्यर्थः ।।३।।

उक्तं हि सेडूकविप्रकथानकं मुनिपतिचरित्रे–

वत्सदेशे कौशाम्ब्यभिधानैका प्रसिद्धा नगरी वर्तते, तस्यां च शतानीकाभिधो राजा राज्यं करोति स्म । तत्रैव महादरिद्रो मूर्खशिरोमणिः सेडुकाभिधो विप्रो वसति स्म, तस्य प्रियकान्ताभिधाभार्यासीत् । स विप्रो प्रतिदिनं सप्तग्रामेषु भिक्षां मार्गयति, तेन च महाकष्टेन स्वोदरं पूरयति ।

स्त्रियोक्तं तर्हि हे स्वामिन् ! त्वं नृपसमीपे गच्छ, तस्य च सेवां कुरु, येन तुष्टोऽसौ तुभ्यं धनं दास्यति ।ततः स भट्टो बीजपूरादिकं गृहीत्वा नृपसमीपे गतः, राज्ञे च तत्प्राभृतीकृत्य तं सेवितुं लग्नः । एकदा राजा तं सेडुकविप्रं समाहूय बहुमानपुरस्सरं प्राह, भो विप्रोत्तम ! अहं तवोपरि तुष्टोऽस्मि, यथारुचि वरं याचस्व ।

विप्रेणोक्तं हे राजेन्द्र ! मम प्रियां पृष्ट्वाहं याचिष्ये, ततो नृपानुज्ञातः, सेडुको गृहे समागत्य स्वभार्यां कथयामास, हे प्रिये ! अद्य राजा ममोपरि तुष्टोऽस्ति, ततस्तस्य पार्श्वात् किं मार्गयामि? तत् श्रुत्वा धीनिधिः सा चेतस्येवं चिन्तयामास, यद्ययं निर्बुद्धिर्विप्रो नृपाद् ग्रामादिकं लप्स्यते, तदासावन्यां स्त्रियं कृत्वा मामपमानयिष्यतीत्यालोच्य तया विप्रं प्रति कथितं, हे स्वामिन्! नृपस्यास्य देशे सर्वगृहेषु प्रतिदिनं भोजनमेकैकं च दीनारं दक्षिणायां त्वं याचस्व, तत् श्रुत्वा विप्रोऽपि राज्ञः पार्श्वे समागत्य तदेवायाचत । तदा राज्ञोक्तं ! भो मूढ ! एतत्त्वया किं याचितम् ? अन्यद्ग्रामादिकं याचस्व। विप्रेणोक्तं हे स्वामिन्! ग्रामादिव्यापारविडम्बनायां पतनं मे न रोचते, तत एतदेव तुष्टिकृन्मह्यं देहि, तदा राज्ञापि स्वदेशे पटहोद्घोषणापूर्वकं विप्राय तदेव दत्तम्।

अथैवं हृष्टोऽसौ विप्रः प्रतिदिनं गृहे गृहे भोजनं करोति, दक्षिणायां दीनारैकं च गृह्णाति, राजमान्यत्वाल्लोका अपि तं सर्वदा मिष्टान्नादि सन्मानपूर्वकं भोजयन्ति दक्षिणां च यच्छन्ति ।एवं कुर्वतस्तस्य बहवो वासरा गताः अथैकदा तेन विप्रेण लोभवशादिति चिन्तितं यद् ग्रामा बहवः सन्ति, मदायुस्तु स्तोकं वर्तते, अतोऽहमेकस्मिन्नपि दिने चेद् भूरिगृहेषु भोजनं कुर्याम् तदा बहुदीनारान् लभेय इति ध्यात्वा स नित्यं पूर्वभुक्तं वान्त्वा वान्त्वकैस्मिन्नपि दिने बहुगृहेषु भोजनं करोति भूरिदीनारांश्च लभते ।एवं स विप्रः स्तोकेनापि कालेन भूरिधनधान्यपुत्रपौत्रादिपरिवारयुतो जातः । परमेवं प्रत्यहं वारंवारमजीर्णान्नवमनादिभिः पुनःपुन–र्भोजनादिभिश्च क्रमेण तस्य शरीरे कुष्ठरोगः समुत्पन्नः तेन च तस्य शीर्षकरचरणादीनि शटितानि। एवंविधः कुष्टाभिभूतोऽपि स सर्वदा नृपान्तिकं याति ।

अथैकदा मन्त्रिभिर्भूपतिर्विज्ञप्तो हे स्वामिन्नयं विप्रोऽथ कुष्ठरोगाभिभूतः संजातोऽस्ति, तेन सोऽथ

चेद् गृहे एव तिष्ठेत्तदा वरम् । तथा चास्य बहवः पुत्रपौत्राः सन्ति तन्मध्याच्चेदेको लोकगृहेषु भोजनं कुर्यात्तदा वरम् । राज्ञा प्रोक्तं तर्हि एवं भवतु, ततो मन्त्रिभिस्तं विप्रं समाकार्येति प्रोक्तं, भो विप्र ! नृपादेशेनाद्यप्रभृति त्वया त्वत्स्थानके भोजनार्थं लोकगृहेषु तवैकः पुत्रः प्रेष्यः त्वया च गृहमध्ये एवं स्थेयम् ।

अथ विप्रोऽपि तं नृपादेशं स्वीकृत्य सर्वदा निजपुत्रमेव लोकगृहेषु भोजनार्थं प्रेषयति, स्वयं च मधुमण्डपवन्मक्षिकाजालाकुलो गृहद्वाराद् बहिः पुत्रैः स्थापितः कुटिरैकदेशे तिष्ठति । गृहमध्ये कोऽपि तस्याज्ञां न मन्यते, तस्य पुत्रा अपि मण्डलवत्तस्य दारुपात्रे भोजनं यच्छन्ति, सर्वेऽपि कुटुम्बिकास्तस्य हास्यं कुर्वन्ति । वध्वोऽपि सकला यौवनोन्मत्ता नाशिकामोटनं कृत्वा तस्य प्रति निष्ठेवनं कुर्वन्ति । अथैवं पुत्रवध्वादिभिः पराभूतः स विप्रश्चिन्तयत्यहो मयैव श्रीमन्तः कृता मे पुत्रादयो मामेव एवं विषादं प्रापय्य धिक्कुर्वन्ति ।

जानन्ति चैष कुष्ठी तुष्टो रुष्टो वाथास्माकं किं करिष्यतीति विचिन्त्य क्रोधातुरोऽसौ तद्वैरप्रतिक्रियां चिकीर्षुर्निज–पुत्रानाहूयेति जगाद । भो पुत्रा ! अथाहं जीवितव्यादुद्विग्नो जातोऽस्मि, तेन चाहं संप्रति तीर्थयात्रां कर्तुमिच्छामि, अतो भवद्भिर्मदुक्त एकः कुलाचारः कर्तव्यः । तत् श्रुत्वा पुत्रैरुक्तं भो तात ! भवतैतद्वरं विचारितं, अथास्मभ्यं तं कुलाचारं कथय, यथा वयं कुर्महे । सेडुकेनोक्तमथ यूयं छागमेकमानयत, यथा तस्य देवानां बलिर्दीयते, येन युष्माकं सर्वेषां सर्वदा ऋद्धिवृद्धिकल्याणसंततिर्भवेत् । तत् श्रुत्वा तैरेकश्छागः समानीय पित्रे समर्पितः, विप्रेणोक्तमथाहं कियद्दिवसान् यावदेनं छागं मन्त्रैः पवित्रीकरिष्यामि, ययं चैतदर्थमार्द्रयवान् समानयत, तैश्च तच्छागचरणार्थमार्द्रयवा अपि पित्रे समर्पिताः ।

अथ स सेडुकस्तानार्द्रयवान् प्रच्छन्नं स्वरुधिरादिभिर्विलिप्य तस्य छागस्य सर्वदा भोजयामास । एवं कियद्दिनानन्तरं स पशुरपि क्रमेण कुष्ठी बभूव । ततः स पापात्मा विप्रस्तं छागं हत्वा तन्मांसं स्वपुत्रादिभ्यो ददौ, पितृमनोऽभिप्रायमजानद्भिः सरलाशयैस्तैः पुत्रादिभिरपि तन्मांसं भुक्तं, एवमकार्यं कृत्वा स सेडुकः स्वयं किञ्चित्सम्बलमादाय यात्रार्थं देशान्तरे ययौ । कियद्दिवसैः स एकायां महाभयङ्करायामटव्यां प्राप्तः, तत्र तृषातुरोऽसौ जलार्थमितस्ततो भ्रमन् नानावृक्षशटितपर्णमूलिकादिमिश्रितकषायप्रायजलोपेतमेकं ह्रदं ददर्श ।

तृषातुरेण तेन तद् दुःस्वादुग्रीष्मतप्तं क्वथितमपि पानीयमाकण्ठं पीतम् । घटिकानन्तरं च तत्पानीयपानतस्तस्य महाविरेचो लग्नः, तेन च तस्य सर्वोऽपि कुष्ठव्याधिर्विनष्टः, ततोऽसौ कियद्दिवसान् यावत्तत्रैव वनफलान्यास्वादयन् स्थितः, तज्जलपानात्तस्मिंश्च स्नानकरणात्क्रमेण स सर्वथा नीरोगीभूतो मनोहरशरीरो जातः । ततः स विप्रः पाश्चान्निवृत्य स्वनगरे समागतः, नगर्यां प्रविशन् स पौरैः पृष्टो भो विप्र ! त्वं कथं नीरोगो जातः ? विप्रेणोक्तं मया देवताराधनं कृतं, तस्याः प्रभावाच्चाहं नीरोगो जातः, तत् श्रुत्वा विस्मिता लोका अपि तं भाग्यशालिनममन्यन्त ।

अथ गृहं गतोऽसौ स्वपुत्रादीन् कुष्ठाभिभूतान् दृष्ट्वा प्रमुदितः सन्नुवाच भो पुत्राः ! समीचीनं जातं यद्युष्माभिर्मदवज्ञाफलं सद्यो लब्धम् । तत् श्रुत्वा तैश्चिन्तितं नूनमनेन पित्रैतन्महदकार्यं कृतं, यत्कुष्ठाभिभूत–छागमांसमस्माकं भक्षणाय दत्तं, धिगेनं पिशाचरूपं पितरं, एवं ते पुत्रास्तं वारंवारं धिक्कृत्य गृहाद्बहिर्निष्का–सयामासुः । तद्वृत्तान्तं ज्ञात्वा पौरैरपि तिरस्कृतोऽसौ सेडुकविप्रो नगरान्निर्गत्य राजगृहनगरे समागत्य स्वाजीविकाहेतोर्नगरद्वारपालस्य सेवां करोति स्म ।

द्वारसमीपे देवस्थाने केनचित् नैवद्यं ढौकितं । तत्र ढौकितं तद्वटादिकमालोक्य क्षुधातुरेण तेन

सेडुकविप्रेण तदाकण्ठं भुक्तं, ततस्तस्य जलस्य महातृषा समुत्पन्ना, तया च सोऽत्यन्तमाकुलीभूतोऽपि द्वारपालभयात्तत्स्थानं त्यक्त्वान्यत्र कुत्रापि कूपवाप्यादिषु गन्तुं समर्थो नाभवत् । एवं तृषोद्विग्नोऽसाविति चिन्तयामास धन्यास्ते जलचरजीवा ये प्रतिदिनं स्वेच्छया जलकेलिं कुर्वन्ति, अहं त्वधन्यो य एवं जलं विनाधुना भृशं दुःखी भवामि । ततो वारिवारीति जल्पन् भृशमारटंस्तृषार्तो मृत्वा सतस्मिन्नेव नगरे द्वारसमीपे वाप्यां दर्दुरत्वेन समुत्पन्नः ।

अथ भूयोऽपि श्रीमहावीरा नगरे समसृताः, तदा जलहारिणीमुखादत्रास्मदागमनं श्रुत्वा जातजातिस्मरणः स दर्दुरोऽपि समुल्लसितभावेन वन्दनाय वापीसोपानमार्गेणोत्प्लुत्योत्प्लुत्य बहिर्निर्गत्य यावन्मार्गमध्ये समायातस्तावत् तुरङ्गमपादप्रहारेण मृतः । शुभभावात् सौधर्मदेवलोके देवत्वेन उत्पन्नः ।

❋ ❋ ❋

**अथ सम्यग्दृष्टिभिरशरणभावनाऽनेन प्रकारेण सदैव भावनीयेति गेयपद्याष्टकेन विभावयति–**

स्वजनजनो बहुधा हितकामं प्रीतिरसैरभिरामम्।
मरणदशावशमुपगतवन्तं रक्षति कोऽपि न सन्तम्॥१॥ [२४]
विनय विधीयतां रे श्रीजिनधर्मः शरणम् ।
अनुसन्धीयतां रे शुचितरचरणस्मरणम्, वि० ॥२॥ [२५] ध्रुवपदं

**व्याख्या– हे *विनय !* हे मोक्षाभिलाषिन् ! तवायं *स्वजनजनः* स्वकीयो जनो जनकजननीभगिनीभार्यादिलोकः, *बहुधा* बहुभिः प्रकारैर्धनागमारोग्यवृद्धिनिरुपद्रवादिचिन्तनैः, *हितकामं हितं* पथ्यं तत्करणे *कामा* मनोरथा यस्य स तथा तं, *प्रीतिरसैरभिरामं प्रीतिरसा*स्तवोपरि प्रेमरसप्रकारास्तैः *अभिरामः* सुन्दरपरिणामस्तं, तथाविधं वर्तमानमपि समागते मरणे शरणाय नालं जानीहि । *सन्तं* सुखदं तदपि *मरणदशावशमुपगतवन्तं* कोऽपि न रक्षति, *मरण*मायुषः क्षयस्तद्रूपा *दशा*ऽवस्था तस्य *वश*मधीनत्व*मुपगतवन्तं* प्राप्तं *सन्तं कोऽपी*ति उक्तस्वजनमध्यात्कश्चिदेकोऽपि *न रक्षति* न मोचयतीति भावनीयमित्यतः *श्रीजिनधर्मः शरणं विधीयतां, श्रीः* सर्वथाऽजरामरत्वप्रापणसामर्थ्यं तया युक्ता *जिन*प्रणीतो *धर्मो* द्वादशाङ्गोक्तकृत्यविधानं स *श्रीजिनधर्मः*, भवद्भिरस्माभिरपि *शरण*मयमेव सत्याधार इति विधीयतां आश्रीयताम् । तत्प्राप्तये च *शुचितरचरणस्मरणमनुसन्धीयतां*, *शुचितरं* सर्वथा सर्वदोषाभावादतिशयेन पवित्रं, *चरणं* जिनराजपादयुग्मं चारित्रं च तस्य *स्मरणं* भजनं चारित्रखण्डनस्य पर्यालोचनम् अनुसन्धीयतां स्वहृदयेऽखण्डप्रेमधारया संयोज्यताम् । चारित्रं च यत्र यत्र दोषसेवनया खण्डितं ज्ञायते तत्र तत्र पुनः पूर्णं क्रियताम् । एतत्कृते सत्येव जिनधर्मशरणं कृतं भवति, नान्यथेत्यर्थः ॥२॥**

उपदेशप्रासादे सुधर्मनृपकथा इदं व्यक्तं करोति ।

पञ्चालदेशे सुधर्मो राजाऽभवद् जैनधार्मिकः । एकदा तस्याग्रे चरेणोक्तम्–देव ! महाबलनामा चरटः प्रजा अतीव पीडयति । तच्छ्रुत्वा राजाह–तत्र गत्वाहं निग्रहीष्यामि । यतः–

तावद्गर्जन्ति मातङ्गा वने मदभरालसाः । शिरोविलग्नलाङ्गूलो यावन्नायाति केसरी ॥

इत्युक्त्वा सैन्यभरभारेण नम्रीकृतभूतलस्तं चरट समागतवान् । तत एकहेलयैव तं जित्वा निजनगरम्

आगतः । प्रवेशसमये मुख्यप्रतोली पतिता । तदपशकुनमिति ज्ञात्वा व्याघुट्य नगरबाह्ये स्थितो नृपः । मन्त्रिभिस्तथैव झटिति प्रतोली कारिता । एवं द्वितीयतृतीयदिनयोरपि पतन्तीं वीक्ष्य राज्ञा नियोगी पृष्टः–भो मन्त्रिन् ! किं प्रतोलीयं पुनः पुनः पतति ? । मन्त्रिणोक्तम्–राजन् । यदि स्वहस्तेनैकं पुरुषं हत्वा तद्रसेन सिच्यते तदा गोपुराध्यक्षो यक्षः संतुष्टः स्याद् नान्यपूजाबलिनैवेद्यादिभिः । इति चार्वाकपक्षीयवाक्यं श्रुत्वा राजाब्रवीत्–ममानेन पुरेण किं प्रयोजनम् ? यत्र पुरे जीववधो विधीयते । तेन कनकाभरणेन किं क्रियते ? येन कर्णस्त्रुट्यते । अपरं च –

न कर्तव्या स्वयं हिंसा प्रवृत्तां च निवारयेत् । जीवितं बलमारोग्यं शश्वद्वाञ्छन्महीपतिः ।।

ततो राजानं निश्चलं ज्ञात्वा मन्त्रिणा समस्तनागरानाकार्योक्तम्–भो लोकाः ! श्रूयताम् । यदा मनुष्यवधो राज्ञा क्रियते तदा गोपुरं स्थिरीस्याद्, नान्यथा । मां प्रति राज्ञेत्थमुक्तम्–अहं जीववधं न करिष्ये न कारयिष्ये न चानुमोदयिष्ये इत्यवगत्य यूयं यद्विचारे समेति तत्कुरुत । ततो महाजनैरागत्य राज्ञोऽग्रे भणितम्–स्वामिन् ! अस्माभिः सर्वमपि क्रियते, भवन्तस्तूष्णीं तिष्ठन्तु । राज्ञोक्तम्–यदा प्रजाः पापं पुण्यं च कुर्वन्ति तदा ममापि षष्ठांशं पापं पुण्यं चायाति । यदुक्तम्–

यथैव पुण्यादिसुकर्मभाजां, षष्ठांशभागी नृपतिः सुवृत्तः ।
तथैव पापादिकुकर्मभाजां, षष्ठांशभागी नृपतिः कुवृत्तः ।।

पुनरपि महाजनेनोक्तम्–पापभागोऽस्माकम् । राज्ञा तन्महाकष्टेन प्रतिपन्नम् । ततो महाजनेन स्वस्वगृहाद्द्रव्यमेकीकृत्य तस्य काञ्चनमयः पुरुषो निर्मापितः । पश्चात्तं नरं शकटे आरोप्य नगरमध्ये घोषितं–यदि स्वपुत्रस्य माता स्वहस्तेन विषं प्रयच्छति, पिता तस्य गलमोटनं करोति, तर्हि तयोः काञ्चनमयनरःकोटिद्रव्यं च दीयते । तन्नगरे महादरिद्रो वरदत्ताख्यो द्विजोऽस्ति । तद्भार्या रुद्रदत्ता, सा निष्करुणा । तयोः सप्त पुत्राः सन्ति । पटहं श्रुत्वा तेन स्वभार्या पृष्टा–हे प्रिये ! लघुपुत्रं दत्त्वा द्रव्यमिदं गृह्यते । धनस्य माहात्म्यं लोकोत्तरम् । यतः–

पूज्यते यदपूज्योऽपि यदगम्योऽपि गम्यते । वन्द्यते यदवन्द्योऽपि तत्प्रभावो धनस्य हि ।।

तयापि निर्दयतया स्वीकृतम् । ततो द्विजेन पटहं धृत्वा कथितम्–ममेदं द्रव्यं दत्त्वाऽयं पुत्रो गृह्यताम् । प्रजाभिर्निरूपितम्–यदि त्वया त्वद्भार्यया च गलमोटनं विषं च दीयते, तदा युवाभ्यां तद्दद्महे, नान्यथा । तेन सर्वं मानितम् । तत्पित्रोर्वाक्यं श्रुत्वा तत्पुत्रेणेन्द्रदत्तेन चिन्तितम्–अहो ! स्वार्थिक एव संसारः । निजपुत्रस्यापि पञ्चत्वे रोपयति । ततो महाजनस्य सोऽर्पितः । पश्चान्महाजनेन पुष्पादिभिरभ्यर्च्य नृपान्तिकं नीतः । राज्ञापि प्रतोलीसन्मुखमागच्छन्तं दृष्ट्वा भणितम्–रे माणवक ! किमर्थं हससि ? मरणात् किं न बिभेषि ? तेनोक्तं–स्वामिन् !

तावद्भयाद्धि भेतव्यं यावद्भयमनागतम् । आगतं तु दृष्ट्वा सोढव्यं तदशङ्कितैः ।।

पुनश्च प्राह–हे राजन् ! येषां शरणं विधीयते, तेभ्यो भयं जातम् ।

पित्रा संतापितः शिशुर्मातृशरणं गच्छति, मात्रोद्वेजितः पितुः शरणं च । ताभ्यां उद्वेजितः शिशू राज्ञः शरणं । राज्ञापि संतापितो महाजन शरणं गच्छाति बालेः । यत्र तु माता विषं ददाति, पिता गलं मोयति राजा प्रेरयति. महाजनो मूल्यं कृत्वा गृह्णाति । तदा कस्यं शरणं विधीयते । स्वकर्तव्यबुद्धराजा तं अभयं ददौ, स्वातिथ्यं च तस्य

धैर्येण संतुष्टो देवो प्रश्लाघ्य नगरगोपुरं च निर्माप्य गतः ।

❋ ❋ ❋

**तुरगरथेभनरावृतिकलितं, दधतं बलमस्खलितम् ।**
**हरति यमो नरपतिमपि दीनं, मैनिक इव लघुमीनम्, वि० ॥३॥ [२६]**

व्याख्या– *तुरगरथेभनरावृतिकलितं अस्खलितं बलं दधतं नरपतिमपि दीनं यमो हरति । तुरगा* अश्वाः, *रथाः* स्यन्दनाः, *इभा* हस्तिनः, *नराः* पदातयः, द्वन्द्वे कृते, तेषाम*आवृतिः* रक्षणाय सर्वतः परिवेष्टनं, तेन *कलितं* सहितमपि तथाऽ*स्खलितम*सह्यं केनापि रोद्धुमशक्यं *बलं* देहसामर्थ्यं पराक्रममिति यावत्, *दधतं* धारयन्तं *नरपतिं* राजान*मपि दीनम*शरणे सति शरणार्थं दीनताकलितमुखं *यमो* मरणं *हरति* स्ववशं नयति । कमिव ? मैनिको *लघुमीनमिव,* मीनान् भक्षयतीति *मैनिकः* क्रकणपक्षी किलकिलो नाम लोकप्रसिद्धः, स यथा *लघुमीनं* जले निपत्य क्षुद्रमत्स्यं चञ्च्वा गृहीत्वा गगनतलं याति, तद्वत्प्रेतराट् स्वजनसैन्यदुर्गमध्यतो जीवं गृहीत्वा याति, न कोऽपि मोचयति, तस्माद्धर्मं भज इत्यर्थः ॥३॥

एतत् स्पष्टीकृतम् आचार्यजयशेखरसूरिभिः स्वोपज्ञटीकायुक्तोपदेशचिन्तामणौ–
अस्ति चम्पापुरी पापरीतिनिर्मुक्तनागरा । अशोकचन्द्रभूपोऽभूत्तत्र श्रीश्रेणिकाङ्गज ।
त्याजितस्याम्बया तस्य, यदकूणयदङ्गुलीम् । बाल्ये कुर्कुत्यतो नाम्ना, कूणिकोऽप्येष उच्यते ।
तस्या जन्म च वृद्धिश्च, पित्रोर्वैरस्य कारणम् । चेटकेन च युद्धादि, विज्ञेयं श्रुतसागरात् ।
अन्यदा तत्र तन्वानः, सम्यक् सुमनसां मुदम् । वनं विभूषयामास, श्रीमान् वीरो वसन्तवत् ।
कृते समवसरणे, सुरैः श्रेणिकनन्दनः । नमाम कामितफल–प्रदौ वीरप्रभोः पदौ ।
देशनान्ते स पप्रच्छ, म्रियते येऽत्र चक्रिणः । अपरित्यक्तभोगास्ते, नाथ ! गच्छन्ति कां गतिम् ।
स्वाम्यूचे स्याद् गतिस्तेषां, सप्तमी नरकावनिः । तर्हि तत्रैव गन्तव्यं, मयापीत्यालपन्नृपः ।
तावन्न सार्वभौमोऽसि, कुतः साऽस्तु गतिस्तव । ग्रामं विना वृथा सीमकल्पनेत्यवदज्जिनः ।
चिल्लणानन्दनश्चक्रिमानी मानीश्वरोऽभ्यधात् । अहंनचक्रवर्तीति, दुःश्रद्धेयं जगद्गुरो ।
हस्त्यश्वरथलक्षाभिर्भटकोटिभिरुत्कटा । ममाप्यस्ति चमूर्धर्तुं वा जगत् क्षमा ।
अक्षीयमाणाः सततव्यापारेऽपि प्रभो मम । भूयांसः सन्ति निधयः, सुकवेरिव बुद्धयः ।
प्रज्वलन् राजवंशेषु, प्रतापो मे दवाग्निवत् । अशेषद्वेषिशलभान् करोत्यसुलभायुषः ।
न्यून किमस्ति मे येन, भवेयं न हि चक्रभृत् । श्रुत्वेति प्रत्यभाषिष्ट, यथावस्थितवाग् जिनः ।
राजंश्चक्रादिरत्नौघं, विना चक्रित्वकल्पनाम् । दरिद्र इव भूपाललीलां तन्वन्न शोभसे ।
अथैकेन्द्रियरत्नानि, कृत्वा लोहमयानि सः स्त्रीरत्नं कल्पयामास, प्रियां पद्मावतीं नृपः ।
संस्थाप्यैतानि रत्नत्वे, पट्टेभादीनदीनधीः । स प्राच्यादिक्रमाच्चक्रे, देशानादेशवर्त्तिनः ।
असह्य विक्रमाक्रान्त–सकलक्ष्मापमण्डलः । स वैताढ्यतले प्राप, तमिस्रां नाम कन्दराम् ।
गुहाद्वाराररी तेन, दण्डरत्नेन ताडितौ । व्यघटेतां न नीचोक्त्या, सुश्लिष्टौ सुहदाविव ।
कृतमालस्तमालापीद्देवस्तद्द्वाररक्षकः । रे कोऽसि याहि खाट्कारैः किं कदर्थयसि श्रुती ।
सोऽप्यूचे भरतक्षेत्रे, चक्री विक्रान्तदोर्युगः । जातोऽस्म्यशोकचन्द्रोऽहं गुहाद्वारमपावृणु ।

देवोऽवग् भो भवन्त्यत्र, क्षेत्रे द्वादश चक्रिणः । तेऽभूवंस्तन्न चक्रित्वं, किन्तु कोऽप्यसि चाक्रिकः ।
भूपोऽभ्यधात्कृतः पुण्यैरहं चक्री त्रयोदशः। किं न जानास्यसम्भाव्यमपि पुण्याद्भवेद् ध्रुवम् ।
तद् भो उद्घाटय द्वारं, मा खेदय विलम्ब्य माम्। बलवान् कोपितो नूनं भवत्यायतिदारुणः ।
इत्याविष्टमिवानिष्टभाषिणं विबुधो व्यधात् । रयाच्चपेटया हत्वा, तं षष्ठनरकाध्वगम् ।

❋ ❋ ❋

प्रविशति वज्रमये यदि सदने, तृणमथ घटयति वदने ।
तदपि न मुञ्चति हतसमवर्ती, निर्दयपौरुषनर्ती, वि० ।।४।। [२७]

व्याख्या- यदा यदा प्राणी मरणभयतो *वज्रमये सदने प्रविशति* वज्रतुल्यसारवद्भिरणुभिर्निर्मितं *वज्रमयं* तस्मिन्, *सदने* गृहे *प्रविशति* तत्र तिष्ठति तदपि । *अथा*पि मरणस्य प्रार्थनापरो *वदने* मुखे *तृणं* पशुवद् घासावयवं *घटयति* दशनैर्गृह्णाति तदपि । निर्दयपौरूषनर्ती हतसमवर्ती तदपि न मुञ्चति, निर्गता दया कृपा यैभ्यस्तानि पौरूषाणि पराक्रमविशेषाः, तैनृत्यपि सानन्दं विलसति यः स तथा । *हतसमवर्ती* हतो ज्ञानिभिस्तिरस्कृतः समवर्ती गुण्यगुणिबालवृद्धदेवनरपशुनारकादिषु निर्दयत्वेन तुल्यतया प्रवृत्तिर्यस्य स समवर्ती पूर्वोक्तसर्वोपायकृतेऽपि *तदपि* प्रेतराट् प्राणोपहरणं *न मुञ्चति* न त्यजति । अतो निरुपायमेकं धर्मशरणमित्यर्थः ।।४।।

उक्तं उपदेशप्रासादे भरतबाहुबलीयुद्धप्रसङ्गे अनिलवेगोल्लेखे-

ऋषभदेवपुत्रो भरतः चक्रवर्ती बभूव । किन्तु अन्यनवनवतिभ्रातरः भरताज्ञां न स्वीकुर्वन्ति । पितृप्रतिबोधनेन अष्टनवतिभ्रातरः प्रव्रजिताः । भरतो बाहुबलिनं प्रति युद्धाय चचाल । मिथो भयङ्करं युद्धं जातम् । एकदा बाहुबलिनो भक्तोऽनिलवेगो विद्याधरश्चक्रिसेनापतिमस्त्रैर्निर्जित्याकाशगत्या चक्रिगजसेनां व्यगाहत, कन्दुकानिव गजानुल्लाल्य पुनर्भूमौ पततो मुष्ट्या जघान । चक्री तमजय्यं वीक्ष्य चक्रं मुमोच । तद्वीक्ष्य भीतो नष्टो मेरुकन्दरसागरादिषु यत्र यत्र याति तत्र तत्र चक्रं पूर्वार्जितकर्मवत्पृष्ठं न मुञ्चति, तदा विद्यया वज्रपञ्जरं निर्माय तत्र प्रविष्टः । तदा चक्रसुराः प्राहुः- रे रे रङ्क ! किं पौरुषं विडम्बयसि ? । ततः षण्मासान्ते जातामर्षो बहिर्निःसृतः, तावच्चक्रं तच्छिरश्छित्त्वा चक्रिहस्तेऽतिष्ठत् ।

❋ ❋ ❋

विद्यामन्त्रमहौषधिसेवां, सृजतु वशीकृतदेवाम् ।
रसतु रसायनमुपचयकरणं, तदपि न मुञ्चति मरणम्, वि० ।।५।। [२८]

व्याख्या- भो भव्या ! यदि कश्चिन्मरणात्स्वमोचनाय *वशीकृतदेवाम्* अवशा वशा यथा संपद्यमानाः कृता भवन्तीति वशीकृता देवा वरुणकुबेरादयो यया सा तथा तां, *विद्यामन्त्रमहौषधिसेवां सृजतु, विद्या* रोहिणीप्रज्ञप्त्यादिः, *मन्त्रा* हरिणैगमेषिवज्रपञ्जरादयः, *महौषधयः* सप्रभावा नृपशीतभविसहदेवीपुत्रञ्जारीविष्णुक्रान्तादिकास्तासां *सेवा*राधना तां *सृजतु* प्राणी करोतु, *उपचयकरणं रसायनं रसतु, उपचयो* मरणजयार्थं बलवृद्धिस्तत्*करणं* तत्कारकं *यद्रसायनं* रसेन्द्रताम्रभस्मादि तद्रसतु भक्षयतु, *तदपि* तथाकृतेऽपि *मरणं न मुञ्चती*त्यतो धर्मशरणं कार्यमित्यर्थः ।।५।।

उक्तं उत्तराध्ययने अट्टनमलकथानकं । तच्चेदम् –

उज्जयन्यां नगर्यां श्री–जितशत्रुर्नृपोऽभवत् । तत्र चाप्रतिमल्लोऽभून्मल्लराजोऽट्टनाभिधः ॥१॥
स च गत्वान्यराज्यस्थैरपि मल्लैरयुध्यत । तस्य दोर्दण्डकण्डूस्तु, व्यपनिन्ये न केनचित् ॥२॥
तदा चाम्भोधितीरस्थे, पुरे सोपारकाभिधे । मल्लयुद्धप्रियः सिंहगिरिसंज्ञोऽभवन्नृपः ॥३॥
यो मल्लेष्वजयत्तस्मै, भूपः सोऽदाद्धनं घनम् । इति तत्राऽट्टनो गत्वा, प्रत्यब्दमजयत्परान् ॥४॥
ततः सिंहगिरिर्दध्यौ, यदागत्यान्यराज्यतः । अयं जयति मन्मल्लान्ममापभ्राजना हि सा ॥५॥
ततोऽहमपरं कञ्चि–त्कुर्वे मल्लं बलोत्कटम् । ध्यात्वेति मार्गयन्मल्लं, वार्द्धितीरे ययौ नृपः ॥६॥
वसां पिबन्तं मीनानां, तत्राद्राक्षीच्च धीवरम् । ततस्तं बलिनं ज्ञात्वा, पोषयामास पार्थिवः ॥७॥
अशिक्षयन्नियुद्धं च, भूपस्तस्य तरस्विनः । ततः सोऽभून्महामल्लो–ऽजय्योऽन्यैर्हस्तिमल्लवत् ॥८॥
अथाट्टनो नियुद्धाहे, समासन्ने निजात्पुरात् । शम्बलेन बलीवर्दं, भृत्वा सोपारकं ययौ ॥९॥
स च मात्स्यिकमल्लेन, नियुद्धे निर्जितो द्रुतम् । विषादमाससादोच्चैर्भग्नो हस्तीव हस्तिना ॥१०॥
स्वीयावासे ततो गत्वा–ऽट्टन एवं व्यचिन्तयत् । केनाप्यजितपूर्वेऽहं, मल्लेनानेन निर्जितः ॥११॥
तारूण्योपचयाच्चायं, चीयमानबलः कथम् ? । पुनर्जय्यो मया क्षीणौजसा यौवनहानितः! ॥१२॥
कर्तव्या वैरशुद्धिश्च, मयोपायेन केनचित् । शल्यवत् खट्करोत्यन्त–र्मानम्लानिं हि मानिनाम् ॥१३॥
ध्यात्वेति तज्जैत्रबलं, सोऽन्यं मल्लं गवेषयन् । सौराष्ट्रे बहवो मल्लाः, श्रुत्वेति तमभिव्रजन् ॥१४॥
भृगुकच्छसमीपस्थ–हरणीग्रामसीमनि । एकं कर्षकमद्राक्षी–त्कर्पासवपनोद्यतम् ॥१५॥
हलमेकेन हस्तेन, वाहयन्तं द्रुतं द्रुतम् । द्वितीयेनोत्पाटयन्तं, फलहीस्तृणलीलया ॥१६॥
तञ्च प्रेक्ष्य पुमानेष, बलिष्ठ इति चिन्तयन् । तदीयाहारवीक्षायै, तत्रास्थाद्यावदट्टनः ॥१७।
प्रातराशकृते तावल्लात्वा कूरभृतं घटम् । तत्रागातत्प्रिया सोऽपि, सीरमच्छोटयत्ततः ॥१८॥
कूरञ्च सद्यः कुम्भस्थं, जग्रसे ग्रासलीलया । गत्वा क्वापि पुरीषस्यो–त्सर्गं चक्रे च कर्षकः ॥१९॥
अट्टनोऽपि ततो गत्वा, तत्पुरीषं व्यलोकत । तच्चाद्रक्षीदतिस्वल्पं, शुष्कं छागपुरीषवत् ॥२०॥
जाठराग्नि ततस्तस्य, ज्ञात्वा प्रबलमट्टनः । वैरशुद्धिसमर्थोयं, भावीत्यन्तरभावयत् ॥२१॥
तस्यैव सौधे सन्ध्यायां, ययाचे वसतिं च सः । सोऽपि तामार्पयत्तत्र, मल्लोप्यस्थाद्यथासुखम् ॥२२॥
का युष्माकं जीविकेति, तं च पप्रच्छ वार्तयन् । प्रोचे कृषीवलोप्येवमस्म्यहं ननु निर्धनः ॥२३॥
तत्प्रोज्येन प्रयत्नेन, कृषिं कुर्वे तथापि हि । अन्नमप्युदरापूर्तिकरं सम्पद्यते न मे ! ॥२४॥
मल्लोवादीदमुं मुक्त्वो–द्यममेहि समं मया । अतिस्तोकेन कालेन, कुर्वे त्वामीश्वरं यथा ! ॥२५॥
सोप्यूचेऽहं तदागच्छा–म्यादिशेद्यदि मां वशा । पृष्टा मल्लेन तत्रार्थे, ततः साप्येवमब्रवीत् ॥२६॥
उप्तोस्त्यनेन कर्पासो–ऽधुना स च विनाऽमुना । विनश्यति तदा च स्यात्कथमाजीविका मम ? ॥२७
मल्लोब्रवीदत्र यावान्, कर्पासश्चिन्तितो भवेत् । गृहाण तावतो मूल्यमधुनैवार्पयामि ते ॥२८॥
इत्युदीर्य तया प्रोक्तमानं मल्लो ददौ धनम् । ततोनुमेने सा कान्तं, किं हि वित्तान्न जायते ? ॥२९॥
अट्टनोथ तमादाय, ययावुज्जयनीं जवात् । पोषयामास तं प्रोच्चैरुपायैश्च परश्शतैः ॥३०॥
अशिक्षयच्च तस्योग्रं, मल्लयुद्धं महौजसः । फलहीमल्ल इत्यस्या–ऽभिधानं च विनिर्ममे ॥३१॥
द्वितीयाब्दे च सम्प्राप्ते, मल्लयुद्धमहोत्सवे । अट्टनोऽगात्समं तेन, पुनः सोपारके पुरे ॥३२॥

अथ सिंहगिरौ राज्ञि, मल्लयुद्धदिदृक्षया । समं पौरैः परोलक्षै–रङ्गमण्डपमाश्रिते ।।३३।।
योधं योधमनेकेषु, मल्लेषूपरतेषु च । नियुद्धार्थमढौकेतां, फलहीमात्स्यिकौ मिथः ।।३४।। (युग्मम्)
क्षोभयन्तौ भुजास्फोट–रवैर्वीरमनांस्यपि । कम्पयन्तौ धरापीठं, दुर्धरैः पाददर्दुरैः ।।३५।।
मुष्टामुष्टिप्रकुर्वन्तौ, दन्तादन्तीव कुञ्जरौ । प्रबलैः पादविन्यासै–र्नमयन्ताविव क्षमाम् ।।३६।।
भूतले निपतन्तौ च, च्छिन्नमूलमहाद्रुवत् । क्ष्मातलाच्चावधूयाङ्गमुत्तिष्ठन्तौ विनिद्रवत् ।।३७।।
विलगन्तौ मिथो बाढं, चिरान्मिलितबन्धुवत् । कृतप्रहारहुडुव–द्वियुञ्जानौ च सत्वरम् ।।३८।।
उत्पतन्तौ पतङ्गवत्, प्लावमानौ प्लवङ्गवत् । तौ चिरं चक्रतुर्मल्ल–युद्धं मल्लशिरोमणी [पञ्चभिः कुलकम्] ।।३९।।
किन्तु तुल्यबलौ वीक्ष्य, तौ जयश्रीः स्वयंवरा । ध्यायन्ती कं वृणोमीति, नैकमप्यवृणोत्तदा ।।४०।।
पूर्णं भावि द्वितीयेह्नि, नियुद्धमनयोर्ननु । इत्युत्तस्थौ नृपस्ताव–त्तावपि स्वासश्रयं गतौ ।।४१।।
ततोट्टनेनः फलही, प्रोचे पुत्र ! तदुच्यताम् । तेन मल्लेन यद्बाढं, त्वदङ्गं बाधितं भवेत् ।।४२।।
अट्टनाय ततः सर्वं, फलही सत्यमब्रवीत् । प्रायश्चित्तग्रहीतेव, गुरवे शुद्धमानसः ।।४३।।
ततोऽट्टनः पक्वतैल–मर्दनैर्वह्नितापनैः । तदर्हैर्भेषजैश्च द्राग्, विदधे तं पुनर्नवम् ।।४४।।
मात्स्यिकस्यापि पार्श्वेऽङ्ग–मर्दकान्प्राहिणोन्नृपः । स तु श्रमार्दिताङ्गोऽपि, गर्वान्नामर्दयद्वपुः ।।४५।।
प्रोचे च कनुरङ्कोयं, स्थातुं शक्ष्यति मे पुरः । अहं ह्यमुष्य जनकमप्यजैषं पुरा जवात् !।।४६।।
समयुद्धावजायेतां, द्वितीयदिवसेऽपि तौ । पार्थिवे चोत्थिते प्राग्वत्तमसज्जयदट्टनः ।।४७।।
मात्स्यिकस्तु मदाविष्टो–ऽचीकरन्नाङ्गमर्दनम् । नियुद्धमारभेतां तौ, तृतीयेप्यह्नि पूर्ववत् ।।४८।।
तदा च मात्स्यिकं वीक्ष्य, नियुद्धश्रान्तविग्रहम् । नीरोजस्कप्रहारश्च, वैशाखस्थानसंस्थितम् ।।४९।।
फलहीति वदंस्तस्य, भ्रूसंज्ञामट्टनो व्यधात् ।
जग्रा फलहीग्राहं, पाणिना सोऽपि मात्स्यिकम् ।।५०।। [ युग्मम् ]
तं कमण्डलुवन्मौलिं, परितोऽभ्रमयच्च सः । ततस्तुष्टो बहुद्रव्यमट्टनायार्पयन्नृपः ।।५१।।
तच्च दत्वा हालिकाया–ऽट्टनोऽपि विससर्ज तम् । स्वयं त्ववन्तीमगमत्, कृतार्थो वैरशुद्धितः ।।५२।।
विमुक्तयुद्धव्यापारो, गृहे तिष्ठन् सुतादिभिः । वृद्धाऽयमऽसमर्थोयमिति सोऽहील्यतान्वहम्!।।५३।।
ततो मानादनापृच्छ्य, तान् कौशाम्बीं जगाम सः । आवत्सरं सिषेवे च, स्थित्वा कापि रसायनम् ।।५४।।
बलिष्ठतां ततः प्राप्तः युद्धोत्सवेऽट्टनः । कुर्वन्नियुद्धमवधीद्राज्ञो मल्लं निरङ्गणम् ।।५५।।
आगन्तुकेन मल्लो मे, व्यापादित इति क्रुधा । प्रशशंस न तं भूपस्तेन लोकोऽपि नाऽस्तवीत्!।।५६।।
ततो मा भूच्छ्रमो व्यर्थो, ममेयानिति चिन्तयन् । इत्येकामब्रवीदार्यां, सर्वं ज्ञापयितुमट्टनः ।।५७।।
सा चेयं–''कथति वनशकुनानां, कथयत हे शकुनकाः ! शकुनकानाम् ।
यदिहाट्टनेन निहतो, निरङ्गणः शस्त्ररहितेन ! ।।५८।।
श्रुत्वेति श्रुतपूर्वी तं, महामल्लं महीपतिः । यावज्जीवं जीविकार्हं, तुष्टस्तस्मै ददौ धनम् ।।५९।।
लोकोऽपि द्रविणं तस्मै, यथाशक्ति ददौ तदा । तत्रस्थं प्राप्तवित्त च, शुश्रुवुर्बन्धवोऽपि तम् ।।६०।।
ततस्तेऽभ्येत्य तत्पार्श्वे, तं पादपतनादिभिः । विश्वास्यौपयिकैः प्राग्वदश्रयन् वित्तलोभतः ।।६१।।
अध्यासीदट्टनो वित्तलुब्धाह्येते श्रयन्ति माम् । निर्धनस्य तु मे भूयः, करिष्यन्ति पराभवम् ।।६२।।
विस्रासापि शरीरं मे, स्वीकरोति शनैः शनैः । तया व्याप्तस्तु नैवाहं, भविष्याम्यौषधैर्युवा ।।६३।।

अधीनं मानवानां तद्भेषजं न हि विद्यते। पुनर्नवं भवेद्येन, जराजर्जरङ्गकम् ।।६४ ।।
न च वार्धकदिव्यास्त्रं, प्रयुक्तं कालविद्विषा। पतत्काये स्खलयितुं, शक्यं स्वजनकङ्कटैः! ।।६५ ।।
तज्जराया न हि त्राणं, भेषजं बन्धवोऽपि च । त्राणं तु धर्म एव स्यात्सर्वावस्थासु तत्त्वतः।।६६ ।।
तत्सामर्थ्यं किञ्चिदस्तीह देहे, यावत्तावद्धर्ममाराधयामि।
ध्यात्वेत्यन्तं सद्गुरूणामुपान्ते, प्रव्रज्याऽभूदट्टनः सौख्यपात्रम् ।।६७ ।।

❋ ❋ ❋

**अथ जरातोऽपि रक्षकं शरणं नास्तीत्याह–**

वपुषि चिरं निरुणद्धि समीरं, पतति जलधिपरतीरम् ।
शिरसि गिरेरधिरोहति तरसा, तदपि स जीर्यति जरसा, वि० ।।६।। [२९]

**व्याख्या– यः पुमान् जराया भयतो रक्षणकृते *समीरं* शरीरपुष्टिहेतुं मत्वा उच्छ्वासनिःश्वासवायुस्तं, *चिरं* प्रतिदिनं प्रभूतकालं यावद्, *वपुषि* शरीरमध्ये *निरुणद्धि* विष्कम्भयति स्तम्भयति । *जलधिपरतीरं पतति*, तथो (था) भयान्महान्तरालविधानाय दूरं प्रणश्य *जलधेः* समुद्रस्य *परमुत्तर* (*तीरं*) तटं गत्वा *पतति* अतिष्ठत् । *तरसा*ऽतिशीघ्रतया नंष्ट्वा *गिरेः* पर्वतस्य *शिरसि* समुन्नते शिखरे*ऽधिरोहति* समारूढो भवति । *तदपि* पूर्वोक्तसर्वप्रकारे कृतेऽपि *स* पुमान् *जरसा जरा* वयोहानिस्तया, *जीर्यते* जीर्णदेहो भवत्येव । यत एवं ततस्तत्रापि सर्वशक्तिमान् धर्म एव शरणमित्यर्थः ।।६।।**

उक्तं च उपदेशमालाटीकायाम् सत्यकिविद्याधरकालसंदीपकप्रसङ्गम्–

श्रेणिक–सुज्येष्ठायाः प्रकरणं एतद्भावनाया अन्तिमगाथोक्तसुलसाकथाया ज्ञातव्यं । ततः परं –

श्रीविशालायां महापुर्यां चेटको नामा राजा, तस्य सुज्येष्ठांचिल्लणानाम्न्यौ तयोरतीय परस्परं स्नेहः, अभयकुमारबुध्ध्या द्वाम्यामपि राजा श्रेणिको वरणीय इत्यभिग्रहो गृहीतः. पश्चादभयकुमारेण सुरंगा दापिंता, राजा श्रेणिकस्तया सुरंगया समायातः, द्वे अपि भगिन्यौ गृहीत्वा पश्चाद्वलितः श्रेणिकः, तदा सुरंगामुखे चिल्लणया चिंतितं, सुज्येष्टा मत्तोऽपि रूपेणाऽतीवश्रेष्टा, अतोऽयं श्रेणिको राजा इमां बहु मानयिष्यति, पट्टराज्ञीं च करिष्यति, इति विचार्य तया सुज्येष्टायाः कथितं हे भगिनि ! त्वं पश्चाद्गत्वाऽद्भूतमाभूषणसमुद्गकं समानयेत्युक्त्वा तमावयितुं पश्चाद्वालिता । पश्चाचिलणयोक्तं भो स्वामिन् सत्वरं गम्यतां ? कोऽपि ज्ञास्यति चेत्तदा विपरीतं भविष्यतीति भयं दर्शयित्वा सा सुरंगाया निसता, पश्चादागतया सुज्येष्टया चिंतितं यदि प्राणतोऽप्यधिकया चिल्लणयापि ममोपरि कूटं रचितं तदलं स्वार्थरसिकेन कुटुंबवर्गेण, धिगिमान् भोगिभोगोपमान् ! इति वैराग्यमापन्नया सुज्येष्ठ्याऽपरिणीतयैव चन्दनबालासाध्वीपार्श्वे चरित्रं गृहीतं. षष्टाष्टमाद्यनेकतपः कुर्वन्त्येकवारमातापनां गृहीत्वा स्थितास्ति । एतस्मिन्नवसरे पेढालनाम्ना विद्याधरेण गच्छता सा दृष्टा, मनसि चिन्तितमियं सती ध्याने स्थिता महारूपवती वर्त्तते, ततो यद्यस्याः कुक्षौ पुत्रमुत्पादयामि तदा स पुत्रो मदीयविद्याभाजनं भवतीति चिन्तयित्वा तेन विद्याबलेनान्धकारं विकुर्व्य भ्रमररूपेण यथा सा न जानाति, तथा तां भुक्त्वा तद्योनौ वीर्यं मुक्तं ततस्तस्याः कुक्षाववतीर्णः कोऽपि जीवः अनुक्रमेण च वर्द्धितुं लग्नः, साध्व्या मनसि संदेह उत्पन्नः, पश्चाद् ज्ञानि पृष्टः, तेन तस्याः संदेहो भग्नो यत्तवायं न दोषस्त्वं च सती ।क्रमेण पुत्रो जातः, तस्य सत्यकिरिति च नाम दत्तं ।

स साध्व्या उपाश्रये वर्द्धते स्म । साध्वीनां मुखादागमं शृण्वतस्तस्य सर्वोऽप्यागमग्रन्थो मुखाधीनो जातः, एकदा श्रीवर्द्धमानं वन्दितुं सुज्येष्ठा समवसरणं गता, सत्यकिरपि मात्रा सार्द्धं तत्र गतः, तदवसरे कालसंदीपकनामा विद्याधरः समागतः, तेन भगवतः पृष्टं, भगवन् कुतो मम भयम् ? भगवतोक्तमस्मात्सत्यकिबालतस्तव भयम् । तत् श्रुत्वा कालसंपदीपकेन तदवज्ञां विधाय स स्वकीयचरणयोः पातितः, तदा सत्यकिबालस्तदुपरि क्रुद्धः, पश्चात्पेढालनाम्ना जनकेन सत्यकये रोहिणीविद्या दत्ता. तां साधयतस्तस्य कालसंदीपको व्याघातं कर्त्तुं लग्नः, तदा रोहिण्यैव कालसंदीपको वारितः, यतः सत्यकिजीवेन पूर्वपचसु भवेषु रोहिणीं साधयता मरणं प्राप्तं, षष्ठे भवे रोहिणीविद्यां साधयतस्तस्य षण्मासावशिष्टे आयुषि प्रत्यक्षीभूय सा वदति स्म, तवायुः षण्मासावशिष्टं वर्त्तते, ततस्त्वं कथयसि चेदद्य भवे सिद्धामि, नो चेदागामिनि भवे सिद्धिं गच्छामि. तदा सत्यकिजीवेन कथितं, यदि मदायुः स्तोकं तदाऽऽगामिन्येव भवे सिद्धिं प्राप्नुयाः ? एवं पूर्वं कथितमासीत्, ततोऽस्मिन् भवे स्तोककालेनैव सिद्धिं गता सा प्रत्यक्षीभूय वदतिस्म, दर्शयैकं त्वदीयं शरीराङ्गम् ? तत्र प्रवेशं करोमि । तदा सत्यकिना स्वकीयं भालं दर्शितं, रोहिणीविद्या ललाटमार्गेण तदङ्गे प्रविष्टा, तत्र च तृतीयं लोचनं जातं. पश्चात्स विद्याबलेन साध्वी व्रतभंगकारकत्वात्पेढालनामानं स्वपितरं जघान प्रथमतः सत्यकिः, ततो विद्याबलोर्जितं दुर्जयं सत्यकिं विज्ञाय कालसंदीपको विद्याधरो मायया त्रिपुरदैत्यरूपं विकुर्व्य पलायितः, लवणसमुद्रमध्ये गत्वा पातालकलशे प्रविष्टः । सत्यकिनाऽपि तत्र प्रविश्य सो हतः ।

❋ ❋ ❋

सृजतीमसितशिरोरुहललितं मनुजशिरः सितपलितम् ।
को विदधानां भूघनमरसं प्रभवति रोद्धुं जरसम्, वि० ॥७॥ [३०]

व्याख्या- ***असितशिरोरुहललितं मनुजशिरः सितपलितं सृजतीं भूघनं अरसं विदधानां जरसं को रोद्धुं प्रभवति । न सितान्यसितानि*** **श्यामानि, शिरसि मस्तके रोहन्ति समुद्भवन्तीति *शिरोरुहाणि* केशाः, कर्मधारये कृते, तैर्ल*लितं* विराजितं, *मनुजशिरः मनुजा* मनुष्यास्तेषां *शिरो* मस्तकं, तत्सि*तपलितं सितं* कर्पासबीजवद्धवलं *सृजतीं* कुर्वाणां, तथा *भूघनं* नरादिशरीरं, *अरसं* निःसारं सामर्थ्यरहितमिति यावत्, *विदधानां* कुर्वतीं, *जरसं* जरां राक्षसीं, *कः* किंनामको देवः पुरुषो वा, *रोद्धुं* निवारयितुं, *प्रभवति* ? समर्थोऽस्ति न कोऽपि । यद्यपि देवादीनां शिरसि पलितं कर्तुं न शक्नोति, लोकस्थितेरलङ्घनीयत्वात्, तथापि शक्तिहानिं तु सर्वेषां करोतीत्यर्थः ॥७॥**

एतद् विषये आवश्यकनिर्युक्तौ आचार्यहरिभद्रसूरिकृतटीकायां उक्ता देविलासुतकथा कथ्यते ।

उज्जयिन्यां नगर्यां देविलासुतो राजा तस्य भार्याऽनुरक्ता लोचना नाम्नी, अन्यदा स राजा शय्यायां तिष्ठति, देवी वालान् वीणयाति ( शोधयति ), देव्या वाले पलितं दृष्टं, भणतिभट्टारक ! दूत आगतः, स ससंभ्रमं भयहर्षवान् उत्थितः क्व सः ?, पश्चात् सा भणति–धर्मदूत इति, शनैरङ्गुल्या वेष्टयित्वोत्खातं, सौवर्णे स्थाले क्षौमयुगलेन वेष्टयित्वा नगरे हिण्डितः, पश्चादधृतिं करोति–अजाते पलिते ऽस्माकं पूर्वजाः प्राव्रजिषुः, अहं पुनर्न प्रव्रजितः, पद्मरथं राज्ये स्थापयित्वा प्रव्रजितः ।

❋ ❋ ❋

**अर्थं सर्वोपायासाध्ययोर्जरामरणयोरशरणत्वचिन्ता दूरेऽस्तु किञ्चिदुपायसाध्ये रुगुदयेऽपि पीडाविभागिशरणं नास्तीत्याह–**

उद्यत उग्ररुजा जनकायः कः स्यात्तत्र सहायः ।
एकोऽनुभवति विधुरुपरागं विभजति कोऽपि न भागम्, वि० ।८।। [३१]

**व्याख्या– यत्र काले *जनकायः जनो* मनुष्यतिर्यङ्नरकजः प्राणी तस्य *कायो* देहः, स *उग्ररुजा उद्यतः, उग्राऽत्युत्कटभयानका रुक्* सन्निपातभगन्दरादिरोगस्तया *उद्यतः* प्रवृत्तो व्याप्तः *स्याद्भवेत्, तत्र* तस्मिन् काले, *कः* कस्को देवो मनुष्यः स्वजनो वा, *सहायो* व्यथाविभागग्रहणेन सहचारी दुःखविभागीति यावत् *स्याद्भवति*, न कोऽपि, एकाक्येव पीडां *सहते* । दृष्टान्तमाह *विधुरुपरागमेकोऽनुभवति न कोऽपि भागं विभजति । विधुश्चन्द्र उपरागं* राहुग्रसनग्रासव्यथाम्, *एकोऽसहायोऽनुभवति* भुनक्ति, *न कोऽपि* ग्रहनक्षत्रतारकादिः, *भागं* ग्रासांशं, *विभजति* स्तोकं स्तोकं स्वयं भुङ्क्ते । तद्वत्कर्मोदयो रोगादिभिः कर्तारं ग्रसते तदा सोऽप्येकाकी भुङ्क्ते इत्यर्थः ।।८।।**

उक्तं च कालसौकरिकसुतसुलसकथा रामविजगणिकृतोपदेशमालाटीकायाम् –

राजगृहे पुरे महाक्रूरकर्मकारकोऽधर्मी कालसौकरिकनामा पशुवधकारको वसति, स प्रतिदिनं पञ्चशतमहिषीणां वधं करोति, कुटुम्बपोषणं च करोति । तद्गृहे सुलसनामा पुत्रः, स चाऽभयकुमार–संसर्गेण श्रावको जातः, अथ कियता कालेन कालसौकरिकस्याङ्गे महान्तो रोगाः समुत्पन्नाः, तद्वेदनाः स सोढुं न शक्नोति, बहुविलापपूत्कारादि च करोति ।स्वजना बह्वप्यौषधं कारयति, परं तस्य वेदना न शाम्यति।

पश्चात्कालसौकरिको मृत्वा सप्तमपृथिव्यां नारकत्वेनोत्पन्नः, तस्य प्रेतकार्यं कृतम् । पश्चात्कुटुम्बेन सुलसायोक्तं त्वमपि पितृवत्पञ्चशतमहिषमारणेन कुटुम्बपोषणं कुरु ? कुटुम्बरीतिं प्रवर्त्तय ? सर्वेषां वृद्धश्च भवेति कुटुम्बवाक्यं श्रुत्वा सुलसो वक्तिस्म एतत्पापकर्माहं न करोमि. पापाचरणेन नरकं गच्छतो मम न कोऽप्याधारः, इमां हिंसां जिह्वास्वादेन येऽधमाः,समाचरन्ति, तेऽवश्यं दुर्गतिगामिनो भवन्ति ।यदि कण्टकेऽपि भग्ने महद्दुःखमवाप्यते तर्हि अनघाऽशरणपशूनां शस्त्रादिना घाते कृते यद्दुःख जायते, तस्य किं कथनीयं ? अतः सृतमनेन पापकुटुम्बपोषणेन, मम हिंसाकार्यं नास्ति. तदा कुटुम्बवर्गेणोक्तं तत्पापसंविभागं वयमपि करिष्यामः, परं कुलक्रमो न त्याज्यः. इत्यादि बहुकुटुम्बाग्रहं ज्ञात्वा तेषां प्रतिबोधनार्थं परशुमादाय स स्वपादस्योपरि क्षिप्तवान्, अचेतनश्च भूत्वा भूमौ पतितः, पश्चाच्चेतनावलनानन्तरं पूत्कारं कुर्वन् स सर्वकुटुम्बमाकार्य कथयति स्म, मम महती वेदना वर्त्तते, अतो यूयं पृथक् पृथक् विविच्य मे वेदनां गृह्णीतेति श्रुत्वा कुटुम्बेनोक्तं कथं परकीयावेदना गृहीतुं शक्यते ? तदा सुलसेनोक्तं यदि मदीयेयं वेदना भवद्भिः स्तोकापि गृहीतुं न शक्यते , तदा कथं मदीयपापग्रहणे समर्था भविष्यथेति बुद्ध्या स सर्वकुटुम्बं प्रतिबोधयामास ।पश्चात्तं व्यतिकरं ज्ञात्वाऽभयकुमारः सुलसगृहमागत्य समाधिशं च परिपृच्छ्य कथयति स्म धन्योऽसि त्वं, येन नीचकुलोत्पन्नेनापि त्वया हिंसा नादृतेति तस्य बहुप्रशंसां कृत्वाऽभयकुमारो गतः, क्रमेण सुलसोऽपि बहुकालं श्राद्धधर्मं परिपाल्य स्वर्गभाग्बभूव ।

**अथाशरणभावनामुपसंहरन्नाह–**

शरणमेकमनुसर चतुरङ्गम् परिहर ममतासङ्गम् ।
विनया रचय शिवसौख्यनिधानं शान्तसुधारसपानम् वि० ।।९।। [३२]

**।। इति श्रीशान्तसुधारसगेयकाव्येऽशरणभावनाविभावनो नाम द्वितीयः प्रकाशः ।।**

**व्याख्या– हे *विनय* ! हे निवृत्तीच्छक ! प्रोक्तप्रकारेण सांसारिकाः सर्वे भावा जीवस्य शरणं न भवन्तीति ज्ञात्वा *एकं चतुरङ्गं शरणमनुसर, एकमन्यत्सर्वं* मुक्त्वा एकमद्वितीयं, *चतुरङ्गं* चत्वार्यङ्गानि दानादिप्रकारा यस्य स चतुरङ्गो धर्मस्तं, *शरणं* "अयमेव ममैक आधारोऽस्तीति" बुद्धि*मनुसर* सततं स्वीकुरु । तथा *ममतासङ्गं परिहर,* ममैतद्धनादिकमिति बुद्धि*र्ममता* तस्याः *सङ्गः* संबन्धो रागस्तं *परिहर* निवारय । तत्कृत्वा *शिवसौख्यनिधानं शान्तसुधारसपानं रचय, शिवो* निरुपद्रवो मोक्षस्तस्मिन् यत्सुखस्य भावः *सौख्यं* परमानन्दस्तस्य निधानमक्षयभाण्डागारं तदीदृशं *शान्तसुधारसपानं* ज्ञानवैराग्यादिनिजसहजपरिणामरूपपीयूषास्वादनं *रचय* विधेहीत्यर्थः ।।९।।**

दृश्यते हि एतत् उपदेशप्रासादोक्तसुलसाश्राविकाकथायाम् –

अनेकचातुर्वर्ण्यजनसंभृते महेभ्यविराजिते रम्ये राजगृहे श्रेणिको राज्यं कुरुते । तत्र नागसारथिकस्य प्रिया सुलसाभवत् । एकदान्येषां पुत्रान् दृष्ट्वा सशोकं पतिं वीक्ष्य पत्न्या प्रोक्तम्– स्वामिन् ! खेदं मा कुरु । आवयोरीप्सितं धर्मात् फलिष्यति । ततः सा त्रिसन्ध्यं जिननाथमपूजयत् । ब्रह्मचर्येणाचाम्लानि कुरुते स्म ।

इतस्तस्याः सत्त्वश्लाघावाक्यं शक्रतः समाकर्ण्य हरिणैगमेषी पदातीशः सुरः साधुद्वयरूपं विधायागत्येति । तां प्राह–श्राद्धे ! लक्षपाकतैलं ग्लानचिकित्सार्थं विश्राणय । ततो हृष्टा साऽन्तः प्रविश्य तैलकुम्भं यावदुपाहरत्तावद्दिवौकसा भूमौ पातितः । एवं सप्तकलशा अभज्यन्त तेन दिव्यमहिम्ना । तथापि तस्या अभङ्गुरं भावं वीक्ष्य सुर आविर्भूय जगाद–भद्रे ! अहं सुरस्त्वां परीक्षितुमागाम् । तुष्टोऽस्मि । अथ कमप्यर्थं प्रार्थयस्व । साऽब्रवीत्–

यदि तुष्टोऽसि देव ! तदा यच्छ तनूद्भवान् । सोऽपि द्वात्रिंशतं तस्यै गुटिकाः प्रददौ मुदा ।।

त्वयैकैका भक्ष्या इत्युक्त्वा घटान् प्रकटीकृत्य सुरः स्वर्गं ययौ । तत ऋतुकाले बहुगर्भदुःख – सूतिकर्मभीरुः सा द्वात्रिंशल्लक्षणोपेत एक एव पुत्रो भवत्विति ध्यात्वाऽखिला आश्नात् । क्रमाद्बहुगर्भ–भारभरेण व्यथां प्राप्ता सा कायोत्सर्गेण तं देवं सस्मार । तदा स सुरो व्यथां संहृत्य प्राह–त्वयाऽकार्यं कृतं, तेन तव युगपद्द्वात्रिंशत्पुत्रा भविष्यन्ति–

परं द्वात्रिंशदप्येते समानायुष्कतावशात् । समकालं विनङ्क्ष्यन्ते दुर्लङ्घ्या भवितव्यता ।।

यतः–गुणाभिरामो यदि रामभद्रो, राज्यैकयोग्योऽपि वनं जगाम ।
विद्याधरश्रीदशकन्धरश्च, प्रभूतदारोऽपि जहार सीताम् ।।

इत्युक्त्वा देवो गतः । अथ पूर्णे काले सा द्वात्रिंशतं सुतान् प्रासूत । ततो नागस्तेषां जन्मोत्सवं चक्रे क्रमात्ते यौवनं प्राप्ता नृपोपजीविनो बभूवुः ।

इतः श्रेणिकश्चेटकपुत्रीसुज्येष्ठारूपं चित्रन्यस्तं तापसीसमानीतं दृष्ट्वा तामङ्गिकर्तुकामोऽभूत् । तदाऽभयो गन्धिकवेषेण तत्र गत्वा भूपान्तःपुरपार्श्वे आपणममण्डयत् । यदा सुज्येष्ठाचेटी तत्र क्रयाणकं ग्रहीतुमागच्छति, तदाऽभयः श्रेणिकरूपपट्टं पूजयति । चेट्या अन्यदा पृष्टः–कस्येदं रूपम् ? । तेन श्रेणिकस्येत्युक्तम् । सा चित्रफलकं गृहीत्वा सुज्येष्ठाया अदर्शयत् । ततः सुज्येष्ठा पञ्चबाणार्ता जगौ तथा त्वं कुरु, यथा मम स पतिः स्यात् । चेट्याऽभयस्याग्रे उक्तम् । ततस्तेन तदन्तःपुरतः पितुर्नगरं यावत् सुरङ्गां कारयित्वा पितुर्ज्ञापितम्–अमुकदिने त्वया सुरङ्गपथेनागन्तव्यम् । ततो नृपे समागते सुज्येष्ठा यावच्चलितकामाऽभूत्तावच्चेल्लाणापि जगौ–ममापि स एव स्वामी । ततो द्वे अपि पुत्र्यौ तन्मुखे समागते । कियद्दूरं गतेषु तेषु सुज्येष्ठा स्वरत्नकरण्डकग्रहणाय गमनोत्सुकाऽवक्– भागिनि ! मां विनाऽग्रे न गन्तव्यम् । इत्युक्त्वा सा गता ( करण्डकानयनाय ) । इतः सौलसेया नृपं प्राहः–

अत्र शत्रुगृहे देव ! न स्थातुं युज्यते चिरम् । इति तत्प्रेरितो लात्वा चेल्लणां व्याघोटन्नृपः ।।

ततः सुज्येष्ठा रत्नसमुद्गकमादायागता । तत्र कमपि नैक्षिष्ट । तदोच्चैश्चेल्लणाऽपह्रियत इति पूच्चकार तदाचेटकभूपसैन्यं तत्पृष्ठे गतम् । तत्राहवे सुलसैकपुत्रे वैरिणा हतेऽन्ये एकत्रिंशत्पुत्रा द्रुतं मृताः । नृपोऽपि द्रुतं प्राप्य चेलणामुपायंस्त ।

अथ नागसुलसे स्वसुतानाममङ्गलं श्रुत्वा भृशं रुरुदतुः । तदाऽभयोऽवक्–

अपि जैनमतार्थवेदिनामपि सांसारिकभावना भृताम् ।<br>
भवतां नहि शोकसागरे, पतितुं युक्तमिवाविवेकिनाम् ।।<br>
कुशकोटिगतोदकबिन्दुवत्, परिपक्वद्रुमपत्रवृन्दवत् ।<br>
जलबुद्बुदवच्छरीरिणां, क्षणिकं देहमिदं च जीवितम् ।।

इति श्रुत्वा तौ दम्पती गतशोकावभूताम् ।

**।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणि- सतीर्थ्यतिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां शान्तसुधारसटीकायामशरणभावनाविभावनो नाम द्वितीयः प्रकाशः समजनि ।।**

**अस्वीकृतधर्मशरणानां न संसारपारम् इति अनेन सम्बन्धेन आयाता संसारभावना प्रारभ्यते–**

# ॥ तृतीयः प्रकाशः ॥

अथानन्तरं जीवानामशरणता दर्शिता । अशरणास्तु संसारे परिभ्रमन्तीत्यनेन संबन्धेनायातां संसारभावनां भावयन्नाह–

( शिखरिणीवृत्तत्रयम् )

इतो लोभः क्षोभं, जनयति दुरन्तो दव इवो–
ल्लसल्लाभाम्भोभिः कथमपि न शक्यः शमयितुम् ।
इतस्तृष्णाऽक्षाणां, तुदति मृगतृष्णेव विफला,
कथं स्वस्थैः स्थेयं, विविधभयभीमे भववने ॥१॥ [३३]

व्याख्या– यत्र *इतो दुरन्तो लोभो दव इव क्षोभं जनयति,* यस्मिन् *इत* एकस्या दिशः सकाशाद् *दुरन्तो लोभो दव इव क्षोभं जनयति दुःखेन* महाप्रयासे*नान्तो*ऽवसानं शमनमितियावद् वा दुष्टः अन्तः पर्यवसानं यस्य स, तथाभूतो *लोभः* अप्राप्तप्रापणेच्छा प्राप्तस्य संरक्षणबुद्धिः स *दव इव* ज्वलद्दावानलतुल्यं (तुल्यः) *क्षोभं* सन्तापं *जनयति* उत्पादयति । *उल्लसन्* कथमपि *लाभाम्भोभिः शमयितुं न शक्यः । उल्लसन्* लोभदवजन्यसन्तापो वृद्धिं गच्छन्, *कथमपि* कैश्चिन्महार्थप्राप्तिरूपैरपि *लाभाम्भोभिः लाभा* अप्राप्तानां प्राप्तयस्त *एवाम्भांसि* जलानि तैः, *शमयितुं* निर्वापयितुं *न शक्यो* न साध्यः। *इतो मृगतृष्णेव विफला अक्षाणां तृष्णा तुदति ।* इतोऽन्यस्या दिशः सकाशात्, *मृगतृष्णेव विफला, मृगतृष्णा* निदाघकाले मध्याह्ने रविकिरणसन्तप्तसिकतासु यो निर्जलेऽपि जलभ्रमो भवति सा मृगतृष्णा यथा जलप्राप्तिफलरहिता तद्व*द्विफला* सुखप्राप्तिफलवर्जिता *अक्षाणां तृष्णा* इन्द्रियाणां भोगपिपासा *तुदति* जीवान् सुखभ्रान्त्या व्यथयति । तत्र *विविधभयभीमे भववने स्वस्थैः कथं स्थेयम् ?* तस्मिन् *विविधानि* शारीरमानसिकरोगशोकाजीविकावियोगादिभ्यो जातानि यानि *भयानि* त्रासदुःखानि *तैर्भीमे* भयानके *भववने* संसारारण्ये *स्वस्थै*र्निराकुलैर्निर्भयैरिति यावत्, *कथं* केनोपायेन *स्थेयम*स्माभिरन्यैर्भवस्थजनैः (च) स्थातव्यम् ? न केनापि । नास्त्येव स उपायो येन सर्वथा जनो निराकुलो भवेदित्यर्थः॥१॥

प्रसिद्धो हि एतत् विषये मधुबिन्दुष्टान्तो यथा उक्तं रामविजयगणीकृतोपदेशमालाटीकायाम् –

एकस्मिन्नरण्ये सार्थभ्रष्ट : कश्चिन्नरो वने परिभ्रमति, एतस्मिन्नवसरे आरण्यो हस्तीतं हननाय सन्मुखं धावितः, स प्रनष्टः, हस्ती पश्चाल्लग्नः, अग्रे गत्वा गजभयात् कूपमध्ये स्थितां वटशाखामाश्रित्य लम्बायमानः स्थितः, तस्याधस्ताद्विकासितमुखौ द्वावजगरौ वर्तेते. कूपकस्य चतुर्षु पार्श्वेषु चत्वारो लम्बकायाः स्थिताः संति, शाखायां रसपूरितो मधुडपो वर्तते. द्वौ मूषकौ तां शाखां कर्तयतः , मधुमण्डपान्निर्गता मक्षिकास्तं दंशति, एवं कष्टमापन्नः स मूढश्चिरकालेन मधुबिन्दुं मुखे प्राप्य तदास्वादसुखितस्तन्नास्ते । एतस्मिन्नवसरे कश्चिद्विद्याधरः समागतः, तेनोक्तं अस्मिन् विमाने समागच्छ ? दुःखान्निष्कासयामि । न गतः मधुबिन्दुसदृशोऽयं विषयविपाकः, अत्रोपनयः–भव एव महत्यटवी, जीवो रङ्कतुल्यः, जरामरणावतरणंरूपोऽयं

कूपः, विषयजलेन पूर्णः, नरकगतितिर्यग्गति–रूपावजगरौ, कषाया विषधराः, आयुरेव वटशाखा, द्वौ पक्षौ मूषकौ, मृत्युरेव गजः, विषयो मधुमण्डप–स्थानीयः विद्याधरस्थानीयो गुरुः,तस्य स्पृहकं कुर्वन्नयं जीवो रोगशोकवियोगाद्यनेकानुपद्रवान् सहते, विद्याधरस्थानीयो गुरुः अतो धर्म एव महत्सुखं ।।

❋ ❋ ❋

गलत्येका चिन्ता, भवति पुनरन्या तदधिका,
मनोवाक्कायेहाविकृतिरतिरोषाऽऽत्तरजसः ।
विपद्‌गर्तावर्ते झटिति पतयालोः प्रतिपदं
न जन्तोः संसारे भवति कथमप्यर्तिविरतिः।।२।।[३४]

व्याख्या– *संसारे झटिति विपद्गर्तावर्ते पतयालोर्जन्तोः प्रतिपदमेका चिन्ता गलति पुनरन्या तदधिका भवति मनोवाक्कायेहाविकृतिरतिरोषात्तरजसः कथमप्यर्तिविरतिर्न भवति* तावदस्मिन् *संसारे* ज्ञाननेत्राभावादन्धस्य *झटिति* शीघ्रतयाऽविलम्बेन *विप*न्महाविपत्तिस्तया भृतः, प्रचुरयातनास्थानमितियावत्, ईदृशो *गर्तो* दुर्लङ्घ्यभूमिखड्डूसदृशो भवखड्डुस्तस्मिन् विपद्गर्ते *पतयालुः* स्वतः पतनशीलस्तस्य पतयालोः *जन्तोः* संसारिजीवस्य *प्रतिपदं* क्षणे क्षणे स्थाने स्थाने भवे भवे चेति यावत् । *एका चिन्ता गलति* यावदे*का* पूर्वोत्पन्ना *चिन्ता* शरीरकुटुम्बपालनधनार्जनसुखप्राप्त्युपायरूपाऽर्तिविचारणेति यावत् *गलति* किञ्चित् स्रंसते तावत्*पुन*रन्या नवीना *तदधिका* तस्याः सकाशादतिप्रभूता *भवति* समुत्पद्यते । तन्निमित्तप्रवृत्ता या *मनोवाक्कायेहा* मनोवचनकायानां *ईहा* विविधाभिलाषो विचारश्च, *विकृति*स्तेषामेव विकाराः, *रतिः* पञ्चविधविषयप्रेमा, *रोषे*ऽनिष्टे जाते द्वेषः, एतेषां समाहारद्वन्द्वे कृते तस्मादशुद्धहेतोर*ात्तं* गृहीतं *रजो* रज इव रजः कर्मधूलिपुञ्जो येन स तथा तस्य *कथमपि* केनापि प्रकारेण *अर्तिः* सन्तापश्चित्तोद्वेगस्तया *विरति*र्विरामो विच्छेद इति यावत् नेति न *भवति* जायते । भवे जीवः सदैवार्तिपीडितोऽस्तीत्यर्थः ।।२।।

उक्तं हि एतद्‌विषये श्रीशुभशीलगणिकृतप्रबन्धपञ्चशत्याम् इदं कथानकंश्रीपूरे धनः श्रेष्ठी प्रातरुत्थायोत्थाय ध्यायति स्म । अद्य मम यानं श्रीयुतं समायाति । याने समागते हृष्टो, दध्यौ वस्तु तत् विक्रेतुं रात्रिंदिवा विश्रामं न लाति, वस्तु विक्रीय वाहनपूरणार्थ वस्तु गृहणन्नपि न विश्रामयति स्म । चलितेऽम्बुधौ याने भग्नां चिन्ता चौरचिन्ता समर्थमहार्थचिन्ता, एवं ध्यायन् स दध्यौ–

बिन्दुनाऽप्यधिका चिन्ता, चिताया इति मे मतिः । चिता दहति निर्जीवं, चिन्ता जीवन्तमप्यहो ।।

इति ध्यात्वा श्रेष्ठी संसारमसारं मत्वा दुःखमयं च धनं धर्मे व्यवीत्वा चारित्रं गृहीत्वा स्वर्गं गतः।

❋ ❋ ❋

सहित्वा सन्तापानशुचिजननीकुक्षिकुहरे,
ततो जन्म प्राप्य, प्रचुरतरकष्टक्रमहतः ।
सुखाभासैर्यावत्,स्पृशति कथमप्यर्तिविरतिं,
जरा तावत्कायं, कवलयति मृत्योः सहचरी ।।३।।[३५]

व्याख्या– *अशुचिजननीकुक्षिकुहरे सन्तापान् सहित्वा, अशुचि*रपवित्रो *जनन्या* मातुः *कुक्षि*रुदरं तद्रूपो यः *कुहरो* गुहाविवरस्तस्मिन्, *सन्तापान्* भूरिसंक्लेशान् *सहित्वा* नवमासपर्यन्तं भुक्त्वा, *ततः*

*प्रचुरतरकष्टक्रमहतो जन्म प्राप्य, ततो* नवमासानन्तरं *प्रचुरतराणि* सुबहूनि कष्टानि योनिसंकटादिपीडनप्रकाराणि तेषां *क्रमो* नियतभाव्युपर्युपरि दुःखश्रेणिः तेन *हतः* प्रहृतः *जन्म* योनितो निर्गमं *प्राप्य* लब्ध्वा, *यावत्सुखाभासैः कथमप्यर्तिविरतिं स्पृशति, यावद्यावत्कालान्तरे सुखाभासैः* यान्यसुखान्यपि सुखसदृशतया आभासन्ते मोहोदयेन प्रतिभासन्ते ते सुखाभासा भोगासङ्गास्तैः *कथमपि* महता कष्टप्रबन्धेन *अर्तिविरतिं* सन्तापविरामं *स्पृशति* लभते, *तावन्मृत्योः सहचरी जरा कायं कवलयति, ताव*न्मात्रकालविभागे *मृत्यो*र्मरणस्य *सहचरी* प्राणप्रिया *जरा* वार्द्धक्यं *कायं* मनुष्यदेहं *कवलयति* भक्षयतीत्यतः संसारिणः सन्तापविरामः क्व ? न क्वापीत्यर्थः ।।३।।

श्रीरामविजयगणीकृतोपदेशमालाटीकायाम् प्रसन्नचन्द्रराजर्षिकथा उच्यते–

पोतनपुरे नगरे प्रसन्नचन्द्रो राजा बभूव, सोऽतीवधार्मिकः सत्यवादी न्यायधर्मनिपुणः, स एकदा सन्ध्यायां गवाक्षस्थितो नगरस्वरूपं विलोकयति, तस्मिन्नवसरे नानावर्णान्यभ्राणि जातानि, सन्ध्यारागः सञ्जातः, तं दृष्ट्वाऽतीवहर्षितो राजा मुहुर्मुहुर्विलोकयति, तत्सन्ध्यास्वरूपं क्षणिकं दृष्टनष्टमिव नष्टं, राज्ञा चिन्तितं क्व गतं सन्ध्यारागसौन्दर्यं ? अनित्यता पुद्‌गलानां, सन्ध्याराग इव देहोऽप्यनित्यः, संसारे प्राणिनाम् ? किमपि सुखं नास्ति, यदुक्तं–

दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे गर्भवासे नराणाम् ।
बालत्वे चापि दुःखं मललुलितवपुः स्त्रीपयः पानमिश्रम् ।
तारुण्ये चापि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः ।
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ।।१ ।।

एवं वैराग्यरङ्गेण रञ्जितमना राजा चिन्तयति संसारे वैराग्योपमं सुखं नास्ति । यदुक्तं

भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्‌भयम् ।
दास्ये स्वामिभयं गुणे खलभयं वंशे कुयोषिद्‌भयम् ।
माने म्लानिभयं जये रिपुभयं काये कृतान्ताद् भयम् ।
सर्वं नाम भयं भवेच्च भविनां वैराग्यमेवाभयम् ।।२ ।।

एवं वैराग्यपरायणो राजा स्वं पुत्रं राज्ये स्थापयित्वा स्वयं दीक्षां जग्राह ।

❋ ❋ ❋

( उपजातिवृत्तम् )

विभ्रान्तचित्तो बत बम्भ्रमीति पक्षीव रुद्धस्तनुपञ्जरेऽङ्गी ।
नुन्नो नियत्याऽतनुकर्मतन्तुसन्दानितः सन्निहितान्तकौतुः ।।४।। [३६]

व्याख्या– *बत अङ्गी तनुपञ्जरे पक्षीव रुद्धो नियत्या नुन्नोऽतनुकर्मतन्तुसन्दानितः सन्निहितान्तकौतुः विभ्रान्तचित्तो बम्भ्रमीति । बते*ति खेदे कीदृक् कष्टं वर्तते ? *अङ्गी* संसारी जीवः *तनु* शरीरं तस्य तदेव वा *पञ्जरमस्थ्या*दिपुद्गलावयववृन्दं तस्मिन्, *(पक्षीव) रुद्धो* वेष्टितो जातगतिभङ्गः *नियत्याऽ*दृष्टेन *नुन्नः* प्रेरितः *अतनुकर्मतन्तुसन्दानितः* न *तनूनि* स्वल्पानि अतनूनि महान्ति *कर्माणि* ज्ञानावरणीयादीनि तान्येव *तन्तवो* ग्राहा जीवभानोर्ग्रासाः दवरिकासमूहो वेति यावत्, तैः *सन्दानितो* बद्धः, *संनिहितान्तकौतुः*

*सन्निहितः* सदा समीपतरवर्ती *अन्तको* मरणं स एव *ओतुर्*मार्जारस्तद्भयतो *विभ्रान्तचित्तो विशेषेण भ्रान्तं* विक्षिप्तं विह्वलीकृतं *चित्तं* मनो यस्य स तथाभूतः *बम्भ्रमीति* अनादिकालतः सर्वस्मिँल्लोकेऽतिशयेन पर्यटतीत्यर्थः ॥४॥

उक्तं हि उपदेशप्रासादे गोशालकभवस्थितिख्यापकं आख्यानम्–

श्रीमदाद्यगणनाथः श्रीमत्परमात्मानं त्रिभुवनैकशरणं वाञ्छितवरदं पपृच्छ–स्वामिन् । मङ्खलीसुत चरित्रम् अग्रे यद्भवि तद् निगदतु । भगवान् उवाच– अत्र भरते शतद्वारपुरे सुमती राजा, सुभद्रा भार्या, तयोः पुत्रो द्वादशकल्पतश्च्युतो मङ्खलीसुतजीवो महापद्मनामा भविष्यति, तस्य द्वितीयं नाम देवसेन इति, तृतीयं नाम विमलवाहन इति चतुर्दन्तश्वेतहस्तिप्राप्त्यनन्तरं भावि । ततः स नृपो गाढमिथ्यात्वयुक्तोऽनेक–साधूनां कदर्थनां नानाविधां विधास्यति । तदा सचिवादिप्रकृतिवर्गैः स नृपः सविनयं वदिष्यते तव प्रजानाथस्य नेदं करणमुचितम् । तदा तत्क्रियातो निवृत्तोऽप्येकदोद्याने शोभां विलोकयन् एकत्र स्थले तीर्थाधिपशिष्यस्य शिष्यं सुमङ्गलानगारं त्रिज्ञानोपेतं निरन्तरषष्ठतपोविजृम्भितमातापनापरंवीक्ष्य स विमलवाहनो रथचर्यार्थं निर्गतो वीक्ष्य क्रोधं प्राप्स्यति । ततो नृपो मुनेरुपरि रथं वाहयिष्यति, ततः स भूपः सिंहावलोकनं विधाय मुनिमवलोकयिष्यति तथैव ध्यानतत्परं, तं वीक्ष्य पुनर्वेगेनाश्वरथं मुनेरुपरि खेटयिष्यति । पुनः क्षमाभृदुत्थाय शनैः शनैस्तथैव ध्यानमग्न इति चिन्तयिता–अहो ! अयं जीवो महानिर्घृणः कथमस्ति ? । ततोऽवधिज्ञानेन गोशालस्य जीवं ज्ञास्यति, तदा नृपं कथयिष्यति–भो महापद्म ! इतस्तृतीयभवे त्वं मङ्खलीसुत आसीः । तदा त्वया तेजोलब्धिना श्रीवीरपरमात्मनः शिष्यौ सर्वानुभूतिसुनक्षत्रनामानौ द्वौ मुनी दग्धौ, तौ तु क्षमारक्षणार्थं क्षमौ, तयोरग्र इन्द्रादीनां सामर्थ्य कुन्थुकसदृशं तर्हि त्वं कियन्मात्रः ? परं तौ धन्यौ याभ्यामुपसर्गः सोढः, न किञ्चित्क्रोधाभ्यासं नीते चक्षुःकोणके । तथा समस्तसंसारवर्तिजीवेभ्योऽनन्तगुणबलान्वितः श्रीवीरपरमात्मा त्वन्मुक्ततेजोलेश्यया न स्वल्पमपि क्रोधमगमत्, प्रत्युत तैः प्रबोधस्त्वां प्रति दत्तः, अपात्रत्वान्न त्वं प्राप्तवान्, अतोऽहं सुमङ्गलः पूर्वसाधुभिः सदृशः क्षमावान्नास्मि, अहं सरथं सहयं सारथियुक्तं त्वां तपस्तेजसा भस्मसात्करिष्यामि ।

इति श्रुत्वा विमलवाहनेनात्यन्तसंजातक्रोधेन तृतीयवारं मुनेरुपरि रथः खेटितः, मुनिर्भूमौ पतितः । तदोत्पन्नक्रोधेन मुनिना तेजःसमुद्घातं कृत्वा सप्ताष्टपदान्यपसृत्य सरथः सहयः ससारथिर्विमलवाहनो भस्मीकरिष्यते । ततो मुनिर्विचित्रषष्ठाष्टमतपःकर्मभिर्बहुवर्षाणि यावत् श्रामण्यपर्यायं प्रपाल्य माससंलेखनयाऽऽलोच्य प्रतिक्रम्य सर्वार्थसिद्धिविमानं यास्यति । अथ स नृपो मृत्वा सप्तमश्वभ्रे ज्येष्ठायुषा भावी । तत उद्धृत्य मत्स्यत्वमनुभूय द्वितीयवारं सप्तमनरकं प्राप्स्यति । तत उद्धृत्य मत्स्यत्वे बहुकदर्थनां प्राप्य षष्ठ्यां पृथिव्यामुत्कृष्टायुर्युक्तो नारकी भावी, ततः स्त्रीत्वं, पुनस्तमायां नारकत्वं, पुनः स्त्रीत्वम् तत्रानेककदर्थनां प्राप्य धूमप्रभायां गमिता । तत उरःपरिसर्पत्वेन भावी । तत्र शस्त्रेण वधं प्राप्य पञ्चमपृथिव्यां पुनरुरःपरिसर्पत्वम् । ततश्चतुर्थ्यां पङ्कप्रभायां, ततो निःसृत्य सिंहत्वं, पुनश्चतुर्थ्यां, भूयः सिंहत्वं, ततो वालुकायां पृथिव्यां, तत उद्धृत्य पक्षित्वम् । पुनर्वालुकाप्रभायाम् । ततो निःसृत्य पक्षित्वम् । ततः शर्कराप्रभायाम् । तत उद्धृत्य सरीसृपत्वम् । पुनर्द्वितीयपृथिव्याम् । भूयः सरीसृपत्वम् । ततो रत्नप्रभायामुत्पद्य निःसृत्य चासंज्ञित्वं प्राप्य प्रथमनरके गमिष्यति । एवं च यथोक्तक्रमेण चासंज्ञिप्रभृतयो रत्नप्रभादिषूत्पत्स्यत इत्यसौ तथैवोपपादितः । आह च–

असन्नी सरीसिव पक्खी सीह उरगित्थी जंति जा छट्ठीं ।
कमसो उक्कोसेणं सत्तमिपुढवीं मणुअमच्छा ।।

ततश्चर्मपक्षिषु चर्मचटीवागुलादिषु लोमपक्षिषु राजहंसादिषु चेत्यादिपक्षित्वं प्राप्य भुजपरिसर्पत्वेनानेकसहस्रकृत्व उत्पतिता । तत उरःपरिसर्पत्वेनाजगराशालिकादिष्वनेकशतसहस्रकृत्व उत्पतिता । अथाशालिकाजीवस्तु ग्रामनगरचक्रिसैन्यं विनाशयति, कदाचिदुत्पद्यतेऽश्वादिलालादिकमध्ये भूमावङ्गुलासङ्ख्येयभागादारभ्योत्कृष्टतो द्वादशयोजनप्रमाणः संमूर्छितमिथ्यात्वी जायते स यदा पार्श्वं परावर्तयति तत्र गर्ता पतति, तत्र सैन्यादिविनाशः स्यात्, स पर्याप्तोऽन्तर्मुहूर्त्तायुषा विनश्यति । तथा शालिकाजीवस्य द्वीन्द्रियत्वमपीच्छन्ति केचित् । अत्र चतुर्थोपाङ्गानुसारेण पञ्चेन्द्रियः प्रोक्त इति । तदनु स एकक्षुरद्विक्षुरगण्डिपदहस्तिसनखिष्वनेकशतसहस्रकृत्वोऽवतरिता । ततो जलचरेषु । ततश्चतुरिन्द्रियभवेषु द्वीन्द्रियेषु च । ततो वनस्पतिकायेषु वायुतेजस्कायिकपृथ्वीकायादिषु सर्वत्र प्रत्येकमनेकशतसहस्रकृत्व उत्पतिता । ततो राजगृहपुरे जघन्यमध्यमोत्कृष्टवेश्याभवाँस्त्रीन् प्राप्स्यति । ततो द्विजबालिका भविता । पितृभ्यां महामहेन विवाहः कारिताः । क्रमेण श्वशुरगृहे संजातगर्भवती पितुर्गृहे गमनायाशुभशकुनेन कृतप्रयाणाऽन्तरा मार्गे रात्रौ दावाग्निज्वालाभिः पीडिताऽनेकविलापपराऽनन्यगतिका भस्मराशिं प्राप्स्यति ।

पूर्वमनेन जीवेन संयमधारिणां कोष्ठका ज्वालिता अभूवन्, तत्कर्म उदयागतम् । आत्मा यानि कर्माणि विद्धाति तानि जीवस्तु विस्मृतिपदं नयति, परं कर्माणि तु समयसमयोपेतानि जीवं न विस्मरन्ति, एवमनेक–मध्ये संस्थितं तं गृह्णन्ति । तदनुसारेणाग्निकुमारदेवत्वेनोत्पतिता । ततो मनुष्यत्वं लब्ध्वा साधुसंगत्या सम्यक्त्वं संयमं च लप्स्यते । क्रमेण कालं कृत्वा दक्षिणपार्श्वस्यासुरकुमारदेवत्वं ग्रहीष्यति विराधितश्रामण्यत्वात्, अन्यथा साधूनां वैमानिकेष्वेवोत्पत्तिः स्यात् । ततः स निःसृत्य मनुजत्वं लब्ध्वा दक्षिणनागकुमारत्वं सुवर्णकुमारदेवत्वं दक्षिणस्तनितकुमारे । ततो मानुष्यं, तत्र विराधितसंयमेन ज्योतिर्देवत्वम् । ततो निःसृत्य मनुजभवे संयमं प्रपाल्याद्यकल्पेऽङ्गना, आराधितचरणत्वात् । आराधना चेत्थम्–चरणप्रतिपत्तिसमयादारभ्य मरणान्तं यावन्निरतिचारतया तस्य पालना । ततो नरभवं प्राप्य तृतीयदेवलोकम् । उक्तं च पञ्चमाङ्गे–एवं सणंकुमारे तहा बम्भलोए महासुक्के आणते आरणे सेणं ततो अविराहियसामण्णे कालमासे कालं किच्चा सव्वट्ठसिद्धे महाविमाणे देवत्ताए उववज्जिहिति से णं ततो हंतो अण्णतरं चयं चइत्ता ( २ ) महाविदेहे समृद्धिपूर्णकुल उत्पद्य नरत्वेन शुभगुरुसंयोगेन प्राप्तदर्शनः सर्वोत्कृष्टसंयमतपोभिः केवलज्ञानमुपार्जयिष्यति प्रथमदेशनायां गुर्वाशातनायां कटुफलं मयाभुक्तं इदं कथिष्यति ।

❋ ❋ ❋

**कियत्कालं पर्यटतीत्याह–**

( अनुष्टुब्-वृत्तम् )

**अनन्तान्पुद्गलावर्ता- ननन्तानन्तरूपभृत् ।**
**अनन्तशो भ्रमत्येव, जीवोऽनादिभवार्णवे ।।५।।[३७]**

**व्याख्या–** ***जीवोऽनादिभवार्णवेऽनन्तानन्तरूपभृद् अनन्तान् पुद्गलावर्तान् अनन्तशो भ्रमत्येव,*** ***जीवो***ऽयं संसारी प्राणी, ***अनादि***र्न विद्यते आदिः प्रवृत्तेः प्रथमदिवसादिर्यस्य ***भवार्णव***स्य तस्मिन्ननादि–

भवार्णवे, अनन्तसंख्यैर्गुणितोऽनन्तसंख्येयो राशिर*नन्तानन्त*स्तावत्परिमाणानि *रूपाणि* नरकपशु-नरदेवविकलैकेन्द्रियाद्याकाराणि तानि बिभर्ति धारयतीति यः स तथाविधः सन्, *अनन्तान् पुद्गलावर्तान्* अनन्ताभिरुत्सर्पिण्यवसर्पिणीभिरुन्मितः काल एकः पुद्गलावर्तस्ते-ऽनन्ता यस्मिन् परिभ्रमणो तान्, पुद्गलावर्तान्, *पुद्गलाः* परमाणवस्ते सर्वेऽपि केनचिदेकेन जीवेन औदारिकवैक्रियाहारकैस्त्रिभिः शरीरैर्गृहीत्वा मुक्ता यावता कालेन भवन्ति स पुद्गलावर्तः पुद्गलाना*मावर्तः* पूर्वगृहीतानां त्यजनेनोत्तरोत्तरग्रहणानि पुद्गलावर्तास्ताननन्तान् *अनन्तशो*ऽनन्तानप्यनन्तवारान् *भ्रमत्येव* पर्यटन्नेवास्ते इत्यर्थः ।।५।।

❋ ❋ ❋

अथ संसारभावनां गेयपद्याष्टकेन भावयन्नाह-

कलय संसारमतिदारुणं, जन्ममरणादिभयभीत रे ।
मोहरिपुणेह सगलग्रहं, प्रतिपदं विपदमुपनीत रे, क० ।।१।। [३८]
स्वजनतनयादिपरिचयगुणै-रिह मुधा बध्यसे मूढ रे ।
प्रतिपदं नवनवैरनुभवैः, परिभवैरसकृदुपगूढ रे, क० ।।२।। [३९]

व्याख्या- *रे मूढ ! स्वजनतनयादिपरिचयगुणैरिह मुधा बध्यसे ।* रेकारोऽधमसंबोधने । *रे मूढ !* रे मूर्खशेखर ! अधमाधम निर्विचारेति यावत्, क्वचिदन्तेऽपि हे भवेदित्यतो मूढ रे इति पाठः, *स्वजनतनयादिपरिचयगुणैः* स्वकीया जनाः स्वजना मातापिताभ्रातृप्रभृतयः *तनयाः* सुतसुताः *आदि*ग्रहणाद्दासादिद्विपदचतुष्पदभूसदनधनवस्त्रालङ्कारादयो ग्राह्याः, तैः सह ये *परिचया* नानाविधाः संबन्धाः तद्धेतुका ये *गुणाः* रागद्वेषमोहोत्पादिताः कर्मबन्धफलरूपा निबिडस्थूलदीर्घरज्जवस्तैः, *इह* स्तोककालस्थायिनि जन्मनि, *मुधा* स्वार्थसिद्धेरभावाद्व्यर्थमेव *बध्यसे* संयन्त्रितो भवसि । मा प्रतिबन्धबद्धो भव । रे *जन्ममरणादिभयभीत संसारमतिदारुणं कलय,* रे मूढजीव ! *जन्म* भवान्तरं, *मरणं* प्राणहानिः, *आदि*पदाज्जरा वार्द्धक्यं ग्राह्यं तेभ्यो *भयानि* भीतयस्तै-र्भीतस्त्रस्तस्तत्संबोधनं रे जन्ममरणादिभयभीत ! *संसारः* चतुर्गतिपरिभ्रमणात्मकं भवस्वरूपं सो*ऽतिदारुणो*ऽतिशयेन भयानको वर्ततेऽतस्तं, *कलय* ज्ञानदृष्ट्या विलोकय, विलोक्य तस्मान्निस्ताराय प्रयतो भव । यत *इह* भवे *मोहरिपुणा* मोहनीयज्ञानावरणोदयशत्रुणा, *सगलग्रहं* संसारिजीवानां गलहस्तिकाप्रदानसहितं, *प्रतिपदं* क्षणे क्षणे सर्वत्र *विपदं* विपत्तिं कष्टभरं *उपनीतं* त्वया सह प्रापितं । *प्रतिपदं* स्थाने स्थाने भवे भवे *नवनवै*रपूर्वैः *अनुभवैः* शुभाशुभकर्मफलभोगैः *परिभवैः परिभवा* महातिरस्कारपूर्विकाः कदर्थनास्तैर*सकृत्* पुनः पुनः *उपगूढ !* समालिङ्गित ! व्याप्तमिति यावदित्यर्थः ।।१-२।।

उच्यते च प्रथमगाथाविषये चन्दनबालाकथा यथोक्तं श्रीहेमचन्द्राचार्यकृतत्रिषष्टिशलाकापुरुषचरित्रे-
इतश्च पूर्वं नौसैन्यैः शतानीको निशैकया । गत्वाऽरुणत् पुरीं चम्पासमसमागमः ।।५१६ ।।
चम्पापतिः पलायिष्ट ततश्च दधिवाहनः । बलीयसाऽवरुद्धानां त्राणं नान्यत्पलायनात् ।।५१७।।
यद्ग्रहो घोषितस्तत्र शतानीकेन भूभुजा । तदनीकभटाश्चम्पां स्वेच्छया मुमुषुस्ततः ।।५१८।।
दधिवाहनराजस्य धारिणीं नामतः प्रियाम् । वसुमत्या समं पुत्र्या तत्र कोऽप्यौष्ट्रिकोऽग्रहीत् ।।५१९।।

कृतकृत्यः शतानीकोऽप्यनीकैः परिवारितः । समाजगाम कौशाम्बीं वैरिकैरवभास्करः ।।५२०।।
औष्ट्रिकः सोऽपि धारिण्या देव्या रूपेण मोहितः । व्रजञ्जगाद पुरतो जनानामिदमुच्चकैः ।।५२१।।
प्रौढा रूपवती चेयं मम भार्या भविष्यति । विक्रेष्ये कन्यकां त्वेतां नीत्वा पुर्याश्चतुष्पथे ।।५२२।।
तच्छ्रुत्वा धारिणी देवी मनस्येवमधारयत् । जाता महति वंशेऽहं शशाङ्कादपि निर्मले ।।५२३।।
महावंशप्रसूतस्य दधिवाहनभूपतेः । पत्नी चास्मि परिणतजैनधर्माऽऽदितोऽपि हि ।।५२४।।
श्रुत्वैतान्यप्यक्षराणि धिग्जीवाम्यघभाजनम् । स्वभावलोल रे जीव ! किमद्याप्यवतिष्ठसे ।।५२५।।
न चेत् स्वयं निःसरसि तथापि हि बलान्मया । निस्सार्यसे सद्य एव नीडादिव विहंगमः ।।५२६।।
इति तद्भर्त्सनोद्विग्ना इव प्राणाः क्षणादपि । तस्या मन्युप्रस्फुटितहृदयाया विनिर्ययुः ।।५२७।।
औष्ट्रिकस्तां मृतां प्रेक्ष्य दध्यावेतां सतीं प्रति । धिग्धिङ्मयैतदुदितं यन्मे पत्नी भविष्यति ।।५२८।।
अङ्गुलीदर्शनेनेव कूष्माण्डं दुर्गिरा मम । विपन्नेयं तथा तद्वत् कन्याप्येषा विपत्स्यते ।।५२९।।
एवं विमृश्य साम्ना तामालपन्ननयत् पुरि । कौशाम्ब्यां सोऽथ निदधे विक्रेतुं राजवर्त्मनि ।।५३०।।
दैवात्तत्रागतः श्रेष्ठी तामपश्यद्धनावहः । दध्यौ चेत्यनया मूर्त्या न हि सामान्यपुत्र्यसौ ।।५३१।।
भ्रष्टा पितृभ्यां प्राप्तेयं निर्घृणेनामुनाऽधुना । यूथच्युता कुरङ्गीव लुब्धकेन दुरात्मना ।।५३२।।
विक्रेतुं पलवच्चेह स्थापिताऽनेन मूल्यतः । हस्ते हीनस्य कस्यापि हा यास्यति वराक्यसौ ।।५३३।।
दत्त्वार्थं बहुमप्यस्य गृह्णाम्येतां कृपास्पदम् । पुत्रीमिव निजां हीमां न क्षमोऽहमुपेक्षितुम् ।५३४।।
विनाऽनर्थं मम गृहे तिष्ठन्त्याः क्रमयोगतः । अस्याः स्वजनवर्गेण भविता संगमोऽपि हि ।।५३५।।
धनावहो विमृश्यैवं दत्त्वा मूल्यं तदीप्सितम् । निन्ये वसुमतीं बालां सानुकम्पः स्ववेश्मनि ।।५३६।।
सोऽपृच्छत् स्वच्छधीस्तां च वत्से ! कस्यासि कन्यका । को वा स्वजनवर्गस्ते मा भैषीर्दुहिताऽसि मे ।।५३७।।
महत्त्वेन समाख्यातुं स्वकुलं सापि चाऽक्षमा । न किंचिदूचेऽस्थात्सायं नलिनीव त्वधोमुखी ।।५३८।।
मूलां च श्रेष्ठिनीमूचे प्रियेऽसौ दुहिताऽऽवयोः । पाल्या लाल्या च तदियमतियत्नेन पुष्पवत् ।।५३९।।
एवं श्रेष्ठिगिरा तत्र गेहेऽवात्सीत्स्वगेहवत् । बाला बालेन्दुलेखेव सा नेत्राऽऽनन्ददायिनी ।।५४०।।
तस्या विनयवाक्शीलै रञ्जितश्चन्दनोपमैः । चन्दनेत्यभिधां श्रेष्ठी ददौ परिजनैः सह ।।५४१।
ईषच्च यौवनारम्भं करभोरूरवाप सा । राकारात्रिरिवाम्भोधेः श्रेष्ठिनो ददती मुदम् ।।५४२।।
निसर्गतो रूपवतीं यौवनेन विशेषतः । निरीक्ष्य चन्दनां मूला दध्यावेवं समत्सरा ।।५४३।।
पुत्रीवत्प्रतिपद्याऽपि यद्येतां रूपमोहितः । श्रेष्ठी परिणयेत्तर्हि जीवन्त्यपि मृताऽस्मि हा ।।५४४।।
एवं स्त्रैणसुलभेन तुच्छत्वेन दिवाऽनिशम् । तदा प्रभृति ताम्यन्ती तस्थौ मूला दुराशया ।।५४५।।
ग्रीष्मोष्मार्तोऽन्यदा श्रेष्ठी वेश्मन्यागमदापणात् । तदांऽघ्रिक्षालको नासीत् कोऽपि दैवात् पुरःसरः ।।५४६।।
विनीता चन्दनोत्थाय श्रेष्ठिना वारिताऽपि हि । प्रावर्तत क्षालयितुं तत्पादौ पितृभक्तितः ।।५४७।।
केशपाशस्तदा तस्याः स्निग्धश्यामलकोमलः । निःसहांग्याः परिस्रस्तः क्ष्मातले जलपङ्किले ।।५४८।।
वत्सायाः केशपाशोऽयं मा भूपङ्कभागिति । लीलायष्ट्योद्दधे श्रेष्ठी तमबध्नाच्च सादरः ।।५४९।।
तच्च मूला गवाक्षस्था निरीक्ष्यैवमचिन्तयत् । वितर्कः संवदति स यः पूर्वं कल्पितो मया ।।५५०।।
अस्याः स्वयं केशबन्धः पत्नीत्वस्य निबन्धनम् । प्रथमं श्रेष्ठिनो नूनं नेदृशी हि पितुःक्रिया ।।५५१।।
उच्छेदनीया तदियं मूलाद्व्याधिरिवोत्थितः । इति निश्चित्य मूलाऽस्थाच्छाकिनीव दुराशया ।।५५२।।

क्षणं श्रेष्ठ्यपि विश्रम्य पुनरेव बहिर्ययौ । अमुण्डयच्चन्दनां च मूलाऽप्याहूय नापितम् ।।५५३।।
पादयोर्निगडान् क्षिप्त्वा चन्दनां बह्वताडयत् । मूला वल्लीमिववशा विवशा क्रोधरक्षसा ।।५५४।।
गृहैकदेशे दूरस्थे मूला न्यधिकचन्दनाम् । कपाटसंपुटं दत्त्वा परिवारमुवाच च ।।५५५।।
श्रेष्ठिनः पृच्छतोऽप्येतत् कथनीयं न केनचित् । कथयिष्यति यः कोऽपि मत्कोपाग्नेः स आहुतिः ।।५५६।।
एवं नियन्त्रणां कृत्वा मूला मूलगृहं ययौ । श्रेष्ठी च सायमायातोऽपृच्छत् क्व ननु चन्दना ? ।।५५७।।
मूलाभयान्न कोऽप्याख्यच्छ्रेष्ठी चैवमबुध्यत । वत्सा मे रमते क्वापि यद्वाऽस्त्युपरि वेश्मनः ।।५५८।।
एवं रात्रावप्यपृच्छन्न कोऽप्याख्यत्तथैव च । प्रसुप्ता चन्दनाऽस्तीति चाज्ञासीदृजुधीः स तु ।।५५९।।
द्वितीयेऽप्यह्नि नापश्यत्तृतीयेऽपि तथैव ताम् । शंकाकोपाकुलः श्रेष्ठी प्रोचे परिजनं ततः ।।५६०।।
रे रे कथयत क्वास्ति चन्दना मम नन्दना ? । नाऽऽख्यास्यथ विदन्तश्चेन्निग्रहीष्यामि वस्तदा ।।५६१।।
श्रुत्वेदं स्थविरा तत्र काचिच्चेटीत्यचिन्तयत् । जीविताऽहं चिरतरं प्रत्यासन्ना मृतिर्मम ।।५६२।।
कथिते चन्दनोदन्ते किं मूला मे करिष्यति ? । एवं विचिन्त्य तामाख्यमूलाचन्दनयोः कथाम् ।।५६३।।
श्रेष्ठिनोऽदर्शयद्गत्वा चन्दनोरोधवेश्म सा । द्वारं चोद्घाटयामास स्वयं श्रेष्ठी धनावहः ।।५६४।। युग्मम्
तत्र च क्षुत्पिपासार्त्तां दवस्पृष्टां लतामिव । निगडैर्यन्त्रितामंह्र्योर्नवात्तां करिणीमिव ।।५६५।।
परिमुण्डितमुण्डां च भिक्षुकीमिव चन्दनाम् । अश्रुपूरितनेत्राब्जामीक्षाञ्चक्रे धनावहः ।।५६६।।
विश्वस्ता भव वत्से ! त्वमिति जल्पन्नुदश्रुदृक् । तद्भोज्यार्थं रसवतीं ययौ श्रेष्ठी द्रुतद्रुतम् ।।५६७।।
विशिष्टं तत्र चाऽपश्यन् भोज्यं दैवाद्धनावहः । कुल्माषान् शूर्पकोणस्थांश्चन्दनायै समार्पयत् ।।५६८।।
भुञ्जीथास्तावदेतांस्त्वं यावत्त्वन्निगडच्छिदे । कर्मारमानयामीति जल्पित्वा श्रेष्ठ्यगाद्बहिः ।।५६९।।
चन्दनोर्ध्वस्थिता चैवमचिन्तयदहो क्व मे। तस्मिन् राजकुले जन्म क्व चावस्थेयमीदृशी ।।५७०।।
भवेऽस्मिन्नाटकप्राये क्षणाद्वस्त्वन्यथाभवेत् । स्वानुभूतमिदं मे हि किं संप्रति करोमि हा ।।५७१।।

उक्तं उपदेशप्रासादे अञ्जनासुन्दरीकथा द्वितीयागाथाविषये –

जम्बूद्वीपे प्रह्लादनपुरे प्रह्लादनो राजा प्रह्लादनवती राज्ञी ( च ) । तयोः पुत्रः पवनञ्जयकुमारः । तत्रैव वैताढ्येऽञ्जनकेत्वञ्जनवत्योः सुताऽञ्जनासुन्दरीनाम्नी । यौवने तत्पाणिग्रहणार्थं पित्राऽनेककुमाराणां पटचित्रितबिम्बान्यानाय्य तस्यै दर्शितानि । तस्याः किमपि कुमाररूपं न रतिं करोति । अथान्यदा भविष्यदत्तपवनञ्जयकुमारयो रूपं पटे लिखितं समानीतम् । द्वयोरपि कुलं शीलं बलं रूपं ( च ) सुन्दरं दृष्ट्वा स्वपार्श्वे स्थापिते । अथ राजा वरगुणान् विचारयति । तत्र भविष्यदत्ते भूयांसो गुणाः सन्ति, परं मन्त्रिणा विज्ञप्तम्–स्वामिन् ! भगवतोक्तमस्ति यद्भविष्यदत्तोऽष्टादशे वर्षे मोक्षं यास्यति, अतो नायं योग्यः, पवनञ्जय एवार्हः । ततस्तन्नाम्ना सुलग्नं निर्धारितम् । अथान्यदा ऋषभदत्तसुहृदा सह पवनञ्जयोऽञ्जनाया लावण्यस्नेहादि द्रष्टुमागतः । रात्रौ द्वावपि नीलवस्त्रपरिधानौ श्वशुरगृहे प्रच्छन्नमागतौ आलापं शृणुतः स्म । तदैका सख्यञ्जनां प्रति वक्ति हे स्वामिनि ! पूर्वं विलोकितो भविष्यदत्तवरो गुणैरधिको धर्मज्ञोऽभूत्, परमल्पायुरिति मत्वा मुक्तः । अधुना यो वरः स दीर्घायुरस्ति । ततोऽञ्जनसुन्दर्योक्तम्– अमृतच्छटा स्तोकापि मधुरा दुष्प्राप्या, किं भारसहस्रेण विषेण ? इति श्रुत्वा पवनञ्जयो विमनस्कः स्वखड्गं कर्षयित्वा मारयामीत्युद्यतो मित्रेण निवारितः–

एकं परगृहे रात्रौ चागमोऽन्यत्कनीवधः । अनूढा परकीयैवेत्यपि हन्तुं न चार्हसि ।।

ततो गतः स्वस्थाने । तदनु तदुपरि सोऽन्तःखेदमुद्दधद् अञ्जनायाः पाणीपीडनमनिच्छन् स्वजनकादिभिः

कथमपि परिणायितः । परं तु चतुरिकायां तस्या मुखमपि सरागं तेन न विलोकितम् । ततः परिणयनकालादपि दुःखिता तिष्ठति । बहूपायेनापि भर्तुः सुखं न प्राप्तम् । गता द्वादशवत्सरी । अत्रावसरे रावणः प्रतिवासुदेवो वरुणविद्याधरसाधनाय प्रस्थितः । तदैको दूतः प्रह्लादनाकारणाय गतः । पवनञ्जयो रावणसैन्ये गच्छन्तं पितरं निवार्य पितुराशिषं लात्वा दृक्पथस्थामप्यञ्जनामपश्यन्मानससरसि प्रथमप्रयाणे स्थितः । सर्वत्र विकसिताः काननश्रियः तदा रात्रौ चक्रवाकी एकाकिनी करुणस्वरं रटति श्लोकः–

आयाति याति पुनरेति पुनः प्रयाति, पद्माङ्कुराणि वितनोति धुनोति पक्षौ ।
उन्माद्यति भ्रमति कूजति मन्दमन्दं, कान्तावियोगविधुरा निशि चक्रवाकी ।।

तच्छ्रुत्वा ऋषभदत्तः पृष्टः । तेनोक्तम्–हे भ्रातर्देववशादेतयो रात्रौ वियोगो भवति । तत इयं मृतप्राया यदि स्थास्यति प्रभाते ( च ) यदा भर्त्ता मिलिष्यति तदा पुनर्नवदेहा भविष्यति । ततोऽञ्जनायाः कर्म क्षीणं जातं ( तदा पवनञ्जयेन चिन्तितम् ) हा ! मम पत्न्या मुक्ताया द्वादशवर्षाः कथं गता भविष्यन्ति ? अथावश्यमेकवारं यामि, इति विचिन्त्य रात्रौ प्रच्छन्नवृत्त्या गृहे समागत्याञ्जनाम् ऋतुस्नातां बुभुजे । ततः स्वनामाङ्कितमुद्रां दत्त्वा कटके समागतः ।

ततो वध्वा उदर–वृद्धौ कलङ्कवृद्धौ च भर्तृनामाङ्कितमुद्रादर्शनेऽपि अञ्जनासुन्दरी एकया दास्या सह बहिर्निष्कासिता । स्वपितृगृहे गतापि पित्रा निष्कासिता । वने पर्यटन्ती पुत्रं प्रासूत । मृगबालकमिव पालयति । दास्येकदा जलार्थं गता तत्र दृष्टो मुनिः । आगत्योक्तम् एकः समीचीनः साधुर्नमस्कर्त्तव्यः ( आगतः ) । सापि तत्र ( गत्वा ) नत्वोपविष्टा । ऋषिणापि कायोत्सर्गः पारितः, धर्मदेशना दत्ता । धर्मं श्रुत्वा स्वदुःखं पप्रच्छ । सोऽपि साधुरवधिज्ञानेन पूर्वभवं कथितवान् कुत्रापि ग्रामे व्यवहारिणस्त्वं पत्नी मिथ्यात्वमतिरासीः तस्यैवान्या स्त्री तव सपत्नी जैनधार्मिका श्राविका । सा प्रत्यहं जिनप्रतिमापूजापूर्वमश्नाति । त्वं तु तदुपरि दोषं वहन्ती अपवादान् दर्शयन्ती मर्माण्युद्घाटयन्ती एकदा तस्या जिनप्रतिमां कचवरे निक्षिप्तवती । सा जिनपूजां विना मुखे पानीयं न क्षिपतीत्याकुला जाता । तत इतस्ततः परिपृच्छति । तदैकयोक्तम् अत्र प्रतिमा दृश्यते । पुनस्त्वया तदुपरि धूली दत्ता । ततः करुणया द्वादशमुहूर्त्तेभ्यः परं त्वयैव दत्ता । तत्पातकवशात्तव द्वादशवार्षिको वियोगः। अथ कर्म क्षीणमस्ति । तव मातुलः स्वयमागत्य गृहीत्वा गृहे यास्यति । तत्रैव भर्त्तापि मेलिष्यति ।

❋ ❋ ❋

घटयसि क्वचन मदमुन्नतेः क्वचिदहो हीनतादीन रे ।
प्रतिभवं रूपमपरापरं, वहसि बत कर्मणा[मा]धीन रे, क० ।।३।। [४०]

**व्याख्या–** ***अहो*** **हे चेतन ! महदाश्चर्यं वर्तते, यत्त्वं कर्मवशगः** ***क्वचन*** **कस्मिंश्चिद्भवे काले क्षेत्रे वा,** ***मदसमुन्नतेः मदा*** **जातिकुलयौवनादिप्राप्तिवशात्समुत्पन्ना गर्वप्रकारास्तेभ्यः समुद्भूता या** ***समुन्नतिः*** **स्वप्रकर्षतावती बुद्धिस्तस्याः सकाशादुन्नतेस्तुल्यं** ***घटयसि*** **प्रवर्तयसि ।** ***क्वचिद्धीनतादीन रे । क्वचित्*** **कस्मिंश्चिज्जन्मनि** ***हीनतादीनो***ऽशुभकर्मोदयेन जातिकुलबलादिहीनताप्राप्तत्वेन दीनभावेन दुःखितत्वं भजसि । ***बत कष्टं,*** **त्वं संसारे** ***कर्मणाधीनः प्रतिभवमपरापरं रूपं वहसि ।*** **कर्माधीनो (न) ज्ञानावरणीयादिकर्मणायत्तीकृतः** ***प्रतिभवं*** **भवे भवे** ***अपरापरं*** **भिन्नं भिन्नं पूर्वपूर्वरूपादन्यदन्यदिति यावत् रूपं वर्णाकारस्वभावनटनं** ***वहसि*** **प्राप्नोषि लभसे । इत्युक्तप्रकारेण विडम्बनां लभसे तथापि भवान्नोद्विजसेऽतः किमधिककथनेनेत्यर्थः ।।३।।**

एतदुपरि महेश्वरदत्तकथा उच्यते यथोक्तं श्रीधर्मघोषसूरि रचितर्षिमण्डलप्रकरणुपरि श्रीपद्ममन्दीरगणीकृतटीकायाम्–

तथाहि तामलिप्त्यारव्यपुर्यां श्रेष्ठ्यभवत् पुरा । नाम्ना महेश्वरदत्तः, समुद्रबहुलाऽत्मजः ।।१ ।।
लोभाभिभूतस्तत्तातः, प्रभूताताऽऽरम्भसम्भवः । मृत्वा तत्रैव देशेऽभूत्, सैरिभो ही ! ( हा ! ) भवो ( वे ) द्भवः ।।२ ।।
तद ( दाऽऽ ) र्त्तिबहुला मृत्वा, बहुलाऽप्यभवच् शुनी । गाङ्गिलाऽऽख्या महेश्वरदत्तस्याऽऽस्ते प्रिया प्रिया ।।३ ।।
गृह ( रहः ) स्थैकाकिनी रेमे, समं जारेण सा ऽसती । स्त्रीणामेकाकिनीनां हि कामाग्निर्बा ( मोऽङ्गबा ) धतेऽधिकम् ।।४ ।।
रममाणां प्रियां भर्त्ता, जारेण सममन्यदा । अन्यद्द्वारागतोऽकस्माद् ददर्शाहो हि पच्यते ।।५ ।।
तौ स्रस्तकुन्तलौ त्रस्तनेत्रौ कम्प्रवपुर्लतौ । शोऽपश्यद् रतभीत्याऽऽत्रपरावर्त्तात्तरीयकौ ।।६ ।।
धृत्वा केशेषु जारं स सभल्लकं व्याधवत् क्रुधा । चपेटाभिरिवाविष्टं, मान्त्रिकस्तमकुट्टयत् ।।७ ।।
ममर्द निर्दयं पद्भ्यां, कुलाल इव मृत्तिकाम् । यष्टिभिः कुर्कुरमिव, सापराधमताडयत् ।।८ ।।
प्रणश्यार्द्धमृतो जारः, किञ्चिद् गत्वाऽपतद् भुवि । मूर्खोऽकार्ष मुमुर्षुःकिम् ?, कण्ठस्थासुरचिन्तयत् ।।९ ।।
मृत्वा स्वबीज एवासौ, पुत्रभूयमवाप्तवान् । कालेन गाङ्गिला सूनुं, सुषुवे सुखवेदनम् ।।१० ।।
तमात्मजातं मन्वानः, श्रेष्ठी कुण्डमलालयत् । वर्द्धमानः कूर्चकचाऽऽकर्षकार्हो बभूव सः ।।११ ।।
ततश्च पुंश्चलीदोषं, पुत्रप्रेम्णा महेश्वरः । गाङ्गिलाया विसस्मार, प्रायः स्त्रीष्वार्द्रहद् गृही ।।१२ ।।
अथाऽऽयाते पितुर्मृत्युवासरावसरोत्सवे । सोऽक्रीणात् पितृजीवं तं, महिषं मूर्खशेखरः ।।१३ ।।
तं हत्वा महिषं मासं, क्रोडस्थकुण्डसूनवे । ददानोऽश्नाति श्रेष्ठी स्म, धिगज्ञानं हि देहिनाम् ।।१४ ।।
कुर्कुरीबहुलाजीवा, समांसं पतिकीकसम् । कटकटिति कुर्वाणा, नृत्यत्पुच्छा चचर्व च ।।१५ ।।
इतश्च कश्चिदायातस्तद्गेहे मासपारणे । भिक्षार्थं भिक्षुरद्राक्षीद् ज्ञानेनैतद् विरूपकम् ।।१६ ।।
अनात्तभिक्षो व्यावृत्तो, धावित्वाऽऽहमहेश्वरः । हर्षुलोऽस्मि न चाभक्तो, भिक्षाऽऽत्ता किं न मद्गृहात् ।।१७ ।।
मुनिराहेदृशे गेहे, भिक्षाऽऽदानं न साम्प्रतम् । एकं हि मांसमशुचि, परं तदपि वप्तृजम् ।।१८ ।।
कथमेतदिति पृष्टे, श्रेष्ठिनाऽऽचष्ट साधुराट् । पुत्रः पित्रामिषैः शत्रुः, पोष्यते हा ! धिगज्ञताम् ।।१९ ।।
कः प्रत्यय ? इति पृष्टे, सार्थेसे ( शे ) न मुनिर्जगौ । शुनीं पृच्छ निखातं प्राग्, न्यस्तं सोऽपि तथाऽकरोत् ।।२० ।।
तत्राऽऽनीता शुनी जातिस्वभावाद् भुवमंह्रिभिः । सा चखान खनित्राभैः शिष्यार्थमिव तस्य तु ( नु ) ।।२१ ।।
जातप्रत्ययतस्तीव्र वैराग्यात् स महेश्वरः । उपादत्त मुदा दत्तपात्रवित्तो जिनव्रतम् ।।२२ ।।

❋ ❋ ❋

**जातु शैशवदशापरवशो जातु तारुण्यमदमत्त रे ।**
**जातु दुर्जयजराजर्जरो जातु पितृपतिकरायत्त रे, क० ।।४।। [४१]**

**व्याख्या–** हे आत्मन् ! त्वं भवे भवान्तरे यत्परावर्तनं लभसे तत्तु दूरे तिष्ठतु यत्त्वमेकस्मिन्नेव जन्मनि परावर्तनं कर्मवशो लभसे तत्तु चिन्तय । *जातु* कदाचित् ***शैशवदशापरवशः*** शिशुः स्तनपायी बालः तद्भावः कर्म वा ***शैशवं*** तस्य ***दशा*** तद्रूपा अवस्था तस्या ***परवशो*** वशोऽधीनः पुरीषमथनादिविडम्बनां यासि । *जातु* तत्रैव कदाचित् *तारुण्यमदमत्त रे,* ***तारुण्यं*** यौवनवयस उदयस्तेन हेतुना ***मदमत्तो*** बलरूपकामोदयादि*मदेन* गर्वेण *मत्तः* गर्वान्धो भवसि । *जातु* तत्रैव जन्मनि कदाचिद्वार्धक्ये *दुर्जयजराजर्जरः दुःखेन जेया* या *जरा* बलादिहानिस्तया *जर्जरः* सर्वाङ्गजीर्णत्वं गतः सन् पराभूयसे । *जातु* कदाचित्तत्रैव

[भवे] चरामावस्थायां *पितृपतिकरायत्त* रे अन्तकहस्ते प्राप्तः सन् सर्वं हित्वा भवान्तरं यासीति भवात् किं नोद्विजसे धिक् त्वामित्यर्थः ।।४।।

❋ ❋ ❋

पुनरपि भवेऽसमञ्जसं भवति तच्चिन्तयेत्याह–

व्रजति तनयोऽपि ननु जनकतां तनयतां व्रजति पुनरेष रे ।
भावयन्विकृतिमिति भवगते- स्त्यजतमां नृभवशुभशेष रे, क० ।।५।। [४२]

*व्याख्या- ननु तनयोऽपि जनकतां व्रजति । एष पुनस्तनयतां व्रजति । इति भवगते-विकृतिं भावयन् त्यजतमां नृभवशुभशेष रे ।* नन्विति कोमलामन्त्रणे हे मन्दमतिचेतन ! संसारे पूर्वं य इति शेषः, *तनयोऽपि* पुत्रोऽपि सन् स *जनकतां* पितृत्वं *व्रजति* गच्छति प्राप्नोतीति यावत् । तापसश्रेष्ठिराहुकपुत्रयोरिव । *एष पुनर्जनकस्तु तनयतां* पुत्रत्वं *व्रजति* लभते तयोरिव । इत्येवंरूपां *भवगतेः* संसारवर्तनायाः *विकृतिं* विपर्यासस्वभावं *भावयन्* हृदये विचारयन् *त्यजतमां* यथा पुनरत्रागमनं न स्यात्तथा प्रकर्षेण भवहेतून् परिहर । अद्यापि तव *नृभवशुभशेषः नृभवो* नरजन्म तस्य *शुभं* पुण्यकर्म तस्य *शेषः* कियानंशोऽस्तीत्यतः प्रयत्नं कुर्वित्यर्थः ।।५।।

उपदेशप्रासादे अर्हद्दत्तकथा तु उक्तं

कौशाम्ब्यां तापसाख्यश्रेष्ठी स्वगृहोत्करे शूकरो जज्ञे । स स्वसौधादिकं दृष्ट्वा जातिस्मृतिधरो –ऽजनि । अन्यदा तस्यैव श्राद्धदिने स तत्सुतैर्निजघ्ने, स्वगृह एव स सर्पोऽजनि, सुतैरेव गृहान्तर्भ्रमन् सोऽहिर्हतः स्वसूनोस्तनयोऽभवत्, प्रागवज्जातिस्मृतिं प्राप्तः स्नुषामम्बां सुतं च तातं कथं वच्मीति चिन्तयन्मूकत्वं स्वीचकार, तेनाशोकदत्तस्थाने मूक इति नाम सर्वत्र प्रसृतम् । अन्यदा चतुर्ज्ञानधाराः सूरयो मूकगृहे इमां गाथां शिक्षयित्वा उभौ श्रमणौ मुमुचुः–

तावस किमिणा मूअ–व्वएण पडिवज्ज जाणिओ धम्मं । मरिऊणं अरोरग, जाओ पुत्तस्स पुत्तोसि ।।

इमां गाथां श्रुत्वा मूको विस्मितस्तौ नत्वा पृष्टवान्–''एतद्युवां कथं वित्थः ?'' तावूचतुः– ''उद्यानस्थितास्मद्गुरुवाक्यतः'' । तदनु गुरुपार्श्वे देशनां श्रुत्वा त्यक्तमूकत्वः श्राद्धो जातः ।

❋ ❋ ❋

यत्र दुःखार्तिगददवलवैरनुदिनं दह्यसे जीव रे ।
हन्त तत्रैव रज्यसि चिरं मोहमदिरामदक्षीब रे, क० ।।६।। [४३]

*व्याख्या- रे जीव ! यत्र दुःखार्तिगददवलवैरनुदिनं दह्यसे हन्त रे मोहमदिरामदक्षीब तत्रैव चिरं रज्यसे । रे निर्विचार ! रे जीव ! किं न बुध्यसे यत्र संसारे विषयादिके च त्वं दुःखार्तिगददवलवैः दुःखानि दुर्गतिदुर्लभाजीविकारोगशोकप्रभवानि कष्टानि, अर्त्तयश्चिन्तासन्तापोद्भूता मनस उच्चाटविशेषाः, गदाः कुष्ठभगन्दर-सन्निपातादिमहरोगास्त एव त्राससन्तापकारित्वेन दवलवा दवाग्निस्फुलिङ्गास्तैः अनुदिनं प्रतिदिवसं संततं दह्यसे दग्धमनो-वाक्कायो भवसि । हन्तेति खेदे रे मोहमदिरामदक्षीब रे मोहमदिरामत्तनष्टबुद्धे ! तत्रैव प्रोक्तस्वरूपे भवे विषये च चिरं वर्षशतादिपर्यन्तं रज्यसे*

*रञ्जितसकलात्मप्रदेशैः प्रमुदितो भवसि, परन्तु स्वहिताय नोद्यच्छसीत्यर्थः।।६।।*

उच्यते आम्रफलासक्तनृपकथा–

क्वचित् पुरे कश्चिन्नृपः प्रजां पालयन् जलधिमेखलां पृथिवीं शास्ति स्म। तस्यान्यदा चूतफलास्वादातिरेकेण कश्चिन्महाव्याधिरून्मीलति स्म । वैद्यैः कथमपि चिकित्सितो । नीरूक् कृतः, परमाम्रफलनियमं ग्राहितो नृपः । उक्तश्च–यदा पुनराम्रफलं भोक्ष्यसे तदैव व्याधिः पुनरून्मीलिष्यति, असाध्यश्च भावीति। ततः सुबहुषु वर्षेष्वतिक्रान्तेषु स नृपोऽन्यदा ग्रीष्मे वनमालिकेन ढौकितानि सुपक्वानि घ्राणतर्पकपरिमलानि सुरूपाणि सहकारफलानि दृष्ट्वा तरलितरसज्ञस्तानि रसितुं मनोऽकार्षीत्। तज्ज्ञात्वा मन्त्रिणा बहुधा निषिद्धोऽपि स नृपतिः इयत्सु वर्षेषु न कदापि स्फुटीभूतः स व्याधिस्तन्नूनं क्षीणः, अपि च एकमाम्रफलं भक्षयामि एकेनानेन न कोऽप्यवगुणो भावीति वदन्नेकं सहकारफलमास्वादितवान्। ततः सद्यः समुन्मीलितपूर्वव्याधिना बहुप्रतीकारैरप्यसाध्यत्वं प्राप्तेन पीडितः प्राणान् राज्यं चाहारयदिति।

❋ ❋ ❋

दर्शयन् किमपि सुखवैभवं. संहरंस्तदथ सहसैव रे ।
विप्रलम्भयति शिशुमिव जनं, कालबटुकोऽयमत्रैव रे, क० ।।७।। [४४]

**व्याख्या- *अयं कालबटुको जनं किमपि सुखवैभवं दर्शयन् अथ सहसैव तत्संहरन् अत्रैव शिशुमिव विप्रलम्भयति, अयं* सर्वलोकप्रसिद्धः *कालो*ऽहोरात्रादिवर्तनारूपः स एव *बटुकः* मार्गघातिग्रन्थिच्छेदको वा तस्करो भिक्षुको वा *जनं* निर्विवेकिसुखाभिलाषिलोकं प्रति *किमपि* यत्किञ्चित्तुच्छरूपं *सुखवैभवं सुखं* संकल्पकल्पितस्त्रीपुत्रविषयधनादिप्रेम्णा सातादिबुद्धिः, *वैभवं* संपत्परिवारराज्यैश्वर्यादि तयोः समाहारद्वन्द्वे कृते, तद्दर्शयन् चर्मदृशा ग्राहयन्, *अथ* दर्शनादनन्तरं *सहसैव तत्संहरन् सहसा*ऽकस्मादेकहेलया *तत्*पूर्वदर्शितसुखवैभवं *संहरन्न*विद्यमानमदृश्यं कुर्वन्, *अत्रैव* विद्यमानजन्मन्येव तर्हि भवान्तरे तु किमुच्यतेऽतः *शिशुमिव* पांसुरमणरतिबालकवदविवेकिजनं *विप्रलम्भयति* सहजपरमसुखप्राप्तिविघातेन विप्रतारयति, अतो गुडपर्पटिकाखण्डलोभेन चिन्तामणिभिर्निष्पन्नां रत्नमालां मा जहाहीत्यर्थः ।।७।।**

उच्यते उत्तराध्ययनसूत्रान्तर्गतौरभ्रीयाध्ययनस्य उरभ्रदृष्टान्तः –

तथा हि नगरे क्वापि, गृहस्थः कोऽपि निष्क्रियः । उरभ्रबालकं कञ्चित्, पुपोषाऽतिथिहेतवे ।।१।।
मुग्धत्वमञ्जुलाकारं, कृतकर्णावचूलकम् ।स्नपिताङ्गं हरिद्रादि–रागालङ्कृतमूर्धनम् ।।२।।
तञ्चातिपीनवपुषं, गृहाधिपतिबालकाः । क्रीडाप्रकारैर्विविधैः, क्रीडयाञ्चक्रुरन्वहम् ।।३।। युग्मम्
तञ्च दृष्ट्वा लाल्यमानमुत्कोपः कोऽपि तर्णकः । विमुक्तं गोदुहा मात्रा, गोपितं न पपौ पयः ।।४।।
लिहती तं ततः स्नेहाद्धेनुः पप्रच्छ वत्सकम् । कुतो हेतोरिदं दुग्धं, न पिबस्यद्य नन्दन ! ।।५।।
सोऽवादीद्भोजनै रम्यैः, सर्वेऽस्मत्स्वामिनन्दनाः । उरभ्रं पोषयन्त्येनं लालयन्ति च पुत्रवत् ।।६।।
मन्दभाग्याय मह्यं तु, न काले पाययन्त्यपः । न च यच्छन्ति पूर्णानि, शुष्काण्यपि तृणान्यहो ! ।।७।।
पङ्क्तिभेदेन तन्मातर्मनो मे दूयते भृशम् ! । अत एव च न क्षीरमद्य सद्यः पिबाम्यहम् ।।८।।
तच्छ्रुत्वा गौर्जगौ वत्स ! किमत्रार्थे विषीदसि ? । उरभ्रपोषणं ह्येतदातुरार्पणसन्निभम् ।।९।।

रोगिणाऽभ्यर्थ्यमानं हि, निश्चितासन्नमृत्युना । यथा पथ्यमपथ्यं वा, सर्वं तस्मै प्रदीयते ।।१०।।
ज्ञेयं वत्स ! तथैवेदमुरभ्रस्यापि पोषणम् । लप्स्यते नियतं मृत्युमागतेऽऽभ्यागते ह्यसौ ।।११।।
शुष्कस्तोकतृणावाप्तिरप्यसौ शोभना ततः । उपद्रवविनिर्मुक्तैः, सुचिरं जीव्यते यया ।।१२।।
जनन्येत्युदितः प्रेम्णा, तर्णकः स्तन्यमापिबत् । प्राघुर्णकाः समाजग्मु–स्तत्स्वामिसदनेऽन्यदा ।।१३।।
तमुरभ्रं ततो हत्वा, गृहेशस्तानभोजयत् । निघ्नन्ति हि परान् स्वल्पायापि स्वार्थाय निर्दयाः ! ।।१४।।
तञ्च दृष्ट्वा हन्यमानममानं भीतमानसः । नापान्मातुः पयः सायमायातायाः स तर्णकः ।।१५।।
दुग्धापाननिदानं च, पृष्टो मात्राऽब्रवीदिति । मातरद्य कुतोप्यत्रा–ऽऽययुः प्राघूर्णका घनाः ।।१६।।
ततो व्यात्ताननः कृष्ट–जिह्वाग्राविह्वलेक्षणः । हतोऽस्मत्स्वामिना दीनः, स मेषो विस्वरं रसन् ।।१७।।
तां दशा तस्य दृष्ट्वाऽहं, न पयः पातुमत्सहे । भवन्ति मृदुचित्ता हि, परदुःखेन दुःखिता ।।१८।।
धेनुर्जगौ सुत ! तदैव मया तवोक्तमूर्णायुपोषणमिहातुरदानदेश्यम् ।
तत्तस्य दुःखमपहाय धृतिं विधाय, मां प्रश्रुतामनुगृहाण गृहाण दुग्धम् ।।१९।।

❋ ❋ ❋

**अथ संसारभावनामुपसंहरन्नुपदिशति–**

सकलसंसारभयभेदकं, जिनवचो मनसि निबधान रे ।
विनय परिणमय निःश्रेयसं, विहितशमरससुधापान रे, क० ।।८।। [४५]

**।। इति श्रीशान्तसुधारसगेयकाव्ये संसारभावनाविभावनो नाम तृतीयः प्रकाशः ।।**

**व्याख्या– *हे विनय ! सकलसंसारभयभेदकं जिनवचो मनसि निबधान रे, हे विनय !* हे निर्वृतिकामिन् ! *सकलभयभेदकं सकलानि* समग्राणि सप्तविधानि *भयानी*हलोकभीत्यादीनि तानि भेदयति विनाशयति यत्तत्तथाविधं *जिनवचः* रागद्वेषमोहजेतारो *जिनास्*तेषां *वच* उपदेशस्तत्, *मनसि* हृदये *निबधान* सम्यग्विचारतया धारय । तथा *विहितशमरससुधापान निःश्रेयसं परिणमय, विहितं* कृतं *शमरसो* वैराग्यादिमयरतिभावः स एवाजरामरकारी *सुधा*मृतं तस्याः *पानं* येन स तत्संबुद्धौ रे *विहितशमरससुधापान*! एवंभूतः सन् *निःश्रेयसं* मोक्षं कल्याणं *परिणमय* तन्मयो भवेत्यर्थः।।८।।**

उपदेशप्रासादे तु एतदुपरि उदायननृपकथा उक्ता, तच्चेदम् –

सिन्धुसौवीरदेशे वीतभयादित्रिषष्ट्याधिकत्रिशती ३६३ नगराधीश उदायिनृपः । तस्य अभीचिनामा पुत्रः केशीति च नाम्ना भागिनेयो ऽप्यस्ति । अन्यदा स्वपौषधगारे पौषधं जग्राह, मध्यरात्रौ शुभध्यानस्थितस्येदृगध्यवसायोऽभूते नृपादयो धन्या वन्द्या ये श्रीवीरजिनान्तिके दीक्षादिकं प्रपेदिरे । यदि स्वामी मां पुनाति, तर्हि तत्पादमूले प्रव्रज्यामादाय कृती स्याम् । भगवांस्तन्मनोगतं विज्ञाय तत्रागात् ।

नृपः कौणिकवद् वन्दनाय निर्गतः, विधिना स्वामिदेशनां श्रुत्वा गृहे गतः सन्मतिरेवं दध्यौ अहोऽहं नरकान्तं राज्यमभीचये सूनवे न ददामि इति मत्वा केशिभागिनेये राज्यश्रियं चक्रे असन्तुष्टाभीचिः तद्राज्यं त्यक्त्वा कोणिकनृप सेवां चकार । ततः केशिकृतमहामहो नृपः प्रव्रज्यामुपात्तवान् । व्रतवासरात्तीव्रतपोभिः स्वात्मानमशोषयत् । एकदा नीरसाहारैर्मुनेर्व्याधिरुत्पन्नः, स मुनिः वैद्येन दृष्टः कथितश्च त्वं देहं दधिभक्षणेन

रक्ष । गतस्पृहोऽपि स मुनिर्दध्यर्थं गोष्ठे विचरति । भुवि विहरन्मुनिर्वीतभये गतः, तदा ऽमात्यः केशिनृपं जगौ–एष तव मातुलस्तपसा निर्विण्णस्तव राज्यं ग्रहीष्यति, त्वमस्य विश्वासं मा कार्षीः । केशिनोक्तम्–अस्यैवास्ति राज्यं सुखेन गृह्णातु । मन्त्री प्राह–राज्यं पुण्यैर्लभ्यते, तल्लब्धं कथं दीयते ? अतो राजन्नस्य मुनेर्विषं देयम् । मन्त्रिणा प्रेरितः केशी मातुलायैकया पशुपालिकया सविषं दधि दापयामास । तद्विषं देवेन संहृत्योक्तम्–सविषं दधि मा भुङ्क्ष्व, दधिस्पृहां मा कृथाः । तेन भक्षणं परिहृतं, रोगो वर्धितः, रोगनिवारणाय पुनर्दधि जग्राह, सा देवता त्रीन् वारान् विषं जहार । एकदा देवप्रमादेन राजर्षिमुनिं सविषं दध्यभोजयत् । विषवीचिभिरात्मनः शरीरं व्याप्तं ज्ञात्वाऽनशनं प्रपेदे, त्रिंशद्दिनान्यनशनं पालयित्वोत्पन्नकेवलज्ञानो विपद्य शिवं गतः । क्रुद्धदेवेन नगरं धूलवृष्ट्या नाशितं ।

**।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धि-विजयमुख्यशिष्यश्रीमुक्तिविजयगणि-सतीर्थ्यतिलक मुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां श्रीशान्तसुधारसटीकायां भवभावनाविभावनो नाम तृतीयः प्रकाशः समजनि ।।**

❀ ❀ ❀

# ॥ चतुर्थः प्रकाशः ॥

अनन्तरभवभावना प्रोक्ता । भवे तु जीव एकाक्येव भ्रमतीत्यनेन संबन्धेनायातामेकत्वभावनां विभावयन्नाह । तत्रायं प्रथमः श्लोकः–

( स्वागतावृत्तम् )

एक एव भगवानयमात्मा, ज्ञानदर्शनतरङ्गसरङ्गः ।
सर्वमन्यदुपकल्पितमेतद्, व्याकुलीकरणमेव ममत्वम् ॥१॥ [४६]

व्याख्या– *अयं ज्ञानदर्शनतरङ्गसरङ्ग आत्मा भगवानेक एव । अयं* यो ज्ञानादिस्वगुणैः सर्वस्यापि स्वानुभवप्रत्यक्षोऽस्ति, *ज्ञानं* विशेषग्राही बोधः, *दर्शनं* सामान्यग्राही बोधः, तयोस्तरङ्गास्तिर्यगूर्ध्वाधोदिग्गतज्ञेयभासकल्लोलास्तैः *सरङ्गः* सदा विलासी सदा ज्ञानदर्शनविलासवानिति यावत् । *आत्मा* जीवो, *भगवान्* स्वकीयस्य सुखदुःखबन्धमोक्षादेः कर्तृभोक्तृनिष्ठापनादिसर्वशक्तिमत्त्वेन प्रभुः, *एक एव* एकाक्येव जन्मादिप्रापणे सुखादिभोगेऽसहाय एवानादितो वर्तते । *अन्यदात्म*व्यतिरिक्तं *सर्वं* सचेतनाचेतनं समग्रं *एतन्ममत्वं एतत्*सर्वजनदृश्यमानं *यन्ममत्वं* मदीयत्वं वर्तते, तत्सर्वं चेतनस्य *उपकल्पितं* स्वकृतकर्मसंबन्धेन कृतं न परमार्थेन स्वकीयं, *व्याकुलीकरणमेव* स्वात्मभिन्नेषु मदीयत्वधीरात्मनो रागादिसंपादनेन व्याकुलीकरणं, न व्याकुला अव्याकुलाः स्वभावस्वस्था अव्याकुला व्याकुला यथा कृता भवन्तीति व्याकुलीकरणमेवैकं जानीहीत्यर्थः॥१॥

उक्तं एतद् विषये नन्दमणिकारकथा उपदेशप्रासादे–

पुरा राजगृहपत्तने श्रेणिकराजकाले धनधान्यकनकरजतद्विपदचतुष्पदादिसम्पदुपेतो नन्दमणिकारो गृहपतिरासीत्, तत्र च तदा श्रीमन्महावीरस्वामी समवसृतः, कौतुकादिना च नन्दमणिकारस्तत्समीपं गतः, भगवता च प्रारब्धा धर्मदेशना, प्ररूपितो नारकतिर्यङ्नरामरभवेषु दुःखगहनः संसारः, व्याख्याता निःशरणता प्राणिगणस्य, दर्शितः साधुश्रावकभेदेन द्विविधः संसारसागरोत्तरणहेतुर्धर्मः, तं च समाकर्ण्य प्रतिबुद्धा अनेके प्राणिनः, सोऽपि नन्दोऽत्रान्तरेऽभ्युत्थाय भगवन्तमभिवन्द्य च श्रावकत्वं प्रपेदे । अन्यदा च त्रैलोक्यबान्धवे भगवति सिन्धुविषयमुदायनराजश्रावकस्य प्रव्राजनार्थं गतवति नन्दमणिकारश्रावको ग्रीष्मचतुर्दश्यां पौषधिको बभूव, अस्तंगते रवौ विहितः सायंतनावश्यकविधिः, धर्मध्यानरतस्य चास्य कस्याञ्चिद्वेलायां पिपासावेदना प्रादुरभूत्, ततस्तया बाध्यमानश्चिन्तयामास–न किञ्चिदुदकं विना जन्तूनां, यतो जलमन्तरेण गाढतृड्वेदनादोदूयमानमानसा म्रियन्त एव प्राणिनः, अत एव लोका वापीकूपतडागादीन् जलाशयान् कारयन्ति, अतोऽहमपि यदि रजन्यां प्राणत्यागं न करिष्ये तदा कमपि जलाशयं कारयिष्ये ।एवं च मिथ्यात्वोदयप्रतिपतितसम्यक्त्वरत्नस्यानुचिन्तयतः कथमपि विभाता रात्रिः, प्रभातसमये च तथैव प्रतिपतितभावस्तथाविधविशिष्टप्राभृतकहस्तो गतो राजकुलं, दृष्टो राजा, ढौकनीयार्पणपूर्वकं च याचितो जलाशयनिमित्तं भूमीखण्डं, दत्तं राज्ञा, कारयितुमारब्धस्तत्र वापी, कालेन निष्पन्ना सा, तस्याः कारितानि चत्वारि द्वाराणि,

चतुर्ष्वपि द्वारेषु कारिताः सहकाराद्यारामाः, तदासन्न एव विधापितो वैदेशिकयोग्यः प्रतिश्रयः, प्रवर्त्तिता दानशाला ।

एवं च प्रभूतद्रविणजातं व्ययित्वा तत्रैवातिमूर्च्छितः कदाचिदनुपक्रमणीयव्याधिविद्धवपुरार्त्तध्यानोपगतो मृत्वा तस्यामेव वाप्यां गर्भजशालूरत्वेनोदपादि, लोकाश्च तत्र विश्रामादिनिमित्तमायाताः प्रतिपादयन्ति यथा धन्यः स नन्दमणिकारो येनेयमेवंविधारण्यभूमिरिव विविधकमलोपशोभिता सीतेव सन्निहितसदारामा नवयौवनसुभगाङ्गनेव विशिष्टनरानन्ददायिनी वापी समुत्पादिता, इत्यादि श्लाघादिकं च लोकैर्विधीयमानमाकर्ण्य तस्यान्यदा क्वचिदेवंविधं श्रुतपूर्वं वचनमितीहापोहादि कुर्वतो जातिस्मरणमभूत्, ज्ञातवांश्च पूर्वभवप्रतिपन्नदेशविरतिभङ्गवृत्तान्तं, तत्कृतं च कुयोनिपातं, गतो विषादं, ततश्च सैव देशविरतिः स्वीकृता, इतश्च प्रभृति प्रासुकजलं मे पानं शुष्कशेवालादिराहारः, एव प्रतिपन्नव्रतस्यास्य व्यतिक्रान्तः कियानपि कालः, अन्यदा तत्रैव ग्रामनगरादिषु विहरन् पुनः समवसृतस्तत्र वर्द्धमानस्वामी, जातो लोकप्रसादः, जलाद्यानयनायातश्राविकासंलापश्रवणतस्तयापि शालूरस्य जाता भगवद्दर्शनवन्दनादीच्छा, निर्गतस्ततः, शुभाध्यवसायो गन्तुमारब्धः, अन्तराले च तुरङ्गखरखुरचूर्णितदेहो व्रताद्युच्चारयित्वा स्वयमेव परिहृत्याष्टादश पापस्थानानि मृतो देवलोकमुत्पन्नम् ।

❋ ❋ ❋

**उक्तार्थमेव विशदयन्नाह–**

( प्रबोधतावृत्तत्रयम् )

अबुधैः परभावलालसा–लसदज्ञानदशावशात्मभिः।
परवस्तुषु हा स्वकीयता, विषयावेशवशाद्धि कल्प्यते ।।२।। [४७]

**व्याख्या– *हा* महदुःखमेतद्विलोक्यतां *परभावलालसालसदज्ञानदशावशात्मभिर्हि अबुधैः परवस्तुषु विषयावेशवशात् स्वकीयता कल्प्यते । परभावलालसा* परेऽस्वात्मभूता भिन्ना इति यावत् ये *भावा* जीवाजीवरूपपदार्थास्तेषु या *लालसा*ऽतिशायिनी स्पृहा तयाऽऽ*लसन्ती* समन्ताद्दीप्ता या*ऽज्ञानदशा* निर्विचाराऽबोधपरिणतिस्तस्या *वश* आयत्तीभूत *आत्मा* जीवो येषां तैः, *हि* निश्चयेन *अबुधै*रज्ञातात्मस्वरूपैरेव *परवस्तुषु* स्वात्मभिन्नपदार्थेषु अपि *विषयावेशात्* पञ्चविषयप्रेमाभिसङ्क्रमात्, *स्वकीयता* अस्मदीया एवैते धनसदनस्त्रीपुत्रादय इत्येवं *कल्प्यते* स्वहृदये मन्यते, न तु स्वस्यैकत्वं *कलयतीत्यर्थः* ।।२।।**

उक्तं च ऋषिमण्डल प्रकरणे जिनपालजिनरक्षितवृत्तं –

चम्पायां पुरि माकन्द्यभिधानः सार्थपोऽभवत् । तस्याभूतां सुतौ ख्यातौ, जिनात् पालितरक्षितौ ।।१।।
वारानेकादशाम्भोधौ, वाहनानि प्रपूर्य तौ । तारुण्येऽर्जयतो भूरिव्यवसायवशाद् धनम् ।।२।।
तौ द्वादशमवेलायां, पितृभ्यां वारितावपि । प्रपूर्य यानपात्राणि, चेलतुर्वार्द्धिवर्त्मनि ।।३।।
भग्नः(भिन्नः) पोतो महोत्पातैः, फलकं प्राप्य तावुभौ । रत्नद्वीपं गतौ यत् स्युरुपायाः प्रबलायुषि ।।४।।
रत्नद्वीपनिवासिन्या, देव्या नीतौ स्ववेश्मनि । तयाऽनुभवतः साकं भोगान् सार्थपतेः सुतौ ।।५।।
सुरेन्द्रादेशतोऽन्येद्युः, सुस्थितो लवणाधिपः । शुद्ध्यर्थं लवणाम्भोधेः, सङ्करस्याऽऽह किङ्करान् ।।६।।
मिलन्तीषु व्यन्तरीषु, रत्नद्वीपाधिपा सुरी । सार्थेशाऽऽत्मजयोस्तत्र, यान्ती शिक्षामियं(मां) ददौ ।।७।।

भद्रौ ! भवद्भ्यां मद्‌गृहे, क्रीडा कार्या यथासुखम् । प्राक्–प्रतीच्युत्तराशास्थवनखण्डेषु चान्वहम् ॥८॥
दक्षिणाशावने नैव, गन्तव्यं कर्हिचित् पुनः । यतो दृष्टिविषस्तत्र, दन्दशूकोऽस्ति दारुणः ॥९॥
इत्युक्त्वा सा ययौ वार्द्धिशुद्ध्यर्थं तावुभावपि । क्रीडतो भवने देव्यास्तथा त्रिषु वनेष्वपि ॥१०॥
दक्षिणाशावनेऽन्येद्युर्दुर्गन्धमुपलभ्य तौ । विस्मितौ पुरतो गन्तुं, प्रवृत्तौ पश्यतः शबान् ॥११॥
शूलारूढं नरं तत्रैकं क्रन्दन्तमपश्यताम् । पप्रच्छतुश्च तं कस्त्वम् ?, केनेत्थं वा कदर्थितः ? ॥१२॥
सोऽप्याचख्यावहं भद्रौ !, सांयात्रिकवणिक्सुतः । भग्नपोतोऽनया देव्याऽत्रानीतो नीतिबाह्यया ॥१३॥
मया सममयौ भोगान्, भुक्तवत्येकदा पुनः । कस्मिंश्चिदपराधेऽल्पे, शूलायां मामदात् क्रुधा ॥१४॥
एवं व्यापादिता देव्याऽनया हि शतशो नराः । तत् श्रुत्वा तौ भयभ्रान्तचेतस्काविदमूचतुः ॥१५॥
भो भद्र ! कोऽप्युपायोऽस्ति ?, येनास्मात् सङ्कटाद् वयम् । छुटामः स पुमानाख्यदत्राऽऽस्ते पूर्वदिग्वने
प्रासादे सेलकाभिख्यो, यक्षोऽसौ वाजिरूपभृत् । चतुर्दश्यष्टमीराकाऽमावास्यासु भ्रमन् वने ॥१७॥
कं तारयामि ? कं पालयामीत्युच्चैर्वदेद् यदा । तदा भवद्भ्यां तत्पूजा, कर्त्तव्याऽऽर्त्तिविनाशिनी ॥१८॥
वाच्यं च पुरतस्तस्य, नाथ ! नौ तारयेति सः । तारयिष्यति तच् श्रुत्वा, गतौ तौ निजवेश्मनि ॥१९॥
श्रुत्वा यक्षवचोऽन्येद्युः, पर्वाहे तौ तदन्तिकम् । गत्वोचिवांसौ भो ! आवां, नाथ ! तारय पालय ॥२०॥
यक्षोऽवादीदहो ! भद्रावारोप्य पृष्ठमात्मनः । युवां नेष्यामि चम्पायां, कार्यमेतद् वचः परम् ॥२१॥
हावभावैर्यदि क्षोभं, यास्यथो देवताकृतैः । तदा वां पातयिष्यामि, वार्द्धौ सा वां हनिष्यति ॥२२॥
इत्युक्त्वाऽऽरोप्य पृष्ठं, प्रतिचम्पं चचाल सः । इतश्च शोधयित्वाऽब्धिं, सा देवी गृहमागमत्(ता) ॥२३।
तत्राथ तावपश्यन्ती, विज्ञायावधिना द्रुतम् । क्षोभयामास तौ हावभावैस्तत्पृष्ठमेत्य सा ॥२४॥
परं न क्षुभ्यतस्तौ तु, ततोऽसौ जिनरक्षितम् । क्षोभयामास यक्षोऽब्धो, चिक्षेपैषाऽवधीच्च तम् ॥२५॥
हावभावैर्घनैर्देव्या, न क्षुब्धो जिनपालितः । नीतः क्षेमेण यक्षेण, चम्पायां मिलितः पितुः ॥२६॥
सुखी जातः क्रमाद् वीरोपान्ते प्रव्रज्य शुद्धधीः । आद्ये कल्पे समुत्पेदे विदेहे शिवमाप्स्यति ॥२७॥

❋ ❋ ❋

**विपक्षेण बोधयति–**

## कृतिनां दयितेति चिन्तनं, परदारेषु यथा विपत्तये ।
## विविधार्तिभयावहं तथा, परभावेषु ममत्वभावनम् ॥३॥ [४८]

व्याख्या– *कृतिनां कृतिनः* पण्डिता यथार्थवस्तुतत्त्वज्ञातारः पुरुषा इति यावत् तेषां तु, *यथा* येन प्रकारेण सर्वलोकानां *परदारेषु दयितेति चिन्तनं विपत्तये, परेषां* स्वव्यतिरिक्तनराणां *दाराः* प्रमदाः परदारास्तासु *दयिता* इयं मम वल्लभाऽस्ति *इत्येवं*प्रकारेण ममत्व*चिन्तनं* हृदयेनापि व्यासक्तिधारणं, दूरेऽस्तु वचसा कायेन चासक्तिः, तदपि तेषां *विपत्तये* हस्तपादकर्णनासिकादिच्छेदराजदण्डधनापहार–प्राणघाताद्यापत्त्यै जायते । *तथा* तेनैव प्रकारेण विदुषा *परभावेषु* स्वात्मभिन्नेषु सचेतनाचेतनपदार्थेषु *ममत्वभावनं* मदीयत्वबुद्ध्यवधारणं *विविधार्तिवहं विविधा* अनेकप्रकारा *अर्तयो* यातनाः कदर्थना इति यावत्, तासां *वहं* प्रापकं जन्मजरामरणदुर्गतिपातादिवृद्धये दृश्यतेऽतः परेषु ममत्वं निवार्यमेवेत्यर्थः॥३॥

उक्ता हि कथारत्नाकरे शीलवतीकथा –

श्रीनिवासे पुरे पृथिवीराजे राज्ञि राज्यं कुर्वति तन्निवासी समुद्रदत्तश्रेष्ठी शीलवतीं स्वप्रियां गृहे विमुच्य सोमभूतिना विप्रेण सुहृदा परदेशमगात् । ततः स्वपुरोत्सुकस्य द्विजस्य हस्ते श्रेष्ठी सालङ्कारं लेखं पत्न्यै प्राहिणोत् । अथ स्वपतिमित्रं सोमभूतिमागतमाकर्ण्य शीलवत्यपि प्रियोदन्तं प्रष्टुं तद्गृहं गता । सोऽपि रहसि समागतां तां विलोक्य स्मरातुरस्तत्पतिक्षेमप्रवृत्तिमभिधायेत्यभणत्, 'हे कृशोदरि सुन्दरि ! अधुना तावन्मया ( सह ) रमस्व पश्चात्त्वत्पतिलेखाद्यमर्पयामी' तीरिता सा स्वशीलं रक्षितुं सञ्जातबुद्धिर्विभावर्यांप्रथमे यामे मदौकसि समागच्छेरिति तमुदीर्य सेनाधिपतिमगात् । हे देव ! मत्पतिदत्तलेखादिकमसौ विप्रो नार्पयतीत्युक्तः सोऽपि तदवलोकनात्स्मरवांस्तामवादीत्, 'हे सुभ्रु ! तावन्मदुक्तं कुरु, पश्चात्तद्दापयिष्यामी' त्युक्त्वा सा तस्मै द्वितीयं यामं प्रोच्य मन्त्रिणमगात् ।

तथैवोक्तवते तस्मै अपि तृतीयप्रहरमभिधाय वासभवने स्थिताय भूपाय सा विप्रादीनां चेष्टितं गत्वाभाषिष्ट । तथैव प्रार्थयते भूपाय तुर्यं यामं निवेद्य 'तुर्यं यामेऽहमाकारणीया' इति पतिमात्रा सङ्केतं विधाय रिक्ते स्वावासे सायं सा तस्थौ। तदैव प्रथमप्रहरे समायान्तं विप्रं स्नानादिनोपचरन्त्यां तस्यां सेनापतिराययौ । आगते चास्मिंश्चकितं विप्रं सा मञ्जूषावक्षारके चिक्षेप, सेनापतिमन्त्रिणावपि चैवम् । तथेव पतिमात्राहूता सा भूपं तत्र निक्षिप्य प्रभाते रुदन्ती कुटुम्बेनेत्यवादि, किं रोदिसि ? साप्याह कल्ये मद्भर्तुरक्षेमवार्त्तागता, इति श्रुत्वा तत्स्वजनै राजामात्यसेनापतीन् स्वस्वगेहेष्वलभमानैर्विज्ञप्तो राजपुत्रः, देव ! समुद्रदत्तश्रेष्ठी अपुत्रः परदेशे मृतस्तेन तद्विभवो गृह्यताम् !' सोऽपि तत्र गतोऽन्यत्किमप्यपश्यन् दृढदत्ततालाकां तां मञ्जूषामादाय सौधान्तस्तस्यामुद्घाटितायां राजादयश्चत्वारोऽपि निर्ययुः । ततोऽनर्थमूलं तं विप्रं शीलवतीगिरा जीवन्तं देशान्निष्कास्य काश्यपीपतिः शीलवतीशिरोरत्नं तां शीलवतीं स्वसारमिवाभरणादिभिः सत्कृत्य सुबहुमानास्पदं कृतवान् ।।

❋ ❋ ❋

**प्रोक्तप्रकारेण ममत्वविपाकं प्रदर्श्य हितप्रवृत्तिं शिक्षयति–**

अधुना परभावसंवृतिं हर चेतः परितोऽवगुण्ठित[ता]म् ।
क्षणमात्मविचारचन्दनद्रुमवातोर्मिरसाः स्पृशन्तु माम् ।।४।। [४९]

व्याख्या– *हे चेतः* प्राणिन् ! हे मानस ! वेति । *अधुना* संप्रति कर्मनृपप्रदत्तावकाशे नरभवार्यक्षेत्रोत्तमजातिकुलादिप्राप्तिरूपे *परितोऽवगुण्ठितं* परि सर्वतो दिग्विदिग्भ्योऽ*वगुण्ठितं* कर्मपुद्गल-रागादिपरिणामैराच्छादितं *परभावसंवृतिमु*क्तरूपां परभावकृतां परिवेष्टनवरण्डिकां *हर* दूरं परिहर । एक एवस्मीति लक्ष्ये कुरु । येन *आत्मविचारचन्दनद्रुमवातोर्मिरसाः क्षणं मां स्पृशन्तु । आत्मनो* जीवस्वरूपस्य ये *विचाराः* सर्वथाऽसङ्गित्वज्ञानदर्शनमयत्वैकत्वाविनाशित्वादिविमर्शाः त एव *चन्दनद्रुमाः* श्रीखण्डवृक्षास्तेभ्यः समुत्पन्ना ये *वातोर्मयः* सरससुगन्धशीतस्पर्शा वायुकल्लोलास्तज्जन्या ये *रसा* आत्मस्वरूपविषया रत्यास्वादरूपज्ञानतरङ्गाः *क्षणं* तद्रूपोत्सव आह्लादः स्वल्पकालो वा *मामा*त्मरूपं *स्पृशन्तु* प्राप्ता भवन्त्वित्यर्थः।।४।।

उक्तं हि श्रीशुभशीलगणीकृतभरतेश्वरबाहुबलीवृत्तौ चिलातिपुत्रकथानकं –

राजगृहपुरे धनसार्थवाहस्य चिलात्या दास्याः क्रमात् पुत्रो जातः, तस्याभिधानं चिलातीपुत्र इति मातुर्नामानुसारेणाभूत् । धनपत्यां भद्राह्वाया पुत्री सुंसुमाऽभूत् । पञ्च पुत्राश्च पूर्वं सन्ति । तस्याः धनेन सुंसुमाख्याया दुहितू रक्षार्थं चिलातीपुत्रो मुक्तः । यदा तदा सुंसुमा रोदिति तदा तदा तस्या योनौ अङ्गुलीक्षेपं करोति । ततः सा न रोदिति, अतीव सुखं मन्यते । तं चिलातीपुत्रं तथा कुर्वाणं ज्ञात्वा राजदण्डभीत्या तं स्वगेहान्निष्काशयत् ।

चिलातीपुत्रः सिंहगुहाभिधां भिल्लपल्लीं ययौ मल्लीमालामिव मधुव्रतः । मृते चौरपतौ चिलातीपुत्रः स्वस्वामी चौरैः कृतः ।

विषमास्त्रपीडितश्चिलातीपुत्रः सुंसुमां स्मरति । सुंसुमा च तम् । एकदा चिलातीसुनुराह–भो चौरा गम्यते राजगृहे पुरे, तत्र धनश्रेष्ठिगृहे बह्वी श्रीरस्ति एका सुंसुमाह्वा सुता समस्ति च । यद्धनं चटति तद्भवतां, सुंसुमां मम भवतु इति व्यवस्थया ते चौरा रात्रौ तत्र जग्मुः । चौरेषु गृहमध्ये प्रविष्टेषु श्रेष्ठी व्याकुलः पञ्चपुत्रयुक् क्वचिन्नीलीय रहसि स्थितो भीतः ।

इतस्ते चौरा वित्तमादाय चिलातीपुत्रश्च सुंसुमां लात्वा चेलुः । ततः कलकलं कृत्वा पुरारक्षितः श्रेष्ठी पञ्चपुत्रयुक् चौरपृष्ठौ चचाल । ततस्ते चौराः पृष्ठौ पुरारक्षान्निष्काशितासीनायातान् वीक्ष्य भयविह्वला बभूवुः । ते सर्वे चौरास्त्यक्तलोप्त्रा दिशो दिशं नेशुः । पुरारक्षा आत्तवित्ताः पश्चाच्चेलुः । ततश्चिलातीपुत्रः स्कन्धे तां कन्यां वहमानस्त्वरितं चचाल । पञ्चपुत्रयुतं श्रेष्ठिनं धनं निष्काशितासिमागच्छन्तं वीक्ष्य कन्याशिरः छित्त्वा कबन्धं तत्रैव मुक्त्वा करात्तत्कन्यामस्तकं गृहीत्वाऽग्रतश्चिलातीपुत्रश्चचाल । धनश्रेष्ठी स्वपुत्रीकबन्धं वीक्ष्य बहुविलाप्य पश्चाद् वलित्वा स्वपुरमाजगाम । इतो धनश्रेष्ठी श्रीवीरपार्श्वे धर्मं श्रोतुं गतः पुत्रयुतः । श्रीवीरेणेति धर्मोपदेशो ददे ।

न श्रीर्मे विपुलाऽजनि न च मया जाता न वा सूनवो ।
जातं वा न गुणास्पदं न च मुदं धत्ते कुटुम्बं मम ।।
द्विष्टो भूमिपतिं खलाश्च कुदृशो देहं रुगार्तं सुतो, बाह्यो भूरि ऋणं गृणन्ति गृहिणां चित्ते हि चिन्ता इमाः ।।
इह संसारपाथोधौ, मानुष्यं प्राप्य दुर्लभम् । आत्महितं हि कर्तव्यं सर्वारम्भेण धीमता ।।
प्राग्जन्मजाते सुकृते सति प्रभौ, विवेकिभिस्तत्पुनरर्ज्यते नवम् ।
नीवीधनादस्य पुनः कुतोऽर्जनं, वाप क्व वा प्रौतणबीजभोजिनः ।।
इहलोइयंमि कज्जे, सव्वारंभेण जह जणो ततइ ।
ता जइ लक्खंसेणवि, परलोए ता सुही होइ ।।
''प्रबुध्यस्व प्रबुध्यस्व, द्विधा सपदि मानव ! । गृहे ज्वलति चौरा हि, सर्वस्वं लुण्ठत्यन्त्यमी ।।
जरा जाव न पीडेइ, वाही जाव न वड्ढइ । जाविंदिया न हायंति, ताव धम्मं समायरे ।।
इत्यादिश्रीजिनस्यास्यादाकर्ण्य धर्मदेशनाम् । पञ्चभिः श्रेष्ठितनयैः, श्राद्धधर्मः समाश्रितः ।।
धनः संप्राप्तवैराग्यः, श्रीवीरजिनसंनिधौ । जग्राह संयमं स्वर्गापवर्गखदायकम् ।।

तीव्रं तपस्तप्त्वा चिरं धनः श्रेष्ठी स्वर्गमगात् । ऽइतश्चिलातीपुत्रस्तु करात्तस्त्रीमस्तको रुधिरक्लिन्नशरीरोऽग्रतो वर्त्मनि त्वरितं व्रजन् मुनिमेकं शान्तं कायोत्सर्गस्थं ददर्श । चौरोऽवग्–भो

मुनिपुङ्गव ! त्वरितं धर्म कथय, नो चेदनेनासिना स्त्रीमस्तकवद्भवच्छिरः छेत्स्यामि । ततस्तं योग्यं सत्पात्रं चौरं मत्वा मुनिरुपशम–विवेक–संवरेति पदत्रयमुच्चरन् व्योममार्गे उत्पपात । स चौरश्चिलातीपुत्रो दध्यौ–अनेनाकाशगामिनी विद्या किं प्रोक्ता ? अथवा मन्त्राक्षराण्युक्तानि, अथवा धर्माक्षराणि, इति ध्यायन् मुनिपदस्थाने उवसमविवेकसंवरेति ध्यायंस्तस्थौ उपशमशब्दस्य कोऽर्थ इति ध्यायन् पुनर्जज्ञौ, उपशमः क्रोधाद्युपशान्तिः, एवं ध्यात्वोपशम आश्रितस्तेन चौरेण (मस्तकं त्यक्तं) । विवेकस्य कोऽर्थः ? इति ध्यायता विवेकार्थस्तेन ज्ञात इति कृत्याकृत्योर्विवेकः कियते । ततः कृत्यस्याङ्गीकारोऽकृत्यस्य त्याग इति विवेकः । ततो विवेक आश्रितस्तेन (असि दूरे क्षिप्तं) । संवरः पञ्चेन्द्रियाणां कियते, पञ्चेद्रियाणां प्रसरस्य निरोधः, संवरस्तेनाश्रितः । इति त्रिपदीं ध्यायन् सार्द्धदिनद्वयं कायोत्सर्गे चौरः स्थितः, रूधिरगन्धेन समागताभिः सूचिमुखीभिः कीटिकाभिः सर्वं शरीरं तस्य चालनीवत् कृतम् । तेन तथा कीटिकाविहितवेदना–ऽधिसोढा, सार्द्धदिनद्वयान्ते चिलातीपुत्रेण स्वर्गपदवी प्राप्ता ।

❋ ❋ ❋

## ( अनुष्टुब्-वृत्तम् )

**एकतां समतोपेतामेनामात्मन् विभावय ।**
**लभस्व परमानन्द-संपदं नमिराजवत् ॥५॥[५०]**

**व्याख्या- *हे आत्मन् !* हे प्राणिन् ! *एनाम*नन्तरोक्तस्वरूपां *समतोपेतां* समता सर्वेषु न्यूनाधिकगुणेषु मुक्तामुक्तेष्वात्मस्वरूपेणैकरूपपूर्णतुल्यता *तयोपेता* सहिता तां, एवंविधा*मेकतां* आत्माऽनादित एक एव न केनापि भार्यापुत्रादिभिः संयुक्तोऽस्तीत्येवं स्वस्यैकत्वं *विभावय* चेतसा निर्धारय । तथानिर्धारणात् *नमिराजवत् परमानन्दसंपदं लभस्व । नमिराजा* मिथिलाधिप उत्तराध्ययनसूत्रप्रसिद्धः । स यथैकत्वभावनया सिद्धस्तद्वत्त्वमपि *परमानन्द-संपदं* सर्वप्रकर्षां सहजसुखपूर्णां मोक्षलक्ष्मीं *लभस्व* प्राप्तो भवेत्यर्थः॥५॥**

उच्यते उपदेशप्रासादे प्रत्येकबुद्धनमिराजर्षिकथा–

अखण्डं राज्यद्वयं पालयतो नमेर्देहे षाण्मासिको महादाहज्वरोऽभूत् । अनेकायुर्वेदिभिश्चिकित्सितोऽपि तस्य दाहः शान्तिं न प्राप । अन्येद्युर्वैद्यनिर्देशतः सर्वा राज्ञ्यश्चन्दनं घर्षयन्ति । तासां वलयरवो मिथः सङ्घर्षजो जज्ञे । ततस्तं श्रोतुमक्षमस्य पत्युरादेशात् स्त्रिय एकैकं वलयं धारयामासुः । तदा नृपः प्राह–अधुना कङ्कणक्वाणः कथं न श्रूयते ? ताभिरेकैकं दर्शितम् । इतश्च तस्य चारित्रावारके कर्मबन्धने त्रुटितेऽयमध्यवसाय उदियाय–

वलयावलिदृष्टान्ताज्जीवो बहुपरिग्रही, दुःखं वेदयते नूनं वरमेकाकिता ततः ।
इत्येकाकिविहारं स ध्यायन् दाहोपशान्तये, स्वप्ने मेरूपरि श्वेतगजारूढं स्वमीक्षते ॥
ईदृग्गिरिः पुराप्यैक्षि क्वापि हेममयो मया, ऊहापोहवशात्तस्य जातिस्मृतिरजायत ।
स्वर्णशैलस्तदानेन दृष्टोऽभूज्जिनजन्मसु, अथायं देवतादत्तलिङ्गः प्रव्रज्य निर्ययौ ॥

अथ तस्मिन् समये अद्भूतप्रतिबोधेन रञ्जितः शक्रोऽवधिना विज्ञाय विप्ररूपमाधाय तमेत्येत्यवदत्–भो मुने ! त्वदीयनगरे

बहुजनानामाक्रन्दः शोकशब्दश्च जायते, तव पुरं च दह्यते । प्रव्रज्या तु दयामूला कीर्त्यते । अतः पूर्वापरविरुद्धं तव व्रतित्वं नार्हम् । तस्मात्सर्वं ससौख्यं कृत्वा व्रतं चरितुमर्हसि'' पुनः प्राह–

''एष वह्निश्च वातश्च तवैव तहति गृहम् (दहत्येवालयं तव) अन्तःपुरं च तन्नाथ त्वं किमेत-दुपेक्षसे ।।१।।''

इति शक्रेण चोदितः प्रत्येकबुद्धः प्राह-

'सुखं वसामि जीवामि येन मे नास्ति किञ्चन ।
मिथिलानगरीदाहे न मे दहति किञ्चन ।।१।।

स्वार्थाय यतते सर्वस्तम् विना दुःखमश्नुते ।
मयापि साध्यते स्वार्थस्तस्मान्निर्ममचेतसा ।।२।।

पुनः शुक्रः प्राह-'हिरण्यहाटकमण्यादिकेन कोशं वृद्धिं नीत्वा ततो व्रतचरणं युक्तम्' । श्रुत्वेति नमिराह-

''सुवण्णरूप्पस्स उ पव्वया भवे, सया हु कैलाससमा असंखया ।
नरस्स लुद्धस्स न तेहि किंचि, इच्छा हु आगाससमा अणंतिआ ।।१।।''

इत्याद्युत्तराध्ययनोक्तयुक्तिभिर्मुनिर्विप्रं निरुत्तरीचक्रे-

इत्येवाक्षोभ्यचित्तं तं मत्वा सत्त्वाश्रयो हरिः ।
द्विजरूपं परित्यज्य प्रणम्येति स्तुतिं व्यधात् ।।१।।

''अहो ते निज्जिओ कोहो अहो माणो पराजिओ ।
अहो ते तिख्खिया माया अहो ते लोहो वसीकओ ।।१।।''

बहुधेति स्तुत्वा नाकेशो नाकं गतवान् । अथ मुनिः क्रमेण केवलज्ञानमवाप्य मोक्षमसाधयदिति ।

❋ ❋ ❋

**अथ गेयपद्याष्टकेनैकतां भावयन्नाह -**

विनय चिन्तय वस्तुतत्त्वं, जगति निजमिह कस्य किम् ।
भवति मतिरिति यस्य हृदये, दुरितमुदयति तस्य किम्, वि० ।।१।। [५१]

**व्याख्या- हे *विनय* ! हे निर्द्वन्द्व ! *वस्तुतत्त्वं चिन्तय, वस्त्व*त्रैक आत्मैवास्ति तस्य *तत्त्वं* पारमार्थिकस्वरूपं नैरञ्जनसत्तां तच्चिन्त*य* निश्चलैकाग्रमनसा ध्याय । *इह जगति कस्य किं निजं भवति* । तथेह त्रिभुवनेऽनन्तसंख्येये जीवगणे *जगति* विश्वमध्ये *कस्य* किंनाम कस्य देवदत्तादेरेकस्यापि *किम*पि केनाभिधानेनोल्लापनीयं वस्तु *निजं* स्वकीयं *भवति* विद्यते ? न कस्यापि किमपि निजमस्ति । *यस्य हृदये* मनसि *इति* प्रोक्तप्रकारविचारवती *मति*र्बुद्धिर्वर्तते *तस्य* तथाविज्ञानवतः *किमि*ति प्रश्नार्थे भो भव्य ! ब्रूहि तस्य *दुरितं* दौर्भाग्योपद्रवदुर्गतिदुःखादिकम् *उदयति* प्रकटं भवति ? न दुरितोदयसंभवोऽस्तीत्यर्थः ।।१।।**

❋ ❋ ❋

एक उत्पद्यते तनुमा-नेक एव विपद्यते ।
एक एव हि कर्म चिनुते, सैककः फलमश्नुते, वि० ।।२।। [५२]

व्याख्या– हे आत्मन् ! त्वमनेकसंबन्धान् व्यर्थमेव कल्पयसि ते च वियदरविन्दवत्त्वयि न सन्ति । कुत एतज्ज्ञायते ? *हि यतस्तनुमान्* कार्मणापेक्षया सदैव सशरीरोऽपि संसारी जीवो भवान्तरादागत्य *एक उत्पद्यते,* एकः पुत्रादिसहचारिविरहितोऽद्वितीय एव *उत्पद्यते* जननीकुक्षाववतरणजन्मप्रापको दृश्यतेऽत *एक एवा*द्वितीय एव *विपद्यते* प्राप्तजन्मतो विनश्यन् दृश्यते, न कोऽपि सहानुगच्छन् विलोक्यतेऽतोऽपि, तथा *एक एव कर्म चिनुते*, *एको*ऽद्वितीय एव *कर्माणि* शुभाशुभानि ज्ञानावरणीयादीनि *चिनुते* बध्नाति न तु त्वत्कृतैस्तैरन्यः कश्चिदतोऽपि, तथा स कर्मणां कर्ता तनुमान् *फलं* कर्मविपाकोद्भूत-सुखदुःखरूपम् *एकक* एक एव कर्तैव *अश्नोति* प्राप्नोतीत्यत एक एवेति ज्ञेयमित्यर्थः।।२।।

उच्यते माधवगोपालकथा यथा उपदेशतरङ्गिण्यां –

नागपुरे माधवगोपाल एकदा गोचारणार्थं गतो महाटव्यां तापार्तो बब्बूलतरुतले निषण्णः । मस्तकाद् यूका उत्सङ्गे पतिता दृष्टा । बब्बूलतीक्ष्णशूल्यां निर्दयत्वेन प्रोता, एव मद्देहसारचौरिणीति विचिन्त्य तत्पातकोदयात् तस्मिन्नेव भवे शूलाप्रोतो मृतः । एवं सप्तोत्तरशतसारं पृथग् भवेषु चौर्यादिदोषमासाद्य तथैव शूलादिविडम्बनया मृतः। अष्टोत्तरशततमे भवे स्तोकतत्कर्मोदयात्तापसी दीक्षा प्राप्ता । सर्वदा वनवासी शुष्कपत्रफलभोजी निस्सङ्गज्ञानवान्। तस्मिन्नवसरे तत्रासन्नचम्पानगरीनरेश्वरनरसिंहपट्टराज्ञीरत्नादेवी रत्नाभरणपेटी चौरेण गृहीता । यामिकाः पदपङ्क्त्यनुसारेण तत्पृष्ठे लग्नाः । चौरो नंष्ट्वा तद्वने तापससमीपे तां मुक्त्वा वटे चटित्वा स्थितः । प्राहरिकास्तत्रागताः । सुप्तस्तापसः सरत्नपेटीको धृत्वा भूपतेः पुरो मुक्तः । विभङ्गज्ञानी स्वकृतकर्म गर्हन् मौनी दुष्टनृपेण शूलिकामारोपितः । तत्कर्मक्षयं कृत्वा सुरो जातः ।

❋ ❋ ❋

**अथ ममत्वदोषेणैव जीवस्याधोगतिर्गुणहानिश्च भवतीत्याह–**

यस्य यावान् परपरिग्रहो विविधममतावीवधः ।
जलधिविनिहितपोतयुक्त्या, पतति तावदसावधः, वि० ।।३।। [५३]

व्याख्या– *यस्य* सर्वोऽप्यात्मा सर्वत्रैक एवास्तीति भावाज्ञस्य यावान् *विविधममतापरिग्रहः, यावान्* यत्परिमाणः शतसहस्रादिसंख्यारूप इत्यर्थः, *विविधममता विभिन्ना विधाः प्रकारा* यस्याः सा तथारूपा *ममता* मातृपितृभार्यापुत्रधनसदनादिषु मदीयत्वबुद्धिरूपममत्वभावः (पर)परिग्रहः(परकीयाना)-स्वीकारस्तद्रूपो *वीवधः* कष्टपापकर्मारम्भभारवान् असौ *जलधिविनिहितपोतयुक्त्या तावदधः पतति । असौ* प्रोक्तलक्षण आत्मैकत्वाज्ञममत्ववान्, *जलधिः* समुद्रस्तस्मिन् *विनिहित*स्तण्डुलादिभारभृत्संस्थापितः *पोतः* प्रवहणं तस्य या *युक्ति*र्जलनिमग्नभवने घटना तया, *तावत्त*त्परिमाणरूपेण अधो गुणराशिशिखरात् दुर्गतिगर्ते *पतति* निमग्नो भवति । अस्यायं भावार्थः– यस्मिन् पोते दशकुम्भोन्मितभारः समारोपितो भवति तदा पोत एकहस्तजले निमग्नो भवति, यस्मिंस्तु शतकुम्भोन्मितः स द्विहस्तादिः, यस्मिंस्त्रिशत-कुम्भभारः स त्रिहस्तमितो निमज्जति, तथैव यो यावान्ममताप्रकारस्वीकारवान् स तत्परिमाणोन्नत-गुणराशिशिखरात् दुर्गतिगर्ते च तावदधः पततीत्यर्थः।।३।।

एतदुपरि मम्मणश्रेष्ठिकथानकं यथोक्तं उपदेशप्रासादे–

राजगृहे श्रेणिको राजा । तस्य पत्नी चिल्लणा । अन्यदा गवाक्षस्था निशीथे नदीपूरागतकाष्ठानि बहिः कुर्वन्तं कमपि नरं विद्युदुद्योतेन ददर्श, ततः सा श्रेणिकं प्रत्यूचे–स्वामिंस्त्वमपि मेघवद्भृतमेव भरसि, एवंविधो दुःस्थस्त्वन्नगरेऽस्ति, तच्चिन्ता न क्रियते, महत्तव चातुर्यम्, ततः श्रेणिकेनाकार्य स पृष्टः–कस्त्वम् ? किमेवं काष्ठानि कर्षसि ? तेनोक्तम्–मम्मणनामा वणिगहम् । द्वितीयवृषभस्य शृङ्गमेकं विलोक्यते, तदर्थमयमायासः, ततः सकौतुको देव्या सह नृपस्तद्गृहे गतः, तृतीयभूमौ सुवर्णमयं वृषभद्वयं प्रौढं दर्शितम्, शृङ्गाणि रत्नमयानि, तद्वीक्ष्य विस्मितो नृपो देवीं प्राह–मद्गृहे एकमपि रत्नमीदृग् नास्ति–किमस्य दीयते ? सोऽभ्यधात्–एतदर्थं मत्पुत्रैः पोतवाणिज्यं क्रियते, मद्गेहे न केनापि चणकतैलं विना भुज्यते, अन्यव्यापारे आपणादिषु द्रव्यव्ययः स्यादतः पयोदसमये रात्रौ काष्ठान्याकृष्य विक्रीय द्रव्यमर्जयामि, तत्कार्पण्यं श्रुत्वा राजा शिरो धुन्वन् गृहम् आययौ, मम्मणोऽपूर्णमनोरथो मृत्वा सप्तमनरकं प्राप ।

❋ ❋ ❋

**स्वस्वभावं मद्यमुदितो भुवि विलुप्य विचेष्टते ।**
**दृश्यतां परभावविघटनात्, पतति विलुठति जृम्भते, वि० ॥४॥ [५४]**

**व्याख्या– यथेत्यध्याहार्यं । यथा *मद्यमुदितः स्वस्वभावं विलुप्य भुवि विचेष्टते ।* यथा येन प्रकारेण *मद्यमुदितो* माद्यत्युन्मत्तो भवत्यनेनेति *मद्यं* मदिरा तेन *मुदित* उन्मादेनैव हर्षितो यः स *भुवि* मनुष्यलोके स्वभावं मदावेशाभाववान्(वन्तं) सहजव्यवहारं *विलुप्य* मदावेशाद्विस्मार्य विनाश्येतियावत् *विचेष्टते विरूपां विपर्यस्तां* वा *चेष्टां* गानहसननर्तनगालिप्रदानादिक्रियां कुरुते । सा चेष्टा *दृश्यतां* नेत्रयुगलमुद्घाट्य विलोक्यताम् । मद्यपी *परभावविघटनात् परभावः* स्वभावादन्यो मदभावस्तस्य यत् *विविधं घटनम*नुचितकर्तव्यरचनं तस्मात्*पतति* रथ्यादिमार्गेष्वसावधानः *विलुठति* मद्यजन्यहृदयदाह–वशान्मत्स्यवदितस्तत उद्वर्तनं करोति । *विजृम्भते* विक्षिप्तहस्तपादो मुखविवरं विकाश्य शून्यचित्तो भवति । तथैव विविधममतास्वीकारवान् स्वभावपरिणतिं विलुप्य दुर्गन्धलालादिभृतभार्यापुत्रवदनचुम्बनादिकं विचेष्टते । इह परलोके च नानाकष्टसागरे *पतति* । दुर्गतिदुःखपीडितो भवाद्भवे उद्वर्तनं लभते । नष्टविवेकत्वेन धनपुत्रादिनिमित्तमार्तः शून्यो भवतीत्यर्थः ॥४॥**

वर्णितं हि कृष्णवासुदेवमृत्युप्रसङ्गे बलदेवचेष्टा श्रीरामविजयगणीकृतोपदेशमालाटीकायाम्–

यदा कृतद्वारिकादाहनिदानेन द्वैपायनेनाऽग्निकुमारेण भूत्वा द्वारिकादाहः कृतस्तदा नगराद् द्वावेव कृष्णबलभद्रौ निर्गतौ, अन्ये सर्वेऽपि ज्वलिताः, द्वौ बान्धवौ वनान्तरर्गतौ कृष्णस्य पिपासा लग्ना, बलभद्रो जलानयनार्थं गतः, तत्र वैरिभिः सार्द्धं युद्धे क्रियमाणे रात्रिः पतिता, श्रीकृष्णो वृक्षाधश्चरणोपरि चरणं स्थापयित्वा यत्र सुप्तोऽस्ति, तदवसरे तत्र श्रीनेमिमुखविज्ञातस्वहस्तकृष्णमरणहेतुकगृहीतवनवासो जराराज्ञीतनुजो जराकुमारस्तत्रागतः, तेन भ्रमता रात्रौ श्रीकृष्णचरणपद्मं दृष्टं, ज्ञातं ज्वलदिदं मृगचक्षुर्विलोक्यते, कर्णान्तं यावदाकृष्टेन बाणेन चरणो विद्धः, पार्श्वं समागत्य निजबान्धवं ज्ञात्वा पश्चात्तापं कुर्वन् जराकुमारो विलपति स्म, कृष्णेनोक्तं भोः पापिन् ! पापिन् इतः शीघ्रतरं गच्छ ? अधुना बलभद्रः समागमिष्यति, त्वां च मारयिष्यति, एवमुक्ते गतो जराकुमारः, पश्चादायुः प्रान्ते कृष्णस्य क्रोधः समुत्पन्नः, मनसि च चिन्तितवान्,

अहो ! विलोकयत ? अहं षष्ट्यधिकशतत्रयसंग्रामकारको महाबलवानेतादृशमपि मां जरासूनुर्बाणेन हत्वा कुशलेन गतः, एवं दुर्ध्यानवशतो मृत्वा स तृतीयं नरकं गतः, तदसवरे जलं गृहीत्वा रामोऽपि तत्रागतः, पीताम्बरं प्राह भो बन्धो मया त्वदर्थं शीतलं जलमानीतम्, उत्थाय तज्जलं पिबेत्युक्तोऽपि स न जल्पति, रामेण चिन्तितं जलानयनार्थ गतस्य मे बहुवेला लग्ना, अतोऽयं मम बान्धवः क्रुद्धो विलोक्यते, अतः सम्यगेनं क्षामयामीति संचिन्त्य स तच्चरणयोर्निपत्य विज्ञपयति स्म, भो बन्धो कोऽयं क्रोधावसरः ? अस्यां महाटव्यामावामेकाकिनौ तिष्ठावः, त्वं समुत्तिष्ठेति पुनः पुनरुक्तेऽपि यदा स न जल्पति, तदा मोहवशतो मृतमप्यमृतं तं ज्ञात्वा स्वस्कन्धे समारोप्य चलितः, यतः संसारे वस्तुत्रयमधिकं वर्त्तते. यदुक्तं-तीर्थकराणां शाम्यत्वं सपत्नीवैरमेव च ।वसुदेवबलस्नेहः सर्वेभ्योऽप्यधिकं मतं ।।१ ।। एवं मृतं स्वबान्धवं स्कन्धे धारयन् तत्सेवां कुर्वन्नेकदा सिद्धार्थनाम्ना देवेनागत्य यन्त्रमध्ये वालुकापीडननिदर्शनेन बोधितोऽपि स न बुद्धः, प्रत्युत खड्गमुत्पाट्य मदीयं बान्धवं कथं मृतं कथयसीति तं मारणार्थं धावितः, देवोऽदृश्यीभूतः, पुनरपि द्वितीयवारं पर्वतशीलायां कमलं वपन्तं तं दृष्ट्वा रामेणोक्तं, भो मूर्ख ! कथं शीलायां कमलोद्गमः संभवति ? देवेनोक्तं यदि त्वदीयो मृतबन्धुरुच्छाय त्वां भ्रातरिति कथयति, तदाऽत्रापि कमलोद्‌गमो भविष्यति. इत्थमुक्तेऽपि मोहवशतो भ्रातरं मृतं न जानाति, एवं षण्मासान् यावद्भ्रातः, पश्चाच्छरीरं विनष्टं ज्ञात्वा मुक्तं, सिद्धार्थदेवेन तच्छरीरं समुद्रे क्षिप्तम् । पश्चाद्‌बहुविलपन् बलदेवः श्रीनेमिनाथप्रेषितचारणर्षीश्वरेणागत्य बोधितः, वैराग्यपरायणेन तेन चारणमुनिसमीपे चारित्रं गृहीत ।

❋ ❋ ❋

**परभावं गतो विरूप एव भवतीति दर्शयन्नाह-**

पश्य काञ्चनमितरपुद्गलमिलितमञ्चति कां दशाम्।
केवलस्य तु तस्य रूपं, विदितमेव भवादृशाम्, वि० ।।५।। [५५]

**व्याख्या- *इतरपुद्गलमिलितं काञ्चनं कां दशाम् अञ्चति पश्य, इतरे* काञ्चनभिन्नताम्रादिरूपाः *पुद्गला* अनन्ताणुकमयद्रव्यादेशास्ते *मिलिता* मिश्रीभूता यस्मिन् तदितरपुद्गलमिलितं *काञ्चनं* स्वर्णं *काम*वचनीयां *दशां* हीनस्वरूपावस्थाम् *अञ्चति* प्राप्नोतीति *पश्य* विलोकय। तथैव सहजानन्दज्ञानस्वरूपमयं चिद्रूपं काञ्चनं(यदा) एकत्वज्ञानविरहितं ममतादिपरभावमिलितं दुर्गत्यादिहीनतां प्राप्नोति, नान्यथा । *केवलस्य तस्य रूपं तु भवादृशां विदितमेव । केवलस्य* परसंयोगवर्जितस्य *तस्य रूपं* काञ्चनस्य रूपं तु पुन*स्तस्य* सर्वसंयोगविमुक्तस्यात्मनः *स्वरूपं भवादृशां* भवत्तुल्यप्राज्ञानां *विदितमेव* सप्रकाशमार्दवगुरु-स्निग्धमङ्गलादिमयं ज्ञातमेव वर्ततेऽतो नोच्यत इत्यर्थः ।।५।।**

उपदेशप्रासादे सुबुद्धिमन्त्रीकथा तु उक्ता-

चम्पायां जितशत्रुर्नृपः । तस्य सुबुद्धिर्मन्त्री सम्यग्जिनमतज्ञः । एकदा नृपो दिव्यरसवतीं सरसां कारयित्वा बहुसामन्तयुतो भुक्त्वा रसगृध्नुः अहो रसः ! अहो गन्धः इत्यादिवाक्यैः श्लाघां चकार । सुबुद्धिं विनाऽन्येऽपि सर्वे तथैव श्लाघां चक्रुः । ततो राज्ञा मन्त्री पृष्टः-त्वं किं न प्रशंससि ? । सोऽवक् राजन् ! शुभाशुभवस्तुषु मम विस्मयो न ।यतः पुद्‌गलाः सुगन्धा अपि दुर्गन्धाः सुरसा अपि विरसा भवन्ति वैपरीत्येन

वा । ततो निन्दा प्रशंसे न युक्ते । राजा तन्न श्रद्धत्ते । अन्यदा राजा राजपाटिकायां गच्छन् मार्गे परिखोदकं बहुजीवाकुलं दुर्गन्धं सूर्यातपक्वथितं दृष्ट्वा नासिकां वस्त्रेण पिधाय अहो दुर्गन्धनिन्द्यं जलम् इत्यवादीत् । मन्त्री प्राह–राजन् ! मा जलं निन्द, कालप्रयोगेणाभव्यमपि भव्यतया परिणमति । राज्ञा नाङ्गीकृतम् । ततो मन्त्रिणा रहः परिखोदकं वस्त्रगलितं स्वाप्तनरैः कोरकघटे क्षेपितं कतकचूर्णादिना च निर्मलीकृतम् । नव्यघटेषु क्षिप्तम् । एवमेकविंशत्या दिनैस्तन्नीरं स्वच्छसुस्वादुशीतलं लोकोत्तरप्रायमजायत । ततः सुरभिवास्यं कृत्वा नृपजलरक्षकेभ्यो दत्तं समये राज्ञः समीपे तैरुपनीतम् ।

नृपस्तस्य जलस्य लोकोत्तरगुणानुपलभ्य तान् पप्रच्छ–क्वेदं प्राप्तम् ? । ते प्रोचुः–मन्त्रिणाऽर्पितम् । राज्ञा मन्त्री पृष्टः प्राह–राजन् ! यद्यभयं ददासि तदा जलोत्पतिं वदामि । राज्ञाऽभये दत्ते मन्त्री यथावृत्तं प्रोवाच । नृपो न श्रद्धत्ते । ततो मन्त्रिणा तदध्यक्षं पूर्वोक्तविधिना कृतम् । राजा वीक्ष्य विस्मितःप्राह–कथं त्वयैतज्ज्ञातम् ? । सोऽवदत्–राजन् ! जिनागमश्रुतादिश्रद्धया च पुद्गलपरिणामोऽयमेवेति । हे नृप ! पुद्गलानामचिन्तनीया शक्तिः अनेकधा परिणमनस्वभावस्तिरोभावत्वेन वर्तते । स ज्ञानिनां ज्ञान आविर्भवति । परन्तु च्छद्मस्थानां ज्ञानावरणादिकर्मावृतानां सम्यगुपलब्धिर्न जायते । तथापि श्रुतवचोभिरवश्यं श्रद्धेयैव । इत्यादिसिद्धान्तवाक्ययुक्त्या सुबुद्धिप्रधानोक्त्या नृपः प्रतिबुद्धो देशविरतित्वं जग्राह । क्रमेण द्वावपि प्राप्तप्रव्रज्यौ मुक्तिं प्रापतुः ।

❋ ❋ ❋

**अथ ग्रन्थकार उपनयरूपेण स्पष्टयन्नाह–**

एवमात्मनि कर्मवशतो, भवति रूपमनेकधा ।
कर्ममलरहिते तु भगवति,भासते काञ्चनविधा, वि० ॥६॥ [५६]

**व्याख्या– *एवमात्मनि कर्मवशतोऽनेकधा रूपं भवति । एवम*मुनाऽन्यधातुमिश्रितकाञ्चनानेकरूपतान्यायेन *आत्मनि* चेतनविषये *कर्मवशतः* सदा सर्वत्रैकरूपाकारेऽपि सति शुभाशुभकर्मोदयवशादेव *अनेकधा* सूक्ष्मबादरसुखिदुःखिविद्वन्मूर्खादिविभिन्नप्रकारं *रूपमा*कारो *भवति* जायते न तु स्वभावेनेति जानीहि । *तु* पुनः, *कर्ममलरहिते भगवति काञ्चनविधा भासते । कर्ममलरहिते* शुभाशुभसकलकर्मसंबन्धान्निर्मुक्ते *भगवति* सिद्धपरमात्मनि *काञ्चनविधा* शुद्धैकप्रकाशानन्दरूपता भासते पूर्णब्रह्मसंपदि*भ*र्दीप्यतेऽत एवैकत्वं भावनीयमित्यर्थः ॥६॥**

श्रीहेमविजयगणीकृतकथारत्नाकरे एतद्विषये रूपसेनाकथा उक्ता–

धनारामे ग्रामे लीलाधरद्विजस्य रूपसेना सुता, अन्यदा यौवनशालिनीं तां विलोक्य देवदत्ताऽऽख्य एको द्युतकृत् स्मरातुरो भक्तितुष्टेनैकेन योगिना दत्तेन मन्त्रेण मोहितां तां लात्वा निशि पुराद्बहिरगात् । अग्रतः सः पृष्ठे च सा एवं गच्छतोस्तयोर्निशि वनाऽहिना दष्टः स द्युतकृत्परासुरासीत् । मृतं तं विमुच्य दिग्मूढा तत्रैवेतस्ततो यूथभ्रष्टा मृगीव भ्रमन्ती मृगयार्थमागतेन रूपसेनेन राजसूनुना दृष्टा, का त्वमसीति पृष्टा मातुलगृहान्मात्रा सार्धं पितुर्गृहं व्रजन्ती सार्थभ्रष्टाऽहमिहैव भ्रमन्त्यस्मि ।

वक्त्रं चन्द्रविलासिपङ्कजपरीहासक्षमे लोचने, वर्णः स्वर्णमपाकरिष्णुरलिनीजिष्णुः कचानां चयः ।

वक्षोजाविभकुम्भविभ्रमहरौ गुर्वी नितम्बस्थली, वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनम्।।

इति स्वाभाविकस्त्रीसप्तमण्डनमण्डितं तदङ्गमालोक्य, लक्षणैश्चानूढेयमिति निश्चित्य च मम पट्टराज्ञीयं भाविनीति मत्वा, निःस्वामिकं रत्नं राज्ञामिति च ध्यात्वा तां पुरे निनाय । अन्तःपुराऽन्तः समेतां तां विलोक्य यदीयं राज्ञी भविता तदास्माकं भर्तुरपमान एवेति मत्वाऽन्याभिः कुमारस्त्रीभिः कुतोऽप्यानीय तस्यास्तूलिकाऽन्तर्मुक्तः सर्पो निशि सुप्तां तामदशत् । विषमूर्च्छितां तां मृतां मत्वा निम्बपत्रैः समं मञ्जूषाऽन्तर्निधाय राजसुत सायं सरित्प्रवाहे मुमोच । तरन्ती सा मञ्जूषा प्रभाते सिन्धुग्रामपरिसरे देहचिन्तार्थमागतेन चन्द्रभागेन श्रेष्ठिसूनुना विलोकिता कर्षिता च बहिः, तदन्तःस्थां कन्यामहिदष्टां ज्ञात्वा स्वाऽङ्गुलीयमणिजलसेचनेन सञ्जीव्य च परिणयनवाञ्छया स तां निजौकसि नयति स्म । तत्रापि राजसुतस्त्रीवत् तत्स्त्रीभिरपि तथैव विचिन्त्य विनोदेन कूपतटे नीत्वा हे शुभे! कूपं पश्येति दम्भेन सा कूपे क्षिप्ता,कूपवेदिकायां च पतिता सा जलार्थमागतया कामसेनावेश्याया दास्या बहिष्कर्षिता, समर्पिता च स्वस्वामिन्यै, मदोकसि निधानमिदमागतमिति मुदितया तया सा स्वपदे न्यधायि,सर्ववेश्यास्वामिनी च चक्रे, सापि तत्र तत्कुलोचितं कर्म चक्रे, अथैकदा भुवि भ्रमन् तत्पिता तं ग्राममागतः, सायं च तद् गृहमागत्य निशि तया सह विषयसुखमन्वभूत् । तद्रूपविनयौचित्य-प्रतिपत्तितोषेण कथितादप्यधिकदानाच्चमत्कृतचित्तया तया तद्ग्रामादि पृष्टः स सर्वं स्वं स्वरूपं यथास्थितमवदत्। कश्च भवतां परिवार इति पुनरपि चकितया तया पृष्टः स स्वसुताया नामनाशादि स्वं दुःखमपि पतद्बाष्पबिन्दुरवादीत्।

अथ हा मया पापया महापापहेतुः पितुः संयोगो व्यधायीति मुहुर्मुहुरात्मानं निन्दन्ती बाष्पाविल-लोचना सा यथाजातं स्वं सर्वं व्यतिकरं तस्मै व्याकरोत्। अथ तौ द्वावपि पृथक्-पृथक् वेश्यावेश्मतो निर्गतौ प्रव्रज्याऽऽलोचितस्वस्वदुष्कर्मविपाकौ सद्गतिभाजौ बभूवतुः।।

❋ ❋ ❋

**ग्रन्थकारः स्वयं प्रार्थनां कुर्वन्नाह-**

ज्ञानदर्शनचरणपर्यव-परिवृतः परमेश्वरः ।
एक एवानुभवसदने, स रमतामविनश्वरः वि० ।।७।। [५७]

**व्याख्या-** ***सोऽविनश्वरः परमेश्वरो ज्ञानदर्शनचरणपर्यव-परिवृत एक एवानुभवसदने रमताम् ।*** **सोऽनन्तरोक्तस्वरूपः कीदृशः ? *अविनश्वरो*ऽविनाशनशीलः *परमेश्वरः* परमश्चासावीश्वरश्चेति सर्वेषामितर-पूजनीयानां पूज्यध्येयस्मरणीयसकलेष्टसाधकप्रभावमयभक्तिस्वभावत्वादिति भावः, *ज्ञानदर्शनचरण-पर्यायपरिवृतः, ज्ञानं* विश्ववस्तुराशिसर्वभेदावभासिविशेषबोधो, *दर्शनं* सर्वपदार्थसार्थध्रौव्यरूपसमस्व-भावदर्शिसामान्यबोधः चरणं सकलात्मप्रदेशानां सर्वकालाचलनिश्चलत्वरूपस्थैर्यवृत्तिः, द्वन्द्वे कृते, तेषां ये *पर्यायाः* समयादिभेदेनोपयोगादिवर्तनप्रकाराः स्वस्वशक्तेरंशा अतीतच्छाद्मस्थिकप्रकाराश्च तैः *परिवृतो* व्याप्तः समग्रश्च *एक* एव अन्यं विहाय स एव, *मेऽनुभवसदने* ज्ञानस्वभावभवने बोधलक्ष्य इति यावत्, *रमतां* सदैव रममाणो दृश्यमानोऽस्त्वित्यर्थः ।।७।।**

दृश्या च धन्याणगारकथा -

इहास्मिन् भरते काकन्दीनामनगरी सकलगुणोपेता समृद्धा चास्ति, तस्यां, नगर्यां सहस्राम्रवननामोद्यानं

वर्तते, तत्र जितशत्रुराजा राज्यं करोति, किञ्च तत्र भद्रनाम्नः सार्थवाहस्य भद्रानाम्नी पत्नी सार्थवाही धनकनकसमृद्धा वसति, तस्या आत्मजो धननामा दारकोऽस्ति, सोऽपि सुरूपः सकलगुणगरिष्ठः क्रमेण सम्प्राप्तयौवनो द्वासप्ततिकलाकुशलोऽस्ति । तं भोगसमर्थं ज्ञात्वा भद्रा द्वात्रिंशत्प्रासादावतंसान् कारयति स्म । ततो द्वात्रिंशदिभ्यवरकन्यकानामेकस्मिन्नेव दिने पाणिग्रहं कारयति स्म । ततः सा जननी पुत्राय सर्वगृहोपस्कराणां द्वात्रिंशतं ददौ, तथा द्वात्रिंशद्वैरूप्यकोटीर्ददौ । अथ स धन्यस्ताभिर्भार्याभिः साकं वैषयिकं सुखं निरन्तरायं बुभुजे दुगुन्दकदेव इव । लीलालसोऽसौ गतमपि कालं न जानाति । एवं तस्य धन्यस्य ताभिर्भार्याभिः सार्धं भोगाननुभवतः कियन्ति वर्षाण्यतीतानि ।

एवं काले यात्येकस्मिन् समये चतुर्दशसहस्रैर्मुनिभिः परिवृतो देवसङ्घैश्च परिवृतो भगवान् श्रीवीरश्चतुस्त्रिंशदतिशयैर्विराजितस्तस्यां काकन्द्यां नगर्यां समवसृतः । ततः स्वामिनं नन्तुं राजप्रभृतयः सर्वेऽपि लोकाः समाजग्मुः । धन्योऽपि स्वामिसमागमनं श्रुत्वा पादचारेण गच्छन् समवसरणे समागात्, श्रीवीरं च प्रदक्षिणीकृत्य वन्दते स्म । ततः स्वामिना देशना दत्ता, यथा–

धर्मो जगतः सारं सुखानां प्रधानहेतुत्वात् । तस्योत्पत्तिर्मनुजात् सारं तेनैव मानुष्यम् ॥

भो भविकाः! एवंविधं मानुष्यभवमवाप्य धर्मे यत्नो विधेयः । इत्यादि भगवद्देशनां श्रुत्वा वैराग्यमापन्नोऽसौ मातुरन्तिके समागत्यैवमवादीत्, हे मातर्मया भगवदन्तिके धर्मः श्रुतः, तं श्रुत्वाहं प्रतिबुद्धश्च । अतो हे मातस्त्वदाज्ञयाहं दीक्षामङ्गीकरोमि । भोगादिलोभदर्शनेन मात्रा बहूक्तोऽपि यदा स न तिष्ठति, तदा भद्रा सार्थवाही राज्ञो जितशत्रोः समीपे गत्वा छत्रचामरादीनि मार्गयति । ततो राजा जितशत्रुर्भद्रागृहे समागत्य स्वयमेव धन्यस्य निष्क्रमणोत्सवं करोति । ततो वीरेण भगवता स्वयमेव दीक्षितः पञ्चसमितिभिः समन्वितः स त्रिगुप्तिभिरलङ्कृतो धन्योऽनगारो जातः । ततः स धन्योऽनगारो यस्मिन् दिने प्रव्रजितस्तस्मिन्नेव दिने स्वामिनं नत्वा स्वाम्यन्तिकेऽभिग्रहमग्रहीत्, हे भगवन् ! भवदाज्ञया निरन्तरं षष्ठतपः कुर्वन् पारणके चोज्झितभिक्षयाऽऽचाम्लं करिष्यामि । स्वाम्याह भो धन्य ! यथासुखं तपसि प्रवर्तस्व । मा प्रतिबन्धं कुरुष्व ।

ततः स धन्योऽणगारः स्वाम्याज्ञया हृष्टस्तुष्टः संस्तस्मिंस्तपसि प्रवर्तते । ततः स धन्यो मुनिः प्रथमषष्ठपारणके प्रथमपौरुष्यां स्वाध्यायं करोति, द्वितीयपौरुष्यां ध्यानं करोति, तृतीयपौरुष्यां भगवन्तं समापृच्छ्य भिक्षार्थं काकन्द्यां नगर्यामुच्चनीचगृहेष्वटन्नाचाम्लान्नं गृह्णाति, नान्यत्काङ्क्षति । एवं भिक्षायै पर्यटन् स यदि भक्तं लभते तदा पानं न लभते, यदा च पानं लभते तदा भक्तं न लभते, तथाप्यदीनो दृढमना अकलुषोऽविषादी स्थिरमनोवाक्काययोगी स्वयमेव यत्नकारको वर्तते । एवं यतमानेन यदि कापि भिक्षा लभ्यते, तदा तां भिक्षां समादाय काकन्दीनगरीतो निर्गच्छति, निर्गत्य च तदाहारादिकं स्वाम्यग्रे दर्शयति । ततः स धन्योऽनगारः स्वामिनानुज्ञातस्तस्मिन्नन्नादिकेऽमूर्च्छितः केवलं देहधारणार्थं तमाहारमश्नाति । एवं संयमेन तपसा चात्मानं भावयन् स विचरति । ततः श्रमणो भगवान् काकन्दीनगरीतो निर्गच्छत्यन्यत्र च विहारं करोति । ततः स धन्यो महामुनिर्भगवदाज्ञया तथारूपः श्रमणान्तिके सामायिकादीन्येकादशाङ्गानि पपाठ ।

एवं क्रमेण स धन्योऽणगारस्तपसा शुष्को निर्मांसशरीरश्च परं तपसोपचितः सुष्टूद्दीप्तहुताशन इव तपस्तेजसा दीप्यमानोऽसौ विराजते । अतिकृशशरीरः स धन्यो महामुनिः पदमपि गच्छन्नेकं वचनमपि भाषमाणश्च ग्लानिं याति, तथा तस्य शरीरं निर्मांसं शुष्कास्थिसंभूतमिङ्गालशकटमिव शब्दं करोति, तथा

भस्माच्छादितहुताशन इव तस्य शरीरे चैतन्यमपि दुर्लक्ष्यमभूत् । तस्मिन् समये मह्यां विहरन् भगवान् श्रीवीरो राजगृहे नगरे गुणशिले चैत्ये समवासार्षीत् वर्धितः श्रेणिको राड् भगवद्वन्दनाय निर्गतः नगरात्पौरपर्षदापि निर्गता, स्वामिना देशना दत्ता, पर्षत्प्रतिगता। ततः श्रेणिको राड् भगवन्तं नत्वैवमपृच्छत्, हे भगवन्नेतेषां चतुर्दशसहस्रमुनीनां मध्ये कोऽनगारो महादुष्करकारको महानिर्जराकारकश्च ? स्वाम्याह भो श्रेणिक ! एतेषामिन्द्रभूतिप्रमुखाणां चतुर्दशश्रमणसहस्राणां मध्ये धन्योऽनगारो महादुष्करकारको महानिर्जराकारकश्च ! श्रेणिकेनोक्तं भगवन् ! केन हेतुनैवमादिश्यते ? भगवानाह काकन्दीनगर्यां भद्रापुत्रो ममान्तिके प्रव्रजितो निरन्तरं षष्ठतपः कृत्वाऽऽचाम्लेन पारणकं करोति ।

इत्यादिसकलोऽपि वृत्तान्तो भगवता तस्याग्रे प्रोक्तः, तेन हेतुना च भोः श्रेणिक ! एवमुच्यते यद्धन्यो महामुनिः सर्वेषां मुनीनामुत्कृष्टः । एवं तद्भगवद्वाक्यं श्रुत्वा हृष्टः श्रेणिकः स्वामिनं वन्दित्वा धन्यान्तिके गतः, तं च त्रिः प्रदक्षिणीकृत्य वन्दित्वैवमवादीत् भो महामुने ! त्वं धन्योऽसि, कृतपुण्योऽसि, सुलब्धं तव जन्मजीवितफलम् । एवं स श्रेणिको राजा धन्यं मुनिं स्तुत्वा पुनः स्वाम्यन्तिके समागात् । पुनः स्वामिनं नत्वा स राजगृहे नगरे समागात् । ततः स श्रेणिको नृपो दिव्यान् भोगान् भुञ्जानो विचरति । अथान्यदा स धन्यो महामुनिर्निशायां धर्मजागरिकायां जाग्रन्नेवमचिन्तयत्, अहमनेन तपसा शुष्को निर्मांसश्च जातः, तर्हि प्रातः काले भगवन्तं श्रीवीरं पृष्ट्वा स्थविरैः सार्धं विपुलं पर्वतं समारुह्य मासिक्या संलेखनयात्मानं शोषयित्वा जीवितमरणयो समानो विचरामि । ततस्तेन मुनिना यथा चिन्तितं तथा कृतम् । ततः स धन्यो मासिक्या संलेखनया शुभध्याने सर्वार्थसिद्धे महाविमाने देवत्वेनोत्पन्नः । स्थविरैस्तस्योपकरणादिकं गृहीत्वा महापारिष्ठापनिकं कायोत्सर्गं कृत्वा विपुलपर्वतादवतीर्य स्वाम्यन्तिकं समागत्य तदुपकरणादिकं स्वाम्यग्रे मुक्तम् । ततो गौतमः स्वामिनं पृच्छति, हे भगवन् ! भवच्छिष्यो धन्यः कां गतिं गतः ? भगवतोक्तं मम शिष्यो धन्यः कालं कृत्वा सर्वार्थसिद्धविमाने देवत्वेनोत्पन्नः, तत्र च सर्वेषां देवानामजघन्योत्कृष्टैव स्थितिस्त्रयस्त्रिंशत्सागरोपमाणि, एवं तस्य धनस्यापि त्रयस्त्रिंशत्सागरोपमाणि स्थितिः । पुनर्गौतमेन पृष्टं स्वामिन् ! स धन्यस्ततश्च्युत्वा कुत्रोत्पत्स्यते ? भगवानाह हे गौतम् ! महाविदेहे क्षेत्रे सुकुलेषूत्पद्य दीक्षां च कक्षीकृत्य केवलं लब्ध्वा स मोक्षं यास्यति ।

❋ ❋ ❋

**अथोपसंहरति-**

रुचिरसमतामृतरसं क्षण-मुदितमास्वादय मुदा।
विनय विषयातीतसुखरसरतिरुदञ्चतु ते सदा, वि० ।।८।। [५८]

**।। इति श्रीशान्तसुधारसगेयकाव्ये एकत्वभावनाविभावनो नाम चतुर्थः प्रकाशः ।।**

**व्याख्या-** *हे विनय !* हे सहजनिर्वृतिरुचे ! *रुचिरसमतामृतरसं उदितं मुदा क्षणमास्वादय ।* यो *रुचिरो* मधुरो मनोहरः सन् सदा प्रीतिसंपादकः, *समता* प्रोक्तरूपा *सैवामृतं* सर्वकर्मरोगहरसुधा तद्रूपो *रस* आत्मरतिस्वादिष्टता तं, रुचिरश्चासौ समतामृतरसश्चेति समासः, *उदित*मुद्गतमचिन्तितमेवाविर्भूतमिति यावत् तं, *मुदा*ऽपूर्वलाभेन हर्षितो भूत्वा *क्षणं* स्वल्पकालमपि, *आस्वादय आ* ईषदीषदपि लिक्ष्व । तेनास्वादनेन

*ते* तवात्मनः *सदा* सततं *विषयातीतसुखरसरतिरुदञ्चतु* *विषयेभ्योऽतिक्रान्तं* यत्सुखमानन्दस्तस्य यो *रसः* स्वादस्तस्मिन् या *रतिः* प्रीतिः सा *उदञ्चतु* वृद्धिं गच्छत्वित्यर्थः ।।८।।

एतदुपरि श्रीरामविजयगणीकृतोपदेशमालाटीकोक्ता पुण्डरिककथा वाच्या साऽपि आश्रवभावनोक्त–तत्सहोदरकण्डरिककथया सह–

जम्बूद्वीपे महाविदेहे पुष्कलावतीविजये पुण्डरीकिण्यां महानगर्या महापद्मो राजा, तस्य पद्मावती राज्ञी, तत्कुक्षिसमुद्भवौ पुण्डगीरकण्डरीकनामानौ द्वौ पुत्रौ। तयोर्मध्ये पुण्डरीकं राज्येऽधिरोप्य, कण्डरीकं च यौवराज्ये संस्थाप्य महापद्मेन चारित्रं गृहीतं स्थविराणां पार्श्वे। क्रमेण स चारित्राराधनतः केवलमवाप्य मुक्तिं गतः, पश्चात्पुण्डरीको नृपोऽन्यदा राज्यं पालयन् स्थविरान्तिके धर्मं शुश्राव, श्रुत्वा द्वावपि भ्रातरौ प्रतिबुद्धौ । गृहमागत्य पुण्डरीको वृद्धभ्राता कण्डरीकं कथयति स्म । हे बंधो ! गृहाणेदं राज्यं, प्रजां च प्रजावत्पालय ? अहं स्थविरान्तिके चारित्रं ग्रहीष्यामि । तत् श्रुत्वा लघीयसा कण्डरीकेणोक्तं, हे भ्रातः किं कार्यं मम राज्येन ? पित्रा तव राज्यं समर्पितमतस्त्वमेवेदं भुङ्क्ष्व ? अहं स्थविरान्तिके चारित्रं ग्रहीष्यामि, इति कथयित्वा वृद्धभ्रातरमापृच्छ्य तेन चारित्रं गृहीतं, वर्षाणामेकसहस्रं यावच्चारित्रमनुपाल्य भग्नपरिणामो जातः, एकाक्येव गुर्वाज्ञां विना स पुण्डरीकिण्यां समागतः, नृपभुवनसमीपेऽशोकवाटिकायामशोकवृक्षाधस्तादुपकरणानि वृक्षशाखायां स्थापयित्वा दुर्मनाश्चिन्तातुरः स्थितोऽस्ति । तदवसरे राज्ञो धात्रीमात्रा स दृष्टः तया समागत्य पुण्डरीकनृपाग्रे सर्व तत्स्वरूपं कथितं । पश्चाद्राज्ञापि तत्रागत्य तं दृष्ट्वा तदभिप्रायो ज्ञातः, एकान्ते च पृष्टं भ्रातर्भवतः को भोगाभिलाषो वर्तते ? तेनोक्तं मम राज्यभोगेच्छा वर्तते. तत् श्रुत्वा पुण्डरीकनृपेण स्वकुटुम्बिकपुरुषानाहूय तदीयो राज्याभिषेकः कारितः , कण्डरीको राजा जातः, पश्चात् रौद्रध्यानेन मृत्वा सप्तमावनौ गतः । अथ पुण्डरीकनृपः स्वयं चतुर्महाव्रतोच्चारपूर्वकं तान्येव कण्डरीकमुक्तोपकरणान्यादाय, यावत्स्थविरान्नाऽभिवन्दामि तावदाहारं न गृह्णामीत्यभिग्रहं कृत्वा गृहान्निर्गतो मार्गे कण्टककर्कराद्युपसर्गान् सहमानो मनस्येवं चिन्तयति यत्कदाहं स्थविरान् वन्दिष्ये? इति दृढपरिणामाप्तो द्वितीयदिवसे स्थविरानभिवन्द्य तत्पार्श्वे पुनरपि चत्वारि महाव्रतान्युच्चरितवान् । पश्चात्षष्टपारणके तेन नीरसरुक्षयादृशाहारः कृतः तेन मध्यरात्रिसमये तस्य शरीरे महाव्यथोत्पन्ना। सर्वान् क्षान्त्वा विशुद्धध्यानतस्तदैव कालं कृत्वा स सर्वार्थसिद्धे महाविमाने त्रयस्त्रिंशत्सागरोपमायुर्देवो जातः, ततश्च्युत्वा महाविदेहे सेत्स्यतीति । एवं स्तोककालमपि यो विशुद्धं चारित्रं पालयति स पुण्डरीकवत्सुखं प्राप्नोती।

**इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यश्रीमुक्तिविजयगणिसतीर्थ्यतिलक–*मुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां शान्तसुधारस*–टीकायामेकत्वभावनाविभावनो नाम चतुर्थः प्रकाशः समजनि ।।**

**यदि अहम् एकम् एव आत्मस्वरूपम् एव स्वाभावं तर्हि यदन्यत् पदार्थादिकं दृश्यते तत्सर्वं अन्यत् परम् । अनेन सम्बन्धेन आयाता क्रमप्राप्ता अन्यत्वभावना उच्यते–**

❀ ❀ ❀

# ॥ पञ्चमः प्रकाशः ॥

चतुर्थप्रकाश एकत्वभावना भाविता। स्वस्यैकत्वे च ज्ञाते सति सर्वस्मिन् परपदार्थेऽन्यत्वज्ञानं जायतेऽतः पञ्चमप्रकाशेऽन्यत्वभावनां विभावयतीत्यनेन संबन्धेनायातस्यास्यायं प्रथमः श्लोकः-

( उपजातिवृत्तम् )

परः प्रविष्टः कुरुते विनाशं, लोकोक्तिरेषा न मृषेति मन्ये ।
निर्विश्य कर्माणुभिरस्य किं किं, ज्ञानात्मनो नो समपादि कष्टम् ॥१॥ [५९]

व्याख्या- *परः* स्वस्मादन्यः स्वरूपेण जात्या च भिन्न इति यावत्, *प्रविष्टः* स्वशरीरगृहादिषु लब्धप्रवेशः, *विनाशं* शरीरधनस्त्र्यादिसंहरणाद्युपद्रवमेव *कुरुते* । *एषाऽ*नन्तरदर्शिता *लोकोक्तिः* साधारणजनवचनोल्लापोऽपि *न मृषाऽ*सत्या *नास्तीति* अहं *मन्ये* मल्लक्षणो जनो निश्चिनोति । तर्हि सर्वज्ञोक्तयो न कथञ्चनाप्यन्यथेत्यतो निर्धारयामि *कर्माणुभिर्निर्विश्यास्य ज्ञानात्मनः किं किं कष्टं नो समपादि । कर्माणुभिः* कर्मणुभिः *कर्मणो* ज्ञानावरणीयादेर*णवो*ऽनन्तपरमाणुनिष्पन्नाः स्कन्धास्तैः *निर्विश्य* नितरां सर्वात्मप्रदेशेषु प्रवेशं कृत्वाऽ*स्य* स्वानुभवप्रत्यक्षस्य *ज्ञानिनः* स्वसुखदुःखादिज्ञातुर्ज्ञानस्वरूपस्य *वात्मनो* मम चेतनस्य सर्वसंसारिजीवस्य च *किं किं* कतमं कतमं कष्टं दुःखं *नो समपादि* नो प्रापितम् । यन्न प्रापितं तत्कष्टमपि नास्ति लोकेऽतः परस्मादविस्पृष्टो भवेत्यर्थः ॥१॥

उक्ता हि एतत्विषये काष्ठतापसकथा उपदेशप्रासादे-

राजगृहे काष्ठनामा इभ्यः । तस्य कुलटा वज्रा भार्या । सुतो देवप्रियो लेखशालायां पठति स्म । श्रेष्ठिनो गृहेऽपत्यानीव त्रयः शुकसारिकाकुर्कुटाः सन्ति, तथा एको ब्राह्मणपुत्रः स्वगृहे रक्षितः । स एकदा स्वगृहभारं स्त्रियाः शुकस्य च दत्त्वा लक्ष्मीहेतवे विदेशेऽचलत् । अथ द्विजे यौवनं प्राप्ते वज्रा तेन सह सौख्यं बुभुजे । तौ संपृक्तौ दृष्ट्वा सारिका शुकं प्राह-पापपरावेतावावां निवारयावः । शुक उवाच-

उपदेशो हि मूर्खाणां, प्रकोपाय न शान्तये । पयःपानं भुजङ्गानां, केवलं विषवर्धनम् ॥

सम्प्रति समयो नास्ति । साऽऽह-

तुडिण सुण सभाव वरं मरणं मम अकाले वि । मे तायस्स घरे न खमं अकज्जमेयारिसं दट्ठुं॥

एवं वदन्ती सा सारिका वज्रयाऽग्नौ क्षिप्ता । ततः शुको मौनं चकार ! एकदा तस्य गृहे तपस्वियुगं भिक्षार्थमागात् । एकेन वृद्धेन लघोरग्रे एतदुक्तम्-अस्य कुर्कुटस्य समञरि शिरोयोऽत्ति, स राजा स्यात् । तद्वचनं तेन बटुकेन कटकान्तरतः श्रुतम् । ततो बटुर्वज्रां प्रति प्राह-अस्य ताम्रचूडस्यावश्यं शिरो मह्यं देहि । तयापि कथञ्चित् प्रतिपन्नं ततस्तं हत्वा पचनार्थमग्नावक्षिपत् । बटुकः स्नाय गतः । इतः पुत्रो लेखशालाद् आगात्, भोजनं चायाचत । विस्मृत्या मात्रा तस्मै तच्छिरो दत्तम् । ततः स पठनाय गतः । बटुक आगत्याशनायोपविष्टः । शिरोविहीनं पलं दृष्ट्वा तां पृष्ट्वा निर्णये कृते सोऽवक्-पुत्रं हत्वा तच्छिरःपलं त्वं चेद्ददासि तर्हि आवयोः प्रेमभङ्गो न स्यात् । तया स्वीकृतम् । एतत्तद्धात्र्या श्रुतम् । ततो धात्री तं पुत्रं

लेखशालातः कटौ कृत्वा नगरान्निर्गता पृष्ठचम्पोद्याने क्रमात् प्राप्ता । इतस्तत्पुरस्वामी निष्पुत्रो मृतः । ततोऽमात्यादिकृतपञ्चदिव्यैर्वनसुप्तस्स बालः प्रमाणीकृत्य राज्येऽभिषिक्तः ।

इतः काष्ठश्रेष्ठी गृहम् आगतः । चत्वारि वस्तून्यदृष्ट्वा शुकं पप्रच्छ । शुकः प्राह–मां पञ्जरान्निष्कासय, तदनु निर्भयः सर्वं वच्मि । ततः श्रेष्ठिना मुत्कलीकृतः तरौ स्थितस्तं प्रति बटुवज्रयोः सम्बन्धमवोचत्, तच्छ्रुत्वा श्रेष्ठी वैराग्येण दीक्षां जग्राह ।

❋ ❋ ❋

**अथ परस्मिन्नन्यत्वानवबोधात्स्वं विस्मृत्य परार्थं खिद्यते इत्युपदिशति–**

( स्वागतावृत्तम् )

खिद्यसे ननु किमन्यकथार्तः, सर्वदैव ममतापरतन्त्रः ।
चिन्तयस्यनुपमान्कथमात्मन्, नात्मनो गुणमणीन्न कदापि ॥२॥ [६०]

व्याख्या– *हे आत्मन् ! त्वं ममतापरतन्त्रः सर्वदैवान्यकथार्तः ननु किं खिद्यसे ? ममता* पूर्वोक्ता तज्जन्या या परतन्त्रता अहमेषां पालक एते मे पाल्या अयं मे प्रभुरित्यादिरूपा पराधीनता तया *परतन्त्रः* परवशः सन् सर्वदैव सर्वकालमहर्निशं । *अन्यकथार्तः अन्येषां* स्वात्मभिन्नानां *कथा* तद्भोजनादिसंपादनचिन्ता *तयार्तः* पीडितः, *नन्विति* मुग्धसंबोधने रे अज्ञ ! स्वयमेव स्वस्य पारवश्यमुत्पाद्य कष्टापतनावसरे, *किं खिद्यसे* कस्मात् त्वं खेदयसि स्वकृतपारवश्यं भुङ्क्ष्व । तथाऽन्यत्वाज्ञः सन् *अनुपमान् आत्मनो गुणमणीन् कथं कदापि न चिन्तयसि ? अनुपमान्* सर्वेष्टसंपादकत्वेन चिन्तामणिकामघटकल्पवृक्षादिसर्वोपमातीतान् *आत्मनो* जीवस्य ये *गुणा* अनन्तज्ञानदर्शनमयसर्वसंबन्धरहितनैरञ्जन्यसत्तादिस्वस्वभावास्त एव सर्वोत्तमत्वेन *मणयो* रत्नानि तान्, *कथं* कस्मात्प्रमादादिदोषात् *कदापि* सावकाशशयनभोजनाद्यवसरेऽपि *न चिन्तयसि* एतेऽन्ये अहमन्योऽस्मीति हृदि निधाय तान्न ध्यायसीति न जाने का तवेच्छा वर्तत इत्यर्थः ॥२॥

उक्तं श्रीशिवमुनिकथा मुनिपतिचरित्रे–

उज्जयिन्यां महापुर्यां शिवदत्ताख्यौ द्वौ बान्धवौ वसतः स्म । परं धनहीनत्वादेकदा तौ परस्परमिति विचारं कुरुतः, आवां धनार्जनाय सौराष्ट्रदेशे गच्छावः; इति ध्यात्वा तौ तत्र गत्वा व्यवसायं चक्रतुः परं धनप्राप्तिर्नाभवत् । तत एकेन तत्र कृषिकर्म प्रारब्धं, अन्यस्तु किञ्चित्क्रयाणकं गृहीत्वा प्रवहणमारुह्य विदेशे गतः । ततो यावत्स मार्गे प्रयाति, तावद्रात्रौ तेन चत्वारो वैदेशिकवणिजो वटतरोस्तले समुपविष्टा दृष्टाः । इतो वटशाखात एकः सुवर्णपुरुषो निर्गतः, तं ग्रहीतुं यावत्ते यान्ति तावत्तेन सुवर्णपुरुषेणोक्तमर्थादनर्थो भवति । इति श्रुत्वापि ते तं गृहीत्वा भूमौ स्थापयामास ।

अथ प्रभाते तेषां मध्याद् द्वौ भोजनसामग्रीकृते नगरमध्ये गतौ, द्वौ च तस्य सुवर्णपुरुषस्य रक्षणाय तत्र स्थितौ । अथ भोजनसामग्रीकृते नगरं गतौ तौ द्वावित्यचिन्तयतां चेदावां तौ द्वावपि मारयावस्तदावयोर्भूरिद्रव्यं लभेत, इति ध्यात्वा तयोर्भोजनमध्ये विषं प्रक्षिप्तम् । अथ वटतलस्थिताभ्यामपि द्वाभ्यामिति चिन्तितं यदावां तौ द्वावपि मारयित्वा सुवर्णपुरुषं गृह्णीवः । अथ यावत्तौ भोजनं गृहीत्वा तत्रागतौ तावत्ताभ्यां तौ द्वावपि खड्गेन हतौ, ततः सविषभोजनकरणानन्तरं तावपि तत्र मृत्वा पतितौ ।

तदा वृक्षान्तरितेण ग्रामिकेन तत्सर्वं तेषां चेष्टितं विज्ञायेति ध्यातमहोऽर्थादनर्थो ह्ययमेव । ततस्तं सार्धहस्तप्रमाणं सुवर्णपुरुषं गृहीत्वा सः पश्चान्निवृत्य भ्रातुः समीपे समागतः । ततो द्वाभ्यां संभूय गृहं प्रत्यागच्छद्भ्यां मार्गे इति विचारः कृतः, तत्र एकेन चिन्तितं चेदहमेनं भ्रातरं मारयामि तदा सर्वमेतद्धनं मम स्वाधीनं भवेत, द्वितीयेन भ्रात्रापि एवमेव चिन्तितम् । एवं ध्यायन्तौ द्वौ अपि स्वनगरसमीपे सामागतौ । तदा प्रथमेन पुनश्चिन्तितं धिगेतद्धनं, येनेदृशी बुद्धिरुत्पद्यते, इति विचार्य तेन स सुवर्णपुरुष एकस्मिन् ह्रदमध्ये निक्षिप्तः । तदा द्वितीयेन अपि कथितं भो बान्धव! त्वयैतद्भव्यं कृतं, ततस्तौ द्वावपि गृहे समागतौ, तौ दृष्ट्वा सर्वे स्वजना अपि हृष्टाः संजाताः ।

अथ स सुवर्णपुरुषो ह्रदमध्ये एकेन महता मत्स्येन गलितः, स मत्स्योऽप्येकेन धीवरेण स्वजालमध्ये गृहीतः, ततः स धीवरस्तं मत्स्यं विक्रयार्थं चतुष्पथे समानयत्, तदा ग्रामिकयोः माता तं मत्स्यं भोजनार्थं मूल्येन गृहे समानीय ग्रामिकयोः भगिन्यै ददौ, ततः सा यावत्तं मत्स्यं द्विधा करोति, तावत्तन्मध्यात्तन्निधानं प्रकटितं, तद् दृष्ट्वा हृष्ट्या तया तत्प्रच्छन्नं स्थापितं, तां तथा कुर्वन्तीं दृष्ट्वा मात्रा प्रोक्तं भो पुत्रि किमेतन्निर्गतमस्ति? तयोक्तं किमपि नास्ति, एवं ते विवदन्त्यौ परस्परं योद्धुं लग्ने, इतो मे भगिनीकक्षातस्तन्निधानं मम मातुः शिरसि पतितं, मर्मप्रहारेण च सा तत्क्षणं तत्र मृता । तयोः कोलाहलं श्रुत्वा तौ तत्रागतौ, अनर्थकारणं तदेव निधानमालोक्य तद्भगिन्यै दत्त्वा द्वाभ्यां वैराग्येण गुरूसमीपे दीक्षा गृहीता ।

❋ ❋ ❋

### अथ विशेषेण अन्यत्वं भावयती –

( शार्दूलविक्रीडितं वृत्तद्वयम् )

यस्मै त्वं यतसे बिभेषि च यतो, यत्रानिशं मोदसे,
यद्यच्छोचसि यद्यदिच्छसि हृदा, यत्प्राप्य पेप्रीयसे ।
स्निग्धो येषु निजस्वभावममलं, निर्लोठ्य लालप्यसे,
तत्सर्वं परकीयमेव भगवन्नात्मन्न किञ्चित्तव।।३।।[६१]

व्याख्या- *हे आत्मन् ! हृदा* चेतसा विलोकय, किमित्याह- हृदेति सर्वत्र संबन्धनीयं, *यस्मै* धनकुटुम्बशरीरादिकृते *त्वं* देवदत्तादिः हृदाकूतेन सहितः *यतसे* प्रकटप्रौढोद्यमपरो वर्तसे, *च* पुनः, *यतः* शत्रुसिंहसर्पचौरादिभ्यः शरीरधनादिनाशात् *बिभेषि* भयवान् भवसि तच्छरीरादि, तथा *यत्र* स्त्रीधनपुत्रादिके *अनिशं* सदा निरन्तरं *मोदसे* सानन्दोऽसि तत्, तथा *यत्* पुरानष्टस्वजनधनादि *शोचसि* सन्तप्तचित्तः पश्चात्तापपरो भवसि, तथा *यद् इच्छसि* सुखपुत्रादिकं, *यत्प्राप्य* हृदा *पेप्रीयसे, यद्*राज्यपूजासत्कारादिकं *प्राप्य* लब्ध्वा *हृदा* मनसा *पेप्रीयसे*ऽतिशयेन प्रेमवशो भवसि, *येषु* वस्त्रालङ्कारसदनोत्सवलाभादिषु प्राप्तेषु दृष्टेषु सत्सु *स्निग्धः* प्रेमरागरञ्जितो भूत्वा *अमलं* स्वच्छमणिवन्निर्मलं *निजस्वभावं* सहजां परिणतिं *निर्लोठ्य* नितरामुद्वम्य परित्यज्येति यावत् *लालप्यसे* यथा तथा यद्वा तद्वा प्रलापान् करोषि । *भगवान्नात्मन्, हे भगवान् !* ज्ञानवैराग्यादिमन्*नात्मन् ! तत्सर्वं* तत्पूर्वोक्तं *सर्वं* निःशेषं समग्रं *परकीयमेव* परमाण्वादिपुद्गलसंबन्ध्येव तज्जन्यत्वात्, यद्वाऽन्यत्वात् तव चेतनस्य तेभ्योऽन्यस्य *न किञ्चित्* परमाणुमात्रमपि *तव* नास्तीति निर्वृतो भवेत्यर्थः ।।३।।

उक्तं श्रीशुभशीलगणीकृतप्रबन्धपञ्चशत्यां चन्द्रकथा –

श्रीपुरे धनश्रेष्ठी, धनी प्रिया, चन्द्रःपुत्रः, तस्य पत्नी रूपश्रीः, चन्द्रः पत्नीमोहितः पत्न्योक्तं कुरुते । एकदा पत्न्योक्तम्–मां प्रति श्वशुरादयो यथा–तथा जल्पन्ति । ततः स मातापितरौ मुक्त्वा विदेशं प्रत्यचलत् । मार्गे तृषा लग्ना पत्न्याः । सा च जल्पति स्म पयो विना मम जीवितं नास्ति । ततो जगदे तेनाग्रतश्चल सरो यावत् साऽवग्–अत्रानय पयः । ततस्तस्यां मोहितः स पयआ नेतुं चचाल । सिंहो दृष्टः जीवितव्यं तृणमिवावगणय्य सरसि गत्वा पयः पश्चादानीतवान्, तावत्प्रियाऽभूदचेतना । तां क्रमात्सचेतनीकृत्याग्रतश्चचाल । ततः कस्यचित्पुरोपान्ते कूपोपकण्ठे भार्यां मुक्त्वा पुरमध्ये भक्तमानेतुं गतः । तत्रस्था सा समीपकूपे एकं कुष्ठिनं पङ्गुं रागं कुर्वाणं दृष्ट्वा मोहिता, भर्तृविषये निःस्नेहाऽभूत । तया पङ्गुपुरः (पङ्गोःपुरः) प्रोक्तम्त्वं मम भर्ता भव । तेनोक्तम्–कथमेवं जल्पसि ? क्वाहं, क्व त्वम् ? ततः क्षणाद्भर्ताऽऽगात् । आनीतं भक्तं त्रिधा कृत्वा एकं भागं स्वस्य, एकं पङ्गोः एकं पत्युः कारितं तया । ततश्चलन्त्या तया स पङ्गुः सार्धं नीतः । मार्गे कदाचित्तं पुरुषमुत्पाटयति । कदाचित्सा क्रमाद्धन्तुमिच्छति सा पतिं, क्रमात्कस्मिंश्चित्पुरे पुरपार्श्वे गत्वाऽवग् सा, ममापहृत्य यात्ययं, ततो राजाऽऽगात् । तयोक्तम्–ममायं पङ्गुभर्ता, असौ मुधाजल्पकः । ततो राज्ञा निष्कासितोऽसौ चन्द्रो दध्यौ–

यस्यै निजं कुलं त्यक्तं, जीवितार्थं च हारितम् ।<br>
सा मयि भवति निःस्नेहा, कः स्त्रीणां विश्वसेन्नरः ।।

ततो राज्ञां स्वस्वरूपं प्रोच्य संसारं तत्याज सः ।

❋ ❋ ❋

**दुष्टाः कष्टकदर्थनाः कति न ताः, सोढास्त्वया संसृतौ,<br>
तिर्यङ्नारकयोनिषु प्रतिहतच्छिन्नो विभिन्नो मुहुः।<br>
सर्वं तत्परकीयदुर्विलसितं, विस्मृत्य तेष्वेव हा,<br>
रज्यन्मुह्यसि मूढ तानुपचरन्नात्मन ! न किं लज्जसे।।४।।[६२]**

व्याख्या– *हे आत्मन् ! त्वया संसृतौ ता दुष्टाः कष्टकदर्थनाः कति न सोढाः । त्वयाऽन्येषु* स्वकीयत्वबुद्धिभृता *संसृतौ* चतुर्गतिके भवभ्रमणे *ता* अनन्तसंख्येयत्वेन वक्तुमशक्याः *दुष्टाः* केवलदुःखरूपा दुःखफला दुःखानुबन्धिन्यः *कष्टकदर्थनाः* यातनामयमहाविडम्बनाः पीडा इति यावत् *कति* कियन्त्यो *न सोढाः* कष्टभोगत्वेन प्राप्तोऽसि । भिन्नेषु निजत्वबुद्ध्या सर्वाः प्राप्तः । या न प्राप्ता सा नास्तीति यावत् । भूयः शृणु–*यत्तिर्यङ्नारकयोनिषु मुहुः प्रतिहतच्छिन्नो* विभिन्नस्तत्सर्वं *परकीयदुर्विलसितं विस्मृत्य* हा *तेष्वेव रज्यन्मुह्यसि, मूढ ! तामुपचरन् किं न लज्जसे, यत्त्वमात्मन्!* तिर्यङ्एकद्वित्रिचतुःपञ्चेन्द्रिया अपदद्विपदचतुष्पदजलस्थल–खेचरसंमूर्च्छिमगर्भजादिभेदभिन्नास्तिर्यञ्चो, *नारका* रत्नप्रभादिप्रभवाः सप्तधा तेषां *योनयः* उत्पत्तिस्थानानि तेषु, *मुहुः* पौनःपुन्येनानन्तशः *प्रतिहतो* भूयो भूयो मुद्गरादिना प्रहृतः, *छिन्नः* खड्गादिना खण्डशः कृतः, *(वि) भिन्नः* तोमरादिना हृदयोत्तमाङ्गादिषु विद्धः, *तत्सर्वं* तत्पूर्वोक्तं *सर्वदुःखं* त्वयाऽनुभूतं यद्धेतुकं तज्जानीहि । किं तदित्याह–*परकीयदुर्विलसितं, परे* आत्मनो भिन्नाः कर्मपुद्गलशरीरधनभार्यादयस्तेषामिदं *विलसितं* क्रियाफलं वर्तते । *तद्विस्मृत्य* स्मरणमकृत्वा *हा* महाकष्टं

*तेष्वेव* परविलसितेष्वेव *रज्यन्* आसक्तिं दधन् *मुह्यसि* मोहं प्राप्नोषि । रे *मूढ !* रे अज्ञ ! *तानुपचरन्* परविलासान् भजन् *किं* कस्माद्धेतोर्न *लज्जसे ।* अज्ञानमोहवशाद्गतलज्जोऽसीत्यर्थः ।।४।।

उक्ता हि आवश्यकनिर्युक्तौ सौमिलिककथा–

सौमिलिकनामा वणिक्पुत्र आसीत् । सोऽतीवकामातुरः । प्रातिवेश्मिक वणिग् वाणिज्यार्थे विदेशे गते सति तस्य भगिन्या सह उषित्वा भोगान् भुङ्क्ते । अन्यदा प्रत्यागतेन सौमिलिको स्वभगिन्या सह दृष्टः । क्रोधातुरेण तेन वणिजा सौमिलिको अन्तर्गृहे गृहस्य अशुचिकूपमध्ये क्षिप्तः । अन्यखाद्यपदार्थाभावे स्वजीवनरक्षार्थे च सौमिलिकेन कूपस्थविष्टां भुक्त्वा प्रश्रवणं च पीत्वा तत्रैव कियत्कालम् प्रससार । एकदा वर्षाकाले मेघे वर्षति जलप्रवाहेण नगरबहिःस्थे अशुचितडागे असौ नीतः । स दुर्बलाङ्गः अतिदुर्गन्धगात्रः श्लिष्टविष्टः सौमिलिको गृहं प्राप्तः । परिवाराग्रे सर्वं व्यतिकरं प्रोक्तम् । अल्पकालेन कुशलवैद्येन सज्जीकृतः । तथापि अबुद्धोऽसौ पुनः स्मरक्रीडायां प्रवृतः । पुनरपि कूपे क्षिप्त एवं त्रिः कूपाद् उद्धृतः । परिवारजनैः लोहनिगडैः बद्धः । परवशतादुःखम् असहमानो मृतः ।

❋ ❋ ❋

( अनुष्टुब्-वृत्तम् )

ज्ञानदर्शनचारित्र-केतनां चेतनां विना ।
सर्वमन्यद्विनिश्चित्य, यतस्व स्वहिताप्तये ।।५।।[६३]

व्याख्या– हे चेतन ! त्वं *ज्ञानदर्शनचारित्रकेतनां, ज्ञानं* भेदग्राहिबोधो, *दर्शनं* निर्भेदग्राहिबोधः, *चारित्रं* परस्मान्निवृत्तिस्वभावः, द्वन्द्वे कृते, तानि *केतनं* चिह्नं स्वरूपं यस्याः सा तथा तामुक्तरूपां *चेतनां* त्रिगुणमयजीवसत्तां *विना* विहाय *सर्वं* निःशेषवस्तुजातं । *अन्यत्* मत्तो जातिस्वरूपगुणस्वत्वादिभिर्भिन्नमेव वर्तते । इति *विनिश्चित्य* विविधप्रकारेण निर्धार्य *स्वहिताप्तये* मोक्षप्राप्तिकृते *यतस्व* सोद्यमो भवेत्यर्थः ।।५।।

❋ ❋ ❋

अथ गेयपद्याष्टकेनान्यत्वं विभावयति–

विनय ! निभालय निजभवनं, विनय ! निभालय निजभवनम् ।
तनुधनसुतसदन-स्वजनादिषु, किं निजमिह कुगतेरवनम्, वि० ।।१।। [६४]

व्याख्या– हे *विनय !* हे निःसङ्गचेतन ! निजभवनं *निभालय, निजमन्यत्सर्वं* परकीयं हित्वा यदात्मीयं *भवनं* स्वसत्तामनादितः स्वजन्मादिवर्तनां स्वाधारं च *निभालय* नितरामन्तर्दृशा विलोकय । किमत्रात्मीयमन्यदीयं स्थायि गत्वरं चेति पश्य । तथा *इह तनुधनसुतसदनस्वजनादिषु* निजं कुगतेरवनं *किं, इह* संसारे शरीरसंपत्पुत्रगृहस्वपरिवारेषु मध्ये *निजं कुगतेरवनं* आत्मनो दुर्गतितो रक्षणं *किम*स्तीति पश्येत्यर्थः ।।१।।

उक्ता हि उत्तराध्ययने पुरोहितसुतकथा–

तथाहि नगरे क्वापि भूपः कुत्रचिदुत्सवे । बहिर्नियाति शुद्धान्ते, प्रोच्चैरित्युदघोषयत् ।।१ ।।
सर्वैरपि नरैः सद्यो, निर्गन्तव्यं बहिः पुरात् । न निर्यास्यति यस्तं तु निग्रहीष्यति भूपतिः ।।२ ।।
तदाकर्ण्य नराः सर्वे, निर्ययुस्त्वरितं पुरात् । राज्ञामाज्ञामनुल्लङ्घ्यां, सुधीरुल्लङ्घते हि कः ? ।।३ ।।
तदा चैको राजमित्रं, पुरोहितसुतो युवा । न निर्ययौ पुराद्वारवधूधामनि संस्थितः ।।४ ।।
कथञ्चित्तं च विज्ञाय, जगृहुर्नृपपुरुषाः । तेभ्यः किञ्चिद्वितीर्यात्मा, न तु तेन व्यमोच्यत ।।५ ।।
किन्तु राज्ञो वयस्योऽहमिति दर्पात्स तैः समम् । चक्रे विवादं दर्पो हि, स्यादन्धंकरणो नृणाम् ।।६ ।।
ततस्तं पार्थिवोपान्ते, निन्यिरे नृपपुरुषाः । राज्ञाप्याज्ञाभङ्गकारी–त्यादिष्टो वध्य एव सः ।।७ ।।
पुरोहितस्तदाकर्ण्योपेत्योर्वीशमदोवदत् । स्वामिन् ! ददामि सर्वस्वं, तद्विमुञ्चत मे सुतम् ।।८ ।।
पुरोहितेनेति धनेन भूपो, निमंत्र्यमाणोऽपि न तं मुमोच ।
ततः सशूलामधिरोपितोऽन्तं, जगाम दीनः शरणेन हीनः ।।९ ।।

❋ ❋ ❋

येन सहाश्रयसेऽतिविमोहा–दिदमहमित्यविभेदम् ।
तदपि शरीरं नियतमधीरं, त्यजति भवन्तं धृतखेदम्, वि० ।।२।। [६५]

**व्याख्या–** हे चेतन ! त्वं *येन सह अतिविमोहादिदमहमित्यविभेदमाश्रयसे । येन* तवातिप्रियेणा शरीरेण *सह* सार्धं *अतिविमोहात्* अतिशयेनान्येभ्यः सर्वप्रियेभ्यः समाधिक्येन यो *विमोहो*–ऽज्ञानं रागश्च तस्मात्, *इदं* प्रत्यक्षदृश्यमानं च शरीरं निर्दिशति, *अहं* इदमहं देवदत्तादिरस्मि, इत्येवंप्रकारेण *अविभेदं* अविभिन्नत्वेनैकत्वं *आश्रयसे* मन्यसे । *तदपि शरीरं* प्रोक्तप्रेमाधारदेहोऽपि, आस्तामितरे धनादिपदार्थाः *नियतमधीरं नियतम*वश्यं निश्चितमितियावत्, *अधीरं* चञ्चलमस्थायि । *धृतखेदं भवन्तं* त्यजति, *धृतः* प्रापितः *खेदः* शोकः शक्तिशैथिल्यं चेति यावत् येन तं तादृशं *भवन्तं* त्वां *त्यजति* त्यजन्नेवास्तीत्यर्थः ।।२।।

❋ ❋ ❋

जन्मनि जन्मनि विविधपरिग्रह–मुपचिनुषे च कुटुम्बम् ।
तेषु भवन्तं परभवगमने, नानुसरति कृशमपि सुम्बम्, वि० ।।३।। [६६]

**व्याख्या–** हे प्राणिन् ! त्वं *जन्मनि जन्मनि* अनादितो भवे *विविधपरिग्रहं कुटुम्बं चोपचिनुषे, विविधो* नानाजातीय–पदार्थसंग्रहरूपः *परिग्रहः,* तस्य स्वकीयत्वेन स्वीकारस्तं, च पुनः *कुटुम्बं* भार्यापुत्रादिपरिवारस्तं च *उपचिनुषे* नवं नवं समुत्पाद्य वृद्धिं पोषणं च कुरुषे । न च निजत्वग्रहग्रस्तस्वात्मानं कदापि चिन्तयसि । *परभवगमने तेषु कृशमपि सुम्बं भवन्तं नानुसरति ।* परंतु रे जीव ! *परभवगमने* जन्मान्तरप्रापणावसरे, *तेषु* परिग्रह–कुटुम्बवृन्देषु मध्यगेषु *कृशमपि* सूक्ष्मात्सूक्ष्ममपि सुम्बं तुषमात्रमपि *भवन्तमात्मानं नानुसरति* न सहयायितया समागमिष्यति, तस्माद्व्यर्थस्तत्र प्रतिबन्ध इत्यर्थः ।।३।।

दृश्यं च उपदेशमालोक्तं भरतचक्रीभातृवृतं –

भरतचक्रिणा षट्खण्डविजयः कृतः, सर्वेषामष्टनवतिसंख्याकानां बान्धवानामाकारणार्थं दूताः प्रेषिताः, दूतैस्तत्र गत्वोक्तं भवतो भरतः समाह्वयति, ततः सर्वेऽपि बान्धवा मिलिता मनसि विचारयितुं कर्तुं

लग्नाः । यदयं भरतो लोभपिशाचेन ग्रस्तो मत्तो जातः, षट्खण्डराज्यं गृहे प्राप्तं, तथाप्यस्य लोभतृष्णा न शान्ता, अहो लोभान्धता ! यदुक्तं–

लोभमूलानि पापानि, रसमूलाश्च व्याधयः स्नेहमूलानि दुःखानि, त्रीणि त्यक्त्वा सुखी भव ।।१।।

तथा चोक्तं–

भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः ।।२।।

अतो बलात्कारेणाप्यं राज्यं गृहीष्यति, ततश्च तस्य सेवा कर्तव्या भविष्यति, एवं तस्य सेवां तु वयं न करिष्याम इति सर्वैरपि बान्धवैरङ्गीकृतं, सर्वेऽपि श्री ऋषभस्वामिसमीपं निजवृत्तान्तं निवेदनार्थं गताः, तत्र प्रभुं वन्दित्वा करौ योजयित्वा विज्ञपयामासुः, प्रभो मत्तोऽयं भरतोऽस्माकं राज्यं ग्रहीतुमुद्यतः, वयं क्व यामः ? वयं तु श्रीतातदत्तैकदेशराज्येनापि सन्तुष्टाः स्मः, स तु षट्खण्डराज्येनापि न सन्तुष्टः, इति तेषां वचनानि श्रुत्वा प्रभुः प्राह – किमेतया नरकान्तया राज्यलक्ष्म्या ? अनेक जीवेनानन्तशो राज्यलक्ष्मीरनुभूता, तथापि न तृप्तो जातः, स्वप्नोपमोऽयं राज्यलीलाविलासः, यदुक्तं –

संपदो जलतरङ्गविलोला, यौवनं त्रिचतुराणि दिनानि ।
शारदाभ्रमिव चञ्चलमायुः, किं धनैः कुरुत धर्ममनिन्द्यम् ।।३।।

अतो भोः पुत्राः । कोऽयं मोहविलासः ? कस्य सुताः ? कस्य राज्यं ? कस्य नार्यः ? किमपि सार्थे नागमिष्यतीति यदुक्तं–

द्रव्याणि तिष्ठन्ति ग्रहेषु नार्यो, विश्रामभूमौ स्वजनाः श्मशाने ।
देहश्चितायां परलोकमार्गे, कर्मानुगो याति स एव जीवः ।।४।।

अतो राज्यं त्यज ? कुरु अक्षयं मोक्षराज्यं ? इति प्रभोर्देशनां श्रुत्वा सर्वेऽपि प्रव्रजिताः, निरतिचारं चारित्रं च प्रपन्नाः । मोक्षे गताः

❋ ❋ ❋

त्यज ममतापरितापनिदानं, परपरिचयपरिणामम् ।
भज निःसङ्गतया विशदीकृतमनुभवसुखरसमभिरामम्, वि० ।।४।। [६७]

व्याख्या- *ममतापरितापनिदानं, ममता* ममत्वभावः *परि* सर्वात्मप्रदेशेषु *तापो* वियोगवेदनादिजन्यसन्तापो दुर्गत्यादिकष्टविशेषश्च परितापस्तयोः *निदानं* मुख्यहेतुर्यस्तं, *परपरिचयपरिणामं परे* स्वस्मादन्ये तेषां *परिचयः* संबन्धः स्नेहश्च तेन तद्रूपो वा यः *परिणामः* स्वभावस्यान्यथाभावो विकारो वा तं, *त्यज* स्वभावस्थभवनेन परिहर । *निःसङ्गतया विशदीकृतमभिराममनुभवसुखरसं भज ।* न विद्यते सङ्गः परवस्तुसंसर्गो यस्यासौ निःसङ्गस्तस्य भावो निःसङ्गता सर्वपरित्यागजा केवलात्मरूपता तया, *विशदीकृतं* सर्वमलपरिहारेण निर्मलीकृतं निरावरणमिति यावत् , *अभिरामं* सर्वदा सर्वप्रकारेण यो मनोहरः सन्मधुरो हृदयङ्गमस्तं, *अनुभवसुखरसं* अनुभवनमात्मस्वरूपादिसर्वस्य प्रत्यक्षकरण*मनुभवः* परिपूर्णज्ञानविलासस्तस्य तेन कृतं तद्रूपं वा यत्*सुखं* सहजानन्दस्तद्रूपो *रसो* रतिः प्रेम तद् *भज* सेवस्वेत्यर्थः ।।४।।

उक्ता हि श्रीधन्यकुमारचरित्रे श्रीज्ञानसागरसूरिविरचितरूपसेन–सुनन्दाकथा–

पृथ्वीभूषणनाम्नि नगरे कनकध्वजराजा राज्यं करोति स्म । तस्य यशोमत्यभिधाराज्ञी, सुनन्दा–अभिधापुत्री रूप–यौवन–गुणभृता–चतुःषष्टीकलासु कुशला । बालभावे महावासोपरि सख्या सह स्थितया तया कस्याऽपि इभ्यस्य गृहे दूरतः काचिद्रूप–यौवन–विनयादिगुणाऽन्वितास्त्री भर्त्रा किमप्यलीकाऽभ्याख्यानं दत्त्वा कम्बया ताड्यमाना दृष्टा पुरुषे द्वेष उत्पन्न इति तद्द्वेषेण दूना पाणिग्रहणाऽकरणप्रतिज्ञां कर्तुं लग्ना सखीभिः वारिता स्थिता । कालान्तरे यौवनवयसि प्राप्ते पुनस्तथैव आवासोपरिस्थितया तया कस्मिंश्चिद् महेभ्यावासाऽभ्यन्तरे दम्पत्योर्विलसनं दृष्ट्वा तीव्रकामोदयो जातः । सख्या शिक्षां दत्त्वाऽऽवासोपरितनभूम्या उत्तार्य गवाक्षे स्थापिता, तदवसरेऽमुकमहेभ्य–पुत्रमतिरूप–यौवन–चातुर्य–वस्त्राभरणभूषितं चतुष्पथे ताम्बूलिकहट्टे स्थितं दृष्टंवा, तस्याः तदुपरि कामरागेण व्यामोहो जातः । सखीहस्तदत्तपत्रिकाप्रमुखप्रयोगेण पूर्वोक्तव्यतिकरेण तयोर्द्वयोर्गाढस्नेहो जातः, परं मिलनाऽवसरस्तु दुष्करः । एवं मेलनार्तध्यानधृताभ्यां ताभ्यां द्वाभ्यां कियत्यपि काले गते कौमुदीमहोत्सवावसरं लब्ध्वा दवरकनिःश्रेण्याः प्रयोगेण आगमनसङ्केतः कृतः । तेन च शरीराऽपाटवमिषेण गृहाभ्यन्तरे स्थिते, त्रियामाया एकयामे गते सख्या निःश्रेणीप्रयोगः कृतः ।

तन्नगरे एको महाबलो नाम्ना दुरोदरिकोऽस्ति । तेन द्यूतक्रीडायां बहुधनं हारितं, तद्दुःखेन पीडितः परिभ्रमति । अस्मिन्नवसरे महोत्सवागमनं ज्ञात्वा चिन्तयितुं लग्नः–'अद्य रात्रौ समस्तनगरजनाः सपरिकरः बहिर्यास्यन्ति, नगरं च विजनं भविष्यति । तदवसरेऽहं नगरमध्ये कस्यापि धनिकगृहस्य प्रतिकुञ्जिकादिप्रयोगेण तालकोद्घाटनं कृत्वा धनं लास्यामि । एवं मम दुःखोद्धरणं भविष्यति' । इति ध्यात्वाऽवसरे एकप्रहररात्रिगमनसमये धनार्थं निर्गतः स परिभ्रमन् दैवात् कृतसङ्केतस्थानमागतः । तच्च दृष्ट्वा कुबुद्धिभाण्डागारिकेण ज्ञातम्–'अत्र कस्यापि सङ्केतो दृश्यते, अतोऽत्राहमपि स्वां कलां करोमि' । इति ध्यात्वा निःश्रेणी चालिता । अथ तां कम्पमानां दृष्ट्वा सख्या तत्रागत्याऽऽलापितो धूर्तः–'आगता यूयम्' ? तदा धूर्तेन 'ओम्' इत्युक्तं सख्या ज्ञातं 'स एवाऽऽगतः' । तत्र स्थितया तया तस्या वर्द्धापनिका दत्ता । तव चित्तमपि प्रसत्तिपात्रमभूत् । तदा सख्योक्तम् –'आगम्यतां स्वामिन्' ।

तदा धृष्टहृदयो धूर्तस्तयोक्तमात्रे चटितः । यावता गवाक्षान्तः पादो मुक्तस्तावता तस्मिन्नेव अवसरे सखिवृन्दागमनं दृष्ट्वा सख्या हस्तेन दीपो निर्वापितः । तद्धस्तं च गृहीत्वा सुनन्दायाः पर्यङ्के मुक्त्वा सखीवृन्दायोत्तरं दातुं गता । सखिवृन्दायोक्तम्– 'तापभयाद् दीपो निर्वापितः । अधुनैव शिरोऽर्ति काचिद् मन्दीभूता, तेन नेत्रे मिलिते, अतो गृहान्तरं गत्वा कार्यं कृत्वाऽऽगच्छतु' । इत्युक्तं श्रुत्वा सखिवृन्दं गृहान्तरं गतम् । तत्र पुनरन्धतमसि रूपसेनभ्रान्त्या तेन सह तस्याः संयोगो जातः । सखिवृन्दभयाद् लज्जया च कोऽपि वार्तालापो न कृतः । संयोगविरामे तु पुनः सखीवृन्दमागतं दृष्ट्वा सख्योक्तम्–अधुना तु त्वरितं गच्छतु भवान्' । तच्छ्रुत्वा सुरतक्रियया त्रुटितहारादीन् गृहीत्वा गतः ।

रूपसेनोऽपि यथावसरे भोगसामग्रीमादाय स्वगृहान्निर्गतः । मिलनौत्सुक्याद् हर्षभरनिभृतहृदयो–ऽनेकवार्ताकरणनिरन्तरमिलनानेकहास्यविलासादिकरणसूक्तसुभाषितसमस्यादिस्वचातुर्यप्रकटन–विविधासनादिप्रयोगपूर्वकसुरतक्रियाकरणाद्यनेकमनोरथान् कुर्वन् 'अहो ! इयं राजपुत्री ममोपरि निर्व्याजं कृमिजरङ्गवत् स्नेहं बिभर्ति, तस्मादहमपि 'यद् भावि तद् भवतु' परमनया सह आजीवितं स्नेहविरमणं न करिष्यामि' इत्याद्यनेकमनोरथार्तिसंभृतहृदयो यावदर्धमार्गमागतस्तावता एका निःस्वामिकाऽऽवासभित्तिः

परिकर्मरहिता जलवृष्ट्या शिथिलीकृता दैवात् तस्योपरि पतिता । तस्या घातेन तस्य शरीरं खण्डशो जातम् । भित्तिपतनपुञ्जाधश्च आगतं, तेन तच्छरीरं तथा गुप्तं जातं यथा कोऽपि न जानाति । मृत्वा च दुरोदरकृतसंभोगे सुनन्दाकुक्षौ गर्भतयोत्पन्नः । 'विचित्रा हि कर्मणां गतिः', ध्यातमन्यत्, जातं चाऽन्यद् । ततो मासद्वयानन्तरं गर्भचिह्नानि प्रादुर्भूतानि । तदा सख्या औषधप्रयोगेन गर्भशातनं कृतम् । रूपसेनः ततश्च्युत्वा अन्यनगरे राजमन्दिरासन्नभूमौ सर्पतयोत्पन्नः । ततः परं मात्रा सुनन्दायाऽऽशयं ज्ञात्वा पाणिग्रहणं कारितम् । बहुदानपूर्वकं विसर्जनं कृतम् । अनेन राज्ञा सहाऽत्रागता ।

एकदा स सर्पः परिभ्रमन् राजमन्दिरं प्रविष्टः सन् भ्रमति । दैवाद् राजदम्पती–आवासवाटिकायां क्रीडां कुरुतस्तत्राऽऽगतः । सुनन्दादर्शनं जातं, दर्शनाच्च मोहोदय आविर्भूतः, तेन जडीभूत एकत्र स्थितोऽनिमेषं पश्यति, हर्षं च प्राप्नोति । अस्मिन्नवसरे भयविह्वला सा सुनन्दा गृहान्तर्गमनायोत्थिता, तदा स सर्पोऽपि पृष्ठे लग्नः भ्रमति । तदा भीतया तया पूत्कारः कृतः, तदा राज्ञा सेवकैर्मारितः । मृत्वा च तस्मिन्नेव नगरे ध्वाङ्क्षो जातः । सोऽपि नाटकावसरे सुनन्दां दृष्ट्वा हर्षितः कूजति, रसभङ्गं च करोति, तेन राज्ञा मारितः । ततश्च्युत्वा हंसो जातः । सोऽपि वटवृक्षोर्ध्वस्थितस्त्वां दृष्ट्वा विह्वलो वायसाऽपराधस्थानेऽयं मारितः । मृत्वा च हरिणतयोत्पन्नः । सोऽपि आखेटके तां दृष्ट्वा मोहोदयेन गन्तुं न शक्नोति, नृत्यति च । राज्ञा हतः । तस्य मांसं पाचयित्वा सहर्षं ताभ्याम् भक्षणं कृतः ।

अथेदृशे समये सातिशयज्ञानयुक्तं मुनियुगलं भाग्येन तत्र समागतम् । मार्गे गमनं कुर्वता असमञ्जसं दृष्ट्वा एकेन मुनिना ज्ञानोपयोगेन तत्सर्वं भूतपूर्वं वर्तमानं च ज्ञात्वा अन्यमुनये प्रोक्तम्– 'पश्यतु निरर्थककर्मणां विपाकबलम् ! । अयं केवलमनोयोगविकल्पकल्पनामात्रकृतकर्मबन्धः कया रीत्या भवे भवे योगत्रिकैर्विरूपैर्वेद्यमानोऽपि न निर्जीर्यति, अकाले मरणं च प्राप्नोति ! यस्याः कृतेऽयं जीवो भवे भवे वक्तुमशक्यं कर्मक्लेशजं दुःखं वेदयति सा तु सहर्षं तस्य मांसमत्ति ! । अतो धिगस्तु असारसंसार–गतसांयोगिकभावप्रतिबन्धम्' । इत्युक्त्वा शिरो धुन्वन् मुनिरग्रतश्चलितः ।

तत्सर्वमास्थानद्वारस्थिताभ्यां दम्पतिभ्यां दृष्टम् । दृष्टा च तच्छुद्ध्यर्थं राज्ञा मुनिरालापितः– पृच्छामि केन हेतुना शिरोधूननं कृतम् ? साधुराह केनापि जन्तुना पूर्वनिबद्धकर्मोदयबलेन कुकर्म– प्रवृत्तिः कृता, परं पुण्यबलेन केनापि न ज्ञाता, सा गुरुचरणप्रसत्तेरस्माभिर्ज्ञाता । परं स जीवः स्वकृतकुकर्मवार्तां श्रुत्वा मनसा दूयेत, लज्जेत च । सम्बन्धिनश्च तां श्रुत्वा गतस्नेहा भवेयुः, द्वेषं वा परिवहेयुः, तद्दुःखेन पीडितः स जीवः शत्रुवद् द्वेषी भवेत्ः, तन्निमित्तं बहुतरं कर्म उपचिनुयात्, किं बहुना ? त्यक्तसम्बन्धोऽपि भवेत् । अतः कथनाद् अकथनमेव श्रेयः'' ।

इत्युक्त्वा विरते मुनौ सुनन्दा प्राह–''भगवन् ! 'पूर्वकृतकर्मोदयबलेन जीवाः कर्तव्यमकर्तव्यं च कुर्वन्ति, साधकैस्तत्र विस्मयो न कर्तव्यः, प्रत्युत अकर्तव्यस्य पश्चात्तापः कर्तव्यो यथाऽग्रे वृद्धिं न याति' । अतः सुखेन तत्कर्मोदयजनितविपाकः प्रोच्यताम्'' मुनिनाऽपि यथातथं सर्वम् प्रोक्तं ।

एवं मुनिराजोक्तं श्रुत्वा राजा राज्ञी सर्वेऽपि च निकटस्थाः सभ्या वैराग्यं प्राप्ताः सुनन्दाऽपि बादरस्थूलानि अश्रुणि मुञ्चन्ती साधूनभिवन्द्य विज्ञप्तिं कर्तुं लग्ना–'हे दयानिधे ! दुर्भाग्याया दुःशीलायाः कुकर्मकरणैकतत्पराया बहुलपापभरभारिताया मम का गतिर्भविष्यति । कथमीदृशं प्रायश्चित्तं केनोपायेन स्फेटयिष्यामि ? कृपां कृत्वा तदुपायं प्रसादीकरोतु भवान्' । मदर्थं क्लेशं सहमानो रूपसेनजीवो मृगभवाच्च्युतः कुत्रोत्पन्नः' ?

साधुराह–विन्ध्याऽटव्यां सुग्रामनाम्नि ग्रामे सीमासमीपगहनवने करिण्याः कुक्षौ हस्तित्वेनोत्पन्नोऽस्ति' । पुनः सुनन्दा प्राह–'भगवन् ! कदाप्यस्योद्धारो भविष्यति' ? मुनिराह–'तव मुखाद् निजभवसप्तकविडम्बनां श्रुत्वा जातिस्मरणं भविष्यति । त्वत्तो धर्मं लब्ध्वा तपांसि कृत्वा समाधिना मृत्वा सहस्रारे देवो भविष्यति, ततश्च्युत्वा सेत्स्यति । अतस्त्वं दीक्षाऽङ्गीकरणेन भवं सफलं कुरु' । गुरुणाऽपि श्लाघयित्वा सपरिकरस्य राज्ञो भवोद्विग्नायाः सुनन्दायाश्च दीक्षा शिक्षापूर्विका दत्ता । सुनन्दा तु महत्तरार्याप्रवर्तिनीसमीपे स्थापिता । साऽपि तत्र श्रुताऽभ्यासं शक्त्यनुरूपं तपश्च करोति ।

अथ सुनन्दा साध्वी अतिवैराग्यरङ्गरञ्जितहृदयाऽत्युत्कटतपोबलेन अवधिज्ञानमुत्पाद्य महताऽऽह्लादेन संयमं निरतिचारं निर्वहति । तदा सुनन्दया महत्तराया आज्ञां लात्वा चतसृभिः साध्वीभिः सह विहारः कृतः । क्रमेण सुग्रामग्रामं प्राप्ता ।

अथ तत्र ग्रामासन्नपर्वतगहनवनेषु स रूपसेनजीवो हस्तित्वेनोत्पन्नो निवसति । अथाऽन्यदा सुनन्दाऽऽर्यया ज्ञानबलेन ज्ञातम्–'कल्ये प्रभाते सीमायां ग्रामनिकटे हस्त्यागमनं भविष्यति' । इति सम्प्रधार्य प्राभातिकप्रतिलेखनां कृत्वा विचारभूमिगमनमिषेण एकया अन्यसाध्व्या सह निर्गता ।

हस्तिनाऽपि आर्या दृष्टा, सामान्यमनुष्यभ्रान्त्या धावितः । यावता निकटमागतः, उभयोर्दृग्मेलनं संजातं, तावता तु पुनर्मोहोदयो जातः । कोपस्तु शान्तिमापन्नः । तत्र स्थितो परिभ्रमति, मनसि चाह्लादमाप्नोति । तदा साध्व्योक्तम्–''भो रूपसेन ! बुध्यस्व बुध्यस्व, कथं मोहमूढो दुःखं प्राप्नुवन्नपि ममोपरि स्नेहं न त्यजसि ? मदर्थं क्लेशं परिवहतः सप्त भवाः संजाताः । निरर्थकं मन्निमित्तं षट्सु भवेषु षड् वारान् मृतः, अयं सप्तमो भवः संजातः । अद्याऽपि समस्तदुःखैककारणं प्रेमबन्धनं कथं न मुञ्चसि ? प्रतिभवमनर्थदण्डेन दण्ड्यसे । यतः–

रूपसेनो गर्भगतः सर्पो ध्वाङ्क्षोऽथ हंसकः । मृगोऽपि मारितो जातो हस्ती त्वं सप्तमे भवे ॥

अतः स्नेहबन्धनं त्यक्त्वा वैराग्यं भज'' । अथ हस्ती इति साध्व्योक्तं श्रुत्वा ऊहापोहं कर्तुं लग्नः–'मया ईदृश्यवस्था कुत्राऽप्यनुभूता सम्भाव्यते' । इत्येवं चिन्तनं कुर्वतस्तदा ज्ञानावरणीयकर्मणां क्षयोपशमगुणेन जातिस्मरणं संजातम् । संज्ञिपर्याप्तकपञ्चेन्द्रियत्वात् सप्ताऽपि भवा दृष्टाः, सर्वमप्यनुभूतं सुख–दुःखं स्मृतिपथमागतम् ।

तदा वज्राहत इव क्षणं जड इव निश्चेष्टितो भूत्वा पुंनः सावधानो भूत्वा दीर्घनिःश्वासं विमुच्य हस्तगतं चिन्तामणिमिव शोचयितुं लग्नः–''हा ! मया स्नेहान्धेन कामान्धेन दृष्टिरागान्धेन च किं कृतम् ? । धन्येयं भाग्यवती, यत् कर्म बद्ध्वा, बुद्ध्वा चोद्धृता । पुनर्धन्येयम्, यया यादृशः स्नेहः कृतस्तादृशो निर्वाहितः, यथा च स्वयं स्नेहनिगडान्निर्गता तथा मामपि स्नेहबन्धनाद् मोचयितुमागता ।

ममाऽप्यधुना अस्याः शरणावलम्बनेन आयतिशुभं भविता, नान्यं कमप्युपायं पश्यामि । अत इयं यमुपायं वक्ति स मयाऽङ्गीकर्तव्य इति निश्चयः । साध्व्या ज्ञानेन तदाशयं ज्ञात्वोक्तम्–'भो रूपसेन ! कामपि चिन्तां मा कुरु । श्रीजिनाज्ञायां दृढतां कृत्वा यथाशक्त्या तपः कुरुष्व । यतस्तपोबलेनाऽनेके तिर्यग्गतौ जीवास्तीर्णाः । अतो विषयकषायवासनां विमुच्य तपस्यायां प्रवणो भव । तेन त्वं दुर्गतिपाताद् निस्तरिष्यसि' । यावज्जीवं तपोधर्मं ब्रह्मचर्यधर्मं चाराधयन्, सकलश्रुतसारं नमस्कारमहामन्त्रं च स्मरन्, निर्विघ्नायुः समाप्य, समाधिं धृत्वा सहस्रारेऽष्टादशाऽब्ध्यायुष्को देवः समुत्पन्नः । ततश्च्युत्वा विदेहे

सेत्स्यति । सुनन्दार्याऽपि राजप्रभृतीन् बहून् भव्यजीवान् प्रतिबोध्य जिनशासनोन्नतिं च कृत्वा, अतितीव्रकर्माणि क्षपयित्वा, केवलज्ञानमासाद्य, अक्षयपदं प्राप्तं ।

❋ ❋ ❋

**परेषां स्वस्य च यानमार्गोऽपि नैकोऽस्तीति दर्शयति–**

पथि पथि विविधपथैः पथिकैः सह, कुरुते कः प्रतिबन्धम् ।
निजनिजकर्मवशैः स्वजनैः सह, किं कुरुषे ममताबन्धम्, वि० ॥५॥ [६८]

**व्याख्या– *विविधपथैः पथिकैः सह पथि पथि कः प्रतिबन्धं कुरुते । विविधा* गम्यमानदिगभिप्रायस्थानादिभेदेनानेकप्रकारं प्राप्ता ये *पथा* मार्गास्तैः, *पथिकैः* पन्थानं गच्छन्तीति पथिका मार्गे गन्तारस्तैः, *सह* सार्धं *पथि पथि* भिन्ने भिन्नेऽध्वनि *कः* कस्को नैपुण्यवान् *प्रतिबन्धं* सहचारित्वं *कुरुते* विदधाति ? भिन्नमार्गगामिभिः सर्वैः सह सार्थगामित्वस्याशक्यत्वान्न कोऽपि कुरुत इति दृष्टान्तः । अथ दार्ष्टान्तिकमाह– *निजनिजकर्मवशैः स्वजनैः सह ममताबन्धं किं कुरुषे ?* तथैव *निजं निजं* आत्मीयमात्मीयं *यत्कर्म* शुभाशुभकृत्यं पुण्यपापबन्धनिष्पादककरणीयमिति यावत्, तेन *वशा* वशीकृताः स्वकर्तव्यानुरूपगतिगमने नियन्त्रिता इति यावत् तैः, *स्वजनैः सह* स्वकीयत्वेन स्वीकृता जनाः स्वजना मातृपितृभार्यादयस्तैः, *सह* सार्थवर्तित्वं, *किमिति* प्रश्ने । *किं कुरुषे?* कर्तुं शक्नोषि ? न कथमपि कर्तुं शक्नोषि । तर्हि तैः सह *ममताबन्धं* एते मदीया इति बुद्धिं, *किं* कस्मात् कुरुषे ? मा कुर्वित्यर्थः ॥५॥**

उक्तं श्री प्रबन्धपञ्चशतल्यां निर्मोहकुटुम्ब कथा–

सुस्थितग्रामे गोपालकुटुम्बी वसति, तस्य प्रिया गुणवती, पुत्रः कालकः, वधूटी कामदेवी सर्वेऽपि विरहासहाः सुस्नेहमानसाः एकत्रैव तिष्ठन्ति स्म, न विदेशं गच्छन्ति च । अन्येद्युस्तत्रागतः श्रीधर्मघोष – सूरिपार्श्वे संसाराऽसारतां श्रुत्वा अनित्यतां भावयन्ति स्मेति –

एगोहं नत्थि मे कोइ, नाहमन्नस्स कस्सई । एवमदीणमणसो, अप्पाणमणुसासई ॥

अन्यदा वर्षाकाले हलखेटने गते तत्र पितृमातृवध्वाद्याः समाजग्मुः । अत्रान्तरे स्वर्गे कोऽपि देवोऽन्यदेवं प्रति प्राह–अधुना यादृशं गोपालकुटुम्बं निर्मोहं मिथोऽस्ति तादृशमन्यन्न दृश्यते ततस्तत्रैत्य तौ देवौ मनुष्यरूपं कृत्वा गतौ । एकः सर्परूपं कृत्वा–हलं खेटयन्तं पुत्रं दशति स्म । पुत्रेऽचेतनीभूते यदा पित्रादयः शोकरोदनादि न कुर्वते, तदा अपरो देवो मनुष्यरूपभृत्प्राह–भो भो गोपालादयः बालके मृतेऽपि भवद्भिः कथं न रुद्यते पिता प्राह तदा–

अनाहूतोऽऽमया यातो, न मया प्रेषितो गतः । यथाऽऽयातस्तथा यातः का तत्र परिवेदना ॥

जननी प्राह–

एकवृक्षसमारूढा, नानारूपा विहङ्गमाः । प्रातर्दिशो दिशं यान्ति, का तत्र परिवेदना ॥

कलत्रं परिजगौ–

पृथक्पृथक्स्थिते काष्ठे, अपरे तटिनीपतौ । संयुज्येते वियुज्येते का तत्र परिवेदना ॥

ततस्तौ देवौ प्रकटीभूय निर्विषीकृत्य पुत्रं निर्मोहमिदं कुटुम्बमिति व्यावर्ण्य स्वस्थाने गतौ ।

❋ ❋ ❋

अथ पौद्गलिकेषु प्रेमबन्धपरिहाराय समुपदिशति–

प्रणयविहीने दधदभिष्वंङ्गं [भिषंगं] सहते बहुसन्तापम् ।
त्वयि निःप्रणये पुद्गलनिचये, वहसि मुधा ममतातापम्, वि० ॥६॥ [६९]

व्याख्या– योऽज्ञः *प्रणयविहीनेऽभिष्वङ्गं दधत् स बहुसन्तापं सहते प्रणयः* स्नेहः प्रीतिरिति यावत्, तेन *विहीने* विशेषेण रहिते स्त्र्यादिजने *अभिष्वङ्गं* भोगाद्यभिलाषं *दधत्* कुर्वन् जनः *बहुसन्तापं* बहुरतिप्रचुरः प्राणघातादिविधायी लङ्केशादिवत् *सन्तापः* कष्टराशिस्तं, *सहते* भुङ्क्ते । तथा त्वमपि *त्वयि निःप्रणये पुद्गलनिचये ममतातापं मुधा वहसि । त्वयि* त्वद्विषये तवोपरीति यावत्, *निःप्रणये* निषिद्धः शून्यतां प्राप्तः प्रणयः प्रेमा यस्मात्स तथा तस्मिन्, *पुद्गलनिचये पुद्गलानां* हेमरत्नदेहशब्दादीनां *निचयो* राशिस्तस्मिन्, *ममतातापं* मदीयत्वपरिणामेनोत्पादितं *तापं* कष्टवृन्दं *मुधा* स्वार्थं विनैव *वहसि* प्राप्नोषीत्यर्थः ॥६॥

एतदुपरि आङ्ग्लदेशस्थमिडासनृपकथा लिख्यते–

आङ्गलदेशे 'मिडास' नामा राजा राज्यं करोति स्म । राजा अतीव सम्पन्नो लोभीच । येन केन प्रकारेण स्वकोशवृद्धये एव चित्तविलग्न आसीत् । तदर्थे देवानुष्ठानादिप्रवृत्तिं करोति स्म । तया प्रवृत्या एकदा एकदेवता प्रसन्नीभूय तस्मै वरो मार्गितुं कथितवान् । तेन लोभिना उक्तं 'यत् किञ्चित् स्पृशामि तत् सर्वं स्वर्णं भवतु, 'तथाऽस्तु' इति प्रत्युक्त्वा देवोऽपि तिरोभूतः ।

अथ सः सञ्जातहर्षः यत् तत् सर्वम् हस्तेन स्पृष्टवा स्पृष्टवा पास्पृश्य स्वर्णीकर्तुम् लग्नः । सर्वं स्वर्णमयं पश्यन् हृदये हर्षातिरेको जातः । कियत् घट्यान्तरे सः क्षुधातुरो जातः । सूपकारैः नानाविध–स्वादुभोज्यसाम्रगी तस्याग्रे ढौकिता । जिघृक्षया उपविष्टः । किन्तु यावद् भोजनं स्पृशति तावत् सर्वं स्वर्णमयं जातम् । एतत् दृष्ट्वा सर्वेषां महदाश्चर्यं बभूव । राजा ग्लानमुखी बभूव ।

तदैव तस्य बालपुत्रः क्रीडाकर्तुमनाः अङ्के न्यपतत् । राज्ञा वात्सल्यतया तस्य शिरः स्पृष्टः । दुर्दैवात् सो बालोऽपि जडस्वर्णीभूतः । अतीव विषण्णो राजा भृशं रुरोद पुनर्देव आराधितः । तेन कथितं 'इदं तु त्वदभीष्टं एव । किं परावर्तुं इच्छसि ? तेन प्रतिकथितं–मया लोभफलं प्रत्यक्षम् अनुभूतं । तेन मत्कुमतिः निवर्तिता । देवेनाऽपि 'तथैवाऽस्तु' यावत् कथितं तावत् सर्वं पूर्ववद् जातम् ।

❋ ❋ ❋

त्यज संयोगं नियतवियोगं, कुरु निर्मलमवधानम् ।
न हि विदधानः कथमपि तृप्यसि मृगतृष्णाघनरसपानम्, वि० ॥७॥ [७०]

व्याख्या– हे आत्मन् ! *नियतवियोगं संयोगं त्यज । नियतो* निश्चितो *वियोगो* विनाशो भवति स नियतवियोगस्तं, *संयोगं* अमिलितयोर्मीलनं संयोगः संबन्धस्तं, *त्यज* परिहर । *निर्मलं* पराशंसादिदोषमल–रहितमीदृश*मवधानं* विनिवृत्तत्वेन निर्विकारमनोभावैकाग्र्यं *कुरु* रचय । अन्यथा त्वं सांसारिकैः सुखैः *मृगतृष्णाघनरसपानं विदधानोऽपि कथं तृप्यसि ।* निदाघकाले मध्याह्नेऽजले दृश्यमानो जलभ्रमो *मृगतृष्णा* तस्यां *घनं* प्रचुरं *रसपानं* पयःपानं *विदधानोऽपि* कुर्वाणोऽपि *कथं* केनोपायेन कियता कालेन *तृप्यसि* वितृष्णो भवसीत्यर्थः ॥७॥

उक्तं च आवश्यकनिर्युक्तौ वणिक्कथा –

द्वे मथुरे– दक्षिणोत्तरा च, तत्रोत्तरस्या वणिग् दक्षिणां गतः, तत्र एको वणिक् तत्प्रतिमः, तेन तस्य प्राघूर्ण्यं कृतं, तदा तौ निरन्तरं मित्रे जातौ, आवयोः स्थिरतरा प्रीतिर्भविष्यतीति यद्यावयोः पुत्रो दुहिता वा जायते तदा संयोगं करिष्यावः, तदा दाक्षिणात्येनौत्तरस्य दुहिता वृता, दत्ता बालिका । अत्रान्तरे दक्षिणमथुरावणिक् मृतः, पुत्रस्तस्य तस्मिन् स्थाने स्थितः, अन्यदा स स्नाति, चतुर्दिशं चत्वारः सौवर्णिकाः कलशाः स्थापिताः, तेभ्यो बहिः रौप्यकाः, तेभ्यो बहिस्ताम्रास्तेभ्यो बहिः मार्त्तिकाः, अन्यश्च स्नानविधी रचितः, ततस्तस्य पूर्वस्या दिशः सौवर्णः कलशो नष्टः, एवं चतुर्दिग्भ्योऽपि, एवं सर्वे नष्टाः, उत्थितस्य स्नानपीठमपि नष्टं, तस्याधृतिर्जाता, नाटकीया वारिताः, यावद्गृहं प्रविष्टस्तदोपस्थितो भोजनविधिः, तदा सौवर्णरूप्यमयानि रचितानि भाजनानि, तदा एकैकं भाजनं नष्टुमारब्धं, तदा स प्रेक्षते नश्यन्ति, यापि च तस्य मूलपात्री साऽपि नष्टुमारब्ध, तदा तेन गृहीता, यावद्गृहीतं तावत्स्थितं, शेषं नष्टं, तदा गत श्रीगृहं पश्यति, सोऽपि रिक्तः, यदपि निधानप्रयुक्तं तदपि नष्टं, यदप्याभरणं तदपि नास्ति, यदपि वृद्धिप्रयुक्तं तेऽपि भणन्ति–त्वां न जानीमः, योऽपि दासीवर्गः सोऽपि नष्टः, तदा चिन्तयति–अहो अहमधन्यः, तदा चिन्तयति–प्रव्रजामि, प्रव्रजितः । स्तोकं पठित्वा हिण्डते तेन खण्डेन हस्तगतेन कौतूहलेन, यदि प्रेक्षेय, विहरन् उत्तरमथुरां यावत्त आगताः कलशाः, तदा स तैरेव प्रमङ्क्तः, तदा भोजनवेलायां तदेव भोजनभाण्डमुपस्थितं यथापरिपाटि च स्थितं, ततः सोऽपि साधुस्तद्गृहं प्रविष्टः, तत्र तस्य सार्थवाहस्य दुहिता प्रथमयौवने वर्तमाना व्यजनं गृहीत्वा तिष्ठति, तदा स साधुस्तद् भोजनभाण्डं प्रेक्षते, सार्थवाहेन भिक्षा आनायिता, गृहीतायामपि तिष्ठति, तदा पृच्छति–किं भगवन् ! एतां चेटीं प्रलोकयति ? तदा स भणाति–न मम चेट्या प्रयोजनं, एतत् भोजनभाण्डं प्रलोकयामि, ततः पृच्छति–कुत एतस्य तवागमः ?, स भणति–आर्यकप्रार्यकागतं (पितृपितामहागतं), तेन भणितं–सद्भावं कथय, तेन भणितं–मम स्नायमानस्यैवमेव स्नानविधिरुपस्थितः, एवं सर्वोऽपि जेमनभोजनविधिः, श्रीगृहाण्यपि भृतानि, निखातानि दृष्टानि, अदृष्टपूर्वाश्च धारका आनीय ददति, साधुर्भणति–एतन्ममासीत् तेन पृष्ट कथम् ?, तदा कथयति–स्नानादि, यदि न प्रत्येषि (यदा न प्रत्यगात्) तदाऽनेन तद्भोजनपात्रीखण्डं ढौकितं, झटिति लग्नं, पितुश्च नाम कथयति, तदा ज्ञातं यथा एष स जामाता, तदोत्थायालिङ्ग्य प्ररुदितो भणति–एतत् सर्वं तदवस्थं तिष्ठति, एषा त्वया पूर्वं दत्ता चेटी प्रतीच्छेति, स भणति–पुरुषो वा पूर्वं कामभोगान् विप्रजहाति, कामभोगा वा पूर्वं पुरुषं विप्रजहति, तदा सोऽपि संवेगमापन्नो मामप्येवमेव विप्रहास्यन्तीति। प्रव्रजितः ।

❋ ❋ ❋

**अन्यत्वभावनामुपसंहरन्नाह–**

भज जिनपतिमसहायसहायं, शिवगतिसुगमोपायम् ।
पिब गदशमनं परिहृतवमनं, शान्तसुधारसमनपायम्, वि० ॥८॥ [७१]

**॥ इति श्रीशान्तसुधारसगेयकाव्येऽन्यत्वभावनाविभावनो नाम पञ्चमः प्रकाशः ॥**

**व्याख्या– हे आत्मन् !** *असहायसहायं जिनपतिं भज । असहायः* **स्वामिधनकुटुम्बपुण्योदयाद्याश्रय-रहितास्तेषामपि सहायः सद्धर्मप्रापणेन स्वर्गमोक्षादिसद्गतिविश्रामदस्तं,** *जिनपतिं* **जिनेश्वरं** *भज* **भक्तिं**

सेवां कुरु । तमेव *शिवगतिसुगमोपायं शिवो* मोक्षः स एव *गतिः* गम्यमानत्वाद्विश्रान्तिस्तस्याः *सुगमो*ऽनायासेन साधक *उपायः* फलप्राप्तेः साधनरूपं तं, *अनपायं परिहृतवमनं गदशमनं शान्तसुधारसं पिब, अनपायं* विनाशवर्जितं, *परिहृतं* दूरीकृतं *वमनं* विकाररूपा वान्तिर्येन तं, *गदाः* सर्वे द्रव्यभावभेदभिन्ना रोगास्तेषां *शमनं* महौषधं प्रोक्तप्रभावं *शान्तसुधारसं पिब* समास्वादस्वेत्यर्थः ।।८।।

उक्तं च उपदेशप्रासादे क्षुल्लककथा–

चम्पायां सिंहसेनो राजा, तस्या राहुगुप्तो मन्त्री, स चार्हद्धर्मवासितः । एकदा नृप आस्थानस्थो धर्मविचारं प्रश्नयति, तदा यो यस्याभिमतः स तमुवाच । तत्र केचिदेकान्तहिंसया केचिदात्मारामापीडया यथेच्छभोगादिना केचिन्निःस्पृहभावेनेत्यादिस्वस्वमतिकल्पनादिना धर्मं स्थापयन्ति । तन्निशम्य मन्त्री तूष्णींभावं भजमानो राज्ञोक्तः–भवान् किमिति धर्मनिर्णयवाक्यं न ब्रूते ? । स प्राह–किमेभिः पक्षपातवचोभिः ? विमृश्योक्ति–युक्तिप्रश्नोत्तरं प्राप्यात्मनैव परीक्षा कर्तुमुचिता ततो राजानुमत्या ''सकुण्डलं वा वदनं न वेति'' अयं गाथापादो नगरमध्ये आललम्बे, संपूर्णगाथा भाण्डागारेऽस्ति, नगर्यां व्युद्घुष्टं यथा य एनं गाथापादं पूरयिष्यति, तस्य राजा यथेप्सितं दानं दास्यति, तद्भक्तश्च भावी । तं गाथापादं सर्वेऽपि प्रवादुकाः पेठुः । सप्तमेऽहनि राजा सभायां स्थितः, तत्रादावेव परिव्राड् ब्रवीति–

भिक्खापविट्ठेण मएऽज्जन दिट्ठं, पयमामुहं कमलविसालनेत्तं ।
वक्खित्तचित्तेण न सुट्ठुदिट्ठं, सकुण्डलं वा वदनं न वेति ।।

एतच्छ्रुत्वा मन्त्री नृपं प्राह–स्वामिन् ! नायं पारमार्थिकधर्मज्ञायकः, यतोऽपरिज्ञाने व्याक्षेपकारणमुपन्यस्तं, न पुनर्वीतरागतेत्यशनाप्राप्तौ तू पोषणफलं नाप्यते, मूलगाथातो विसंवादार्थसमन्वितोऽसाविति विभाव्य तिरस्कृत्य नृपेण निर्घाटितः ।

पुनः तापसाः पठन्ति –

फलोदगेणम्मि गिहे पविट्ठो, तत्थासणत्था पमया निरिक्खिया ।
वक्खित्तचित्तेण न सुट्ठु दिट्ठं, सकुंडलं वा वदनं न वेति ।।

नृपमन्त्रिणौ तन्निशम्य दध्यतुः–अत्राप्यनेन स्वकार्यव्यग्रत्वमज्ञानकारणं सूचितं, न पुनस्तत्त्वार्थः । तदनन्तरं शौद्धोदनिकशिष्य आह–

मालाविहारे मइ अज्ज दिट्ठा, उवासिआ कंचणभूसिअंगी ।
वक्खित्तचित्तेण न सुट्ठु दिट्ठं, सकुंडलं वा वदनं न वेति ।।

इति श्रुत्वा तौ दध्यतुः–अत्रापि स्त्रीनेपथ्यनिरीक्षणव्यग्रत्वं ज्ञातं, न पुनर्ज्ञानतत्त्वम् । अनया दिशा सर्वेऽपि तीर्थिका वाच्याः । आर्हतस्तु न कश्चिदागत इति राज्ञाऽभाणि । मन्त्रिणा चार्हतः क्षुल्लकोऽप्येवंभूतपरिणाम इति नृपस्य परिणामः स्यादित्यतो भिक्षार्थं प्रविष्टः क्षुल्लकः समानीतः । तेनापि गाथापादं गृहीत्वा गाथा बभाषे, तद्यथा–

खंतस्स दंतस्स जिइंदियस्स, अज्झप्पओगे गयमाणसस्स ।
किं मज्झ एएण विचिंतिएणं, सकुंडलं वा वदनं न वेति ।।

अत्र च क्षान्त्यादिकमपरिज्ञाने कारणमुपन्यस्तं, न पुनर्व्याक्षेपः, इत्यतो गाथासंवादने

क्षान्तिदमजितेन्द्रियत्वाध्यात्मयोगाधिगतेश्च कारणाद्राज्ञो धर्मपृच्छोल्लासोऽभूत् । क्षुल्लकेन धर्मप्रश्नोत्तरकालं पूर्वगृहीतशुष्केतरगोलकद्वयं भित्तौ निक्षिप्य गमनमारेभे । पुनर्गच्छन् राज्ञोक्तः–किमिति भगवन् ! धर्मं पृष्टोऽपि न कथयसि ? स चावोचत्–हे मुग्ध ! ननु कथित एव धर्मो ज्ञेयः शुष्केतरगोलकदृष्टान्तेन । एतदेव गाथाद्वयेनाह–

उल्लो सुक्को अ दो छूढा गोलया मट्टिआ मया ।
दोवि आविसआ कुड्डे जो उल्लो तत्थ लग्गइ ।।

अयमत्र भावार्थः–आत्मपरमात्मरूपनिरक्षणव्यासङ्गात् कामिनीनां बाह्यात्मनां मुखं न पश्यन्ति,तदभावे तु पश्यन्ति, ये कामगृद्धास्ते सार्द्राः, सार्द्रतया च पङ्के कर्मकर्दमे वा लगन्ति, ये तु क्षान्त्यादिगुणोपेताः संसारसुखपराङ्मुखा मुनयस्ते शुष्कगोलकसन्निभा न क्वचिल्लगन्ति ।

एवं लगंति दुम्मेहा ज नरा कामलालसा ।
विरता उ न लग्गंति जहा से सुक्कगोलए ।।
जह खलु झुसिरं कट्ठं सुचिरं मुक्कं लहुं डहइ अग्गी ।
तह खलु खवंति कम्मं सम्मं चरणट्ठिया साहू ।।

इति श्रुत्वा नृपः प्रबुद्धो मन्त्रिणः पुरोऽजस्रं मुनिक्षुल्लकधर्मं शशंस । इत्यादियुक्त्या राहुगुप्तेन नृपो यथार्थधर्मरतः कृतः । तथाऽन्यैरपि विधेयमिति ।

**।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणिसतीर्थ्यतिलक–मुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां श्रीशान्तसुधारसटीकायामन्यत्व–भावनाविभावनो नाम पञ्चमः प्रकाशः समजनि ।।**

❀ ❀ ❀

## ॥ षष्ठः प्रकाशः ॥

पञ्चमप्रकाशेऽन्यत्वभावना प्रोक्ता । तया भावितात्मा शरीरादिषु निर्ममत्वेनाशुचित्वं वेत्तीत्यनेन संबन्धेनायातामशुचि–भावनामाह । तस्या अयमादिमः श्लोकः–

( शार्दूलविक्रीडितं वृत्तम् )

सच्छिद्रो मदिराघटः परिगलत्–तल्लेशसंगाशुचिः
शुच्यामृद्य मृदा बहिः स बहुशो धौतोऽपि गङ्गोदकैः।
नाधत्ते शुचितां यथा तनुभृतां कायो निकायो महा–
बीभत्सास्थिपुरीषमूत्ररजसां नायं तथा शुद्ध्यति॥१॥[७२]

व्याख्या– *यथा सच्छिद्रो मदिराघटः परिलगत्तल्लेशसङ्गाशुचिः स बहिः शुच्या मृदा आमृद्य गंगोदकैः बहुशो धौतोऽपि शुचितां नाधत्ते, तथाऽयं महाबीभत्सास्थिपुरीषमूत्ररजसां निकायस्तनुभृतां कायो न शुध्यति ।* भो भव्य ! *यथा* येन प्रकारेण *छिद्रै*र्लघुरन्ध्रैः सह वर्तत इति *सच्छिद्रः* परितः सूक्ष्मैस्तैर्युक्तः इति यावत्, *मदिराघटः*, *मदिरा* सुरा तया भृतो *घटः* कुम्भ इति मध्यमपदलोपी समासः, *परिगलत्तल्लेशसङ्गाशुचिः*, *परि* दिग्विदिग्भ्यः सर्वतो *गलन्तः* स्रवन्त*स्तल्लेशा* मदिरावयवा बिन्दव इति यावत्, तेषां सङ्गो लेपारूढसंयोगः तस्मादशुचिरपवित्रः, *स* ईदृशो मदिराघटो बहिः कपालाधोभाग–ग्रीवादिप्रदेशेषु, *शुच्या मृदा आमृद्य*, *शुचिः* सुगन्धसुवर्णसुरसवती पवित्रा तया, *मृदा* मृत्तिकया *आमृद्य* पुनः पुनर्मर्दयित्वा, *गङ्गोदकै*र्विमलगङ्गाजलैः, *बहुशो* भूयो भूयोऽनेकवारं, *धौतोऽपि* प्रक्षालितोऽपि, *शुचितां* पावित्र्यं, *नाधत्ते* न धारयति । *तथा* तेनैव प्रकारेण, *अयं* साक्षाद्दृश्यमानः, *महाबीभत्सास्थिपुरीषमूत्ररजसां निकायः*, *महती बीभत्सा* जुगुप्सा येषां दर्शनादिषु ते *महाबीभत्सा* दुर्गञ्छनीया इति यावत्, *अस्थीनि* कीकसाः, *पुरीषं* विष्ठा, *मूत्रं* प्रस्रवणं, *रजो* रुधिरं वीर्यं च तेषामस्थिपुरीषमूत्ररजसां *निकायो* राशिरशुचिपुञ्ज इति यावत्, *तनुभृतां* प्राणिनां *कायो* देहः कृते पूर्वोक्तप्रयत्नेऽपि *न शुध्यति* शुचिर्न भवतीत्यर्थः ॥१॥

उक्तं च कथारत्नाकरे इदं गोविन्दस्य कथानकम्–

विष्णुस्थले परमश्राविका गोमती सार्थवाही, तस्याश्च परममिथ्यादृष्टिर्गोविन्दः सुतः, मात्रा जैनं धर्मं प्रतिबोधितोऽपि पुत्रश्चन्द्रः कलङ्कमिव मिथ्यात्वं नाऽत्याक्षीत् ।एकदा तीर्थयात्रायां यातुमुद्यतं तं माता स्माह, हे वत्स ! लौकिकतीर्थयात्रया जन्मनः फलं नाऽऽप्यते, किन्तु धनव्ययादिक्लेश एव । किञ्च गङ्गा–गोदावरी–सरस्वती–यमुना–त्रिवेणीसङ्गमे जल–दर्भ–मृत्तिकादिस्नानेनाऽऽत्मनः प्राणातिपात–मृषावादादि–सम्भवमालिन्यं न यातीति बहु शिक्षितोऽप्यसौ यदा न न्यवर्तत, तदा तत्प्रतिबोधनाऽभिप्रायेण सा चैकां कटुकां तुम्बिकां तत्करे दत्त्वैवमूचे–हे पुत्र ! यत्र यत्र तीर्थे येन येन विधिना त्वया स्नानं विधीयते तत्र तत्र तीर्थे तेन तेन विधिना अस्यास्तुम्बिकाया ( अपि ) स्नानं कारणीयमिति मदुक्तं विधेयमिति मात्रोक्तमङ्गीकृत्य यथारुचितेषु तीर्थेषु च गत्वा मात्रोक्तं विधाय च मुण्डितमुण्डः,

प्रभूतमुद्राऽङ्कितबाहुदण्डः स महोत्सवपुरस्सरं स्वपुरमागात् । गङ्गादिभ्योऽपि सर्वतीर्थेभ्यो जननी–जनकौ परमं तीर्थमिति ध्यात्वा विनयेन स मातुः पादौ प्रणम्य यथाऽभिहितविहिततुम्बिकाव्यतिकरं चाऽभिधाय भोक्तुमुपविष्टस्य तस्य स्थाले तस्यास्तुम्बिकायाः शाकं विधाय माता पर्यवेषयत् । सोऽपि तं शाकमास्वाद्य–अहो ! अखाद्यं विषभूतं चेति वदन्तं च तं माता बभाण हे पुत्र ! त्वमित्थं मा वादीः या तुम्बिका भवता तीर्थजलैः स्नपिता, तस्या अपि शाके कटुकत्वं कुतः ? तेनोक्तं हे मातर्जलैर्मज्जितताया अपि तुम्बिकाया अन्तरङ्गं कटुकत्वं कथं याति ?, मात्रोक्तम्–हे वत्स ! जलैः स्नपितताया अप्यस्याः कटुकत्वदोषो न गतस्तदा हिंसा–मृषावाद–स्तेय–मैथुनादिजनितमान्तरमात्मनि लग्नमघजालं जलस्नानेन कथं यातीति मात्रोक्तं सत्यं मत्वा गोविन्दो मात्रा सह धर्मघोषगुरोः पार्श्वे श्रावकधर्ममङ्गीकृत्य प्रपाल्य च द्वादशे देवलोके सुरः समजनि ।

❋ ❋ ❋

**भूयोऽपि शरीरं शुचीकर्तुमशक्यमेवेत्युपदिशति–**

**( मन्दाक्रान्तावृत्तम् )**

स्नायं स्नायं पुनरपि पुनः स्नान्ति
शुद्धाभिरद्भि–र्वारंवारं बत मलतनुं चन्दनैरर्चयन्ते ।
मूढात्मानो वयमपमलाः प्रीतिमित्याश्रयन्ते,
नो शुध्यन्ते कथमवकरः शक्यते शोद्धुमेवम् ॥२॥[७३]

**व्याख्या– *मूढात्मानः* शरीरपावित्र्यकृते मोहिता मूर्ख-शिरोमणयः, *स्नायं स्नायं* स्नात्वा, *शुद्धाभिरद्भिः*, *शुद्धाभि*र्निर्मलैः *अद्भि*र्जलैः कृत्वा । *पुनरपि पुनः* पूर्वं कृतस्नाना अपि भूयोऽपि भूयः स्नान्ति मज्जनं कुर्वन्ति । *मलतनुं* तथा मलस्य विष्टायाः पुञ्जभूतं *तनुं* देहं, *बते*ति खेदे हा कष्टं, *वारंवारं* प्रतिवासरं अनेकशः, *चन्दनैः* सुगन्धिश्रीखण्डद्रवैः, *अर्चयन्ते* विलेपनपूजां विधीयन्ते । तथाकरणेन च *अपमला वयमिति प्रीतिमाश्रयन्ते । अपमला* नष्टमला *वयं* पवित्राः स्म इति इत्येवंविधां *प्रीतिं* प्रेमविशेषं *आश्रयन्ते* भजन्ते । तथापि *नो शुध्यन्ते* पवित्रा नो जायन्ते बहिरन्तर्मलपूरितत्वात् । *अवकरः* सङ्करः *एवमुक्त*प्रकारेण भूतः *कथं* केनोपायेन *शोद्धुं* शुचित्वमाधातुं *शक्यते* ? न कथमपीत्यर्थः ॥२॥**

उपदेशप्रासादे कालीदेवीकथानकम् एतद्विषये कथ्यते–

राजगृहे श्रीवीरं प्रणम्य श्रेणिकादिपर्षत् स्थिताऽस्ति । तदा चमरेन्द्राग्रमहिषी कालीदेवी सर्वर्द्ध्या श्रीवीरं नत्वा सूर्याभदेववन्नृत्यं वितत्य स्वभुवने गता । ततस्तत्प्राग्भवस्वरूपं गणभृता पृष्टः श्रीवीरः स्माह–आमलकल्पावसिकालगृहस्थपुत्री कालीनामा कुमारिकाऽस्ति । तया पितरावापृच्छ्य वैराग्येण श्रीपार्श्वनाथ–पार्श्वे दीक्षा गृहीता । प्रभुणा साध्वीपुष्पचूलायै शिष्यां कृत्वा दत्ता । सामायिकादीन्येकादशाङ्गान्य–धीत्य तत्पार्श्वे संयमतपोभिरात्मानं भावयति । अन्यदा मलपरीषहसहनेऽक्षमा हस्तौ पादौ मुखं शिरः स्तनान्तरं कक्षान्तरं जलेन प्रक्षालयति, यत्र स्वाध्यायं करोति तत्र प्राग् जलेन भूशुद्धिं करोति । तद्वीक्ष्य महत्तरयेति शिक्षा कृता–''न घटते निर्ग्रन्थनिर्ग्रन्थीनां देहादिधापनम्, अतोऽत्र स्थाने प्रायश्चित्तं भवति । परन्तु सा

निरङ्कुशा स्वच्छन्दवृत्त्या जलेनाङ्गशुद्धिं तनोति । इत्थं बहुवर्षाणि यावत्संयमं प्रपाल्य पञ्चदशदिनसंलेखनायामपि तत्पापस्थानमनालोच्याप्रतिक्रम्यासुरकुमारदेवत्वमलभत ।

❋ ❋ ❋

## अथ दृष्टान्तपूर्वकं शरीरे शुचित्वं कृतज्ञत्वं च संप्रापयितुमशक्यमिति भावयन्नाह–

( शार्दूलविक्रीडितं वृत्तम् )

कर्पूरादिभिरर्चितोऽपि लशुनो, नो गाहते सौरभं,
नाजन्मोपकृतोऽपि हन्त पिशुनः, सौजन्यमालम्बते ।
देहोऽप्येष तथा जहाति न नृणां, स्वाभाविकीं विस्रतां,
नाभ्यक्तोऽपि विभूषितोऽपि बहुधा, पुष्टोऽपि विश्वस्यते।।३।।[७४]

व्याख्या– *हन्तेति* कोमलामन्त्रणे हे मन्दमतिचेतन ! यथा *लशुनः कर्पूरादिभिरर्चितोऽपि सौरभं नो गाहते*, *लशुनो* दुर्गन्धिकन्दविशेषो लोकप्रसिद्धः, स *कर्पूरादिभिः* कर्पूरो घनसार आदिपदादम्बरागर–कुङ्कुममृगमदादयो ग्राह्याः *तैरर्चितोऽपि* वासितोऽपि, *सौरभं* सुगन्धिभावं *नो* नैव *गाहते* व्याप्तो भवति । यथा च *आजन्मोपकृतोऽपि पिशुनः सौजन्यं नालम्बते* । *आजन्म* जन्मदिनादारभ्य मरणावसानं याव*दुपकृतोऽपि* भोजनाच्छादनविद्याद्रविणदानादिना पालितोऽपि *पिशुनो* दुर्जनः खलपुरुष इति यावत्, *सौजन्यं* स्वहृदयगतयथार्थसद्भावप्रकाशक आर्जववान् जनः सुजनस्तद्भावः कर्तव्यता वा सौजन्यं सर्वत्र सन्मैत्री *तन्नालम्बते* हृदयगूढतापरिहारपूर्वकं न स्वीकुरुते । तथा *नृणां* मनुष्याणां, *एष* प्रत्यक्षं दृश्यमानः, *देहोऽपि* शरीरमपि *स्वाभाविकीं* सहजामकृत्रिमां विस्रतां आमगन्धितां दुर्गन्धितामिति यावत्, *न जहाति* न त्यजति । तथा*ऽभ्यक्तोऽपि* नानाजातीयसुगन्धिभिर्विलिप्तोऽपि *विभूषितोऽपि* विविधवस्त्राभरणैः शृङ्गारितोऽपि *बहुधा पुष्टोऽपि*, बहुधाऽतिशयेन पुष्टः सरसभोजनादिभिरुपचितबलपिण्डोऽपि पूर्वोक्तसर्वप्रकारेणोपचरितोऽपीदमस्मदीयमेव स्थास्यति चेति, *न विश्वस्यते* न विश्वासे स्थीयत इत्यर्थः ।।३।।

उपदेशप्रासादे तु इदं कथानकं दर्शितं–

काञ्चनपुरे विक्रमयशा नृपः । तस्य पञ्चशतीमिताः स्त्रियः सन्ति । तत्र नागदत्त इभ्यः । तस्य विष्णुश्रीर्भार्याऽस्ति । अन्यदा नृपः पथि गच्छन् विष्णुश्रीरूपमोहितस्तामन्तः पुरे चिक्षेप । यतो धर्मोपदेशमालायां वृत्तौ–

सन्ति मार्गणघातानां, सोढारः प्रचुरा युधि । विरलास्तु स्मरशस्त्रप्रहाराणामिहावनौ ।।

नागदत्तस्तु प्रियाविरहविह्वलः पुरान्तः परिबभ्राम । अपरा नृपपत्न्यो भर्तुराच्छेदात्कुपिताः कार्मणयोगेनेमां मृत्युमवापयन् । नृपो मोहमोहितः कुपितां बुध्यमानो मृतामजानानस्तत्पदे लग्न इत्यभ्यधात्–''निरपराधे मयि कथं कोपः त्वया कृतः'' तथाप्यजल्पन्तीं तामुत्सङ्गगतां कृत्वा तस्थौ, तस्याः संस्कारं कर्तुं न ददाति, तदा मन्त्रिभिर्मन्त्रदम्भतो भूपः कार्यव्यग्रीकृतः । ततो राजदृष्टिं परिवञ्च्य सा विपिने नीता । अचिरान्मन्त्रयित्वाऽऽगतस्तामवीक्ष्य मूर्छितः, चन्दनाम्भोभिः सिक्तः । मूर्छान्ते प्राह–''प्रिया मे कास्ति ?

यत्रास्ति ततोऽप्यानीय दर्श्यताम्'' । ''स्वामिन् ! सा वाटिकायां गताऽस्ति त्वद्विरहार्दिता क्रोधं विहाय त्वद्गुणान् संस्मृत्य पुनरेष्यति, मा चिन्तां कुरु'' । अन्नाद्यभिग्रहं कृत्वा नृपः स्थितः । इत्थं शोकाक्रन्दपरो दिनद्वयेऽतीते धीसखैः स तच्छवसन्निधौ निन्ये । तत्र विवृतास्यतया दन्तसन्ततिभैरवमदृश्यं खगैस्तुण्डैर्मूलादुत्खातलोचनं कृमिसङ्कुलमकर्णनासिकं शृगालश्वानकाकोलूकादिभिश्चर्वितं प्रवहत्पूयधाराभिः पिच्छलोपान्तभूजलं तच्छवं वीक्ष्य भूपः परमवैराग्यं प्राप–

ममापि जीवोऽयं वपुस्त्यक्त्वा यावन्न याति तावदहमपि शरीरेणात्महितं कुर्वे । ध्यात्वेति स व्रतं जग्राह । तपस्तप्त्वा तृतीये कल्पे देवोऽभूत् ।

❋ ❋ ❋

## शरीरे शुचित्वबुद्धिर्महाऽज्ञानमित्याह–

( उपेन्द्रवज्रावृत्तम् )

**यदीयसंसर्गमवाप्य सद्यो भवेच्छुचीनामशुचित्वमुच्चैः ।**
**अमेध्ययोनेर्वपुषोऽस्य शौच–सङ्कल्प–मोहोऽयमहो महीयान् ॥४॥ [७५]**

**व्याख्या– *अहो* महदाश्चर्यं यदज्ञानां *यदीयसंसर्गमवाप्य शुचीनां सद्य उच्चैरशुचित्वं भवेत् । यदीयं* यस्य शरीरस्य संबन्धिनं *संसर्गं* संस्पर्शादिकं *अवाप्य* प्राप्य *शुचीनां* पवित्रदुग्धदधिघृतसितागरु–कर्पूरचन्दनान्नवस्त्राभरणादीनामपि *सद्यो*ऽतिशीघ्रं स्वल्पकालेन *उच्चै*रतिशयेन *अशुचित्वं* विवेकिनाम–स्पर्शनीयत्वानिच्छनीयत्वादर्शनीयत्वादिकं *भवेत्* कृतपायसभोजनस्य वान्तेरिव जायते । *तस्यास्या–मेध्ययोनेर्वपुषः शौचसङ्कल्पोऽयं महीयान्मोहः। अस्य* दृश्यमानस्य *अमेध्ययोनेरमेध्यस्य* सर्वथाऽपवित्रस्य विष्ठादे*र्योने*रुत्पत्तिस्थानस्य *वपुषो* देहस्य *शौचसङ्कल्पः* स्नानादिनेदं पवित्रं जातमिति मनसा धारणं तद*यं* तेषां *महीयान्* घननिबिडप्राचुर्यवान् *मोहो* मिथ्यात्वोदयजनितोऽज्ञानकामविकारो वर्तते । अतो विवेकिभिरयं भ्रमः परिहर्तव्योऽस्तीत्यर्थः ॥४॥**

श्री शुभशीलगणीकृतप्रबन्धपञ्चशत्याम् कदम्बविप्रकथानकं द्रष्टव्यम् –

काकन्द्यां पुर्या सोमशर्मा विप्रः तस्य पुत्रः कदम्बः अतिशौचवादी छायामात्रान्यस्पर्शः सचेलस्नानं करोति, पानीयपिशाच इति प्रसिद्धोऽभूत् । वस्त्राञ्चलस्थगितवदननासिकः सर्वत्र हुं हुं कुर्वन् भ्रमति, यदा कस्यापि वस्त्राञ्चलो लगति तदा तस्मिन्द्वेषं चकार । ततो गलत्कुष्ठप्रभृतिरोगैर्ग्रस्तः । ततस्तस्य कोऽपि स्पर्शं न करोति । वैद्योऽपि नाडिं न विलोकते संक्रमणभयात् । यतः–

ज्वरो भगन्दरः कुष्ठं, क्षयं चैव चतुर्थकः । एते संस्पर्शतो रोगा, संक्रमन्ति नरान्नरम् ॥१॥

ततो नष्टशौचपादोऽजनि शरीरे वेदना जाता । अन्यदा यतिपार्श्वे गतः । यतिना धर्मोपदेशो ददे । ततः पृष्टं तेन युष्माभिः स्नानं न क्रियते, कुतः शुद्धिर्भवति । यतिना प्रोक्तम्–शरीरमिदमशुचि विद्यते । तस्य स्नानेन किं भवति । मनःशुद्धिरेव वीक्ष्यते । यतः–

रसासृग्मांसमेदोस्थिमज्जाशुक्रान्त्रवर्चसाम् । अशुचीनां पदं कायः, शुचित्वं तस्य तत्कुतः ॥२

नवस्रोतःश्रवद्विस्ररसनिःस्यन्दपिच्छिले । देहेऽपि शौचसंकल्पो, महन्मोहविजृम्भितम् ॥३॥

श्रुत्वैतद्दध्यौ द्विजः—अहं मुधा शुचिवादं करोमि, अहो एते एव शुचयः ब्रह्मचारी सदाशुचिः यदि ममापि रोगोपशान्तिर्भवति तदाहमपीदृशो भवामि । साधुभिरुक्तम्—सर्वमौषधं मुक्त्वा एकं नमस्कारं गणय, षण्मासीं यावदपरं ध्यानं न कार्यम् । ततस्तस्य नमस्कारान्गणयतः कुष्ठं गतं सुश्रावको जातः । सर्वधनं व्ययित्वा चारित्रं गृहीत्वा स्वर्गं गतः कदम्बः ।

❋ ❋ ❋

**अतो धर्मशौचं करणीयमित्याह–**

**( स्वागतावृत्तम् )**

इत्यवेत्य शुचिवादमतथ्यं पथ्यमेव जगदेकपवित्रम् ।
शोधनं सकलदोषमलानां धर्ममेव हृदये निदधीथाः ॥५॥ [७६]

**व्याख्या– *इति शुचिवादमतथ्यमवेत्य पथ्यमेव जगदेक–पवित्रं सकलदोषमलानां शोधनं धर्ममेव हृदये निदधीथाः ।* *इति* पूर्वोक्तप्रकारेण *शुचिवादं* जलादिना पवित्रता भवतीत्युपदेशवचनं *अतथ्यं* तथ्यं यथार्थं न भवतीत्यतथ्यमसत्यं *अवेत्य* ज्ञात्वा *पथ्यमेव* सर्वस्य सर्वथा हितमेवारोग्यहेतुत्वात्, *जगति* विश्वे *एकपवित्रं* एकमेव शुद्धं नान्यत्, *सकलदोषमलानां सकला* समग्रा *दोषा* रागद्वेषमोहादयः आत्मनः दूषका विकृतिकरा इति यावत्, त एव *मला* कर्मलेपमालिन्यजनकास्तेषां, *शोधनं* प्रक्षालनं मूलतः पृथक्कारिणं *धर्ममेव* ज्ञानदर्शनमयस्वस्वरूपमेव *हृदये* स्वमनसि *निदधीथा* नितरां धारयस्वेत्यर्थः ॥५॥**

❋ ❋ ❋

**अथ गेयपद्याष्टकेनाशुचिभावनां विभावयन्नाह–**

भावय रे वपुरिदमतिमलिनं, विनय विबोधय मानसनलिनम् ।
पावनमनुचिन्तय विभुमेकं, परममहोमयमुदितविवेकम्, भा० ॥१॥ [७७]

**व्याख्या– रे *विनय !* रे चेतन ! *इदं* तव प्रत्यक्षवर्तमानं *वपुः* शरीरं *अतिमलिनं* मले मलाद् वा प्रभवत्वाच्छोद्धुमशक्यत्वाद्बहुमलयुक्तं वर्तते । तदस्यातिमलिनत्वं *भावय* चिन्तय । तथा *मानसनलिनं विबोधय* तथा चिन्तयन् *मानसं* हृदयं तदेव *नलिनं* कमलं तद्विबोधय समुद्घाटय । तदुद्घाटय च विलोक्य यत्तत्समले रुन्त्स्व । *पावनं विभुमेकं परममहोमयमुदितविवेकमनुचिन्तय । पावनं* भाविनीं नैरञ्जनीं सत्तामपेक्ष्य निर्मलं शुद्धमिति यावत्, विभुं ज्ञानस्वरूपेण सर्ववस्तुव्यापनशक्त्याधारं, *एकम*संख्येयस्वप्रदेशेष्वेकत्वेन ज्ञायकभावेन परिणतं, *परममहोमयं* सर्वोत्कृष्टकेवलदर्शनरूपप्रकाशमय–भास्वरं, *उदितविवेकमा*विर्भूतभेदग्राहकज्ञानं स्वात्मानं *अनुचिन्तय* सर्वविभावं परिहृत्य स्वस्वभावानुरूपं ध्यायस्वेत्यर्थः॥१॥**

मल्लिकुमारीकृतप्रतिबोधदर्शनीयं यथोक्तं त्रिषष्ठिशलाकापुरुषचरित्रे—मल्लिजिनोत्पत्तिस्तु एतद् ग्रन्थस्य अष्टाशीतिगाथाटीकोक्तकथाया ज्ञातव्या, ततः पश्चात्—

इतश्चाचलजीवोऽपि वैजयन्तात्परिच्युतः । अभूद्भरतसाकेते प्रतिबुद्ध्यभिधो नृपः ॥५४॥

इतो धरणजीवोऽपि वैजयन्तात् परिच्युतः । चंपापुर्यामभूच्चन्द्रच्छायो नाम महीपतिः ।।६७।।
इतश्च पूरणात्मापि वैजयंन्तात् परिच्युतः । बभूव पुर्या श्रावस्त्यां रुक्मी नाम महीपतिः ।।८७।।
इतश्च वसुजीवोऽपि वैजयन्तात् परिच्युतः । जज्ञे वाराणसीपुर्यां शंखो नामावनीपतिः ।।९७।।
जीवो वैश्रवणस्यापि वैजयन्तात् परिच्युतः । अदीनशत्रुर्नाम्नाभून्नृपतिर्हस्तिनापुरे ।।१०६।।
इतोऽभिचन्द्रजीवोऽपि वैजयन्तात्परिच्युतः । काम्पील्यनगरे नाम्ना जितशत्रुर्नृपोऽभवत् ।।१२०।।
प्राग्जन्मसुहृदां तेषां षण्णां मल्लिर्महीभुजाम् । पश्यन्त्यवधिना बोधमशोकवनिकांतरे ।।१४४।
मध्येसौधापवरकं रत्नपीठे मनोहरे । आत्मनः प्रतिमां हैमीं पद्मरागकृताधराम् ।।१४५।।
नीलकेशीमिन्द्रनीलस्फटिकोपललोचनाम् । प्रवालमयहस्ताङ्घ्रिमातालुशुषिरोदराम् ।।१४६।।
सच्छिद्रा तालुनि तत्र स्वर्णांभोजपिधानिकाम्। नितान्तरम्यावयवां कारयित्वा न्यवेशयत् ।।१४७।।
प्रतिमापवरकस्य पुरो भित्तावकारयत् । सजालककपाटानि षड्द्वाराणि च कुम्भसूः ।।१४८।।
द्वाराणां च पुरस्तेषां ह्रस्वापवरकांश्च षट् । प्रतिमापृष्ठभित्तौ च सैकं द्वारमकारयत् ।।१४९।।
ततः सर्वाहारपिंडीं प्रतिमायास्तु तालुनि । क्षिप्त्वा स्वर्णांबुजेनाथ पिधाय बुभुजेऽन्वहम् ।।१५०।।
इतश्च तेषां युगपत् षण्णामप्यवनीभुजाम् । आययुर्दूतपुरुषा मिथिलानाथसन्निधौ ।।१५१।।
कुम्भराजो जगादैवं के तु ते बहुमानिनः । अप्रार्थितप्रार्थका रे मूढाः पार्थिवपांशनाः ।।१७१।।
जगत्त्रयशिरोरत्नं कन्यारत्नमिदं हि नः । अपि शक्रादिदेवानां परिणेतुं न योग्यता ।।१७२।।
मनोरथो भवन्नाथैर्वृथा चक्रे दुराशयैः । दूता वराकास्तद्यात निर्यात नगरान्मन ।।१७३।।
एवं ते निकृता राज्ञा गत्वा स्वस्वामिनां द्रुतम् । तद्वाचिकमवोचन्त क्रोधानलसमीरणम् ।।१७४।।
ततः षडपि राजानस्ते समानपराभवाः । दूतान् परस्परं प्रेष्य निश्चिक्युः कुम्भविग्रहम् ।।१७५।।
चेलुः षडपि वर्षधराद्रय इवौजसा । स्थगयन्तो महीं सैन्यैः प्रापुश्च मिथिलापुरीम् ।।१७६।।
प्रवेशनिर्गमद्वारनिवारणविचक्षणाः । तेऽरुन्धन् वेष्टयित्वा तां चन्दनद्रुमिवाहयः ।।१७७।।
कुम्भोऽपि तेन रोधेन खिन्नः कतिपयैर्दिनैः । चिन्तापन्नो यावदस्थात्तावन्मल्लिः समाययौ ।।१७८।।
उद्विग्न इव किं तात तिष्ठसीति तयोदितः । उद्वेगकारणं तस्या आचख्यौ कुम्भभूपतिः ।।१७९।।
मल्लिरप्यालपत्तात प्रत्येकं गुढपूरुषैः । तुभ्यं दास्यामि मल्लीमित्युक्त्वा षडपि बोधय ।।१८०।।
तस्या मम प्रतिमायाः पुरोपवरकेषु ते । क्रमेण सायमानेयाः प्रच्छन्नाः श्वेतवाससा ।।१८१।।
तथैव विदधे राजा तेऽप्याजग्मुस्तथैव हि । कपाटजालकैर्मल्लीप्रतिमां ददृशुश्च ताम् ।।१८२।।
अहो पुण्यैरियं प्रापि सुरूपा चारुलोचना । इति मल्लीधिया दध्युस्तेऽनुरागेण पार्थिवाः ।।१८३।।
प्रतिमापृष्ठद्वारेण प्राविशत्तत्र मल्यपि । प्रतिमान्तरिता तालुपिधानाब्जमपानयत् ।।१८४।।
प्रक्षिप्तकुथिकाहारगंध सद्यश्च निर्ययौ । शकृद्गंध इवासह्य घ्राणबाधकः ।।१८५।।
कपाटजालैस्तदपवरकेष्वपि सोऽविशत् । षण्णामपि नरेन्द्राणां दारयन्निव नासिकाः ।।१८६।।
पिधाय नासिकां तेऽपि वाससा गंधतस्ततः । पराङ्मुखा अजायन्त वैरिभ्य इव कातराः ।।१८७।।
भोः किं पराङ्मुखा यूयमिति मल्ल्याभिभाषिताः । अमुं न शक्नुमः सोढुं दुर्गन्धमिति तेऽभ्यधुः ।।१८८।।
मल्लिस्तान् प्रत्युवाचैवं सौवर्णी प्रतिमा ह्यसौ । अत्राप्यन्वहमाहारक्षेपाद्गंधोऽयमीदृशः ।।१८९।।
किं ब्रूमस्तस्य यद्गर्भे पित्रोः शुक्रासृगुद्भवम् । पश्चाच्च कललीभूतं मांसपेशीत्वभाक् ततः ।।१९०।।

ततो मातृकृताहारनिर्यासरसपोषितम् । जरायुनरकमग्रं वपुर्विण्मूत्रवासितम् ।।१९१।।
एवंविधसमुत्पत्तेर्विष्ठाकोष्ठस्य वर्ष्मणः । रसासृग्मांसमेदोऽस्थिमज्जाशुक्राश्रितात्मनः ।।१९२।।
मूत्रैकस्रोतसः श्लेष्मदृतेर्दुर्गन्धधारिणः । किं पुरस्रोतस इव सारमस्ति मनागपि ।।१९३।।
अत्र संस्कारहेतुश्च कर्पूरादि सुगन्ध्यपि । मलसात् स्याल्लवणसात् सुधावृष्टिरिवोषरे ।।१९४।।
बहिरन्तश्च बीभत्से कथङ्कारमिहाङ्गके । अङ्गानुरागं कुर्वन्तु मनागपि विवेकिनः ।।१९५।।
इतो भवे तृतीयेऽस्मिन् यद्भवद्भिर्मया सह । तपः प्रव्रजितैश्चक्रे मुग्धाः स्मरत तन्न किम् ।।१९६।।
मल्लीवचो विमृशतां तत्तेषां पृथिवीभुजाम् । जातिस्मरणमुत्पेदे किं स्यान्नार्हदनुग्रहात् ।१९७।
ततो जालकपाटानि श्रीमल्लिरुदघाटयत् । ते चाभ्युपेत्य षडपि प्रबुद्धा एवमब्रुवन् ।।१९८।।
स्मरामो यद्भवे पूर्वे सप्तापि सुहृदो वयम् । संभूय कृतसङ्केतास्तपस्तीव्रमकृष्महि ।।१९९।।
बोधिताः स्मस्त्वया साधु नरकात्साधु रक्षिताः । आदिशतः परं कृत्यं गुरुस्त्वमसि नः प्रभो ।।२००।।
प्रव्रज्या समये ग्राह्येत्युदीर्य विससर्ज तान् । षडपि क्ष्मापतीन् मल्लिर्जग्मुः स्वं पुरं च ते ।।२०१।।

ततस्ते मल्ल्याज्ञया गृहे गत्वा पुत्रान् स्वस्वराज्येषु निचिक्षिपुः । मल्लिजिनः सांवत्सरिकमहादानानन्तरं [1]पौषशुक्लैकादश्यामष्टमभक्तेनाश्विनीनक्षत्रे त्रिशतनृपैः त्रिशतस्त्रीभिश्च सह वर्षशतेऽतीते जन्मनः सिद्धसाक्षिकं प्राव्राजीत् । तस्मिन्नेव दिने केवलं समुत्पन्नम् । ते षडप्येत्य प्रवव्रजुः ।

* * *

**दम्पतिरेतोरुधिरविवर्ते किं शुभमिह मलकश्मलगर्ते ।**
**भृशमपि पिहितः स्रवति विरूपं को बहु मनुतेऽवस्करकूपम्, भा० ।।२।। [७८]**

व्याख्या- *इह दम्पतिरेतोरुधिरविवर्ते मलकश्मलगर्ते किं शुभम् ।* इहास्मिंस्तव देहे *दम्पतिरेतोरुधिरविवर्ते* जाया च पतिश्च *दम्पती* तयोः क्रमेण स्त्रीपुरुषयोः *रेतः* पतिता वीर्यपुद्गला, *रुधिरं* मातुः शोणितपुद्गलास्तेषां यो *विवर्तो*ऽन्यान्यपरिणामप्राप्त्या शारीरिकसप्तधातुत्वेनोद्भवस्तस्मिन्, *मलकश्मलगर्ते, मलो* मूत्रपुरीषश्लेष्मकफपित्तस्वेदादिरूपः, *कश्मलः* पापपुद्गलसमूहस्ताभ्यां भूतो *गर्तो*ऽगाधखड्डुस्तस्मिन्, *किं शुभं,* किं प्रेमोत्पादकस्वरूपसुन्दरं चर्मरुधिरादिवस्तु पश्यसि ? नास्ति किञ्चिदपि । *भृशं पिहितोऽपि विरूपं स्रवति ।* तथायं देहो *भृशं* वस्त्रादिभिरत्यर्थं *पिहित* आच्छादितोऽपि *विरूपं* तथाकृतेऽपि बीभत्सनीयं दुर्गन्धादिकं *स्रवति* सर्वतो निर्झरति । अत ईदृग*वस्करकूपं को बहु मन्यते । अवस्करः* विष्टादिमलभृतः *कूपो*ऽवटोऽवस्करकूपस्तं तादृशं देहं कः कस्को विवेकी *बहु मन्यते* प्रियं मन्यते ? न कोऽपि । मूढा एव प्रियमन्तार इत्यर्थः ।।२।।

नन्दीसूत्रकथानकं वाच्यं-

विटो नाम कोऽपि पुरुषो राज्ञः प्रत्यासन्नवर्त्ती । तं प्रति राजा निजदेवीं प्रशंसति-अहो निरामया मे देवी या न कदाचिदपि वातनिसर्गं विदधाति । विटः प्राह -देव ! न भवतीदं जातुचित् । राजाऽवादीत्-कथम् ? विट आह-देव ! धूर्त्ता देवी, ततो यदा सुगन्धीनि पुष्पाणि चूर्णयित्वा वासान् त्वां समर्पयति नासिकाग्रे, तदा ज्ञातव्यं-वातं विमुञ्चतीति । ततोऽन्यदा राज्ञा तथैव परिभावितम् सम्यगवगते च हसितम्, ततो देवी

1 मतान्तरेण मृगशीर्षशुक्लैकादश्यां ।

हसननिमित्तकथनाय निर्बन्धं कृतवती । ततो राजाऽतिनिर्बन्धे कृते पूर्ववृत्तान्तमचीकथत् । ततश्चुकोप देवी तस्मै विटाय, आज्ञप्तो देशत्यागेन । तेनापि जज्ञे–नूनमकथयत् पूर्ववृत्तान्तं देवो देव्याः, तेन मे चुकोप देवी । ततो महान्तमुपानहां भरमादाय गतो देवीसकाशम्, विज्ञपयामास देवीं–देवि ! यामो देशान्तराणि । देवी उपानहां भरं पार्श्वे स्थितं दृष्ट्वा पृष्टवती–रे ! किमेष उपानहाम्भरः ? सोऽवादीत्–देवि ! यावन्ति देशान्तराण्येतावतीभिरुपानद्भिर्गन्तुं शक्ष्यामि, तावत्सु देव्याः कीर्त्तिर्विस्तारणीया । त एवमुक्ते मा मे सर्वत्रापकीर्तिर्जायतेति परिभाव्य देवी बलात्तं धारयामास ।

❋ ❋ ❋

भजति सचन्द्रं शुचिताम्बूलं, कर्तुं मुखमारुतमनुकूलम् ।
तिष्ठति सुरभि कियन्तं कालं मुखमसुगन्धि जुगुप्सितलालम्, भा० ॥३॥[७९]

व्याख्या– *मुखमारुतमनुकूलं कर्तुं सचन्द्रं शुचिताम्बूलं भजति । मुखमारुतं* वदनोद्भूतश्वासवायुं, *अनुकूलं* **निसर्गेण सर्वस्य प्रतिकूलदुर्गन्धमयं सन्तं** *अनुकूलं* **सौरभयुक्तं** *कर्तुं* **विधातुं,** *सचन्द्रं* **घनसारसहितं,** *शुचि* **सुगन्धरसादिना पवित्रं** *ताम्बूलं* **नागवल्लीदलं** *भजति* **चर्वणं करोति ।** *असुगन्धि जुगुप्सितलालं मुखं कियन्तं कालं सुरभि तिष्ठति ? असुगन्धि* **न विद्यते सुष्ठु गन्धो यस्य तत्, तथा** *जुगुप्सिता* **निन्दिता** *लाला* **यस्य तत् ईदृशं** *मुखं* **वदनं,** *कियन्तं कालं* **अर्धघटिकादिमात्रं** *सुरभि* **सुगन्धयुक्तं** *तिष्ठति* **संवर्तत इत्यर्थः ॥३॥**

उक्तं हि उपदेशमालाटीकायाम् सनत्चक्रिणः कथा–

गजपुरनगरे सनत्कुमारनामा चक्री बभूव, सोऽतीवरूपवान् षट्खण्डराज्यं करोति, एकस्मिन्नवसरे शक्रः सभायां सनत्कुमार चक्रवर्तिरूपं वर्णयामास, एतेन समः कोऽपि भूतले रूपवान्नास्ति, ततो द्वाभ्यां देवाभ्यामिन्द्रवचनं नाङ्गीकृतं तत्कुतूहलावलोकनार्थं द्विजरूपौ भूत्वा तौ गजपुरमागतौ, एतस्मिन्नवसरे स्नानकरणवेलायामासनस्थितमाभूषणरहितं सुगङ्धितैलेनाभ्यक्ताङ्गं सनत्कुमारं दृष्ट्वा तदुपमोहितौ तौ मुहुर्मुहुः शिरसी धूनयामासतुः, चक्रिणा पृष्ट – किं कारणं शिरोधूनने ? ताभ्यामुक्तं देव ! यादृशं भवद्दर्शनकौतुकं श्रुतं तादृशमेव दृष्टं, इति द्विजवचनं श्रुत्वा चक्री प्राह भो ! अधुना एतदवस्थायां किं विलोक्यते ? स्नानकरणानन्तरं परिहितोत्तमनेपथ्यस्य धृतालङ्कारस्य शिरसि धृतछत्रस्य चामरैर्वीज्यमानस्य द्वात्रिंशत्सहस्रै राजभिः सेव्यमानस्य मम रूपं विलोकनीयं, अधुना किं विलोक्यते ? इति चक्रिवचः श्रुत्वा ताभ्यां चिन्तितं, अहो ! उत्तमस्य स्वमुखेन स्वप्रशंसा कर्तुं न युज्यते यदुक्तं–

**न सौख्यसौभाग्यकरा नृणां गुणाः, स्वयं गृहीता युवतीकुचा इव ।**
**परैर्गृहीता द्वितयं वितन्वते न तेन, गृहणन्ति निजं गुणं बुधाः ॥१॥**

चक्रिवचः प्रमाणीकृत्य गतौ विप्रौ चक्रिणि सभायामुपविष्टे पुनरप्यागतौ, रूपं विलोकयित्वा विषण्णौ जातौ चक्रिणा प्रोक्तं किं विषाद्कारणं ? तावाहतुः संसारविलसितं चक्री प्राह कथं ? ताभ्यामुक्तं यद्भवतः प्राग् रूपं दृष्टं ततोऽनन्तगुणहीनमिदानीं ते रूपं वर्त्तते चक्रिणोक्तं कथं जानीतः ? तावहतुरवधिज्ञानेनेति । चक्रिणोक्तं तत्र प्रमाणं किं ? तावुचतुर्भो चक्रिन् ! मुखस्थं तांबुलरसं भूमौ थुत्कृतं विलोकय ? मक्षिकास्तदुपरि स्थित्वा मरणं प्राप्नुवन्ति अनेनानुमानेन जानाहि तव शरीरं विषरूपं जातं सप्त महान्तो रोगाः शरीरे

समुद्भूताः, इति देववचः श्रुत्वा चक्री चिन्तयति, अनित्योऽयं देहः, अस्मिन्नसारे देहे किमपि सारं नास्ति,

यदुक्तं–

**इदं शरीरं परिणामदुर्बलं, पतत्यवश्यं श्लथसन्धिजर्जरं ।।**

**किमौषधैः क्लिष्यसि मूढ दुर्मत, निरामयं धर्मरसायनं पिब ।।१।।**

पुनरप्युक्तं–

कस्तूरी पृषतां रदाः करटिनां कृत्तिः पशूनां पयो, धेनूनां छदमण्डलानि शिखिनां रोमाण्यवीनामपि । पुच्छस्नायुवशाविषाणनखरस्वेदादिकं किञ्चन । स्यात्कस्याप्युपकारि मर्त्यवपुषो नामुष्य किञ्चित्पुनः ।।२ ।।

इति वैराग्यपरायणेन राज्ञा राज्यश्रियं त्यक्त्वा संयमश्रीगृहीता ।

❋ ❋ ❋

असुरभिगन्धवहोऽन्तरचारी, आवरितुं शक्यो न विकारी ।

वपुरुपजिघ्रसि वारंवारं, हसति बुधस्तव शौचाचारम्, भा० ।।४।। [८०]

व्याख्या– *विकारी* गृहीतपुद्गलानामन्यथापरिणामेन जातो विकारी, *अन्तरचारी* शरीराभ्यन्तरे संचरितुं शीलमस्येत्यन्तरचारी मध्यव्यापीति यावत्, *असुरभिगन्धवहः* दुर्गन्धप्रापकश्वासवायुः, *आवरितुं* सुगन्धिपदार्थैराच्छादयितुं *न शक्यः* साध्यो नास्ति । एवं सत्यपि त्वं तु *वारंवारं* पुनः पुनः *वपुः* शरीरं सुगन्धिद्रव्यैर्विलिप्य विलिप्य *उपजिघ्रसि* समाजिघ्रसि । एतत् तव त्वदीयं *शौचाचारं* तनुशुचिकरणव्यापारं *बुधः* पण्डितपुरुषः *हसति* हास्येनानादरं करोति इत्यर्थः ।।४।।

उक्तं श्रीपिण्डनिर्युक्तौ मोदकप्रियकुमारकथा–

श्रीस्थलकपुरे भानुभूपस्य रुक्मिणी प्रिया सुरूपः पुत्रोऽभूत् । स च पञ्चभिर्धात्रीभिर्वर्द्धितो यौवनं प्राप परिणायितः । तस्मै मोदका एव रोचन्ते । ततो मोदकप्रियेतिनामाभूत् । स चान्यदा वसन्ते प्रातरुत्थायास्थानमण्डपिकायामाजगाम । तत्र स्वर्गिस्त्रीतुल्यया नृत्तं कर्तुं प्रवृत्तम् तत्रस्थस्य तस्य भोजनावसरे जनन्या मोदकभृतस्थलानि प्रेषितानि । यतः सपरिजनो मोदकान् बुभुजे । रात्रावपि गीताक्षिप्त जागरणतो मोदका न जीर्णाः । ततो ऽधोगन्धपूतिवाति नासिकायां प्रविवेश । ततो दध्यौ– यथा मोदका वर्या अपि सदुर्गन्धा जातास्तथा सर्वं शरीराद्यपि एवं विमृशन् प्राप्तवैराग्यो मोदकप्रियस्त्यक्त्वास कुटुम्बं दीक्षां ललौ । दीक्षां प्रपाल्य स्वर्गं गत्वा मुक्तिं याता ।

❋ ❋ ❋

द्वादश नव रन्ध्राणि निकामं, गलदशुचीनि न यान्ति विरामम् ।

यत्र वपुषि तत्कलयसि पूतं, मन्ये तव नूतनमाकूतम्, भा० ।।५।। [८१]

व्याख्या– *यत्र वपुषि निकामं गलदशुचीनि द्वादश नव रन्ध्राणि विरामं न यान्ति, तत्पूतं कलयसि, नूतनं तवाकूतं मन्ये, यत्र* यस्मिन् *वपुषि* शरीरे *निकामं* नितरामत्यर्थं *गलदशुचीनि, गलन्ति* स्रवन्ति *अशुचीनि* दुर्गन्धवर्णरसस्पर्शवज्जुगुप्सोत्पादकापवित्राणि *द्वादश नव रन्ध्राणि* क्रमेण स्त्रीपुरुषयोर्द्वादशनवसङ्ख्यानि *रन्ध्राणि* द्वाराणि *विरामं* विश्रामं क्षणमप्युपराममिति यावत्, *न यान्ति* न प्राप्नुवन्ति । *तत्तादृशं* शरीरं त्वं मोहात् *पूतं* पवित्रं *कलयसि* जानासीति *नूतनं* विवेकिजनेऽदृष्टपूर्वं

*तवाकूतं* देवानां प्रियस्याभिप्रायं *मन्ये*ऽहमवधारयामीत्यर्थः ॥५॥

उपदेशप्रासादे मृगावतीपुत्रलोढककथानकं वाच्यं–

श्रीवीरः पृथ्वीं पावयन् मृगग्रामस्य वने समवासरत् । ततश्च ज्येष्ठो गणभृन्मृगग्रामे विहरणायागात् । एषणीयान्नादि गृहीत्वान्वागच्छन् एकं वृद्धमन्धकं कुष्ठिनं परं रणन्मक्षिकाजालं पदे पदे प्रस्खलन्तं दुःखमन्दिरं वीक्ष्य प्रभोरन्तिके एत्य प्रभुं पप्रच्छ–स्वामिन् ! मयाद्यैको महादुःखी नरो दृष्टः, तादृशः कोऽपि विश्वे भविष्यति ? भगवान् प्राह–गौतम ! नैतन्महत्तमं दुःखम् । यतोऽस्मिन्नेव ग्रामे विजयनृप–पत्नी मृगावती । तस्या आद्यपुत्रो लोढकाकृतिभृद्यो वर्तते, तस्याग्रे तु कियदिदं दुःखम् । यो मुखनेत्रनासादिरहितो दुर्गन्धपूयरक्तास्राविदेहो जन्मतोऽनन्तरं भूमिगृह एव तिष्ठति । एतदाकर्ण्य तं दिदृक्षुः स्वामिनिर्देशाद्गौतमो नृपधाम्नि जगाम । अथ नृपस्त्री तं गणाधीशं वीक्ष्य प्राह– भगवन् ! अतर्कितं दुर्लभं युष्मदागमनं कथं जातम् ? गणेशः प्राह–हे मृगावति ! विभोर्वाक्यात्तव सुतं द्रष्टुमागमम् । तदा तयाऽन्ये सुभगाकृतिनः पुत्रा दर्शिताः । मुनीशेनोक्तम्–एतान् विना हे भद्रे ! यो भूमिगृहे छन्नोऽस्मि तं दर्शय । तयोक्तम्–भगवन् ! मुखपट्टीं बन्धय क्षणमेकं प्रतीक्षस्व, भूमिगृह उद्घाटिते दुर्गन्धो दूरे याति । ततस्तया तस्मिन्नुद्घाटिते मुनीशस्तत्र गत्वा तं ददर्श–

पादाङ्गुष्ठोष्ठनासाक्षिकर्णहस्तादिवर्जितम् । षण्ढमाजन्मबाधिर्यवन्तं दुःसहवेदनम् ॥

**अभ्यन्तराष्टनाडीभिस्तथा बाह्याभिरष्टभिः ।**
**पूतरक्तं स्रवन्तीभिर्जन्मतोऽपि पृथक् पृथक् ॥**

मूर्तिमत्पातकमिव तं लोढकाकारं वीक्ष्य प्रभुपादान्त एत्यैवं व्यजिज्ञपत्–स्वामिन् ! केन कर्मणा नारकमिव दुःखमयं वेदयते ? । प्रभुराह–शतद्वारपुरे धनपतिनृपस्य राष्ट्रकूटाभिधः सेवकः पञ्चशतीग्रामेशः । स सप्तव्यसनपरो महाकरेण लोकान् दुनोति । कर्णनेत्रादिभेदेन विडम्बयति । अन्यदा स्वदेहे तस्य षोडश रोगा उत्पन्नाः । यतः–

**सासे खासे जरे दाहे कुच्छिसूले भगंदरे, हरिसे अजीरए दिठीमुद्धसूले अरोअए ॥**
**अच्छिवेअण कंडूय कन्नवेअण जलोअरे, कोढे इमाइणो रोगा पीलयंति सरीरिणं ॥**
**दुष्टानां दुर्जनानां च पापिनां क्रूरकर्मणाम्, अनाचारप्रवृत्तानां पापं फलति तद्भवे ॥**

क्रोधलोभेनानेकपापवृन्दं कृत्वा तेनाप्यखिलकालः पापकर्मणैव निन्ये । एवं सार्धद्विशतवर्षायु–र्भुक्त्वात्रोत्पन्नः । परं मुखं विनाऽस्य माता रब्बां कृत्वाऽस्य देहे निक्षिपति । स आहारो रोमादिच्छिद्रेण मध्ये प्रविश्य पूयरकादिभावं प्राप्य निस्सरति । एवं महादुःखेन षड्विंशतिवर्षायुः प्रपूर्याद्ये नरके गन्ता । ततः सिंहत्वं, पुनराद्ये श्वभ्रे, ततः सरीसृपत्वं, ततो द्वितीयनरके, ततः पक्षी भूत्वा तृतीयनरके । एवमन्त –रालैर्भवैस्तमस्तमां यावज्ज्ञेयम् । ततो मत्स्यत्वं, ततः स्थलचरेषु खेचरेषु च । ततश्चतुरक्षेषु । ततः पृथिव्यादिषु च । एवं चतुरशीतिलक्षयोनिषु भूरिशो भ्रान्त्वाऽकामनिर्जरया कर्मलाघवात्प्रतिष्ठानपुरे इभ्यपुत्रो भविष्यति । तत्र साधुसंगमाद्धर्मं प्राप्य सौधर्मे सुरो भविता । ततश्च्युत्वा क्रमात्सिद्धिमवाप्स्यति ।

❋ ❋ ❋

अशितमुपस्करसंस्कृतमन्नं, जगति जुगुप्सां जनयति हन्नम् ।
पुंसवनं धैनवमपि लीढं, भवति विगर्हितमतिजनमीढम्, भा० ॥६॥[८२]

व्याख्या- हे चेतन ! शरीरसंसर्गप्राप्तं *उपस्करसंस्कृतं अशितं अन्नं हन्नं जगति जुगुप्सां जनयति, उपस्करसंस्कृतं, उपस्करो* घृतदधिजीरकहरिद्रानानाव्यञ्जनादिरसवती सामग्री तया *संस्कृतं* पक्वं तादृशं *अशितं* भुक्तं यदन्नं पायसादिभोजनं तज्जनितं *हन्नं* पुरीषं *जगति* समग्रजने *जुगुप्सां* नासिकानेत्रमनसां ग्लानिं *जनयति* समुत्पादयति । *धैनवमपि पुंसवनं लीढमतिविगर्हितं जनमीढं भवति, धैनवमपि* गवां संबन्धि अपि *पुंसवनं* स्वादिष्टपुष्टिकारि क्षीरं *लीढं* सितादिमिश्रितोत्कालितसमास्वादितं तदपि *अतिविगर्हितं जनमीढं भवति, अतिशयेन* निन्दनीयं *जनानां* मनुष्यादिलोकानां *मीढं* मूत्रं *भवति* जायते । तच्छरीरं कथं पूतं मन्यसेऽतो मा पूतं मन्यस्वेत्यर्थः ।।६।।

कथितं हि प्रबन्धपञ्चशत्याम् श्रीशुभशीलगणीभिः –

भीमपुरे श्रीधरश्रेष्ठी धनार्थं व्यवसायं कुर्वन् रात्रिंदिवा विश्रामं न लाति स्म । धनं मिलितं बहु । सप्ततिः वर्षाणि जातानि धनं धनं कुर्वन्नधिकं जीवितं वाञ्छति स्म बह्वीः स्त्रियः परिणीतवान् ततस्तृप्तो नाभूत् ।एकदाहारं पक्वान्नादिकं भुक्तं पश्चात्तदेव विष्टा तथा दुर्गन्धं ज्ञात्वा जगौ श्रेष्ठी । धनेषु जीवितव्येषु, स्त्रीषु चाहारकर्म्मसु । अतृप्ताः प्राणिनः सर्वे, याता यास्यन्ति यान्ति च ।

एवं सर्ववस्तुपरिग्रहादिकं चासारं मत्वा सर्वं त्यक्त्वा संयमं
लात्वा स्वर्गं गतः ततो मुक्तिमपि बहुषु भवेषु यास्यति ।

केवलमलमयपुद्गलनिचये, अशुचीकृतशुचिभोजनसिचये ।
वपुषि विचिन्तय परमिह सारं, शिवसाधनसामर्थ्यमुदारम्, भा० ।।७।। [८३]

व्याख्या- हे आत्मन् ! इह *केवलमलमयपुद्गलनिचये,* इह प्रत्यक्षमनुभूयमाने *केवलमलमय-पुद्गलनिचय, केवलं* मात्रं *मलमया* मलमात्रस्वरूपाः *पुद्गलाः* परमाणुसमुदायास्तेषां *निचयो* राशिर्यत्र तत्तथा तस्मिन्, *अशुचीकृतशुचिभोजनसिचये अशुचीनि* अपवित्राणि *कृतानि* विहितानि *शुचीनि* स्वरूपसुन्दराणि *भोजनानि* घृतपूर्णादीनि *सिचयाश्ची*नांशुकादिप्रवरवसनानि येन तत्तथा तस्मिन्, *वपुषि* शरीरे, *सारं* प्रधानभावं *उदारं* सर्वेभ्यः श्रेष्ठं *शिवसाधनसामर्थ्यं* जीवस्य मोक्षसंपादनी शक्तिरेवैकाऽस्तीति *विचिन्तय* पर्यालोचय, नान्यदित्यर्थः ।।७।।

अथोपसंहरन्नाह-

येन विराजितमिदमतिपुण्यं, तच्चिन्तय चेतन ! नैपुण्यम् ।
विशदागममधिगम्य निपानं, विरचय शान्तसुधारसपानम्, भा० ।।८।। [८४]

।। इति श्रीशान्तसुधारसगेयकाव्येऽशौचभावनाविभावनो नाम षष्ठः प्रकाशः ।।

व्याख्या- *हे चेतन !* हे प्राणिन् ! *येन* नैपुण्येन *इदमतिपुण्यं विराजितं तन्नैपुण्यं चिन्तय, येन* सर्वज्ञोपदिष्टेन सर्वपरभावनिवृत्तिकरणसमर्थेन नैपुण्येन स्वस्वरूपनिष्पादनकुशलत्वेन *इदं* प्राप्तशरीरं *अतिपुण्यं* सुरेन्द्राणामप्यतिशयेन महनीयभावं गतत्वेनातिपवित्रं *विराजितं* शोभितं भवति *तन्नैपुण्यं*

तादृशं चातुर्यं *चिन्तय* समालोचय यथा तत्प्राप्नोषि । *विशदागमं निपानमधिगम्य शान्तसुधारसपानं विरचय ।* *विशदं* निर्दोषं *आगमनिपानं* सिद्धान्तजलाशयं *अधिगम्य* गुरुमुखात्प्राप्य *शान्तसुधारसपानं* शान्तस्वभावामृतस्वादनं *विरचय* कुरुष्वेत्यर्थः ॥८॥

॥ इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणि-सतीर्थ्यतिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां श्रीशान्त-सुधारसटीकायामशुचिभावनाविभावनो नाम षष्ठः प्रकाशः समजनि॥

❀ ❀ ❀

## ॥ सप्तमः प्रकाशः ॥

षष्ठे प्रकाशेऽशुचिभावना प्रोक्ता । अशुचिता चाश्रवसंपादितपरसंबन्धाज्जायते इत्यनेन संबन्धेनायातामाश्रवभावनां विभावयन्नाह । तत्रायमादिमः श्लोकः-

( भुजङ्गप्रयातं वृत्तम् )

यथा सर्वतो निर्झरैरापतद्भिः प्रपूर्येत सद्यः पयोभिस्तटाकः ।
तथैवाश्रवैः कर्मभिः संभृतोऽङ्गी, भवेद्व्याकुलश्चञ्चलः पङ्किलश्च ॥१॥ [८५]

व्याख्या- *यथा*ऽनेन प्रकारेण *सर्वतो* दिग्विदिग्भ्यः *आपतद्भिर्निर्झरैः, आ* समन्तादनिरुद्धैः *पतद्भिः* आगत्य मध्ये प्रविशद्भिः *निर्झरैः* पर्वतादिभ्यो निर्गतजलप्रवाहैः *तटाकः* सरः *सद्यः* शीघ्रं *पयोभिः* पानीयैः *प्रपूर्येत* भ्रियेत पालिबन्धानपि त्रोटयेत् । *तथैव* निर्झरपानीयैः सरःप्रकारेणैव *आश्रवैः* मिथ्यात्वाविरति-हिंसाऽसत्यस्तेयमैथुनममत्वसेवनैरागच्छद्भिः *कर्मभि*राश्रवासेवनफलभूतज्ञानावरणीयादिकर्मबन्धप्रवाहैः *संभृतो*ऽनन्तानन्तैः कर्मवर्गणाराशिभिरतिशयेनावष्टब्धो व्याप्त इति यावत्, *अङ्गी* प्राणी *व्याकुलश्चञ्चलः पङ्किलश्च भवेत् ।* व्याकुलो महापीडाभिरत्यन्तविह्वलः, *चञ्चलो* भवाद्भवभ्रमणशीलत्वेनास्थिरस्थितिकः, *पङ्किलः* कर्मकर्दम-लिप्तमलिनः सन्नज्ञानान्धो *भवेज्जा*येतेत्यर्थः ॥१॥

एतदुपरि श्रीदेवगुप्तसूरिकृतनवपदप्रकरणोक्ता जिनमतीकथा प्रोच्यते-

इहैव जम्बूद्वीपे भारतवर्षमध्यखण्डालङ्कारभूतसौराष्ट्रविषये गिरिनगरं नाम पत्तनं, तत्र तिस्र इभ्यदुहितरः परस्परप्रीतिभावापन्ना उदग्रयौवनवर्त्तिन्यो जिनमतिप्रियङ्करीधनश्रीनामधेयाः, जिनदत्त- प्रियमित्रधनदत्ताभिधैर्महाश्रेष्ठिपुत्रैः परिणीताः, तासु च जिनमतेर्भर्त्ता गृहीताणुव्रतः श्रावकः, तत्सङ्गत्या जिनमतिरपि श्राविका, केवलं प्रियङ्करीधनश्रीमैत्र्या नात्यन्तं जिनधर्मस्थिरमतिः, जातश्चैकैकस्तासां पुत्रः, अन्यदा च तिस्रोऽप्युज्जयन्तगिरिं नेमिनाथवन्दनाय गताः, तस्य च रम्यरम्यतरप्रदेशावलोकनेनोत्पन्नाधिककौतुका अपरापरप्रदेशदिदृक्षया विचरन्त्यः प्राप्ताश्चौरैर्गृहीता नीतांश्च पारसकूलं, विक्रीता वेश्यानां हस्ते ताभिश्च शिक्षितो वेश्याजनोचितो वैशिककलाकलापः, जाता अत्यन्तप्रसिद्धा वेश्याः ।इतश्च तत्पुत्रा अपि स्वपितृभिरेको-पाध्यायसमीप एव पाठिताः कालक्रमेणोपारूढा यौवन, समानशीलतया चान्योऽन्यं सख्यवन्तः, कारिताः पितृभिर्दारसङ्ग्रहं, जिनदत्तपुत्रश्च पितृसंसर्गादेव श्रावकत्वमनुपालयति, इतरौ च न तथा, अन्यदा कालोचितवन्तस्ते किमनेन प्रभूतेनापि पितृपर्यायागतेन धनेन ?, नातस्त्यागभोगाभ्यामपि कस्यचित्पुरुषस्य श्लाघा, प्रत्युत इतरजनोपालम्भ एवात्र, तथा च लोकप्रसिद्धो दोहकः-

पियरि विढत्तइ दव्वइ, ठिङ्गिरिका न करेइ ।
सइं विढवा सइ विलसणा, विरला जणणि जणेइ ॥

तस्माद्वयमपि किमपि देशान्तरं गत्वा निजभुजाभ्यामुपार्ज्य वित्तमुचितत्यागभोगैः सफलयामो मनुष्यजन्मेति परिभाव्य स्वपितुराज्ञया गृहीतदेशान्तरगामिभाण्डा महत्या सामग्र्या नावा समुत्तीर्य समुद्रं गताः

पारसकूलं, दर्शितवन्तस्तत्रत्यस्य लोकस्य स्वभाण्डानि ।

अत्रान्तरे समागतास्तास्तिस्रोऽपि तत्समीपमुपात्तोदात्तवेषालङ्कारा वेश्याः, कथितं तदग्रे पार्श्ववर्तिना लोकेन यथैतासां स्वयमत्रत्यनृपतिना प्रसाददानमीदृशं कृतमास्ते ये केचिदत्रोपागच्छन्ति व्यवहारगत्या तैरेतासां षोडशोत्तर शतं दत्त्वैताभिरेव सह विषयसुखमनुभवनीयं, ततो वणिक्पुत्रैः एवमस्त्वित्यभि धायोचित–ताम्बूलादिदानपूर्वकं तद्गृहाणि विज्ञाय प्रेषितास्ताः स्वगृहाणि, स्वयं च भाण्ड प्रतिभाण्डक्रयविक्रयादिव्यापारेण दिवसमतिवाह्यास्तं गते चक्रवाकबान्धवे गभस्तिमालिनि प्रवृत्तेऽभि – सारिकासार्थ – परमानन्दजनके सन्ध्यासमये मन्दमन्दमुन्मिषत्सु परिदृश्यमानेषु तारतारकेषु क्रमेण तिमिरनिकरापूर्यमाणासु समस्ताशासु धृत्वा स्वस्थाने रक्षपालान् षोडशोत्तरं शतं द्रम्माणामादाय तासां गृहाणि जग्मुः, ताभिश्च गमनप्रतीक्षणा–क्षणिकचेतोवृत्तिभिरवलोक्य तान् आगतांश्चक्रेऽभ्युत्थानासनदानाद्युपचारःस्थिताश्चकियच्चिरमपि परिहासादिविनोदेन, नीताश्च क्रमेण स्वशयनीयस्थानानि, तेषु च जिनदत्तपुत्रः श्रावकः संपुटकं च खटिकां च गृहीत्वा समायातः, स च क्षणमात्रं जिनमत्या सह संभाषणादि विधाय प्रदीपान्तिकवर्त्त्येव संपुटकमुच्छोट्य लेखकं गणितुमुपचक्रमे, साऽपि तदग्र एवोपविष्टा, कियत्याऽपि वेलयाऽवादीत्–आर्यपुत्र ! कुतः स्वागतम् ?, प्रष्टव्योऽसि, तेनोदितं गिरिनगरात्, ततः सा स्वनगरनामग्रहणादानन्दिता विशेषेणोज्जयन्तादिवार्त्तामापृच्छ्य निजगाद सन्ति तत्र जिनदत्तप्रिय – मित्रधनदत्ता महाश्रेष्ठिपुत्राः सपुत्रकाः क्षेमेण ?, तेनोदितम्–सन्ति, किं तु किं विशेषेण तद्वार्त्ता पृच्छ्यते ?, तयोदितम् वयं तिस्रोऽपि तैर्विवाहिता अभूवन्, एकैकपुत्रकं च प्रसूतवत्यः,।

ततश्चौरैरिहानीय वेश्याहस्ते विक्रीताः, तेनोक्तं–वयं–त्रयोऽपि युष्मत्पुत्राः, अहं तावज्जिन– दत्तपुत्रो जिनवल्लभः, इतरौ तु प्रियमित्रधनदत्तपुत्रौ प्रियावहधनावहमकाविति, अन्ये त्वाहुः, यथा कुलदेवतया जिनवल्लभस्यार्द्धपथे सवत्सगोरूपमुपदर्शितं, गोसमीपोपविष्टवत्सपृष्ठे च तेन भवितव्यतावशादमे ध्यखरण्टितांह्रेः प्रोञ्छनं कृतं, ततो वत्सेन स्वमातुः कथितं, तया च मानुषभाषयोदितं वत्स ! कियदेतदस्य दुश्चेष्टितम् ?, अयं हि पापकर्मा निजमात्रा सममद्य भोगान् भोक्तुमुद्यतो विद्यते, ततस्तद्वचनश्रवणोपजातशङ्को जिनमतिगृहं प्रविष्टः, स एव सर्वोदन्तं पृष्टवान् ततस्तया कथिते स्ववृत्तान्ते मम माता सा त्वमितरे तु मम मित्रयोर्मातरावित्यवोचत् ततः सा साध्वसेनोत्थाय तस्य ग्रीवायां विलग्य रोदितुं प्रवृत्ता, सोऽपि तथैव, ततः परस्परं सुखदुःखप्रच्छनेन क्षणमात्रं स्थित्वा जिनवल्लभेनोक्तम्–अम्ब ! मया तावन्मनागकार्यं नाचरितं, ताभ्यां तु मम सुहृद्भ्यां स्वस्वजननीपार्श्वगताभ्यां किमपि कृतं भविष्यतीति न वेद्मि , तद् यामि तज्ज्ञापनायेत्यभि–धाय यावद्गतस्तावदुपभुक्ते ते ताभ्यां, तत आहूय द्वावप्येकत्र भणितमनेन यथैतास्ता अस्मन्मातरस्तिस्रो याश्चौरैस्तदाऽपहृताः, ततोऽतिदूरं विषादमुपगतावेतौ, संबोधितौ, जिनवल्लभेन यथा भवत्येवंविध–मनिवृत्तविषयाभिलाषाणां प्राणिनां, तस्मात्कार्यनिष्ठा भवामः, किं विषादेन ?, ततो मोचिताः सर्वैरेव प्रभूतवित्तवितरणेन स्वमातरः, आगन्तुं प्रवृत्ताः स्वदेशाभिमुखम्, अन्तरा च पर्यालोचितं स्वजननीभ्यां सह *प्रियमित्रधनदत्तपुत्राभ्यां स्वनगरमनुप्राप्तौ स्वजनवर्गस्य किमुत्तरं दास्यावः ?, तन्न युक्तं स्वदेशगमनमावयोः,* ततोऽन्यतोमुखमाहितं प्रवहणं, तन्मातृभ्यां च परमविषादमागताभ्यामतिवाहित आत्मा समुद्रमध्ये, मुक्ते च कलङ्कभीतेनेव जीवितेन, जिनवल्लभस्तु स्वमातरं गृहीत्वा समायातः स्वनगरं, तन्मुखादेव ज्ञातवृत्तान्तैर्बहुभिर्लोकैर्गृहीतान्यणुव्रतानि, सोऽपि तथाविधस्थविरान्तिके मात्रा सह प्रव्रज्यामादाय विधिना परिपाल्य गतः सुरलोकम्, अन्ये तु वदन्ति सर्व एव सजननीकाः प्राप्ताः स्वनगरं विशिष्टसंवेगागतमानसा

बभूवुः पञ्चाणुव्रतधारिणः परमश्रावकाः, एवं विज्ञायान्येनापि न कार्योऽतिप्रसङ्गो किन्तु विरतिः कार्येति ।।

❋ ❋ ❋

## अथ वाचकवरा आश्रवपराभवखिन्नास्तज्जयाय सच्चिन्तातुरा आहुः–

( शार्दूलविक्रीडितं वृत्तम् )

यावत्किञ्चिदिवानुभूय तरसा, कर्मेह निर्जीर्यते,
तावच्चाश्रवशत्रवोऽनुसमयं, सिञ्चन्ति भूयोऽपि तत् ।
हा कष्टं कथमाश्रवप्रतिभटाः, शक्या निरोद्धुं मया,
संसारादतिभीषणान्मम हहा, मुक्तिः कथं भाविनी ।।२।। [८६]

**व्याख्या- इह नरभवादिके जन्मनि *यावत्* यावत्काले यावत्परिमाणं च *कर्म* पूर्वसञ्चितपुण्यपापं *किञ्चिदिव* महाराशिमध्याल्लेशमात्रमिव *तत्फलविपाकं* सातासातं *अनुभूय* भुक्त्वा *निर्जीर्यते* नितरां जीर्णीकृत्य आत्मप्रदेशेभ्यः पृथक्क्रियते । *तावत्* तस्मिन्नेव समयादिके काले तावत्प्रमाणं कर्मदलिकं च *तरसा* शीघ्रतया *आश्रवशत्रवः* कर्मबन्धहेतवो वैरिणः *भूयोऽपि* पुनरपि *अनुसमयं* समये समये तत्पुण्यपापबन्धरूपकर्म सरूपविरूपतया *सिञ्चन्ति* पूर्वबद्धशेषे क्षिप्त्वा वर्धयन्ति । *हा कष्टं* महासङ्कटे समागतोऽस्मि, *मया* मल्लक्षणेन जनेन *आश्रवप्रतिभटाः* आश्रवरूपकर्मशत्रुयोद्धारः *कथं* केनोपायेन *रोद्धुं* समापतन्तः प्रतिस्खलयितुं *शक्याः* । *हहा कष्टं अतिभीषणा*न्महाभयानकात् *संसारात्* भवकारागृहात् *मम मुक्ति*र्मोक्षः *कथं* केनाप्युपायेन *भाविनी* भविष्यति न वेति चिन्तयामीत्यर्थः ।।२।।**

उक्तं हि उपदेशप्रासादे चम्पकश्रेष्ठिकथा–

धन्यपुरे चम्पकश्रेष्ठी चतुष्पर्वणि पौषधपारणे प्रत्यहम् अतिथिसंविभागं करोति । संपूर्णपौषधं पारयित्वा गुरूणां विज्ञपयति स्वामिन् ! मद्गृहे अशनपानादीनां लाभो देयः ततः स्वगृहे आत्मार्थे अशनादिकं निष्पादयति । पश्चात्काले प्राप्ते प्रतिश्रयं गत्वा साधून्निमन्त्रयति । ततः साधुरपि द्वितीयसाधुना सह श्रावकेण सह गच्छति । एको न युज्यते विहरणार्थं गन्तुम् । ततोऽसौ गृहं नीत्वा अचित्तनिर्दोषाशनपानादि वस्त्रकम्बलौषधादिकं च विनयेन ददाति, साधुरपि स्वल्पं गृह्णाति पश्चात्पाकाद्यारम्भभीत्या । ततो वन्दित्वा विसर्जयति, अनुगच्छति च कतिचित्पदानि । ततः स्वयं भुङ्क्ते, यच्च साधुभ्यो न दत्तं तच्छ्रावकेण न भोक्तव्यम् । यदि पुनस्तत्र ग्रामादौ साधवो न भवन्ति, तदा भोजनवेलायां द्वारावलोकनं करोति, चिन्तयति च यदि साधवोऽभविष्यंस्तदा निस्तारितोऽहमभविष्यम् । पौषधपारणके ( ऽयं ) विधिः । अनेन प्रकारेण स श्राद्धो दानं ददाति । एकदा भिक्षार्थं भ्रमन्तं मुनिं वीक्ष्याकार्य हृष्टो घृतं दातुमुद्यतः, मुनिपात्रेऽखण्डधारया यच्छन् भावेनानुत्तरगतिमार्जय्, मुनिस्तस्य लाभदर्शनान्न निषेधयति, यावन्मुनिर्न विरमति, तावन्मनस्येवं दध्यौ अहो ! लोभी मुनिरेकाकी किं करिष्यति एतावता घृतेन ? इति ध्यायन् येन क्रमेण देवलोकमार्जयत्तेनैव निपतन्नेवं ज्ञानिनोक्तः इयदूर्ध्वगत्वा मुग्ध ! मा पत मा पत । सोऽवक् नन्विहास्म्यहं किमसंबद्धमुच्यते ? ततो मुनिः पात्रमाकृष्य तं द्वादशस्वर्गे संस्थाप्यावक् हे श्राद्ध ! दानफलं विकल्पेन दूषितम् अतो निर्विकल्पं दानं देयं, लोकेऽपि शकुनस्वप्नफलं विकल्पाद्दुष्यते । ततः स श्राद्धः स्वपापमालोच्यान्तिमकल्पे गतः ।

❋ ❋ ❋

आश्रवमूलभेदानाह–

( प्रहर्षणी-वृत्तम् )

मिथ्यात्वाविरतिकषाययोगसंज्ञाश्चत्वारः सुकृतिभिराश्रवाः प्रदिष्टाः ।
कर्माणि प्रतिसमयं स्फुटैरमीभिर्बध्नन्तो भ्रमवशतो भ्रमन्ति जीवाः ॥३॥ [८७]

व्याख्या– *सुकृतिभिः* प्रवरपुण्यवद्भिरर्हद्भिः सुनिपुणपण्डितैश्च *मिथ्यात्वाविरतिकषाययोगसंज्ञा, मिथ्यात्वं* देवगुरुधर्मवस्तुस्वरूपेषु विपर्यासवती श्रद्धा, *अविरतिर्हिं*सादिभ्योऽनिवर्तनं, *कषाया* रागादिपरिणामाः, *योगा* मनोवाक्कायप्रवृत्तय इति *संज्ञा* नामान*श्चत्वार*श्चतुर्विधाः *आश्रवाः* कर्मबन्धहेतवः *प्रदिष्टाः* कथिताः। *जीवाः* प्राणिनः *भ्रमवशतो* देवगुरुधर्मसुखादिभ्रान्तिवशात्*स्फुटैः* स्पष्टाविर्भूतैः *अमीभि*राश्रवैः *प्रतिसमयं* समये समये *कर्माणि* नूतनपुण्यपापानि *बध्नन्त* आत्मप्रदेशैः सह क्षीरनीरवदभेदसंबन्धं कुर्वन्तः *भ्रमन्ति* चतुर्गतिषु पर्यटन्तीत्यर्थः ॥३॥

अथोत्तरभेदानाह–

( रथोद्धतावृत्तम् )

इन्द्रियाव्रतकषाययोगजाः पञ्च पञ्च चतुरन्वितास्त्रयः ।
पञ्चविंशतिरसत्क्रिया इति नेत्रवेदपरिसंख्ययाऽप्यमी ॥४॥ [८८]

व्याख्या– *अमी* आश्रवाः क्रमेण *इन्द्रियाव्रतकषाययोगजाः पञ्च पञ्च चतुरन्वितास्त्रयः*, इन्द्रियाणि पञ्च, अव्रतानि पञ्च, कषायाश्चत्वारो, योगास्त्रय *इति* सप्तदशभेदा इन्द्रियादिजाश्रवाः। *पञ्चविंशतिरसत्क्रिया*मीलना*दिति* प्रोक्तप्रकारेण *नेत्रवेदपरिसंख्ययापि* द्विचत्वारिंशत्प्रकारा अपि भवन्तीत्यर्थः ॥४॥

अविरतिविषये उपदेशमालोक्ता कण्डरिककथा उच्यते–

कण्डरिकप्रव्रज्यादिव्यतिकरं एकत्वभावनोक्ताष्टपञ्चशत्गाथातः ज्ञातव्यं । ततः परं –

कण्डरीकश्च राजा जातः, भग्नव्रतोऽसौ रङ्कवत् क्षुधाक्लान्तः शरीरेऽतिकृशः सेवकैर्हस्यमानो हृदये सेवकोपरि भृशं चुकोप । ततस्तेन चिन्तितं प्रथमं तावद् भुञ्जे, पश्चादेतान् शिक्षयिष्यामीति विचिन्त्य विविधाहारेरुच्छीर्षकवदुदरं भृत्वा रात्रौ प्रमदाभिः सह भोगानासेव्य जागरितो रात्रिजागरणाज्जघन्यमोत्कृष्ट-रसवत्याहारदुर्जरतश्च विसूचिकादाघज्वरशिरोर्तिभागभवत्, अहो पापस्यैतत्फलम् ! अथ भ्रष्टप्रतिज्ञं तं ज्ञात्वा रुष्टा नियोगिनः केऽपि तन्निकटे नायन्ति, तेनाकारिता अपि प्रत्युत्तरं न ददति, ततः कण्डरीको रुष्टो दध्यौ प्रभाते सर्वानप्यातान् सकुटुम्बान् हनिष्यामि, एवं स कण्डरीकः कृष्णलेश्यावान् रौद्रध्यानेन मृत्वा सप्तमावनावप्रतिष्ठाने त्रयस्त्रिंशत्सागरायुर्नारकः समुदपद्यत ।

इन्द्रियपञ्चकापायविषये उपदेशसप्ततिकथितकथानकाः प्रोच्यन्ते–

अथ स्पर्शनेन्द्रियव्याप्तिदोषमाह–

अस्तीह स्वस्तीहापरनरनारीसहस्त्ररमणीयम्। नृमणीयन्ते यत्रानेके सहिता विवेकेन ॥१॥

तत्र श्रीजितशत्रुः शत्रुप्रबलाभिमानवनवह्निः। वसुधाधीशः प्राज्यं राज्यं कुरुते सुखेनैव ।।२।।
सत्कुसुममालिकावत्सुकुमाला शशधरार्धदलभाला । सुकुमारिकेति राज्ञी तस्यासीद्रूपसंपन्ना ।।३।।
रमयेव रमारमणः स्मर इव रत्या शचीवरः शच्या । सार्धं स्वकीयपत्न्या विललास सुखान्यायानि ।।४।।
सर्वातिशायिनीच्छा तस्याः सुकुमारदेहसंस्पर्शे । तद्भर्तुर्भूद्बाढं गाढं प्रेमानुबन्धेन ।।५।।
क्षणमपि तया विनाऽसौ स्थातुं शक्नोति न बहिरन्तर्वा। किं। क्वापि जलविहीनो मीनो मुदमावहेच्चिते ।।६।।
अत्यन्ततदासक्त्या मुक्ता चिन्ता ह्यनेन राज्यस्य । कस्य न विषयव्याप्ति–र्मतिवैकल्याय जायेत ।।७।।
सचिवैरेकत्र कृतालोचैरौचित्यवस्तुनिष्णातैः । सवधूकः पृथिवीशः पाशैर्बद्ध्वा व्यमोचि वने ।।८।।
तन्नन्दनाय सकला राज्यसमृद्धिः प्रमोदतः प्रददे। निजसन्ततिमिव मोहात् प्रतिपालयति प्रजां सोऽपि ।।९।।
अटतोर्विकटाटव्यामनयोरनयोदयेन दुःखितयोः । क्वापि न सुखसामग्री मिलति स्वस्थानविच्युतयोः ।।१०।।
पथि गछन्ती व्यथया व्याप्ता तृषिता बभूव नृपपत्नी । गन्तुं शशाक पुरतः पतिर्न तामेकिकां मुक्त्वा।।११।।
एकत्र क्वापि वने स निर्जने स्वं कलत्रमवमुच्य । बभ्राम जलं पश्यन्न पुनर्लभते यथा धनं दुःस्थः ।।१२।।
तृष्णातुरा वराकी मैषा योषा म्रियेत जलहीना । तत्प्रेमापूर्णमनास्तावत्क्षुरिकाप्रहारवशात् ।।१३।।
निष्कास्य बाहुशोणितमेतच्चिक्षेप पत्रपुटिकायाम्। क्षेपेण मूलिकायाः स्वच्छं कृत्वा स्म पाययति ।।१४।।
अशनायिता ततोऽभूद्देवी भोज्याद्यलाभ– वैगुण्यात् । तच्चिन्तातुरचेता नान्नं प्रविलोकयन् प्राप ।।१५।।
तदभावेऽथ निजोर्वोरामिषमाच्छिद्य सद्य एवासौ । संरोहिण्यौषध्या व्रणसञ्जीभावमासूत्र्य ।।१६।।
पक्त्वा दवाग्निः तच्छाशामिषं ह्येतदित्युदित्वैनाम् । भोजयति स्म महीशस्तद्वशवर्ती हहा मोहः ।।१७।।
स्थाने स्थाने भ्राम्यन्नेवं गङ्गापगातटस्थायि । किञ्चिन्नगरं भेजे सह देव्या सपदि नरदेवः ।।१८।।
विक्रीयाभरणानि स्वर्णमयानि स्वकीयगेहिन्याः । वाणिज्यं कुरुतेऽसावभ्यस्यन् वणिग्वृत्तिम् ।।१९।।
प्राहान्यदाऽस्य देवी स्वामिन् पूर्वं सखीजनान्तःस्था । गीतविनोदकथाभिर्गतमपि नो कालमविदमहम् ।।२०।।
साम्प्रतमेकाकिन्याः प्रयात्यनेहा अतीवकष्टेन । तत्कमपि मानुषं मे प्रयच्छ सद्यः सखायमहो ।।२१।।
आकर्ण्यैतद्वचनं गीतकलावानवेत्य पङ्गुनरः । सघन्यरक्षि निजके पत्नीमनसः प्रमोदकृते ।।२२।।
न पुनरिदं विज्ञातं न निरालम्बा वनेषु वल्लयोऽपि । आश्रित्यासन्नस्थं निम्बमथास्त्रं च तिष्ठन्ति ।।२३।।
एवं वामाः कामानुरूपमथवा विरूपमत्यन्तम् । आसन्नमेव पुरुषं स्मरार्दिताः खलु निषेवन्ते ।।२४।।
पङ्गोः सङ्गममात्रादमात्रगीतादिमोहिता राज्ञी । तेनैव समं भोगान् बुभुजे रागो हि दुर्जेयः ।।२५।।
विकलयति कला कुशलं, हसति शुचिं पण्डितं विडम्बयति । अधरयति धीरपुरुषं, क्षणेन मकरध्वजो देवः ।।२६।।
अत्रान्तरे विनोदाज्जगाम गङ्गाविलोकनार्थमसौ । संप्रेर्य सलिलमध्येऽक्षिपत्तथा स्वं नरकगर्त्ते ।।२७।।
पुण्यात् क्वापि विलग्वस्तटे स्फुटे नात्मनीनभाग्येन । श्रान्तः सुष्वाप तरोश्छायायामेष निश्चिन्तः।।२८।।
अपसरति नैव वृक्षछाया माया यथाऽङ्गना कायात् । तस्याश्रयप्रभावादचिन्त्यशक्तीह यत्पुण्यम् ।।२९।।
तत्पुरपतिरस्तगतः सुतहीनस्तदनु मन्त्रिभिर्दिव्यैः । अधिवासितैः स राज्ञः पदवीमारोपयाञ्चक्रे ।।३०।।
सुकुमालिकाऽथ तेना सह कामाननुभवन्त्यपास्तधना । चोल्लकमध्ये क्षिप्त्वा भिक्षार्थं भ्रमति दीनास्या ।।३१।।
पङ्गुर्मधुरध्वनिनाऽध्वन्यानपि मोहयन् प्रतिग्रमम् । गीतानि गायति स्म प्रमोदिनः स्युर्यतो लोकाः ।।३२।।
जितशत्रुनृपतिनगरे दैववशादागता गतानन्दा । दृष्टा कष्टापन्ना वातायनवर्तिना राज्ञा ।।३३।।
आकार्याकार्यपरा पृष्टा स्पष्टाक्षरेण मृदुवचसा । भूस्थायिन्याऽथ तया न्यगादि नीचैः कृताननया ।।३४।।

पितृदैव भूमिदेवैः प्रसह्य पतिरेष एव मे प्रददे । शीलं प्रपालयन्ती पतिव्रताहं भ्रमन्त्यस्मि ।।३५।।
साधु पतिव्रतके त्वं किं ब्रूमोऽतः परं भव, चरितम् । मद्दृष्टेरपसर लघु प्रोच्येति चकार निर्विषयाम् ।।३६।।

अथ रसनेन्द्रियव्याप्तिस्त्याज्येत्यत्रार्थे अङ्गरुहकथा –

अतिपृथुला मिथिलाख्या नगरी शिथिलाऽस्ति या न दौस्थ्येन । तस्यां बभुब राजा विमलयशाश्चन्द्रविमलयशाः ।।१।।
तत्परिसर– प्रदेशोद्याने ध्याने निविष्टशिष्टमनाः । समवसृतः केवल भृद्गणभृद्गणपरिकरेण सह ।।२।।
तत्पदकमल –प्रणति प्रह्वमना भूधनाग्रिमः प्रययौ। नत्वा स्थित्वा पुरतस्तद्गदितं धर्ममश्रौषीत् ।।३।।
अक्षाणां रसनं हि दुर्जयमथो दुष्कर्मणामष्टके, दुष्टं मोहनमोहनीयमुदितं ब्रह्मव्रतेषु व्रतम्।
गुप्तिष्वादिमगुप्तिरेव विषमा जेतुं जगद्देहिनां, चत्वारोऽपि हि दुर्जया निगदिता एते जिनस्वामिना ।।४।।
ऊचे च महीमघवा भगवन् शेषेन्द्रियेभ्य एतेभ्यः। कस्माद्युर्जयमुक्तं युक्तं विनिवेदयाम इदम् ।।५।।
क्षुत्परिपीडितजन्तोर्न मधुरगेयानि नापि रूपाणि । न मनोमोहनमोहनमपि चेतस्तोषपोषकृते ।।६।।
न हि चन्दनप्रलेपनमङ्गे तुङ्गे स्थितिं न चावासे । किञ्चित्सुखायते खलु न हि क्षुधार्त्तस्य सद्वस्तु ।।७।।
मूले यथाम्बुसिक्तस्तरूः फलत्यतुलपुष्पसंभारः । मूले शुष्यति शुष्यत्फलप्रसूनः स एव स्यात् ।।८।।
यतः–जहा दवग्गी पउरिंधणे वणे, समारूओ नोवसमं उवेइ।
एविंदियग्गी विपगामभोइणो, न बंभयारिस्स हियाय कस्सई ।।९।।
एवमिहेन्द्रियतरुरपि रसने सरसाऽशनैस्तरां (बहु) प्रीते । बहुभिर्विकारकुसुमैः पुष्पति पापैः फलत्यपि च ।।१०।।
तस्मादजय्यमिदमेव हि देहे देहिनां रसननाम । अस्मिन् विजिते शेषाण्यप्यक्षाणीह विजितानि ।।११।।
अत्रोदाहरणं शृणु सद्यः कृत्वाऽवधानमवनीश। भुवलयनाम्नि नगरे भूपतिरजनिष्ट शिवकर्मा ।।१२।।
द्वे पत्न्यौ तस्य स्तः शुभसुन्दर्यशुभसुन्दरीनाम्न्यौ । नामोचितपरिणामे जज्ञाते द्वौ सुतावनयोः ।।१३।।
प्रथमाङ्गजोऽस्ति विबुधः सुधीश्च सरलः कृज्ञतोपेतः । अन्यस्याश्चाङ्गरूहो जज्ञे द्वेधाऽपि मतिविद्दिलः ।।१४।।
स च समभूद्सलोलः खाद्याखाद्यादिभक्षणप्रवणः। पेयापेयं गणयति न हि बहिरटति प्रलुब्धश्च ।।१५।।
अत्यन्तं रसगार्द्ध्याद्विषमामयभानं वपुरमुष्य। वीक्ष्याजुहाव वैद्यानेतक्षनकः क्षमाधीशः ।।१६।।
इत्याचख्युर्भिषजः करोति यद्येष लङ्घनानि तदा । रोगोद्वेगः सकलस्तुर्णं प्रलयं प्रयात्येव ।।१७।।
रसलोलुपतादोषादाकल्पोऽनल्प एष संपन्नः । रसलोल इति ख्यातिर्लोककृता सत्यतां नीता ।।१८।।
इत्युक्तेऽपि हि वैद्यैर्न विधते लङ्घनानि चैष पुनः। ववृधे महोपतापस्तृष्णाभर इव निदाघर्तौ ।।१९।।
भ्रातुर्वचसाऽन्येद्युर्निरन्न एवैष लङ्घनायास्थात्। तं प्रेक्ष्य खणऽमखाद्यकमोदककूरादि भुञ्जानम् ।।२०।।
चिन्तयति धिग्धिगेनं स्वकीयजठप्रपुरणव्यग्रम् । यो दुष्टनिकृष्टात्मा भोक्तारं नापरं सहते ।।२१।।
जानाति स्वयमेव हि भुङ्क्ते मधुरान्नामोदकाद्यपि च । परमेष सपत्नीजो भ्राता हितकारणं न हि मे ।।२२।।
निश्चित्यैवं चेतसि दुष्टमभाषिष्ट झटिति रसलोलः । रे मामनार्य भोज्यान्निवार्य मिष्टान्नमत्सीह ।।२३।।
कोधविरोधेनान्धीभूतः प्रेतावतारमिव लब्ध्वा । इत्युक्त्वा स दधावे शस्त्रकरस्तस्य हननार्थम् ।।२४।।
तरसैष तत्प्रहारादपसृत्य सुखेन संस्थितो जीवन् । विबुधो विबुधो धर्मे वैराग्यात्संयममधत्त ।।२५।।
चरणाचरणात् क्षीणाखिलदुष्कर्मा शमामृताधारः । सोऽहमवाप्तोज्ज्वलतरकेवलबोधः समेतोऽस्मि ।।२६।।
विमलयशःक्षितिपतिना पृच्छा स्वच्छाशयादथो विदधे । भगवन् विकलोरुधिया विकलेन किमतः परं प्रापि ।।२७।।
गुरुराह धवलदन्तद्युत्या श्वेता दिशंस्तदा कुर्वन् । राजन्नयं स्वयं भूभर्त्ता धर्त्ताऽधृतैरभवत् ।।२८।।

स्निग्धमधुरान्नभोक्ता रसलाम्पट्यादसौ निकृष्टात्मा। वनदव इव न विमोक्ता कस्याप्यश्नाति मांसमपि ।।२९।।
विहिते पलस्य पाकेऽन्यदा मुदा तस्य सुपकारेण। मार्जार्याऽवार्यतया सकलं जंगलं व्यधायि गले।।३०।।
भीतेनैतेनाथो क्वापि परासोः शिशोः पलमलायि । संस्कृत्य भूक्तिसमये परिवेषितमवनिनाथस्य ।।३१।।
तद्भक्षणात् क्षणात् स क्रूराध्यवसायवासितः समभूत् । प्रतिदिनमेकैकं शिशुमशनस्थानीयमसृजदहो ।।३२।।
एतदकार्याचरणादुपद्रुतस्तेन पूर्जनः सकलः। मन्त्रिण आलोच्य मिथः क्षितिपं बद्ध्वा वनान्तरं निन्युः ।।३३।।
अस्मल्लघुरनुजोऽथ क्षितीशभावे नियोजयाञ्चक्रे । मांसाशनतृष्णाभागन्यो रक्षोवदाचरति ।।३४।।
भुङ्क्ते मनुष्यपललं न कलङ्कं गणयति स्वकीयकुले । स कदाचिद्भिल्लार्भकलुब्धः खलु बम्भ्रमीति वने ।।३५।।
केनापि किरातेन क्रुद्धेनाकर्णकृष्टबाणेन । विद्धो मर्मणि मरणं शरणं चक्रेऽतिगुरुकर्मा ।।३६।।
मृत्वा सप्तमनरकावन्यामज्ञानकारकः सुतराम्। गत्वा भवं भ्रमिष्यति दुरन्तमात्यन्तिकमनन्तम् ।।३७।।
इत्याकणर्य सकर्णः केवलिमुखकमलनिर्गतां वाणीम्। विमलयशाः प्रव्रज्य प्राप्तज्ञानो जगाम शिवम् ।।३८।।

अथ आघ्राणे यो दोषस्तमुद्दिश्य निदर्शनमाह नरवर्माकथां –

अत्रैव वसन्तपुरे नरसिंहाख्यः क्षितीश्वरः समभूत् । तस्य ज्येष्ठगुणाढ्यस्तनयो ज्येष्ठोऽस्ति नरवर्मा ।।१।।
परिमलमाप्य मनोज्ञं स चैकवारं हि जिघ्रति प्रसभम् । न हि वारितोऽपि तिष्ठति स मातृपित्रादिभिरभीतः।।२।।
नान्येषां विषयाणां व्याप्तिस्तस्यास्ति तादृशी ह्यधिका । यादृगभुन्नासायाः सौरभलोभाधिकत्वमहो ।।३।।
तस्यान्यदा सपत्नी माता निजतनयराज्यतृष्णार्त्ता। मञ्जुषायामुज्ज्वलविषपुटिकामक्षिपत् कुधिया ।।४।।
तस्यान्यदा निदाघे नदी जले दीव्यतः प्रमोदार्थम् । उपरितनेऽम्भःपूरे दूरे गत्वा व्यमुञ्चदसौ ।।५।।
तत्राययौ तरन्ती यत्रास्ते राजनन्दनः स तरन् । नूतनवस्त्रनिबद्धा कौतुकात्तेनाथ सा जगृहे ।।६।।
दृष्ट्वा हृष्टेन हृदा तामून्मुद्रैष गन्धमादत्ते। तस्याघ्राणवशेन क्षणेन मुक्तस्ततः प्राणैः ।।७।।
तुष्टा हृदये दुष्टा पापिष्ठा सा सपत्निका जननी । निजनन्दनराजपदप्राप्त्या व्याप्ता सुखश्रेण्या ।।८।।
स यथा गन्धाघ्राणप्रबलघ्राणः परासुरत्रासीत्। तद्वदिहान्योऽपि जनो मुत्कलनासेन्द्रियोऽत्यसुखभाक् स्यात् ।।९।।
एवमवेत्य जना भो घ्राणेन्द्रियनिग्रहं कुरूत येन । स्यादत्र परत्रापि हि सर्वत्र च शर्मसंभारः ।।१०।।

अथ चक्षुरिन्द्रिये लोलाक्षदृष्टान्तम्–

आस्तेऽत्र काञ्चनपुरं यत्काञ्चनभूषणान्वितजनौघम्। कांचनं शोभां धत्ते, तामसमा ( मां ) यातिनिर्वचना ।।१।।
सन्नालीकमलं प्रफुल्लकमलं सद्राजहंसाश्रितम्, सच्चक्रप्रियकारकं समकरं प्रोद्यल्लताविद्रुमम्
श्वेतोद्यच्छाविदृश्यमानकलशं तृष्णाजनैः संकुलं, यद्धत्ते सरसस्तुलामनुकलं चित्रं जडा (ला) संगिनो ।।2।।
तव श्रीनिलयारब्यः श्रेष्ठी द्वेधापि तद्गृहे कान्ता, वरिवर्त्ति–यशोभद्रानिद्रानिमुक्तपद्माक्षी ।।3।।
समजनि तयोः सविनयस्तनयः कुनयप्रवृत्तिरिक्तमनाः । सल्लक्षणलक्षिततनुरतनुरिवोद्दामरूपश्रीः ।।४।।
लक्षणविद्भिः प्रोचे स्त्रीलोलः प्रायशः शिशुर्भविता । सोऽपि हि पश्यति वनिता या यास्तासु प्रसारितदृग् ।।५।।
लोकैर्लोलाक्षोऽयं तस्मादाख्यायि दुर्धरा जनगीः । यो यादृक्किल कुरुते कर्म तथा प्राप्नुयान्नाम ।।६।।
सङ्क्रान्तस्तारुण्यं दृष्ट्वा यौवनवतीः सुरूपवतीः। स्त्रीर्धावित्वाऽऽलिङ्गति विगोपयत्यपि विडम्बयति ।।७।।
पितृदत्तामिति शिक्षामेष विषानुकृतिधारिणीं मनुते । कुरुते लोलादूत्वं सत्यं सत्यं त्यजन् दूरे ।।८।।
दुष्टाचरितैरेतैरेक्षष जनौघेन ताड्यते पशुवत्। उद्बध्यतेऽतिनिबिडैर्निगडैर्विनियन्त्रयते बहुशः।।९।।
पितृदाक्षिणयान्मुमुचे तथापि दुर्लक्षणं क्षणं नौज्झत्। न हि शिक्षितोऽपि बाढं कपिर्वपुश्चपलतां त्यजति।।१०।।

नटविटगोष्ठयां तिष्ठन्नश्रौषीन्मगंधदेशजा नारीः। रूपरम्भाभिर्वर्याः सोऽभूतासां दिदृक्षावान्।।११।।
वाणिज्यस्य छलतः प्रभूतमादाय पैतृकं द्रविणम्। सोऽचालीत् प्रति मगधं लात्वा तत्रापणं तस्थौ।।१२।।
व्यसाये वसति मतिर्न हि वस्तुग्रहणधीः परिस्फुरति। ध्यायति मनसि सुरूपामेकां सीमन्तिरनीमेव।।१३।।
दृष्ट्वाऽन्यदा समदनामुद्रामवयोऽभिरामरूचिराङ्गाम्। पस्पर्श करेण बलाल्लोलाक्ष लोलाक्षः ।।।१४।।
दृष्टो दुष्टोऽयमिति क्षितिपतिपुरुषैः क्षणेन बद्धोऽसौ। जगृहे सकलं द्रव्यं क्रव्यमिव त्वरितमेव खगैः।।१५।।
पुरतोऽथ नीयमानः क्षितीशितुस्तस्य जनकमित्रेण। द्रुमनामश्रेष्ठिवरेणासावुपलक्षयाश्चक्रे।।१६।।
पुष्कलधनं च दत्वा व्यमोचि तन्निग्रहात्क्षणात्तेन। धर्मेणेव हि जन्तुर्दुर्वारापारपापभरात्।।१७।।
आनिन्ये निजसद्मनि कियन्तमपि कालमेष तत्रास्थात् ।लोलाक्षतया लुब्धस्तत्पत्न्यां धनवती– नाम्न्याम्।।१८।।
वस्त्रग्रन्थिनिबद्धः कथञ्चिदङ्गारकोऽपि किं तिष्ठेत्। दुग्धेनापि हि धौतः किं काकः श्वेततां धते ।।१९।।
यस्य किल यः स्वभावः स हि तं प्राणात्ययेऽपि न त्यजति । हितमहितमपि न वेत्ति च पिहितः पापैः पुराचरितैः।।२०।।
तद्व्यतिकरमवगत्य श्रेष्ठी वैराग्यमाप निष्पापः । सर्वमपास्य गृहस्वं स्वकीयमस्वीयमिव तरसा।।२१।।
कक्षीचक्रे दीक्षामक्षामस्थामवान् क्रियातपसोः। तदंगृहगृहिणीभोक्ता लोलाक्षः समजनि प्रायः।।२२।।
सुरसुन्दरीति राज्ञी दृष्टा दृग्भ्यामनेन रूपवती । तस्यामनुरक्तमना मनाग् न लेभे रतिं क्वापि ।।२३।।
श्यामे श्यामासमये प्रसृते भुवि विस्तृते तमःपुरे राज्ञीसद्म प्रविशन् विवशः स दुराशयः स्वैरम्।।२४।।
विद्यासाधकपुंसा केनापि ततोऽन्तराल एव धृतः । अशरण्येऽरण्येऽसावनायि न हि रागिणां सौख्यम् ।।२५।।
देवीबलिदानकृते तदीयदेहामिषं स चिच्छेद। नारकतुल्यं दुःखं समन्वभूत्तत्र लोलाक्षः ।।२६।।
विद्यासाधकपुरुषं परुषं प्रत्याह मम समाध्यर्थम्। भो ! दर्शयैकवार भार्या भूमीपतेर्वर्याम्।।२७।।
पश्चादपहर जीवितमपि दृष्टे दृष्टिसौख्यदे रूपे। इत्यादिवपुर्मानसदुःखार्तः कालमनयदसौ।।२८।।
तावत्कश्चित्काश्चनपुराधिवासी पितुस्तदीस्य । शैशवमित्रं–भुवनोत्तमसार्थेशः समायातः।।२९।।
कृत्वा वा वाणिज्यमयं विनिवृत्तस्तत्प्रदेशभूभागे। विश्राम्यन् दैववशाल्लोलाक्षमवेक्ष्य विस्मितवान्।।३०।।
समभून्निर्भय एष स्वकीयवृत्तान्तमाख्यदेतस्य। तेनापि वपुःसारा स्फाराऽस्य हि कारयामासे।।३१।।
सज्जीकृत्य व्यमुचत्सुहृदः खलु कस्य नो हिताय स्युः । भूयोऽपि भूपपत्नीरागादागान्नृपावासम्।।३२।।
ववले विलक्षवदनस्तदर्शनमलभमान एवायम्। निजधाम काममोहितमतिर्न्यगादीति धनवत्या ।।३३।।
एतावन्ति दिनानि क्व स्थितमेषोऽपि कूटमाचष्ट । वस्तुव्यवयसायवशाद्वैयग्यं भेजिवानस्मि ।।३४।।
निःपुण्य इव निधानं रतिसुन्दर्याः स दर्शनं लेभे । संप्राप्य राजभुवनं कथमपि भाग्याभ्युदयवशात् ।।३५।।
उन्मत्त इवैतां प्रति धावन् धार्ष्ट्येन सुष्टु दुष्टमनाः । विधृतो राजन्यभटैर्बद्ध्वा च विडम्बयाञ्चक्रे।।३६।।
रोषारूणेक्षणेन क्षणेन भूमिभूजा समादिष्टम् । उलम्बयत बहिर्वटशाखायां स्तेनदेश्यमिमम्।।३७।।
तैरपि तथैव चक्रे मृत इति मत्वाऽथ तैः परित्यक्तः। त्रुटितोरुकण्ठापाशः पुण्यवशात्प्राप चैतन्यम्।।३८।।
प्रपलाय्य जवादगमद्धनवत्याः सद्म पद्ममिव मधुकृत्, सज्जीचक्रे स तया तद्रागासक्तचित्ततया ।।३९।।
केवलिनमन्यदाऽऽगतमवेत्य भूपोऽभिवन्दितुमथागात् ।पौरैः सहसा सा किल लोलाक्षोऽप्येष तत्रारं ।।४०।।
चटुलाक्षत्वात् पश्यन् प्रफुल्लदृष्ट्या मुखं नृपतिपत्न्याः। कणमध्यात्तुषवदसौ राज्ञा निःसारयाञ्चके ।।४१।।
निर्गच्छन्नथ काश्चत्कमनीयां कामिनीं स्पृशन् सधवाम् । पत्या शक्त्या प्रहृतः पञ्चत्वं प्राप्य पापमनाः ।।४२।।
रौद्रध्यानान्नरके तृतीयके नारकः प्रकृष्टायुः । समजनि ततोऽप्यनन्तं भवं भ्रमिष्यत्यकृतपुण्यः ।।४३।।

केवलिना तद्वृत्ते स्पर्शनविषये निवेदिते राज्ञः । वेराग्यादग्राहि क्षितिपेन जिनोदिता दीक्षा ।।४४।।
कृतकर्मक्षय एष प्राप्तोज्ज्वलकेवलः शिवमवाप । इत्थं चक्षुर्दोषः कस्य न दुःखस्य पोषाय ।।४५।।

अथ श्रोत्रेन्द्रियदोषोपरि सुभद्रादृष्टान्तमाह–

अत्रैव वसन्तपुरे परैः परैरप्यनाप्तविनिवेशे । यत्र वसन्ति वसन्ताः प्रसरन्महामोहाः ।।१।।
तत्रास्ते ननिरस्तेष्टलोककोकप्रमोदसन्दोहः । रविरिव विकसद्धामा नश्यब्क्यामास्यताश्यामः ।।२।।
धनद इव यः समृद्ध्या धनदो धनदोऽर्थिनातिहात्यर्थम् । भार्या तस्य सुभद्रा स्वकीयपत्युः स्फुरङ्गद्रा ।।३।।
वाणिज्यार्थ देशान्तरं प्रतस्थेऽन्यदा स धनदाख्यः । लात्वाऽगण्यं पण्यप्राग्भारं भूरिलाभकृते ।।४।।
अथ तत्रैव कुतोऽप्यागादागानुकृतकिन्नरप्रकरः । यः पुष्पशालनाम्ना प्रसिद्धिभाग्गायनप्रवरः ।।५।।
तडीतगानपानप्रवणः प्रगुणा बभूवुरिह लोकाः । यन्मधुरध्वनिपुरतः पिकोऽपि को रागभृच्चक्षुः ।।६।।
गुरु इव माधुर्यरसात् प्रजाभिरिव मक्षिकभिराकीर्णः । स कदाचिद्गीतज्ञो गायन् गीतानि राजपथे ।।७।।
ददृशेऽथ सुभद्रायाश्चेटीभिश्चटुलवाक्यपेटीभिः । तन्मधुरध्वनि लुब्धाः कुरङ्ग्य इव तस्थुरेकाग्राः ।।८।।
वेलाव्यतिक्रमे सति महाति गतास्ताः स्वमोक ईश्वर्या । निर्भर्त्सितस्ततस्ताः परुषाक्षरया गिरा बाढम् ।।९।।
उच्चे ताभिः स्वामिनि मैवं कुरु रोषपोषमस्मासु । स्थितमेतावत्कालं श्रोत्रपुटापेयगेयरसिकतया ।।१०।।
यद्येवं तद्वेयं तदा मदीयश्रुतिद्वयातिथि ताम्। नेतव्यं युष्माभिर्यथा तथा तस्य सांनिध्यात् ।।११।।
प्रतिपेदेऽदस्ताभिस्ततोऽन्यदा देवतामहाचैत्ये । यात्रोत्सवे प्रवृत्ते मिलिते नारीनरप्रकरे ।।१२।।
प्रारब्धे मधुरध्वनिगाने पानेऽमृतस्य कर्णपुटे । तस्मिन्नेव सुभद्रा संप्राप्ता तं विलोकयितुम् ।। १३ ।।
तावद्गीत – समाप्तौ स पुष्पशालः सुखेन सुष्वाप । सद्यो विसृष्टलोकः प्रपद्य चैत्यस्य पृष्ठतटम् ।।१४।।
दासीभिरदर्शि दृशा तस्या यस्यातिकुत्सितं रूपम् । तद्गीवितमपि धिगिदं वादिन्या थूत्कृतं प्रति तम् ।।१५।।
गीतिरपि निन्दनीया दन्तुरवदनस्य कृष्णवपुषश्च । रूपवियुक्तेन हि किं क्रियते गुणगौरवेणास्य ।।१६।।
इति निन्दन्ती सुदती जगाम धाम स्वकीयमाश्वेषा । सौभद्रीयं विलसितमस्मै केनापि किल कथितम् ।।१७।।
रुष्टोऽथ पुष्पशालः कथं निकृष्टा तथाऽपि पापिष्ठा । मामिति निन्दति निर्हेतुका हि मद्वैरिणी जज्ञे ।।१८।।
न हि मर्मज्ञं बन्दि नमथो कविं शस्त्रपाणिनं चापि । वैद्यं च सूपकारं प्रकोपयेज्ज्ञानवान स्वगुरुम्।।१९।।
कस्यादपि तद्रुपायादपायमस्याः करोमि बुद्ध्याऽपि । देशान्तरसंप्रस्थितमवेत्य तस्या विवोढारम् ।।२०।।
तत्सभासन्नमसावसौमनस्याद्रुपेत्य सामर्षः । स यथा हि सार्थवाहश्चचाल विषयान्तरंनिलियात्।।२१।।
धनमर्जितं प्रभूतं यथाऽऽप पृथ्वीपतेश्च सन्मानम् । प्रस्थाय ततःमीशलेनात्कुयोद्रामधामायात्।।२२।।
इत्यादि सकलमेतच्चरितं मतिकल्पितस्वगीतगतम्। निर्माय रजनिसमये जगौ महामञ्जुलध्वनिना ।।२३।।
कलगीतमनेन तथा सुभद्रायाः । विरहानलः प्रकामं सर्वाङ्गे दीप्ततां प्रापत्।।२४।।
मोटयति निजं देहं चिते चापल्यमाकलय्याशु। रागोरगविषलहरीव्याप्ता प्राप्ताऽतिविषमदशाम्।।२५।।
सौधोपरिस्थमप्यात्मानं भूवर्त्तिनं हि सा मेने । कः कलयति वैकल्यं न कलावानपि हि कामार्तः।।२६।।
गेये रसप्रकर्षायाते ज्ञाते स्वकान्तवृत्तान्ते। साऽऽकाशे निजपादं दत्वा भूमौ पपात रयात्।।२७।।
तस्मात्प्रहारमूर्बावशान्मनोजन्मरागभरविवशा । मरणं शरणीचक्रे वक्रे दैवे कुतः सौख्यम्।।२८।।
कृत्वेति वैरनिर्यातनंघनं पुष्पशालको मुमुदे । अन्यत्र जगाम पुरे निर्वाहं गीतिभी रचयन् ।।२९।।

इत्थं श्रोत्रेन्द्रियवशगता सा सुभद्राऽस्तभद्रा, संप्राप्ताऽस्तं धनपरिजनप्राणनाथप्रमुक्ता ।
दुःखिन्यासीदिह परभवेऽप्युग्रकष्टैकपात्रं, भाविन्येवं श्रवणरसः प्राणिनां निग्रहार्हः ।।३०।।

मनोदण्डे पीठमहापीठकथा –

विदेहनाम्नि क्षेत्रे वज्रनाभश्चक्री राज्यं त्यक्त्वा गृहीतचारित्रश्चतुर्दशपूर्वधरः सञ्जातः, चत्वारोऽन्ये तल्लघुभ्रातरो बाहुसुबाहुपीठमहापीठनामानोऽप्येकादशांगधरा जाताः, तेषां मध्ये बाहुनामा पञ्चशत–साधूनामाहारमानीयार्पयति, द्वितीयः सुबाहुनामा तावतां वैयावृत्त्यं करोति, द्वौ चान्यौ पीठमहापीठनामानौ स्वाध्यायं कुरुतः, एकदा गुरुणा बाहुसुबाहुमुनी प्रशंसितौ तत् श्रुत्वा पीठमहापीठयोरमर्षः समुत्पन्नः, विलोकयत गुरोरविवेकित्वं ? यद्यपि स रागस्वभावं न त्यजति, स्वकीयवैयावृत्यकारिणं भक्तपानीयादिभक्तिकारकं प्रशंसति, आवां द्वावपि प्रतिदिनं स्वाध्यायं तपश्च कुर्वः, परमावां न प्रशंसति, इति मत्सरतस्तौ चारित्रं पालयतः पश्चादन्तं पञ्चापि साधवः कालं कृत्वा सर्वार्थसिद्धौ देवत्वेनोत्पन्नाः, ततश्च्युत्वा वज्रनाभजीवः श्रीऋषभदेवः, बाहुसुबाहुजीवौ भरतबाहुबलिनामानौ तदङ्गजौ, पीठमहापीठजीवौ त्वीर्ष्याकरणेन बद्धस्त्रीवेदौ ब्राह्मीसुन्दरीत्वेनोत्पनौ ।

वचनदण्डोपरि कुरुटुत्कुरटकथानकं अथोपदेशप्रासादे–

कुणालानगर्याः खालाभ्यर्णे द्वौ ऋषी कायोत्सर्गेण स्थितौ । तन्महिम्ना मेघो नगरस्य बहिर्वर्षति साध्वोर्जलोपसर्गो मा भवत्विति । लोकैः सम्भूय तावुपद्रुतौ । युवयोर्महिम्ना नगरे महातापोऽस्ति, अरिष्ट–मेतदस्माकम् ! इत्युक्त्या तयोर्ध्यानभङ्गो जातः, तेषामुपरि रौद्रध्यानमुत्पेदे, तेन द्वाभ्यां ताभ्यामयं श्लोकः प्रोक्तः–

वर्ष मेघ ! कुणालायां, दिनानि दश पञ्च च । मुशलप्रमाणधाराभिर्यथा रात्रौ तथा दिने ।।

एतत्कथनानन्तरं जलैः पुरं प्लावितं तरदुदधौ गतं, तौ ऋषी अपि नगरजलेन प्लावितौ अशुभध्यानेन सार्द्धं स्वदेहौ प्रोज्झतुः, द्रव्यभावाभ्यां ब्रुडितौ तौ नरकं जग्मतुः ।

कायदण्डविषये तु इदं कथानकं –

द्वारवत्यां धन्वन्तरिवैद्यो बहुसावद्यात्मकः, द्वितीयो वैतरणी मूलपुष्पादिबहुजीवहिंसात्मकोऽपि ग्लानमुनीनां निरवद्यं ददाति भैषजम् ।एकदा कृष्णो जिनं पप्रच्छ–स्वामिन् ! वैद्यानां का गतिः ? यतो लोका अपि पठन्ति–

कवि चित्रकर पारधी, वली विशेषे भट्ट । गांधी नरक सिधावीया वैद्य देखाडे वट्ट ।।

अस्मन्नगरवासिनौ धन्वन्तरिवैतरणिनौ, तयोः क्व गतिर्भाविनी ? हे नृप ! आद्योऽप्रतिष्ठान– प्रस्तटे, द्वितीय आरम्भं कुर्वन्नपि मनसा बिभेति किञ्चिदतः वनवानरत्वं प्राप्स्यति, तत्र मुनिं कण्टकविद्धपादं वीक्ष्य जातिस्मृत्या च शल्योद्धरिण्यौषध्या निष्कण्टकं करिष्यति, मुनिप्रोक्तधर्मोपदेशात्पूर्वकृतपापान्यालोच्य त्रिदिनानशनेन वानरः सहस्रारं प्राप्स्यति, आद्यस्तु षट्कायहिंसातः पुनः पुनस्तत्रैवोत्पत्स्यते, कपर्दिकानन्ततमे भागे च क्रयविक्रयत्वं प्राप्स्यति ।

क्रोधविषये तु चण्डकौशिकसर्पकथा नवपदप्रकरणटीकायां उक्तं–

एकस्मिन् गच्छे क्षपको वर्षाकाले मासोपवासपारणकदिवसे क्षुल्लकेन सह भिक्षाचर्यायां प्रविष्टः कथञ्चिदनुपयोगतो मण्डूकिकां पादेनाक्रान्तमात्रां प्राणेभ्यः पृथक्कृतवान्, ततः क्षुल्लकेनोदितः क्षपकर्षे ! त्वया मण्डूकिका व्यापादिता, क्षपक इतस्ततस्तत्स्थानवर्तिनीरन्या अपि मृतमण्डूकिकास्तस्योपदर्श्य रे रे

दुष्टशैक्ष ! किमेता अपि मया व्यापादिताः ? इति जजल्प, क्षुल्लकस्तु क्षुत्क्षाम एषः नायं समयो ऽस्यं प्रतिप्रेरणायां, प्रस्तावान्तरे स्मारयिष्यामीति विचिन्त्य तदा मौनमेवाशिश्रियद्, इतरस्तु भिक्षामादाय स्वोपाश्रये गुर्वालोचनादिपूर्वं भोजनादिव्यापारावसाने सायंतनावश्यकवेलायां यावदालोच्योपवेष्टुमारेभे तावत् काल एष स्मारणाया इति विचिन्त्य क्षल्लकः क्षुपक । मण्डूकिकामालोचयेति स्मारयामास, सोऽप्यहं मुनि मध्येसाधूपहसितोऽनेन तद्दर्शयाम्यमुष्य दुर्विनय–फलमिति संक्रुद्धमानसः समादाय स्वोपवेशनपठिं प्रधावितो स्योपरि तावदन्तराल एवापतितः स्तम्भे मृतो मर्माघातेनोदपादि विराधितश्रामण्यो ज्योतिष्केषु । स्वायुःक्षये ततश्च्युतोऽत्रैव भरतक्षेत्रे कनकखलाभिधानतापसाश्रमे पञ्चशतसङ्ख्यतापसाधिपति–भार्यायास्तापस्या उदरे उत्पेदे, जातश्चोचितसमये, गतो वृद्धिं काल–क्रमेण, स्वभावतश्चण्डः कौशिककुलश्चेति चण्डकौशिकनामा लोके प्रसिद्धिमगमत्, अन्यदा च परलोकान्तरिते पितरि स एव कुलपतिः संवृतो, वनखण्डमूर्छ्या न ददाति तापसवर्गस्य फलपुष्पकन्दाद्यादातुं, ततो गतोऽन्यवनमसौ, अपरेद्युश्च नातिदूरे श्वेतव्यानगर्या राजकुमारकाश्चण्डकौशिकस्य प्रयोजनान्तरेणाटवीं गतस्य सामागत्याश्रमं भङ्क्त्वा वनखण्डं बीजपूरकादिफलानि गृहीतवन्तः, ततो गोपालदारकैः कथिते चण्डकोशिकोऽतिरोषपूरितः परशुहस्तः प्रधावितस्तद्वधाय, सर्वेऽपि प्रपलायिता दिशोदिशम्, एषोऽपि वेगेनागच्छन् प्रस्खलितः कथञ्चित् पपात भूमौ तेनैव कुठारेण विदारितमस्तको जगाम यममन्दिरं, जज्ञे तत्रैव दृष्टिविषसर्पत्वेन, तापसा अपि तं मृतमाकर्ण्य भूयोऽपि समाजग्मुस्तमेवाश्रमं, सर्पस्तु कतिपयदिनैरूपरुढ–प्रौढविषशक्तिः पूर्वाभ्यासेन तत्रैव वने गाढं मोहमुपगतः परिभ्रमन सर्वतो यत् किमपि चटककपोतादि पश्यति तद्विषापूर्णलोचनाभ्यामवलोक्य भस्मसात्करोति, ततस्ते तापसाः केचित्तेन दग्धाः केचिद्वनं दृष्ट्वा ( नंष्ट्वा ) गताः, इत्थं चासौ द्वादशयोजनप्रमाणं क्षेत्रमुद्वास्य प्रतिदिनमुभयसन्ध्यं पर्यट्य उटजमण्डपिकाबिले तिष्ठन् सुखमास्ते स्म । स च श्री महावीरेणप्रतिबोधितः अष्टमदेवलोके गतः ।

मानविषये उपदेशप्रासादोक्तसागराचार्यकथा–

कालिकाचार्याः विहरन्तः स्वयं स्वर्णभूमौ ययुः । तत्र स्वकीयशिष्यस्य धिमतः सागरसूरेः पार्श्वं एत्येर्यापथिकीं प्रतिक्रम्य पृथ्वीं प्रमृज्य स्थिताः । सागरोऽदृष्टपूर्वास्तान्नोपालक्षयत् नाभ्युत्तस्थौ न चानंसीत तान्, इति चापृच्छत्–हे वृद्धमुने ! कस्मात् स्थानादत्र त्व समागमः ? अवन्त्याः–इति गाम्भीर्याम्भोधयोऽभ्यधुः, न चाकुप्यन् । ततः सूरीन् ज्ञानपूर्वकसमस्तक्रियाततपरान् वीक्ष्य स दध्यौ– नूनमयं कोऽपि वृद्धमुनिरस्ति बुद्धिमान इति । अथ स शिष्याणां वाचनां प्रयच्छन् प्रज्ञादर्पात्तं मुनिं स्माह –हे वृद्ध ! मया व्याख्यायमानं त्वं श्रुतस्कन्धममुं शृणु । सूरिस्तु मौनं दधौ । अथ स प्रज्ञाकौशलदर्शनार्थं बहुसूक्ष्मधीभिर्ग्राह्यमनुयोगं ततान, व्याख्यारसाढ्योऽ(ढ्यः) कालवेलामस्वाध्यायकालमपि नाज्ञासीत् । अहो ! मानं महारिपूयते । तत आचार्यस्तस्य प्रतिबोधाय नदीवालुकाभृतं पल्लकमानाययन् चालणिकां च । ततो गुरवस्ता वालुकाश्चालणिकायां संस्थाप्य हस्तक्रियया सूक्ष्मसिकताकणानधोऽपातयन्, चालणिकामध्ये सदराः कर्कराः शेषास्तान् दूरं संस्थाप्य पुनः सिकताः कापि स्थानेऽखिलाः क्षिप्त्वा पुनस्तान् रेणूनुद्धृत्य द्वितीयस्थले रेणुज्ञातं प्रदर्श्य तं जगुः– वत्स ! नद्यां यथा स्वतो भूयस्यो वालुकाः सन्ति, एवं जिनेन्द्रादाददे श्रुतम् । स्थाने स्थाने निक्षिप्योत्क्षिप्ताः क्षित्यादिसंगतेः क्षीयमाणा यथा स्तोकाः पल्लकवालुका अभवँस्तथा श्रुतं गणधरपरंपरयाऽऽगतमनुक्रमात्कालादिदोषतो–ऽल्पाल्पतरबुद्धिषु शिष्येषु विस्मृत्यादेः क्षीयमाणमल्पमेवाधुना वर्तते । चालणिका ज्ञातयोजना तु इत्थं

कार्या–सूक्ष्मज्ञानं सर्वं विनष्टम्, अधुना बादरज्ञानं, ततो हे वत्स ! श्रुतं त्वया सम्यग्रीत्या पठितं, परं ज्ञानस्याद्याचारस्त्वया सम्यग् न निर्णीतः, यस्मादकाले स्वाध्यायं तनोषि । उक्तं च निशीथचूर्णौ–संझाचउत्ति अणुदए सूरिए ज्झात्थेहिं अत्थमणे अद्धरत्ते, एयासु चउसु सज्झायं न करिंति । इत्यादि शिक्षां श्रीगुरुमुखाच्छ्रुत्वा मिथ्यादुष्कृतं दत्त्वा श्रीगुरूुन्ननाम ।

मल्लिकुमारीकथा तु मायाविषये त्रिषष्ठीशलाकापुरुषचरित्रोक्ता–

द्वीपेऽत्रैव जंबूद्वीपे विदेहेष्वपरेषु च । विजये सलिलावत्यां वीतशोकाभिधास्ति पूः ॥३॥
बलेनोच्चैर्बल इव बलस्तत्र नृपोऽभवत् । द्विषद्बलवनोन्माथकुञ्जरो निर्जराकृतिः ॥४॥
राज्ञोऽस्य धारिणीपत्न्यां केसरिस्वप्नसूचितः । जज्ञे महाबलो नाम सूनुरन्यूनविक्रमः ॥५॥
उद्यौवनः कमलश्रीप्रभृती राजकन्यकाः । शतानि पञ्चैकदिने पर्यणैषीन्महाबलः ॥६॥
तस्यासन् बालसुहृदोऽचलो धरणपूरणौ । वसुर्वैश्रवणश्चाभिचन्द्र इत्यभिधानतः ॥७॥
मुनीनामंतिके धर्मं श्रुत्वा वैराग्यवासितः । राज्ये महाबलं न्यस्य प्रव्रज्य च शिवं ययौ ॥९॥
षड्भिर्बालसुहृद्भिस्तैः समं राजा महाबलः । अंश्रौषीदार्हतं धर्मं सौहार्दादेकभावतः॥ १२॥
वयस्यान् सोऽन्यदेत्यूचे भो भो भीतोऽस्म्यहं भवात्। ततश्च प्रव्रजिष्यामि पन्थाः कोऽतःपरं तु वः ॥१३॥
तेऽप्यूचुः संभूय भुक्तं यथा सांसारिकं सुखम् । भोक्ष्यामहे शिवसुखं संभूयातः परं तथा ॥१४॥
ततो न्यवेशयद्राज्ये बलभद्रं महाबलः । स्वे स्वे राज्ये सुतं स्वं स्वं ततश्च सुहृदोऽपि ते १५॥
वरधर्ममुनीन्द्रस्य पादमूले महाबलः । तैः सुहृद्भिः समं षड्भिः प्रवव्राज महाबलः ॥१६॥
तपो यदेकः कर्ता नस्तत्कार्यमपरैरपि । सप्तानामप्यभूत्तेषां प्रतिज्ञेयं महात्मनाम् ॥१७॥
एवं ते कृतसंकेताश्चतुर्थादितपः समम् । चतुर्थपुरुषार्थाय तुल्योत्कंठाः प्रचक्रिरे ॥१८॥
अद्य मे दुष्यति शिरो दुष्यत्युदरमद्य च । अद्य नास्ति क्षुदित्यादि व्यपदिश्य महाबलः ॥१९॥
नाभुंक्तं पारणाहेऽपि स्वस्याधिकफलेच्छया । मायया वञ्चयित्वा तानधिकं विदधे तपः ॥२०॥
मायामिश्रेण तपसाबध्नात् स्त्रीवेदकर्म सः । अर्हद्भक्त्यादिभिः स्थानैस्तीर्थकृन्नाम कर्म च ॥२१॥
द्विधा संलेखनां कृत्वा गृहीत्वानशनव्रतम् । विपद्य वैजयन्त्याख्ये विमाने जज्ञिरे सुराः ॥२३॥
इतश्च जंबूद्वीपेऽस्मिन् भरतार्धेऽत्र दक्षिणे । नगरी मिथिलेत्यस्ति धर्माशिथिलनागरा ॥२४॥
इक्ष्वाकुवंशक्षीराब्धिसुधाकुम्भो भुवः पतिः । कुम्भ इत्यभवल्लक्ष्मीनिवासो निधिकुम्भवत् ॥२८॥
आस्यप्रभापराभूतचन्द्रा नाम्ना प्रभावती । अभूत्तस्य महादेवी शची देवीव वज्रिणः ॥३२॥
जीवो महाबलस्याथ पूर्णायुर्वैजयन्ततः । प्रच्युत्य फाल्गुनश्वेतचतुर्थ्यां भेऽश्वयुज्यपि ॥३६॥
चतुर्दशमहास्वप्नसूचितार्हतवैभवः । प्रभावतीमहादेव्याः कुक्षाववततार सः ॥३७॥
पूर्णे काले मार्गशुक्लैकादश्यां भेऽश्वयुज्यथ । प्राग्जन्ममायाजनितस्त्रीकर्मत्वेन कन्यकाम्॥३९॥
एकोनविंशमर्हंतमाश्चर्यं कुम्भलाञ्छनम् । नीलत्विषं सर्वशुभलक्षणां सुषुवे च सा ॥४०॥

लोभकषायविषये उपदेशप्रासादोक्तसागरश्रेष्ठिकथा–

सागरतीरवर्तिनि ध्यानसागरनाम्निनगरे चतुर्विंशतिकोटिसुवर्णस्वामी सागरनामा श्रेष्ठी, स च कृतान्त इव क्रूरदृष्टिः, कितव इव विहितविश्ववञ्चनः, काकपाक इव कठोरवचनः, सर्प इव कुटिलगतिः, पामर इव कलहमतिः । तस्य चत्वारः पुत्राः । तेषां वध्वश्चतस्रः । कालेन श्रेष्ठिभार्या परासुरभूत् । श्रेष्ठी कृपणत्वात्

कृष्णतरलितचित्तवृत्तिर्गृह एव तिष्ठति तद्दृष्टौ यः कोऽपि गृहजनो भव्यभोजनं सुवस्त्रपरिधानं स्नानदानादिकं च कुरुते तेन सहाहर्निशं कलहं विदधाति, का वार्ता भिक्षाचरणाम् ? काकादिभिरपि त्यज्यते तस्य द्वारम् । पोष्यापोषकगृहिणां लोकाचाररहितत्वेनायशः शोभामहिमादिहानिश्च । यतः–

वृद्धौ मातापितरौ साध्वीभार्या लघूनि शिशूनि च । अप्युपायशतं कृत्वा पोष्याणि मनुरब्रवीत् ।।

सागरश्रेष्ठिगृहे सकलस्वजनाः सीदन्ति । पुत्रवध्वः स्वच्छन्दवृत्त्या श्रेष्ठिनि सुप्ते रात्रौ भुञ्जते क्रीडन्ति च । एकदा नभसि व्रजन्त्येका योगिनी गवाक्षे तस्थुषीः श्वशुरवासे श्वश्रूराहित्येन म्लानमुखास्ताः स्नुषा अवलोक्य कौतुकेन तासां पुरस्तादुत्तीर्णा । ताभिश्च गोत्रदेवीव वन्दिता मोदकादिदानैश्च भृशं तोषिता सा योगिनी पाठसिद्धं नभोगतिविद्यामन्त्रं दत्त्वा पक्षिणीवाकाशमुत्पपात ।

एकदा निशि पत्यादिषु सुप्तेषुः ताः स्नुषास्तेन मन्त्रेणाधिवासितं काष्ठमारुह्य रत्नद्वीपं गताः, सर्वत्र क्रीडां कृत्वा पश्चाद्रात्रौ समागत्य तत् काष्ठं यत्र तत्र प्रोज्झ्य सुप्ताः । एवं सर्वदा रात्रौ कुर्वन्ति । अन्यदा पशुबन्धदोहादिचिन्ताकारिणा कर्मकरेण काष्ठस्य यत्र तत्र गमागमकारणं जिज्ञासुना रात्रौ प्रच्छन्नवृत्त्या विलोकितं, ज्ञातं वधूनां चरित्रं, चिन्तितं च–कल्ये विलोकयिष्याम्येताः क्व व्रजन्ति ? । ततो द्वितीयदिन – सन्धायां सर्वं स्वकार्यं कृत्वा तत्र शुषिरे काष्ठे प्रविश्य स्थितः । रात्रौ काष्ठं पूर्ववच्चलित्वा गतं स्वर्णद्वीपे । चतस्रोऽपि वध्वो वने भ्रमन्ति । कर्मकरोऽपि काष्ठाद्बहिर्निर्गत्य सर्वत्र सुवर्णं पश्यन् विस्मितो वधूसमागमावसरं कियत्सुवर्णं गृहीत्वा पूर्वरीत्या शुषिरे प्रविष्टः । आगतास्ताः मन्त्रशक्त्योत्पपात दारु, क्षणं स्वस्थान–मागताः । एवं कियति काले गते कर्मकृत्स्वर्णबलेन गृहकर्म सम्यग्न करोति, श्रेष्ठिनः संमुखं वक्ति । श्रेष्ठिधूर्तेन चिन्तितं यदनेन किमपि लब्धं मद्गृहात् । एकदा रहसि भाषितः श्रेष्ठिना तथा यथा तेन सर्वोऽपि व्यतिकरो जठराजीर्णः प्रकाशितः । अद्याहं यास्यामि, कदापि त्वया कस्यापि न वाच्यम् । इति कर्मकरं प्रज्ञाप्य रात्रौ प्रच्छन्नः काष्ठशुषिरे स्थितः ।

पूर्वरीत्या काष्ठं स्वर्णदीपं प्राप्तम् । निर्गतः श्रेष्ठी दृष्ट्वा सर्वापि भूमिः स्वर्णमयी । लोभाकुलेन भृतं काष्ठशुषिरं, स्वयं गात्रं संगोप्य ( संकुच्य ) स्थितः, किञ्चित्स्वर्णमुत्सङ्गेऽग्रहीत् । ततः वधूद्वयं काष्ठोपरि तिष्ठति, द्वयं च वहति, इति व्यवस्थया पश्चादागच्छन्तीनां तासां महाभारो जातः । यावता समुद्रमध्ये समायातास्तावच्छ्रान्ताः कथयन्ति परस्परम्–एतत्काष्ठं त्यक्त्वा जलोपरि यत्काष्ठं तरति तद्गृह्यते । एतच्छ्रुत्वा मध्यस्थः श्रेष्ठी ब्रूते–हे वध्वः ! अहं मध्येऽस्मि, न त्याज्यमेतत् । ताभिरुक्तम्– चतुर्विंशतिकोटिस्वामिनस्तव किं न्यूनं यदत्र समेतोऽसि ? त्वत्पापं फलितम् इत्युक्त्वौषधेर्विना व्याधिर्गच्छतीति मत्वा, ससागरं तत्काष्ठं सागरान्तः प्रक्षिप्यान्यकाष्ठाधिरूढास्ताः स्वावासे समेताः । सागरान्तः पतितः सागरोऽपि द्विधा नीचैर्ययौ ।

❋ ❋ ❋

**अथ कर्तव्यमुपदिशति–**

**( इन्द्रवज्रावृत्तम् )**

**इत्याश्रवाणामधिगम्य तत्त्वं, निश्चित्य सत्त्वं श्रुतिसन्निधानात् ।**
**एषां निरोधे विगलद्विरोधे, सर्वात्मना द्राग् यतितव्यमात्मन् ।।५।। [८९]**

व्याख्या- हे *आत्मन् ! इति* पूर्वोक्तप्रकारेण *आश्रवाणां* प्रोक्तस्वरूपाणां *तत्त्वं* आत्मनो बन्धहेतुत्वरूपपरमार्थं *अधिगम्य* ज्ञात्वा *श्रुतिसन्निधानात्* शास्त्राभ्यासपरिचयात् *सत्त्वं* तेषां जये सदुपायपूर्वकसामर्थ्यं *निश्चित्य* निर्धार्य *विगलद्विरोधे विशेषेण गलन्तः* विलयं यान्तः, *विरोधाः* सर्वजीवेषु वैरभावा यस्मिंस्तस्मिन्, *एषां निरोधे* आश्रवसंवरणे *द्राक्* शीघ्रतया *सर्वात्मना* सर्वोद्यमेन । *यतितव्यं* प्रयत्नपरेण भाव्यमित्यर्थः ॥५॥

❋ ❋ ❋

**अथ गेयपद्याष्टकेनाश्रवभावनां विभावयन्नाह-**

परिहरणीया रे, सुकृतिभिराश्रवा, हृदि समतामवधाय ।
प्रभवन्त्येते रे, भृशमुच्छृङ्खला, विभुगुणविभववधाय, परि० ॥१॥ [९०]

**व्याख्या- रे चेतन ! मन्दधीः *सुकृतिभिः* सर्वप्रधानपुण्यवद्भिरर्हद्भिः विशालधीपण्डितैश्च *आश्रवा* हिंसाकराणादिबन्धहेतवः *परिहरणीयाः* परिहर्तुमेव योग्याः प्रोक्ताः सर्वदुःखहेतुत्वादतस्तमपि *समतां हृदि अवधाय, समता* सर्वत्र निरीहता मैत्र्यादिरूपपरिणतिः तां, *हृदि* मनसि *अवधाय* संस्थाप्य तान् परिहर । अकृतपरिहारे जने तु *एते* हिंसारम्भादयः *भृशम*तिशयेन *उच्छृङ्खलाः* निर्मुक्तबन्धनत्वेनोद्धता मुत्कलाः सन्त इति यावत्, *विभुगुणविभववधाय भवन्ति । विभवो* विश्ववस्तुव्यापिनो ये *गुणाः* केवलज्ञानदर्शनादयस्तद्रूपो यो विभवः संपद्भरस्तस्य *वधाय* विनाशाय *भवन्ति* संपद्यन्त इत्यर्थः ॥१॥**

उक्तं हि उपदेशप्रासादे सावद्याचार्यकथा–

श्रीवीरो गौतमं मिथ्याजल्पनफलं वक्ष्यमाणज्ञातेनाह–प्रागनन्तकालेन या अतीत–चतुर्विंशा तत्र वर्तमानावसर्पिणीकालतः पूर्वं गतानन्ततमावसर्पिणीकाले मत्सदृशो धर्मश्रीनामाऽन्तिमजिनोऽभूत् । तत्तीर्थे सप्ताश्चर्याणि बभूवुः । तत्रासंयमिपूजायामनेकेऽसंयताः श्राद्धेभ्यो गृहीतद्रव्येण स्वस्वकारितचैत्यवासिनोऽ–भवन् । तत्रैकः कुवलयप्रभसूरिस्तपस्वी समागात् । तैश्चैत्यस्थैस्तं नत्वोक्तम् –अत्रैकं चतुर्मासकं तिष्ठ यथा त्वदुपदेशेनानेकचैत्यानि भवन्ति । तेनोक्तम्–जे जिणालये ते सव्वे सावच्चे, सावद्यमिदं नाहं वदामि । तदैवं भणता तेन जिननामकर्मार्जितम् । एकभवावशेषीकृतश्च भवोदधिः । ततस्तैः सर्वैर्लिङ्गिभिः सावद्याचार्य इति नाम कृतं, परं तस्य क्रोधो नाभूत् । मुनीनां चैत्यादिक्रियासु महालाभोऽस्मि इति वाक्यं वाच्यं, न पुनरिदं चैत्यमुपाश्रयमुष्णजलं च कुरुत एवं न श्राव्यम्, उपदेशोऽस्ति परमादेशः नास्ति इति साधोर्विवेकः । अन्यदा तेषां मिथः शास्त्रे विवादोऽभूत्, यद् गृहिणामभावे संयता एव चैत्यानि रक्षन्ति समारयन्ति ( संमार्जन्ति ), अन्यस्मिन्नपि तत्रारम्भे कृते यतेरपि न दोषः । केऽप्याहुः–संयमो हि मोक्षनेता । केऽपि पूजाचैत्यादिकं जल्पन्ति । परं विवादो न भग्नः । ततः सर्वैः संभूय ते सूरय आकारिताः ते आगता ।

एकदा साध्वी प्रदक्षिणीकृत्य पादयोः शिरसा श्रद्धावशात्संघट्टयन्ती ववन्दे, तल्लिङ्गिभिः स्पष्टं दृष्टम् । एकदा व्याख्याने महानिशीथस्येयं गाथाऽऽगता–

जत्थत्थीकरफरिसं करंति अणिहाऽवि कारणे जाए । तं निच्छयओ गोयम जाणिज्जा मूलगुणहाणिं ॥

अस्या गमनिका–यत्र गच्छे नीरागसाधुरपि आन्तरिककारणे उत्पन्ने स्त्रीकरस्पर्शं करोति तस्य मूलगुणहानिः स्यात् इति गाथार्थकथने सूरिणा चिन्तितं–पूर्वमन्नाम लिङ्गिभिः सावद्याचार्य इति स्थापितं,

साम्प्रतमेतदर्थ श्रुत्वा विरूपं किमपि करिष्यन्ति, परं यद्भावि तद्भवतु, अन्यथा कथने तु महादोषः । ततो यथार्थो व्याख्याता । तदाकर्ण्य तैः प्रोक्तं साध्वीवन्दनवृत्तं तर्हि त्वमपि गुणहीन एव । अपयशोभीरुणा सूरिणा प्रोक्तम्–अयोग्यस्योपदेशो न देयः, यतः–

आमे घडे निहित्तं जहा जलं तं घडं विणासेइ । इअ सिद्धंतरहस्सं अप्पाहारं विणासेइ ।।

तैरुक्तम्–कूटजल्पिस्त्वं, याहि दृष्टिपथात् । पुनः सूरिणा प्रोक्तं–स्याद्वादे उत्सर्गापवादस्थितिं यूयं न जानीथ एगत्तं जिणाण आणा अणेगत्त । ततस्तैर्मानितं तद्वचः । तत एतद्वाक्यपापमनालोच्य मृत्वा व्यन्तरो बभूव । च्युत्वोत्पन्नः प्रोषितभर्तृकायाः प्रतिवासुदेवपुरोहितदुहितुः कुक्षौ । कलङ्कभीताभ्यां पितृभ्यां देशान्निष्कासिता कुलालगृहे दासीत्वेन स्थिता, तद्गृहे चौर्यं कृत्वा मांसादिकमत्ति । ततो राज्ञो वाक्यं लात्वा वधकृतां दत्ता । तैः प्रसवं यावद्रक्षिता, प्रसवे सति बालं त्यक्त्वा नष्टा । क्रमाद्बालः पञ्चशतसूनाधिपो जातः । मृत्वाऽन्तिमश्वभ्रान्त्यप्रस्तटे गतः ।

ततोऽन्तरद्वीपे एकोरुकजातिर्जातः । मृत्वा महिषः । ततो मनुष्यः । ततो वासुदेवः, नरके च । ततो गजकर्णो नरः । ततोऽन्तिमश्वभ्रं । ततो महिषः । ततो गतधवद्विजसुताकुक्षौ गर्भपातनक्षारौषध– जातगलत्कुष्ठी गर्भान्निर्गतः सप्तशतवर्षाणि द्वौ मासौ चतुर्वासराणि जीवित्वा व्यन्तरो जातः । ततः सूनेशः । ततः सप्तम्याम् । ततो वृषभः । एवमनन्तं कालं भ्रान्त्वा विदेहे नरत्वं प्राप्तः । लोकानुवृत्त्या जिनं प्रणमन् प्रबुद्धः प्रव्रज्य च सिद्धोऽत्र पार्श्वनाथतीर्थसमये । इति श्रीवीरमुखाच्छ्रुत्वा गौतमोऽप्राक्षत् तेन सूरिणा किं महापापं कृतम् ? मैथुनं तु नासेवितम् । प्रभुराह–हे गौतम ! तेन उत्सर्गापवादैरागमस्थितिरित्याद्युक्त्वा महापापमुपार्जितं ।

❋ ❋ ❋

**अथ प्रत्येकाश्रवस्वरूपं विभावयन् प्रथमतो मिथ्यात्व–रूपमाह–**

कुगुरुनियुक्ता रे, कुमतिपरिप्लुताः, शिवपुरपथमपहाय ।
प्रयतन्तेऽमी रे, क्रियया दुष्टया, प्रत्युत शिवविरहाय, परि० ।।२।। [९१]

**व्याख्या– *अमी* मिथ्यात्वोदयवशीकृताः प्राणिनः *कुगुरुनियुक्ता कुत्सिता* अज्ञानोदयेनाज्ञात–यथार्थमोक्षमार्गादिस्वरूपा ये *गुरवो* धर्मोपदेष्टारस्तैः कुगुरुभि*र्नियुक्ताः* येऽशुद्धमार्गे नियोजिताः प्रवर्तिता इति यावत्, *कुमतिपरिप्लुताः* तथा ये स्वत एव मिथ्यात्वोदयवशाः *कुमत्या* अनाभोगिकानभिग्रहिक मिथ्यात्वोदयेन– विपर्यस्तबुद्ध्या *परिप्लुताः* सद्धर्मेऽस्थिराश्चञ्चलाः कृताः, *शिवपुरपथमपहाय* ते प्रकारद्वयोक्ताः *शिवपुरपथं* रत्नत्रयमयं मोक्षमार्गं *अपहाय* परित्यज्य । *दुष्टया* हिंसारम्भमय्याऽ–सर्वज्ञप्रणीतयाऽशुद्धया *क्रियया* जलाभिषेकपञ्चाग्नितपनरूपया *प्रयतन्ते* प्रौढोद्यमा वर्तन्ते । तत् *प्रत्युत शिवविरहाय, प्रत्युत* मोक्षप्राप्तिमिच्छन्तोऽपि, शिवविरहाय मोक्षवियोगाय संपद्यते । कृत्यश्रद्धाविपर्यासाभ्यां फलविपर्यासत्वादित्यर्थः ।।२।।**

कुगुरुविषये उपदेशप्रासादोक्ता अङ्गारमर्दकाचार्य कथा–

क्षितिप्रतिष्ठपुरे श्रीविजयसेनसूरः शिष्येण रात्रौ स्वप्ने पञ्चशत्या गजैः परिवृत एकः सूकरो दृष्टः । प्रत्यूषे गुरुं प्रति तथैवोक्तम् । तच्छ्रुत्वा सूरिराह–अद्यैकोऽभव्यगुरुः पञ्चशत्या शिष्यैः समन्वितः समेष्यति ।

ततस्तस्मिन्नेव दिने रुद्राचार्यो विनेयपञ्चशतसेवितचरणः समागतः । तस्याशनादिभक्तिं कृत्वा द्वितीयेऽह्नि स्वशिष्यसंदेहनिवारणाय तत्सूरेरभव्यत्वज्ञापनार्थं सुविहिताचार्येण लघुनीतिस्थाने प्रच्छन्नं कोकिलाः स्वशिष्येण निधापिताः । रात्रौ अभव्यस्य शिष्या मात्रकपरिष्ठापनार्थं गत्यागतिं कुर्वन्तः पदाक्रमणेन कोकिलशब्दान् शुश्रुवुः । ते सर्वे कोकिलद्रव्यमजानन्तो जीवोपमर्दनं विज्ञाय पुनः पुनः पश्चात्तापेन स्वात्मानं निन्दन्ति प्रतिक्रमन्ति च । ततो रुद्रसूरिः स्वयं लघुनीतिस्थाने समागच्छत् । तेषां शब्दानाकर्ण्य पुनः पुनरुपमर्दनेन शब्दं कारयन्नुवाच–इमेऽर्हतो जीवाः पूत्कुर्वन्ति इति वाक्यं स्वशिष्याय प्रत्यक्षं श्रावितम् । सूरिभिः प्रत्यूषे रुद्रसूरिशिष्यान् प्रोक्तम्–अयं युष्मदीयो गुरुरभव्यत्वान्न सेवार्हः ।

अभव्यगुरुं विमुच्य चरणं चरत । तच्छ्रुत्वा विस्मयं गतास्ते दध्युः–अहोऽस्य महान् कोऽपि क्रियादम्भः । वयमद्यापि यावन्न जानीमहे नित्यसेवितोऽपि । इति विचार्याभव्यगुरुं मुक्त्वा ते संयमं प्रपाल्य देवत्वं प्राप्य ततश्च्युत्वा दिलीपराजस्य पञ्चशतपुत्रा जाताः । ते यौवनावस्थायां गजपुरेशरचितस्वयंवरमण्डपे जग्मुः । इतश्चाङ्गारमर्दकजीवो बहुषु भवेषु भ्रान्त्वोष्ट्रत्वं प्राप्तवान् । सोऽपि तत्रैव पुरे बहुभारभराक्रान्तो रटन् दृष्टः । क्रमेलकक्वणच्छब्देन सानुकम्पचित्तास्ते प्राहुः–अहो प्राक्कर्मणायमनाथोऽशरणश्च महादुःखं वेदयति । यत उक्तं श्रीमद्देवेन्द्राचार्यैः कर्मग्रन्थे–तिरियाउ गूढहियओ सढो ससल्लो इत्यादि चिन्तयन्तो जातिस्मृतिं प्रापुः । तया प्राग्भवीयं स्वात्मीयगुरुत्वं तस्मिन् विज्ञाय तद्भवदुःखेभ्यस्तैः सुदूरीकृतः राजपुत्रास्तु भवनाटकं वीक्ष्य चारित्रेण केवलज्ञानं स्वीचक्रुः ।

कुमत्युपरि श्रीदेवेन्द्रसूरिरचितदानादिकुलकोपरिदेवविजयरचितटीकायां सिंहगुहावासीमुनिकथा–

अथ स्थूलभद्रो महामुनिर्गुर्वन्तिके एकादशाङ्गो पठति स्म । एवं काले याति कियद्दिनानन्तरं वर्षाकाले समागते साधुत्रयमेत्य गुरुं विज्ञपयति । एको वक्ति हे भगवंस्तवाज्ञयाहं चतुर्मासमुपोषितः सिंहगुहाद्वारे कायोत्सर्गेण स्थितो दिनानि निर्गमिष्यामि । द्वितीयेनोक्तं चतुर्मासीमुपोषितोऽहं तवाज्ञया दृग्विषाहिबिलद्वारे प्रतिमया स्थास्यामि । तृतीयेनोक्तं चतुर्मासीमुपोषितोऽहं कूपफलकोपरि वर्षारात्रं स्थास्यामि, चतुर्थेन स्थूलभद्रेणोक्तं स्वामिन्नहं तवाज्ञया कोशावेश्यागृहे चित्रशालायां षड्रसादनं कुर्वंश्चतुर्मासीं करोमि, सम्भूतिविजयोऽपि श्रुतज्ञानेन तेषां शक्तिं ज्ञात्वानुज्ञां ददौ । स्थूलभद्रोऽपि गुर्वाज्ञया कोशावेश्यागृहे समागात्, तस्या आज्ञया तत्र तस्थौ, सापि तं मुनिं षड्रसाहारैः प्रत्यहं प्रत्यलाभयत्, सा तं मुनिं क्षोभयितुं दिवारात्रमनेकोपायान् विदधे ।

परं स मुनिस्तया चालितोऽपि धर्मध्यानान्निर्मलशीलाच्च न चचाल, यथा मेरु वतेिन न चलति, तथैष मुनिरपि तस्या हावभावादिभिर्न चलितः, सा वेश्या नाट्ये स्वाङ्गानि दोलयामास न पुनस्तस्य मानसं, वक्षसो वस्त्रं श्लथयामास परं न ध्यानतो मुनिं, हावभावविलासैः स्वशरिरं कम्पयामास न पुनस्तस्य धर्मध्यानमौनं, पूर्वभुक्तान् भोगान् वारं वारं अस्मारयत्, रतिकेलिविलसितानि अदर्शयत् परं मुनिस्तु कमलपत्रवन्निर्लेपो नितरां शुशुभे। सा कोशावेश्या स्थूलभद्रमुनिना प्रतिबोधिता, चतुर्मासीपूर्णकरणानन्तरं ते त्रयोऽपि महामुनयः पूर्णाभिग्रहाः सुगुरोः पादमूलं समाजग्मुः, तानागतान् वीक्ष्य गुरुरभ्युत्थानपूर्वं स्वागतेनाभिनन्द्येमां वाचमुवाच, अहो दुष्करकारका यूयम् ! अथ चतुर्थं स्थूलभद्रं समागतं ज्ञात्वा तथैवोत्थाय गुरुरेवमभाषत, भो महाभाग ! साधु साधु तव दुष्करदुष्करकारकत्वं, तथोक्तं श्रुत्वा ते त्रयः साध्वो दध्युः–

अहो मन्त्रिसुतत्वेन गुरुर्दुष्करदुष्करम् । कारकेति कथयति वारंवारं प्रशंसति ।

किमनेन दुष्करदुष्करं कृतम् ?–

उषितं चित्रशालायां भक्षितं षड्रसादिकम् । अहो दुष्करदुष्करकारकत्वं मुनेरिदम् ।

अथ सिंहगुहावासी साधुर्वक्ति यदिदं दुष्करदुष्करं तर्ह्यहमप्यागामिनि वर्षे इममेवाभिग्रहं करिष्ये, अष्टौ मासानन्यत्र विहृत्य सिंहगुहावासी साधुर्गुर्वन्तिके समागात्, गुरून् वन्दित्वा चेवमवोचत्, हे भगवन्नस्मिन् वर्षेऽहं स्थूलभद्राभिग्रहं ग्रहीष्यामि, नैषोऽभिग्रहपारगो भविष्यतीति ज्ञात्वा गुरुणोक्तं भो मुने ! अमुं कदाग्रहं मुञ्च । त्वमस्याभिग्रहस्य पारगो न भविष्यसि, अतः स्थूलभद्रेण सह स्पर्धां मुञ्च । अनया स्पर्धया तव विरूपं भविष्यति, एवं गुरूणा वारितोऽपि स तदध्यवसायान्न व्यरमत् । ततस्तमभिग्रहं गृहीत्वा स मुनिः कोशागृहे प्राप्तो हस्तिशालायां रासभ इव, सा कोशावेश्यापि तं मुनिं स्थूलभद्रस्पर्धया समागतं ज्ञात्वा षट्रसैर्भोजयामास, कृतशृङ्गारनेपथ्या विभ्रमैकतरङ्गिणी कामराजधानीव सा मुनिसमीपे समागात् ।

तस्या मुखेन्दुमालोक्य शुद्धे तच्चित्तसागरे । चित्तस्थितोऽपि यत्कामो वाडवाग्निरिवाज्ज्वलत् ।।११।।

ततः कामविषोर्मिभिरपहृतचैतन्यः संयतित्वं न सस्मार, तथा तपःक्रियामपि न सस्मार । तस्या हावभावविलासविभ्रमैर्मोहितो मुनिः कामक्रीडां ययाचे । तयोक्तं मह्यं द्रव्यं देहि, यथा तवेप्सितं सिद्ध्यति । मुनिराह कुतोऽस्माकं धनम् ? वयं मुनयो निर्द्रव्याः, तयोक्तं भो मुने ! यदि भोगेच्छा तव वर्तते, तर्हि नेपालदेशे गत्वा रत्नकम्बलं समानय । नेपालभूपालो देशान्तरीयतपस्विनामेकैकं रत्नकम्बलं ददाति । स रत्नकम्बलश्च लक्षमूल्यो भवति ।

एतत्तस्या वचनं निशम्य कामपरवशो मुनिश्चतुर्मासकमध्ये नेपालाभिमुखोऽचलत्। तत्र भूपात्कम्बलमासाद्य वंशमध्ये च निधाय प्रत्यावृत्तः । मधुपो मालतीमिव मार्गे मुनिः कोशां संस्मरन् शीघ्रं चचाल. लक्षं यातीति कीरोक्त्या मार्गे तस्करैर्धृतः, किञ्चिदप्यदृष्ट्वा तैर्मुक्तः, पुनः कीरेण तथैवोक्ते तथैव स धृतः पृष्टश्च, भो मुने ! सत्यं ब्रूहि । तव पार्श्वे किमस्ति ? मुनिना सत्ये प्रोक्ते कृपया तैर्मुक्तो मुनिः कतिपयदिनान्ते कोशासमीपे समागत्य कोशाकरे कम्बलमदत्त । तया स कम्बलः पादन्युञ्छनीकृत्य कर्दमे क्षिप्तः. मुनिनोक्तं हे मुग्धे ! ईदृशो लक्षमूल्यो रत्नकम्बलस्त्वया कर्दमे कथं क्षिप्तः ? सावोचद्रे मूढ ! त्वयेत्थ रत्नकम्बलं शोच्यते, परं स्वीयममूल्यं व्रतमाणिक्यं त्यजन् किं स्वात्मानं नेक्षसे ? अहो ते मौढ्यं !

स्वल्पसंसारसुखकृते त्वं मोक्षसुखं मुधा हारयसि, इत्यादिवाक्यैः प्रतिबोधितो जातवैराग्यो मुनिराह, हे महानुभावे ! त्वयाहं संसारादुद्धृतः, अथाहमतीचारंदोषालोचनहेतवे गुर्वन्तिके यास्यामि, ते च धर्मलाभोऽस्तु । तत् श्रुत्वा सापि स्वकरौ कुड्मलीकृत्य मुनिं प्रति जगौ, हे मुने ! मया त्वत्प्रतिबोधाय यदाशातना कृता तत्क्षम्यताम् । ततो मुनिर्लज्जयाधोमुखः सम्यक्संसारविरक्तधीर्गुरोः पार्श्वे प्राप ।

कुक्रियायाम् उपदेशप्रासादोक्ता नागश्रीकथा–

चम्पापुर्यां सोमदेवसोमभूतिसोमदत्ता इमे त्रयः सहोदरा अभूवन् । तेषां क्रमेणेमा नागश्रीयज्ञश्रीभूतश्रिय इति तिस्रः प्रिया आसीत् । तेषां त्रयाणामित्थं गृहव्यवस्थितिरासीन्–एकैकदिने क्रमेण सर्वैरप्येकसद्मनि भोक्तव्यम् । एकदा नागश्रिया स्ववारकदिने कटुतुम्बीव्यञ्जनमजानत्या तया हिङ्ग्वादिभिर्द्रव्यैः संस्कृतं पक्वी कृतं च, किंचित्स्वादितं, कटुकं ज्ञात्वा धनव्ययं स्मृत्वा च क्वापि भाजनेऽस्थापयत् । ततोऽन्यभोजनैर्भर्त्रादीन् भोजयामास । ततस्तद्गृहे धर्मघोषसूरिशिष्यो धर्मरुचिर्मासक्षपणपारणे आययौ । तदा तद्व्यअनं धनव्ययो विफलो मा भूत् इति ध्यात्वा दत्तम् । मुनिस्तु तद्गृहीत्वा गुर्वन्तिकं प्राप । अहो !

अस्याः स्त्रियो बुद्धिं धिग् धिग्, यस्या गृहे तपस्तेजसा सुरगिरिसमा मुनय आगता अनयोत्करतुल्या गणिताः, तथा कल्पवृक्षसूर्यकामघटपुण्योदधिसन्निभा अनयाऽक्रतरुराहुकुलालघटगोष्पदतुल्या निश्चिताः । अथ धर्मरुचिस्तदाहारं गुरोरदर्शयत् । गुरुणा तदयोग्यं चतुर्भिर्ज्ञानैर्ज्ञात्वा प्रोक्तम्–हे शिष्य ! इदं शुद्धस्थले परिष्ठापय ।

इममादेशमासाद्य स वनमगात् । हस्तकृ ( ग ) तपात्रतः कथंचित्स्थण्डिले एकबिन्दु पपात । बिन्दुस्वादाकृष्टाः पिपीलिका एत्य सहस्रशो म्रियमाणा दृष्टाः । तदा मुनिर्दध्यौ–यदेकबिन्दुरित्थं प्राणघातकस्तर्हि समग्रमिदं कति जीवान् भस्मसात्कर्त्ता । तथात्राहमन्यजीवानां सौख्यं करोमि किं वा मम जिह्वां प्रति सौख्यं ददामि । यदि जीवानामभयं तनोमि, तदा भवान्तः स्यात्, अन्यथा च भववृद्धिः । तथा जिनाज्ञां पालयामि किं वा स्थण्डिलम् ? अहो जिनाज्ञैवार्हा । तथा मद्गुरोरपि आज्ञाऽस्ति शुद्धस्थण्डिले गत्वा परिष्ठापय । मत्कोष्ठकसदृशं शुद्धं क्वापि नास्ति । अरे जीव ! पूर्वं त्वयाऽनेकजीवाकुला आहारा द्रव्यतोऽतिमिष्टा अनेकशः कृताः । अयं तु नामतो दुष्टः परिणामे तु जीवदयारसरूप एव विशिष्टः, अतो हे जीव ! त्वमेवेमं पिब इत्यादि विमृश्य सर्पो बिलप्रवेशमिवादीनमनसा स तमाहारमुदरान्तः प्रावेशयत् । ततोऽनशनं कृत्वा सर्वार्थसिद्धिविमाने ययौ । ततः सूरिणा सा वार्त्ता ज्ञानादिना विज्ञाय लोकसमक्षं सा नागश्रीः निन्दिता । ततः समस्तस्वजनैर्गृहान्निष्कासिता । सर्वत्र भ्रमन्ती क्वापि वने दवानलेन मृत्वा षष्ठीं पृथ्वीं प्राप्ता । समस्तनरकेषु द्विर्द्विरभ्रमत् । अनन्तकालं भ्रान्त्वा क्रमेण द्रौपदी जातेति ।

❋ ❋ ❋

**अविरत्याश्रवमाह–**

अविरतचित्ता रे, विषयवशीकृता, विषहन्ते विततानि ।
इह परलोके रे, कर्मविपाकजा–न्यविरलदुःखशतानि, परि० ॥३॥ [९२]

**व्याख्या– *अविरतचित्ताः* न विरतं, विषयहिंसारम्भादिभ्यो विरमणं न प्राप्तं, चित्तमन्तःकरणं येषां तेऽविरतचित्ता प्राणिनः । *विषयवशीकृता, विषयैः* शब्दादिभिर्*वशीकृताः* तदधीनतां प्राप्ताः सन्तः । *इह परलोके* इहलोके दुर्लभाऽऽजीविकारोगशोकशरीरनाशादिना *परलोके* नरकपातादिना *विततानि* अतिदीर्घकालिकत्वेन विस्तीर्णानि *कर्मविपाकजानि* पूर्वाचरितदुष्कृतफलोदयजनितानि, *अविरल–दुःखशतानि, अविरलानि* सघननिरन्तराणि *दुःखानां* कष्टानां *शतानि* सहस्राणि *विषहन्ते* तैः पीड्यन्त इत्यर्थः ॥३॥**

महाशतकश्रावकज्ञातं तु इदं –

राजगृहपुरे महाशतकगृहपतिः । तस्य त्रयोदशभार्याः सन्ति । तन्मध्ये रेवतीनाम्नी भार्याऽनार्या, द्वादशगोकुलाधिपा वर्त्तते अन्यास्त्वेकैकगोकुलाधिपाः, एकैककोटिद्रव्यस्वामिन्यो, रेवती तु द्वादशकोटिसुवर्णपतिः, श्रेष्ठ्यपि अनेककोटीस्वर्णगोकुलाधिपः । एकदा श्रीवीरदेशनां श्रुत्वा प्रतिबुद्धः स द्वादश व्रतानि जग्राह । चतुर्दशवर्षानन्तरमुपासकप्रतिमा वहन् अवधिज्ञानं प्राप । रेवती नित्यं सपत्नीनामुपरि क्रोधं वहन्ती विषप्रयोगादिना क्रमेण सर्वा अपि ता हत्वा सर्वस्वस्वामिनी बभूव । नित्यं मद्यादिकमसेवत । एकदा कामतीव्रकरणाय जातमात्रबालं स्वनरहस्तेनानाय्य हिंसां कारयित्वा संस्कार्य च तन्मांसं बुभुजे मद्यं च पपौ । कामवशा यत्र

पौषधशालायां स्वस्वामी स्थितोऽस्ति, तत्र केशपाशं मुत्कलीकृत्योरोजोरूदरज– घनदशनादिकमङ्गमनाग्दर्शयन्ती निर्व्रीडा कामक्रीडातुरा जजल्प –हे स्वामिन् ! मुञ्चेदं पौषधादिव्रतं, मया सह रमस्व, धर्मफलं तु भोगसंयोगाविप्रयोगं तदेव इत्याद्यनुकूलोपसर्गादचलमतिः श्रेष्ठी प्राह–हे पापिष्ठे ! धर्मस्य फलमधर्मेण कथं विन्दसि ? अतो याहि मत्पुरतो दूरम् । अतः सप्तमे दिवसे मृत्वाद्यनरके चतुरशीतिवर्षसहस्रायुष्मत्त्वं नारकत्वं प्राप्स्यसि इति श्रुत्वा विलक्षा स्वस्थाने आययौ । ततः सप्तमे दिने सा तत्रोत्पना । इदं कथनस्य भगवन्तेन कथितं प्रायश्चित्तं कृत्वा महाशतकः विंशतिवर्षपर्यन्तं श्राद्धधर्मं प्रपाल्य संलेखनां कृत्वा सौधर्मे सुरत्वं प्रापेति ।

### इन्द्रियजमाश्रवमाह–

करिझषमधुपा रे, शलभमृगादयो, विषयविनोदरसेन ।
हन्त लभन्ते रे, विविधा वेदना, बत परिणतिविरसेन, परि० ॥४॥ [९३]

**व्याख्या– *करिझषमधुपाः* करिणो गजाः झषा मीना मधुपा भ्रमराः । *शलभमृगादयः* शलभाः खञ्जरीटपतङ्गादिकीटाः मृगा हरिणा आदिना सर्पादयो ग्राह्याः । *बत* खेदे । *परिणतिविरसेन* परिणतौ फलपाके विरसो महादुःखकरो भवति यः स तथाभूतस्तेन । *विषयविनोदरसेन* विषयविलासप्रेम्णा । *विविधा वेदना लभन्ते* विविधा बहुभिर्भेदैर्भिन्ना वेदना व्यथाः कदर्थना विडम्बना इति यावत् । लभन्ते प्राप्नुवन्ति तर्हि पञ्चेन्द्रियविषयप्रसक्तानां का कथेत्यर्थः ॥४॥**

ज्ञायते एतद् ललिताङ्गकथया यथोपदेशमालायाम्–

वसन्तपुरे नगरे शतप्रभो राजा राज्यं करोति, तद्गृहे रूपवती नाम्नी पट्टराज्ञी, साऽतीवरूपवती यौवनादिगुणाकीर्णा मोहनृपराजधानी राज्ञोऽतीव–वल्लभा, परन्तु सा व्यभिचारीणी, एकदा सा रूपवती गवाक्षस्थिता नगरकौतुकं विलोकयति । तस्मिन्नवसरे ललिताङ्गनामा कश्चिद्युवाऽतीवरूपपात्रं मार्गे गच्छंस्तया दृष्टः, तद्रुपदर्शनाज्जातमोहोदयाऽतीवकामातुरा रूपवतीचेटीं प्रति भो एनं युवानमानय ? तया तस्मै निवेदित मदीया स्वामिनी त्वामाकारयति, अतः समागच्छ मया सार्द्धं मत्स्वामिनीगेहं ? सोऽपि विषयभिक्षापरिभ्रमण शीलो निःशीलस्तद्गेहं जगाम । साऽभ्यागतं ललिताङ्गं दृष्ट्वा हावभावविलास विभ्रमान्, विस्तारयन्ति, अङ्गमोटनं कुर्वन्ती दोर्मुलं दर्शयन्ती, नाभिमण्डलं विवसनं कुर्वन्ती तदीयं मनो वशीचकार । यदुक्तं–

स्त्री कान्तं वीक्ष्य नाभिं प्रकटयति मुहुर्विक्षिपन्ति कटाक्षान् ।
दोर्मूलं दर्शयन्ती, नाभिमण्डलविवसनं कुर्वन्ती तदीयं मनो वशीचकार ।
रोमाञ्चस्वेदजृंभाः श्रयति कुचतटस्रंसि वस्त्रं विधत्ते ।
सोल्लण्ठं वक्ति नीवीं शिथिलयति दशत्योष्टमङ्गं भनक्ति ॥१॥

तदीयमेतत्स्वरूपं दृष्ट्वा स्मरोल्लम्भिताङ्गो ललिताङ्गनामा तया सार्द्धं भोगान् बुभुजे, विषयलुप्तचेतनो निःशङ्कतां भुक्तवान् । एतस्मिन्नवसरे तदीयो भर्ता राजा समायातः, तदा द्वारा स्थितचेटीमुखाद्राजागमनं श्रुत्वा साऽतीवभयविह्वलाङ्गी तं नरमशुचिकूपे स्थापयामास आगते राजा सार्द्धं च हास्यविनोदादिवार्तां चकार । सोऽपि ललिताङ्गो अशुचिकूपे स्थितो महती क्षुत्तृषादिबाधां सहते, परवशो जातः, मनसि चिन्तयति अहो ! विषय–लाम्पट्यं ! धिग्मामकृत्यकारिणं ! एवं तत्र वसतो बहूनि दिनानि

जातानि । सा राज्ञ्यपि तं विसस्मार, धिक्स्त्रीणां कृत्रिमं प्रेम ! ललिताङ्गस्तत्र तिष्ठन् मृततुल्यो जातः, वर्षाकाले जलपूरिताऽशूचिकूपजलप्रवाहेण वाहितो निर्गतो मिलितः स्वजनानां, निवेदितं सर्वमपि स्वरूपं, विषयाभिलाषविमुखो जातः, कियद्भिर्दिनैर्गृहे स्वस्थीभूतः पुनरेकदा राज्ञ्या दृष्ट उपलक्षित आकारितश्च । ललिताङ्गेनोक्तं न पुनरेवं करिष्यामि, विषयासक्तेन महती मया वेदनाऽनुभूतेति ततः परं विषयविरक्तो भूत्वा स सुखी जातः ।

❋ ❋ ❋

**कषायमाश्रवमाह–**

उदितकषाया रे, विषयवशीकृता, यान्ति महानरकेषु ।
परिवर्तन्ते रे, नियतमनन्तशो, जन्मजरामरणेषु, परि० ॥५॥ [९४]

**व्याख्या– उदितकषाया रे चेतन ! सर्वदोषमूलान् कषायान् परिहर । यत *उदितकषाया, उदिता* हृदये आविर्भूताः *कषायाः* क्रोधमानमायालोभा येषां ते तथा सन्तः सुभूमपरशुरामादिवत्, *विषयवशीकृताः* कामभोगाधीनाः कृतयुद्धादिमहारम्भाः *महानरकेषु* सप्तमपृथिवीस्थाप्रतिष्ठानादिषु *यान्ति* गच्छन्ति । ततो निर्गत्य *नियतमवश्यंभावेन जन्मजरामरणेषु* स्वल्पतरस्वल्पतमायुष्केषु प्रायेण तिर्यक्षु *अनन्तशोऽ*-नन्तवारान् *परिवर्तन्ते* भूयो भूय उत्पद्यन्त इत्यर्थः ॥५॥**

यथानुभूतः श्रीक्षेमसागरकृतोपदेशसप्ततिकोक्तद्विजसुतेन–

कुत्राप्येकोऽभवद्विप्रः प्रायस्तुच्छधनार्जनः । कान्ताविपत्तिदुःखार्त्त ससुतो निर्ययौ गृहात् ॥१॥
वैराग्यापन्नचित्तः सन्मोक्षमार्गं समीहते । साधुपार्श्वोपालब्धार्हद्धर्मश्चारित्रमात्तवान् ॥२॥
शीतवातातपाद्युग्रोपसर्गोपद्रुतस्तराम् । पित्राऽसौ क्षुल्लकः साधुः कृच्छ्रेणैव प्रवर्त्त्यते ॥३॥
कियत्यपि गतेऽनेहस्यसौ वप्तारमब्रवीत् । व्रतं धर्तुमशक्तोऽहमस्मि तात कथं क्रिये ॥४॥
बाधन्ते विषयग्रामाश्चेतो मे कपिचापलम् । धत्ते मत्तेभवच्चेतस्ततो धावति निर्भरम् ॥५॥
सेविष्ये तेन गार्हस्थ्यमित्येष प्रतिपादयन् । तातेनात्याजि न श्रेयस्कर्यस्य प्रतिपालना ॥६॥
न हि धर्मेण मे कार्यं धनेनैव प्रयोजनम् । मत्वाऽसौ निर्जगामाशु सहवासिपुरं ययौ ॥७॥
ज्ञातो द्विजातिभिः सर्वैरमुकस्यायमात्मजः । कस्यचित्सदने तस्थौ दौस्थ्ये ज्ञातिः सुखङ्करः ॥८॥
कश्चिद्ददौ निजां कन्यां तस्मै तत्सद्मनः पुनः । कुरुते सर्वकृत्यानि परं भोगेषु लालसः ॥९॥
कदाऽहं सप्रियः स्वैरं भृशं वैषयिकं सूखम् । सेविष्ये मानसे ध्यायन्निति यावत्स तिष्ठति ॥१०॥
यावद्विवाहवेलाऽऽगादकस्मात्तावदञ्जसा । घाटी पपात भिल्लानां तया तन्मिथुनं हतम् ॥११॥
स भोगस्पृहया मृत्वा तीव्रार्त्तध्यानवानिति । संजज्ञे महिषः क्वापि ग्रामे ग्रामेयकालये ॥१२॥
उपचर्य परिव्रज्यामेतस्य जनकः पुनः । दिवि देवत्वमापेदे सस्मार प्राग्भवं निजम् ॥१३॥
नन्दनं सैरभीभूतमवगम्यावधेर्बलात् । तत्रागाद्दुतमेवैष रूपं शौकरिकं दधत् ॥१४॥
क्रीत्वा तं गोदुहः पार्श्वाज्जघान लकुटादिभिः । भृत्वा दुर्वहभारेण तं स्थलोर्व्यामचालयत् ॥१५॥
ततः साधुपितू रूपं कृत्वात्मानमदर्शयत् । देवः कारुण्यमाधाय सुतस्य हितकाम्यया ॥१६॥
पश्यतस्तादृशं रूपं चिन्ता चेतस्यजायत । दृष्टपूर्वं मयेदृक्षं क्वापि रूपं पुरा भवेत् ॥१७॥

तदावरणदुष्कर्मक्षयोपशमलाभतः । जातिस्मृतिरथोत्पेदे लुलायस्य शुभोदये ।।१८।।
ततः स्वभाषयाऽरावीत्तात मामव दुःखतः । ततस्तज्जनकोऽवादीद्रे रे शौकरिकाधम ।।१९।।
मैवं मारय निःशंकं क्षुल्लकोऽयं मदङ्गभूः । ततो माहिषिकोऽब्रूत श्रृणोति न भवद्गिरम् ।।२०।।
त्वं तूर्णं दूरतो याहि येनैष चलति स्वयम् । ततस्तदभ्यर्थनया मुमुचेऽसौ सुमुत्कलः ।।२१।।
ततो दृष्टभयोद्रभ्रान्तः प्रपेदे धर्ममार्हतम् । व्रतानि सम्यगाराध्य कृतभक्तविवर्जनः ।।२२।।
प्रपन्नानशनस्तस्मान्मृत्वा दिविषदादिमे । स्वर्गेऽभूज्जैनधर्मो हि सुरद्रुरिव सौख्यदः ।।२३।।
तिर्यग्गतेर्निवार्यैष पित्रा पुत्रः सुरीकृतः । जैनधर्मप्रदानेनासीमशर्मविधायिना ।।२४।।
यथा तेन कृता तृष्णा कृष्णाहिरिव भीषण । दीक्षामपि प्रपद्यैवं विधातव्यं न धीधनैः ।।२५।।

❋ ❋ ❋

**योगजमाश्रवमाह–**

मनसा वाचा रे, वपुषा चञ्चला, दुर्जयदुरितभरेण ।
उपलिप्यन्ते रे, तत आश्रवजये, यततां कृतमपरेण, परि० ।।६।। [९५]

**व्याख्या– रे प्राणिन् ! *मनसा* दुष्टमनोव्यापारेण *वाचा* दुर्भाषणेन *वपुषा* दुष्टया कायचेष्टया *चञ्चलाश्च*पलाः प्राणिनः, *दुर्जयदुरितभरेण दुर्जयेन* दुःखेन जीयते मुच्यते यस्मादिति दुर्जयः तेन ईदृशेन *दुरितभरेण* पापसंभारेण, *उपलिप्यन्ते* अतिशयेनाशुभकर्मकर्दमलिप्ता भवन्ति । *ततः* पूर्वोक्तदुःखहेतुत्वात् *आश्रवजये* बन्धहेत्वनुद्भवे *यततां* सुष्ठूद्यमेन प्रवर्ततां, *अपरेण* बन्धहेतुप्रवर्तनेन *कृतं* पर्याप्तं, मा क्रियता-मित्यर्थः ।।६।।**

मनोजाश्रवविषये नवपदप्रकरणोक्ता द्रमककथा –

राजगृहनगरे कश्चिद्द्रमकः प्रतिवसति स्म, अन्यदा च तत्र कस्मिंश्चिदुत्सवे लोको वैभारगिरिवरनितम्बवर्तिनि विविधवनखण्डमण्डिते सर्वर्त्तुकोद्याने क्रीडानिमित्तमुद्यानिकायां निर्गतः, स च द्रमकः प्रहरद्वयप्रमाणे दिवसे भिक्षार्थं नगरमेव प्रविष्टः, उद्यानिकागमनव्यतिकरं लोकस्याजाननः प्रतिगृहं पर्यटितुमारेभे, न कश्चिद्भिक्षां प्रयच्छति, वक्ति च गृहरक्षपालादिः यथोद्यानं गतः सर्वोऽपि लोकः खाद्यपेयचूष्यलेह्यादि गृहीत्वा अद्य, तत्स तत्रैव गत्वा याचस्वेत्युक्तो गत उद्यानं यावत्तावत्तत्र सकलोऽपि लोको भुक्त्वा प्रेक्षणकादिव्यग्रस्तिष्ठति स्म, न तस्य कश्चिदुत्तरमपि ददाति, ततोऽसौ बुभुक्षितत्वादतिक्रुद्धः पर्वतस्योत्तुङ्गशृङ्गमारुह्य लोकस्य हननार्थमेकस्याः शिलाया अधः खनित्वा कोपाद्विस्मृतात्मा तदधःस्थित एव तां पातयितुमारब्धः, तया च पतत्या स एव चुर्णितः लोकाश्च प्रलयकालघटितघटनावनघण्टा–घोरघोषानुकारितदीयखटखटारव–त्रासित इतस्ततो नष्टः, स च रौद्रध्यानो मृत्वा नरके दुःखभाजनं संवृत्तः ।

वचोविषये उपदेशप्रासादोक्ता चन्द्रासर्गकथा–

वर्धमानपुरे सद्धडः कुलपुत्रः । तत्पत्नी चन्द्रा । तयोः सुतः सर्गः । सर्वेऽपि दुःस्थाः । चन्द्रा परवेश्मसु कर्म कुरुते । सर्गो वनादिन्धनान्यानयति एकदा जलमानेतुं चन्द्रा सुतायाहारं शिक्यक आरोप्य गता । सुतो

वनादागतः स्वाम्बामप्रेक्ष्य क्षुत्तृट्पीडया क्रुद्धः । इतो मातरमप्यागतां वीक्ष्योवाच– पापे ! किमियतीं वेलां शूलभिन्नाऽभूः । तदाकर्ण्य साप्यूचे–शिक्यकादुत्तार्य किं न भुक्तम् ? करौ ते छिन्नावभूताम् । इत्युक्तिप्रत्ययं कर्म बद्धं ताभ्यां ततो भवं भ्रान्त्वा सर्गजीवस्तामलिप्त्यामिभ्यसुतोऽ – रुणदेवनामाऽभूत् । चन्द्राजीवस्तु पाटलीपुरे जसादित्यस्य देविणीपुत्री अभूत् । साऽरुणदेवस्य दत्ता । निष्पन्ने विवाहेऽ– रुणदेवोऽन्यसुहृद्भिः सह वाणिज्याय प्रवहणे चटितः । दुष्टवायुना यानं भग्नम् । पुण्यात्फलकं प्राप्य मित्रेण सह तटं गतः । क्रमात्पाटलीपुरमागत्येश्वरोऽवक्मित्र ! अत्र ते श्वशुरस्थानमस्ति, तत्र गम्यतें सोऽप्याहएवंविधस्य मे तत्र गन्तुं न युक्तम् । मित्रेणोक्तं त्वमत्र तिष्ठ, पुरान्तर्भोजनमानेतुं याम्यहम् । अरुणस्तु देवकुले श्रान्तो निद्राणोऽभूत् । तत्र वने क्रीडार्थमागताया देविण्याः कटकद्वयं करौ छित्त्वा लात्वा कश्चिद्दस्युर्नष्टः । तत्कूजितं रुदनं च श्रुत्वा राजसेवका धाविताः । चौरो जीर्णसुरालये यत्रारुणः सुप्तस्तत्र भयभ्रान्तः कटके खड्गं च तत्पार्श्वे मुक्त्वा नष्टः । गतनिद्रोऽरुणस्तद्वीक्ष्य देव्या दत्तमिति हृष्टः । तावत्तैरुक्तः– रेऽधुना कुत्र यास्यसि इत्युक्त्वा ताडयत्सु तेषु कटके पतिते । ततो ज्ञापितो राज्ञे । तदादेशाच्छूलायां निहितः । पश्चात् ज्ञातवृतान्तेन अनशनविधाय स्वर्गे गतौ ।

कायविषये प्रबन्धपञ्चशत्युक्ता कथा –

चन्द्रग्रामे द्वौ सुहृदौ भीमार्जुननामानौ वसतः स्मः । एकदा ताभ्यां छागी एका आनीता । एकेन तस्याः पादचतुष्कं बद्धम् । द्वितीयेन गलं छिन्नमसिना छागी भक्षिता सर्वकुटुम्बेन । ततः क्रमात्कियता कालेन छागीजीवः कर्म क्षिपन् कमलपुरे श्रीदश्रेष्ठिपुत्री चन्द्रावत्यभिधाऽभवत् । भीमजीवः क्रमात् लक्ष्मीपुरे धनश्रेष्ठिपुत्रश्चन्द्रनामाऽभूत् । कर्मवशात्तयोः पाणिग्रहणं जातं चन्द्रावतीचन्द्रयोः ।

एकदा तस्य चन्द्रस्य गृहे कोऽपि प्राघूर्णको निशिवासे स्थितः । तदा कलिं कुर्वत्या प्रियया रुष्टया पतिमन्यमिच्छन्त्यास्तं पतिं सुप्तं निर्भरं ज्ञात्वा शनैः पत्युः शिरश्चिच्छेद । स्वमस्तकात्कलङ्कमुत्तारयितुकामा प्राघूर्णकसुप्तस्य हस्तौ रुधिरेण लिम्पयामास वस्त्राणि च । ततो यदा स उत्थाय चलन्नभूद्यावत्तावत्कलकलं चक्रे । जगौ च–धावत धावत लोकाः मम पत्युः शिरश्छित्त्वाऽसौ याति । लोका राजपुरुषा मिलिताः । स च धृतः, हस्तौ वस्त्राणि रुधिरक्लिन्नानि दृष्ट्वा राज्ञा ज्ञापितं ततो राजादेशात्तस्य हस्तौ पादौ छिन्नो । ततः स छिन्नहस्तपादौ जिजीवायुर्बलात् ।

एकदा ज्ञानिपार्श्वे तेन पृष्टम्–मया किं पापं कृतं येन ममांह्री हस्तौ छिन्नौ ? ज्ञानी प्राह–त्वया पूर्वमर्जुनभवे यस्याः छाग्याः पादौ बद्धौ धृतौ भीमेन च तस्याः शिरश्छिन्नं यत्त्वया हस्तपादा धृताः । अतोऽधुना हस्तपादाश्छिन्नाः ।

❋ ❋ ❋

**शुभाश्रवा अपि शुभबन्धहेतुत्वेन मोक्षप्राप्तिप्रतिबन्धका भवन्त्यतो वीतरागत्वसमुत्पादनेन तेऽपि परिहरणीया इत्युपदिशति**

शुद्धा योगा रे, यदपि यतात्मनां,स्रवन्ते शुभकर्माणि ।
काञ्चननिगडांस्तान्यपि जानीयात्, हतनिर्वृतिशर्माणि, परि० ॥७॥ [९६]

**व्याख्या– रे चेतन ! शुभबन्धसाधनप्राप्त्या कृतार्थत्वं मा मन्यस्व । *यदपि* त्वं शुद्धं सरागसंयमं**

प्राप्तो भवसि तदापि शुभबन्धको न त्वबन्धकः । यतो *यतात्मनां* संयमवतां *योगा* मनोवाक्कायव्यापाराः *शुद्धाः* पापप्रकृतीनां प्रायोऽबन्धका भवन्ति, तैरपि *शुभकर्माणि* देवायुर्देवगतिसातावेदनीयोच्चैर्गोत्रादीनि *स्रवन्ति* बन्धत्वेनागच्छन्ति । *अतस्तान्यपि शुभकर्माण्यपि हतनिर्वृतिशर्माणि, हतं* प्रतिबद्धं समुद्र वद्रुद्धमिति यावत्, *निर्वृतिशर्म* सहजं वृत्तिपञ्चकरहितं मुक्तिस्थं सुखं यैस्तानि तथा *काञ्चननिगडान् जानीयात्* स्वर्णमयपादबन्धनशृङ्खला बोधेदित्यर्थः।।७।।

प्रकटीक्रियते हि एतत् उपदेशमालाटीकोक्तवसुदेवकथया–

मगधदेशे नंदिनामनि ग्रामे चक्रधरनामा चक्रधारी दरिद्री विप्रो वसतिस्म । तस्य सोमिला स्त्री, तत्कुक्षिसंभूतो नंदिषेणनामा पुत्र, तस्मिन् जातमात्र एव पितरौ मृत्युमापन्नौ । तदा तन्मातुलेन स स्वगृहे समानीतो वर्धितश्च, परन्तु यौवनेऽपि कुरूपो बृहन्मस्तको लम्बोदरो वक्रनाशिको वामनशरीरो विकृतनयनस्त्रुटितकर्णः पीतकेशः पादखञ्जः पृष्टव्रणो दौर्भाग्यैकनिधिः कामिनीनामप्रीतिपात्रं च ।

एकदा मातुलेन सप्तापि कन्या नन्दिषेणस्य दर्शिताः, ताभिरुक्तं भो भो तात ! वयं प्राणघात करिष्यामः, परं तं नन्दिषेणं न वरिष्याम इति तासां प्रतिज्ञां श्रुत्वा स मनसि चिन्तयति, अहो ! ममैवायं कर्मणां दोषः, स्वकृतं नाभुक्तं क्षीयते कर्म । स दुःखगर्भवैराग्येण गृहान्निर्गतः, परिभ्रमन् रत्नपुरं गतः, तत्रोपवने क्वचित्प्रदेशे क्रीडन्तं विवसनं मदनरसोन्मत्तं परस्परार्पित गाढालिङ्गनं स्त्रीपुरुषयुग्मं वीक्ष्य मनसि खेदं वहन् आत्मघाताय वनं गतः, तत्र सुस्थितनामा साधुर्मिलितः, गुरोरमृतोपमां देशनां श्रुत्वा निवृतविषयतापोऽसौ गुरुसमीपे दीक्षां जग्राह । उग्रविहारित्वेन गुरुसेवां कुर्वन् स विचरति, षष्टषष्टभक्तान्ते पारणं करोति । अतीववैराग्यरस पञ्चशतसाधुनां वैयावृत्यं मया विधेयमिति स नियमं जग्राह । साधुनामन्नपानाद्यानीय समर्पयित्वा पश्चात्पारणकं करोति । सङ्घमध्ये तस्य महती प्रशंसा जाता । एकस्मिन्नवसरे सौधर्मपतिना नन्दिषेणनियमप्रशंसा कृता । तामश्रद्दधानौ द्वौ देवौ नन्दिषेणस्य नियमपरिक्षा कृता, उत्तीर्णश्च । बहुकालं यावद्वैयावृत्त्याभिग्रहं पालयन् दुष्करं तपश्चकार । द्वादशसहस्रवर्षाणि यावच्चारित्रधर्म परिपाल्य प्रान्तसमये त्वनशनं चकार। तत्र दर्भसंस्तारकस्थितेन प्रत्याख्यातचतुर्विधाहारेण तादृक् कर्मोदयात्संस्मृतनिजदौर्भाग्येण नन्दिषेणमुनिना निदानं कृतं, यथाहमागामिनि भवे स्त्रीवल्लभो–भूयासमिति निदानं कृत्वा मृत्वा च स सहस्रारदेवलोके देवत्वेनोत्पन्नः ।।ततश्च्युत्वा सौरीपुरनगरे अंधकविष्णुराज्ञः सुभद्राराज्ञी कुक्षौ समुद्रविजयादीनां नवानां वृद्धानां भ्रातृणां वसुदेव नामा लघुभ्रातृत्वेनोत्पन्नः, सोऽतीवरूपसौन्दर्यवान्, बद्ध निदानत्वात् अत्यन्तसुभगो लोकप्रियश्च बभूव । वसुदेव पृथिव्यां परिभ्रमन् नवनवरूपवेषाचरणेन भाग्यवशतः सहस्रशो विद्याधरसुताः सहस्रशो राजकन्याश्च परिणीतवान् । विंशत्यधिकवर्षशतं यावद्देशाटनं कुर्वता रोहिणी देवकीप्रभृति–द्विसप्ततिसहस्रसंख्यानां स्त्रीणां तेन पाणिग्रहणं कृतं । ताभिः कृष्णबलदेवादिपुत्राः तदङ्गजाश्च सांबप्रद्युम्नादयः सञ्जाताः । इत्थं स हरिवंशपितामहो जातः । एवं मुक्तिसुखप्रापक योगोऽपि संसारबद्धको जातः ।

❋ ❋ ❋

**उपसंहारमाह–**

मोदस्वैवं रे, साश्रवपाप्मनां, रोधे धियमाधाय ।
शान्तसुधारसपानमनारतं विनय ! विधाय विधाय ।।८।। [९७]

**|| इति श्रीशान्तसुधारसगेयकाव्ये आश्रवभावनाविभावनो नाम सप्तमः प्रकाशः ||**

**व्याख्या- रे प्राणिन् ! *एवं* पूर्वोक्तप्रकारेण *साश्रवपाप्मनां* सहवर्त्याश्रवसहितानां पाप्मनां पापरूप आत्मा स्वरूपं येषां कर्मणां तानि तथा तेषां, *रोधेऽनुद्धवोपाये* निर्बन्धस्वभाव इति यावत्, *धियं* निजाम्बुद्धिं *आधाय* संस्थाप्य *हे विनय !* हे विविक्ताचेतन! *अनारतं* निरन्तरं *शान्तसुधारसपानं* शान्तपरिणामामृतरसास्वादं *विधाय विधाय* कृत्वा कृत्वा *मोदस्व* प्रमोदं लभस्व ||८||**

उक्तं हि नवपदप्रकरणे नन्दकथा –

एकस्मिन् ग्रामे देवानन्दनामा वणिक् प्रतिवसति स्म, तस्य पत्नी गुणवत्यभिधाना, तत्पुत्री सुन्दरी, सा च ग्रामान्तरवास्तव्येन यशोनन्दनामधेयेन कुलपुत्रकेण परिणीता, क्रमेण चास्या उदपादि नन्दाभिधः पुत्रो गतो वृद्धिमुपारूढो यौवनं च परिणायितः पितृभ्याम्, अन्यदा च मरणपर्यवसानतया जीवलोकस्य मृतस्तत्पिता यशोनन्दः, सा च सुन्दरी तन्माता जाता दुश्चारिणी, ज्ञाता च नन्दपत्न्या, कथितं च नन्दस्य यथा त्वन्माता न शोभना, न चासौ तद्वचनमनुमन्यते, अन्यदा च रजन्यामेकदेवकुले सा सुन्दरी केनचिद्विटेन सह दत्तसङ्केता तस्यैवागमनं प्रतीक्षमाणा यावत्तिष्ठति स्म तावत्तत्पुत्रो नन्दोऽपि केषाञ्चित्खिङ्गप्रायाणां पुरुषाणां मिलितस्तस्यैव देवकुलस्य द्वारभूमिमाजगाम, ते च पुरुषाः कथञ्चित्तन्मध्य प्रविष्टास्तामेकाकिनीं विलोक्य ताम्बूलादिदानपूर्वं प्रार्थितवन्तः, क्रमेण तया सह सर्वेऽपि रमित्वा कियत्याऽपि वेलया बहिर्निर्गत्य तमेव नन्दं प्रवेशितवन्तः, सोऽपि घोरान्धकारे तामजानानश्चिरं रन्त्वा कथञ्चिदात्मीयवस्त्रबुद्ध्या तदीयाम्बरमेव परिधाय ततो निर्गत्य च स्वगृहमाययौ, प्रभातप्रायायां च रजन्यां स्वजननीवस्त्रसंवीतशरीरः स्वभार्यया पृष्ट उपालब्धश्च पाप ! किमेतदाचरितम् ? जनन्यैव सह क्वापि नोषितो रात्रौ ?, न ह्यन्यथा वस्त्रपरावृत्तिसंभवः, ततः सोऽपि दत्तोपयोगः सत्यमिदमिति विज्ञानगाढपश्चात्तापदहनदह्यमानमानसो निर्विण्णकामभोगस्तथावि–धाचार्यसमीपे प्रवव्राज ।

**|| इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणिसतीर्थ्यतिलक–मुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां शान्तसुधारसटीकायामाश्रव–भावनाविभावनो नाम सप्तमः प्रकाशः समजनि ||**

**उक्तं आश्रवस्वरूप अधुना तत् निरोधरूपः संवरो अभिधेयः । अनेन सम्बन्धेन अधिकृता इयम् अष्टमी संवराख्या भावना–**

❀ ❀ ❀

## ॥ अष्टमः प्रकाशः ॥

अत्रादित आरभ्य सप्तमप्रकाशं यावद्विरमणस्वभाववत्यो भावनाः प्रोक्ताः । अथेत आरभ्य प्रकारणसमाप्तिं यावदादरोपादेयस्वभावा भावना वक्ष्यति । तत्र सप्तमप्रकाशे चाश्रवनिरोधायोपदिष्टम् । स तु संवरेण निरुद्धो भवतीत्यनेन संबन्धेनायातां संवरभावनां विभावयति । तस्याश्चायमादिमः श्लोकः-

( स्वागतावृत्तद्वयम् )

येन येन य इहाश्रवरोधः संभवेन्नियतमौपयिकेन ।
आद्रियस्व विनयोद्यतचेता-स्तत्तदान्तरदृशा परिभाव्य ॥१॥ [९८]

व्याख्या- *विनयोद्यतचेता, विनयो* निवृत्तिर्विषयादिपरभावेष्वप्रवृत्तिरिति यावत्, तस्मिन्नु*द्यतं* उद्यमतत्परं जातं *चेतो* मन आत्मा वा यस्य स तथा, *इह* जैनशासने स्थितः, *औपयिकेन* उपाये भव उपायसत्यो वौपयिकः तेनोपायत्वप्राप्तेनोपायत्वयुक्तेन वा, *येन येन य आश्रवरोधो नियतं संभवेत् । येन येन* संयमसम्यक्त्वक्षमादिना यो मिथ्यात्वादिरूप आश्रवो बन्धहेतुः तस्य *नियतम*वश्यंभावेन रोधोऽभावप्राप्तः *संभवेत्* अनेनायं रुद्धो भविष्यतीति *आन्तरदृशा* ज्ञानचक्षुषा पूर्वं *परिभाव्य* सम्यक् समालोच्य तत्र तत्र तस्मिंस्तस्मिन्नाश्रवजये *तत्त*दुपायभूतसंवरं *आद्रियस्व* समाचरेत्यर्थः ॥१॥

उच्यते क्षुल्लकमुनिकथा यथा धर्मोपदेशकर्णिकायां –

इहैव भरते साकेतपुरं नाम नगरं, तत्र च पुण्डरीको नाम राजा, तस्य लघुभ्राता च कण्डरीकः, कण्डरीकस्य च यशोभद्रानाम्नी भार्यासीत् । अथान्यदा कामबाणैराहतस्य तस्य वृद्धभ्रातुः पुण्डरीकस्य चित्ते लघुभ्रातुः कण्डरीकस्य भार्यायामनुरागो बभूव । अथैकदैकान्ते स पुण्डरीकस्तां यशोभद्रामूचे, भो सुन्दरि ! त्वं मां पतिं भजस्व । तयोक्तं राजन् ! किमेवमभिदधासि ? यतः–

अह्नाय वह्नौ बहवो विशन्ति शस्त्रैः स्वदेहांश्च विदारयन्ति ।
तीव्राणि कृच्छ्राणि समाचरन्ति मारारिवीरं विरला जयन्ति ॥

किञ्च हे राजन् ! त्वयि चैवं जल्पति नूनममृते विषमुत्पन्नं, सूर्यादन्धकारो जातः चन्द्रमसोऽङ्गार–वृष्टिर्जाता, जलादग्निरुत्थितः, यत आरक्षकात्त्वत्त एवेदं मे भयं जातम् । यदि त्वत्सदृशः सुनेत्रो नर उन्मार्गे याति, तदा दृष्टिविकलस्य तु को दोषः ? तत् श्रुत्वा कुपितेन राज्ञा दुर्वचनैः सा वधूस्तर्जिता । ततोऽन्यदा कोपातुरेण तेन राज्ञा तस्याः सङ्गं चिन्तयता तस्य निजलघुभ्रातुः कण्डरीकस्य मारणाय विषं दत्त, यतः–

दिवा पश्यति नो घूको रात्रौ काको न पश्यति । कामान्धः कोऽपि पापीयान् दिवा रात्रौ न पश्यति ।

अथैवं स्वकीये भर्तरि कण्डरिके मृते सति सा यशोभद्रा चिन्तयति, नूनमयं पापी नृपोऽथ मे शीलखण्डनं करिष्यति, ततोऽहं क्वचिदन्यस्थाने गत्वा निजशीलं रक्षामि ।

इति स्वमनसि सा रात्रौ ततो निर्गत्य श्रावस्तीनगर्यां गता, तत्र च सुव्रताख्यायास्तपोधनायाः पौषधागारे स्थिता । तन्मुखाच्च धर्मोपदेशं निशम्य तस्याः संसारोपरिविरागो बभूव, ततश्च सा तस्याः समीपे

दीक्षां जग्राह । अथ तस्या उदरे पूर्वसम्भावो गर्भ आसीत्, परं व्रतान्तरायभयात्तया तस्य महासत्या अग्रे स्वकीयं तत्स्वरूपं न निवेदितम् । अथ तस्याः स निजपतिसम्भवो गर्भोऽनुक्रमेण वृद्धिं प्राप । तदा तया महासत्या सुव्रतया तस्यै प्रोक्तं, वत्से ! किमेतत् ? सा प्राह, भगवति ! दीक्षाग्रहणाकाङ्क्षया मयैष वृत्तान्तो भवत्या न ज्ञापितः । ततस्तया प्रवर्तिन्या सा गुप्तवृत्त्या गीतार्थसुश्रावकगृहे मुक्ता, तत्र तस्याः पुत्रप्रसवो बभूव, तस्य पुत्रस्य च यशोभद्र इति नाम परिकल्पितम् । क्रमेणाष्टवार्षिकश्च स गुरुभिर्दीक्षितोऽध्यापितश्च, यौवनकाले च स उन्मत्तीभूय विषयाभिलाषी जातः, तेन च स विन्ध्याचलं स्मरन्मदोन्मत्तहस्तीव निरङ्कुशः परिभ्रमति, चित्तं विना च केवलं मुनिवेषं धारयति । यतः–

हरिहरबम्भपुरन्दर–सुरनरनिवहाणिवि जिया जेण । सो मयणो लद्धरसो जेण जिओ तं जिणं नमह ।।
सव्वगहाण पभवो महागहो सव्वदोसपावठिई । कामग्गाहो दुरप्पा जेणाभिभूयं जगं सव्वं ।।

इतश्चैकस्मिन्नवसरे तेन निजमातुरग्रे निवेदितं मातर्न शक्नोम्यहं व्रतं पालयितुं, अतो निजे राज्ये यास्यामि, भजिष्यामि च तत्र गार्हस्थ्यं, भुक्तभोगश्च पुनर्वृद्धत्वे व्रतं ग्रहीष्ये, अधुना चाहं निजपितृव्यपुण्डरीकपार्श्वे स्थितो राज्यं करिष्यामि । तत् श्रुत्वा माता प्राह, वत्स ! तर्हि ममैकं प्रार्थितं कुरु ?–

अशक्तोऽपि व्रतं कर्तुं मम प्रार्थनयानया । तिष्ठ द्वादश वर्षाणि पश्चात्कुर्याद्यथोचितम् ।।

तत् श्रुत्वा तेनापि मातुस्तद्वचनं प्रतिपन्नम् । ततो द्वादशवर्षान्ते गुरुण्या द्वादशवर्षाणि यावत् स स्थापितः । ततो गुरुवाक्येन स द्वादशवर्षाणि यावत्स्थितः । एवमष्टचत्वारिंश द्वर्षान्ते यावत्स ततो गन्तुं लग्नः, तावत्तस्य माता तस्यैकं रत्नकम्बलं ददौ । ततोऽसौ स्वपितृव्यपुण्डरीकपार्श्वे गन्तुं प्रवृत्तः, रजन्यां च साकेतपुरे प्राप्तः । अथ प्रातरहं भूपालाग्रे यास्यामीति विचिन्त्य स रात्रौ कस्मिंश्चिद्देवकुले प्रेक्षणकं विलोकयन् स्थितः । इतस्तत्र भूपालादयो बहवो लोकास्तत्प्रेक्षणकं विलोकयितुं समायाताः । तत्रैका मनोहरा नर्तकी लोकानामतीवानन्ददायकं नृत्यं विदधाति स्म । एवं रात्रिप्रहरत्रये व्यतिक्रान्ते सा नर्त्तकी खिन्ना । अथ तां दृष्ट्वा तस्या माता प्राह, वस्ते ! बह्वौ व्यतिक्रान्ते स्तोके च व्यतिकरेऽ – थावशिष्टे कथं त्वं खिन्ना सती निजाङ्ग मोटयसि ? यतः–

सुष्ठु गीतं त्वया सुष्ठु नर्तितं सुष्ठु वादितम् । दीर्घरात्रिमतिक्रम्य मा प्रमादीर्निशात्यये ।।

एनं श्लोकं श्रुत्वा स यशोभद्रस्तपोधनो वैराग्यपरो निजं रत्नकम्बलं तस्यै ददौ । राजकुमारोऽपि तस्यै रत्नजटितं सुवर्णकुण्डलमयच्छत् । तन्नगरवास्तव्या श्रीकान्ताभिधा श्रेष्ठीपत्नी च तस्यै निजं मौक्तिकहारं समर्पयामास । नृपस्य हस्तिपकश्च तस्यै निजं स्वर्णजटितमङ्कुशं ददौ । जयसिंहाभिधो मन्त्री च निजहेमकटके अयच्छत् । एवं तस्यै नर्तक्यै तैर्दत्तानि लक्षमूल्यवस्तूनि दृष्ट्वा राज्ञो मनसि विस्मयो बभूव । एवं विस्मितेन राज्ञा मुनये तदनुचितदानकारणं पृष्टं, तदा स प्राह–

यन्नानीतं मनः स्थाने गुरुणाऽनायि तत्तया । सूर्यः खगं भिनत्त्येव दीपिका भूगृहे तमः ।।

राजन्नेषा नर्तकी मे गुरुणीभूय सुगतिमयच्छत् । अतः कारणान्मया तस्यै मे रत्नकम्बलं दत्तम् । ततो राज्ञा सा श्रीकान्ता श्रेष्ठिनी पृष्टा, सापि वक्ति, राजन्मे मनसीति पूर्वं विचारोऽभूत् । यदहं स्वभर्तारं विनाश्यान्यं पतिं करिष्यामि, परमस्या नर्तक्या वाक्यान्ममापि प्रतिबोधो जातः । ततो राज्ञा स हस्तिपको दानकारणं पृष्टः । स आह, राजन्नहमन्यराज्ये गन्तुकामोऽभूवं, तेन रणाङ्गणं राजेन्द्रारूढं त्वां वैरिभ्यः समर्पणोत्सुकश्चाभवं, परमस्या नर्तक्या वाक्यश्रवणतोऽहं तद्दुष्कृत्यप्रतिनिवृत्यास्यै नर्तक्यै गजाङ्कुश–

मयच्छम् । ततो राज्ञा पृष्टौ तावमात्यराजकुमाराववदतां, हे राजन्नावां त्वां विपाद्य राजग्रहणोत्सुकावभवाव, परमस्या वाक्यात्प्रतिबुद्धौ । आवश्यकेप्युक्तं –

सुट्ठु गाईयं सुट्ठु वाईयं सुट्ठु नच्चियं सामे । अणुपालियं दीहराइं थोवन्ते मा पमायेहि ।।

एवं स राजा सर्वेषामाशयान्निशम्य सहर्षो बभूव, संसारासारतां च विज्ञाय प्रतिबुद्धः सः, विशेषत–स्तपोधनदेशनया सर्वेऽपि ते प्रतिबुद्धाः । ततो तं निजकुमारं राज्ये निवेश्य मुनिपार्श्वे च व्रतं गृहीत्वा निरतिचारं च चारित्रं पालयित्वा दिवमगमत्, स यशोभद्रो मुनिरपि गुरुपार्श्वे गत्वा स्वदुष्कृतं च समालोच्य प्रतिक्रम्य च पुनश्चारित्रं पालयित्वा केवलज्ञानी बभूव, प्रान्ते च समाधिमरणपूर्वकं शिवं जगाम ।

❋ ❋ ❋

**तदेव क्रमशो दर्शयति–**

## संयमेन विषयाविरतत्वे दर्शनेन वितथाभिनिवेशम् ।
## ध्यानमार्तमथ रौद्रमजस्रं चेतसः स्थिरतया च निरुन्ध्याः ।।२।। [९९]

**व्याख्या– *निरुन्ध्या* इति प्रत्येकं संबन्धनीयम् । ततः *संयमेन* प्रवृत्तिनिरोधकस्वभावेन षड्जीवनिकायरक्षणप्रयत्नस्वभावेन च *विषयाविरतत्वे* विषयाः शब्दादिपञ्चविधास्तेष्वभिलाष–रागद्वेषप्रवृत्त्यात्मका ये आश्रवाः तथा न विद्यते विरतं हिंसादिभ्यो निवर्तनं यत्र स्वभावे सोऽविरत–स्तद्भावोऽ*विरतत्वं,* विषयाश्चाविरतत्वं चेति विषयाविरतत्वे द्वे आश्रवरूपे *निरुन्ध्याः* निरुद्धवनं विधेहि । *दर्शनेन* शुद्धदेवगुरुधर्मतत्त्वश्रद्धानरूपसम्यक्त्वेन *वितथाभिनिवेशं विगत*मपगतं *तथात्वं* याथार्थ्यं यस्माद–*भिनिवेशा*दसदाग्रहात्स वितथाभिनिवेशस्तं, विपरीतश्रद्धानाश्रवं *निरुन्ध्या* इति पूर्ववत् । *अथा*नन्तर*मार्त*–*मार्त*ध्यानं *रौद्रं* च रौद्रध्यानं पूर्वोक्तरूपं *ध्यानं* ध्यानद्वयमाश्रवं *अजस्रं* सततं निरन्तरं *चेतसो* मनोवृत्तेः *स्थिरतया स्थिरा* निश्चला तद्भावस्तत्ता, तथा शुद्धध्येये स्थिरैकाग्रमनोधारणया मिथ्यात्वदुर्ध्यानजन्यान् आश्रवान् *निरुन्ध्या* इत्यर्थः ।।२।।**

संयमविषये पिण्डनिर्युक्त्युक्तप्रियङ्करमुनिकथा–

पोतनपुरं नाम नगरं, तत्र पञ्चभिः साधु शतैः परिवृता यथागमं विहरन्तो रत्नाकरनामानः सूरयः समाययुः, तस्याश्च साधुपञ्चशत्या मध्ये प्रियङ्करो नाम क्षपकः, स च मासमासपर्यन्ते पारणकं विदधाति, ततो मासक्षपणपर्यन्ते मा कोऽपि मदीयं पारणकमवबुध्याधाकर्म्मादिकं कार्षीदित्यज्ञात एव प्रत्यासन्ने ग्रामे पारणार्थं व्रजामीति चेतसि विचिन्त्य प्रत्यासन्ने क्वचिद् ग्रामे जगाम । तत्र च यशोमतिनामा श्राविका, तया च तस्य क्षपकस्य मासक्षपणकं पारणकदिनं च जनपरम्परया श्रुतं, ततस्तया तस्मिन् पारणकदिने कदाचिदद्य स क्षपकोऽत्र पारणककरणाय समागच्छेदितिबुद्ध्या परमभक्तिवशतो विशिष्टशालितण्डुलैः पायसमपच्यत, घृतगुडादीनि चोपबृंहकद्रव्याणि प्रत्यासन्नीकृतानि, । ततो मा साधुः पायसमुत्तमं द्रव्यमितिकृत्वाऽऽधाकर्म्मशङ्कां कार्षीदिति मातृस्थानतो वटादिपत्रैः कृतेषु शारावाकारेषु भाजनेषु डिम्भयोग्या स्तोका स्तोका क्षैरेयी प्रक्षिप्ता, भणिताश्च डिम्भा यथा रे बालकाः ! यदा क्षपक साधुरीदृशस्तादृशो वा समायाति तदा यूयं भणत–हे अम्ब ! प्रभूताऽस्माकं क्षैरेयी परिवेषिता ततो न शक्नुमो भोक्तुम् । एवं चोक्तेऽहं युष्मान्निर्भर्त्सयिष्यामि, ततो यूयं भणत किं दिने दिने पायसमुपस्क्रियते ? एवं च बालकेषु शिक्षितेषु तस्मिन्नेव प्रस्तावे स क्षपको

भिक्षामटन् कथमपि तस्या एव गृहे प्रथमतो जगाम । ततः सा यशोमतिरन्तः समुल्लसत्परमभक्तिर्मा साधोः काऽपि शङ्का भूदिति बहिरादरमकुर्वती यथास्वभावमवतिष्ठते, । बालकाश्च यथाशिक्षितं भणितुं प्रवृत्ताः, तथैव चं तथा निर्भर्त्सिताः, ततः सरुषेवानादरपरया क्षपकोऽपि तथा बभणे, यथाऽमी मत्ता बालकाः पायसमपि नैतेभ्यो रोचते, ततो यदि युष्मभ्यमपि रोचते तर्हि गृह्णीत क्षैरेयीं, तत एवमुक्ते स क्षपक साधु निःशङ्को भूत्वा पायसं प्रतिग्रहीतुमुद्यतः, सापि परमभक्तिमुद्वहन्ती परिपूर्णभाजनभरणं पायसं धृतगुडादिकं च दत्तवती, साधुश्च मनसि निःशङ्को विशुद्धाध्यवसायः पायसं गृहीत्वा भोजनाय वृक्षस्य कस्यचिदधस्ताद् गतवान्,गत्वा च यथाविधिरीर्यापथिकादि प्रतिक्रम्य स्वाध्यायं च कियन्तं कृत्वा चिन्तयामास, अहो ! लब्धमुत्कृष्टं मया पायसद्रव्यं धृतगुडादि च, ततो यदि कोऽपि साधुरागत्य संविभागयति मां तर्हि भवामि संसारार्णवोत्तीर्णो, यतो निरन्तरं ये स्वाध्याय–निष्पन्नचेतसः प्रतिक्षणं परिभावयन्ति सकलमपि यथावस्थितवस्तुजातम्, अत एव च दुःखरूपात् संसाराद्विमुखबुद्धयो यथाशक्ति गुर्वादिषु वैयावृत्योद्यताः ये वा परोपदेशप्रवणाः स्वयं सम्यक् संयमानुष्ठानविधायिनश्च तेषां संविभागे कृते तद्गतं ज्ञानाद्युपष्टब्धं भवति, ज्ञानाद्युपष्टम्भे च मम महांल्लाभः, शरीरकं पुनरिदमसारं प्रायो निरुपयोगि च, ततो येन तेन वोपष्टब्धं सुखेन वहतीत्येवं भुञ्जानोऽपि शरीर मुर्च्छारहितः प्रवर्द्धमानविशुद्धाध्यवसायो भोजनान्तरं केवलज्ञानमासादितवान् ।

दर्शनविषयेऽपि पिण्डनिर्युक्त्यौ वारत्तकमुनिकथा–

वासपुरं नाम नगरं, तत्राभयसेनोनाम राजा, तस्यामात्यको वारत्तकः, अन्यदा चात्वरितम – चपलमसम्भ्रान्तमेषणासमितिसमेतो धर्मघोषनामा संयतो भिक्षामटँस्तस्य गृहं प्राविशत्, तद्भार्या च तस्मै भिक्षादानाय घृतखण्डसम्मिश्रपायसभृतं स्थालमुत्पाटितवती, अत्रान्तरे च कथमपि ततः खण्डसम्मिश्रो घृतबिन्दुर्भूमौ निपतितः, ततो भगवान् धर्मघोषो मुक्तिपदैकनिहितमानसो जलधिरिव गम्भीरो मेरुरिव निष्प्रकम्पो वसुधेव सर्वंसहः शङ्ख इव रागादिभिररञ्जनो महासुभट इव कर्मरिपुविदारणनिबद्धकक्षो भगवदुपदिष्ट–भिक्षाग्रहणविधिविधानकृतोद्यमो भिक्षेयं छर्दिततदोषदुष्टा तस्मान्न मे कल्पते इति परिभाव्य ततो निर्जगाम, वारत्तकेन चामात्येन मत्तवारणस्थितेन दृष्टो भगवान् निर्गच्छन्, चिन्तयति च स्वचेतसि–किमनेन भगवता न गृह्यते स्म मे गृहे भिक्षेति ? एवं च यावच्चिन्तयति तावत्तं भूमौ निपतितं खण्डयुक्तं घृतबिन्दुं मक्षिकाः समागत्याशिश्रियन्, तासां च भक्षणाय प्रधाविता गृहगोधिका, गृहगोधिकाया अपि वधाय प्रधावितः सरटः,सरटस्यापि च भक्षणाय प्रधावति स्म–मार्जारी, तस्या अपि च वधाय प्रधावितः प्रार्घूर्णकः श्वा, तस्यापि च प्रतिद्वन्दी प्रधावितोऽन्यो वास्तव्यः श्वा, ततो द्वयोरपि तयोः शुनोरभूत्परस्पर कलहः, ततः स्वस्वसारमेयपराभवदूनमनस्कतया प्रधावितयोर्द्वयोरपि तत्स्वामिनोरभूत् परस्परमस्यसि युद्धम्, एतच्च सर्वं वारत्तकामात्येन परिभावितं, ततश्चिन्तयति स्वचेतसि–घृतादेर्बिन्दुमात्रेऽपि भूमौ निपतते यत एवमधिकरणप्रवृत्तिः अत एवाधिकरणभीरुर्भगवान् घृतबिन्दुं भूमौ निपतितमवलोक्य भिक्षां न गृहीतवान्, अहो ! सुदृष्टो भगवता धर्मः, को हि नाम भगवन्तं सर्वज्ञमन्तरेणेत्थमनपायिनं धर्ममुपदेष्टुमीशः ? न खल्वंधो रूपविशेषं जानाति, एवमसर्वज्ञोऽपि नेत्थं सकलकालमनपायं धर्ममुपदेष्टुमलं, तस्माद्भगवानेव सर्वज्ञः, स एवं च मे जिनो देवता, तदुक्तमेवानुष्ठानं मयाऽनुष्ठातव्यमित्यादि विचिन्त्य संसारविमुखप्रज्ञो मुक्तिवनिताश्लेषसुखलम्पटः सिंह इव गिरिकन्दराया निजप्रसादात् निर्गत्य धर्मघोषस्य साधोरुपकण्ठं प्रव्रज्यामग्रहीत, स च महात्मा

शरीरेऽपि निःस्पृहो यथोक्त भिक्षाग्रहणादिविधिसेवी संयमानुष्ठान परायणः स्वाध्यायभावितान्तःकरणो दीर्घकालं संयममनुपाल्य जातप्रतनु कर्मा समुच्छलितदुर्निर्वार्यवीर्यप्रसरः क्षपकश्रेणिमारुह्य घातिकर्मचतुष्टयं समूलघातहत्वा, केवलज्ञान लक्ष्मीमासादिवान्, ततः कालक्रमेण सिद्ध इति ।

चित्तस्थैर्ये तु गोविन्दसाधुकथा लिख्यते–

भृगुकच्छनगरे अवगतनिःशेषसौगतमतसारो वरवादलब्धिसम्पन्नो गोविन्दनामा भिक्षुरासीत् । सः पण्डितं मन्यो निजवादशक्तिं प्रकटीकुर्वन् सकलमपि त्रिभुवनं तृणमिव मन्यमानो नगररन्ध्रासु अटतिस्म अन्यदा स्वसामर्थ्य–प्रकटनार्थ त्रिकचतुष्केषु पटहं अदापयत् । तदवसरे चैत्यवन्दनार्थगच्छद्भिः आचार्यजिनदेवसूरिभिः श्रुतः । पटहं स्पृष्ट्वा प्रतिषेधितः । द्वावपि राजकुले गतौ । तत्र राजादि विद्वज्जनसम्मुखे आचार्यैः पराभूतः । सो विच्छायमुखो जैनशास्त्रज्ञानं विना जैनाः जेतुं अशक्याः इति व्यचिन्तयत् । तत्कृते सूरिपार्श्वे गत्वा बद्धाञ्जलिः एवं अकथयत्–''मम अज्ञानविलसितं क्षमस्व, अनुकम्पां कृत्वा भवतप्रवज्यां देहि, सिद्धान्तञ्च पाठय । आचार्यैः प्रव्रजितः । प्रमाणनयं हेतुशास्त्रं च ससिद्धान्तं पठित्वा पटहं दापयत् । आचार्यैः पुन जितः । पुनः कृताञ्जलिः दीक्षां जग्राह । पठित्वा पुनः वादार्थे प्रवृतः । एवं एकविंशतिकृत्वा आचार्यैः जयाशा निराकृता । आचार्यैः योग्यजीवं मत्वा पुनः प्रव्राजितः । अस्मिन्नवसरे सामायिकादिसिद्धान्तं पठन् तस्य पुर्वाग्रहं मिथ्यात्वं च विगलितम् । प्रबुद्धः स आचार्यान्तिके गत्वा पादारविन्दयोः नत्वा अनेकापराधानि अवगण्य उद्धृतः इति भणतिस्म । स्वपापं आलोचित्वा सम्यक्त्वं भावेन प्रतिपद्य पुनरुच्चरितमहाव्रतो भाव परिणतः शास्त्रपारग गुरुकृपया जातः । ततः आचार्यैः वाचकपदेन सत्कृतः ।

❋ ❋ ❋

( शालिनीवृत्तम् )

क्रोधं क्षान्त्या मार्दवेनाभिमानं, हन्या मायामार्जवेनोज्ज्वलेन ।
लोभं वारांराशिरौद्रं निरुन्ध्याः सन्तोषेण प्रांशुना सेतुनेव ॥३॥ [१००]

**व्याख्या– *क्षान्त्या* परकृतापराधानां सम्यक्क्रोधाभावेन सहनपरिणतिः क्षान्तिस्तया, क्षान्त्या *क्रोधं* कोपस्वभावोद्भूताश्रवं, *मार्दवेन* मृदुर्नम्रपरिणामो विनीतस्वभावः तद्भावो मार्दवं, तेन *अभिमानं* स्वगुणैः स्वस्मिन् बहुमानेनाहङ्कृतिरूपस्तदुद्भवमाश्रवं । *उज्ज्वलेनार्जवेन, उज्ज्वलं* अतिशयेन निर्मलं निर्दोषं इति यावत्, *आर्जवं* ऋजोः सरलस्वभावस्य भावः आर्जवं, तेन *मायां* "मा निषेधे" "या गतौ" ममाधारोऽयं जीवो मा सद्गतिं यातु गच्छत्विति ज्ञापिका वक्रा बुद्धि*र्माया* तां *हन्या* निर्वासयेः । *प्रांशुना सेतुनेव, प्रांशु*रतिशयेन समुन्नतः *सेतुः* पालिबन्धस्तेनेव तत्तुल्येन अतिप्रधानेन *सन्तोषेण* निरिच्छकस्वभावेन *वारांराशिरौद्रं* प्रक्षुभितसमुद्रादप्यतिभयानकमनन्तत्वात् *लोभं* तृष्णाजन्याश्रवं निरुन्ध्या निराकुर्वित्यर्थः॥३॥**

क्षमाविषये प्रबन्धपञ्चशत्युक्ता भीमतापसकथा दर्श्यते–

एकस्मिन्पुरोद्याने भीमस्य तापसस्य तपः कुर्वतश्चक्षुषो विषमुत्पन्नम् । ततश्चक्षुर्विषः ऋषिर्दध्यौ–यो मां पराभविष्यति तस्मै एवाहं शिक्षां दास्ये दृग्विषमुञ्चनात् । ततो ऽटव्यामन्यदा तस्य तापसस्य मस्तके बलाहिका विष्टाञ्चकार । तदा स रुष्टस्तां भस्मीचक्रे दृष्टिविषेण । ततोऽन्यदा कस्यचिच्छ्रेष्ठिनो गृहे भिक्षां याचितुं गतः । तत्र श्रेष्ठिपत्नीदत्तं शीतलमाहारं न गृह्णाति । तदा श्रेष्ठिपत्न्योक्तम्

भिक्षुक ! 'अनइं ऊन्हां जीमओ' ततस्तेन दृष्टिविषं मोचितुं रक्ता दृष्टिः कृता । ततः साऽवग्–नाहं बलाहका यत्त्वया क्रोधेन व्योम्नि गच्छन्ती भस्मीकृता । तापसोऽवग्–भो श्रेष्ठिप्रिये वनस्थं मच्चेष्टितं त्वं कथं वेत्सि ? श्रेष्ठिपत्न्यवग्–स्वं चरित्रं स्वयं प्रकाशयन् लघुतां याति, तेन त्वमयोध्यायां गच्छेः । तत्र देवडः कुम्भकारः कथयिष्यति मच्चरित्रम् । ततः स तापसोऽयोध्यायां देवडकुम्भकारपार्श्वे गत्वा प्राह सा श्रेष्ठिपत्नी वनस्थं मच्चरित्रं कथं वेत्ति ? सोऽवग् साऽतीव क्षमावती विद्यते, रोशं तु कस्योपरि न कुरुते, तेन तस्य अवधिज्ञानं जातं, तेन ततो जानाति सर्वंयतः–

क्षमाखड्गः करे यस्य, दुर्जनः किं करिष्यति । अतृणे पतितो वह्निः, स्वयमेव प्रशाम्यति ।।

तापसोऽवग् त्वं कथं जानासि तस्याः स्वरूपम् ? कुम्भकारोऽवग् सैव कथयिष्यति । ततः स तत्र गत्वा श्रेष्ठिपत्नीपार्श्वे कुम्भकारज्ञातृस्वरूप पप्रच्छ । तयोक्तम्–तस्यापि क्षमाकरणात् । ततः स क्रोधं मुक्त्वा क्षमयित्वा तां नमश्चक्रे ।

मार्दवविषये त्रिषष्ठीशलाकापुरुषचरित्रे उक्ता बाहुबलीकथा–

राज्यनिमित्तेन भरतबाहुबलभ्योः युद्धं जातं । चक्रिणा चक्रं मुक्तं । परं ज्ञातिषु तत् न चलति । बाहुबलिः सक्रोधः भरतं मुष्टया हन्तुं धावति स्म । ततः परं तेन यच्चिन्तितं तद् –

अहो ! राज्यस्य लुब्धेन, लुब्धकादपि पापिना । अमुनेव समारब्धो, धिग् धिग् भ्रातृवधो मया ।।
सर्वथा त्यजनीयेयमिति निश्चित्य चेतसि । महामना बाहुबलिरित्यूचे चक्रवर्त्तिनम् ।।
तितिक्षस्व क्षमानाथ !, राज्यमात्रकृतेऽपि यत् । द्विषन्निव मया भ्रातरेवं त्वमसि खेदितः ।।
महाभवह्रदेऽमुष्मिंस्तन्तुपाशसोदरैः । भ्रातृपुत्रकलत्राद्यै, राज्येन च कृतं मम ।।
त्रिजगत्स्वामिनो विश्वाभयदानैकसत्रिणः । एष पान्थीभविष्यामि, पथि तातस्य सम्प्रति ।।
इत्युदित्वा महासत्त्वः, सोऽग्रणीः शीघ्रकारिणाम् । तेनैव मुष्टिना मूर्ध्न, उद्दध्रे तृणवत् कचान् ।।
साधु साध्विति सानन्दं, निगदन्तो दिवौकसः । बाहुबलेरुपरिष्टात्, पुष्पवृष्टिं वितेनिरे ।।
सोऽप्येवं चिन्तयामास, प्रतिपन्नमहाव्रतः । किं तातपादपद्मान्तमहं गच्छामि सम्प्रति ? ।।
नो वा यास्यामि पूर्वात्तव्रतानां ज्ञानशालिनाम् । मध्येऽनुजानामपि मे, यल्लघुत्वं भविष्यति ।।
इहैव दग्ध्वा घातीनि, कर्माणि ध्यानवह्निना । अवाप्तकेवलज्ञानो, यास्यामि स्वामिपर्षदि ।।
मनस्वी चिन्तयन्नेवं, प्रलम्बितभुजद्वयः । कायोत्सर्गेण तत्रैवाऽस्थाद् रत्नप्रतिमेव सः ।।
भगवानपि तत्रैकस्तस्थौ बाहुबलिर्मुनिः । भूमेरिव समुद्भूतोऽवतीर्णो गगनादिव ।।
ध्यानैकतानो नासान्तविश्रान्तनयनद्वयः । निष्कम्पः स मुनिः शङ्कुरिव दिक्साधनो बभौ ।।
लताभिः शतशाखाभिः प्रसरन्ती भिरुच्चकैः । मुरजश्चर्मवध्रीभिरिव सोऽवेष्ट्यताभितः ।।
शरीरमधिरूढैस्तैर्लम्बमानैर्भुजङ्गमैः । बभौ बाहुबलिर्बाहुसहस्रमिव धारयन् ।।
पादपर्यन्तवल्मीकविनिर्यातैर्महोरगैः । पादयोर्वेष्टयाञ्चक्रे, स पादकटकैरिव ।।
इत्थं स्थितस्य ध्यानेन, तस्यैको वत्सरो ययौ । विनाऽऽहारं विहरतो, वृषभस्वामिनो यथा ।।
पूर्णे तु वत्सरे विश्ववत्सलो वृषभध्वजः । आहूय भगवान् ब्राह्मीसुन्दर्याविवमादिशत् ।।
स इदानीं बाहुबलिः, क्षीणप्रचुरकर्मकः । शुक्लचतुर्दशीरात्रिरिव प्रायेण निस्तमाः ।।
मानात् स मोहनीयांशाज्ज्ञानं नाऽऽप्नोति केवलम् । तिरोहितः काण्डपटेनाऽप्यर्थो न हि दृश्यते ।।

युवयोर्वचसा मानं, सद्यस्त्यक्ष्यति सोऽद्य तत् । यातं तस्योपदेशाय, समयः खलु वर्त्तते ।।
तामाज्ञां शिरसाऽऽदाय, नत्वा च चरणौ प्रभोः । प्रति बाहुबलिं ब्राह्मीसुन्दर्यौ चेलतुस्ततः ।।
ज्ञात्वाऽपि तन्मानमुपेक्षाञ्चक्रे वत्सरं प्रभुः । अगूढलक्ष्या अर्हन्तः, समये ह्युपदेशकाः ।।
ते आर्ये जग्मतुस्तत्र, देशे वल्लीतिरोहितम् । रत्नं रजश्छन्नमिवाऽलक्षयेतां न तं मुनिम् ।।
मुहुरन्वेषयन्तीभ्यां, ताभ्यामथ तथास्थितः । उपालक्षि कथञ्चित् स, वृक्षेभ्यो ह्यविशेषभाक् ।।
निपुणं लक्षयित्वा तं, कृत्वा त्रिश्च प्रदक्षिणाम् । महामुनिं बाहुबलिं, ते वन्दित्वैवमूचतुः ।।
आज्ञापयति तातस्त्वां, ज्येष्ठार्य ! भगवानिदम् । हस्तिस्कन्धाधिरूढानामुत्पद्येत न केवलम् ।।
इत्युदित्वा भगवत्यौ, जग्मतुस्ते यथागतम् । सोऽपि विस्मयमानोऽन्तर्महात्मैवमचिन्तयत् ।।
त्यक्तसावद्ययोगस्य, कायोत्सर्गजुषस्ततः । अस्मिंस्तरोरिवाऽरण्ये, ममेभारोहणं कुतः ? ।।
इमे भगवतः शिष्ये, भाषेते न मृषा क्वचित् । तत् किमेतदहो ! यद्वा, हुं ज्ञातं हि चिरान्मया ।।
को हि व्रतगरिष्ठानां, कनिष्ठानां नमस्क्रियाम् । कर्त्तेति मान एवेभस्तमारूढोऽस्मि निर्भरम् ।।
जगत्त्रयगुरोस्तस्य, चिरं सेवाजुषोऽपि मे । नाऽभूद् विवेकस्तरणं, कुलीरस्येव वारिणी ।।
प्रतिपन्नव्रतेष्वादौ, स्वभ्रातृषु महात्मसु । कनिष्ठा इति यत् तेषु, नाऽभून्मम विवन्दिषा ।।
इदानीमपि गत्वा तान्, वन्दिष्येऽहं महामुनीन् । चिन्तयित्वेति स महासत्त्वः पादमुदक्षिपत् ।।
लतावल्लीवत् त्रुटितेष्वभितो घातिकर्मसु । तस्मिन्नेव पदे ज्ञानमुत्पेदे तस्य केवलम् ।।
उत्पन्नकेवलज्ञानदर्शनः सौम्यदर्शनः । रवेरिव शशी सोऽथ, जगाम स्वामिनोऽन्तिकम् ।।
प्रदक्षिणां तीर्थकृतो विधाय, तीर्थाय नत्वा च जगन्नमस्यः ।
महामुनिः केवलिपर्षदन्तस्तीर्णप्रतिज्ञो निषसाद सोऽथ ।।

ऋजुतायाम् आवश्यकनिर्युक्त्युक्ताऽङ्गर्षिकथा–

चम्पायां कौशिकार्यो नामोपाध्यायः, तस्य द्वौ शिष्यौ–अङ्गर्षिः रुद्रश्च, अङ्गको भद्रकस्तेन तस्याङ्गर्षिः नाम कृतं, रुद्रः स ग्रन्थिच्छेदकः, तौ–द्वावपि तेनोपाध्यायेन दारुकेभ्यः प्रस्थापितौ, अङ्गर्षिरटवीतो भारं गृहीत्वा प्रत्येति, रुद्रको दिवसे रन्त्वा विकाले स्मृतं यदा तदा प्रधावितोऽटवीं, तं च प्रेक्षते दारुकभारेणायान्तं, चिन्तयति च निष्काशितोऽस्मि उपाध्यायेनेति, इतश्च ज्योतिर्यशा नाम वत्सपालिका पुत्रस्य पन्थकस्य भक्तं नीत्वा दारुकभारकेणायाति, सा रुद्रकेणैकस्यां गर्तायां मारिता, तं दारुकभारं गृहीत्वाऽन्येन मार्गेण पुरत आगत उपाध्यायस्य हस्ते ददत् कथयति–यथा तेन तव सुन्दरशिष्येण ज्योतिर्यशा मारिता, रमणेण विभाषाः स आगतः, निर्घाटितो वनषण्डे चिन्तयति– शुभाध्यवसानेन जातिः स्मृता संयमः केवलज्ञानं महिमानं देवाः कुर्वन्ति, देवैः कथितं यथैतेनाभ्याख्यानं दत्तं, रुद्रको लोकेन हील्यते, स चिन्तयति–सत्यं मयाऽभ्याख्यानं दत्तं, स चिन्तयन् संबुद्धः प्रत्येक बुद्ध जातः, इतरो ब्राह्मणो ब्राह्मणी च द्वे अपि प्रव्रजिते, उत्पन्नज्ञानाश्चत्वारोऽपि सिद्धाः ।

संतोषे तु कपिलकेवलीकथा यथोपदेशप्रासादे–

कौशाम्बीनामनगरी, तस्यां नगर्यां जितशत्रुनामराजास्ति, तस्य पुरोधाश्चतुर्दशविद्यास्थानपारगः काश्यपो नाम विप्रोऽभूत्, तस्य यशा नाम पत्नी, तयोः पुत्रः कपिलनामाभूत्, तस्य शिशोर्बाल्ये काश्यपो जनको विपन्नः कपिलश्चानाथोऽभवत्, राजा काश्यपपुत्रं कपिलं बालं ज्ञात्वा तस्य पदेऽन्यं योग्यं विप्रं स्थापयामास, सोऽन्वहं

हयारूढश्छत्राच्छादितदेहसेवकैः परिवृतो राजद्वारादिषु याति, तदा कपिलजननी तं नित्यत्तुरङ्गमारूढं वीक्ष्य बाढस्वरेण रोदनं कुरूतं, यतो मन्दभाग्यानां दु:खे स्मृते रोदनमायाति, कपिलोऽपि मातरं रूदन्तीं प्रेक्ष्य शोकाक्रान्तदेहो भृशं रोदिति, एवं कालो याति । एकस्मिन् दिने कपिलेन माता पृष्टा हे मातस्त्वमेनं विप्रं हयारूढं राजगृहे यान्तं वीक्ष्य केन कारणेन रोदिषि ? ममाग्रे सत्यं समाख्याहि । ततस्तया प्रोक्तं हे वत्स ! त्व जनकस्थाने राज्ञायं स्थापितः, यथायं सम्पदां पदं वर्तते, तथा तव पितापि पूर्वमभवत् तं स्मृत्वा च जातखेदाहं रोदिमि, अनेन तव पितुः श्रीः प्राप्ता, त्वं तु बालोऽपठितस्तेन त्वया पितुः श्रीर्न रक्षिता, पुनः कपिलो जजल्पैष पुरोधोऽधिकारो मम कथमायाति ? मात्रोक्तं त्वं विद्याभ्यासं कुरू, चतुर्दशविद्यापारगो भव, यथा तव जनकस्थाने राजा पुनस्त्वां स्थापयति, पुनः कपिलेनोक्तं हे मातरहं कस्य समीपे विद्याभ्यासं करोमि ? सावददस्यां नगर्यां सर्वोऽपि तव मत्सरी वर्तते, अतस्त्वां कोऽपि नाध्यापयिष्यति, यदि तव पठनेच्छा वर्तते तर्हि श्रावस्त्यां नगर्यां व्रज । तत्र तव पितुर्मित्रमिन्द्रदत्तो द्विजः सकलशास्त्रपारगस्तव पितृतुल्यो वर्तते, स त्वां सकलकलासम्पूर्णं करिष्यति ।

ततस्तत्र गतः कपिलः, तस्य चरणौ नत्वा स्वं ज्ञापयित्वा विज्ञप्तं हे तात ! मात्रा त्वदन्तिकेऽहं प्रेषितः, पठनायागतोऽहं, ततस्तेनोत्सङ्गे धृतः सम्भाषितो भोजितश्च । ततस्तेन प्रोक्तमहं तव विद्याभ्यासं कारयिष्ये, परं तव भोजनचिन्ता कथं भविष्यति, मम गृहे तु तन्नास्ति यद्भुज्यते । ततस्तेनोक्तं भिक्षयाहं भोजनं करिष्ये, इन्द्रदत्तेनोक्तं भो वत्स ! भिक्षाभ्रमणे विद्याभ्यासो न भवति तथा भोजनरहितस्याध्ययनं न भवति, यतो विना भोजनं मुरजोऽपि न गुञ्जति, अतः प्रथमं तच्चिन्ता क्रियते । अथ तं बालं करे धृत्वेन्द्रदत्तः शालिभद्रमहेभ्यगृहे गतः, ॐ भूर्भुवः स्वरित्यादिगायत्रीं बाढस्वरेण पठन् बहिः स्थितः स्वं द्विजन्मानमज्ञाप यत् । ततः श्रेष्ठिना समाहूय पृष्टो भो विप्र ! किं याचसे ? यत्तवेप्सितं तद्याचस्व । इन्द्रदत्तेनोक्तमेष बालो विप्रो विद्यार्थी,त्वमस्य प्रत्यहं भोजनं देहि, अहं पुनर्विद्यां प्रयच्छामि, ममान्तिके द्रव्यं नास्त्यतो भवदन्तिके प्रत्यहं भोजनं याचे, तस्य वचनं श्रेष्ठिनाङ्गीकृतं, तद्दिनादारभ्य कपिल इन्द्रदत्तपार्श्वेऽधीत्य शालिभद्रगृहे भोक्तुं याति, तदा तस्यैका दासी परिवेषयति, तस्या हास्यादिक्रमेण स तस्यां रक्तो जातः, सापि तस्मिन् रक्ता बभूव । ततस्तौ परस्परं स्त्रीभर्तारावेव रेमाते, धिग्विषयान् ! यतो विषयासक्तः पुमान् किमपि कृत्याकृत्यं न जानाति, एवं तयोर्दिनानि यान्ति । अन्यदा दास्योक्तं मम भर्ता त्वमेव, परं निःस्वस्तेनापरं नरं प्राणयात्रार्थं भेजे, न पुनर्भर्तृबुद्ध्या तेनापि तत्प्रतिपन्नम् ।

अन्येद्युस्तस्मिन्नगरे कश्चिद्दासीनामुत्सवोऽभवत्, तदानीं सा दासी पुष्पपत्रादिकृते द्रव्याद्यभावाद्विमनस्का जाता सा दासी कपिलेन विमनस्का दृष्टा, पृष्टा च हे सुन्दरि! त्वं विमनस्का किं दृश्यसे ? तयोक्तमद्य दासीनामुत्सवो वर्तते, तस्मादत्र पुष्पपत्रादि ममोपयुज्यते, अन्यथा मां दासीवर्गो विगोपयिष्यति, एतत्तस्या वचनं श्रुत्वा तद् दुःखव्यन्तरावेशविवशः कपिलोऽधृत्या किञ्चिद्रुदित्वा मौनमालम्ब्य तस्थौ तं तथाविधं दृष्ट्वा दास्यप्यदोऽवदद् हे स्वामिंस्त्वं मा विषीद, अस्मिन्नगरे धनो नाम श्रेष्ठी वर्तते, यस्तं निशात्यये प्रबोधयति तस्मै स श्रेष्ठी द्वौ स्वर्णमाषौ ददाति, अतस्त्वं तत्र गत्वा प्रथमं तं प्रबोधय, स जागरितः सन् तव माषद्वयं कनकं दास्यति, तत्त्वं मे समर्पयेर्यथावयोरपि कल्याणं भवति, कपिलेन तत्सर्वं प्रतिपन्नम् । ततः कपिलस्तस्यामेव रजन्यां निर्गतः, माऽन्यः कोऽपि तत्र प्रथमं यात्विति भिया जागरितः, चन्द्रज्योत्स्नया निशामविदन्मार्गे गच्छन्नारक्षकैर्धृतः, चौरधिया बद्धः, प्रभाते तैरारक्षकैः प्रसेनजितो राज्ञः पुरत आनायितः,

राज्ञा पृष्टो भो विप्र ! त्वं कुत्र यासि ? किमर्थं वात्रागतोऽसि ? तेन सर्वा कथा सत्योक्ता । ततो दयार्द्रहृदयेन राज्ञा मुक्तो भाषितश्च भो विप्र ! यद्रोचते तद्याचस्व, तव वाञ्छितमहं यच्छामि स प्राह राजन्नालोच्य याचयिष्ये ।

ततः सोऽशोकवनान्तरे गत्वा विमृशति यथा द्विमाषेण वस्त्रादि न स्यात्तर्हि सुवर्णशतं मार्गयामि, परं तेन गृहवाहनादि न स्यात्तर्हि सहस्रं याचे, सहस्रेणाप्यपत्यविवाहाद्युत्सवा न भवन्ति तर्हि स्वर्णलक्षं याचे तेनापि दानमानसन्मानबन्धुदीनोद्धरणादि कर्तुं न शक्यते, अतः कोटिमेवं कोटिशतं कोटिसहस्रं वा तदर्थये । एवं तस्य कपिलस्य चिन्तयतः शुभकर्मोदयादिति बुद्धिः समुत्पन्ना, यथा –

जहा लाहो तहा लोहो लाहो लोहो पवड्ढइ । दोमासकयं कज्जं कोडीएवि न निट्ठियं ।।१।।

अहो लोभसागरो दुष्पूरः, स केनापि पूरयितुं न शक्यते, यथाहं विद्यार्थमागतः स्वगृहं त्यक्त्वा परदेशे परगृहे समागतः, एष इन्द्रदत्तो धर्मार्थं मे विद्यां प्रयच्छति, तथैव शालिभद्रो मे भोजनं प्रयच्छति, मया मन्दमतिना यौवनमदेनैतस्या दास्या गमनं कृतं, मम निर्मलं कुलं कलङ्कितं, धिग् विषयान् ये जीवानेवं विडम्बयन्ति । इत्यादि भावनां भावयन् विषयाद्विरक्तः संवेगमापन्नः समुत्पन्नजातिस्मरणः कपिलः स्वयम्बुद्धो बभूव । ततः स्वयं मूर्धजानुद्धृत्य देवतयार्पितं रजोहरणवदनवस्त्रिकादिमुनिवेषमाददे, तत उत्थाय प्रसेनजितोराज्ञः पुरो बभूव, राज्ञोक्तमेतत्किम्? तेनोक्तं जहा लाहो इत्यादि कथयित्वा मुनौ स्थिते राजा प्रोचेऽहं तव कोटिमपि ददामि, त्वं भोगान् भुङ्क्ष्व ? दुष्करं व्रतं प्राणान्तेऽपि न मुञ्चामि, अहं निर्ग्रन्थीभूतोऽस्मि, हे भद्र ! त्वं धर्मलाभोऽस्तु, इत्युक्त्वा कपिलमुनिस्ततो निर्गत्य निर्ममो निरहङ्कारो निरिहो वसुन्धरां विजहार । एवं व्रतं पालयतः तस्य मुनेः षण्मासपर्यायेण उज्ज्वलं केवलज्ञानं अभूत् ।

❋ ❋ ❋

## ( स्वागतावृत्तम् )

**गुप्तिभिस्तिसृभिरेवमजय्यान् त्रीन् विजित्य तरसाधमयोगान् ।**
**साधुसंवरपथे प्रयतेथा, लप्स्यसे हितमनीहितमिद्धम् ।।४।। [१०१]**

**व्याख्या- *अजय्यान्* जेतुमशक्यान् अयतनाप्रवृत्तिमतश्च। *त्रीन्* त्रिविधान् मनोवाक्कायप्रभवान्, *अधमयोगान्* अशुभव्यापारान् आश्रवान् *तिसृभिरेव गुप्तिभिः त्रिविधाभि*रपि मनोवाक्कायप्रवृत्तिनिरोध-रूपाभि*र्गुप्तिभि*रशुभनिवृत्तिशुभप्रवृत्तिभिश्च *तरसा* शीघ्रं *विजित्य* विशेषेण जित्वा *साधुसंवरपथे* शुद्धसंवरमार्गे *प्रयतेथाः* प्रधानोद्यमपरो भव, तथाकृते सति त्वं *अनाहत*मखण्डं सनातनं मिद्धं (सनातनं सिद्धं) स्वाभाविकं *हितं* मोक्षसुखं *लप्स्यसे* प्राप्तो भविष्यसीत्यर्थः।।४।।**

आवश्यकनिर्युकत्युक्ता सुव्रतमुनिकथा वाच्या –

सुदर्शनपुरे शिशुनागः श्रेष्ठी, सुयशास्तस्य भार्या, श्राद्धौ, तयोः पुत्र सुव्रतो नाम सुखेन गर्भे स्थितः सुखेन वृद्धः एवं यावत् यौवनस्थः संबुद्धः, आपृच्छय प्रव्रजितः पठितः, एकाकिविहारप्रतिमां प्रतिपन्नः, शक्रप्रशंसा, देवैः परीक्षितोऽनुकूलेन, धन्यः कुमारब्रह्मचारी एकेन, द्वितीयेन क एतस्मात् कुलसन्तानच्छेदकादधन्य इति ?, स भगवान् समः, एवं मातापितरौ स्वविषयप्रसक्तौ दर्शितौ, पश्चात्

मार्यमाणौ करुणं कूजतः, तथाऽपि समः, पश्चात् सर्वा ऋतवो विकुर्विता दिव्यया स्त्रिया सविभ्रमं प्रलोकितं मुक्तदीर्घनिःश्वासमुपगूढः तथाऽपि संयमे समाहिततरो जातः, ज्ञानमुत्पन्नं यावत् सिद्धः ।

वचनयोगे उपदेशप्रासादकथानकं–

विष्णूद्याने शिवशर्मदेवशर्महरिशर्म–नामानस्त्रयस्तापसा दुस्तपं तपस्तपन्ति स्म । तेषां त्रयाणामपि तपःप्रभावात्परिधानपटा नभस्यातपे तिष्ठन्तीति प्रसिद्धिः । एकदा स्नानार्थं सरसि गतास्ते त्रयोऽपि । स्वस्वपरिधानपटा नभस्यातपे धृता यावत्तिष्ठन्ति तावत्तत्र सरस्येकेन बकेनादत्तं मत्स्यमालोक्य ''हाऽकार्यमिदं यदनेन पापिना निरपराधोऽयं मत्स्यो गृहीत इति मुञ्च मुञ्चेति'' वदतो मत्स्ये समुत्पन्नकृपस्य बके च निर्दयस्य शिवशर्मण एकः पटो गगनादधस्तादपतत् । पतितं च पटं प्रेक्ष्य ''मा मुञ्च मा मुञ्च'' इतिब्रुवाणस्य क्षुधितोऽसौ वराको बको मरिष्यतीति तस्मिन् बके जातकरुणस्य मत्स्ये च निर्दयस्य देवशर्मणोऽपि द्वितीयः पटस्तथैवापतत् । इति तौ द्वावपि पतितौ विलोक्य बके मत्स्ये च समभावस्तृतीयस्तापसः प्राह–

**मुञ्च मुञ्च पतत्येको मा मुञ्च पतितो यदि ।**
**उभौ तौ पतितौ दृष्ट्वा मौनं सर्वार्थसाधकम् ।।**

काययोगेऽपि उपदेशप्रासादकथा–

स्वर्गाद् द्वौ देवौ सुहृदौ विश्वानरधन्वन्तरिनामानौ, एकः श्राद्धोऽपश्च तापसभक्तः स्वस्वधर्मं वर्णयन्तौ धर्मपरीक्षार्थं मृत्युलोक आगतौ । तदा मिथिलेशपद्मरथो राज्यं त्यक्त्वा वासुपूज्यजिनान्तिके दीक्षां लात्वा मार्गे गच्छति, तं वीक्ष्यानेकसरसान्नादिना लोभितोऽपि क्षुधार्दितोऽपि न चचाल । ततोऽध्वन्येकस्मिन् कण्टकास्तीक्ष्णा द्वितीयस्मिन् भेक्यश्च विकुर्विताः । तृतीयामार्गाभाव ईर्यासमितिपरश्चरणयोरुधिरस्राव उत्पन्नेऽपि कण्टकाकुलमार्गं न जहौ । ततो गीतनृत्यस्त्र्यादिरूपैः क्षोभितोऽपि न स्खलितः । ततस्तौ जिनशासनं प्रशंसतुः ।

❋ ❋ ❋

## अतो वक्ष्यमाणप्रयत्नपरो मोक्षगमनसज्ञो भवेत्युपदिशति–

### ( मन्दाक्रान्तावृत्तम् )

**एवं रुद्धेष्वमलहृदयैराश्रवेष्वाप्तवाक्य– श्रद्धाचञ्चत्सितपटपटुः सुप्रतिष्ठानशाली ।**
**शुद्धैर्योगैर्जवनपवनैः प्रेरितो जीवपोतः स्रोतस्तीर्त्वा भवजलनिधेर्याति निर्वाणपुर्याम् ।।५।। [१०२]**

**व्याख्या– *एवं* पूर्वोक्तेनौपयिकेन संवरेण *आश्रवेषु निरुद्धेषु* स्वस्मिन् प्रोद्भावाऽसत्तां गतेषु सत्सु, तत *एवामलहृदयैर*मलतां दोषबन्धमलोत्पत्तिरहितत्वेन निर्मलतां प्राप्तानि *हृदयानि* चेतांसि येषां ते तथा तैः, *शुद्धैर्योगैर्जवनपवनैः शुद्धाः* समग्रमिथ्यात्वजन्यविपर्यासाविध्यनादरहिंसादिदोषवर्जिताः *योगा* मनोवाक्कायजा धर्मव्यापारास्तैरुद्भूतैस्तद्रूपैर्वा, *जवनपवनैः जवनाः* शीघ्रवेगकारिणोऽनुकूला ये *पवना* वायवस्तैः *प्रेरितः* प्रेरणं नियोगेनेच्छितगमनं प्रापितः, *आप्तवाक्यश्रद्धाचञ्चत्सितपटपटुः आप्ता* निःसत्ताकी–कृतरागद्वेषमोहा वीतरागसर्वज्ञाः तेषां यानि *वाक्यानि* उपदेशवचनसमूहरूपागमास्तेषां तेषु वा या**

*श्रद्धा* शुद्धनिश्चलास्तिकतापरिणतिः तद्रूप*श्चञ्चन्* शुद्धप्रकाशसुन्दरः *सितपटपटुः सितपटः* प्रवहणमध्यगत-स्थूणोपरिसमारोपितमहापटः सढ इति लोकप्रसिद्धः तेन *पटुः* स्फुटनिबिडभावनापवनपूरितप्रवहण-गतिवेगवर्धकः, *सुप्रतिष्ठानशाली* *सुष्ठु* शोभनं व्रतकर्तव्यं संस्कारधैर्यपूर्णप्रतिष्ठानं सुदृढमधोभागाश्रयस्तेन *शाली* शोभमानः, *जीवपोत*श्चेतनप्रवहणं *भवजलनिधेः* संसारसागरस्य *स्रोतः* प्रवाहं *(तीर्त्वा* समुत्तीर्य) *निर्वाणपुर्यां* सनातनसहजसुखनगर्यां *याति* गच्छति। निरुद्धसर्वाश्रवः शुद्धश्रद्धायोगसंवरवान्मोक्षगामी-त्यर्थः ॥५॥

प्रसिद्धो हि उपदेशमालाटीकोक्तशैलक-पन्थकवृत्तान्तः –

श्रीशुकाचार्याः सहस्रशिष्यैः परिवृता एकवारं श्रीसेल्लकपुरं गताः, तदा सेल्लकराजा श्रीशुकाचार्यवन्दनार्थं निर्गतः, धर्मं श्रुत्वा प्रतिबुद्धो मण्डुककुमारं राज्ये संस्थाप्य पंथकप्रभृतिभिः पंचशतीमितैरमात्यैः सार्द्धं चारित्रं जग्राहः, क्रमेण स द्वादशाङ्गीधारको जातः, तमाचार्यपदे संस्थाप्य श्री शुकाचार्यैः श्रीसिद्धगिरावनशनं कृतं सहस्रशिष्यपरिवृत्ता मासांते केवलमवाप्य मोक्षं प्राप्ताः, तदनंतरं श्रीसेल्लकाचार्यस्य अरसविरसाहारतः शरीरे महान्तो रोगाः समुत्पन्नः, सोढुमशक्यास्तथापि दुस्तपं तपस्तप्यमाना एकदा ते सेल्लकपुरमागताः, मण्डुकनामा राजा वन्दनार्थं गतः, देशनां श्रुत्वा जीवाजीवादिनवतत्त्वज्ञायको जातः, पश्चात्पितुः सेल्लकराजर्षेः शरीरं शुष्कं रूधिरमांसवर्जितं दृष्ट्वा मण्डुकराज्ञा विज्ञप्तिः कृता, भो स्वामिन् ! भवदीयं शरीरं रोगजर्जरं दृश्यते, ततोऽत्रैव मदीययानशालायां तिष्ठत ? यथाहं शुद्धौषधेन पथ्यभोजनेन च भवदीयं शरीरं रोगरहितं करोमि, आचार्येणापि तत्प्रतिश्रुतं, यानशालायां स्थिताः, राज्ञापि औषधादिना चिकित्सा कारापिता, रोगा गताः, तथापि राज्ञः सरसाहारग्रहणेन ते गृध्रा जाताः, कुत्रापि विहारं न कुर्वन्ति तदैकं पन्थकनामानं शिष्यं तत्पार्श्वे सेवार्थं मुक्त्वाऽन्यैः सर्वैरपि शिष्यैर्विहारः कृतः, पश्चात्सेल्लकाचार्या अतीवरसलम्पटा जाताः, पन्थकोऽपि तेषां सम्यक् सेवां करोति, अशुद्धमप्याहारमानीय गुरवे ददाति, स्वयं च शुद्धमाहारं गृह्णाति । एकवारं कार्त्तिकचतुर्मासिकदिने गुरवः सरसाहारं कृत्वा सुखनिद्रया संध्यायामेव सुप्ताः सन्ति एतस्मिन्नवसरे पन्थकश्चातुर्मासिकप्रतिक्रमणकुर्वन् गुरुचरणे मस्तकमारोप्य चातुर्मासिकक्षामणकं क्षामयति तावद् गुरवो गतनिद्रा जाताः, क्रोधातुराः कथयन्तिस्म केन पापीयसा मम निद्राभङ्गः कृतः ? तदा पन्थकेनोक्तं भगवन्नद्य चातुर्मासिकक्षामणकं कुर्वतो मम मस्तकं भवच्चरणे लग्नं, तेन भवतां निद्रांतरायः संजातः, क्षंतव्योऽयं ममापराधः, अद्यप्रभृत्येतादृशमपराधं न करिष्यामीति वारंवारं स्वापराधमेव वदंतं तं दृष्ट्वा गुरुचित्तं सावधानं जातं, मनसि ते चिन्तयतुं लग्ना अहो कीदृशीयं शिष्यक्षमा ! धन्योऽयमधन्योऽहं यदद्य चातुर्मासिकदिनेऽपि सरसाहारं भुक्त्वा सुप्तोऽस्मीति स्वात्मनिन्दा कुर्वतस्तस्य वैराग्यमुत्पन्नं, पन्थकं कथयति भो वत्स त्वयाऽद्य भवसमुद्रे निपतन्नहमुद्धृतः, इति कथयित्वा स प्रमादं विहाय शुद्धं चारित्रं जग्राह सर्वेऽपि शिष्या गुरुसमीपमागताः, पश्चाद्बहुकालं बहून् भव्यान् प्रतिबोध्य पंचशतशिष्यसहितास्ते श्रीशत्रुंजयेऽनशनेन सिद्धिं गताः ।

अथ गेयपद्याष्टकेन संवरभावनां विभावयति-

शृणु शिवसुखसाधनसदुपायं शृणु शिवसुखसाधनसदुपायम् ।
ज्ञानादिकपावनरत्नत्रयपरमाराधनमनपायम् शृ० ॥१॥ [१०३]

व्याख्या- हे आत्मान् ! त्वमर्हदादिभिः सज्ज्ञानिभिरुपदिष्टं *शिवसुखसाधनसदुपायं शृणु । शिवः* सर्वथा निरुपद्रवो मोक्षस्तत्संबन्धि तस्मिन् वा य*त्सुखं* महानन्दः शिवसुखं तस्य यत्*साधनं* निष्पादकमीदृशं *सदुपायभूतं सत्* सत्यः सफलः साधुः सत्पुरुषपूजितः प्रशस्त आदरणीयस्वरूप, *उपायः* सदुपाय उपेयोपगमहेतुस्तं, *शृणु* यथाशास्त्रं कथ्यमानं श्रवणविषयं कुरुष्व । *ज्ञानादिकपावनरत्नत्रय-परमाराधनमनपायं* सम्यग्ज्ञानदर्शनचारित्ररूपस्य *पावनस्य* आत्मनः पवित्रताकारणस्य *रत्नत्रय-*स्यानन्तरप्रोक्तस्य *परमं* सर्वोद्यमेनोत्कृष्टं निरतिचारं *यदाराधन*मखण्डैकधारया पालनं वर्तते *तदनपायं* फलवियोगेन वर्जितमवश्यं मोक्षपदप्रापकः सदुपायो वर्तते । अतस्तदाराधनतत्परो भवेत्यर्थः ॥१॥

❋ ❋ ❋

विषयविकारमपाकुरु दूरं, क्रोधं मानं सहमायम् ।
लोभं रिपुं च विजित्य सहेलं, भज संयमगुणमकषायम्, शृ० ॥२॥ [१०४]

व्याख्या- *रिपुं* चेति प्रत्येकमभिसंबध्यते । *क्रोधं मानं सहमायं लोभं* चतुर्विधं, ततः परस्मिन् क्रोधमिश्र मानपरिणामं द्वेषं, स्वस्मिन् श्रितं स एव रागरूपं, प्रोक्तरीत्यैव सर्वैः सह संयोगाः कार्याः यथा परस्मिन् वृत्तं क्रोधं समायं, क्रोधलोभं, द्वेषरूपं, एवं मानं समायं, मानलोभमपि, द्वेषरूपं, स्वस्मिन्नाश्रितं क्रोधं समायं, (क्रोधलोभं,) मानं समायं, मानलोभं, रागरूपं समायं लोभं तु मिश्रितपरिणामं रागमेव स्वस्मिन् परस्मिंश्चेति निश्चयनयमतं । इति षड्विधं *रिपुं* वैरिवर्गं *सहेलं* स यथा सत्वरं जितो भवति तथा तं *विजित्य* तस्य विजयं विधाय, *अकषायं* न विद्यते कषायोऽनन्तानुबन्ध्यादिषोडशहास्यादिन-वनोकषायरूपपञ्चविंशतिभेदभिन्नो रागद्वेषरूपो वा यस्मिन्कर्मणि यथा स्यात्तथा अकषाय *संयमगुणं संयमः* शुभाशुभप्रवृत्तिनिरोधस्वभावस्तद्रूपो गुणो जीवधर्मो जीवस्य निर्वृतिस्वभाव इति यावत् तं *भज* सदैव सेवस्व । तेन च *विषयविकारं* विषयाभिलाषरूपविभावं *दूर*मतिशये*नापाकुरु* निषेधय । तदेव रत्नत्रयस्य परमाराधनमित्यर्थः ॥२॥

भरतेश्वरबाहुबलीवृत्तौ भणितं हि नागदत्तकथानकम् –

पूर्वं द्वौ कुमारौ साधू भूत्वा तपः कुर्वाणौ स्वर्गं गतौ । तत्रस्थाभ्यां ताभ्यां मिथः एवं प्रोक्तम्–यः प्रथमं देवलोकान्मर्त्यलोकं प्राप्नोति स देवेन स्वर्गादागत्य प्रतिबोध्याः । लक्ष्मीपुरे धनदत्तः श्रेष्ठी वसति स्म । देवदत्ता पत्नी । अन्येद्युः पुत्रार्थं नागदेवतामारराध श्रेष्ठी । प्रसन्नीभूय देवोऽवग्–तव पुत्रो भविष्यति । इतः क्रमात् स्वर्गादिकः साधुजीवदेवो दत्तपुत्रोऽभूत् । जन्मोत्सवं कृत्वा पिता नागदत्तेति नामादात्सूनोः । क्रमाद् द्वासप्ततिकलाकुशलोऽजनि । गन्धर्वनागदत्तौऽसौ ख्यातो गन्धर्वकौशलात् । भुजङ्गमकेलिव्यसनी जातः । इतोऽवधिज्ञानेन स्वमित्रं नागदत्तं व्यसनिनं मत्वा देवः प्रबोध्यति । नागदत्तो मनागपि व्यसनं न मुञ्चति । सर्प्पान् खेलयति । अन्येद्युः सर्प्पैः करण्डकं भृत्वा मित्रैः सहोद्याने गन्धर्वनागदत्तः क्रीडां कर्तुं ययौ । तत्र यावत्

सर्प्पान् खेलयति तावद्देवस्तं तत्र ज्ञात्वा गारुडिकरूपधरः सर्प्पभृतकरण्डकं गृहीत्वा तत्रागात् । ततो मित्रैरुक्तं देव! अच सर्प्पखेलको नरो विद्यते । ततस्तं गन्धर्वनागदत्तो जगौ–किमत्र करण्डकेऽस्ति ? सुरो गारुडिकवेषभृत् प्राह–सर्प्पाः सन्त्यत्र । ततो नागदत्तो जगौ रमस्व मम सर्पैस्त्वं, तव सर्पैरहमपि रेमे । ततो गारुडिकदेवो नागदत्तसर्प्पैः चिक्रीड । तदा तैः सर्प्पैर्दष्टोऽपि गारुडिको न म्रियते स्म । गन्धर्वनागदत्तस्तदाऽऽमर्षाज्जगौ अहं तव सर्पै रेमे । देवोऽवग् भो महानुभाग ! मम सर्पैर्दष्टस्त्वं मरिष्यसि । नागदत्तो जगौ मुञ्च त्वं स्वसर्प्पान् । ततस्तत्र मण्डलमालिख्य सर्प्पकरण्डकान् मुक्त्वा चतुर्दिशं गारुडिकः सुरं आकार्य लोकान् जगौ ।

गंधव्वनागदत्तो–इच्छइ सप्पेहि खिल्लियं इहयं । साजइ कहंवि खज्जइ, ममावि दोसो न दायव्वो ।।५७।।

ममायमहिरीदृशोऽस्ति ।

तरुणदिवायरनयणो, विज्जुलयाचंचलग्गजीहालो । घोरमहाविसदाढो, उक्का इव पज्जलियरोसो ।।

एवंविधोऽहिर्विद्यते क्रूरः ।

डक्को जेण मणुस्सो, कयमकयं वा न याणइ बहुंपि । अद्दिस्समाणमच्चूं, कहमिच्छसि तं महानागं ।।५९।।

मेरुगिरितुंगसिहरो, अट्ठफणो जमलजुअलजीहालो । दाहिणपासंमि ठिओ, माणेण वियट्टई नागो ।।६०।।

डक्को जेण मणूसो, थद्धो न गणेइ देवयरायमवि । तं मेरुपव्वयनिहं, कहमिच्छसि तं महानागं ।।६१।।

अस्मिन् करण्डके मायानागी समस्ति सा कीदृशी ।

सललियविल्लहलगई, सत्थियलंछणंकियपडागा । मायामई या नागी, नियडिकवडवंचणाकुसला ।।६२।।

तं च सि वालग्गाही, अणोसहिबलो अ अपडिहत्थो अ । सा य चिर संचियविसा, गहणंमि वणे वसइ नागी ।।६३।।

हुज्ज हु ते विणु वाऊ, तीसे दाढंतरं उवगयस्स । अप्पोसहिमंतबलो, न हु अप्पाणं विगिछिहिसि ।।६४।।

इत उत्तरस्यामीदृग् नागोऽस्ति ।

उत्तरमाणो सव्वं, महालओ पुन्नमेहनिग्घोसो । उत्तरभागंमि ठिओ, लोहेण वियट्टई नागो ।।६५।।

डक्को जेण मणूसो, होइ महासागर व्व दुप्पूरो । तं सव्वविससमुदयं, कहमिच्छसि तं महानागं ।।६६।।

ए एते पावाही, चत्तारिवि कोहमाणमायलोहा । जेहिं मया संततं, जरियमिव जगं कलकलइ ।।६७।।

एएहि जो अ खज्जइ, चउहि वि आसीविसेहि पावेहिं । अवस्सं नरयपडणं, नत्थि सिआलंबणं किंचि ।।६८।।

एवं प्रोच्य तेन सुरेण गारुडिकेन ते सर्पा मुक्ताः । स गन्धर्वनागदत्तस्तैः सर्पैर्दष्टो मृतस्तदानीम् । गन्धर्वनागदत्तसेवका जगुराहो किं कृतं भवद्भिः सुरो जगौ मयाऽसौ वारितोऽपि न तिष्ठति किं क्रियते । तस्य सुहृद्भिर्भेषजादि कृतं बहु परं गुणो नाभूत् तस्य । ततस्तद्भृत्याः पादयोः पतित्वा जगुरमुं जीवय प्रसद्य । देवोऽवोचत् दष्टोऽहमभूवं पुरा पुनः ईदृक्षया क्रियया जीवितः । मदुक्तां क्रियां करोत्येष यदि तदासौ जीवति । यदि तां क्रियामङ्गीकृत्य अग्रतोऽसौ न पालयिष्यति तदा पुनर्मृत एव । एतच्चरित्रं शास्त्रकृद् गाथाभिराह–

एएहि अहं खइओ, चउहि वि आसीविसेहि पावेहिं । विसनिग्घायणहेतुं, चरामि विविहं तवो कम्मं ।।६९।।

सेवामि सेलकाणण–सुसाणसुन्नघररुक्खमूलाइं । पावाहीणं तेसिं, खणमवि न उवेमि वीसंभं ।।७०।।

अच्चाहारो न सहइ, अइनिद्धेणवि सया उइज्जंति । जायामायाहारो, तं पि य गामं न भुञ्जामि ।।७१।।

ओसन्नकयाहारो, अहवा विगइविवज्जिआहारो । जं किंचि कयाहारो अवउज्झियथोवआहारो ।।७२।।

अह जो थोवाहारो, थोवयभणिओ थोवनिद्दो अ । थोवोवहिउवगरणो, तस्स हु देवा वि पणमंति ।।७३।।

सिद्धे नमंसिऊणं, संसारत्था य जे महाविज्जा । वुच्छामि दंडकिरियं, सव्वविसनिवारणं विज्जं ।।७४।।
सव्वं पाणाइवायं, पच्चक्खाइत्ति अलियवयणं वा । सव्वं अदत्तदाणं, अबंभ च परिग्गहं स्वाहा ।।७५।।

एतच्छ्रुत्वोत्तस्थौ स मातापितृभिरुक्तम् । अयमस्मत्पुत्रः स्वयमुत्थितः । ततस्तथैव पतितः । मातापितृभिरुक्तम् अमुं जीवय यत्करोतु तत्करोतु । ततः पुनरपि उत्थापितः । ततो देवः प्राग्भवं तस्या चख्यौ । ततो जातिस्मृतिं प्राप्य दीक्षां ललौ । जगौ लोकाग्रे चतुः सर्प्पतुल्याः क्रोधमानमायालोभाः, एतैः क्रोधाद्यहिभिर्यो न दष्टः स परमं पदं याति । अहं तु पूर्वमेतैः क्रोधाद्यहिभिर्ग्रस्तोऽभूवम् । अधूना त्वनेन देवेन प्राग्भवमित्रेणैतेभ्यः क्रोधाद्यहिभ्यो मोचितोऽहम् । तत एतेषां क्रोधाद्यहीनां वशे न गन्तव्यम् । ततो देवः स्वस्थाने गतः । मातापितरावपि स्वस्थाने गतौ । नागदत्तश्च क्रोधाद्यहीन् चतुरो निर्जित्य सर्वकर्मक्षयान्मुक्तिं ययौ ।।

❋ ❋ ❋

**उपशमरसमनुशीलय मनसा, रोषदहनजलदप्रायम् ।**
**कलय विरागं धृतपरभागं, हृदि विनयं नायं नायम्, श्रृ० ।।३।। [१०५]**

**व्याख्या- हे आत्मन् ! पुनराराधनकृते प्रथमतः *रोषदहन-जलदप्रायं रोषः* कोपः स एव दहनो वानाग्निस्तस्य निर्वापणे *जलदप्रायं* मेघवृष्टितुल्यं *मनसा* हृदयेन *उपशमरसं उपशमः* क्षमा शान्तिः निर्वृतिपरिणामस्तस्मिन् यो *रसः* प्रेमनिमग्नता तं *अनुशीलय* सदा पालय । *विनयं नायं नायं* नीत्वा नीत्वा प्राप्य प्राप्येति यावत्, विनयं विशिष्टशास्त्रशिक्षासमन्वितनिर्वृतिनीर्ति *धृतपरभागं धृतः* लब्धः संपन्न इति यावत्, *परभागः* परमोत्कर्षः यस्य स तथाविधस्तं, *विरागं* वैराग्यस्वभावं *हृदि कलय* मनसि लक्ष्यस्वेत्यर्थः ।।३।।**

दृश्यं च बाहुबलीदीक्षाप्रबन्धं यथा त्रिषष्ठीशलाकापुरुषचरित्रे

राज्यनिमित्तेन भरतबाहुबलभ्योः युद्धं जातं । चक्रिणा चक्रं मुक्तं । परं ज्ञातिषु तन्न चलति । बाहुबलिः सक्रोधः भरतं मुष्टया हन्तुं धावति स्म । ततः परं तेन यच्चिन्तितं तद् –

अहो ! राज्यस्य लुब्धेन, लुब्धकादपि पापिना । अमुनेव समारब्धो, धिग् धिग् भ्रातृवधो मया ।।
सर्वथा त्यजनीयेयमिति निश्चित्य चेतसि । महामना बाहुबलिरित्यूचे चक्रवर्त्तिनम् ।।
तितिक्षस्व क्षमानाथ !, राज्यमात्रकृतेऽपि यत् । द्विषन्निव मया भ्रातरेवं त्वमसि खेदितः ।।
महाभवह्रदेऽमुष्मिंस्तन्तुपाशसोदरैः । भ्रातृपुत्रकलत्राद्यै, राज्येन च कृतं मम ।।
त्रिजगत्स्वामिनो विश्वाभयदानैकसत्रिणः । एष पान्थीभविष्यामि, पथि तातस्य सम्प्रति ।।
इत्युदित्वा महासत्त्वः, सोऽग्रणीः शीघ्रकारिणाम् । तेनैव मुष्टिना मूर्ध्न, उद्दध्रे तृणवत् कचान् ।।
साधु साध्विति सानन्दं, निगदन्तो दिवौकसः । बाहुबलेरुपरिष्टात्, पुष्पवृष्टिं वितेनिरे ।।

❋ ❋ ❋

**आर्तं रौद्रं ध्यानं मार्जय, दह विकल्परचनाऽऽनायम् ।**
**यदियमरुद्धा मानसवीथी, तत्त्वविदः पन्था नायम्, श्रृ० ।।४।। [१०६]**

व्याख्या- *आर्तं रौद्रं ध्यानं मार्जय* कचवरपुञ्जवद्बहिरुत्क्षिप, वा माऽर्जय तयोरुपार्जनं मा कुरु । *विकल्परचनानायं* विकल्परचना शुभाशुभसंकल्पश्रेणिरूपं *आनायं*[1] (मत्स्यं) जालं *दह* भस्मीकुरु । तथा *यदियं* तव *मानसवीथी* मनोहट्टश्रेणिः *अरुद्धा* सदाऽसंवरितद्वाराऽस्ति, तत् *अयं* तत्त्वविदः परमार्थज्ञस्य *पन्था* मार्गो *न* भवतीति ज्ञात्वा संवृणुष्वेत्यर्थः ।।४।।

❋ ❋ ❋

संयमयोगैरवहितमानसशुद्धया चरितार्थय कायम् ।
नानामतरुचिगहने भुवने, निश्चिनु शुद्धपथं नायम्, श्रृ० ।।५।। [१०७]

व्याख्या- *अवहितमानसशुद्धया अवहिता* समाधिस्वभावं प्राप्ता सावधाना वा *मानसशुद्धि*-र्निर्दोषमनोवृत्तिस्तया, तथा *संयमयोगैः* षट्कायजीवरक्षणव्यापारैश्च *कायं* प्राप्तं स्वशरीरं *चरितार्थय* निष्फलत्वं गच्छन्तं सफलं कुरु, *नानामतरुचिगहने* अनेकमतश्रद्धाभिर्भृते *भुवने* जगति *नायं* नीतियुक्तं *शुद्धपथं* सुविमर्शाभ्याऽसाभ्यां यथार्थागमोक्तं निर्दोषं पंथानं मोक्षमार्गं *निश्चिनु* निर्धारयेत्यर्थः ।।५।।

प्रसिद्धा हि सिद्धर्षिगणीकथा यथा पुरानतप्रबन्धसङ्ग्रहे ।

श्रीमालपुरे दत्तशुभङ्करौ भ्रातरौ महर्द्धिकौ श्रीमालज्ञातीयौ । इतश्च शुभङ्करस्य सुतः सीधाकः । दत्तस्य सूनुर्माघः । स सीधाको बाल्यतोऽपि द्यूतव्यसनी पित्रा कृष्णाक्षरितः । एकदा रममाणेन हारितम् । पितुर्गृहाच्चौर्यं विधाय दत्तम् । अन्यदा रममाणेनोक्तम्—द्रम्म ५०० यावत् क्रीडयध्वम् । द्रम्मान् ददामि, शिरो वा ददामि । तैरुपवेशितो द्यूतकारैः, तेन हारितम् । द्रम्मा याचिताः । रात्रौ श्रीवीरप्रसादे धरणकं दत्त्वा सुप्तेषु द्यूतकारेषु सिद्धः प्रासादभित्तेर्झम्पां ददौ । पौषधागारमध्ये पतितः । गुरुभिर्व्याकूतः—कस्त्वम् ? तेन स्वनाम उक्तम् । ग्रहणयोग्यं किमस्ति ? तेनोक्तम्—तथ्यम्, परं मम दीक्षां यच्छत । द्यूतकाराः प्रातः शिरो ग्रहीष्यन्ति । अतो दीक्षा स्तोककालमप्यस्तु । गुरुभिर्नक्षत्राण्यवलोक्य प्रभावकं मत्वा दीक्षितः । प्रातः श्राद्धास्तं दृष्ट्वा गुरूनूचुः—प्रभोऽद्य कल्ये परिवारः किं स्तोकोऽस्ति, यदस्य घटानुकारिमाणिक्यस्य दीक्षा दत्ता ? भवतु यादृशस्तादृशो वा । इत उपवेशने स्वाध्यायपुस्तिकां दृष्ट्वा 'उपदेशमाला' मादिमध्यावसानां विलोक्य पाठं ददौ । गुरुभिश्चिन्तितमहो प्रज्ञाऽस्य । इतो द्यूतकाराः समायाताः । भो ! बहिरेहि । किं पाखण्डेन छुट्यसे । श्रावकैरुक्तम्—किं देयम् ? पञ्चशती द्रम्माणाम् । वयं दास्यामः । कस्यापि कारणे दीनोऽसौ मुच्यते । पुनरस्माकं पार्श्वे समेष्यति । श्रावकैरुक्तम्—यास्यति ततो यातु । द्यूतकारैरुक्तम् तर्हि अस्माभिर्मुक्तः । ते गताः । स सिद्धान्तमधीतवान्, प्रमाणग्रन्थांश्च । सिद्धेनोक्तम्—भगवन् ! बौद्धा महावादिनः श्रूयन्ते । तत्र गत्वा तान्निर्जित्य समेष्यामि । गुरुभिरुक्तम्—जैनानामेष धर्मो न यत् कस्यापि सम्मुखं गम्यते । य उपविष्टानां समभ्येति सोऽभ्येतु । स निर्बन्धात् व्रजन् सूरिभिरुक्तः—यदि तत्र गतः परावर्त्यसे तैस्तदा वयं मुत्कलापनीयाः । इदं किमादिष्टम् ? बौद्धानां देशे गतः । तेषां स्वरूपं दृष्टम् ।

तथा 'शुष्कां शष्कुलीं भक्षयतो भगवतो बौद्धस्य पञ्चज्ञानानि समुत्पन्नानि' इत्यादि श्रुत्वा बौद्धाचार्यं जगौ यदहं जैनः, परं त्वद्दर्शनमादरिष्यामि । तैर्हृष्टैर्नृपाय निवेदितः—यदसौ जैनः स्वदीक्षां ग्रहीष्यति । नृपेण गौरवं कृतम् । दुकूलानि पारिधापितः, अलंकृतश्चाभरणैः । प्रातर्लग्नं बौद्धदीक्षायाः । रात्रौ तेन गुरूणां

---

1 आनायास्तु मत्स्य जालं (अभि० 929)

वचःस्मृतम् । प्रातः पणबन्धं तेषां निवेद्य चलितः । श्रीमाले श्रीजिनसिंहसूरीणां पार्श्वे प्राप्तः । आचार्य ! मुत्कलाप्यसे, मया तेषां शासनं तत्त्वभूतमवगतम् । गुरुभिरुक्तम्–किञ्चिदस्मानपि ज्ञापय । तेनोक्तम् । गुरुभिः प्रत्युत्तरे दत्ते आह–भगवन् ! नैतद्वचोऽहं ज्ञापितः । अनेन वचसा तान् निर्जित्य समेष्यामि । गुरुभिः पूर्वबद्धं कृत्वा प्रेषितः । तत्र तैः परावर्तितः । पुनर्गुरुसमीपे आयातः । तैस्तु बोधितः । एवं सप्तवेला एहिरेयाहिरांचक्रे । अष्टमवेलायां बौद्धैरुक्तमिहैव तिष्ठ तत्र वा । तेनोक्तम्–चतुरो वादिनो मया सह प्रेषयत । तानादाय श्रीमाले पौषधागारे आयातः । उक्तं द्वारस्थेन ! मुत्कलाप्यसे । तैरुक्तम्–मध्ये आगच्छ । मध्ये आयातः । नतिं विनाप्युपविष्टः । गुरवो 'ललित– विस्तरा' वृत्तेः पुस्तकमुपवेशने विमुच्य स्वयं तनुगमनिकायां चलिताः । तेन सोल्लुण्ठमभिहितम् –एभिर्बौद्धाचार्यैराक्रान्तानां तनुगमनिका सुलभा एव । सूरयो गताः । स पुस्तिकां वाचयितुं प्रवृत्तः । 'सिवमयल' इत्यालापवृत्तिमनुचिन्त्य बौद्धैः सह वादं कृत्वा गुरुष्वनागच्छत्सु तान्निरुत्तरीचक्रे । गुरुष्वागतेषु, अभ्युत्थानं कृतम् । गुरवो विज्ञप्ताः–एकोऽहमगाम् आत्मपञ्चमो भूत्वा समागतम् । उक्तं तेन–

नमोऽस्तु हरिभद्राय तस्मै श्रीप्रभसूरये ।
मदर्थं निर्मिता येन वृत्तिर्ललितविस्तरा ।।

तैः सह प्रवव्राज, पश्चादुपदेशमालावृत्तिः कृता ।
पश्चात्सूरिपदमनुपाल्य समाधिना दिवं गतः ।।

❋ ❋ ❋

**ब्रह्मव्रतमङ्गीकुरु विमलं, बिभ्राणं गुणसमवायम् ।**
**उदितं गुरुवदनादुपदेशं संगृहाण शुचिमिव रायम्, शृ० ॥६॥ [१०८]**

**व्याख्या- *गुणसमवायं गुणा* ज्ञानारोग्यप्रभावादयस्तेषां यः *समवायः* संहतिस्तं *बिभ्राणं* धारयन्तं तेषां निवासस्थानमित्यर्थः । ईदृशं *विमलं* निरतिचारं *ब्रह्मव्रतं* ब्रह्मचर्यं । *अङ्गीकुरु* स्वीकुरु, *गुरुवदनादुदितं* गुरुमुखतो विनिर्गतं । शुचिं पवित्रं *उपदेशं* हितशिक्षातत्त्ववार्तादिकं / *रायमिव* रत्नादिनिधानमिव / *संगृहाण* सम्यगविस्मरणतयाधारयेत्यर्थः ॥६॥**

भरतेश्वरबाहुबलीवृत्तौ सतीमृगावतीकथा –

कौशाम्बीं शतानीकभूपपालितां ययौ चित्रकृत् । राज्ञो मिलितश्च । राज्ञा स्वां चित्रशालां चित्रयितुं तस्मै दत्ता । तस्य चित्रशालां चित्रयतो नानाव्याघ्राहंसमृगजम्बूकैणादिरूपैः एकदा मृगावत्या नृपपत्न्याश्चेटकभूपसुताया गवाक्षस्थाया जालकान्तरेण क्रमाङ्गुलिर्दृष्टिगोचरे पपात । तदा तस्य चित्रकस्य रूपं चित्रयतो यक्षदत्तवराद् यादृशं समस्ति तादृशमभूत् । ऊरौ मषीलवोऽपतत् । स चित्रकृन्मषीबिन्दुं ममार्ज । मार्जितं मषीबिन्दुं मृगावतीरूपस्योरौ पुनः पुनः पतन्तं दृष्ट्वा चित्रकृच्चिन्तयामासेति ।

निर्भाग्यस्य विपत्ताप, इवोन्मृष्टोऽपि यन्मुहुः । मषीलवोऽपतत्तस्यास्तन्मन्येऽस्तीह लाञ्छनम् ।।

ततस्तद्रूपं मृगावत्याश्चित्रितं वीक्ष्य हृष्टोऽपि भूप ऊरुबिन्दुदर्शनात् क्रुद्धोऽभूत्तस्मिन् चित्रकारे । दध्यौ च भूपः–एष पापमानवोऽस्मि । अनेन मृगावती विप्लुतैव । इहोरौ संस्थायी बिन्दुरित्यन्यथा कथं जानात्येषः ? ततो रुष्टो राजा चित्रकारं हन्तुमादिष्टवान् । तदा चित्रकारस्तत्रैत्य प्रोचुः–स्वामिन् ! अस्य

यक्षदत्तः प्रसादोऽस्ति ।तेनैवंविधं रूपं लिखितमनेन ।असौ निर्दोषोऽस्ति ।तदभिज्ञानाय कुब्जिकाया दास्या मुखे दर्शिते तस्या यथास्थितरूपं लिखितं चित्रे तेन । तथापि राजा रुष्टः सन् तस्याङ्गुलीमेकां छिन्नवान् । ततश्चित्रकारोऽमर्षरसोत्कर्षी चिन्तयामासेति–राजानं धिगस्तु । येनाहं मुधा प्रापितोऽवस्था–मीदृशीम् । तथा कुर्वे यथाऽस्या राज्ञा सह वियोगं कारयिष्यामि । इति विचिन्त्य मृगावत्या रूपं पटलिखित विधायावन्त्यां गत्वा चण्डप्रद्योताय तद्वैरिणे दर्शयामास ।स तद्रूपं चित्रलिखितं वीक्ष्य चमत्कृतो राजा मस्तकं धूनयन्नाह–कस्या रूपमिदम् ? तेनोक्तं–शतानीकभूपस्य पन्त्या मृगावत्याः । ग्राह्या शक्त्या मयाऽसाविति दध्यौ चण्डप्रद्योतः ।ततो वज्रजङ्घाख्यं दूतं मृगावत्या याचनाय शतानीकभूपपार्श्वे प्रेषयामास ।तत्र गत्वा दूतो जगौ–चण्डप्रद्योतो मृगावतीं याचते । त्वां प्रत्येवं प्राह च–

त्रपुणीव मणिर्नैवं, त्वय्याभाति मृगावती । साऽस्मभ्यं प्रेष्यतां नांघ्रौ, मौलिर्मौलौ हि युज्यते ।।१ ।।
जीवितव्यं च राज्यं च, प्रेष्य रक्ष मृगावतीम् । सर्वनाशोंऽशनाशेन, रक्षणीयो विचक्षणैः ।।२ ।।

ततो रूष्टः शतानीको जगौ मद्गिरा जल्प त्वं गत्वा स्वस्वाम्यन्तिके इति –

त्रपुणीव मणिर्नैव त्वय्याभाति मृगावती । इहास्तु तदियं नांघ्रौ, मौलिर्मौलौ हि युज्यते ।।१ ।।
राज्यं च जीवितव्यं च, रक्ष्यं प्रेक्ष्यवरं धनम् । सर्वनाशोंऽशनाशेन, रक्षणीयो विचक्षणैः ।।२ ।।

ततः स इतोऽभेत्य चण्डप्रधोतं प्रति प्राह शतानीकोक्तम् ततः चण्डश्चतुर्दशनृपान्वितोऽह्नाय प्रयाणं चक्रे ।ग्रीष्मरविरिव शोषयन् जलाशयान् प्रचण्डपवन इव धूल्या नमश्छादयन् चण्डप्रधोतः प्रतस्थे मार्गे । तमायान्तं चण्डंश्रुत्वा सन्नह्य सर्वसैन्यं स्थितः । कियतीं वेलां युद्धं कृत्वा शतानीको वैरिसेनां बहीं विलोक्याकस्मादतीसारान्मृतिं गतः ।

प्रियं मृतं मत्वा मृगावती दध्यौसूनुमे बालोऽस्ति, वैरिषु तु बलवान् भर्ता परलोकं गतः । तेन छलेन स्वशीलं रक्षणीयं मया । भर्तुः प्रेतकर्म कृत्वा दूतं शिक्षयित्वा मृगावती चण्डपार्श्वेऽप्रैषीत् । चण्डपार्श्वे गत्वाऽवग् दूतो मृगावत्योक्तमिति–मृगावती वक्ति–भर्ता मम मृतः, पुत्रस्तूदयनो लघुरस्ति तस्य राज्यं भवति तदा मया त्वद्वाञ्छा पूर्यते । अधुना तु भर्तृशोकोऽस्ति प्रथमममुं वप्रं सज्जं कारय । धनधान्यादिभिर्भर । मम पुत्रो राज्ययोग्यो भवति । ततोऽहं सुस्थिता पुत्रमत्र मुक्त्वा तव पार्श्वे समेष्यामि । यदि त्वं मयि बलात्कारं करिष्यसि तदाऽहमात्महत्यां करिष्यामि यथा तथा तु त्वया राज्यं ग्रहीतुं दुःशकमस्ति । इत्थं त्वावयोः समाधिर्भवति अत्र द्विषो बहवः समीपे सन्ति बलिष्ठाः । अधुना पश्चाद्गच्छ । ततश्चण्डप्रद्योतो हृष्टः स्वपुरमेत्य चतुर्दशमूपैः सह अवन्ती कौशाम्ब्योरन्तरे पुरुषमात्रे भूतले पुरुषान्निवेश्य हस्ताद् हस्तमिष्टिकानिचयैस्तूर्ण–मानीतैर्वप्रं कारयामास । तदा मृगावत्या ज्ञापितम्–अहं न त्वां मनसाऽपीच्छामि, कायस्तु दूरे तिष्ठतु । मया तु शीलरक्षायै प्रपञ्चोऽयं वप्रकरणरूपः कृतः । ततः क्रुद्धः प्रद्योतः सन्नह्य सर्वां सेनां सह चचाल कौशाम्बीं प्रति ।

कौशाम्बीसमीपे गत्वा चण्डेन ज्ञापितम् – त्वमात्मनश्चात्मपुत्रस्य हितं वाञ्छसि तदाऽत्रागच्छ, नौ चेत्सर्वराज्यादि गतमेव तव । इतः श्रीवीरजिनः सर्वज्ञस्तच्छीलमाहात्म्यकर्षितस्तत्रागत्य समवासार्षीत् । मृगावती प्रभुमागतं ज्ञात्वा पुरद्वारमुदघाट्य श्रीवर्द्धमानं नन्तुं समवसरणे गता । देवा अनेके तत्रागताः । प्रभोरनुभावाद्वैरं मुक्त्वा चण्डप्रद्योतोऽपि श्रीवीरं प्रणम्य धर्मं श्रोतुमुपविष्ट । प्रभुणा धर्मदेशना विदधे ।

उत्थाय नाथमानम्य, जगाद च मृगावती । प्रव्रजिष्याम्यहं चण्डप्रद्योतानुज्ञया प्रभो ! ।।

चण्डः प्राह–यद्रोचते तत् कुरु । त्वत्पुत्रः स्वं राज्यं करोतु । ततः प्रद्योतो वीरवचसा प्रमृष्टवैरो मृगावतीसुतमुदयनं कौशाम्ब्यां राज्येऽतिष्ठिपत् । प्रद्योतस्याष्टाभिः प्रियाभिः सह मृगावती व्रतं जग्राह । ततः प्रभुणा ताः सर्वा मृगावतीयुताश्चन्दनायै सामाचारीं शिक्षितुमर्पिताः । ततश्चण्डप्रद्योतो धर्ममङ्गीकृत्य स्वपुरं ययौ । ततः प्रभुः पृथ्वीं प्रतिबोध्य बहुकालेन पुनरपि कौशाम्ब्यां समवासार्षीत् । तदा तृतीयपौरुष्यां भगवद्वचः श्रोतुं चन्द्रसूर्यौ स्वस्वविमानगौ प्रभुं नन्तुं चागतौ । रविविमानतेजोभिस्तदा रात्रिः समायाताऽपि केनापि न ज्ञाता । सन्ध्यां मत्वा तदा चन्दना प्रवर्तिनी स्वोपाश्रये गत्वा प्रतिक्रमणादि सर्वां क्रिया कृत्वा सुप्ता । इतश्चन्द्रसूर्ययोः स्वस्थान गतयोर्मृगावती भीता । स्वोपाश्रयं गता । ईर्यापथिकीं प्रतिक्रम्य प्रतिक्रमणं कृत्वा स्वामिनीं प्रति प्राह मृगावती–अहं मुग्धा सती इयतीं वेलां तत्र स्थिता । चन्दनाऽवग्–महति कुले समुत्पन्नाया गृहीतदीक्षाया रात्रौ उपाश्रयाद्बहिः स्थातुं न युक्तम् । मृगावती पादयोर्लगित्वाऽवग्–अचैतन्यादिदं जज्ञे तत् क्षम्यतां भगवति ! । चन्दनायास्तदा निद्रा समागात् । मृगावती स्वयंकृतं कर्म निन्दन्ती सर्व कर्म शुभाशुभं क्षिप्त्वा केवलज्ञानं प्राप । तदानीं तत्र सर्पमागच्छंन्तं दृष्ट्वा मृगावती भगवत्या हस्तमन्यतश्चकार । तदा सहसा चन्दना जागरितासतीं प्राह–रे मम हस्तोऽन्यत्र कथं कृतः ? । तयोचे–सर्प आगच्छन्नस्ति । तेन वचसोत्थाय चन्दना जगौ–त्वं कथमीदृशी ध्वान्ते सर्प द्रक्ष्यसि ? । तयोक्तं ज्ञानेन । चन्दनया चोक्तं–किं ज्ञानं, प्रतिपाति अप्रतिपाति वा ? । र्वत्याः मृगावत्योक्तं–त्वत्प्रसादादप्रतिपाति । ततस्तदा चन्दनाया मृगावत्याः पादयोः पतित्वा क्षामणकं कुर्याः केवलज्ञानमुत्पन्नम् ।

❋ ❋ ❋

संयमवाङ्मयकुसुमरसैरति, सुरभय निजमध्यवसायम् ।
चेतनमुपलक्षय कृतलक्षण, ज्ञानचरणगुणपर्यायम्, श्रृ० ।।७।। [१०९]

व्याख्या- ***संयमवाङ्मयकुसुमरसैः, संयमः*** सप्तदशविधः सर्वाश्रवसंरोधश्च तथा ***वाङ्मयः*** संयमस्योत्पादनवर्धनपालनफलप्रापणगुणविधिमय आगमस्तयोर्विषयेऽनारताभ्यासभावनात्मकानि ***कुसुमानि*** सुरभिपुष्पाणि तेषां तेषु वा, ***रसाः*** प्रेमभरविशेषास्तैः, ***निजं*** स्वकीयं ***अध्यवसायं*** परिणतिं, ***अतिसुरभय*** सुप्रशस्त-गुणप्रसिद्धिमयं संपादय । ***कृतलक्षणज्ञानचरणगुणपर्यायं, कृतानि*** प्रसिद्धानि ***लक्षणानि*** स्वरूपभूतानि ***ज्ञानं*** सामान्यविशेषबोधस्वभावः, ***चरणं*** सर्वपरभावनिवृत्तिस्वभावः, ***गुणा*** निराकारस्थैर्यादय ***पर्याया*** उपयोगपरावर्तिरूपेणोत्पादव्ययध्रौव्यागुरुलघ्वादयः, एषां पदानां समाहारद्वन्द्वे कृते, तत्कृतलक्षणज्ञानचरणगुणपर्यायं येन तत्, ***चेतनं*** जीवस्वरूपं ***उपलक्षय*** अयमहमिति प्रत्यभिजानीहीत्यर्थः ।।७।।

❋ ❋ ❋

वदनमलङ्कुरु पावनरसनं, जिनचरितं गायं गायम् ।
सविनय शान्तसुधारसमेनं, चिरं नन्द पायं पायम्, श्रृ० ।।८।। [११०]

।। इति शान्तसुधारसगेयकाव्ये संवरभावनाविभावनो नामाष्टमः प्रकाशः ।।

व्याख्या– हे आत्मन् ! *सविनय !* विनयविधिसमन्वित त्वं *जिनचरितं जिनानां चरितं* विहारोपकारधर्मोपदेशादिप्रवर्तनं *गायं गायं* गीत्वा गीत्वा *पावनरसनं पावना* पवित्रा *रसना* जिह्वा यस्मिंस्तत् पावनरसनं *वदनं* मुखारविन्दं, *अलङ्कुरु* भूषय । *एनम*नन्तरदर्शितं *शान्तसुधारस*मुक्तस्वरूपं *पायं पायं* पीत्वा पीत्वा *चिरं* प्रभूतकालं यावत् *नन्द* सुखसमृद्धो भवेत्यर्थः ॥८॥

वाच्या च कपिल केवलीकथा यथा उपदेशप्रासादे –

विषयाद्विरक्तः समुत्पन्नजातिस्मरणः कपिलः स्वयंबुद्धो बभूव ।

कपिलमुनि निर्ममो निरहङ्कारो निरीहो वसुन्धरां विजहार । एवं व्रतं पालयतः कपिलस्य महामुनेः षण्मासी ययौ, तदा चरमज्ञानमभूत् । इतश्च राजगृहस्यापान्तराले ऽष्टादशयोजनमानाऽतिभयङ्कराऽटव्यस्ति, तस्यामटव्यां बलभद्रादयः पञ्चशतीचौरा वसन्ति स्म । प्रत्येकबुद्धर्षिस्तान् बोधार्हान् ज्ञात्वा तत्रारण्ये समेतः । ते चौरा अपि ज्ञान्यन्तिके एयुः । पल्लीशो ज्ञानिनं प्राह–निर्ग्रन्थस्य तव नृत्यं समायाति ? । लाभं मत्वा मुनिः प्राह–वादित्रवादकान् बिना नृत्यं न स्यात् । चौरैरुक्तम्– तालवादका वयं भविष्यामः, त्वं नृत्यं कुरु । अथ कपिलमुनिर्यतनया नृत्यं करोति । ते चौरा अभितो भ्रान्त्वा भ्रान्त्वा तालादिकं वादयन्ति । साधुस्तु तेषां मध्ये नृत्यं कुर्वन् प्राकृतबन्धेन ध्रुवान् गाथाश्च गायति यथा–

अधुवे असासयम्मि संसारम्मि दुक्खपूराए । किं नाम हुज्ज तं कम्मं जेणाहं दुग्गइं न गच्छेज्जा ॥

इत्यादिपञ्चशतगाथा ज्ञानी जगौ । ता ध्रुवाः श्रुत्वा ते चौराः सर्वेऽपि प्रत्यबुध्यन्त, पञ्चशत– चौराणां व्रतं ददौ । देवतादत्तलिङ्गास्ते महर्षिणो बभूवुः, ते सर्वे कपिल केवलिना सह मोक्षं जगाम ।

**॥ इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणि–सतीर्थ्यतिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां श्रीशान्त–सुधारसटीकायां संवरभावनाविभावनो नामाष्टमः प्रकाशः समजनि ॥**

**आश्रवेण कर्मोपादानं भवति संवरेण तन्निरुध्यते । तत्तु ग्रहणयोग्यकर्मणा एव भवति । यत् पूर्वोपार्जितानि कर्माणि तेषां किं क्रियते इति तत् प्रदर्शनार्थं उच्यते नवमी निर्जराभावना–**

❀ ❀ ❀

# ॥ नवमः प्रकाशः ॥

उक्तोऽष्टमः प्रकाशः । तदन्ते चेतनोपलक्षणायोपदिष्टम्। तच्च कर्मावृत्त्यपकर्षेण साध्यम् । तदपकर्षस्तु निर्जराधीन इत्यनेन संबन्धेनायातां नवमीनिर्जराभावनां विभावयन्नाह । तस्याश्चायमादिमः श्लोकः-

( इन्द्रवज्रावृत्तम् )

यन्निर्जरा द्वादशधा निरुक्ता,तद्द्वादशानां तपसां विभेदात् ।
हेतुप्रभेदादिह कार्यभेदः,स्वातन्त्र्यतस्त्वेकविधैव सा स्यात् ॥१॥ [१११]

व्याख्या- *यन्निर्जरा द्वादशधा निरुक्ता, तत्तपसां द्वादशानां विभेदात्* । यत्सर्वत्रागमेषु *निर्जरा* देशेन कर्मपरिशाटना *द्वादशधा* द्वादशप्रकारा, *निरुक्ता* व्युत्पत्तिपूर्वकं कथिता, *तत्तस्या* जनकहेतूनां *द्वादशानां* षड्बाह्यषडभ्यन्तराणां *तपसां* तपोविधानानां *विभेदात्* विशेषेण कृतो भेदो विभेदस्तस्मात्, देवदत्तस्यानशनजा यज्ञदत्तस्य ध्यानजेति विशेषणादित्यर्थः, *इह* प्राज्ञजने सर्वत्र *हेतुप्रभेदात्* कारणविशेषणादेव *कार्यभेदो* जन्ये भिन्नता दृष्टा, यथा पार्थिवो घटः, सौवर्णिको घटः । *स्वातन्त्र्यतस्तु* निर्विशेषणकर्मपरिक्षयमात्राऽपेक्षया *तु सा निर्जरैकविधैव* जीवप्रदेशेभ्यः कर्मदलिकानां पृथग्भवनमात्रैव स्याज्जायत इत्यर्थः ॥१॥

❋ ❋ ❋

उक्तार्थमेव स्पष्टयन्नाह-

( अनुष्टुब्-वृत्तद्वयम् )

काष्ठोपलादिरूपाणां निदानानां विभेदतः ।
वह्निर्यथैकरूपोऽपि पृथग्रूपो विवक्ष्यते ॥२॥[११२]

व्याख्या- *यथैकरूपोऽपि* वह्निः *यथे*ति दृष्टान्तोपन्यासाय यथा येन न्यायेन *वह्निरग्निः एकरूपोऽपि* सर्वोऽप्युष्णदाहकप्रकाशकत्वादिस्वभावत्वेनैकरूपो वर्तते । तथापि *काष्ठोपलादिरूपाणां काष्ठं* वह्निजनकमरणि गणियार्यादि (अरणिमण्यादि) तदिन्धनानि च, *उपलाः* सूर्यकान्तमण्यादिपाषाणजातयः, आदिपदात्पत्रतृणगोमयादीन्धनानि ग्राह्याणि, तद्रूपाणां *निदानानां* हुतवहोत्पादककारणानां *विभेदतो* भिन्नत्वहेतुतः *पृथग्रूपो* भिन्नरूपो यथायं पार्णोऽग्निः *विवक्ष्यत* इष्यत इत्यर्थः॥२॥

❋ ❋ ❋

निर्जरापि द्वादशधा तपोभेदैस्तथोदिता ।
कर्मनिर्जरणात्मा तु सैकरूपैव वस्तुतः ॥३॥[११३]

व्याख्या– *तथा* तेनैव न्यायेन *तपोभेदै*र्निर्जरोत्पादकैर्बाह्याभ्यन्तरैस्तपसां भेदैर्नानात्वविधानैः *निर्जरापि* कर्मपरिशाटनापि *द्वादशधा* द्वादशविधा *उदिता* जिनागमेऽभिहिता । *तु* पुनः *वस्तुतः* परमार्थदृष्ट्या *सा* प्रोक्ता निर्जरा *कर्मनिर्जरणात्मा* देशेनाघक्षपणास्वरूपा *एकरूपैव* निष्केवलं या कर्महानिः सैव सेतीत्यर्थः ।।३।।

❋ ❋ ❋

## अथ हेतुभूततपःप्रभावचमत्कृता वाचकास्तां स्तुवन्त आहुः–

( उपेन्द्रवज्रावृत्तम् )

निकाचितानामपि कर्मणां, यद्‌गरीयसां भूधरदुर्धराणाम् ।
विभेदने वज्रमिवातितीव्रं नमोऽस्तु तस्मै तपसेऽद्भुताय ।।४।। [११४]

व्याख्या– *यत्त*पःशक्तिसामर्थ्यं *गरीयसां* महाविशाल–समुन्नतशिखरभृतां ईदृशानामपि *भूधरदुर्धराणां* प्रोक्तविशेषणविशिष्टा ये *भूधराः* पर्वतास्तेभ्योऽपि *दुर्धरा* विकटा वज्रेणापि दुर्भेद्यत्वात्तेषां *निकाचितानामपि* निकाचितानि गाढतरतीव्रकषायरसवशबद्धत्वादुपक्रमोपशामणापवर्तनासंक्रमणा–योग्यत्वेन केवलविपाकवेद्यानि तर्हि शिथिलबद्धानां तु किं वाच्यं ? तेषामपि *कर्मणां* ज्ञानावरणीयादीनां *विभेदने*ऽपुनर्विनाश्यत्वेन विनाशने *वज्रमिवातितीव्रं* पर्वतविनाशने *वज्रं* सुरेशायुधं दम्भोलिः वज्रं यथा पर्वतभेदे तीक्ष्णं वर्तते तथा तपोऽपि प्रोक्तकर्मभेदने वज्रादप्य*तितीव्रं* तीक्ष्णं वर्तते *तस्मै* प्रोक्तशक्तिसंपन्नाय *अद्भुताया*चिन्त्यमहिम्ने *तपसे* तपोगुणाय *नमोऽस्तु* भूयो मे प्रणति–र्भवत्वित्यर्थः ।।४।।

श्रीदेवेन्द्रसूरिरचितदानादिकुलकोपरिकृतदेवविजयटीकायां श्रीढण्ढणकथानकं –

द्वारिकानगर्या धनदकृतायां प्रत्यक्षदेवलोकभूतायां दशदशार्हसहितः श्रीकृष्णवासुदेवो बलभद्रसहितो राज्यं करोति । स राजा षोडशसहस्रमुकुटबद्धनृपाणां, सार्धत्रयकुमारकोटीनां षष्टिसहस्राणां यदुकुमाराणां, अनेकानां गणिकासहस्राणां, अनेकानां राज्ञीसहस्राणां चाधिपत्यं कुर्वाणो विहरन्नास्ते, दिवि देवराज इव दिप्यमानः स भूमिनाथः भूमिं पाति, तस्य कृष्णस्य राज्ञो ढण्ढणेति नाम्ना देव्यस्ति, तस्याः कुक्षिसम्भवो ढण्ढणाख्यः कुमारः सकलकलापारगो यौवनस्थः पित्रा कृष्णे राज्ञां बह्वीः कन्या महामहेन परिणायितः, ताभिः साकं भोगाननुभवन् स सुखेन विचरति स्म । अथैकस्मिन् समये भगवानरिष्टनेमिः पृथिव्यां विहरन् द्वारिकायां समवसृतः, उद्यानपालकेन श्रीकृष्णः स्वाम्यागमनवर्धापनेन वर्धितः । ततः श्रीकृष्णस्तस्य वर्धापनिकां दत्त्वा सपरिकरः स्वामिवन्दनाय ढण्ढणकुमारेण सह निर्ययौ ।

ततः प्रदक्षिणापूर्वकं स्वामिनं नत्वा विनयावनम्रदेहो योजितकरकमलयुगलोऽसौ भगवत्पुरो यथायोग्यस्थाने निषसाद । ततः स्वामी सर्वभावाभाषानुगामिनीभिर्वाग्भिः पापनाशिनीं देशनां विदधे, यथा–

जीयं जलबिन्दुसमं सम्पत्तिओ तरंगलोलाओ ।
सुविणयसमं च पिम्मं जं जाणसु तं करिज्जासु ।।३।।

इत्यादि भगवद्देशनां श्रुत्वा शुभाशयो ढण्ढणो जातसंवेगः कृष्णस्याज्ञां लात्वा विष्णुकृतनिष्क्रमणोत्सवो भगवदुपान्ते प्रवव्राज । ततः श्रीनेमिनाथो देवसङ्घपरिवृतोऽन्यत्र विजहार, ढण्ढणोऽपि मुनिः स्वामिना समं विजहार। ततो ढण्ढणस्य मुनेः पूर्वकृतमान्तरायिकं कर्म प्रकटीभूतं, तेन च स ढण्ढणो मुनिर्भिक्षां न प्राप्नोति, ततस्तेन ढण्ढणेन मुनिनाभिग्रहो गृहीतः, यदाहमात्मलब्ध्यान्नं लप्स्ये, तदैव पारणकं करिष्ये, नान्यथा। एवमभिग्रहं गृहीत्वा भिक्षार्थं याति, परमशनपानादि किमपि स न लभते । एवं कियन्ति दिनानि गतानि । पुनः स्वामी श्रीनेमिनाथो मह्यां विहरन्नेकदा द्वारवत्यां समागतः, तस्यां नगर्यां च स तथैव भिक्षार्थं भ्रान्त्वा समवसरणे स्वाम्यन्तिके समायाति । एवं बहुषु दिवसेषु व्यतीतेष्वेकस्मिन् दिने भगवत्समीपवर्तिभिः साधुभिः स्वामी पृष्टो यथा हे भगवन्ननेन ढण्ढणमुनिना पूर्वं किमन्तरायकर्म निबद्धम् ? येनास्यां पुर्यां समृद्धश्रद्धावतामपि श्राद्धानां गृहे एष भिक्षामपि नाप्नोति । स्वामिनोक्तं श्रूयतामस्य कथानकम्–

मगधदेशे धान्यपूराभिधे ग्रामे परासरो नाम द्विजो जज्ञे राजनियोगी । राज्ञा तस्य तत्र ग्रामे पञ्चशतहलोपर्यधिकारो दत्तः । अथैकदा हलिनां भोजने समागतेऽपि, वृषभाणां च तृणादिभक्ष्येऽप्यागते तन्नोऽमुञ्चत्, उवाच च मम क्षेत्रे चाषमेकं दत्त्वा सर्वे भोजनादिकं कुर्वन्तु, तदा ते परवशाः किं कुर्वन्ति ? यथा तेनोक्तं तथैव तैः कृतम् । एतदन्तरायकर्म कृत्वा स परासरो विप्रस्ततो मृत्वा भूरिभवान् भ्रान्त्वा किञ्चित्पुण्यं विधाय कृष्णपत्नीढण्ढणायाः पुत्रो जातः संसारासारतां च ज्ञात्वा वैराग्यात् सदीक्षां प्रपन्नः स च कृताभिग्रहः स्वलब्धिलब्धाहाराभिलाषुकः परलब्धिपराङ्मुखश्च भिक्षार्थं द्वारिकायां पर्यटति । परं पूर्वकर्मदोषतो यथा याति तथैव स प्रत्यायाति । एवं तस्य मुनेर्भिक्षां विना भ्रमतः षण्मासी व्यतीता । तस्मिन् समये श्रीजिनवन्दनाय समागतो गदापाणिः । भगवतो देशनां श्रुत्वा देशानान्ते स एवमपृच्छत् हे स्वामिन्नमीषां तपस्विनामष्टादशसहस्राणां मध्ये को दुष्करकारकः साधुः स्वामिनोक्तं शार्ङ्गपाणे ! सर्वेऽपि मुनयो दुष्करं कुर्वन्ति, परं तेभ्योऽपि सर्वेभ्यः स्तव पुत्रो ढण्ढणाराज्ञीकुक्ष्युद्भवो ढण्ढणो नाम महामुनिः साम्प्रतमत्युत्कृष्टो य इयत्कालमलाभाख्यपरीषहमसहिष्ट।

पुनर्हरिरूवाच हे भगवन् ! स महामुनिर्ढण्ढणः कुत्रास्ति ? तमहं नमस्करोमि । श्रीनेमिनाथेनोक्तं तव द्वारिकानगर्यां प्रविशतो भिक्षायै भ्रमन् स मिलिष्यति, ततो जनार्दनस्तीर्थेशं प्रणिपत्य पुरीं प्रविशन् ढण्ढणर्षिं सन्मुखमागाच्छन्तकैक्षिष्ट, मुनिदर्शनेनोच्छ्वसितो माधवः सिन्धुरादवतीर्य तं साधुं प्रदक्षिणीकृत्यानमत् । एवं तं लक्ष्मीपतिं नमन्तं वीक्ष्यैको वणिग्गवाक्षस्थो दध्यावहो एष साधुर्महान् दृश्यते, यो विष्णुनाप्यवन्दि ततस्तं मुनिं नत्वा जनार्दनः स्वस्थानमगमत्, तेन वणिजा च स मुनिर्ढण्ढणो गृहे नीत्वा सबहुमानं सिंहकेसरमोदकैः प्रत्यलाभि, तान् मोदकांश्चित्तमोदकान् समादाय स जिनसमीपमागत्य स्वामिनं नत्वा व्यजिज्ञपत् हे प्रभो ! किं तन्मम कर्म क्षीणम् ? यदहं भैक्ष्यमासदं, प्रभुराह भो ढण्ढण! एषा तव लब्धिर्नास्ति, हरिणा प्रणतत्वात्त्वं वणिजा प्रतिलाभितः, अतो विष्णुलब्धिर्न तु तव लब्धिः । ततः स ढण्ढणस्तां भिक्षां परलाभलब्धां ज्ञात्वा परिष्ठापयितुमिष्टिकापाकस्थाने गतः, तत्र शुद्धस्थण्डिले मोदकान् भङ्क्त्वा भङ्क्त्वा रक्षायां परिक्षिपन्नात्मानं निन्दति स्म, अहो मया पूर्वजन्मनि महदशुभं कर्म कृतं, येनाद्यापि मम कर्मक्षयो नास्ति, अहो प्राणिनां कर्माणि पुराणानि दुःक्षयाणि, अथ मम पूर्वकर्माणि कथं क्षयं यास्यन्ति । एवं वारंवारं चिन्तयन् शुक्लध्यानारूढः कर्मक्षयात्स ढण्ढणो मुनिस्तदैव केवलज्ञानमाप ।

सोदाहरणं तपःप्रभावं स्तुवन्नाह–

( उपजातिवृत्तम् )

किमुच्यते सत्तपसः प्रभावः, कठोरकर्मार्जितकिल्बिषोऽपि ।
दृढप्रहारीव निहत्य पापं यतोऽपवर्गं लभतेऽचिरेण ।।५।। [११५]

व्याख्या– अहो आत्मन् ! *सत्तपसः, सतः* समीचीनस्यानिरासीभावेनातिचाररहितस्य कृतस्य *तपसो*ऽनशनध्यानादिसाधुसमाचारस्य *प्रभावः* सामर्थ्यं महिमा, *किमुच्यते* किं मया वक्तुं शक्यते ? नैव शक्नोमि । *यतो* यस्मात्तपसः प्रभावात् *कठोरकर्मार्जितकिल्बिषोऽपि कठोराणि* व्रतिबालस्त्रीगोवधादीनि *कर्माणि* महानीचाकृत्यसमाचरणानि तै*रर्जितं* समुपार्जितं *किल्बिषं* पापकर्मराशिर्येन स, तथाभूतः प्राणी, सो*ऽप्या*स्तामनीदृशः *दृढप्रहारी* स *इव* यथासौ कृततथाविधकर्मापि चतुर्विधतपआचरेण मोक्षं लेभे तथान्येऽपि जीवस्तपः *पापं* कर्मौघं *निहत्य* समूलघातं विनाश्य *अचिरेण* स्वल्पकालेन *अपवर्गं* अपनष्टरागादिवर्गं मोक्षं *लभते* प्राप्नोतीत्यर्थः ।।५।।

धर्मघोषसूरिकृतर्षिमण्डलप्रकरणे पद्ममन्दिरगणीकृतटीकायां श्रीदृढप्रहारिज्ञातं–
कस्मिन् ग्रामे द्विजन्मैकः, कुरुतेऽन्यायमन्वहम् । नाप्यस्थाद् वारितोऽनेकैर्दुर्दान्तो दुःस्वभावतः ।।१।।
सम्भूय निखिलैर्ग्राम्यैर्ग्रामात् निष्कासितो रुषा । सुगुणो वा ऽगुणो नृणां, हेतुर्मानापमानयोः ।।२।।
भ्रमन्नसावरण्यानीं, चौ ( चो ) रपल्लीमगाद् बटुः । तत्पल्लीपतिना प्रेम्णा, धर्मपुत्रतयाऽऽदृतः ।।३।।
पल्लीपतौ मृते तस्मिंस्तत्पदे दस्युभिर्द्विजः । यस्तो दैवं हि सदृशं ( क्षं ) सदृशे योजयत्यपि ।।४।।
ख्यातो दृढप्रहारीति, दृढं प्रहरतीति सः । निष्कृपो ( पं ) निस्त्रपो ( पं ) बाल–वृद्धादीन् घ्नन् न शङ्कते ।।५।।
चो ( चौ ) रधाट्या समं ग्रामं, गतो हन्तुं परेद्यवि । दृढप्रहारी तत्रैको, दरिद्री ( द्रो ) वसति द्विजः ।।६।।
शिशूनां रुदतां तेन, याचित्वा गोरसादिकम् । पायसं पक्तुमारब्धं ब्राह्मण्या दारकाग्रहात् ।।७।।
नद्या स्नातुं गतो विप्रस्तावत् पल्लिपतेर्भ्रमन् । तत्रैको दस्युरायातस्तदद्राक्षीत् च संस्कृतम् ।।८।।
पायसं चरुमुत्पाट्य, गतो दस्युर्बुभुक्षितः । रुदतामपि डिम्भानां, दैवो दुर्बलघातकः ।।९।।
रुदद्भिरूदितं बालैः, स्वपितुस्तद्द्विजन्मनः । पितरावेव पूत्कारस्थानं हि तनुजन्मनः ।।१०।।
ततः कृपाणमाकृष्य, द्विजः क्रोधारुणेक्षणः । पत्न्या निवारितोऽप्युच्चैस्तस्करं प्रत्यधावत् ।।११।।
ग्रामान्तर्यत्र तत्पल्लीनाथोऽस्ति तत्र स द्विजः । गत्वोच्चैः समरारम्भं, चकार ( कृवान् ) तस्करैः समम् ।।१२।।
एतेन परिभूयन्ते, द्विजेन मम दस्यवः । ध्यात्वेति दस्युनाथेन, द्विधाचक्रे स निर्दयम् ।।१३।।
तत्प्रिया प्राह रे पाप्मन् ! किमक्षत्रं कृतं त्वया ?। तामप्यसौ द्विधाचक्रे, क्रोधोऽन्धङ्करणं नृणाम् ।।१४।
तस्या उदरमध्यस्थं, वीक्ष्यगर्भद्विधाकृतम् । स्फुरन्तं जातकारुण्याद् ( ण्यो ), दध्यौ पल्लीपतिस्त्विदम् ।।१५।।
हाहाऽधर्मः कृतः कस्मादस्मात् मुक्तिर्ममांहसः ?। लेभे प्रवृत्तिं डिम्भेभ्यो, यद् द्विजोऽयं दरिद्र्यभूत् ।।१६।।
निर्वेदं सुतरां प्राप्तस्ततो दृष्ट्वा मुनीनिह । दृढप्रहारी पप्रच्छोपायः कोऽत्र महर्षयः ? ।।१७।।
धर्मो मुनिभिराख्यातस्ततः पल्लीपतिर्व्रतम् । प्रपद्याभिग्रहं घोरं, क्षमालक्षणमग्रहीत् ।।१८।।
ताडना तर्जनाऽऽक्रोशांस्तत्रैव विहरन् मुनिः । सेहे सम्यक् क्षमाधीनमनाः साधुशिरोमणिः ।।१९।।

अप्रा ( पा ) प्नुवन्नशनादि, यावत् गर्भं स्मरामि तम् । तावत् नाहारयामीति, तपस्तेपे स दुस्तपम् ।।२०।।
एवं निरशनः षण्मासीमसौ मुनिसत्तमः । उत्पाद्य केवलज्ञानं, शिश्रिये ( श्राय ) शिवसम्पदम् ।।२१।।

✻ ✻ ✻

पुनरप्युदाहरति–

यथा सुवर्णस्य शुचिस्वरूपं, दीप्तः कृशानुः प्रकटीकरोति ।
तथात्मनः कर्मरजो निहत्य, ज्योतिस्तपस्तद्विशदीकरोति ।।६।। [११६]

व्याख्या– *यथा* येन न्यायेन तपसः प्रभावं जानीष्व । यथा *सुवर्णस्य* काञ्चनस्य *शुचिस्वरूपं* जात्यं रूपनैर्मल्यं *दीप्तः* सप्रकाशप्रभावान् *कृशानुरग्निः प्रकटीकरोति* मलाच्छादितत्वेनाप्रकटः सन् स्पष्टं दर्शयति । *तथा* तेनैव न्यायेन *आत्मनो* जीवस्य *ज्योतिः* सर्वभावाविर्भावकं शुद्धचैतन्यं *तपः* प्रोक्तरूपं *कर्मरजः* कर्ममलधूलिं *निहत्य* विनाश्य *विशदीकरोति* कर्ममलाच्छादितमशुद्धं सत् मलं प्रज्वाल्य सर्वावभासयुक्तं शुद्धं करोतीत्यर्थः ।।६।।

✻ ✻ ✻

तपोमाहात्म्यमेवाह–

( स्रग्धरावृत्तम् )

बाह्येनाभ्यन्तरेण प्रथितबहुभिदा,
जीयते येन शत्रु–श्रेणी बाह्यान्तरङ्गा भरतनृपतिवद्भावलब्धद्रढिम्ना ।
यस्मात्प्रादुर्भवेयुः प्रकटितविभवा लब्धयः सिद्धयश्च
वन्दे स्वर्गापवर्गार्पणपटुसततं तत्तपो विश्ववन्द्यम् ।।७।। [११७]

व्याख्या– *येन* प्रोक्तवक्ष्यमाणप्रभाववता तपसा, *प्रथितबहुभिदा प्रथिता* बृहल्लघुसिंहनिःक्रीडित–रत्नावलिकनकावलिगुणरत्नसंवत्सरादिभिर्भूरिविस्तारं प्राप्ताः, *बहुभिदा बहवो*ऽतिप्रभूता भिद्यन्ते इति भिदाः यस्य तत् तेन, *बाह्येनाभ्यन्तरेण* प्रायश्चित्तविनयादिना । *बाह्यान्तरङ्गा, बाह्या* अनादेशकारकप्रतिपक्षिराजादयः, *अन्तरङ्गा* रागद्वेषकर्मरोगादयः, त एव *शत्रवो*ऽरयस्तेषां या *श्रेणी* पङ्क्तिः सा *जीयते* स्ववशवर्तिनी क्रियते । सा केन साधनेन जीयते इत्याह– *भरतनृपतिवद्भावलब्धद्रढिम्ना भरतः* श्रीऋषभस्वामिनो ज्येष्ठपुत्रः स एव *नृपतिः* सकलभारत–वासिजनानां स्वामी *तद्वत्तत्तुल्यो भावलब्धो भावेन* शुद्धमानसिकपरिणामेन *लब्धः* प्राप्तो यो *द्रढिम्ना* विषयसुखरागादिना चालयितुमशक्यत्वं, तेन *भावलब्धद्रढिम्ना । यस्मात्प्रकटितविभवा लब्धयः सिद्धयश्च प्रादुर्भवेयुः । यस्मात्तपःप्रभावात्प्रकटितविभवाः प्रकटिताः* सप्रकाशा जनैर्दृश्यमाना *विभवाः* सज्ज्ञानाविर्भावतनुम–लवातस्पर्शमहारोगोपद्रवशान्त्यादिसंपदो यासां, तादृशा *लब्धय* आमर्षौषध्यादितया निष्पन्नशक्तयः, *सिद्धयो*ऽणिमालब्धिप्रभृतयः *प्रादुर्भवेयुः* प्रकटा भवेयुः समुत्पद्यन्ते । *स्वर्गापवर्गार्पणपटु स्वर्गो* देवलोकसंपद् *अपवर्गो* मोक्षस्तयोर*र्पणे* प्रापणे जीवानामिति शेषः तस्मिन्, *पटु* चातुर्यवत्सामर्थ्ययुक्तमिति यावत् । *तत्तपो विश्ववन्द्यं* तत्पूर्वोक्तमहाप्रभावयुक्तं *तपो*ऽनशनादिरूपं *विश्ववन्द्यं* समग्रत्रिभुवनजनपूज्यं सम्यक् । सविनयसमाचरणीयं

*सततं* निरन्तरं प्रतिसमयं *वन्दे* सबहुमानं प्रणतोऽस्मीत्यर्थः ।।७।।

उपदेशप्रासादकथिता विष्णुकुमारमुनिकथा वाच्या–

पुराऽवन्त्यां धर्मभूपः ।तस्य नमुचिनामा धीसखो बभूव ।एकदा तत्र मुनिसुव्रतस्वामिशिष्याः श्रीसुव्रतसूरय आजग्मुः तेषां वन्दनार्थं श्रीधर्मभूपो नमुचिना सह समागात् । देशनायां च धीसखो वादममुं चकार–स्वप्नोपमं वै सकलं, भूते नष्टे सर्वं नष्टं, न परलोकेऽयं गतिं प्राप्नोति इत्यादि स्थापयन् सूरिशिष्येण निर्जितः । तदनु क्रोधवशो रात्रौ करवालं करे कृत्वा हन्तुमना निष्कृपः साधुसमीपमुपागतः, शासनदेवतया तथैव स्तम्भितः, चित्रलिखित इव प्रभाते भूपादिभिर्दृष्टः, देवतां गुरु च क्षमयित्वा मोचितः, पौरैर्धिक्कृतश्च लज्जितो पुरान्निर्गत्य भ्रमन् हस्तिनागपुरं गतः । तत्र पद्मोत्तरो राजा । तस्य प्रिया सम्यक्त्वशीलङ्कृता ज्वालादेव्यस्ति । तयोः सुतौ विष्णुकुमार–महापद्माह्वौ । राज्ञा विष्णुकुमारस्य राज्यपदं दत्तं, तस्यानुजस्य यौवराज्यं च । अन्यदा स नमुचिः स्वकला–कौशलं युवराजायादर्शयत्, तेन हृष्टस्तं सचिवपदं ददौ । सोऽन्यदा नमुचिर्महायोधं सिंहरथं जिगाय । ततस्तुष्टो युवराजो वरं ददौ । स च तं वरं कोशे न्यासीचकार ।

एकदा ज्वालादेव्या मुदा रथयात्राचिकीर्षया स्वर्णरत्नैरलङ्कृतो जैनरथो निर्मापितः । तदा तस्याः सपत्नीभिर्ब्रह्मरथः स्पर्धया कारितः । अथ तौ रथौ चतुष्पथे परस्परमभिमुखौ मिलितौ । तयोर्द्वयोर्वादे जाते एकस्या अपि रथं मार्गं दत्त्वा नाग्र आकर्षयन्ति आकृष्टिकरा नराः । तदा कलहनिवृत्त्यर्थं राजा द्वावपि रथा अवारयत् । तदनु महापद्मस्तथा कृतं मातुरपमानं वीक्ष्य स्वान्ते दुःखितो देशान्तरमगच्छत् । क्रमेण चक्रियोग्यां संपदमुपार्ज्य जन्मभूमावागतः । पित्रा महामहसा पुरे प्रवेशितः । ततो महापद्मस्य द्वात्रिंशत्सहस्रनृपादयो राज्याभिषेकं द्वादश वर्षाणि यावच्चक्रुः । तदनु पिता विष्णुकुमारेण सह सुव्रताचार्यसमीपे दीक्षां लात्वा त्रिदिवं प्राप । विष्णुकुमारस्य तु षष्टिशतानि वर्षाणि तीव्रं तपः कुर्वतो वैक्रियादिलब्धयो जाताः । अथ महापद्मश्चक्री मातू रथयात्रामनोरथं प्रौढोत्सवपूर्वं पूर्णीचकार । ततः स्वपापत्यागार्थं मातृवाक्येन जिनचैत्यभूषितां महीं चकार । अथ ते सुव्रतसूरयो हस्तिनागपुरे बहुसाधुयुताश्चतुर्मासाभिग्रहास्तस्थुः । तदास्मृतपूर्ववैरो नमुचिश्चक्रिपार्श्वे स्ववरं ययाचे–हे नृपेन्द्र ! कार्तिकराकां यावन्मे षट्खण्डराज्यं देहि । श्रुत्वा नृपस्तस्मै सर्वं राज्यं दत्त्वा स्वयमन्तपुरमलञ्चकार ।

अथ नमुचिः षट्खण्डराज्यमपालयत् निरङ्कुशः सर्वधर्मद्वेषी । संजातनूतनसर्वपृथ्वीपतित्वात्सर्वे नृपादय उपायनानि दत्त्वाऽऽज्ञामङ्गीचक्रुः । नमुचिना जीवंहिंसात्मको यज्ञः प्रारब्धः । द्विजादयः सर्व आशिषं दत्त्वा तत्कृत्यं प्रशशंसुः । तदा तान् सूरीनाकार्य प्राह–भवतो मुण्डान्मुक्त्वाऽन्ये सर्वेऽपि लिङ्गिनो द्विजाश्च मां सार्वभौमं यज्ञं धर्मकृत्यं च ज्ञात्वा नमन्ति स्तुवन्ति च । यूयं किं मत्तोऽधिकाः स्थ ? तस्मान्मे भूमौ साधुभिर्न स्थेयं सप्तवासराधिकं यदि मद्भूमौ स्थास्यन्ति तेषामहं हन्ता, अत्र दूषणं मम न देयम् । ततः पौरैः सामवचोभिः शिक्षितोऽपि स्वाभिनिवेशं नामुञ्चत् । ततः सूरयो दध्युः–सर्वत्रास्य राज्यं, वयं चतुर्मास्यां सप्तदिनमध्ये क्व गच्छामः ? इति विचिन्त्य साधून् पप्रच्छुः–एतेषु मध्ये गगनमार्गलब्धिमान कोऽप्यस्ति ? यो मेरुशृङ्गस्थं विष्णुतपस्विनमत्राह्वयति ? । तत एकः शिष्यो गुर्वाज्ञां प्राप्य तत्र गतः । विष्णुमुनिरपि चतुर्मासकेऽतर्कितं तस्यागमनहेतुं पप्रच्छ । तेन यथातथं प्रोक्तम् । ततो विष्णुमुनिस्तेन साधुना सह नमुचिराजसंसदि इयाय । नमुचिं विना शेषै राजादिभिर्वन्दितः, मुनिः नमुचिं प्राह–हे भूप ! धृताभिग्रहा मुनयोऽधुना क्व यास्यन्ति, तस्मान् स्थित्यर्थं कियतीं भूमिं देहि । नमुचिना त्रिपदीमिता पृथ्वी दत्ता ।

तन्निशम्य कोपाटोपवान् विष्णुर्वैक्रियलब्ध्या कृतलक्षयोजनमिताङ्ग एकं क्रमं पूर्वदिश्यन्यं चापरदिशि विन्यस्योवाच–अरे पापिन् ! तृतीयचरणस्थापनभूमिं क्व ददासि ? स भयविह्वलो मौनेन स्थितः । तदा तृतीयक्रमो नमुचेः पृष्ठे निहितः, तेन द्विधापि रसातलं गतवान् यथा त्रिविक्रमेण बलिरिपू रसातलं क्षिप्तः । तदाऽचला अपि चला जज्ञिरे, ग्रहा भयभ्रान्ता जाताः, इन्द्रादयोऽपि इदं किम् ? इति संभ्रान्तां अवधिज्ञानात्तन्निमित्तं ज्ञात्वा वासवो विष्णुमुनेः क्रोधोपशान्तये गन्धर्वान् गीतज्ञान् प्राहिणोत् । तैर्मुनिकर्णसमीपे शमामृतमयं गीतनृत्यं प्रारब्धं, तेन प्रशान्तकोपाग्निर्जज्ञे, ततो मूलरूपं चकार । सार्वभौमोऽपि लज्जान्वितो नमन् विष्णुनोपालम्भितः–त्वयि राज्ञि सति ईदृशी शासनहीलना पीडा च भवेत् तर्ह्यन्येषां क्षुद्रभूपानां राज्ये को दोषः ? इत्यादिशिक्षां चक्रपतेर्दत्त्वाऽऽचार्यान्तिकमागत्यालोचितं यथास्थितकथनेन प्रतिक्रान्तं प्रायश्चित्तग्रहणेनेति । अत्र शासनभक्त्यर्थं विहितं, तेन न कश्चिद्दोषः, तथापि किञ्चित्स्वाध्यायध्यानादिभ्यो ( षु ) भ्रष्टत्वं विभावप्रसङ्गत्वं च जातं तद्गुरुसमक्षमीर्यापथिकादिनाऽऽलोचितम् । ततः शिवगतिमवाप ।

❋ ❋ ❋

**अथ गेयपद्याष्टकेन तपोमहिमरूपां निर्जरां विभावयति–**

विभावय विनय ! तपोमहिमानं, विभावय विनय ! तपोमहिमानम् ।
बहुभवसञ्चितदुष्कृतममुना, लभते लघु लघिमानम्, वि० ॥१॥ [११८]

**व्याख्या– हे *विनय* ! हे विशिष्टनिर्वृतिकामिन् चेतन ! त्वं *तपोमहिमानं* बहिरन्तस्तपसः प्रभावं प्रति *विभावय* स्वात्मनि वासय तपःपरिणतिमयो भवेति यावत् । *अमुना* तपसा *बहुभवसञ्चितं दुष्कृतं लघुलघिमानं लभते, बहुभवसञ्चितं बहुभिरनन्तसंख्येयैर्भवैः* कैवर्तक मिथ्याभिमानि देवगुरुधर्मादि–महाशातनाकारिभिर्जन्मभिः *सञ्चितं* समुपार्जितं *दुष्कृतं* पापकर्मभरं *लघु* शीघ्रं मुहुर्तादिमात्रविधानेऽपि *लघिमानं* लघोर्भावो लघिमा स्वल्पत्वमसत्त्वं वा तं लघिमानं लभते प्राप्नोतीत्यर्थः ॥१॥**

❋ ❋ ❋

याति घनापि घनाघनपटली, खरपवनेन विरामम् ।
भजति तथा तपसा दुरिताली क्षणभङ्गुरपरिणामम् वि० ॥२॥ [११९]

**व्याख्या– *घनापि* कठिनाऽतिशयेन निबिडादपि निबिडा या सा घनापि तादृश्यपि *घनाघनपटली घनाघनो* वार्षुको मेघस्तस्य *पटली* घटामण्डली सा यथा *खरपवनेन खरः* कर्कशः उग्रगतिमानिति यावत्, यः *पवनो* वायुस्तेन, *विरामं* शीघ्रमवसानं *याति* व्रजति । *तथा* तेनैव न्यायेन *दुरिताली दुरितानि* पापानि, तेषां *आली* श्रेणिः *तपसा* तपःसमाचारेण कृत्वा, *क्षणभङ्गुरपरिणामं क्षणं* क्षणमध्ये *भङ्गुरा* विनशनशीला तादृशं *परिणामं* स्वभावं *भजति* प्राप्नोति विनश्यतीत्यर्थः ॥२॥**

उक्ता हि विवेकमञ्जर्यां माषतुषमुनिकथा –

पुरे रत्नपुरे सूरिरासीद् गुणनिधिः पुरा । संघमुख्यः श्रुतनिधिर्धर्मव्याख्याविशारदः ॥१॥
वैयावृत्त्यकरस्तस्य भवज्ञातेयबान्धवः । मुनिः प्रसन्ननामाऽऽसीद् मूर्खतैकनिकेतनम् ॥२॥
स सूरिरेकदा श्रान्तो भूरिशो धर्मकर्मभिः । आगत्य भोजनादूर्ध्वं श्राद्धैर्व्याख्यामकार्यत ॥३॥
ततो विश्रान्तमालोक्य प्रसुप्तं पार्श्व एव सः । अप्रसन्नमनाः सूरिश्चिन्तयामासिवानिति ॥४॥

धन्योऽयं पुण्यवानस्मद्भ्राता मौर्ख्यबलेन यः । निश्चिन्तः सुखमेवास्ते स्वैरशायी दिवानिशम् ॥५॥
वयं तु पाठवैगुण्यात् क्रीडाशुकवदन्वहम् । आबाधास्थास्त एवैके लापयामो नवैर्नवैः ॥६॥
दुर्ध्यानेनामुना कर्म ज्ञानावरणमर्जितम् । अनालोच्याप्रतिक्रम्य मृत्वा सूरिः सुरोऽभवत् ॥७॥
धन्योऽयं पुण्यवान् सूरिः प्रकाशयति यः श्रुतम् । इति ध्यानक्षतज्ञानावरणोऽस्य तु बान्धवः ॥८॥
मृत्वा स्वर्गमगाद् भोगान् भुक्त्वा तस्मादपि च्युतः । नगरे श्रीपुरे जज्ञे श्रीपतेर्वणिजः सुतः (यु.) ॥९।
धन्य इत्याख्यया सैष व्रतेच्छुः शैशवादपि । क्रमेण संयमं प्राप्य सूरिः श्रुतधरोऽभवत् ॥१०॥
सूरिदेवोऽपि स च्युत्वा सज्जनाख्यो वणिक्सुतः । भूत्वा भेजे प्रबुद्धः सन् धन्याचार्यान्तिके व्रतम् ।११।
तस्य पूर्वकृतं कर्म ज्ञानावरणमुद्ययौ । तत्प्रभावाच्च नागच्छत् पठतोऽप्येकमक्षरम् ॥१२॥
प्रज्ञापात्रं परे शिष्याः खेदयन्तस्तमूचिरे । कुरु गाढं स्वरं येनायाति पाठोऽतिदूरगः ॥१३॥
इत्यस्य खिद्यतः सूरिर्बोधायेदमलेखयेत् । जीव ! मारुष्य मा तुष्य यतो दोषाः स्वयंकृताः ॥१४॥
घोषयन्नित्यसौ नित्यं स्वशक्तेः सारमग्रहीत् । जीव ! माषतुषेत्यादि पदमन्यद् मुमोच च ॥१५॥
ततोऽसावतिघोषेण शश्वत्कौतुकिनो जनात् । लेभे माषतुषाभिख्यां मासाहसपतत्रिवत् ॥१६॥
ज्ञानावरणखेदेनाभ्यग्रहीदित्ययं गुरोः । आचाम्लानि तदा मोक्ष्ये पाठोऽयं मे यदैष्यति ॥१७॥
मुनेर्माषतुषस्यैवमाचाम्लानि वितन्वतः । द्वादशाब्दी व्यतीयाय सोऽस्य पाठस्त्वियाय न ॥१८॥
स्वपाठपट्टिकामग्रे मुक्त्वैकान्तस्थितोऽन्यदा । निनिन्द मूर्खताकन्दमात्मानं स महातपाः ॥१९॥
रे जीव ! भवता पूर्वभवे ज्ञानं व्यराध्यत । यथा तथा तवाभ्यर्णं क्लिश्यतोऽपि समेति न ॥२०॥
द्विसंस्था ह्येकसंस्थास्ते पदानुसृतिलब्धयः । भवन्ति कवयो धन्याः स्वाराद्धं यैः श्रुतं पुरा ॥२१॥
पुरा विराधितज्ञानं धिग् धिग्मामधमाधमम् । श्लोकार्धमपि यस्येयद्वर्षतोऽपि समेति न ॥२२॥
इत्थं विविधमात्मानं निन्दतोऽपि च गर्हतः । क्षपकश्रेणिलीनस्य केवलज्ञानमुद्ययौ ॥२३॥
उत्पन्नकेवलोऽन्येषामनुग्रहविधित्सया । मोहाहिगारुडमिव श्लोकार्धं तदथापठत् ॥२४॥
तन्निशम्यागमेनास्य यानस्येव प्रवासिनः । अवर्धयन् गुरुं क्षुल्ला हर्षफुल्लाननास्ततः ॥२५॥
जगुर्माषतुषं पूज्याः कथं पाठस्तवागतः ? ज्ञानेनाह स तेनोक्तः केनोचेऽप्रतिपातिना ॥२६॥
परितः सपरीवारा सूरयो भक्तिभूरयः । नेमुस्तं निस्तुषज्ञानमथ माषतुषं मुनिम् ॥२७॥
सुराः समेत्य सद्भक्तिकलिताश्लिष्टासनाः । तदा केवलिनंस्तस्य महिमानं वितेनिरे ॥२८॥
सैष माषतुषकेवली ततो गोभिरुज्जलतराभिरिन्दुवत् ।
लोकसंहतितमोहतिक्रमात् कौमुदं किल विकास्य निर्वृतः ॥२९॥

❋ ❋ ❋

वाञ्छितमाकर्षति दूरादपि, रिपुमपि व्रजति वयस्यम् ।
तप इदमाश्रय निर्मलभावादागम-परमरहस्यम्, वि० ॥३॥ [१२०]

**व्याख्या**– हे चेतन ! **इदं** प्रत्यक्षं शिवार्थिभिः क्रियमाणं दृश्यते, *तपः* प्रोक्तरूपं ***वाञ्छितं*** **स्वस्याभीष्टं स्वर्गमोक्षसुखादिकं** । *दूरादपि* प्रभूततमकालकर्तव्यादिव्यवधानाद्भावि अपि कार्यं *आकर्षति* सुलभसमीपानायासप्राप्यं करोति । तथा *रिपुमपि* वैरिणं जनमपि *वयस्यं* मित्रभावं *व्रजति* समुत्पादयति । तथा *आगमपरमरहस्यं आगमस्य* जिनप्रवचनस्य *परम*मुत्कृष्टरूपं *रहस्यं* सारः वर्तते । *तत इदं*

तपो *निर्मलभावात्* शुद्धनिराशिस्वभावात् *आश्रय* समाचरेत्यर्थः ।।३।।

दृश्या उपदेशप्रासादभणिता क्षेमर्षिकथा–

चित्रकूटपुरासन्नग्रामे निःस्वो बोहाख्यः श्राद्ध आसीत् । एकदा स पञ्चशतद्रम्मैः स्नेहकुतुपकं भृत्वा चित्रकूटमागच्छन् पदस्खलनात्पतितः कुतुपकमप्यपातयत्, विलक्षो निजग्राममागतः । लौकैरनुकम्पया पञ्चशतद्रम्मा अर्पिताः, तैः पुनः कुतुपकं लात्वा व्रजन् तथैव स्खलितः । ततो भवविरक्तः श्रीयशोभद्रगुरोर्वैराग्यवाणीं श्रुत्वा दीक्षां ललौ । गुरुणा द्विविधशिक्षया शिक्षितो गीतार्थो जातः, गुरूनिति व्यजिज्ञपत्–"प्रभो ! मया वैराग्येण चेद्दीक्षा गृहीता तदा त्रिशुद्धैव पालयामि, यद्यादिशत तदाऽहं यत्रोपसर्गा बहवः स्युस्तत्र गत्वा कायोत्सर्गे तिष्ठामि" । गुरुणा लाभं वीक्ष्य मालवदेशं प्रति प्रहितः । सर्वगच्छं ससङ्घं क्षामयित्वा मालवदेशे थामणोद्रोपान्ते सरः पालौ कायोत्सर्गे तस्थौ । इतश्च ग्रामसत्का द्विजसूनवः क्रीडायै निःसृताः साधुं दृष्ट्वाऽस्मद्ग्रामेऽरिष्टमायातमिति ध्यात्वा यष्टिमुष्ट्यादिभिरुपाद्रवन् । साधुः सर्वं सहते । सरःस्थः सुरो ध्यानस्थं साधुं निश्चलं ज्ञात्वा द्विजपुत्रान् शिखिबन्धैर्बबन्ध । ते सर्वेऽपि रुधिरं वमन्तो भूमौ पतिताः । तन्मातापितरो दुःखं धृतवन्तः साधुसमीपे समागत्येति प्रोक्तवन्तः –"हे भगवन् ! त्वं तु कृपाढ्यः साधुः, मुञ्चामून् शिशून् बन्धनात्" । तेष्वेवं लपत्स्वपि साधुर्ध्यानं न मुमोच । ततोऽधिष्ठात्रा सुरेण बालकदेहेऽवतीर्य तन्मातापितर इत्युक्ताः–"एष मुनिः किमपि न करोति, मयैतत्कृतं, यद्येतस्य चरणजलैराच्छोटयत तदा शिशवो बन्धनान्मुच्यन्ते, नान्यथा" । मातापितृभिस्तथा कृतं, स्वसूनवो नीरुजो जाताः । ततो मातापितरो निजनिजसौधाद्वित्तमानीय साधोरुपदीकृत्येति प्रोचुः"इदं गृहाण" । साधुनोचे–"न मे कार्यं वित्तेन इदं जीर्णोद्धारेषु स्थापयत" । ततः सर्वैरपि जनैस्तस्य मुनेर्निरीहतया क्षेमर्षिरिति नाम घोषितम् । तत्रातीव भक्तिभृतो जनान् वीक्ष्य गिरिकम्बलाख्यपर्वतं गतो विचित्रं तपः करोति ।

पुनः स मुनिरित्यभिग्रहं ललौ–

खेभ उम्मूलिया गयवर धाइं, मुनिवरदेखी प्रसन्नो थाइं ।
मोदकपंक सुंडिहिं देइ, तओ खिमरिषी पारणं करेइ ।।

अष्टादशदिनसहितान् पञ्च मासानुपोषितस्तिष्ठति । तावत् पट्टहस्ती मत्तो गृहादीन् पातयन् कान्दविकापणात् पञ्च मोदकान् लात्वा मुनिमपारयत् । हस्ती मुनेः प्रभावाच्छान्तात्मा हस्तिपकैरालाने बद्धः । ततो मुनिरभिग्रहमग्रहीत्–श्वश्रूपराभूता चेद्वृद्धवधू रुदन्ती कृतत्रयोपवासा काष्ठार्थागत– दरिद्रपुंसा सर्पिषा साकं गुडमिश्रान्मण्डकान् दत्तान् ददाति तदा पारयामि, नान्यथा ।

रामी गारी बंभणरम्मी, सासूसिओ कलि करे पयंडी ।
बिहु गाम विचे गुलासि पोलि देइ, तो खिमरिषी पारणं करेइ ।।

मुनिः पारणाय गिरेरुदतरत् तदा कुतश्चिद्ग्रामाच्छ्वश्रूपराभूता द्विजपत्नी तादृगवस्था पितृगृहं व्रजन्ती मार्गमजानती अरण्ये पतिता । निः स्वपुंसो घृतगुडसहिता मण्डकास्तया लब्धाः । ततोऽष्टगुणं पुण्यमिति साधुं दृष्ट्वा विचिन्त्य प्रत्यलाभयत् । अहो दानमिति स्तुत्वा देवतया सा पितृगृहे नीता ।

ततः पुनश्चेत् कृष्णस्कन्धो बलीवर्दो घ्राणपुच्छरहितः शृङ्गेण गुडं दत्ते तदा पारणं कुर्वे नान्यथेति ।

कालो कंबल धवलो संड, नाकिं तुटे पुच्छिहिं बंड ।
सिंग करी गुड भेलो देइ, तो खिमरिषी पारणं करेइ ।।

अन्यदा साधुः पारणायै धारायां गतः । उक्तलक्षणवृषेण कस्यचिद्वणिज आपणशालतः शृङ्गेण गुडं लात्वा मुनेः पारणं कारितम् । तद्वीक्ष्य वणिग् दध्यौ–"अहो ! पशुरयं न सामान्यो यदीदृशो यतेः पारयति, मया मूढेन स्वजन्म हारितम्" ततः स श्राद्धो भूत्वोद्गारितगुडेन श्रीपार्श्वजिनचैत्यं कारयित्वा यशोभद्रगुरुपार्श्वे संयममाराध्य स्वर्ययौ । ततः परं तद्गुडपिण्डाह्वं तीर्थं जातम् । पुनरन्यदा वसन्तेऽभिग्रहं ललौ मुनिः–चेत्प्लवगःशृङ्खलास्थो नगरान्तश्चूतरसं दत्ते तदा पारयामि, नान्यथेति ।

ल्हासहच्छेहकि भद्दविमासी, कोटिसंकल बद्धओ पासि ।
जइ अंबरस मंड देइ, तो खिमरिषी पारणं करेइ ।।

इतश्च कस्यचिद्व्यवहारिण उष्णतौ घृतकुम्भके स्थापिताम्ररसं कपिर्लात्वा व्रजन्मार्गे यान्तं साधुं प्रत्य–लाभयत् ।"अहो ! आश्चर्यम्" इति जना मिथो जल्पन्तो जैना जाताः ।इतश्चावधिज्ञानतः कृष्णर्षिर्देवलोकाद्यतिसमीपं समागत्य नत्वेत्युवाच–"प्रभो ! शासनप्रभावनायै सिन्धुलभूपहस्तिनां रोगशान्त्यै त्वया स्वचरणशौचजलं देयम्" इत्युक्त्वाऽदृश्यो जातः । राज्ञश्चतुर्दशशतकरिणो रोगग्रस्ता जाताः । वैद्यैः कृतोपचारैरप्यसाध्या इति मुक्ताः । राजा बाढं शोकमापन्नः । प्रधानवचनेनेत्युद्घोषणामदापयत्–यः कश्चिद्राजकरिणां रोगशान्तिं कुरुते सोऽर्धराज्यभाक् स्यात् ।तावता गगन इति वाग्जाता–"गिरिकम्बलगिरौ क्षेमर्षेः पादशौचजलेन करिणो नीरोगाः स्युः" । इति श्रुत्वा राजनरा यतिसमीपे गत्वा पादजलं यावद्याचन्ते तावन्मुनिनोचे–"हंहो नराः ! पट्टहस्तिनं मुक्त्वाऽन्ये गजा एतज्जलं पायितव्याः । जैनान्मुक्त्वाऽन्ये पट्टहस्तिनं नीरोगं कुर्वन्तु" इति बुद्ध्या तेन जलेन हस्तिनो नीरुजो जाताः । अन्यदर्शनसत्कैः पट्टहस्ती जलं पायितो विपन्नः । राजा यतिसमीपं गत्वाऽर्धराज्याय विज्ञपयति स्म ।मुनिना राज्यं नरकान्तमिति सर्वथैव त्यक्तम् ।यतीनां संयमादपरं न राज्यम् ।राजा मुनिं नत्वा स्वस्थानं प्राप्य यतिपादुकां सिंहासने संस्थाप्य प्रासादमकारयत् ।

अन्यदा मुनिना मार्गे शवं सन्मुखमायान्तं वीक्ष्य कस्यचित् पृष्टम्–"किमेतत् ?" इति ।तेनोक्तम्– "धनव्यवहारिणः पुत्रोऽहिना दष्टः, षण्मासैर्मृतोऽसौ" । तच्छ्रुत्वा मुनिनोचे–"अहो ! असौ जीवन् कथं ज्वाल्यते ?" इति केनापि धनायोचे । धनस्तत्रैत्य यतिं नत्वोवाच–"यते ! मम पुत्रजीवितदानेन प्रसादय" ।यतिना प्रासुकजलेन सिक्तः परमेष्ठिमन्त्रं स्मृत्वा नीरुक्कृतः ।ततो यतिः पुनरभिग्रहं ललौ–यदि वनप्रसूता व्याघ्री विंशतिं वटकान् ददाति तदा पारयामि, नान्यथेति ।

नवप्रसूतव्याघ्री विकराल, नयरमांहिं बीहावे बाल ।
बडां वीस जो पणमी देइ, तो खिमरिषी पारणं करेइ ।।

एवं बहुभिर्दिनैरुषैः तपःप्रभावान्नगरान्तःप्रविष्टां नवप्रसूतां करालां व्याघ्रीं वीक्ष्य वटकधनिका वटकान्मुक्त्वा नष्टाः ।व्याघ्र्या यतिस्तैर्वटकैः प्रतिलाभितः ।ततो गुरुवन्दनोत्सुको यशोभद्रसूरि पत्तने गत्वा मया गुरुमवन्दित्वा नैवान्नोदके ग्राह्ये इत्यभिग्रही पत्तनं प्राप्तः ।गुरवो नताः ।पुनरभिग्रहं ललौ– नृपस्य पट्टहस्ती मत्तो वृद्धस्त्रीवशगो यदि खीचडखारिक्खडहडीखलखजूर एतैः पञ्चखकारैः पारयति तदा पारयामि । मासे गते शासनदेवतया जरतीरूपं कृत्वा गजो वशीकृतो यतिश्च पारितः । एवं चतुरशीतिपारणकानि पूर्णानि । ततोऽनशनं लात्वा स्वर्ययौ ।

❋ ❋ ❋

**तपसो भेदानाह–**

**अनशनमूनोदरतां वृत्तिह्रासं रसपरिहारम् ।**
**भज सांलिन्यं कायक्लेशं तप इति बाह्यमुदारम्, वि० ।।४।। [१२१]**

**व्याख्या– *अनशनं* न विद्यतेऽशनं भोजनं यस्मिन् तपसि तत्तथा चतुर्थादारभ्य षण्मास्यवसानं तत् १। *ऊनोदरतां ऊन*मपरिपूर्ण*मुदरं* भोजनमात्रया यत्र तस्य भावस्तत्ता तां २। *वृत्तिह्रासं वृत्ति*राजीविका स्वेच्छा भोगोपभोगोपयोगिवस्तुविषया तस्या *ह्रासः* परिमाणेन संक्षेपो यत्र तत्तथा ३। *रसपरिहारं रसा* घृतादिषड्वि–कृतयः तेषां *परिहारः* प्रतिदिनमेकद्वयादिरीत्या सर्वथा वा त्यजनं यत्र तत् ४। *सांलिन्यं* संलीनं हस्ताद्यङ्गावयवानां प्रयोजनाभावे संवरणं तद्भावः कर्म वा सांलीन्यम् ५। *कायक्लेशं कायो* देहस्तस्य *क्लेश* आभ्युपगमकैः खेदोत्पादकवीरासनाद्यासनकेशलुञ्चनातापनादिभिर्यत्र विधीयते तत् ६। *इत्यनन्तरोक्तभेदैर्भिन्नं उदारं* आशंसादिसर्वदोषवर्जितं *बाह्यं* मिथ्यादृष्टिभिरपि क्रियमाणत्वेन, क्रियमाणं चर्मचक्षुर्भिर्दृश्यमानत्वेन बाह्यमौदारिकंशरीरशोषकत्वेन च बहिर्भवं, *तपः* प्रोक्तरूपं त्वं *भज* सेवस्वेत्यर्थः ।।४।।**

अनशने क्षुल्लककथा–

तगरापुर्यां दत्तो, भद्रा पत्नी, अर्हन्नकसुतयुतो गुरुपार्श्वे व्रतं ललौ ।साध्वी साध्वीपार्श्वेऽस्थात् ।दत्तः पुत्रयुग्गुरुपार्श्वे तस्थौ ।दत्तः स्नेहवशात् पुत्रं विहर्तुं न प्रेषयति स्वयमेवानीय मिष्टाऽऽहारादि दत्ते पुत्राय दत्तर्षिः ।क्रमाद्दत्ते दिवंगते अर्हन्नकः शुचं पितुर्मृतेर्धत्ते पञ्चदिनानि साधुभिर्गौरवितः ।अन्यदैकेन मुनिना भिक्षायै सार्द्धं स नीतः तदा बाढं निदाघे सुकुमाराङ्गत्वात्स क्षुल्लो दह्यमानः उत्पपातोर्ध्वमधश्च तृषालग्नो कस्यचिद् गृहगवाक्षछायायामगात्स तदा तं देवकुमाराभं दृष्ट्वा काचित्प्रोषितप्रिया स्त्री गवाक्षस्था कामवशगा चेटीपार्श्वात्स्वगृहान्तर्नीत्वाऽवग्–किं तव (तुभ्यं) रोचते ।इत्युक्त्वा पञ्चषामोदका दत्ताः ।तथा भाषितश्चेति तया, किं त्वया वयसीदृशे व्रतं गृहीतं मया सह भोगान् भुङ्क्ष्व पश्चाद्वार्द्धकत्वे यद्रोचते तत्कर्तव्यम् ।एवं तया लोभितस्तत्रास्थात् क्षुल्लको भोगान् भोक्तुम् ।

इतः साधुभिर्विलोकितोऽपि न दृष्टः ।तस्य माता साध्वी पुत्रगमनत्वाद् दुःखिताऽभूत् ।

अन्यदा गवाक्षस्थोऽर्हन्नको मातरं पुत्रवियोगदुःखितां दृष्ट्वा दध्यौ–अहं पापी, मया माता दुःखे पातिता भोगसुखलीनत्वात् ।ततस्तत्राभ्येत्य मातुः पदो पतित्वाऽर्हन्नकः क्षमयामास ।माता स्वस्थाऽभूत्, पुत्रचरित्रं जज्ञौ ।अम्बया संसारासारतां प्रदर्श्य बोधितोऽपि न व्रतं ललौ दुष्करत्वात् ।ततो मातृवचसा पादपोगमनानशनं गृहीत्वासुकुमारत्वात् अन्तर्मुहुर्तमात्रे नवनीतवत् विलीनः स्वर्गं गतोऽर्हन्नकः क्रमान्मुक्तिं गतः ।

नवपदप्रकरणोक्ता स्कन्दकाचार्यशिष्यकथा कायक्लेशे –

श्रावस्त्यां नगर्यां जितशत्रुपुत्रः स्कन्दकाभिधानः कुमारो बभूव, तद्भगिनी पुरन्दरयशाः, सा च कुम्भकारकटनगरस्वामिना दण्डकिना राज्ञा परिणीता, कदाचिच्च जितशत्रुसमीपं समुपागतः पालकनामा पुरोहितो नास्तिकवादी, नास्तिकमार्गप्ररूपणां कुर्वाणः स्कन्दककुमारेण सार्वज्ञमतावदातबुद्धिना

निष्पृष्टप्रश्नव्याकरणः कृतः प्रद्विष्टो बभूव, निष्काशितो जितशत्रुणा, भवितव्यतावशेन गतो दण्डकिपार्श्वं, स्कन्दकस्त्वन्यदा मुनिसुव्रतस्वाम्यन्तिके सञ्जातवैराग्यो राजपुत्रपञ्चशतपरिवारः प्रतिपेदे दीक्षां, क्रमेण गृहीतद्विविधशिक्षो गीतार्थो निवेशितः सूरिपदे, तान्येव पञ्चशतानि राजपुत्राणां संपन्ना शिष्यसम्पत्, विज्ञप्तोऽन्येद्युः स्वामी स्कन्दकाचार्यैः यथा भगवन् ! व्रजामि युष्मदनुज्ञया पुरन्दरयशः प्रभृतिप्रतिबोधनाय कुम्भकारकटनगरं, भगवताऽपि मुनिसुव्रतस्वामिना निरदेशि प्राणान्तिकस्तत्रोपसर्गः, तेनोक्तं किमाराधनाफलो विराधनाफलो वा ?, तीर्थकरेणोदितं त्वां मुक्त्वा शेषाणामाराधनाफलः, ततश्चालितोऽसौ तत्र स्वामिनमभिनम्य पालकेनापि कथञ्चित्तदागमनमवबुध्यानागतमेव साधुयोग्योद्यानभूमौ निखातानि नानाविधायुधानि, प्राप्ताश्च क्रमेण विकालवेलायां तत्र सूरयः, पुरन्दरयशाश्च तदागमनमवबुध्यानन्दभरनिर्भरा तां शर्वरीमनेकमनोरथ–शतैरतिवाह्य प्रभात–समये समं राज्ञा गता वन्दनार्थं, विधिवदभिवन्द्य च दत्तवती कम्बलरत्नमाचार्याणां, सूरिभिरपि तद्विपाट्य कृतानि निषद्यापादप्रोञ्छनानि, राज्ञा पुरन्दरयशाः पौरलोकश्च सूरिसमीप एव धर्मदेशना–श्रवणेनातिवाह्य कियतीमपि कालवेलां गताः स्वस्थानम् ।

तत्र च रहो व्यवस्थितस्य राज्ञो विज्ञप्तं पालकेन देव ! श्रमणकाभास एष स्कन्दको व्रतपराभग्नः सममममीभिः साधुवेषविश्वसनीयै राजपुत्रैः पुरन्दरयशोदेवीसङ्केतितो भवद्ग्रहणार्थमायातः, यदि न प्रत्येषि तदाऽवलोकयैतदावासभूमौ निखातशस्त्रसमूहं, ततो भूपालेन तद्वचनमसंभाव्यमवधारयता प्रत्ययितनरव्यापारणेन सत्यापिते शस्त्रसमूहे कोपवशात् पालक एवादिष्टः यथैतेषां भ्रष्टाचाराणामुचितनिग्रहेण त्वमेव निग्रहं कुरु, ततो भूमिपतेरेतद्वचनं लब्ध्वा स पापात्मा रात्रावेवानाय्य मनुष्यपीलनयन्त्राणि पीलितुमारेभे व्रतिनः, आचार्यस्तु सोऽयं भगवत्तीर्थकरादिष्टः प्राणान्तिक उपसर्ग उपस्थितो भवतामिति सम्यग्भावेन सह्यताम्–

अक्कोसहणणमारणधम्मब्भंसाण बालसुलभाणं ।
लाभं मण्णइ धीरो जहुत्तराणं अलाभंमि ।।३१७।।

इति सिद्धान्तार्थमनुस्मरद्भिर्भवद्भिरिति प्रतिपाद्य स्वसाधून् कारयामास आलोचनाव्रतोच्चा–रक्षामणादिविधिं, किं बहुना ?, संपादयामास तेषां भावसमाधिं, ततस्तेन पील्यमानानाममीषां प्रवर्द्धमान–विशुद्धाध्यवसायसमुपारूढक्षपकश्रेणिक्षपितघातिकर्मणामुत्पादि केवलं, तत्क्षणमेव समुल्लसितजीव–वीर्यातिरेकसमासादितशैलेश्यवस्थानां च समजनि निर्वाणगमनम् ।

सकलसाधुपर्यन्ते च लघुक्षुल्लकपीलनोद्यतं पालकं बभाण सूरिः यथैते भवता मत्साधवः पञ्चशतसङ्ख्याः पीलिताः, केवलं संहननादिबलोपेतैरेतैः सम्यक् सोढस्त्वदुपसर्गः, अयं च बालः पील्यमानः किमपि करिष्यतीति न जानामि, तदेष तिष्ठतु तावन्मामेव प्रथमं पीलय येन न पश्याम्यहमेतद् दुःखं, ततोऽसाववगणय्य सूरिवचनं यथा महद् दुःखमस्य भवति तथा मया कर्त्तव्यमिति बुद्ध्या क्षुल्लकमेव पीलयामास, ततः कोपमुपागताः सूरयः पश्य दुष्टात्मनाऽनेन मदीयमेकमपि वचनं न कृतं तदस्ति यदि मदनुचीर्णतपसः किञ्चित्फलं तदाऽहमागामिभवे भवेयं न केवलमेतद्वधाय, किन्तु राज्ञोऽपि सपौरपरिजनस्य, यतो राजाप्ययमेवंप्राय एव य एवंविधानां पापकर्मणामवकाशं ददाति, लोकोऽपीदृश एव य एवं कुसङ्गतिपरायणस्य नरपतेर्नगरे प्रतिवसति, एवं च कृतनिदानस्तेन पीलितो मृत्वाऽग्निकुमारेषूत्पन्न, क्षुल्लकस्तु शेषसाधुवदाराधकः संवृत्तः, प्रभाते च तदीयरजोहरणं शकुनिकया रूधिरदिग्धं करभ्रान्त्या समुत्क्षिप्य नीयमानं भवितव्यतावशेन निपतितं

पुरन्दरयशोदेवीभवने तदग्रतो, दृष्टं तया, हा न कुशलं मदीयभ्रातुरिति विचिन्तयन्ती यावद्दीक्षाञ्चक्रे तावदसावप्यग्निकुमारो भवप्रत्ययविभङ्गविज्ञातपूर्ववृत्तान्तो विकृत्य संवर्त्तकमहावातमष्टादशयोजनमध्यवर्त्तितृणकाष्ठकचवरद्विपदचतुष्पदादि नगरमध्ये प्रक्षिप्य प्रदाय प्रतोलीर्ज्वालयामास ज्वलनं, पुरन्दरयशा अपि मम भगवान् मुनिसुव्रतस्वामी शरणमिति जल्पन्ती समुच्चिक्षिपे देवतया, नीता तीर्थकरसमीपं, गृहीत्वा प्रव्रज्यां क्रमेण प्राप्त सुरलोकं, इतरोऽपि ददाह तदशेषं नगरं, जातं च तत्र महादण्डकारण्यमिति ।

उक्तं हि उपदेशप्रासादे संलीनतोपरि कूर्मकथा–

वाणारस्यां गङ्गायां मृदङ्गतीरे ह्रदे गुप्तेन्द्रियागुप्तेन्द्रियौ कूर्मौ वसतः । तौ स्थलचरकीटकाद्यामिषार्थिनौ बहिर्निर्गतौ दुष्टशृगालाभ्यां दृष्टौ, भीतौ चतुष्पादीं ग्रीवां च करोटिमध्ये संगोप्य निश्चेष्टौ निर्जीवाविव स्थितौ । जम्बूकाभ्यामसकृल्लोठनोत्पाटनाधः पातनपादघातादिभिरपि किञ्चिद्विप्रकर्तुमशक्ताभ्यां किञ्चिद्दूरे गत्वा रहोस्थीयत । अगुप्तेन्द्रिश्चापल्यादेकं पादं यावद्ग्रीवां कर्षस्ताभ्यां खण्डशः कृतः । द्वितीयस्त्वचपलः सुचिरं तथैव स्थितः तावद्यावन्निवृत्तौ गतौ । ततः स दिगवलोकं कृत्वोत्पत्य सद्यो प्राप्तःसुखी जातः ।

❋ ❋ ❋

## प्रायश्चित्तं वैयावृत्त्यं स्वाध्यायं विनयं च ।
## कायोत्सर्गं शुभध्यानं आभ्यन्तरमिदमं च वि० ।।५।। [१२२]

**व्याख्या- *प्रायश्चित्तं* दोषातिचारमलशोधकमालोचनादि दशविधम् १। *वैयावृत्त्यं* आचार्यादि-दशविधपुंसां योग्यं शुद्धाहारवस्त्रपात्रादिसंपादनरूपदशविधम् २। *स्वाध्यायं* वाचनादानग्रहणादि पञ्चभेदं ३। *विनय* ज्ञानदर्शनादिसप्तविधम् ४। *चः* पादपूरणे । *कार्योत्सर्गोऽ*शुद्धाहारवस्त्रपात्रशरीरचेष्टादेर्व्युत्सर्जनं ५। शुभमात्मशुद्धिकरं *ध्यानं* धर्मशुक्लरूपम् ६। इदं चोक्तरूपं *आभ्यन्तरं* चर्मदृगदृश्यं निर्जराफलदं कार्मणशरीरदाहकं जैनशासने सम्यग्दृष्टिभिरेव क्रियमाणत्वादन्तरङ्गं तपो भजस्वेत्यर्थः ।।५।।**

भरतेश्वरबाहुबलीवृत्तौ प्रायश्चितविषये अतिमुक्तकमुनिवृत्तं–

पेढालपुरे महानगरे श्रीविजयराजा राज्यं चकार । तस्य राज्ञी श्रीमती सच्छीलशालिनी । द्वावपि जिनधर्मकुशलौ । दानशीलतपोभावनापूजाप्रभावनाऽमारिघोषणासप्तक्षेत्रीस्वधनवपनादि पुण्यं कुरुतः स्मः ।

क्रमात्तयोर्धर्म्मं कुर्वाणयोः सुतोऽभूत् । तस्य पुत्रस्य जन्मोत्सवं कृत्वा राजा अतिमुक्तक इति नाम ददौ । स च कुमारः षट् वार्षिको बालत्वे रममाणो गोचरचर्यामागतं श्रीगौतमस्वामिनं दृष्ट्वा हृष्टः सन् प्रणम्य प्राह–भगवन्नहं भवादृशो भविष्यामि । गौतमेनोक्तं त्वं बालोऽस्ति, दीक्षा दुष्कराऽस्ति , अत्र दुःशक्यं चारित्रमिति

तेनोक्तं शिशुरप्यहं भवादृशो भविष्यामि । श्रीगौतमे विशुद्धान्नादि विहृत्य गते बालको मातापित्रोः पुरोऽभ्येत्यावग् मम व्रतं ददतम् । श्रीगौतमस्वामिसदृशो भविष्यामि । मातापितृभ्यां प्रोक्तं एवं कथमुच्यते, त्वमेवैकः पुत्र आवयोरसि । राज्यं कस्याधारे भविष्यति ? त्वमस्माकं वृद्धत्वे चाधारो भविष्यसि । दीक्षाग्रहणावसरोऽधुना आवयोर्विद्यते । पुत्रः प्राह–मातः किं ज्ञायते को वृद्धः को लघुरनित्यत्वात् ज्ञानाभावाच्च । कः कस्य पुत्रोऽस्ति , संसारेभ्रमतां जीवानां बहवः सम्बन्धा जाताः सन्ति ।

एवं मातापितरावनुज्ञाप्यातिमुक्तकः कुमारो महामहोत्सवपूर्वकं श्रीगौतमस्वामिहस्ते प्रव्रज्यां जग्राह । श्रीगौतमस्वाम्यादिष्टां क्रियां कुर्वन् हृष्टचितः शुद्धं संयममतिमुक्तकर्षिः प्रपालयन् एकदा क्षुधातुरः प्रत्यूषकाले एव कस्यापि श्रेष्ठिनो गृहे भिक्षार्थं गतो , धर्मलाभमतिमुक्तकः क्षुल्लको यावज्जगौ तावच्छ्रेष्ठिपुत्रवध्वा हसन्त्योक्तम् क्षुल्लकमुने ! किं साकल एव उत्सूरः ? तस्या अपूर्ववाण्या तावच्चमत्कृतः क्षुल्लकः प्राह–यज्जानामि तन्नजानामि । ततः तयोक्तं–क्षुल्लक ! किमुक्तं भवता ? क्षुल्लको निजोक्तस्यार्थं जगौ सकाले बालानां क उत्सूरः को व्रतहेतुः । यज्जानामि मरणं यत् क्वापि वयसि भविष्यतीति तन्न जानामि । उत्सूरः सकालस्तदा ज्ञायते । यदा ज्ञानं भवति तदत्र मे नास्ति । इति साभिप्रायमुत्तरं ददौ मुनिः । ततस्तया चिन्तितं, अहो क्षुल्लकेन सत्यमुक्तम् । ततस्तया श्राविकया शुद्ध धर्मं सम्यक्त्वमूलं द्वादशव्रतञ्च गृहीतम् । क्षुल्लकश्च शुद्धान्नपानं विहृत्य धर्मशालायां गतः । अथ क्षुल्लकः कदाचित् वर्षाकाले कलिपततडागिकायां सवयोभिः शिशुभिः समं नौवत् निजजलपात्रं तारयन् श्रीगौतमस्वामिनं प्रेक्ष्य लज्जितः । ततः सापत्रतः क्षुल्लकः श्रीवीरसमवसरणे जगद्गुरोः पुरो विराधनायाः प्रायश्चित्तरूपां ईर्यापथिकीं प्रतिक्रमन् 'दगमट्टी दगमट्ट' इति शब्दमुच्चरन् पृथ्वीकायकानप्यकायकान् जीवान् क्षामयन् सर्वकर्मक्षयात् केवलज्ञानं प्राप ।

वैयावृत्यविषये नन्दिषेणाख्यानं यथा भरतेश्वरबाहुबलीवृत्याम् –

मगधदेशभूषणे नन्दिग्रामे सोमिलो द्विजो वसति स्म । तस्य सोमिला पत्न्यभूत् । तयोर्नन्दनो नन्दिषेणोऽभूत् । बाल्ये तस्य पितरौ मृतौ । आकेशनखपर्यन्तं तं कुरूपं नन्दिषेणं दौर्भाग्यकर्मोदयं मत्वा स्वजनैरपि तत्यजे स मातुलगृहे स्थितः चारिपानीयानयनादिकर्म करोति स्म । अन्यदा दुःखितं भागिनेयं विनयपरं मत्वा मातुलो जगौ । मा खेदं कुरु, मम सप्त कन्यकाः सन्ति । ताभ्य एकां तुभ्यं दास्ये । ततोविशेषतस्तस्य गृहकर्माणि सोत्साहं कुरुते स्म । मत्वा पितृचेष्टितं नन्दिषेणपरिणयनस्वरूपगर्भितं प्रथमा कन्या ताताग्रे जगौ यद्यहं नन्दिषेणाय त्वया दास्यते तदा मया मर्तव्यमेव । तत्श्रुत्वा नन्दिषेणं व्याकुलं चिन्तापरं मत्वा मातुलोऽवग्–द्वितीयां कन्यां तुभ्यं दास्याम्यहं मा विषादं कुरु । द्वितीयाऽपि तथैव श्रुत्वा प्रथमपुत्रीवज्जगौ एवमन्याभिः प्रतिषिद्धो नन्दिषेणो विषादमापन्नः । तं विषण्णं मत्वा मातुलोऽवग्–कस्याप्यन्यस्य पुत्रीं तुभ्यं दापयिष्यामि । ततोऽन्या या या कन्या तस्यार्थं मातुलेनानीता सा सा दौर्भाग्यकर्मोदयात्तं नेहते दृष्ट्या मनसापि । ततो नन्दिषेणो विषण्णो दध्यौ । अत्र किं स्थीयते मया यदीदृशं कर्म समायातं मरणमेव क्रियते मया । एवं ध्यात्वा नन्दिषेणो विषण्णो वैराग्यवासितः रत्नपुरं पुरं गतः । तत्रापि दम्पती भोगपरौ वीक्ष्य स्वं निनिन्द । अहमीदृगभाग्यवानभूवम् । ततो वने गतो नन्दिषेणो भृगुपातचिकीर्षुः कायोत्सर्गस्थमुनिना वारितः । तं प्रणम्य स्वकर्मस्वरूपं जगौ यतः–

"रोगिणां सुहृदो वैद्याः प्रभूणां चाटुकारिणः ।"

मुनिर्ज्ञानात्तद्भावमुद्भाव्याभाषत–मुग्ध ! वैरुप्यवैराग्यात् मा कुरुष्व मृतिं, मरणेन कोऽपि पश्चात्कृतकर्मणो न छुटति । यतः–

"कृतकर्मक्षयो नास्ति, कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् ।।

तस्माद्धर्मेण श्रीवीतरागोदितेन कृतेन तत् प्राक्कृतं कर्म छिनत्ति जनः । तस्माद्यावज्जीवं शुद्धधर्म कुरु । येन भवान्तरे सुखी भवसि त्वं, इत्यादिधर्मोपदेशात् प्रबुद्धो नन्दिषेणो गुरुपार्श्वे जग्राह व्रतम् । नन्दिषेणो विनयपूर्वकं पठन् धर्म्मशास्त्रं गीतार्थोऽभूत् । ततोऽभिग्रहं च ललाविति । साधूनां लघुवृद्धग्लानानां

वैयावृत्त्यं कृत्वैव मया भोक्तव्यम् । अनिर्वेदेन तं साधुं साधुवैयावृत्त्यं कुर्वाणमवधिना विज्ञाय शक्र एकदा संसदि जगौ यादृशो नन्दिषेणो वैयावृत्त्यविषये निश्चलोऽस्ति तादृशोऽन्यः कोऽपि नास्ति । देवैरपि न चाल्यते स्वाभिग्रहात् । ततोऽश्रद्दधानः कश्चित् सुर इन्द्रवचो निशम्य रत्नपुरोपान्तेऽभ्येत्यैकेन रूपेण ग्लानसाधु–रभवत् । तं साधुमतिसारिणं मुक्त्वा द्वितीयः साधुरूपभृत् नन्दिषेणपार्श्वे यावच्छालामागात्तावन्नंदिषेणो विहृत्य शालामागत्येर्यापथिकीं प्रतिक्रम्य भक्तपानप्रत्याख्यानं पारयित्वा भोक्तुमुपविशन्नभूत् । साधुः प्राघूर्णकोऽवग् भो साधो ! त्वयाऽभिग्रहो गृहीतोऽस्ति । कथं साधुवैयावृत्त्यमकृत्वा भोक्तुमुपविश्यते । साधुं नन्दिषेणोऽवग्क्वास्ति साधुर्ग्लानः । प्राघूर्णकोऽवक्पुराद् बहिरस्ति । तेन पानीयं शुद्धं बहु गृहाण । तस्य साधोस्तृषा लग्नाऽस्ति । ततो नन्दिषेणः पानीयं प्रासुकं विहर्तुममत्रं लात्वा गतः श्राद्धगृहे । यत्र यत्र स साधुर्याति, तत्र तत्र देवोऽशुद्धं जलं करोति । अविषण्णो बहुषु गृहेषु भ्रमन् मुनिरकस्मात् लब्धिप्रभावेण सुरशक्तिं विजित्य जलं शुद्धं प्राप्य ततस्तेन प्राघूर्णकसाधुना समं बहिरुद्याने नन्दिषेणः साधुसमीपे ययौ । तं साधुं तादृशमतीसारिणं दृष्ट्वा अनेन वैयावृत्त्येनाहं कृतकृत्यो भविष्यामि इति मत्वा मुनिं प्रक्षालयितुं प्रवृत्तः । यथा यथा नन्दिषेणस्तं प्रक्षालयति तथा तथा स साधुर्दुर्गन्धमतीसारं मुञ्चति । नन्दिषेणो दध्यौ अहो अयमेष साधुर्भाग्यवानपि ईदृग्रोगभागभूत् । ततः कर्मभ्यः कोऽपि राजा रङ्को वा यतिः शक्रो वा न छुटति । ततस्तं साधुं स्कन्धे कृत्वा पौषधशालायां नेतुं नन्दिषेणश्चचाल । पदे पदे हदन् दुर्गन्धं कर्कशं च जल्पन् नन्दिषेणशरीरं लिम्पति विष्ट्या दुर्गन्धया । तथापि नन्दिषेणो न मनाग् दुर्गच्छां चकार । ततो यदा त्वरितं चलति नन्दिषेणस्तदा–साधुर्जल्पति । एवंविधेन चलनेन मम प्राणा गमिष्यन्ति । तवातीव वर्योऽभिग्रहो येन त्वया एवंविधं कर्म क्रियते । ततो यावन्मन्दं मन्दं गच्छन्नभून्नन्दिषेणस्तावज्जगाद । वर्त्मनि कदाऽपि मम मरणं भविष्यति ततो दुर्गतिपातो भावी । आराधना अपि मम न भविष्यति । ततो नन्दिषेणस्तं साधुं तथाभूतं शालायामानीय दध्यौ । अय साधुर्मया कथं नीरोगः करिष्यते इति स्वं निनिन्द । ततस्तं वैयावृत्त्ये मेरुनिश्चलं मत्वा देवता प्रत्यक्षीभूय सर्वं विष्टादिकमपसंहृत्य पुष्पवृष्टिं तन्मस्तकोपरि कृत्वा प्राह त्वं धन्योऽसि । यादृशो वासवेन वर्णितस्त – तोऽधिकोऽसि । ततस्तं मुनिं नत्वा क्षमयित्वा सुरः स्वर्गे गतः ।

स्वाध्यायविषये मन्नहजिणाणं – ग्रन्थे तु उक्तं–

कान्तीपूर्या वरुणदेवो नृपः, श्रेष्ठी मिथ्यादृष्टि सेनाख्यः, कुवलयमाला भार्या, हरि–हर–ब्रह्माणस्त्रयः पुत्राः । अन्यदा चतुर्ज्ञानी मुनिर्मासक्षपणपारणे तद्गृहमागता भिक्षार्थम्, दृष्ट्वा श्रेष्ठी हृष्टः । बहुदिन–सक्तुदिनद्वितीयातीतदधिविषमिश्रमोदकादि दीयमानं निषिध्य श्रेष्ठी प्रतिबोधितः । क्रमेण श्राद्धधर्म पालयति, मुनेः कुटुम्बजीवनोपकारिणो निरन्तरं गुणस्मरणपरः । एकदा सुतकलत्रकलहपरं दृष्ट्वा सुताः पृथक्कृता यथोचितद्रव्यादि दत्त्वा, लघुभ्राता ज्येष्ठेन सह कलहं कुरुते 'त्वया सर्वमपलपितमिति' कथयन् राजकुलादौ च यथातथा वक्ति च, सेनश्रेष्ठिना पापभीरुणा स्वगृहविभागं दत्त्वोपशमितः ।

''आक्षरधारेकभुजामागर्भैकनिवासिनाम् । नमोऽर्थेभ्यो ये पृथक्त्वं भ्रातृणामपि कुर्वते ।।
जललवचलंमि विहवे, विज्जुलयाचटुजीविए को णु । घरणकज्जे विउसो, कुणइ विवायं सबन्धूहिं ।।''

इत्याद्युपदिश्याऽन्योन्यं सामन्त्यं कृतं पुत्राणाम् । एतज्ज्ञात्वा सेनस्य पत्नयोक्तम्–'त्वया द्रव्यं पुत्रेभ्यो दत्त्वा भिक्षा मार्गणीया । ' सेनः प्राह–

''धर्माद्धनं धनत एव समस्तकामाः, कामेभ्य एव सुखमिन्द्रियजं समग्रम् ।
सौख्यार्थिना हि खलु कारणमेषणीयं, धर्मो विधेयमिति तत्त्वविदो वदन्ति ।।''

एवं भार्यां स्वस्थीकृत्य मित्रगृहे गतः, कथितश्च कुटुम्बवृतान्तः, मित्रेणोक्तम्–'अत्र मद्गृहे तिष्ठ, यथोचितं करिष्ये, परं दोषबहुलमिदम्, यः कोऽपि वसति स म्रियते, यदि तव धर्मप्रभावाद्व्यन्तरः प्रसन्नो भवति ।' इति मित्रोक्तं श्रुत्वा शकुनग्रन्थिं बद्ध्वा गतो गृहमध्ये नैषेधिकीं कृत्वा,'अणुजाणउ मे अवग्रहं' ईर्यां प्रतिक्रम्य स्थापनाचार्याग्रे स्वाध्यायं करोति मधुरध्वनिना ।

गयमेअज्जमहामुणि खंदगसीसाण साहुचरिआइं । सुमरंतो कह कुप्पसि इत्तिय मित्ते वि रे जीव ।।
पिच्छसु पाणविणासे वि, नेव कुप्पंति ते महासत्ता । तुज्ज पुण हीणसत्तस्स, वयणमित्ते वि एस खमा ।।
जं मारेसि रसन्ते, जीवे रे जीव ! निरवराहे वि । उवभुज्जसि तं दुःक्खं, एत्तो अइदारुणे नरए ।।

इत्यादि द्वादशभावनाभिर्द्विप्रहरं यावद्गुणितं, गृहाधिष्ठाता व्यन्तरोऽपि स्वजीवोपदेशरूपत–दागमश्रवणतो हृष्टः । प्रसन्नात्मा प्रकटीभूय प्राह–'हे महापुरुष ! धर्मबन्धुस्त्वं मम, अद्य त्वयाऽहं नरकपातादुद्धरितः ।' सेनः प्राह–'कस्त्वम् ? कथं नरकादुद्धरितश्चेति निजचरित्रं कथय । ' व्यन्तरः (प्राह–) अस्य गृहस्याहं स्वामी पूर्वभवेऽभवम् । मम पुत्रद्वयमासीत् । लघुर्वल्लभो न ज्येष्ठः । अन्यदा किंचिद्दत्वा ज्येष्ठः पृथक् कृतः । तेन क्रोधेन विषादिप्रयोगतो मारितः । शुभभावतोऽहं व्यन्तरो जातः । लघुबन्धुरपि ज्येष्ठभ्रात्रा राजकुले समर्पितः, गुप्तौ क्षिप्तो मृतः । विभङ्गज्ञानेन ज्येष्ठविलसितं ज्ञातम्, सकुटुम्बोऽपि मारितः । अन्योऽपि योऽत्र वसति तं मारयामि निश्चितम्, साम्प्रतं त्वं धर्मगुरुः सञ्जातः, दत्तमिदं गृहं तव इदं मन्निधानं गृहाण । आनीयो मुक्तं विकितं दश–दश–लक्षद्रव्यस्य । सेनो ब्रूते, 'हे बान्धव ! मम परिग्रहपरिमाणव्रते एकलक्षं मुक्ताफलमस्ति । शेषा नव मम कार्ये नायान्तीति नादास्ये । व्यन्तरः, (प्राह–) पुण्यव्ययं कुर्याः सेनः (प्राह–) परद्रव्यव्यव्येन यत्पुण्यं तन्नाहं वाञ्छामि । व्यन्तरः (प्राह–) 'मत्सत्कमेव व्ययीकुरु पुण्यांशस्तव मम च भावी, अद्य वैरं त्यक्तं जीवदया प्रतिपन्नेति न तवाऽनृणी भवामि कदापि धर्मगुरुत्वात् । यतः–

''सम्मत्तदायगाणं, दुप्पडियारं भवेसु बहुएसु ।
सव्वगुणमेलियाहि वि, उवयारसहस्सकोडीहिं ।।''

प्रभाते भार्यापि विलोकयन्ती तत्रागता, सेनं तथार्द्धिमहर्घ्याभरणविभूषितं दृष्ट्वा पृष्टवती' 'प्रियतम ! कुत इयं ऋद्धिः ?' सेनः – 'धर्मादेव ।' एतज्ज्ञाज्वा मित्रपुत्रादयो मिलिताः । सर्वेषां धर्मे स्थैर्यजनि ।

कायोत्सर्गविषये चन्द्रावतन्सकनृपज्ञातं यथा उपदेशप्रासादे वाच्यं–

विशालापुर्यां चन्द्रावतंसकनृपो राज्यं परमधर्मनैष्ठिकः करोति । सोऽन्यदा चतुर्दशीदिने स्वसौधमध्ये कायोत्सर्गेण तस्थौ, मनस्येवमभिग्रहं जग्राह–यावदयं प्रदीपः प्रज्वलिष्यति, तावत्कायोत्सर्गं न पारयिष्यामि । स्वामिभक्त्या दास्या पुनः पुनरपि तैलेन सिक्तो दीपो न विध्यातः । राजा रात्रौ चतुरोऽपि यामान् धर्मध्यानं दध्यौ कीदृशम् ? यतः–

सुखार्थसाधनमहाव्रतधारणैश्च, बन्धप्रमोक्षगमनागमहेतुचिन्ता ।
पञ्चेन्द्रियव्यपगमश्च दया च भूते, ध्यानं तु धर्म्यमिति तत्प्रवदन्ति तज्ज्ञाः ।।

इति शुभध्यानपरः जावनियमं पज्जुवासामि इति पाठे यश्चिन्तितं, तत्पर्यन्तं कायोत्सर्ग न पारयामास रवावुद्गते दीपे विध्याते च स पारितः । ततो रुधिरेण भृतचरणो गिरिशृङ्गमिव त्रुटित्वा भूमौ पपात ।

शुभध्यानेन सुगतिं प्राप ।

ध्याने दुर्बलिकापुष्पमित्रमुनिकथा ऋषिमण्डलप्रकरणे उक्ता–

इतश्चास्मिन् गणेऽभूवन्, पुष्पमित्रर्षयस्त्रयः । एको दुर्बलिकापुष्पो, घृतवस्त्राह्वयौ परौ ।।१०४।।
यस्तु दुर्बलिकापुष्पस्तस्य विस्मरति श्रुतम् । अगुण्यमानं गु(ग)णयन्, दुर्बलस्तेन सोऽधिकम् ।।१०५।
दुर्बलिकापुष्पमित्रो, नव पूर्वाण्यधीतवान् । स्मरत्यहर्निशं तानि, विस्मरन्त्यन्यथा पुनः ।।११५।।
स तेन दुर्बलोऽत्यर्थं, बन्धवोऽस्य वसन्ति च । पुरे दशपुरे रक्तपटपादोपजीविनः ।।११६।।
एत्याऽऽर्यरक्षितं ते तु(नु), प्राहुर्नो भिक्षवोऽधिकम् । ध्यानैकताना युष्माकं, ध्यानमस्ति न शासने ।।
आचार्याः प्रोचुरस्माकं, साधवो ध्यानसाधवः । एष दुर्बलिकापुष्पमित्रो ध्यानेन दुर्बलः ।।११८।।
तेऽप्यूचुः प्रागसौ स्निग्धाऽऽहारभोज्यभवद् गृहे । न साऽऽप्नोति तमधुना, तेनासावतिदुर्बलः ।।११९
प्राह प्रभुरसावाज्यं, विना भुङ्क्ते न कर्हिचित् । ते स्माहुर्वः कुतस्तस्य, प्राप्तिराख्यदथो गुरुः ।।१२०।।
आनयेद् घृतपुष्पस्तत् ततस्तत्प्रत्ययाय ते । दुर्बलिकापुष्पमित्रं, निन्युर्गुर्वाज्ञया गृहम् ।।१२१।।
तं भोजयन्त्यति (न्ति ते) स्निग्धं, तत्र सस्मार सं श्रुतम् । क्षार(रे)क्षेप व्यर्थं, तत् सोऽभूत् तेन दुर्बलः ।।
भृशं स्निग्धप्रदानेऽपि, कृशतां वीक्ष्यतस्य ते । निर्विण्णा जगृहुः श्राद्धधर्मं श्रुत्वाऽन्तिके गुरो ।। १२३ ।।

आवश्यकनियुक्तौ निम्बकदृष्टान्तं विनये–

उज्जयिन्यामम्बर्षिर्ब्राह्मणः, मालुका तस्य भार्या, श्राद्धौ, निम्बक पुत्रः, मालुका कालगता, स पुत्रेण समं प्रव्रजितः,स दुर्विनीतः कायिकीभूमौ कण्टकान् निखनति स्वाध्यायं प्रस्थापयत्सु ( साधुषु ) क्षौति, कालमुपहन्ति, अस्वाध्यायं करोति, सर्वां च समाचारीं वितथां करोति, तदा प्रव्रजिता आचार्यं भणन्ति–अथ चैष तिष्ठतु अथवा वयमिति, निष्काशितः, पिताऽपि तस्य पृष्ठे याति, अन्यस्याचार्यस्य मूलं गतः, तत्रापि निष्काशितः, एवं किल उज्जयिन्यां पञ्च प्रतिश्रयशतानि सर्वाणि हिण्डितौ, निष्काशितश्च स वृद्धः संज्ञाभूमौ रोदिति, स भणति–किं वृद्ध ! रोदिषीति ?, तव नाम कृतं निम्बक इति एतन्नान्यथेति, एतैरनाचारैस्त्वदीयैश्चाहमपि स्थानं न लभे, न च वर्त्तते उत्प्रव्रजितुं, तस्याप्यधृतिर्जाता, भणति वृद्ध !, एकशः कुत्रापि स्थानमन्वेषय, भणति–मार्गयामि यदि विनीतो भवस्येकशः परं, प्रव्रजितानां मूलं गतौ, प्रव्रजिताः क्षुब्धाः, स भणति–न करिष्यतीति, तथापि नेच्छन्ति आचार्या भणन्ति–मैवं भवतार्याः प्राघूर्णकौ तावदद्ये कल्ये यास्यत इति, स्थितौ, तदा क्षुल्लकः तिस्रः २ उच्चारप्रश्रवणयोर्द्वादश भूमीः प्रतिलिख्य सर्वाः समाचारीः ( करोति ), विभाषितव्याः सा अवितथाः, साधवस्तुष्टा, स निम्बकोऽमृतक्षुल्लको जातः, तरतमयोगेन पञ्चापि प्रतिश्रयशतानि सन्मानितानि आराद्धानि, निर्गन्तुं न ददाति, एवं स पश्चात् विनयोपगो जातः ।

***

**उक्ततपसः फलं दर्शयति–**

शमयति तापं गमयति पापं रमयति मानसहंसम् ।
हरति विमोहं दूरारोहं तप इति विगतशंसम्, वि०।।६।।[१२३]

**व्याख्या– हे आत्मन् ! त्वं *इत्येवं* वक्ष्यमाणरूपं *विगताशंसं विशेषेण गता* नष्टा *आशंसा* इहलोकपरलोकसुखादेरभिलाषो यस्मात्तत्तथाविधं *तपः* कुरु । तेन च तत्तपस्तवान्यस्य च *तापं* सर्वसंक्लेशं**

*शमयति* शान्तिभावं नयति । *पापं* पूर्वकृताघराशिं *गमयति* विनाशयति । *मानसहंसं* मनोमरालं *रमयति* शुद्धात्मस्वरूपपङ्कजवने सानन्दविलासप्रापणेन क्रीडयति खेलापयति । *दूरारोहं विमोहं हरति दूरेण* प्रबलतरप्रयत्नलब्धेन सामर्थ्ये*नारुह्य* उल्लङ्घ्यते यः स दूरारोहस्तं, *विमोहं विशेषेण* सम्यक्त्वादिघाते समर्थो *मोहो*ऽनन्तानुबन्धिकषायमिथ्यात्वमोहनीयरूपो विमोहस्तं, *हरति* हुताशनकाष्ठनिकरवद्भस्मीभावं करोतीत्यर्थः ॥६॥

✻ ✻ ✻

संयमकमलाकार्मणमुज्ज्वलशिवसुखसत्यङ्कारम् ।
चिन्तितचिन्तामणिमाराधय, तप इह वारंवारम्, वि० ॥७॥ [१२४]

व्याख्या- हे चेतन ! *इह* जिनशासने प्राप्तप्रवेशे सति *संयमकमलाकार्मणं संयम* इन्द्रिय-नोइन्द्रियरोधविधिः स एव *कमला* संपद्विस्तरस्तस्याः *कार्मणं* वशीकारकारणं मन्त्रौषधिरूपं, *उज्ज्वलशिवसुखसत्यङ्कारं उज्ज्वलं* आकाङ्क्षौत्सुक्यादिदोषवर्जितत्वेन निर्मलमीदृशं यत् *शिवसुखं* मोक्षगतानन्दः तस्य *सत्यङ्कारं* व्यापारप्रतिज्ञायै हस्तार्पणं, *चिन्तितचिन्तामणिं चिन्तित*मात्रस्येष्टवस्तुनः प्रापणे *चिन्तामणिं* चिन्तामणिरत्नं वर्तते । *तत्तपो वारंवारं* भूयो भूय *आराधय* सम्यक् पालयेत्यर्थः ॥७॥

✻ ✻ ✻

कर्मगदौषधमिदमिदमस्य, च जिनपतिमतमनुपानम् ।
विनय समाचर सौख्यनिधानं, शान्तसुधारसपानम्, वि०॥८॥ [१२५]

॥ इति श्रीशान्तसुधारसगेयकाव्ये निर्जराभावनाविभावनो नाम नवमः प्रकाशः ॥

व्याख्या- हे *विनय* ! *इदं* प्रत्यक्षं तपः प्रोक्तस्वरूपं *कर्माणि* पूर्वोक्तानि तान्येव *गदाः* कुष्ठादिमहाक्षेत्ररोगास्तेषां विनाशनाय *औषधं* रसायनादिशमनीयं वर्तते । *अस्य चानुपानं* औषधोपरि पश्चात् पेयं पथ्यभोजनं *जिनपतिमतं* श्रीमदर्हत्प्रणीतागमज्ञानकरणं शीघ्रारोग्यवर्धकं वर्तते । तथा *इदं* तपःसमाचरणमेव *सौख्यनिधानं* सुखस्य भावः *सौख्यं* तस्य *निधानं* भाण्डागाररूपं *शान्तसुधारसपानं* पूर्वोक्तस्वरूपं चेदमेव वर्तते । अत इदमेव समाचर सम्यग्विधिपूर्वकं कुर्वित्यर्थः ॥८॥

वाच्यं हि उपदेशप्रासादोक्तजिनदासदृष्टान्तं–

चम्पायां जिनदासः श्राद्धो गुरुमुखाद्धर्मदेशनां श्रुत्वा दर्शनमूलानि व्रतानि जग्राह ।

अन्यदा पर्वदिने श्रेष्ठी शून्यगृहेऽष्टम्यां निशि पौषधं गृहीत्वा कायोत्सर्गे स्थितः । इतश्च श्रेष्ठिभार्या कुलटैककर्मा एकेन नरेण सार्धं तच्छून्यगृहे संकेतं चकार । रात्रावेकपर्यङ्कं चतुर्लोहकीलकं जारं च गृहीत्वा शून्यागारे तमजानन्त्यागत्य खट्वा तत्र गृहे क्षिप्ता । दैवाच्छ्रेष्ठिपदोपरि पल्लयङ्कपादः समायातः । तत्स्थिरीकरणार्थं पादेषु कीलिकाः भूमिं यावन्मुद्गरघातेन निहिताः । एकेन कीलकेन श्रेष्ठिपादो विद्धः । महाव्यथायां तन्मिथुनमेलापकभाराक्रान्तः स चिन्तयति–

**सहकलेवरखेदमचिन्तयन् स्ववशता हि पुनस्तव दुर्लभा ।**

घनतरं च सहिष्यसि जीव ! हे परवशो न च तत्र गुणोऽस्ति ते ।।
मृत्योर्बिभेषि किं बाल ! स च भीतं न मुञ्चति ।
अजातं नैव गृह्णाति कुरु यत्नमजन्मनि ।।
दोषजालमपहाय मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपहाय वारिधेर्गृह्णते सलिलमेव वारिदाः ।।
इति स्वदोषान् जग्राह, परं तस्यै न चुकोप । ततः शुभध्यानेन मृत्वा सौधर्मस्वर्गं प्राप ।

**।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजय-गणिसतीर्थ्यतिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां श्रीशान्त-सुधारसटीकायां निर्जराभावनाविभावनो नाम नवमः प्रकाशः समजनि ।।**

❀ ❀ ❀

## ॥ दशमः प्रकाशः ॥

**उक्तो नवमः प्रकाशः । तत्र च कर्मरोगौषधस्यानुपानं जिनागमज्ञानमुपदिष्टम् । जिनागमे च धर्मस्वाख्याततास्तीत्यनेन संबन्धेनायातां दशमे धर्मस्वाख्याततभावनां विभावयन्नाह–**

( उपजातिवृत्तम् )

दानं च शीलं च तपश्च भावो, धर्मश्चतुर्धा जिनबान्धवेन ।
निरूपितो यो जगतां हिताय स मानसे मे रमतामजस्रम् ॥१॥ [१२६]

**व्याख्या– *जिनबान्धवेन* जयति रागादीनिति *जिन*स्तीर्थकरः स एव सर्वहितवत्सलत्वेन *बान्धवः* सुखसंपादकः, जातावेकवचनं, तेन, *दानं च* दातव्यबुद्ध्या धनादेर्मूर्च्छापरिहारः, *शीलं च* शुद्धब्रह्मचर्यपालनेन स्त्रीविषयपञ्चकाभिलाषत्यजनं, *तपश्च* चतुर्थषष्ठादिविधानतो देहममत्ववर्जनं *भावश्च* सत्परिणामपूर्वक-सर्वव्रताचारपरिपालनेनाभिनवबन्धनिवृत्तिपुराणकर्मक्षपणतः स्वस्वरूपप्रापणं चकाराः स्वगतानेक-भेदज्ञापकाः, *चतुर्धा* चतुःप्रकारो *धर्मः* स्वभावसाधको हेतुरूपो *निरुपितो* मुमुक्षूणां हिताय प्रदर्शितः । स कः ? *यो* धर्मो *जगतां* त्रिभुवनोदरवर्तिप्राणिनां *हिताय* कल्याणाय सर्वकालं प्रवर्तते । *स* प्रोक्तरूपो *मे मानसे* मम हृदये *अजस्रं* निरन्तरमहर्निशं *रमतां* सविलासं निवासं विधत्तामित्यर्थः ॥१॥**

सुपात्रदाने दानादिकुलकोक्ता सङ्गमकथा –

काचिदुच्छिन्नवंशका धन्येति नाम्ना योषित्सङ्गमकनाम्ना बालेन समं राजगृहासन्नशालिग्रामे समाययौ, स धन्यासुतः सङ्गमको बालको ग्रामलोकानां वत्सरूपाण्यचारयत्, यतो रोरबालानामियं मृदुजीविका, अथान्यदा सोऽर्भकः कस्मिंश्चिदुत्सवे सञ्जाते गृहे गृहे पायसं भुज्यमानमपश्यत्, सोऽपि बालो गृहे गत्वा जननीपार्श्वे पायसं ययाचे, जननी जगाद भो पुत्रक ! अहं दरिद्रास्मि, अतो मद्गृहे पायसं कुतो भवति ? तेन बालेन पुनः पुनर्याच्यमाना सा निजं भर्तारं पूर्वसम्पदं च स्मरन्ती तारं तारं रुरोद, तां रुदन्तीं वीक्ष्य प्रातिवेश्मिकीनार्यो दयार्द्रहृदयाः समागत्य दुःखकारणं पप्रच्छुः, सा सङ्गमजननी ताभ्यो गद्गदाक्षरं दुःखकारणमभ्यधत्त, यथा बालोऽयं पायसं याचते, किं करोम्यहमभाग्या ? तत् श्रुत्वानुकम्पातस्ता नार्यो दुग्धादि सर्वं तस्यै ददुः, सङ्गमजननी क्षैरेयीं निष्पाद्य स्थालं भृत्वा सङ्गमकस्यार्पयित्वा केनचित्कार्येण गृहान्तर्गता । अथ सङ्गमकः प्रकृष्टं परमान्नं परिवेशितं कदाचिदपरिभुक्तं हस्तप्राप्तं दृष्ट्वात्युत्कृष्टपुण्यप्रेरितश्चिन्तयति, मम पुण्यप्रेरितो यदि कश्चित्साधुः समभ्येति, तदाहं तस्य तद्दत्त्वा शेषान्नं भुञ्जे तदा वरम्, एवं स यावता चिन्तयति तावता कश्चित्साधुर्मासमुपोषितः पारणकर्थं सङ्गमकस्य गृहे मूर्तिमान् धर्म इव समागात्, स चिन्तयति ममाद्यः ? भाग्यफलितं यन्मम गृहे एष साधुः समागतः, यतः–

साधु साधु महासाधुर्मद्भाग्यैरयमाययौ, कुतोऽन्यथा वराकस्य ममेदृक्पात्रसङ्गमः ॥१॥
भाग्योदयेन केनापि ममाद्य समपद्यत । चित्तं चित्तं च पात्रं च त्रिवेणीसङ्गमो ह्ययम् ॥२॥

इति शुद्धभावनां भावयन् सङ्गमकः पायससम्भृतं स्थालं समुत्पाट्य समुत्तस्थौ, साधुरप्यनुग्रहबुद्ध्या

पात्रं दधौ, सोऽपि निस्तीर्णोऽस्मीति बुद्ध्या साधवे सर्वं ददौ, करुणापरो मुनिस्तदन्नं गृहीत्वा वने ययौ, पारणकं कृत्वा च स्वस्थमनास्तस्थौ, समागता धन्या, मेने भुक्तमनेन, तत्पुनः पायसं ददौ, सोऽप्यतृप्तः पायसमाकण्ठं यावद् बुभुजे, परं तदन्नं तस्य यामिन्यां न जीर्णं, ततो विशूचिका जाता, स सङ्गमः साधुदानं स्मरन् व्यद्यत, तेन साधुदानप्रभावेण राजगृहे नगरे गोभद्रश्रेष्ठिनो भार्याया भद्राया उदरे स पुत्रत्वेनाभवत् । ततः सा शालिक्षेत्रं सुनिष्पन्नं स्वप्नेऽपश्यत् । तं स्वप्नं च सा भर्तुः शशंस, भर्त्रोक्तं तव वरीयान् पुत्रो भावी ।

ततः सा भद्रा गोभद्रश्रेष्ठिना सम्पूर्यमाणदोहदा पूर्णे काले भद्रकरं द्युतिद्योतितदिङ्मुखं तनयरत्नमसूत, सुनिष्पन्नशालिक्षेत्रस्वप्नानुसारेण तस्य सूनोः शुभे दिने पितरौ शुभां शालिभद्र इत्यभिधां चक्रतुः, स पञ्चभिर्धात्रीभिः परिपाल्यमानः क्रमाद्ववृधे । क्रमात्किञ्चिदूनाष्टवर्षयः पित्रा कला अध्यापितः क्रमेण मित्रैः सह क्रीडन् सम्प्राप्तयौवनो युवतिजनमनोनयनानन्दकरो मेरुभूमौ कल्पशाखीव स ववृधौ । अथैकदा तत्पुरश्रेष्ठिनो निजा द्वात्रिंशत्कन्याः शालिभद्राय प्रदातुं गोभद्रश्रेष्ठिनं ययाचिरे, तेषां श्रेष्ठिनां वचनं श्रुत्वा प्रहृष्टो गोभद्रः शालिभद्रेण सार्धं ताः कन्यका महामहेन पर्यणाययत् । शालिभद्रो विमानसदृशे मन्दिरे ताभिः सार्धं विललास । देववधूभिः समं देव इव स शालिभद्रः सर्वानन्दमग्नो रात्रिदिवसयोरन्तरं न विवेद, यतस्तस्य भोगसामग्रीं स्वयं तत्पितरावपूरयताम्, एकस्मिन् दिने श्रीमन्महावीरवाणीं श्रुत्वा सञ्जातवैराग्यः श्रेष्ठी गोभद्रो वीरपादमूले व्रतं गृहीत्वा सम्यगाराध्य प्रान्ते विधिनानशनं कृत्वा देवलोकं जगाम । अवधिज्ञानतो गोभद्रश्रेष्ठिदेवः शालिभद्रं निजात्मजं ज्ञात्वा तत्पुण्यावर्जितः पुत्रवात्सल्यतत्परोऽभूत्, तेन सोऽनुवासरं कल्पशाखीव दिव्यानि वस्त्रनेपथ्यसुगन्धकर्पूरादीनि सभार्यस्य शालिभद्रस्यार्पयामास, ईदृशं सुपात्रदानफलम् । पश्चात् सः चारित्रगृहीत्वा सिद्धिं गतः ।

शील–तपोविषये उक्तं प्रबन्धपञ्चशत्याम् –

श्रीपुरे पद्मभूपस्य पद्मावती पत्नी बभूव । कुमारदेवचन्द्रौ पुत्रौ अभूताम् । पितरि मृते कुमारदेवो राज्ये निविष्टः । कुमारदेवभूपः स्वदारसंतोषी मनो विना भोगसुखमनुभवति स्म । चन्द्रो दीक्षां प्राप्य शुद्धाहारं गृह्णानो बभूव ।

एकदा विहारं कुर्व्वन् श्रीपुरासन्नदेवकुले समेत्य तस्थौ । तदा राजा वन्दित्वा गतः । राज्ञी चन्द्रयतिं देवं वन्दित्वा जिमिष्यामीत्यभिग्रहं ललौ । राज्ञी यदा वन्दितुं यतिं गता तदान्तरा नदी जलपूर्णा जातोपरि जलदवृष्टितः । राज्ञी नदीमुत्तरितुं न शक्नोति तदा राज्ञोक्तम्–गच्छ, नद्याः उपकण्ठे गत्वा त्वयेति वक्तव्यम्– यदि मम भर्ता शीलं शुद्धं पालयन् विद्यते तदा नदि ! त्वं मार्गं देहि । ततः सा दध्यौ अहं तु पत्युः शीलसम्बन्धं जानन्नस्मि तथापि भर्तुर्वचो मान्यं देवचन्द्र इव इति ध्यात्वा पत्युः वचो जल्पन् युक्त्या नदीपार्श्वे गता पत्युक्तं ( विनयेन ) तदोक्तं तदा नद्या मार्गो दत्तः । देवकुले गत्वा देवरं वन्दित्वा स्वजेमनाय शुद्धाहारेण सार्थमानीतेन देवरं प्रतिलाभितवती । ततः सा स्वयं बुभुजे । पश्चाद् गन्तुकामा नदिजलपूर्णा जाता तदा यतिना प्रोक्तम्–गच्छ नदीकूले जल्पनीयं च–भो नदि ! मम देवरेण दीक्षाग्रहणादनु उपवासा एव कृताः स्युः तदा मार्गं देहि । एतच्छ्रुत्वा तया ध्यातं अधुनैव मम हस्तदत्ताहारेण बुभुजे एवं कथं भवतीति दध्यौ सा । यद्यतिनोच्यते तन्मन्यते सत्यमेव ततो यतिवचसा नदी तयोत्तीर्णा । ततो भर्ता पृष्टः शीलादिसम्बन्धं प्राह–अहं मनो विनैव त्वया सह भोगं करोमि अतो मे शीलम् । यतः मन एव प्रमाणं । ततो यतिः पृष्टः प्राह–मया

शुद्धाहारो धर्मरक्षणाय गृहीतः अतो नद्या मार्गो दत्तः ।

भावे जीर्णश्रेष्ठिकथानकं–

विशालाकानने श्रीवीरः कृतचतुर्मासीतपाः प्रतिमया तस्थौ । तत्र तन्नगरजीर्णश्रेष्ठी प्रभुमवेक्ष्य व्यजिज्ञपत्–स्वामिन् ! मद्गृहे पारणकमद्य कर्तव्यम् । इत्युक्त्वा गतः । परं प्रभुस्तु नायातः द्वितीयेऽह्नि षष्ठपारणकं वितर्क्य जगद्बन्धुं नत्वाऽवोचत्–हे कृपावतार ! अद्य मदोको मां च पुनातु । तदा मौनेन स्वामी संस्थितः । एवं प्रत्यहमागत्य जिनेशं निमन्त्रयामास । अथ चतुर्मास्यन्ते दध्यौ–अवश्यमद्य जिनपारणकदिनम् ततोऽवादीत्–हे दुर्वारसंसारामयधन्वन्तरे ! मां कृपालोचनाभ्यामवेक्ष्य युष्माभिर्मत्प्रार्थना मनस्यवधार्या । स्तुत्वेति गृहमगात् । मध्याह्ने स्थालगृहीतमुक्ताफलो वर्धापनाय गृहद्वारे स्थित इति दध्यौ अत्रैष्यन्त विश्वबन्धुं सपरिच्छदोऽहं वन्दिष्ये । ततो गृहस्यान्त आनेष्ये । ततो वरान्नपानैः प्रतिलाभयिष्ये । शेषमुद्धरितं धन्यंमन्यः स्वयं भोक्ष्ये । एवं मनोरथश्रेण्यारूढेन तेन द्वादशस्वर्गयोग्यं कर्म समर्जितम् ।

इतः श्रीत्रैशलेयोऽभिनवश्रेष्ठिगृहे भिक्षार्थमगमत् । भुक्तकालातिक्रान्तत्वात्तेन कुल्माषा दापिताः । तद्दानतः पञ्च दिव्यानि जज्ञिरे । जीर्णश्रेष्ठी दुन्दुभिध्वनिं निशम्य दध्यौ–धिङ्माम्, अधन्योऽहं, यन्मद्गृहे प्रभुर्नायातः इति ध्यानभङ्गस्तस्याजायत ।

अथैकदा कस्यचिज्ज्ञानिनो मुनेरग्रे भूपेनोक्तम्–भगवन् ! मम नगरं धन्यं, यत्र श्रीवीरपारणककारयिता भाग्यवानभिनवश्रेष्ठी वसति । तदा मुनिनोक्तम्–मैवं वद । द्रव्यभक्तिस्तु तेन कारिता । परं भावनया भक्तिं जीर्णश्रेष्ठी व्यधात् । अतः स एव पुण्यवान ।

किं चान्यद्यदि नाश्रोष्यत्तदासौ देवदुन्दुभिम् । ततस्तदैव संप्राप्स्यत् केवलज्ञानमूज्ज्वलम् ।।

❋ ❋ ❋

**तत्र भावधर्मभेदानाह–**

( इन्द्रवज्रावृत्तत्रयम् )

सत्यक्षमामार्दवशौचसङ्गत्यागार्जवब्रह्मविमुक्तियुक्तः।
यः संयमः किं च तपोऽवगूढश्चारित्रधर्मो दशधाऽयमुक्तः ।।२।। [१२७]

**व्याख्या-** ***सत्यं*** **सर्वासत्यपरिहरणं,** ***क्षमा*** **क्रोधवर्जनं,** ***मार्दवं*** **मानदशापरिहारः,** ***शौचं*** **चतुर्विधादत्तमलपरिहारेण निर्लेपव्रतधरणं,** ***सङ्गत्यागः*** **धर्मोपकरणं विहाय सर्वधनादिसंयोगत्यागेनाकिञ्चनतावृत्तिः,** ***आर्जवं*** **मायिकभावं परिहृत्य ऋजुपरिणत्या वर्तनं,** ***ब्रह्म*** **शीलव्रतं,** ***विमुक्तिः*** **विशेषलोभत्यागेन संतोषयुक्तः,** ***यः संयमः*** **यः षड्जीवनिकायसंरक्षणव्यापारः सः,** ***किं च*** **संतोषयुक्तोऽपि** ***तपोऽवगूढः*** **नानाविधतपोभिः संयुक्तः स पूर्वोक्तः समग्रो*ऽप्ययं दशधा* दशविधः *चारित्रधर्मो* देशतः सर्वतो विरतिधर्म *उक्तो* जिनैः कथित इत्यर्थः ।।२।।**

सत्योपरि उपदेशप्रासादोक्तमुनिकथा–

एकस्मिन् पुरे कोऽपि मुनिः कस्यापि गृहे भिक्षार्थं प्रविष्टः । तेन नत्वा मुनिः पृष्टः–"भगवन् त्रिगुप्ति–गुप्तस्त्वमसि ?" । मुनिनोक्तम्–"नाहं त्रिगुप्तः" । "कथम् ?" तेनोक्तम्–"एकदाऽहं कस्यापि गृहे

भिक्षार्थमगमं, तस्य प्रियाया वेणीदंण्डं दृष्ट्वा स्वभार्यां स्मृतवानहम्, अतो मनोगुप्तिर्मम नास्ति ।पुनरेकदा भिक्षार्थमिभ्यगृहे गतवानहं, तेन कदलीफलानियोग्यानि कृत्वा मे दत्तानि ।अन्यगृहे मया पृष्टेन व्याहृतम् ।तेन तद्वैरिणा नृपाय निवेदितम्–''देव ! भवद्वाटिकाया रम्भाफलानि श्रीदत्तगृहे यान्ति'' ।राज्ञोक्तम्–''त्वया कथं ज्ञातम् ?'' तेनोक्तम्–''श्रेष्ठिना मुनेर्दत्तानि, मया तु मुनिमुखाच्श्रुतम्, एवंविधानि सदाफलितकदलीफलानि भवद्वाटिकां मुक्त्वाऽन्यत्र न सन्ति ।तच्छ्रुत्वा नृपेण श्रेष्ठी दण्डितः, अतो मम वाग्गुप्तिर्नास्ति, येन श्रेष्ठिदण्डनेऽहं हेतुरभूवम् । तथाऽहमेकदाऽटव्यां श्रान्तो विश्रान्तश्च प्रमीलां प्राप । तत्रैकः सार्थः स्थितोऽभूत् । रात्रौ सार्थपतिनोक्तम्–''प्रातरग्रे चलिष्यते, तेन सकालमन्नादि सज्जीकुरुत जनाः'' । ततः सर्वो जनोऽन्नपाके लग्नः ।एकेनान्धकारवशादेकस्मिन् पक्षे मम मस्तकं द्वितीयपार्श्वे च पाषाणं मुक्त्वा चुल्लकः कृतः ।तन्मध्ये वह्निरुद्दीपितः । मया शिरोऽपाकृतम् । अतो मे कायगुप्तिरपि नास्ति । अतो नाहं भिक्षार्हः'' । तस्य सत्यभाषणेन श्रेष्ठी हृष्टो मुनिं प्रतिलाभ्य मुनिप्रशंसयाऽ– नुत्तरविमानादिसुखमर्जितवान् ।मुनिस्तु तादृशमात्मानं निन्दन् चिरं चारित्रं प्रपाल्य क्रमाद्दिवं गतः ।

क्षमायां नागदत्तवृत्तं दानादिकुलकोक्तं –

विशालानगर्यां सुस्थितनामानः सूरयो बहुसाधुपरिवारपरिवृताश्चतुर्मासी तस्थुः । तत्रैकसाधुर्निरन्तरं मासक्षपणेन पारणं करोति ।सोऽन्यदा मासक्षपणपारणके एकेन क्षुल्लकेन समं नगर्यां भिक्षायै पर्यटति, तस्य साधोरीर्यासमित्या गच्छतः पादतले मण्डुकी समागता, पञ्चत्वं प्राप्ता च, तत्स्वरूपं वीक्ष्य क्षुल्लकश्चिन्तयत्ययं तपस्व्येतद्भेकीघातपातकं गुरोः समीपमागत्यालोचयिष्यतीति विचिन्त्य मौनं कृतवान् । अथ मासोपवासी साधुः शुद्धान्नपानादि समादाय वसतौ गत्वा यथोक्तविधिना गुरोरनुज्ञाप्य भोक्तुमुपाविशत्, तदानीं क्षुल्लकेन चिन्तितमहोऽनेन मुनिनाधुनापि तत्पातकं नालोचितं, तन्नुनं विस्मृतिं गतं, साम्प्रतं भोजनावसरे तत्समारयितुं मम न युक्तं यतो मासोपवासित्वादस्य साधोः कोपो भवेत्, तेन यदि प्रतिक्रमणावसरे नालोचयिष्यति तदाहं स्मारयिष्यामि, इति विचार्य तदानीं मौनमेवावलम्ब्य स्थितः ।अथ स तपस्वी पारणं कृत्वा स्वाध्यायादिक्रिया–विधौ प्रावर्तत ।

इतश्च सन्ध्याकाले प्रतिक्रमणवेलायां सर्वेऽपि साधवः सम्भूय गुरोः पार्श्वे स्वानि स्वानि पापान्यालोचयामासुः, परं तेन तपस्विना तत्पापं नालोचितं, तदा स क्षुल्लकः प्राहाहो तपस्विन्! भवताद्य नगर्यां पर्यटताऽज्ञानदोषेण पादेन भेकी हता, तत्पापं त्रिकरणशुद्धया कथं नालोचयसि? तदा स तपस्वी क्रुधा ज्वलन्नित्युवाचाहोऽसम्बद्धवादिन्नीर्यासमित्या यतमानस्य गच्छतो मम भेकीवधः कथं सम्भवति ? अथ तव मिथ्यावादफलं दर्शयामीत्युक्त्वा दण्डं करे कृत्वा तं क्षुल्लकं हन्तुं दधावे, तदानीं क्रोधान्धोऽन्तरा स्तम्भेनास्फालितो मृत्युमवाप, यतः –

क्रोधो मूलमनर्थानां क्रोधः संसारवर्धनः । धर्मक्षयङ्करः क्रोधस्तस्मात्क्रोधं विवर्जयेत् ।।१ ।।
कोहो पियं पणासेइ माणो विणयनासणो । माया मित्ताणि नासेइ लोभो सव्वविणासणो ।।२ ।।
उवसमेण हणइ कोहं माणं मद्दवया जिणे। मायं चज्जवभावेण लोभं सन्तोसओ जिणे।।३ ।

ततोऽसौ मृत्वा विराधितसंयमानां सर्पाणां कुले दृष्टिविषो विषधरो जातः, तत्कुलस्थाः सर्प सर्वोऽपि जातिस्मृतिमन्तः, अत एवमचिन्तयन्नहो वयं पूर्वं संयमं विराध्य दृष्टिविषाः सर्पा जाताः, इति विचिन्त्य ते सर्वेऽपि सर्पा अस्मद्दृष्ट्या मा कोऽपि व्यापाद्यतामिति निश्चयेव प्राशुकाहारेणाजीविकां कुर्वन्ति स्म ।

तथाविधांस्तान् वीक्ष्य तपस्विजीवः सर्पश्चिन्तयामासाहो मयेदृश्याहारशुद्धिः क्वचिद् दृष्टा, इत्यादीहापोहं कुर्वन् सोऽपि जातिस्मृतिमान् जातः । ततः स चिन्तयति धिग्मां क्रोधकारिणं, यन्मया पूर्वं बहुभिः कालैरर्जितमपि चारित्रं क्रोधात्क्षणेन हारितं, सत्यवादिन्यपि क्षुल्लके वैरं चिन्तितं, धिक्कषाय –परिणामं, यतः –

जह वणदवो वणं दवदवस्स जलिओ खणेण निद्दहइ ।

एवं कसायपरिणओ जीवो तवसंयमं दहइ ।।४।।

अथाहं तिर्यग्योनौ किं सुकृतं करोमि ? धर्मसामग्री मनुष्याणामेव भवेत्, यतः –

देवावि सयपसत्था नेरइया विविहदुक्खसन्तत्त ।

तिरिया विवेकविगला मणुअसणं धम्मसामग्गी ।।५।।

तथाप्यहमतः परं कस्याप्युपरि कोपं न करोमि, एते सर्पा यथा प्राणवृतिं कुर्वन्ति तथैवाहमपि करोमि, तथा सम्यक्त्वं पालयामि, यथा–

देवो मे वीतरागस्तु गुरवस्तु सुसाधवः । जिनप्रणीतश्रीधर्मः सम्यगत्र भवे सदा ।।६।।

इति चेतसि निश्चित्यैकं बिलमाश्रित्य तथैव प्रावर्तत । इतश्च तुरमिण्यां नगर्यां कुम्भाभिधानो भूपतिस्तस्य सुतः सर्पेण दष्टो मृत्युमाप । ततो भूपतेः सर्पोपरि प्रद्वेषः प्रकटीबभूव । ततो राज्ञा पटहो वादितः, यः कश्चन सर्पं निहत्येहानयति स दीनारमेकं लभते, इत्याघोषणां श्रुत्वा बहवो निर्दयाः पापाः प्रतिदिशं दीनाराभिलाषुका दन्दशकनिग्रहार्थं दधाविरे, तदा केचन सर्पाकर्षणविद्याविदो नराः सर्पघृष्टिदशितमार्गाः क्षपकाहिबिले समागताः तत्र स्थिताः सर्पाकर्षकरां विद्यां पठन्ति स्म, स तपस्विजीवः सर्पस्तस्याकृष्टस्तत्र–स्थातुमशक्नुवन्निति चिन्तयामास, यथा–

*अहो मे प्राक्कृतं कर्मा–शुभं ह्युदयमागतम् । तज्जीव भवता द्वेषः कर्तव्यो न कदाचन ।।७।।*

अर्हन्तः शरणं सिद्धा विशुद्धा साधवस्तथा । जिनप्रणीतः श्रीधर्मः शरणं सर्वदा मम ।।८।।

क्षमयाम्यखिलान् जीवान् सर्वे क्षाम्यन्तु ते मयि । मैत्री मे सर्वभूतेषु न वैरं केनचिन्मम ।।९।।

इत्याद्याराधनां कुर्वन्मनसि नमस्कारमन्त्रं स्मरन्मा मम दृष्ट्यैते मरन्त्विति विमृश्याभिमुखो न निस्ससार, किन्तु शनैः शनैः पुच्छितो निर्गच्छति, ते पापिनो नरास्तं निर्गतं छिन्दन्ति ।

एवं तैः स सर्पः सर्वोऽपि खण्डीकृतः । ततस्ते खण्डा राज्ञाऽग्रत आनीताः । इतश्च नागदेवतया राज्ञोऽग्रे प्रोक्तं हे राजन्नतःपरं सर्पघातपातकं त्वया न कर्तव्यं तव पुत्रो भविष्यति । ततः सन्तुष्टो राजा सर्पेभ्यो द्वेषं परिहृत्य सर्वान् लोकान् सर्पघातपातकान्निवारयामास । इतश्च स एव क्षपकजीवः सर्पः शुभध्यानेन मृत्वा तस्यैव राज्ञः पट्टराज्ञयाः कुक्षौ पुत्रत्वेनोत्पन्नः ततः सा राज्ञी पूर्णे मासे सुदिवसे सुमुहूर्ते पुत्ररत्नं प्रासूत, राज्ञा पुत्रस्य जन्ममहोत्सवश्चक्रे, ततो राज्ञा तस्य पुत्रस्य नागदत्त इति नाम विदधे, स नागदत्तकुमारः पञ्चभिर्धात्रीभिर्लाल्यमानः क्रमेण ववृधे । ततो राज्ञा कलाचार्यस्य समीपे तस्य सकलकलाभ्यासः कारितः । *अथान्यदा नागदत्तकुमारो गवाक्षे स्थित* एकं मुनीश्वरमीर्यासमित्या यतमानं गच्छन्तं ददर्श, तं दृष्ट्वा स चिन्तयत्यहो मयेदृग्स्वरूपं पूर्वं क्वापि दृष्टमभूदित्यादीहापोहं कुर्वतस्तस्य जातिस्मरणं ज्ञानं समुदपद्यत, तेन स्वपूर्वभव स्वरूपं सर्वमपि ज्ञातम् । ततो रागद्वेषमूलं संसारदुःखकारणं विज्ञाय संसाराद्विरक्तोऽभवत् । ततः प्रव्रज्यां ग्रहीतुमना मातापित्रोरनुज्ञां ययाचे, तावपि मृदुवाक्यैस्तुष्टौ पुत्रं व्रतग्रहणे दृढमानसं विज्ञाय व्रतानुज्ञां ददतुः । ततः नागदत्तकुमारः सद्यगुरुसमीपे व्रतं जग्राह ।

मार्दवे भारवाहकदृष्टान्तं :-

कस्मिँश्चित्पुरे पञ्चशती भारवाहका वसन्ति । तेष्वेका मुख्यः पञ्चकलसीभारवाहक इति तद्गुणं लोकोत्तरं वीक्ष्य भूपतिनेति वरः प्रसादीकृतः ''त्वया भाराक्रान्तेन मार्गे गच्छता सन्मुखं रथाश्वशकटसैन्यहयादिकं समागच्छद्वीक्ष्य स्वीकृतमार्गत इतस्ततोऽपसरणं न विधेयं, भारार्दितस्य मार्गमोचनदुष्करत्वात् । अहमपि दूरात्त्वां वीक्ष्य मार्गं दास्यामि, अतो मत्तोऽपि त्वया न भेतव्यं किं पुनरन्यतः ?'' इत्याद्याज्ञा दत्ता ''मदाज्ञालोपकं नरमहं दण्डयिष्यामि'' । तदनु स स्वेच्छया पथि व्रजति । तं दृष्ट्वा सर्वेऽप्यपसरन्ति । कोऽपि रोषं ( धं ) न करोति । एकदा मार्गे सन्मुखमेकः साधुः समागात् । तं वीक्ष्य स दध्यौ-''मद्भारस्तु परिमितोऽस्ति, मुनेः पञ्चमहाव्रतभारस्त्वपरिमितः, केनाप्यलङ्घनीयः, तमुत्पाट्यासौ परिभ्रमति, अस्याग्रे मदीयवीर्यं निरर्थकम्'' इति विचार्य स्वयमपसृतः, तदनु सर्वेऽप्यपसृताः, रुष्टास्ते पाश्चात्या इत्यूचूः-''त्वया राजाज्ञोल्लङ्घिता'' इति, तै राज्ञे ज्ञापितम् । नृपेणाकार्य पृष्टः स आह-''ईषदपि देव ! तवाज्ञा न खण्डिता मया'' । राजाऽऽह '' कथम् ?'' तेनोक्तम्-''देव ! मत्तोऽस्य महान् भारस्तेनाहमपसृतः'' । राजाऽऽह-''स कथं भारवान् ?'' स प्राह-''स्वामिन् ! मेरुतोऽप्यधिकंभाराणि पञ्च महाव्रतानि वोढुमक्षमोऽहम् । अयं मुनिस्तु वहन्नस्ति, चक्षुः-पुलकस्फुरणमात्रमपि कालं यावन्न प्रमादं दधाति । अहं चैतद्बाह्यभारोत्पाटनं करोमि ईर्यादिसमितिविमुक्तः, अनेकजीवानुपमर्द्यानेकभवदुर्मोच्यपापव्यापारभारं वृद्धिं नयामि । यतः पुराऽहं प्रव्रज्यां गृहीतवान्, परं महाव्रतभारं वोढुमशक्तस्ताममुचम् । पञ्चकलसीभारं तु सुष्ठु वहामि, न तु तदङ्गीकृतान्त-रङ्गमितभारोत्पाटनार्ह इति मया युक्तं कृतमस्ति ।

इत्याद्यनेकयुक्त्या महाव्रतभारोद्वहनं दुर्धरं प्रकाशितं तेन पञ्चाख्येन । इति निशम्य स भूपः स्माह-''हे पञ्चाख्य ! त्वं महावीर्यवानसि, ईदृशं पञ्चकलसीमितं महाभारं स्वीकरोषि, महाकष्टमनुभवसि, त्वयैतद्व्रताचरणं कथं त्यक्तं निर्भारं सदुद्वहम् ? नात्र किञ्चिद्दुष्करं दृश्यतेऽस्माभिस्तु'' । स प्राह-''स्वामिन् ! त्वयाऽनेकश इन्द्रियानुरूपा विषया भुक्ताः, इदानीं स्वपुत्रे राज्यं न्यस्य तदनुरूपमेकदिनं यावत्संयमं त्वं समाचर, तदनुरूपां क्रियां कुरु'' ।

ततः स भूपोऽभिमानपूर्णस्तदर्थं सोद्यमो जातः । तदा स्वाङ्गना इति जजल्पुः-''हे प्राणेश ! त्वत्पृष्ठिं वयं क्षणमपि न मुञ्चामः, वयं त्वां विना रतिं न लभामहे, अन्तप्रान्ततुच्छाहारादिभि- र्द्वाविंशतिपरीषहैः कमनीयकामिनीभोगार्हं त्वद्वपुर्विनङ्क्ष्यति, तदनु प्रत्यहं भावि पश्चात्तापदुःखं सुकरम् । अपि च यदि त्वं निःस्पृहत्रिकालवस्त्वाञ्छकमुनिगुणतिरस्करणार्थं दर्पभरेणेदं कार्यं कामयसे, समीचीनं, तत्कार्यं तु समस्तदर्पदम्भविरहितमस्ति'' । इति श्रुत्वा नृपः स्माह-''अहो ! इदं महादुष्करं, मया त्वज्ञानेन जल्पितम् । यदा सर्वथा निराशीभावो जायते तदैव तदुचितस्वभावो द्योतत इति'' । ततो नृपस्तं भारवाहमुख-मित्यवोचत्-''समस्तपुद्गलाशाविमुक्तं मुनित्वमेकदैवसिकमप्यतृप्तजीवानां न स्पृशति'' । स पञ्चाख्यः स्माह-''हे क्ष्माप ! तेन मुनिना यौवनकालेऽपि प्रत्यक्षप्राप्तं काञ्चनकामिनीराष्ट्रसौख्यं तृणवत्त्यक्त्वा यावज्जीवं संयमभारोद्वहनं स्वीकृतं, तदनुवृत्त्या चरम-श्वासोच्छ्वासपर्यन्तं पालयिष्यति । मया श्रीमुमुक्षु-प्रणीतस्याद्वादागमवचनानि निशम्य महाव्रतोद्वहनमङ्गीकृतमासीत् परं क्लीबबलीवर्दसदृशोऽहं जातः । गजभारं तु गज एवोत्पाटयति, न तु खरः । तथा विश्वे समस्तपृथ्वीजलधिगिरितरुप्रभृतिभारोद्वहने केचित्समर्थाः श्रूयन्ते, परमस्योद्वहने तु अयमेव क्षमावान् क्षमो वीक्ष्यते । अत एव हे नृप ! मया वर्त्मनि विनयेन

नुतः स्तुतश्च'' । इति श्रुत्वा नृपादयो जैनमुनिविनयपरा बभूवः । इति बुद्धया रञ्जितनृपस्तं स्वाङ्गसेवकं चकार ।

आर्जवे आवश्यकनिर्युक्तिभणितज्ञातं–

मगधविषये गूर्बरग्रामे पुष्पशालो गाथापतिः, भद्रा तस्य भार्या, पुत्रस्तस्य पुष्पशालसुतः, स मातरपितरं पृच्छति–को धर्मः ?, ताभ्यां भण्यते–मातरपितरौ शुश्रूषितव्यौ, द्वे एव दैवते माता च पिता च जीवलोके । तत्रापि पिता विशिष्टो यस्य वशे वर्त्तते माता ।।१ ।। स तयोः प्रगे मुखधावनादिविभाषा, दैवते इव तौ शुश्रूषते । अन्यदा ग्रामभोजिक आगतः, तौ संभ्रान्तौ प्राघूर्ण्यं कुरुतः, स चिन्तयति–एतयोरपि एतद्दैवतम्, एतं पूजयामि ततो धर्मो भविष्यति, तस्य शुश्रूषां प्रकृतः । अन्यदा तस्य भोजिकः, तस्याप्यन्यः, तस्याप्यन्यः यावच्छ्रेणिकं राजानमवलगि–तुमारब्धः, स्वामी समवसृतः, श्रेणिक ऋद्धया गत्वा वन्दते, तदा स स्वामिनं भणति–अहं त्वामवलगामि ?, स्वामिना भणितम्–अहं रजोहरणप्रतिग्रहमात्रयाऽवलग्ये, तेषां श्रवणेन संबुद्धः ।

ब्रह्मचर्ये वसुभूतिख्यातं–

वसन्तपुरे शिवभूतिवसुभूतिनामानौ द्वौ भ्रातरौ । अन्यदा ज्येष्ठभ्रातुर्भार्या कमलश्रीः स्मरसोदरं पतिसोदरं निरीक्ष्य रागात्सम्भोगार्थमयाचत । तदा च स्माह–''हे मुग्धे ! ज्येष्ठभ्रातुर्भार्या माता ज्ञेयेति अन्यथा तव महत्पापं लगिष्यति, त्वं तु लोकव्यवहारविमुखोऽसि, शास्त्रवाक्येन भ्रान्तोऽसि च । हे देवर ! त्वमपि श्रुतिजडत्वं त्यक्त्वा मां भज, अन्यथा तव महादोषी भावी इति श्रुत्वा वैराग्यवान् गृहान्निर्गत्य यतिरभूत् । यतः–

अपसर सखे ! दूरादस्मात्कटाक्षविषानलात्, प्रकृतिविषमाद्योषित्सर्पाद्विलासलसत्फणात् ।<br>
इतरफणिना दष्टः शक्यश्चिकित्सितुमौषधैश्चटुलवनिताभोगिग्रस्तं त्यजन्ति हि मान्त्रिकाः ।।

इति वनितासङ्गविषमं विचिन्त्य स महात्मा सर्वथा मुक्तिमानिनीसंस्तवो विजहार । भ्रातृजायाऽपि तं प्रव्रजितं निशम्य रागोदयादार्तध्यानेन मृत्वा क्वापि ग्रामे शुनीत्वेनोत्पन्ना । तत्रापि गोचर्यामटन्तं तमुद्वीक्ष्य पूर्वाभ्यस्तरागवशात्सा शुनी कायच्छायेव तं नामुञ्चत् । सर्वदा सर्वत्र च तां पृष्ठलग्नां विलोक्य लोकैः स शुनीपतिरित्यभ्यधायि । तादृशैर्जनवचनैर्लज्जमानो मुनिः कथञ्चिदपि तस्या दृशं वञ्चयित्वा नष्टः । तत्रापि तमपश्यन्ती साऽर्तध्यानेन विपद्य क्वापि वने वानरीत्वेनोत्पन्ना । तत्रापि कदाचित् पथि विहरन्तं तं दृष्ट्वा शुनीवत्तस्य पृष्ठे लग्ना । तां च तथावस्थां विलोक्य लोकैः स मुनिर्वानरीपतिरित्येवं कथितः । यथा यथा लोका इत्थं जल्पन्ति तथा तदाकर्ण्य साऽत्यन्तं सहर्षा बभूव । प्रत्यहं सा विषयचेष्टां दर्शयति । मुनिस्त्विति दध्यौ–''अहो ! मत्कर्मणां गहना गतिर्विद्यते'' इत्यादि ध्यात्वा शुनीमिवेमामपि हित्वा मुनिः क्वापि गतः । ततः साऽऽर्तध्यानेन विपद्य क्वापि जलाशये हंसीत्वेनोदपद्यत । तत्र शीतपरीषहसहनार्थं जलाभ्यर्णे प्रतिमया स्थितं तं समीक्ष्य सञ्जातकामोदया भुजाभ्यां भामिनीव जलभृताभ्यां पक्षाभ्यामालिलिङ्ग । पुनः पुनः करुणशब्दैरव्यक्तमधुरं विरहविधुरं च रटति । मुनिस्तु स्वशुभध्यानमग्नोऽन्यत्र विजहार । ततः तमपश्यन्ती तन्मनाः सा हंसी आर्तध्यानेन मृत्वा व्यन्तरदेवी जाता । तत्र विभङ्गज्ञानेन तस्यात्मनश्च सर्वं वृत्तान्तं विज्ञाय ''अनेन मम देवरेण मद्भणितं नाकारि'' इति कुपिता सा हन्तुमुपस्थिताऽपि तं मुनिं ध्यानतपसान्वितं हन्तुं न शक्नोति स्म । तदनु मुनेः पुरः स्वशक्त्या दिव्यानुभावेनानेकवनितास्वरूपाणि विधाय प्रोवाच–''हे मुने ! त्वं किं विचारयसि ? त्वत्संयमः सद्यः सफलो जातः, एतान् दिव्यभोगान् भुङ्क्ष्व, किं मुधा परितप्यसे ? अध्यक्षप्राप्तं स्पृहानुरूपं सौख्यं स्वीकुरु'' ।

इत्यादिप्रतिकूलानुकूलपरीषहैर्न क्षुब्धः, इति च दध्यौ–"बाह्यदृष्टेः संसाररक्तस्य सुन्दरी स्त्री अमृतघटिकेव भाति, तदर्थं धनमर्जयन्ति, त्यजन्ति प्राणान्मोहमग्ना रावणाद्या इव । निर्मलानन्दात्म–स्वरूपावलोकनदक्षस्य सा सुन्दरी विण्मूत्रमांसमेदोऽस्थिमज्जाशुक्रादीनां भाजनमाभाति, तत्त्यागिनो जम्बूस्वाम्यादय एव श्रेष्ठाः" ।इत्यादिनिर्मलध्यानः क्रमेण कलितकेवलः स मुनिर्लोकानां पुरस्तादात्मनस्तस्याश्च पूर्वभवसम्बन्धमभिधाय सिद्धः ।

निर्लोभे तु उपदेशप्रासादे उक्तं –

पृथ्वीपुरे शुभङ्करविप्रः । तस्य भार्या गुणवती जैनमतधर्ममर्मज्ञाऽभूत् । एकदा स विप्रः पठनार्थमन्यत्र देशे गतः । तत्र वेदपुराणालङ्कारग्रन्थव्याकरणतर्कसाहित्याभिधानकोशादिशास्त्राण्यधीत्य पदे पदेऽनेकवादिनो जित्वा जितकाशिः सन् स्वगृहे समेतः शास्त्रवेत्तृत्वाडम्बरं सर्वेषां पुरोऽत्यन्तं दर्शयति । तदा परमार्हती तद्भार्या दध्यौ अनेन मिथ्याशास्त्रमेकान्तवादमधीतं, परं स्याद्वादमार्गाज्ञनरो वस्तुषु योग्यायोग्यविवेचनं न जानाति, अतोऽहं पृच्छामि इति ध्यात्वा साऽपृच्छत्– हे स्वामिन् ! सर्वेषां पापानां जनकः कः ? तदुच्यताम् । विप्रेणोक्तम्–हे भार्ये ! शास्त्राण्यवलोक्य कथयामि । ततो यावच्छास्त्रमधीतं तावत्सर्वं विलोकितं पुस्तकन्यस्तं, परं पापस्य पिता न निर्गतः । ततो विप्रः खिन्नो भार्यां प्राह–शास्त्रे त्वत्प्रश्नं नास्ति, त्वयैतत्कुतः श्रुतम् ? ।साऽऽह–मया तु मार्गे व्रजन्त्या जैनमुनिमुखत इत्थं पूर्वं श्रुतं यत्सर्वेषां पापानां जनक एकोऽस्ति, अतस्तन्नाम पृच्छामि युष्मभ्यम् । विप्रः प्राह–तत्र गत्वा पृच्छ्यते, निः संदेहत्वमाप्यते । स साध्वन्तिके गत्वा स्थितः । गीर्वाणभाषया कृतप्रश्नानां सम्यगुत्तरं प्राप्य हृष्टः, पुनः पप्रच्छ–स्वामिन् ! पापस्य जनकाह्वानं कथय । गुरुराह–सन्ध्यायामत्रागन्तव्यं, तन्नाम कथयिष्ये । स गतः ।

अथ गुरुणा ध्यातम्–नूनमेषोऽस्य भार्यया प्रतिबोधार्थं प्रेषितोऽस्ति, अन्यच्च श्वपाकहस्ताभ्यामेकं खरशवमानाय्योपाश्रयतः शतहस्तेभ्यो बहिरेकान्तस्थले स्थाप्यम् । श्राद्धेन तत्कार्यं शीघ्रं कृतम् । ततः सन्ध्याकाले समागते विप्रे छन्नं तं प्रति गुरुराह–एकमस्मत्कार्यं त्वं करोषि चेत्तदेदं रत्नं ददामि, कार्ये कृते खरस्य शवं पतितमस्ति, तस्मिन्नत्रस्थे सत्यस्माकं स्वाध्यायादिधर्मकार्येऽन्तरायः स्यात्, अतस्तदुत्पाट्य बहिः प्रदेशे निक्षिप । तेनाऽपि ध्यातम्–अन्धकारे प्रसृते साम्प्रतं विप्रं वेदपारगं को जानाति ? अतः स्वार्थं साधयामि । ततः श्वपाकसदृशं वेषं विधाय तल्लम्बकर्णमृतकं स्कन्धे निधाय यज्ञोपवीतं संगोप्य बाह्यप्रदेशे परिष्ठाप्य शीघ्रं स्नात्वा च समागतः । गुरु प्राह–स्वामिन् ! मया तत्कृतं, युष्मद्वाक्यं स्वयं पालयत । सूरिणा द्वे रत्ने दत्ते । पुनर्गुरुं प्राह सः –हे भगवन् ! तदुत्तरं प्रकाशय । सूरिः प्राह–अद्यापि त्वया न ज्ञातम् ?। स दध्यौ सुलभबोधित्वादनेकशास्त्रज्ञत्वात्सम्यग्विचारेणोपपन्नः –अहो ! अहं विप्रः ब्रह्म जानातीति ब्राह्मणः, गायत्रीजापकृदपीदृशीं निन्द्यदशां लोभाभिभूतः प्राप्तः ।

ततः स्वगृह एत्य भार्यां प्राह–हे भार्ये ! जैनसूरिणाऽहं सम्यग्बोधितः, एष धर्मो लोकोत्तरः सर्वोत्तमश्च, अजितेनैकेन लोभेन सर्वं व्यर्थं, लोभग्रस्तः सर्वाणि पापानि करोति ।

श्लोकद्वयेनास्य धर्मस्य प्रभावाः प्रोच्यन्ते-

यस्य प्रभावादिह पुष्पदन्तौ, विश्वोपकाराय सदोदयेते ।
ग्रीष्मोष्मभीष्मामुदितस्तडित्वान् काले समाश्वासयति क्षितिं च ॥३॥ [१२८]

व्याख्या- इह विश्वे *यस्य* प्रोक्तरूपस्य धर्मस्य *प्रभावात्* अचिन्त्यमहिम्नः सकाशात् *पुष्पदन्तौ* चन्द्रसूर्यौ द्वावपि *विश्वोपकाराय* धर्मिजननिवाससामर्थ्याज्जगज्जनानां सुखसंपत्कृते *सदोदयेते सदा* प्रतिदिनमनादित *उदयेते* समुद्गच्छतः । *च* पुनः, *यस्य प्रभावात् ग्रीष्मोष्मभीष्मां ग्रीष्मो* निदाघसमयस्तस्माज्जातो य *उष्मा* सन्तापभरस्तेन *भीष्मा* जनानां सन्त्रासोत्पादिका तां, *क्षितिं* महीमण्डलं *काले* तदनन्तरभाविनि प्रावृषि *उदितः* सर्वत्र गगन-मण्डलव्यापी *तडित्वान्* सगर्जितो विद्युत्वान्मेघः *समाश्वासयति* *सम*तिशयेन निवृत्तघर्मां विदधातीत्यर्थः ॥३॥

❋ ❋ ❋

उल्लोलकल्लोलकलाविलासैर्नाप्लावयत्यम्बुनिधिः क्षितिं यत् ।
न घ्नन्ति यद्व्याघ्रमरुद्दवाद्या धर्मस्य सर्वोऽप्यनुभाव एषः ॥४॥ [१२९]

व्याख्या- तथा *यत् उल्लोलकल्लोलकलाविलासैः* उत्प्राबल्येन *लोलाश्च*ञ्चला ये *कल्लोला* ऊर्मिसमूहास्तेषां याः *कला* विभूतिसामर्थ्यविशेषास्तेषां ये *विलासाश्च*तुर्दिक्षु सवेगप्रधावनसमुच्छलन-प्रसरणादयस्तैः, *अम्बुनिधिः* समुद्रो यत् यस्मात् *क्षितिं* पृथिवीं, *न प्लावयति* जलप्रवाहैः स्वोदरमध्ये नाकर्षति । तथा *यच्च व्याघ्रमरुद्दवाद्या न घ्नन्ति, व्याघ्रः* सिंहः, *मरुद्वा*तो देवश्च, *दवो* वनानलः आदिपदात्सर्पनदीप्रभृतयो ग्राह्याः, एते *न घ्नन्ति* जनवृन्दं न विनाशयन्ति । *एष* श्लोकद्वयेनोक्तः *सर्वोऽपि* समग्रोऽपि *धर्मस्य* अनन्तरप्रोक्तस्य *अनुभावः* सामर्थ्यं महिमास्तीति जानीहीत्यर्थः ॥४॥

❋ ❋ ❋

धर्मसौजन्यं प्रख्यापयति-

( शार्दूलविक्रीडितं वृत्तम् )

यस्मिन्नेव पिताहिताय यतते, भ्राता च माता सुतः
सैन्यं दैन्यमुपैति चापचपलं यत्राफलं दोर्बलम् ।
तस्मिन् कष्टदशाविपाकसमये, धर्मस्तु संवर्मितः
सज्जः सज्जन एष सर्वजगतस्त्राणाय बद्धोद्यमः ॥५॥ [१३०]

व्याख्या- यस्मिन् कष्टदशाविपाकसमये हे आत्मन् ! धर्मस्य सौजन्यं पश्य । यत् *यस्मिन्* वक्ष्यमाणस्वरूपे *कष्टदशाविपाकसमये कष्टानि* नानाविपत्फलदानस्वभावमयानि पञ्चविधान्तराया-सातवेदनीयायशः कीर्तिनीचैर्गोत्रप्रभृतीनि कर्माणि तेषां *दशा* तदुदयमुख्यावस्था *तद्विपाको* महादुष्टरस-भृत्साक्षात्तीव्रस्वफलप्रदानं तद्रूपो यः समयोऽवसरस्तस्मिन्, कीदृग्रूपे ? यस्मिन् आस्तामन्यः, चकारः सर्वत्राप्यर्थेन संबध्यते, *पिता* जनकोऽपि, *भ्राता* सहोदरोऽपि, *माता* जनन्यपि, *सुतः* पुत्रोऽपि, *अहिताय*

स्वस्य शरीरधनादिविनाशकष्टभरप्रापणाय *यतते* प्रयत्नपूर्वकोद्यमं कुरुते चास्मिन्नपि, *सैन्यं* यदि स्वयं राजादिस्तदा *यस्मिन्* युद्धादिके *सैन्यं* हस्त्यादिबलमपि *दैन्यं* हतोत्साहशक्त्युद्यमत्वेन दीनभावमुपैति प्राप्नोति अस्मिन्नपि, तथा *यत्र यस्मिन् चापचपलं* धनुर्यष्टिवच्चपलं चलाचलपतितोन्नतनम्रं *दोर्बलं* भुजविक्रमं *अफलं* निष्फलं कार्यनिष्पादनसामर्थ्यविकलं, *तस्मिन्नपि* समये *एष* पूर्वोदितो *धर्मः* सत्यादिरूपः, *तु*शब्दोऽप्यर्थे, स चैवार्थे, स एव *सज्जनो* जगन्मित्रं *सर्वजगतस्त्राणाय सर्वस्मिन्नपि* *जगति* भुवनत्रये स्वाश्रितानां जनानां *त्राणाय* रक्षणपालनकृते *संवर्मितः संवर्मितो* धृतधैर्यादिकवचउत्पादितधृतिसंवृत्य-भयस्वभावः सज्जः क्षमासत्यवैराग्यार्जवमार्दव-संतोषादिप्रहरणवृन्दैः प्रगुणो *बद्धोद्यमः* तदापि स्वीकृतप्रौढपराक्रमो जागर्तीत्यर्थः ।।५।।

अथ धर्मसंपदो नमस्कुर्वन्नाह-

त्रैलोक्यं सचराचरं विजयते यस्य प्रसादादिदं,
योऽत्रामुत्र हितावहस्तनुभृतां सर्वार्थसिद्धिप्रदः ।
येनानर्थकदर्थना निजमहःसामर्थ्यतो व्यर्थिता,
तस्मै कारुणिकाय धर्मविभवे भक्तिप्रणामोऽस्तु मे ।।६।। [१३१]

व्याख्या- *यस्य* धर्मविभवस्य *प्रसादात्* नैर्मल्यप्रसक्तिकृपोपकारात् *सचराचरं* जङ्गमस्थावर-समन्वितं *इदं* सर्वस्य स्वानुभवादिगम्यं *त्रैलोक्यं* त्रयो लोकाः समाहृता यस्मिन् तत् त्रैलोक्यं स्वर्गादि *विजयते* सुखादिप्रौढतां लभते । तथा *यो* धर्मविभवः *तनुभृतां* देहिनां *अत्रामुत्र* वर्तमानभवे भवान्तरे च *हितावहो* हितसुखप्रापकः सन् *सर्वार्थसिद्धिप्रदः* सर्वेषां कार्याणां स्वर्गमोक्षप्रभृतीनां सिद्धिर्निष्पत्तिस्तां प्रददातीति सर्वार्थसिद्धिप्रापकोऽस्ति । तथा *येन* धर्मविभवेन *निजमहस्सामर्थ्यतो निजं* स्वकीयं *महः* प्रतापः प्रभावो वा तद्रूपं *यत्सामर्थ्यं* शक्तिस्तेन, स्वाश्रितजीवानां *अनर्थकदर्थना* न अर्था *अनर्थाः* प्राणिनां वैरविरोधानिष्टादिभावास्तैः कृता या *कदर्थना* विडम्बनासमूहः सा *व्यर्थिता* निरसनेन निष्फलीकृता । *तस्मै* प्रोक्तरूपाय *कारुणिकाय* करुणापूरितस्वरूपाय *धर्मविभवे* धर्मैश्वर्याय *मे* मम *भक्तिप्रणामोऽस्तु भक्त्या* कृतः *प्रणामः* प्रणतिर्भवत्वित्यर्थः ।।६।।

श्रीदेवेन्द्रसूरिकृतश्राद्धदिनकृत्यटीकायां मूलदेवकथा-

अस्मिन् भरतेऽवन्त्याख्यो देशोऽस्ति । तत्र द्वादशयोजनायामा नवयोजनविस्तारा उज्जयिनी नगरी । तत्र रूपपात्रं कलाकुशला देवदत्ता पण्याङ्गना बहुधनापि अचलं सार्थवाहं दृष्ट्वा स्वं निःस्वं मन्यमाना तेन सह रमते । इतश्च पाटलीपुरे मूलदेवो नृपाङ्गजः सर्वकलावान् रूपवान् समग्रगुणयुक्तोऽपि द्यूतव्यसनदोषेण पित्राऽपमानितो नगराद्बहिर्निर्गत्य क्रमेण पृथिवीमतिक्रामन् उज्जयिनीपुरीं ययौ । तेन तत्र गुटिकादिप्रयोगेण निर्मितानेकरूपेण कलाभिः सर्वोऽपि पुरीजनो विस्मापितः । तेन तत्र सर्वजनान् तृणप्रायो मन्यमाना रूपवती देवदत्ता पण्याङ्गना श्रुता । एषा मया रञ्जनीयेति विचिन्त्य विवर्णमात्मानं वामनं च विधाय तद्गृहासन्नदेवतायतने गत्वा जगौ गीतम् । निशम्य तत् देवदत्ता चमच्चक्रे । ततस्तदाकारणार्थं कुब्जीं चेटीं प्रैषीत् । सा तत्र तं दृष्ट्वा

तत आगत्याऽवदत् स सुन्दरो न श्रौति इति तस्या अग्र उक्तम् । पुनः प्रैषीत् । सा गत्वा तं प्राह–स्वामिन्नः स्वामिनी देवदत्ता युष्मान्नाकारयति । सोऽनाकर्णितकं कृत्वा तथैव पुनर्गीतं चक्रे ।

पुनः प्रोक्तं तया । तदासाववादीत्–केयं तव स्वामिनी, देवदत्ता वेश्येति तयोक्ते, अहं वेश्यासङ्गं न करोमीत्यवादीत्सः । तयोक्तं न देवदत्ता पणाङ्गनासदृशी गुणागुणविदग्रणीर्वर्तते । एवमुक्ते सति पृष्टेऽ–चालीत् । तावता मुष्टिनाहत्य पृष्टे तां कुब्जीं सज्जीचकार । देवदत्तापि तं वृत्तान्तं विज्ञाय सविस्मया वरासनप्रदानादि स्वागतं तस्य व्याधात् । तदा वीणां वादयन् तत्रायातो वेणिकः देवदत्ताऽवदत् अविकला भव्या कला तव वर्तते । अथ वामनः किञ्चिद्धास्यं विधाय स्माह–कीदृश उज्जयिनी जनो भव्यः श्रुतः सम्प्रति दृश्यमानोऽस्ति । तयोक्तम्–कुतः ? सोऽवदत् सगर्भेयं वीणा । ततस्तां पाणिनादाय तन्त्रीगर्भगतं कचं कृष्ट्वा दर्शयामास । ततो वीणानादेन रञ्जिता चिन्तयति खेचरः किन्नरो वा गायनः इति । ततः कृताञ्जलि–सप्रश्रयं साऽभ्यधात्–स्वामिन् सद्यः स्वं रूपं दर्शय । ततः स्वाभाविकं रूपं चक्रे तेन ।

समग्रगुणनिधान ! तवागमनेनानुग्राह्याहं प्रत्यहं प्रत्यहम् इत्यवदद्देवदत्ता । तेन तथैव विदधे । मूलदेवो द्यूतव्यसनदूषितो सर्वं हारयामास । पश्चाद्गणिकया प्रोक्तम्–स्वामिन् द्यूतं मुञ्च । परं सोऽपि मोक्तुं न क्षमः । पश्चात् तस्या अग्रेऽक्कया प्रोक्तम्–धूर्ते ! निःस्वं मूलदेवं मुञ्च । अचलं निश्चलं स्वान्तं धनैर्धनदसंनिभं भज । साख्यन्न द्रव्यरक्ताहं किन्तु गुणानुरागिणी तेनैतां वार्तां मुञ्च । परीक्षार्थमिक्षुदण्ड–ग्रहणार्थमक्काचलपार्श्वे चेटीं प्रैषीत् । अचलपार्श्वे गत्वा तयोक्तम् । तेन इक्षुदण्डभृतं शकटं प्रेषितं तद्दृष्ट्वा तयोक्तम्–हे अम्बाऽहं किं हस्तिनी ? । तथैव मूलदेवोऽपि याचितः । स तु सरसा सरला आदावन्ते च ताश्छित्त्वा निस्त्वचीकृत्याङ्गुलमानखण्डानि कृत्वा तथैवैलाद्यैर्वासयित्वा मल्लकसम्पुटे क्षिप्त्वा देवदत्ताकृते प्रैषीत्तद्दृष्ट्वा साप्यवोचत्–मातर्निःस्वस्यापि विवेकं पश्य । तेन नातः परं वदेः । अक्काऽप्यूचे हे पुत्रि ! ते एष एव पतिर्भद्रङ्करो भवति ।

अथान्यदा नाटकेन नृपं चमत्कार्य देवदत्तया वरो न्यासीकृतः ततः कटप्रयोगेणाचलेनावगणितो मूलदेवो बेन्नातटं प्रति चलितोऽटव्यां पतितः । तावता कश्चिद्विप्रः समायातः स पृष्टः । तेनोक्तमटव्याः परतो वीरनिधानकं पुरं यास्यामि । मूलदेवेनोक्तमावां सार्थे व्रजिष्यावः । अवापतां व्रजन्तौ मध्याह्नसमये सरः । तत्र नीरेण मुखप्रक्षालनादिकं चक्रतुः । मूलदेवः पृथग् तरुतले उपविष्टः । विप्रस्तु अम्भः सिक्तान् सक्तूनेकोऽपि रङ्कवदत्तुं प्रवृत्तः । मूलदेवेनाचिन्ति–एषोऽदनं कृत्वा मंमापि किञ्चिदर्पयिष्यति । स त्वदनं कृत्वा मार्ग प्रस्थितः । प्राचालीद्राजपुत्रोऽपि श्वः प्रदास्यतीति चिन्तयन् । एवं दिनद्वयत्रयगमने सोऽटवीं ललङ्घ । द्विजोऽवोचदयं पन्थास्तव चिन्तितपुरे यास्यति । राजपुत्रेण स प्रोक्तः किं ते नाम ? । सोऽवदत् पैतृकं सीधडो लोककृतं निर्घृणशर्म इत्यभिधाद्वयं हृदि संस्थाप्याग्रे गच्छता एकस्मिन्नागते ग्रामे मूलदेवेन कुल्माषा गृहीताः । तान् लात्वा पुराद्यावन्निः सरति तावद् मुनिर्दृष्टः । तं वीक्ष्य अहो मे भाग्यमिति हृदि दध्यौ । ततो निर्दोषाः कुल्माषास्ते तस्मै प्रदत्ताः तं साधुं प्रतिलाभ्यानुमोदितवान् । धण्णाणं खु नराणं कुम्मासो हुंति हु पारणए । तावता तुष्टदेवतयोत्तरार्धेन वरं याचस्वेत्युक्ते पुनर्बभाण– मह देहि देवदत्तां दंति सहस्सं च रज्जं च ।

ततो बेन्नातटं प्राप । तत्र स्वप्ने पूर्णचन्द्रं मुखे प्रविशन्तं वीक्ष्य, तस्य प्रश्नार्थमारामिकमाराध्य, पुष्पाणि लात्वा उपाध्यायपार्श्वे प्राप्ते सति, सगौरवं स्नपयित्वा भोजयित्वा च तेनासौ स्वपुत्री पर्यणाययत् ।

तत उपाध्यायेनोक्तम्–तव सप्तमंदिनस्यान्ते राज्यं भावि । तदाऽपुत्रस्य राज्ञः पञ्चत्वभवनेन तस्य राज्यं जातम् । देवदत्तापि तत्रानीता । एकदा देवदत्ताप्रयोगेण उज्जयिन्या मूलदेवानयनार्थं राज्ञा अचलो निष्कासितः । मूलदेवविलोकनार्थं महासार्थेन पारसकूले गत्वा बहुपण्यं लात्वा भव्यं प्राभृतं लात्वाऽगान्नृ–पान्तिकम् । स च राज्ञा उपलक्षितः । न च तेन राजा । ततः सर्वपण्यविक्रये स धृतः राज्ञोक्तम्–मामुपलक्षयसि । तेनोक्तं रविवत्त्वां कोऽपि नोपलक्षयति ? । नृपेणोक्तम्–भक्तिवाक्यैरलं, चेज्जानासि तदा ब्रूहि । स वक्ति न स्फुटम् । तावता देवदत्ता कृतस्फारशृङ्गारा राट्गिरा तत्रागात् । तां समालोक्य स भीतः । तया भणितोऽचल ! स एष नृपात्मजः । ततस्तेन विलक्ष्यचितेन स्वागः सर्वोऽपि क्षामितः । स्वामिंस्तव वचनं विना उज्जयिनीपतिर्मम प्रवेशं न दास्यतीति विज्ञप्ते नृपेणोक्तम्–मया क्षान्त याहि मम वचसा जितशत्रुनृपः पुरीप्रवेशं दास्यति । स तत्रागतः । मूलदेवस्य राज्यं श्रुत्वा सिद्धडोऽपि तत्रायातः । तस्यापि ग्रामः प्रदत्त । तस्य क्रमेण स्वर्गमोक्षौ भविष्यतः ।

❋ ❋ ❋

**अथ धर्म कल्पवृक्षोपमानेन स्तौति–**

( मन्दाक्रान्तावृत्तम् )

प्राज्यं राज्यं सुभगदयिता नन्दना नन्दनानां,
रम्यं रूपं सरसकविताचातुरी सुस्वरत्वम् ।
नीरोगत्वं गुणपरिचयः सज्जनत्वं सुबुद्धिं,
किं नु ब्रूमः फलपरिणतिं धर्मकल्पद्रुमस्य ॥७॥ [१३२]

**व्याख्या–** नु वितर्के । *धर्मकल्पद्रुमस्य फलपरिणतिं किं नु ब्रूमः ।* प्रोक्तरूप*धर्म* एव *कल्पद्रुमः* सुरपादपः तस्य संबन्धिनीं *फलपरिणतिं* फलपरिपाकरूपां श्रेणिं वयं *किं नु ब्रूमः ?* कियज्जल्पामः ? कथयितुं न शक्नुमः, अतिप्रभूतत्वादितरकल्पवृक्षफलश्रेण्येकविधैव श्रूयते धर्मरूपस्य कल्पवृक्षस्य त्वनेकविधत्वेनानुभूयमानत्वादिति यावत् । तथाह–यतो धर्मा*द्राज्यं* चक्रवर्तित्वादि *प्राज्यं* प्रौढमेकच्छत्रं जायते । *सुभगदयिता सुभगा* सौभाग्यभूषितेष्टा *दयिता* इष्टा वल्लभा स्त्री भवति । *नन्दनानां* पुत्राणामपि *नन्दनाः* पुत्रा भवन्ति । *रूपं* शरीरसौन्दर्यं *रम्यं* जननयनरमणीयं प्राप्यते । *सरसकविताचातुरी सरसा* माधुर्यचमत्कारोत्पादिका *कविता* कवित्वकला *चातुरी* तस्यां नैपुण्यं जायते । *सुस्वरत्वं* कोकिलारुताधःकारी मधुरध्वनिर्भवति । *नीरोगत्वं* रोगरहितत्वं संपद्यते । *गुणपरिचयो गुणानां* गाम्भीर्यौदार्यशौर्यादीनां *परिचयः* सर्वतो वृद्धिः । *सज्जनत्वं* जगन्मैत्रत्वं । *सुबुद्धिं* सन्मतिं लभत इत्यर्थः ॥७॥

श्राद्धदिनकृत्ये सुबाहुकुमारख्यानकं –

अस्मिन् भरतक्षेत्रे हस्तिशीर्षनगरम् । तत्रादीनशत्रुनृपस्तस्य धारिणी राज्ञी । तयोः कियता कालेन सिंहस्वप्नसूचितः पुत्रो जातः । तस्य सर्वगुणसुन्दरत्वात्सुबाहु नाम दत्तम् । स पञ्चभिर्धात्रीभिः पाल्यमानो वर्धते । स कियता कालेनाध्यापकेनाध्यापितः । क्रमेण यौवनं प्राप्तः । पितृभ्यां वधूस्थानार्थ ५०० प्रासादकरणेन ५०० राजकन्याः पुष्पचूलाप्रमुखाः परिणायितः । सदापि विषयसुखं भुङ्क्ते । एकदा पुष्पकरण्डकोद्याने श्रीवीरे

समवसृते: गौतमेन पृष्टेऽस्य जीवेन प्राग्भवे हस्तिनागपुरे सूक्ष्मव्यवहारिगृहस्थेन तत्रागत: ५०० साधुपरिवृत: धर्मघोषाचार्यशिष्य: सुदत्तर्षि: प्रहृष्टेन विधिना मासक्षपणपारणे प्रतिलाभितो भोगफलं कर्मोपार्जितम् । तावता पञ्चादिव्यानि प्रकटीभूतानि । दुन्दुभि: १ चेलोत्क्षेप: २ हिरण्यवृष्टि: ३ पञ्चवर्णा पुष्पवृष्टि: ४ सुदानं सुदानमिति देववाणी ५ एवंविधानि पञ्च दिव्यानि जातानि । तदा तत्र मिलितराजादिबहुलोकै: प्रशंसित: । सूक्ष्मो व्यवहारी मृत्वा सौभाग्यादिगुणयुतोऽयं सुबाहुनामा जात: । भगवन्नयं चारित्रं लास्यतीति, गौतमेन पुन: पृष्टे लास्यतीत्यवादीद्वीर: ।

अथैकदा पौषधव्रतेऽष्टमतपसि परिणमति यत्र भगवान् विहरति ते ग्रामनगरराजाद्या धन्या इति चिन्तिते, सुबाहुना स्वबोधार्थमागतं वीरं वन्दित्वा पितरौ पृष्ट्वा व्रतं लास्यामीत्युक्तम् । तदा पितृभ्यां बहुविलापकरणेऽपि कथयति न स्थास्यामीति यतोऽनित्य: संसार: । मृत्योर्बालस्य वृद्धस्य यौवनस्थस्य नि:स्वस्य धनवत: कस्यापि चामोचकत्वात् । अहं युष्मत्पूर्वं पश्चाद्वा मरिष्यामीति न जानामि । विविधाधिव्याधिगृहं जर्जरगृहवद्विनाशिमृद्भाण्डवत्त्याज्यमेवेदं शरीरम् । स्त्रियो भोगाश्च त्याज्या एवेति युक्तिभि: पितरौ प्रबोध्यैकदिनराज्यं मानितम् । कृते राज्याभिषेके किं तुभ्यं ददामीति पित्रोक्ते, रजोहरणं पतद्ग्रहं च देहीत्युक्ते कुत्रिकापणाल्लक्षद्वयेन राज्ञा ते आनायिते । ततो गन्धोदकस्नानादिविधिना १०० स्तम्भपाञ्चालिकायुतायां सहस्रपुंवाह्यशिबिकायामारुह्य अग्रेसराष्टशतहयगजरथादिमहाविस्तरेण गत्वा श्रीवीरपार्श्वे प्रव्रजित: । तत: सुबाहु: षष्टाष्टमादितपा एकादशाङ्गवित् मृत्वा सौधर्मे १ । ततोऽसौ मनुष्ये २ सनत्कुमारे ३ मनुष्ये ४ ब्रह्मणि ५ मनुष्ये ६ शुक्रे ७ मनुष्ये ८ आनते ९ मनुष्ये १० आरणे ११ मनुष्ये १२ सर्वार्थे १३ विदेहे मनुष्ये दानात् १४ भवेषु मोक्षं यास्यतीति ।

❋ ❋ ❋

**अथ धर्मस्वायातभावनां गेयपद्याष्टकेन विभावयन्नाह–**

पालय पालय रे पालय मां जिनधर्म ! ।
मङ्गलकमलाकेलिनिकेतन ! करुणाकेतन ! धीर !।
शिवसुखसाधन ! भवभयबाधन ! जगदाधार ! गम्भीर ! पा० ।।१।। [१३३]

**व्याख्या– हे *जिनधर्म* ! *जिनै*रर्हद्भिश्चतुर्ज्ञानवद्भिस्तद्भवेऽवश्यं सिद्धितव्यं जानद्भि: स्वयं समाचरित: समाचरणाच्च सर्वज्ञ: सर्वदर्शी च भूत्वा सर्वाङ्गैर्वेदित: परोपकाराय प्रख्यापितो *धर्मो* जिनधर्म: तत्सम्बोधनं हे जिनधर्म ! । हे *मङ्गलकमलाकेलिनिकेतन !* मङ्गलानि स्वेष्टप्राप्तिहेतवो महोत्सवाश्च तद्रूपा या *कमला* महालक्ष्मीस्तस्या या: *केलय:* सुखविलासास्तासां *निकेतनं* क्रीडासद्म तत्संबोधनं । हे *करुणाकेतन*स्वरूप !। हे *धीर* ! हे अविचलितैकपरोपकाररूप !। हे *शिवसुखसाधन !* हे मोक्षमहानन्दनिष्पादनप्रवीण !। हे *भवभयबाधन* ! हे जन्मजरामरणदुर्गत्यादिभीतिनिवारण !। हे *जगदाधार !* हे त्रिभुवनवासिजनानां शरणागतवत्सल !। हे *गम्भीर* ! हे अगाधमहिमसागर !। *मां* स्वसेवकं *पालय पालय पालय* रक्ष समुद्धर मोक्षमन्दिरं प्रापयेत्यर्थ: ।।१।।**

रावणवृत्तं वाच्यं यथा उपदेशप्रासादे–

प्रबुद्धो प्रतिवासुदेवो रावणो नित्यं शान्तिजिनभक्तिं चकार । अन्यदा स दशवदनः पुष्पकविमानमारुह्य मन्दोदरीभार्यया सहाष्टापदतीर्थेऽगात् । तत्र भरतभूपकारितचतुर्मुखप्रासादे वीणां करे कृत्वा द्रव्यपूजानन्तरं भावपूजां व्यतनोत् । इतश्च तत्रागतनागेन्द्रदेवश्चतुर्विंशतिजिनान्नमस्कृत्योपविष्टः । तं प्रति तीर्थस्वरूपं पृष्टम् । फणिपतिनाऽप्यष्टापदमाहात्म्यं निगदितम् । तत्समये महता हर्षभरेण मन्दोदरी नृत्यं ततान । इतश्च वीणातन्त्र्येका त्रुटिता तदा प्रत्यर्धचक्रिणा चिन्तिम्–अहो ! अत्र नृत्यसमयेऽस्या भावभङ्गो मा भूत् इति झटिति स्वहस्ततो नाडिकाऽऽकृष्य वीणायां संयोजिता । तेन नृत्यमधिकं शुशुभे । देवैः पुष्पवृष्टिः कृता । पुनः पुनस्ते प्रशंसां चक्रिरे । तत्समये भावमग्नेन रावणेन तीर्थकृत्कर्म समुपार्जितम् ।

❋ ❋ ❋

सिञ्चति पयसा जलधरपटली भूतलममृतमयेन ।
सूर्याचन्द्रमसावुदयेते तव महिमातिशयेन, पा० ॥२॥ [१३४]

व्याख्या– हे श्रीजिनधर्म ! *तव* भवतो *महिमातिशयेन* सर्वातिशायिप्रभावेण *जलधरपटली* समुन्नतमेघमण्डली *अमृतमयेन* एकेन्द्रियादिसर्वस्य सजीवनतादायिमधुररसमयेन *पयसा* जलेन कृत्वा *भूतलं* पृथ्वीमण्डलं । *सिञ्चति* जलप्रवाहेण बीजोद्गमादियोग्यत्वेन सरसं करोति । तथा *सूर्याचन्द्रमसौ* जगच्चक्षूभूष्तौ रविविधू *उदयेते* प्रतिदिनमुद्गच्छतः । अत्र सूर्याचन्द्रमसावुदयेते इति प्रोक्तं, प्रागपि तृतीयश्लोके भावनायामप्युक्तं "यस्य प्रभावात्पुष्पदन्तौ विश्वोपकाराय सदोदयेते" इति, तथाप्यत्र पुनरुक्तदोषो न, क्रमेणोपदेशस्तुतिरूपाभ्यामुक्तत्वादित्यर्थः ॥२॥

❋ ❋ ❋

निरालम्बमियमसदाधारा तिष्ठति वसुधा येन ।
तं विश्वस्थितिमूलस्तम्भं तं सेवे विनयेन, पा० ॥३॥ [१३५]

व्याख्या– *येन* धर्ममहिम्ना *इयं* सचराचरपदार्थसार्थैः प्रत्यक्षा *वसुधा* पृथिवी *असदाधारा असन्* अविद्यमान *आधारो*ऽधस्तात्स्तम्भाद्याश्रयो यस्याः सा तथा, अधस्ताद्धारकेण रहितेति यावत् । *निरालम्बं* निर्गतो नैवास्ति *आलम्ब* उपरिष्टान्निबिडरज्ज्वादिसमाकर्षको यत्र तन्निरालम्बं यथा स्यात्तथा *तिष्ठति,* गगनमात्रस्था वर्तते, न शेषनागेन धृता, नैव सूर्येण समाकर्षिता, तथा स्वीकारेऽनवस्थादिदोषा दुर्निवारा भवेयुः । यथा शेषस्य क आधारः सूर्यस्य च कः समाकर्षकः ? इत्याद्यन्ते गगनस्थैवापततीति यावत् । अतस्तमनादितः सर्वकालं यावत् *विश्वस्थितिमूलस्तम्भं* समग्रत्रैलोक्यमर्यादाया मूलस्तम्भः स्थितिप्रतिष्ठा–स्थैर्यायादिस्थूणा *तं* धर्मप्रभावं स्वीकुरु । *तं* धर्मं *विनयेन* कार्यान्तरवर्जनैकाग्र्येण प्रणतिपुरस्सरं *सेवे*ऽ–हमित्यर्थः ॥३॥

❋ ❋ ❋

दानशीलशुभभावतपोमुखचरितार्थीकृतलोकः ।
शरणस्मरणकृतामिह भविनां दूरीकृतभयशोकः, पा० ॥४॥ [१३६]

व्याख्या– *दानशीलशुभभावतपोमुखचरितार्थीकृतलोकः* दानादिप्रकारैः कृतार्थीकृता लोका येन तथा, *शरणस्मरणकृतां भविनां* धर्मस्य शरणस्मरणकारिणां भव्यानां, येन *इह* विद्यमानभवेऽपि *दूरीकृतभयशोकः* दूरीकृता अभावं प्रापिता *भयानि* सप्तविधानि, *शोका* इष्टवियोगादिजा येन स तथेत्यर्थः ।।४।।

वाच्या दानादिकुलकोक्ता जीवानन्दवैद्यकथा –

ऋषभदेवजीवो नवमभवे जम्बूद्वीपे विदेहक्षेत्रमण्डने क्षितिप्रतिष्ठितपुरे सत्कर्मकर्मठः सुविधेर्वैद्यस्य जीवानन्द इति नाम्ना सूनुर्बभूव, तन्नगराधीशेशानचन्द्रस्य राज्ञः कान्तायां कनकवत्यां जातो महीधरनामा पुत्रोऽस्ति १, तत्रैव नगरे सुनासीरस्य मन्त्रिणो लक्ष्म्यां पत्न्यां जातः सुबुद्धिनामा मन्त्रिपुत्रोऽस्ति २, तत्रैव नगरे धन्यश्रेष्ठिपत्न्यां शीलवत्यां जातो गुणाकरनामापुत्रोऽस्ति ३, तत्रैव नगरे सार्थपतेः सागरदत्तस्याभयमत्यां पत्न्यां जातः पूर्णभद्र इति नामा पुत्रोऽस्ति ४, तत्रैव नगरे ईश्वरदत्तस्य श्रेष्ठिनः केशवनामा सुतोऽस्ति ५, एतेषां पञ्चानामपि समानगुणशालिनां जीवानन्देन वैद्येन समं मैत्र्यमभूत, एकस्मिन् दिने ते पञ्चापि मित्राणि वैद्यगृहे सङ्गताः क्रीडन्ति स्म, तावता कश्चित्साधुर्माधुकरीं भिक्षां कुर्वंस्तेषां नेत्रपथं ययौ, तं कुष्ठिनं साधुं वीक्ष्य महीधरो राजपुत्रो जीवानन्दं वैद्यपुत्रं तिरस्करोति, यथा भिषजां जन्म धिगस्तु, य लोभग्रहग्रस्ता धनान्धितधियो धनिनामेव प्रतिक्रियां कुर्वन्ति, न चेदृशां साधूनामुपकारं कुर्वन्ति, एतद्वचनं श्रुत्वा जीवानन्दो जगाद, हे राजेन्दुनन्दन ! त्वं युवापि वृद्धबुद्धिर्वर्तसे, त्वया युक्तमुक्तं, परं कथं क्रियते वैयावृत्यम् ? वस्तुत्रयं प्रत्येकं दीनारलक्षेण लभ्यते, तेषु वस्तुषु लक्षपाकाख्यं तैलं मद्गृहेऽस्त्येव, परं गोशीर्षचन्दनं रत्नकम्बलं च नास्ति ।

एतद्वैद्यवचनं श्रुत्वा ते पञ्चापि मित्राणि हट्टश्रेण्यां गत्वा कश्चिन्महेभ्यश्रेष्ठिनमूचिरे, भोः श्रेष्ठिन् ! दीनारलक्षाभ्यां गोशीर्षचन्दनं रत्नकम्बलं च देहि । श्रेष्ठिनोक्तं भो कुमारकाः ! आभ्यां भवन्तः किं कर्तुमिच्छवः ? तैरुक्तं रोगिणो मुनेश्चिकित्सां कर्तुकामा वर्तामहे, तेषां कुमाराणामेतद्वचनं श्रुत्वा विस्मयस्मेरमानसः श्रेष्ठी सादरं जगाद, भोः कुमारकाः ! यूयं धन्याः, ये कुष्ठरोगाभिभूतस्य मुनेर्वैयावृत्यं कुरुथ, मुनेर्वैयावृत्यं राज्येनापि न लभ्यते, यतः पुण्यनिदानानि धनानि कोटिशः सन्ति, तानि सर्वाणि दानान्यारोग्यदानस्य समानतां न लभन्ते, भो कुमारकाः ! तस्मात्कारणाद्यूयं मूल्यं विनैवौषधं गृह्णीत । इत्युक्त्वा श्रेष्ठी रत्नकम्बलचन्दने तेभ्यः समर्पयामास । ततस्ते कुमारकाः शुभशकुनैः प्रेर्यमाणा जीवानन्देन वैद्येन समं मुनेरनुपदं ययुः । स साधुर्न्यग्रोधभूरुहाधोभागे बाह्योद्याने गत्वा ध्याने तस्थौ । ततो वैद्यपुत्रो जीवानन्दो मुनिमनुज्ञाप्य सर्वेषां पश्यतां तेनौषधेन चिकित्सां करोति, तावदादौ मुनिवपुस्तैलेनाभ्यज्ञ्य रत्नकम्बलमवेष्टयत्, तैलतापेन व्याकुलास्तन्मुनिशरीरान्निःसृताः कृमयः शीतलत्वाद्रत्नकम्बले व्यलगन्, ततस्तान् कृमीन् मृतकगोकलेवरे दयापरो जीवानन्दः पातयामास, ततो गोश्शीर्षचन्दनस्पन्दैः शीतलैः शमिनस्तापं शमयामास, एवं त्रीन् वारान् विधाय मांसास्थिगतान् जीवान्निष्कास्य जीवानन्दो गोशबे पातयामास, कैश्चिद्दिनैः साधुश्चामीकर–समच्छविर्जातः, तैः क्षमितो नववपुः स साधुः स्वस्थचित्तो विहारायान्यत्र ययौ, श्रेष्ठ्यपि भैषज्यदान–प्रभाववैभवात्तस्मिन्नेव भवेऽन्तकृत्केवली भूत्वा मोक्षं ययौ । ते कुमाराः शेषकम्बलगोशीर्षचन्दने विक्रीय तैः

काञ्चनैः स्वेन लक्षद्वयेन च सम्यग् जिनप्रासादं कारयामासुः । कियता कालेन संयमं प्राप्य सम्यग्भावनां भावयन्तस्ते षडप्यच्युते कल्पे द्वात्रिंशत्सागरायुषस्त्रिदशश्रियं शिश्रियुः ।

❋ ❋ ❋

क्षमासत्यसन्तोषदयादिकसुभगसकलपरिवारः ।
देवासुरनरपूजितशासनकृतबहुभवपरिहारः, पा० ॥५॥ [१३७]

व्याख्या- यस्य जिनधर्मस्य *क्षमादि*दशप्रकाररूपो जननीजनकादिरूपभुवनप्रसिद्धो *दयादिकः* करुणौदार्यशौर्यधैर्यादिरूपश्च *सुभगः* सकलजगज्जनेष्टः, *सकलपरिवारः* समग्रोऽपि स्वजनवर्गप्रकारो वर्तते स तथा । *देवासुरनरपूजितशासनदेवा* वैमानिकज्योतिष्काः, *असुरा* भवनपतिव्यन्तराः, *नरा* विद्याधरचक्रवर्ति-वासुदेवादिमनुष्यास्तैः *पूजितं* बहुमानपुरस्सरं स्वीकृतं *शासन*माज्ञा यस्य धर्मस्य तस्य संबोधनं एवं सर्वत्र तस्मात्तेषां *शासनकारिणां कृतबहुभवपरिहारः कृतं* रचितं *बहुनाम*-संख्येयानन्तादित्वेनापरिमितानां *भवानां* जन्मपरम्पराणां *परिहारो*ऽभावो येन स तथेत्यर्थः ॥५॥

❋ ❋ ❋

बन्धुरबन्धुजनस्य दिवानिशमसहायस्य सहायः ।
भ्राम्यति भीमे भवगहनेऽङ्गी, त्वां बान्धवमपहाय, पा० ॥६॥ [१३८]

व्याख्या- हे श्रीजिनधर्म ! त्वं *अबन्धुजनस्य बन्धुः* न विद्यते बन्धुः सहोदरादिपरिवारो यस्य स एव जनो मनुष्यस्तस्य परिवाररहितस्य बन्धुस्त्वं परिवारोऽसि । तथा त्वं *असहायस्य दिवानिशं सहायः* न विद्यन्ते सहायाः सहचारिणो यस्य तस्य त्वं *दिवानिशं* सदैवाहर्निशं *सहायः* सर्वत्र सहचार्यसि । तथा हे धर्म! *अङ्गी* प्राणी *त्वां* भवन्तं *बान्धवं* स्वकीयजनसमूहं *अपहाय* परिहृत्य स निराधारोऽङ्गी *भीमे* महाभयानके *भवगहने* भवारण्ये *भ्राम्यति* चतुर्गतिषु पर्यटतीत्यर्थः ॥६॥

दृश्या दामन्नककथा यथा उपपदेशप्रासादे –

गजपुरे सुनन्दाह्व एकः कुलपुत्रोऽभूत् । तस्य जिनदासश्राद्धेन सह मैत्री जाता । तदन्तिके प्रत्यहं प्रत्याख्यानमाहात्म्यं शृणोति । एकदा श्राद्धेन गुरुसमीपे स नीतः । गुरुणाऽनागतादिप्रत्याख्यानस्वरूपं तत्फलं च वर्णितम् । तन्निशम्य सुनन्दो मांसमद्यभक्षणप्रत्याख्यानं भावेन जग्राह । अन्यदा महति दुर्भिक्षे सर्वत्र प्रसृते षष्ठारकवत्सर्वोऽपि जनो मांसभक्षणतत्परः प्रायोऽजनि । तदा क्षुधापीडितैः स्वजनैरुपालम्भपूर्वकं कथञ्चित्तस्य श्यालकेन समं मत्स्यग्रहणार्थं ह्रदेऽनीयत सः । ततः सुनन्दो जले जालं चिक्षेप, मत्स्यान् प्रेक्ष्य मुञ्चति । तदा भावुकः प्राह–रे मद्भगिनीपते ! त्वं तन्मुण्डकवाक्यजाले पतितः कथं कलत्रादीन् दुःखजालतः कर्षिष्यसि ? तव दयार्द्रत्वं दृष्टं, दिनद्वये जातेऽप्येकोऽपि मत्स्यो नागात् । स प्राह–किं करोमि ? अस्याभ्यासो मया कदाऽपि न कृतः । ततः स शिक्षयति, परं स्वचित्ते धर्मनैर्मल्यं नामुञ्चत् । तृतीयेऽह्नि त्वेकस्य झषस्य पक्षं त्रुटितं वीक्ष्य शोकार्तः स्वजनान् जगाद–अहं तु जातुचिद्धिंसां न कुर्वे । इत्युदित्वा तेनादीनमनसा निरवशेषं प्रत्याख्यानमनशनं च विहितम् ।

ततो राजगृहे मणिकारश्रेष्ठिवेश्मनि सुतत्वेनोत्पन्नः । पितृभ्यां दामन्नक इति नाम स्थापितम् । क्रमादष्टवर्षप्रमाणे जाते सति मार्युपद्रवेण तस्य सर्वकुलं विनष्टम् । तद्भयेन भीतो हर्म्यान्नष्टः, अन्यत्र

भ्राम्यन् सागरपोतश्रेष्ठिगृहेऽगात् । तत्र दास्यकर्म कृत्वा प्राणवृत्तिं विदधे । अन्यदा तत्र साधुयुगलमागतं, तयोर्ज्येष्ठस्तु सामुद्रिकशास्त्रदक्षस्तं दामन्नकं वीक्ष्य द्वितीयं मुनिं स्माह–असौ दासो वृद्धिं प्राप्तः खल्वस्य गृहस्य स्वामी भविता । तत्सर्वं कुड्यान्तरस्थितेन श्रेष्ठिना श्रुतम् । वज्राहत इवोत्पन्नविषाद इति दध्यौ–नूनमद्यैवैनं शिशुं केनचिदुपायेन मारयामि । बीजे नष्टेऽङ्कुरस्योद्भवः कुतो भावी ? । इति ध्यात्वा सागरश्रेष्ठी मोदकैस्तं बालं प्रलोभ्य श्वपचपाटके प्रेषितवान् । तत्रैको मातङ्गोऽर्थदानैर्वशीकृतः स तद्वधाय समादिष्टः, अभिज्ञानं च याचितं श्रेष्ठिना । अथ तं बालं मृगार्भकमिव मुग्धं वीक्ष्य संजातकरुणः स श्वपाकस्तत्कनिष्ठाङ्गुलिं छित्त्वा तमिदं वचः प्रत्यूचे–अरे मुग्ध ! यदि जीवितुमिच्छसि तर्हि द्रुतमितो नंष्ट्वा गच्छ । तन्निशम्य कम्पमानाङ्गस्ततो नश्यन् झटित्येव क्रमेण यत्र सागरश्रेष्ठिनो गोकुलमस्ति तद्ग्रामं प्राप ।

गोकुलरक्षकेण नयान्वितां तस्य चेष्टां वीक्ष्य पुत्रत्वेन विधाय रक्षितः । क्रमेण यौवनं प्राप । अन्यदा सागरश्रेष्ठी गोकुले याति स्म । तत्र च्छिन्नाङ्गुल्योपलक्षितं दामन्नकं निरीक्ष्य तत्समये सद्यः कस्यचित्कार्यस्य मिषं विधाय गोकुलपालकमापृच्छ्य श्रेष्ठी स्वपुत्रोपरि लेखं लिखित्वा तस्मै दामन्नकाय दत्त्वा प्रैषयत् । स तं लात्वा द्रुतं राजगृहं ययौ । तत्पुरोद्याने स्मरदेवकुले स श्रान्तो विशश्राम, सद्यो निद्रां प्राप । इतश्च सागरपुत्री विषानाम्नी वरार्थिनी तद्देवकुलेऽगमत् । तत्र दामन्नकपार्श्वे तातमुद्रया मुद्रितं तं लेखमालोक्य सद्यो लघुहस्ता तमाददौ । तं लेखं विमुद्र्येत्यवाचयत्–स्वस्तिश्रीगोकुलात् श्रेष्ठिसागरदत्तः समुद्रदत्तं पुत्रं सस्नेहमित्यादिशति–अधौतपादस्यास्य पुरा हे वत्स ! विषं प्रदीयताम्, अत्रार्थे संशयो न कार्य इति वाचयित्वाऽञ्जनशलाकया बिन्दुं विषंशब्दे विषां इत्यकरोत्, तद्रूपमोहिता स्वनाम न्यधात् । ततो मुद्रयित्वा सा स्वगेहे मुदा समागमत् । प्रबुद्धः सोऽपि गत्वा श्रेष्ठिसुताय लेखमार्पयत् । सोऽपि लेखं वाचयित्वा हृष्टस्तात्कालिकलग्नेन महताऽऽडम्बरेण तेन सर्वसमक्षं स्वभगिनी विषानाम्नी दत्ता । स तया समं सुखं व्यलसत् ।

ततो गोष्ठात्सागरोऽगात् गृहम् । तन्निशम्य विषण्णो दध्यौ–अहो ! चिन्तितमन्यथा जातम्, अधुना तु जामाता जातस्तथापि प्रपञ्चं विधाय मारयामि, पुत्रीवैधव्यं भविता तद्वरं, परंतु वैरी वृद्धिं प्राप्तस्तन्न चारु । इति ध्यात्वा तं श्वपाकं प्राह–अरे ! तदा त्वया तदभिज्ञानं प्रदर्श्याहं वञ्चितः, तन्नार्हम् । सोऽवक्–इदानीं दर्शय, अवश्यं तं हन्मि । अथ श्रेष्ठी तद्घातसङ्केतं मातृकादेवीगृहे दत्त्वा स्ववेश्मन्येत्य जामातरं प्राह–हे वत्स ! त्वं स्वपत्न्या सह मातृकादेवीप्रासादे पूजार्थं व्रज, यत्प्रसादाद्दम्पतिकुशलं स्यात् । अथ सूर्यास्तसमये तौ तदर्चार्थं प्रचेलतुः । मार्गान्तराले सागरसुतो मिलितः, तेनोक्तम्–कोऽयं प्रथमं पूजायाः समयः, यतः प्रदोषो बहुदोषः, आसन्नप्रवर्धमानतमोभरत्वात् इत्युक्त्वा तौ तत्र संस्थाप्य स्वयं गतः पूजार्थम् । तदन्तः प्रविशन् पूर्वश्रेष्ठिसङ्केतितश्वपाकेन भ्रान्त्या हतो दुर्गाया बलिं कर्तुमिवाग्रत आत्मजो मृतः । तदाकर्ण्य सागरो वक्षःस्फोटेन पञ्चत्वमाप । राजादिभिस्तद्गृहस्वामी दामन्नकः कृतः । एकदा पश्चाद्रात्रौ मङ्गलपाठकमुखत एकामिमां गाथां शुश्राव–

अणुपुखमावहंतावि आवया तस्स संपया हुंति ।
सुहदुक्खकय पुडओ जस्स कयंतो वहइ पक्खं ॥

त्रिवाराँश्छ्रुत्वा त्रिलक्षदानं तस्मै ददौ । तत्प्रयोजनं नृपेण पृष्टम् । दामन्नकः सर्वं प्राक्चरित्रं

जगाद । ततो ज्ञानिगुरुसंयोगमवाप्य पुराभवकृतप्रत्याख्यानफलं सम्यगवबुध्य जातिस्मृत्या च विशेषेण धर्मतत्परो बभूव । ततो देवलोकसुखं प्राप्य क्रमाद्विदेहे सिद्धिं प्रापस्यति ।

❋ ❋ ❋

**द्रङ्गति गहनं जलति कृशानुः स्थलति जलधिरचिरेण ।**
**तव कृपयाखिलकामितसिद्धिर्बहुना किं नु परेण ! पा० ।।७।। [१३९]**

**व्याख्या– हे श्रीजिनधर्म ! *तव कृपया* भवतः संबन्धिनी या *कृपा* जनोपरि सानुकूलदृष्टिपातरूपा करुणा तया हेतुभूतया, जनस्य *गहनं* श्वापदाकीर्णं वनं *द्रङ्गति* समृद्धनगरायते । *कृशानुः* वनदवाग्निरपि *जलति* नीरायते । *जलधिः* समुद्रोऽपि *अचिरेण* शीघ्रतया *स्थलति* स्वाभाविकनिर्जलभूमिभागायते । *अखिलकामितसिद्धिः* सकलसमीहितस्य *सिद्धिर्*निष्पत्तिस्तव प्रसादात्संपद्यते । तर्हि हे श्रीजिनधर्म ! त्वां विना *बहुना* प्रभूतेनापि *परेण* धनकुटुम्बविषयसुखादिना *किं नु* अस्माकं किं प्रयोजनमस्ति? न किमपीत्यर्थः ।।७।।**

उक्तं कथारत्नाकरे सीतापरिक्षावृत्तं–

अखर्वगर्वपर्वताऽधिरूढत्वेन सदैवोन्नतकन्धरं दशकन्धरं निहत्य निजप्राणप्रियामादाय च श्रीरामोऽयोध्यां प्रविशति स्म । अन्यदा प्रादुर्भूतप्रभूतसद्भूतस्पर्धाभिः सपत्नीभिः कपटेन कारितराव–णचरणाऽर्चनदर्शनत उदीरिताऽऽमर्षदोषवशतश्च कपितः श्रीरामोऽष्टापदतीर्थयात्रायामुत्पन्नदोहदां गुर्विणीं सतीमपि सीतां कृतान्तवदनसारथिना तीर्थयात्राकरणमिषेण महाभीमायां सिंहनादयुतायामटव्याममूमुचत् । सा सती अकस्माद्विद्युत्पातादपि मरणादपि चैतद्दुःखं दुस्सहतरं मन्यमाना मूर्च्छिता शीतलतमवनवातैश्च लब्धसंज्ञा गाढं रुरोद । तदा च तत्र गजग्रहणाय समागतः श्रावकः पुण्डरीकपुराधीशो वज्रजङ्घाभिधो राजा गाढं तस्या आक्रन्दनमाकर्ण्य स्वसेवकानिति वदति स्म । यदियं राजपत्नी राजपुत्री सती गर्भवती कापि विलासवती रोदिति, किञ्चाऽस्या उदरें दारकद्वयमस्तीति किञ्च राजसुता, किञ्च कस्यापि महाराजस्य प्रेयसी, किञ्च आसन्नप्रसवा सुलोचना भृशमशर्म दधती रोदिति इति स्वस्वामिनाभिहितस्वरूपां तां दिदृक्षूनागच्छतां ( त ) स्तत्सेवकान्निरीक्ष्य सा सतीमतल्लिका मा माममी स्पृशन्त्वितिधिया प्रागेवा–भरणानित्यजन्ती मा भैषीरिति तैरभाषि । तेषु तत्सेवकेष्वेवं वदत्सु वज्रजङ्घोऽपि तत्र सपद्येव समुपेयिवान् ।

हे भगिनि ! श्रावकोऽहं तेन मदग्रे वद, काऽसि त्वम् ? कस्याऽऽत्मजा ? कस्य प्रियतमा चेति । तेनेति पृष्टा सा रहसि कस्यापि पुरस्त्वया न वाच्यमित्यभिधाय यथाजातं सर्वमात्मनः स्वरूपं जगाद । स्वसृत्वेन तेनाऽङ्गीकृता तद्वेश्मनि समेता सा शुभेऽहनि मदनाङ्कुशलवणाङ्कुशनामानौ द्वौ सुतौ प्रसूते स्म । अथैतौ सिद्धार्थनाम्नः सिद्धपुत्रस्य समीपे द्वासप्ततिकलाः कलयतः स्म । क्रमेण तौ कामकेलिवनं यौवनं प्राप्तौ । आद्य श्रीवज्रजङ्घराजस्य सुताः परिणीतवान् । अज्ञातवंशस्य पुत्री न देयेति नारदेन कोपितस्य, रामसुतोऽयमिति च नारदेनैव तोषितस्य पृथोः क्ष्मापस्य सुता अपरः पर्यणैषीत् । अथ तौ बलप्रबलबलौ दिग्विजयं विदधानो क्रमेणाऽयोध्यां राजधानीं रूरुधतुः । राम–लक्ष्मणावपि ताभ्यां समं संग्रामं चक्रतुः । एतौ सीताप्रसूतौ श्रीरामसुताविति नारदेन भेदं नीता बिभीषणभामण्डलादय उदासीना एवाऽवतस्थिरे । तदा च हल–मुशल–चक्रेषु शस्त्रेषु मुधा जातेषु किं वासुदेवबलदेवाविमाविति विषादमापन्नं श्रीराममेतौ भवत्सुतौ, को

हर्षस्थाने विषाद इति नारदो जगाद । अथ तौ द्वौ भ्रातरौ पितृ--पितृव्याभ्यां सङ्गतौ । सर्वेऽप्यमी सङ्गताः परां प्रीतिमापुः । अस्मिन्नवसरे तत्र स्थिता सती सीतापीति दृष्ट्वा स्वयं पुण्डरीकपुरं ययौ । लोकोत्तरेण दिव्येन सकललोकसाक्षिकं शुद्धामेव सीतामहमङ्गीकरिष्यामीति प्रबलप्रतिज्ञापरेण रामेण प्रहिता बिभीषणभामण्डलादयो विहितदिव्यैवाहमयोध्यामेष्यामीति दृढनियमप्रह्वां तामयोध्यामानयन्ति स्म ।

सुप्रपञ्चां पञ्चशतकोदण्डदीर्घां सार्धद्विशतधनुर्विस्तारां सार्धद्विचापनिम्नां सुविकसितकिंशुक--शुकमुख--गुञ्जार्ध--जपापुष्प--हिङ्गुलपटलतिरस्कारकारिभिरङ्गारैः परितः पूर्णां खातिकामवगाहयितुमुद्यता सा सीता सती तदभ्यर्णमागत्येदमवादीत्--

मनसि वचसि काये जागरे स्वप्नमार्गे, यदि मम पतिभावो राघवादन्यपुंसि ।
तदिह दह शरीरं मामकं पावकेदं, सुकृतविकृतिभाजां प्राणिनां त्वं हि साक्षी ।।

तदा चोत्पन्नकेवलज्ञानस्यानन्तवीर्यस्य साधोः केवलमहिमोत्सवकरणार्थं गच्छता पुरन्दरेण प्रेषितस्य हरिणैगमेषिणः साहाय्येन सीता तां खातिकां पुष्पकरपूर्णां पुष्करिणीमिवाऽवगाहते स्म । तदा च त्रिदशैस्तस्याः शिरसि पुष्पप्रकरवृष्टिं कृताम् ।

इति देवैर्वन्दिता पूजिता संस्तुता सीता रामचन्द्रं भणति, हे स्वामिन् ! यदि निष्कलङ्काप्यहं लोकापवादभीरुणा त्वया सर्पेण निर्मोक इव त्यक्ता, तदा दुरन्तकर्मकातरया मयापि, देवपादा मुमुचिरे । इति प्राणपतिमभिधाय जनकात्मजा सत्वरमेव प्राव्राजीत् ।

❋ ❋ ❋

### ईह यच्छसि सुखमुदितदशाङ्गं, प्रेत्येन्द्रादिपदानि ।
### क्रमतो ज्ञानादीनि च वितरसि निःश्रेयससुखदानि, पा० ।।८।। [१४०]

**व्याख्या- हे धर्म ! त्वमेव जनानां *इह* वर्तमानभवे *उदितदशाङ्गं सुखं उदितानि* वृद्धिं प्राप्तानि *दशाङ्गानि* धनारोग्याविकलेन्द्रियादिदशविधसाधनानि यत्र तत्तादृशं *सुखं* शर्म *यच्छसि* ददासि । *प्रेत्य* जन्मान्तरे *इन्द्रादिपदानि* इन्द्राहमिन्द्रलोकान्तिकादीनि *यच्छसि । च* पुनः *क्रमतः* क्रमेण सुरनरभव--परम्परया । *निःश्रेयससुखदानि* परिपूर्णत्वेन मोक्षसुखसंपादकानि *ज्ञानादीनि* सर्वज्ञत्वसर्वदर्शित्वादीनि *वितरसि* ददासीत्यर्थः ।।८।।**

धनसार्थवाहचरित्रं दर्शनीयं यथा दानादिकुलक टीकायां –

प्रत्यग्विदेहेषु क्ष्मामुकुटोपमं क्षितिप्रतिष्ठितं नाम पुरमस्ति । तस्मिन्नगरे समस्तराजमण्डलीसेव्यमानचरणः क्षत्रशिरोमणिः प्रसन्नचन्द्रनामा राजास्ति, तत्र पुरे लक्ष्मीनिवासभवनं धननामा सार्थवाहोऽस्ति । सोऽन्यदा वसन्तपुरे नगरे व्यवहारार्थं गन्तुमना यात्रार्थिनः समाह्वातुं डिण्डिमं वादयामास । भो भो लोकाः ! अशम्बलस्य शम्बलम्, अछत्रस्य छत्रकम्, अवाहनस्य वाहनं, तथा यस्य यद्विलोक्यते तस्य तद्ददामि, क्षेमेण वसन्तपुरं प्रापयामि चेति । ततः सुमुहूर्ते सुलग्ने मङ्गलध्वनिपूर्वकं शिरसाक्षतान् बिभ्रन् पुरीपरीसरावनौ पटकुट्यां कृतावासः स तस्थौ । अत्रान्तरे वसन्तपुरं गन्तुकामं श्रीधर्मघोषमुनीश्वरं समालोक्य सार्थवाहस्तं पृच्छति स्म, भो मुनयो यूयं किमर्थमत्रागताः ? वाचंयमशिरोमणिस्तमुवाच, भो सार्थेश ! त्वया समं वयं वसन्तपुरपत्तनं समेष्यामः । सार्थवाहेनोक्तं पादाववधार्यतां, भवतां च यत्किञ्चिदाहारादिकं विलोक्यते तद्याचनीयम् ।

अत्रान्तरे केनचित्पुरुषेण सार्थवाहपुरतो रसालफलसंभृतं स्थालं प्राभृतीकृतम् । सार्थवाहेन गुरोरग्रे मुक्तं प्रोक्तं च भगवन्निदं गृहाण । मामनुगृहाण च । अहं भवद्भक्तितो धन्योऽस्मि, यदस्मिन्नवसरे यूयमत्रागताः । तदानीं मुनिराह–भो महाभाग ! फलानि साधूनामकल्यानि, साधवस्तानि नेच्छन्ति, अतोऽहमपि फलानि नेच्छामि । वयं सिद्धमन्नं प्रासुकं जलं च गृह्णामः । मुनेरेतद्वचनं निशम्य विस्मयस्मेरमानसः सोऽवोचत्–अहो कष्टमहो धैर्यमहो निःस्पृहता मुनेः, एवं मुनीन् प्रशंसन् सम्भृतवाहनो धनेन धनदोपमः स धननामा सार्थवाहो मुनिभिः सार्धं शुभशकुनैः प्रेर्यमाणो मार्गे चचाल । एवमविच्छिन्नप्रयाणैः प्रेर्यमाणः कतिचिद्दिनान्ते व्यतीतेषु ग्रीष्मर्तुषु वर्षाकालं समागात्, अविच्छिन्नधाराभिर्धाराधरो वर्षितुं लग्नः, यतः–

पान्थानां गच्छतामग्रे प्राणद्रव्योत्तमर्णकैः । नद्यो गतिनिषेधाज्ञा रेखा इव कृता घनैः ।।

तदानीं स धनसार्थपतिः सार्थस्य कष्टं दृष्ट्वाऽटवीतटे सार्थनिवेशं चकार । सार्थपतौ तत्र स्थिते कियद्भिर्वासरैर्जनानां पाथेयानि त्रुटन्ति स्म, ततश्च स सार्थलोकः कष्टे पतितः कन्दमूलफलवृत्तिं च कर्तुं प्रचक्रमे ।

एवं काले गच्छति वर्षर्तुप्रान्ते सार्थलोकचिन्तया धनसार्थपतेर्निद्रा गता । ततो गतनिद्रः सार्थवाहो यामिन्याः पश्चिमे यामे स्वचित्ते चिन्तयामास, अहो ते धन्याः साधवो ये मया सार्धं समागता अप्रासुकीकृतं पयोऽपि न पिबन्ति, तेषां मुनीन्द्राणां प्राणयात्रा कथं भविष्यतीति ! अहो मम मन्दभाग्यत्वम् ! अहो मम मौढ्यं ! येन मया सार्थे समागतानामपि साधूनां चिन्ता न कृता । अथ प्रभाते तत्र गत्वा प्रासुकान्नपानैस्तेषां साधूनां चिन्तां करिष्ये । एवं यावता स चिन्तयति तावता सूर्योदयो जातः । जाते च सूर्योदये मङ्गल–पाठकेनोक्तम् । यथा–

अभूत् पिङ्गा प्राची रसपतिरिव प्राप्य कनकं गतच्छायश्चन्द्रो बुधजन इव ग्राम्यसदसि ।
न दीपा राजन्ते द्रविणरहितानामिव गुणाः क्षणक्षीणास्तारा नृपतय इवानुद्यमपराः ।।

मङ्गलपाठकस्येदं वचनं श्रुत्वा विधिवत्प्राभातिकं कृत्यं विधाय माणिभद्रनाम्ना मित्रेण सह चलितो गुर्वन्तिके गतः, गत्वा वन्दिता गुरवः हृष्टमनाश्च स साधून् ददर्श । कथम्भूतान् ? कांश्चित्कायोत्सर्गपरान्, कांश्चिद्ध्यानबन्धुरान्, कांश्चित्स्वाध्यायतत्परान्, कांश्चित्प्रत्युपेक्षापरान्, तान् सर्वान् प्रणम्य गुरोः पुरस्तादासीनो विनयावनम्रदेहो योजितकरकमलोऽसाववादीत्–भो महानुभावाः ! यूयं मम सार्थे सह समागताः, परं मया मन्दभाग्येन शुश्रूषा न कृता, एष च ममापराधः सोढव्यः । अथ गुरुरभाषिष्ट–भोः सार्थाधीश ! त्वयास्माकं विरूपं न कृतं, किन्तु हितमेव कृतं, यतः संसार इव दुर्लङ्घ्येऽस्मिन् कान्तारे दुष्टकर्मभ्य इव चौरेभ्यो वयं रक्षिताः, यत्तव सार्थिका अस्माकमन्नपानादि प्रयच्छन्ति तत्त्वयैव दत्तम् । धनोऽप्यूचे–यूयं गुणिनः सर्वं गुणमयं मन्यध्वे, अथ कल्पनीयमाहारमादाय ममानुग्रहं कुर्वन्तु, ममावासे मुनीन् प्रेषयत ।

ततो गुरुणा धनस्यानुग्रहकृते मुनिद्वन्द्वं प्रेषितम् । गृहागतं मुनिद्वन्द्वं दृष्ट्वोत्सर्पिवासनः सर्पिषा तत्प्रत्यलाभयत् । ततो धनेन तेन द्रव्यशुद्धभावशुद्धदानेन बोधिबीजमवापि । धर्मलाभाशिषं दत्त्वा मुन्योर्निवृत्त–योर्धनो धन्यं मन्यमानः पूर्णमनोरथः सुखेनास्थात् । साधू अपि तदन्नादिकं समादाय गुरुसन्निधौ जग्मतुः । अथापरेऽह्नि परिवारपरिवृतो धनो गुर्वन्तिके समागात् । गुरवोऽपि क्लेशनाशिनिं देशनां ददुः, यथा–

भक्तिः श्रीवीतरागे भगवति करुणा प्राणिवर्गे समग्रे ।
दीनादिभ्यः प्रदानं श्रवणमनुदिनं श्रद्धया सुश्रुतीनाम् ।।

पापापोहे समीहा भवभयमसमं मुक्तिमार्गानुरागः ।
सङ्गो निःसङ्गचित्तैर्विषयविमुखता हर्म्यिणामेष धर्मः ।।३।।

रागादिविजयी देवः सच्चरित्रगुरुर्गुरुः । प्राणित्राणप्रधानश्च धर्मः सम्यक्त्वमुच्यते ।।४।।

तत्तवायमलङ्कारो युज्यते पुरुषोत्तम । आधातुं हृदये श्रीमन् सम्यक्त्वं कौस्तुभः शुभः ।।५।।

एतद्धर्म श्रुत्वा सम्यक्त्वं चाङ्गीकृत्य धनो धन्यं मन्यमानो निजावासं गतः । प्रभाते माणिभद्रेण विज्ञप्तम्, हे विभो ! प्रावृडतिक्रान्ता, इन्द्रेण धनुर्विमुक्तं, वसुधाधवेन गृहीतं, तथा घनैर्नभस्त्यक्तं, बहलधूलिभिर्व्याप्तं, एवमनेके भावाः प्रकटीबभूवुः, सार्थेश एतदाकर्ण्य गुरुणा सार्धं मार्गे सञ्चरन् क्षेमेण वसन्तपुरं समाययौ । तत्र राज्ञा सन्मानितः स्वानि भाण्डानि विक्रीय प्रतिभाण्डान्युपादाय धर्मघोषमुनीश्वरं चापृच्छ्य कृतकृत्यः क्षेमेण प्रत्यावृत्तः क्षितिप्रतिष्ठितं पुरं प्राप । पूर्णायुमृतो धनः । ततः परं देवादि भवानि लब्ध्वा क्रमशः प्रथमतीर्थकरं भूत्वा मुक्तिं गतवान् ।

❋ ❋ ❋

**अथोपसंहारमाह-**

सर्वतन्त्रनवनीत ! सनातन ! सिद्धिसदनसोपान ! ।
जय जय विनयवतां प्रतिलम्भित ! शान्तसुधारसपान । पा० ।।९।।[१४१]

**।। इति श्रीशान्तसुधारसगेयकाव्ये धर्मभावनाविभावनो नाम दशमः प्रकाशः ।।**

**व्याख्या- हे श्रीजिनधर्म ! *सर्वतन्त्रनवनीत !* हे सर्वविश्व-धर्मशास्त्रपरमार्थभूतम्रक्षण ! सनातन ! हे भूतभवद्भविष्यत्सर्वसमयविद्यमानाविनाशिन् ! *सिद्धिसदनसोपान !* हे मुक्तिमन्दिरसमारोहणोर्ध्वगतिपदपङ्क्ते ! "दादरो" इति लोकोक्तिः, *विनयवतां* विनीतपुरुषाणां *प्रतिलम्भितशान्तसुधारसपान !* हे प्रतिक्षणप्रापितशान्तामृतरस ! त्वं *जय जय* परधर्मान् सर्वानभिभूय सर्वोपरिवर्ती भवेत्यर्थः ।।९।।**

सोमवसुकथा वाच्या यथाधर्मोपदेशकर्णिकायां -

कोशाम्बीनगर्यामाजन्मदरिद्रः सोमवसुनामा विप्रो बभूव । दारिद्र्यदग्धोऽसौ धर्माराधनार्थमुत्सुको जातः । ततोऽसौ निजहृदि चिन्तयति, अथाहं सम्यक् परीक्ष्यैव धर्मं कुर्वे । इति विचार्य स सत्यधर्मपरीक्षार्थं परिव्राजकादिधर्मगुरूणां धर्मपरीक्षार्थं बभ्राम । अथैकदा क्वापि मठे गत्वा तत्रस्थमेकं परिव्राजकं दृष्ट्वा विनयेन तमभिवन्द्य स तद्धर्मरहस्यं पप्रच्छ । तेनोक्तं भो द्विज ! मद्गुरुणा धर्मरहस्यत्रिपदी मह्यं प्रोक्तास्ति, यथा–मिट्ठं भुञ्जेयव्वं, सुहं च सोयव्वं, लोअप्पिओ अप्पा कायव्वो इति । परमेतस्यास्त्रिपद्या अर्थमकथयित्वैव गुरुः स्वर्गं जगाम । ततो मया स्वबुद्ध्यैव तस्यास्त्रिपद्या अर्थं विचार्य धर्माचरणं करोमि, तद्यथा–अहं सर्वदा घृतादियुतं पुष्टिकारकं मिष्टान्नमेव भुञ्जे, सुकोमल- शय्यायां च सर्वदा सुखेन शये, लोकानां मन्त्रतन्त्रौषधादि दर्शयित्वा च सर्वदा लोकप्रियो भवामि इति । तत् श्रुत्वा स सोमवसुविप्रश्चिन्तयामास, एष खलु धर्मविधिर्न श्रेयस्करः प्रतिभाति, यतो मन्त्रतन्त्रौषधादिभिर्जीवघातो भवति, सर्वदा मिष्टान्न-भोजनैश्चेन्द्रियाण्युन्मत्तभावं भजन्ते, सुकोमलशय्याशयनेनापि कामविकारः प्रादुर्भवति । इति विचार्य स

तस्यास्त्रिपद्याः सत्यार्थप्राप्तयेऽन्यत्र जगाम ।

एवं भ्रमन्नसौ कस्मिंश्चिन्नगरोद्याने एकं सुगतभिक्षुकं ददर्श, तं च नमस्कृत्य स तस्यास्त्रिपद्या अर्थं पप्रच्छ । तदा तेन भिक्षुकेणोक्तं, भो महाभाग ! एकान्तरभोजनेन मिष्टान्नभोजनं ज्ञेयं, स्वल्पनिद्रया च सुखशयनं ज्ञेयं, निरीहत्वेन च लोकप्रियत्वमेव भवति । इत्येवं तस्यास्त्रिपद्या अर्थो मे मनसि प्रतिभासते । तत् श्रुत्वा स सोमवसुविप्रश्चिन्तयति, नूनमयं धर्ममार्गानुसारी वर्तते । अथैवमग्रे गच्छतस्तस्य त्रिलोचनाचार्यनामा जैनगुरुर्मिलितः । तदा तमपि स नमस्कृत्य सम्यग्धर्मप्राप्तीच्छया तस्यास्त्रिपद्या अर्थं पप्रच्छ । तेन प्रोक्तं, भो वत्स ! अकृताऽकारिताऽननुमतभिक्षालब्धं निर्दोषं भोजनं मिष्टान्नं ज्ञेयं, विधिना प्रमादरहितत्वेन स्वल्पनिद्रया सुखशयनं ज्ञेयं, निरीहत्वपूर्वकं भाषासमित्या प्रियभाषणेन च लोकप्रियत्वमेव भवतीति । यतः–

विश्वस्यापि स वल्लभो गुणगणस्तं संश्रयत्यन्वहं ।<br>
तेनेयं समलङ्कृता वसुमती तस्मै नमः सन्ततम् ।।<br>
तस्माद्धन्यतमः समस्ति न परस्तस्यानुगा कामधुक् ।<br>
तस्मिन्नाश्रयतां यशांसि दधते सन्तोषभाक् यः सदा ।।

तत् श्रुत्वा सत्यतत्त्वज्ञानात्सन्तुष्टः स सोमवसुविप्रस्तां सत्यार्थां त्रिपदीमनुसृत्य धर्मक्रियां कुर्वतां तेषामेव जैनाचार्याणां समीपे निजात्मोद्धारार्थं प्रवव्राज । क्रमेण च स सुगतिं प्राप । एवं विवेकिना विचार्यैव विवेकेन धर्मो ग्राह्यः ।

**।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्री–बुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणिसतीर्थ्यतिलक–मुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां श्रीशान्तसुधारसटीकायां धर्मस्वाख्याततामावना–विभावनो नाम दशमः प्रकाशः समजनि ।।**

## ।। एकादशः प्रकाशः ।।

उक्तो दशमः प्रकाशः । तदन्ते च धर्मः सिद्धिसदनसोपानत्वेनोपदिष्टः । सिद्धिश्च लोकाग्रे प्रतिष्ठिता । अत एकादशे प्रकाशे लोकस्वरूपभावनां विभावयन्नाह । तस्याश्चायमादिमः श्लोकः–

( शालिनीवृत्तम् )

सप्ताधोऽधो विस्तृता याः पृथिव्यश्छत्राकाराः सन्ति रत्नप्रभाद्याः ।
ताभिः पूर्णो योऽस्त्यधोलोक एतौ पादौ यस्य व्यायतौ सप्तरज्जूः ।।१।। [१४२]

व्याख्या– *सप्ताधोऽध* इत आरम्य सोऽयमिति पञ्चमश्लोकपर्यन्तेन कुलकेन लोकस्वरूपं वर्णयन्तः प्राहुः । *या रत्नप्रभाद्या याः* प्रोच्यमानस्वरूपा *रत्नप्रभाद्या रत्नप्रभे*ति गुणनिष्पन्नाख्या यस्याः *साद्या* प्रथमा यासां ता रत्नप्रभाद्याः, आदिना शर्कराप्रभा २ वालुका ३ पङ्क ४ धूम ५ तमः ६ तमस्तम इति क्रमेण प्रभापदयुक्ताः । *सप्त* सप्तसंख्याकाः *अधोऽधो विस्तृताः* क्रमेणोपरितनोपरितनाभ्योऽधस्तन्यो विशालाः (विस्तृत) परिपाट्या एकैकरज्ज्वधिकक्षेत्रप्रमाणा इति यावत् *छत्राकारा* उपर्युपरि प्रतिष्ठित-सप्तच्छत्रनिभा एकैका अपि क्रमशः संक्षिप्तोपरितनवर्तुलाकारा अधस्ताद्विस्तरवत्यः *पृथिव्यो* भूमयः *सन्ति* विद्यन्ते ताः । तथा *ताभिः पूर्णः* सप्तमहीभिर्व्याप्तो *योऽधोलोकोऽस्ति* स *एतौ* द्वौ *यस्य* पुरुषाकारधृतलोकस्य *सप्तरज्जूर्व्यायतौ पादौ सप्तर*ज्जुपरिमाणौ *व्यायतौ विशेषेण* साधिकतया *आयतौ* समुन्नतत्वेन दीर्घौ *पादौ* द्वौ चरणौ भवतः।।१।।

***

तिर्यग्लोको विस्तृतो रज्जुमेकां, पूर्णो द्वीपैरर्णवान्तैरसंख्यैः ।
यस्य ज्योतिश्चक्रकाञ्चीकलापं, मध्ये कार्श्यं श्रीविचित्रं कटित्रम् ।।२।। [१४३]

व्याख्या– *अर्णवान्तैरसंख्यैर्द्वीपैः पूर्णः, अर्णवाः* समुद्रा *अन्ते* पर्यन्ते येषां तेऽर्णवान्ताः प्रत्येकस्य पर्यन्त एकैकस्यार्णवस्य सद्भावात्तैरर्णवान्तैः, *असंख्यैः* संख्यापरिमाणरहितैः *द्वीपै*र्जम्बूद्वीपादिभिः *पूर्णो व्याप्तो* भृत इति यावत्तादृशः, *एकां* परिपूर्णां रज्जुं असंख्येययोजनानां कोटिकोट्या उन्मिता दीर्घदाम्ना तया प्रमितो विस्तृतो विष्कम्भमानः, *ज्योतिश्चक्रकाञ्चीकलापं ज्योतीषि* सूर्यचन्द्रादिविमानानि तेषां *चक्रं* समग्रद्वीपसमुद्रव्यापि मण्डलं तद्रूपं *काञ्चीकलापं* कट्याभरणवृन्दशोभितं । *श्रीविचित्रं श्रियः* सुरनरनगरनगरत्नखनिवनवाटिकासरोगजतुरङ्गभवनादिलक्ष्म्यस्ताभि*र्विचित्रं* नानाविधविभूषित-शोभाभिर्विराजितं, *कार्श्यं* संक्षिप्तत्वेन कृशभावं प्राप्तं क्षामं तानवं गतमिति यावत्, *कटित्रं* कटिप्रदेशेन धारकाश्रयत्वेन त्रातं रक्षितं धृतमिति यावत्, *कटित्र*मुदरं वर्तते *यस्य* पुरुषाकारलोकोदरस्य *मध्ये*ऽन्तरे निवेशितः *तिर्यग्लोको* मध्यलोकोऽस्तीत्यर्थः ।।२।।

***

लोकोऽथोर्ध्वे ब्रह्मलोके द्युलोके, यस्य व्याप्तौ कूर्परौ पञ्चरज्जू ।
लोकस्यान्तो विस्तृतो रज्जुमेकां सिद्धज्योतिश्चित्रको यस्य मौलिः ॥३॥ [१४४]

व्याख्या- *अथ* तिर्यग्लोकानन्तरं *ऊर्ध्वे* पुरुषाकारस्योर्ध्वभागे *द्युलोके* देवलोकमध्यस्थे *ब्रह्मलोके* पञ्चमब्रह्मदेवलोकस्य प्रदेशे *पञ्चरज्जू व्याप्तौ यस्य कूर्परौ पञ्चरज्जू* पञ्चभिरसंख्येयोजनानां कोटिकोटिकोट्यो दीर्घाभिः रज्जूदामिनीभिरुन्मिते क्षेत्रे *व्याप्तौ* प्रसरप्राप्तौ *यस्य* पुरुषाकारभृतलोकस्य *कूर्परौ* करतलभुज-दण्डयोर्मध्यभागावयवौ भवतः "कूणीयुग्मेति" लोके । *एकां रज्जुं विस्तृतो लोकस्यान्तो* लोकान्त-प्रदेशः । स *सिद्धज्योतिश्चित्रकः सिद्धाः* कृतार्था आत्मानस्तद्रूपं तेषां वा *ज्योतिः* द्योतते भासतेऽनेनेति ज्योतिः, निरावरणसिद्धानां प्रभा तेन *चित्रको* रत्नादिभिरिव मण्डितः। *यस्य* लोकपुंसः *मौलिः* उत्तमाङ्गं मुकुटश्च वर्तते ॥३॥

❋ ❋ ❋

यो वैशाखस्थानकस्थायिपादः, श्रोणीदेशे न्यस्तहस्तद्वयश्च ।
कालेऽनादौ शश्वदूर्ध्वंदमत्वाद्, बिभ्राणोऽपि श्रान्तमुद्रामखिन्नः ॥४॥ [१४५]

व्याख्या- *यो* लोकपुरुषः *वैशाखस्थानकस्थायिपादः* समतया स्थाप्येते पादौ यत्र तद्वैशाखस्थानकं तेन स्थापितौ पादौ यस्य स वैशाखस्थानकस्थायिपादः । *श्रोणीदेशे* कटिप्रदेशे *न्यस्तहस्तद्वयश्च न्यस्तं* स्थापितं *हस्तयोः* करतलयोर्*द्वयं* युग्मं येन स तथा *अनादौ* न विद्यते आदिः प्रथमदिवसादिर्यस्य सोऽनादिस्तस्मिन्ननादिमत्यपि *काले* प्रारभ्य *शश्वदूर्ध्वंदमत्वात् शश्वद*नारतं विश्रामरहितमिति यावत्, *ऊर्ध्वंदम* ऊर्ध्वस्थानेन स्थिरस्थितस्तस्माद्धेतोः, *श्रान्तमुद्रां बिभ्राणोऽपि श्रान्तस्य* मार्गादिपरिश्रमयुक्तस्य *मुद्रा* स्वरूपाकारस्तां *बिभ्राणोऽपि* धारयन्नद्यापि *अखिन्नः* परिश्रान्तत्वेन न निषण्ण इत्यर्थः ॥४॥

❋ ❋ ❋

सोऽयं ज्ञेयः पूरुषो लोकनामा षड्द्रव्यात्माऽकृत्रिमोऽनाद्यनन्तः ।
धर्माधर्माकाशकालात्मसञ्ज्ञै-र्द्रव्यैः पूर्णः सर्वतः पुद्गलैश्च ॥५॥ [१४६]

व्याख्या- *स* पूर्वोक्तस्वरूपः *लोकनामा* लोक इत्याख्यया प्रसिद्धः *पूरुषः* पुमान् *अयं* दृश्यमानो *ज्ञेय* उपलक्षयितव्यः सर्वैर्धीमद्भिः । स च *षड्द्रव्यात्मा षट्* धर्माधर्माकाशजीवपुद्गलसमयाः षड् *द्रव्याणि* तान्ये*वात्मा* स्वरूपं यस्य लोकपुंसः स तथा प्रोक्तपदार्थैकसमूह एव लोको न त्वन्यत् । स *चाकृत्रिमो* न केनचिद्देवादिना निष्पादितः स्वभावसिद्धत्वात् । तथा*ऽनाद्यनन्तो* न विद्यते आद्यन्तौ यस्य सोऽना-द्यनन्तः । *धर्माधर्माकाशकालात्मसञ्ज्ञैः पुद्गलैश्च* धर्मो धर्मास्तिकायो गतिपरिणामपरिणतजीवपुद्गलयोर्गति-भिर्व्यङ्ग्योऽरूप्यचेतनद्रव्यं, *अधर्मो*ऽधर्मास्तिकायः स्थितिव्यङ्ग्यः शेषं धर्मवत्, *आकाशो*ऽवगाहव्यङ्ग्यः शेषं धर्मवत्, *कालो* नवपुराणपरत्वादिहेतुर्वर्तमानलक्षणसमयरूपः, *आत्मा* कर्ता भोक्ता ज्ञाता चेतनरूपः *सञ्ज्ञैः* प्रोक्तरूपनामवद्भिः पञ्चभिः *पुद्गलैश्च* परमाणुद्व्यणुकाद्यनन्ताणुकस्कन्धपर्यन्तैः *द्रव्यै*र्गुणपर्यायवद्भिः पदार्थैः *सर्वत* ऊर्ध्वाधस्तिर्यक्षु दिक्षु पूर्णःतया भृतोऽस्तीत्यर्थः ॥५॥

❋ ❋ ❋

**रङ्गस्थानं पुद्गलानां नटानां , नानारूपैर्नृत्यतामात्मनां च ।**
**कालोद्योगस्वस्वभावादिभावैः कर्मातोद्यैर्नर्तितानां नियत्या ॥६॥ [१४७]**

**व्याख्या- तथाऽयं लोकः *नियत्या* अनादिलोकस्थितिपरिणत्या *नर्तितानां* नर्तनक्रियासु नियोजितानां अनेकविधपरिणामपरिणतिभाक्कृतानामिति यावत्, *पुद्गलानां* औदारिकाद्यष्टविधवर्गणा-परिणतानन्तपरमाण्वात्मकस्कन्धानां *नटानां* नटा जीवपात्राणां नटयितारस्तेषां च पुनः *कालोद्योग-स्वस्वभावादिभावैः, कालः* सुखदुःखादिकार्यनिष्पत्तियोग्योऽवसरः, उद्योगस्तन्निष्पादक उद्यमः, *स्वस्वभावः* स्वस्मिन् सुखित्वादिभवनस्वभावता *आदि*शब्दात्तथाविधपूर्वकृतकर्मोदयभवितव्यते ग्राह्ये, त एव *भावाः* पदार्थास्तैः, *कर्मातोद्यैः कर्माणि* कृत्याकृत्यरूपशुभाशुभकर्तव्यानि तान्ये*वातोद्यानि* वीणावेणुमृदङ्गादिनर्तना-प्रेरकवाद्यानि तैः, कृतप्रेरणापूर्वकाणां *नानारूपैः* नारकतिर्यङ्नरामरैकेन्द्रियद्याकारैर्धृतबहुविधनेपथ्यै*र्नृत्यतां* परिपाट्या चतुर्गतिप्रापणपरिहरणरूपनर्तनं कुर्वाणानां *आत्मनां* जीवानां पुद्गलनटानां जीवनर्तकानां च *रङ्गस्थानं* नाट्यमण्डपो वर्ततेऽयं लोक इति शेष इत्यर्थः ॥६॥**

कुबेरदत्तकथा यथा नवपदप्रकरणे -

मथुरानगरी तस्यामसाधारणरूपलावण्यादिगुणगणालङ्कारधारिणी समस्तकलाकलापकुशला कुबेरसेना नाम गणिका, तस्याश्चान्यदा कथञ्चिद्गर्भसम्भवे महती शरीरबाधोदपादि, कथितं वैद्यस्याग्रे, तेन चादिष्टं-यथा युग्मगर्भदोषोऽयं, न तु रोगदोषः, ततस्तदम्बयोदितं-हे वत्से ! प्रसवसमये महती ते बाधा भविष्यत्यत औषधादिना-गालयगर्भमेनं, तयोक्तं को हि नाम जानान एवंविधमतिदारुणं पातकमङ्गीकरोति ?, तस्मादस्तु इत्थमेवायं गर्भो, यद्भवति तद्भवतु, ततश्च कालक्रमेण प्रसूता दारकदारिके, जनन्योक्तं-परित्यजैते, कुबेरसेनाऽब्रवीद-अम्ब ! दशरात्रमनुपाल्य त्यक्ष्यामि, एवमस्त्विति प्रतिपन्ने कुबेरदत्तकुबेरदत्तानामाङ्के मुद्रिके घटयित्वा तयोरेव कण्ठे बद्ध्वा दिव्यमञ्जूषां च सुयन्त्रितां कारयित्वा तन्मध्ये ते गर्भरूपे प्रक्षिकाभ्यां दशमदिवसे यमुनायां प्रवाहिते, प्रभातसमये च सौर्यपुरवास्तव्यकाभ्यां महेश्वरदत्तयक्षदत्तनामकाभ्यां श्रेष्ठिकाभ्यां शरीरचिन्तां विधाय यमुनातट एव शौचमाचरद्भ्यां ददृशे सा लोलकल्लोलमालयोह्यमानाऽऽगच्छन्ती मञ्जूषा तट-निकटतम् आगता च गृहीत्वोद्घाटिता यावत्तावदवलोकितं मध्येमञ्जूषं बालकयुग्ममेकं, तयोरनुपमरूपधारको दारकोऽपरा च दारिकेति, ततो महेश्वरदत्तेनाभाणि-भो यक्षदत्त ! सुरूपमेतद्युग्मकं कस्यचित्, केवलमित्थमेवमुक्तं व्यसनपरम्परां मरणं वा प्राप्स्यति अतः संगोप्यतामेतत्, ततो यक्षदत्तेनोक्तं-यद्येवं पुत्रो ममार्प्यतां पुत्रिका स्वयमेवोररीक्रियतां, महेश्वरदत्तेन त्वेवमस्त्वित्यभिधाय कुबेरदत्तां स्वयं गृहीत्वा कुबेरदत्तं च तस्यार्पयित्वा स्वगृहमाययौ, कालेन च ते तद्गृहयोः सुखंसुखेन वृद्धिमुपगते, यथौचित्य-मेकोपाध्यायसमीपे एव कलाग्रहणं कारिते, जातश्च तयोः परस्परं स्नेहः, क्रमेण चोपारूढौ यौवनं, उचितसमये च श्रेष्ठिभ्यां को ह्यनयोरतिस्नेहवतोर्वियोगं करिष्यतीति पर्यालोच्य कारितं परस्परमेव पाणिग्रहणम्, अन्यदा च द्यूतविनोदेन तिष्ठतोस्तयोः संचारिता ग्रहणके स्वनामाङ्कमुद्रा कुबेरदत्तया, कुबेरदत्तोऽपि तामालोक्य स्वमुद्रया सहैकघटनामचिन्तयत्-कथमेतन्मुद्राद्वयमेकघटनं समानानामन्यासं चिरन्तनमावयोः ?, एकोदरोद्भूतापत्यतयैवावां क्वापि नाभूव, न च ममास्या उपरि कदाचिद्भार्याबुद्धिस्तद्गत्वा पितरावापृच्छामि, देवगुरुशपथदानपूर्वं च पृष्टौ तौ यथावत्कथितवन्तौ मञ्जूषालाभवृत्तान्तं, हा ! न सुन्दरमाचरितमित्यभिधाय कुबेरदत्तायास्तं वृत्तान्तं प्रकथ्य पितृगृहं च तां प्रस्थाप्य स्वयं मथुरायां व्यवहारबुद्ध्या

गतः, तत्र च भवितव्यतावशेन तस्या एव निजमातुः कुबेरसेनायाः कथञ्चिद्गृहं गतः, दृष्टा सा, जातानुरागो भाटीप्रदानपूर्वं तयैव सह विषयसुखमनुभूतवान्, क्रमेण च सैव स्वपरिगृहे धृता, पुत्रश्च जातः । इतश्च कुबेरदत्ता तदैव वैराग्यमूरीकृत्य, सुव्रतागणिनीसमीपे सविस्तरां धर्मदेशनामाकर्ण्य संजातचरणपरिणामा पप्रच्छ–भगवति ! यन्मया निजभ्रातरि भर्तृबुद्ध्या चेष्टमानया पातकमुपार्जितं तच्छोधनोपायो भवदीयप्रव्रज्या भवति न वा ?, गणिन्योक्तं–भद्रे ! भवति, यत उक्तमस्मदागमे–

''सव्वावि य पव्वज्जा, पायच्छित्तं भवंतरकडाणं ।
पावाणं कम्माणं तो एत्थं नत्थि दोसोत्ति ।।१।।''

तत इदमाकर्ण्य प्रवर्द्धमानशुभाध्यवसायया तयोक्तंयद्येवमविलम्बितं प्रयच्छ मे भगवति ! स्वकीयदीक्षां, तयाऽपि तद्योग्यतामवगम्य दीक्षिता सा, गृहीतद्विविधशिक्षा कालेन षष्ठाष्टमदशमद्वादशादितपोविशेषशोषितशरीरा ब्रह्मचर्यभावनाः पञ्चापि विशेषेण पुनः पुनरावर्त्तयन्ती विशुद्धनवब्रह्मगुप्तिपरिपालनपरा प्रशस्ताध्यवसाय-स्थानकारोहणक्रमेण संजातावधिज्ञानावरणकर्मक्षयोपशमाऽवधिज्ञानमन्ववापत्, तेन ज्ञातः कुबेरदत्तो मात्रा सह विषयाननुसेवमानः, ततस्तत्प्रतिबोधनार्थं गणिनीमापृच्छ्य जगाम मथुरापुरीं, तद्गृहैकदेश एवानुज्ञाप्यावग्रहं स्थितवती, पित्रोः समक्षं च कदाचित्तं बालकमादाय–वत्स ! त्वं मे पुत्रोऽसि भ्राताऽसि भ्रातृजोऽसि देवरोऽसि, त्वत्पिता मे भ्राता पिता भर्त्ता श्वशुरश्च, तव जनन्यपि मम माता श्वश्रूः सपत्नी भ्रातृभार्या चेति विरुद्धवचोभिरुल्लापयन्ती क्रीडयति स्म, ततः कुबेरदत्तो बभाण–आर्ये ! किमेवसमञ्जसं जल्पसि ?, साध्वी प्रोवाच–महानुभाव ! नासमञ्जसं, यदि कौतुकमाभाति तदा शृणु क्षणमात्रमवधाय । कथितः सर्वोऽपि जन्मप्रभृति वृत्तान्तः । ततश्चाहो ! दारुणमज्ञानं यद्वशेन मयेदमकृत्यमचरितं इति परम संवेगागतहृदयः निर्विणकामभोगः प्रव्रजितः । कुबेरसेनाऽपि तत्प्रभृति ब्रह्मचर्यरक्षणपरा विशिष्टश्राविकाऽभूत् ।

❋ ❋ ❋

एवं लोको भाव्यमानो विविक्त्या, विज्ञानां स्यान्मानसस्थैर्यहेतुः ।
स्थैर्यं प्राप्ते मानसे चात्मनीना, सुप्राप्यैवाध्यात्मसौख्यप्रसूतिः ।।७।। [१४८]

**व्याख्या- *एवं* पूर्वोक्तन्यायेन *विविक्त्या* आत्मानात्मवस्तुस्वर्गमर्त्यपातालविभागविवेकेन सह, विजने स्थित्वा । *लोकः* प्रोक्तस्वरूपः । *भाव्यमानो* विविधरूपश्चिन्त्यमानः । *विज्ञानां* विशिष्टज्ञानवतां *मानसस्थैर्यहेतुः मानसस्य* मनोध्यानस्य *स्थैर्यं* स्थिरस्थितिस्तस्य हेतुर्निमित्तं *स्याद्*भवेत् *च* पुनः *मानसे* मनोवृत्तौ *स्थैर्यं* स्थिरस्य भावः *स्थैर्यं* निश्चलत्वं *प्राप्ते* लब्धे सति *आत्मनीना* आत्महितजननी *अध्यात्मसौख्यप्रसूतिः* आत्मिकसुखस्वभावोत्पत्तिः *सुप्राप्यैव* सुखेन लभ्यैव भवतीत्यर्थः ।।७।।**

❋ ❋ ❋

**अथ लोकस्वरूपभावनां गेयपद्याष्टकेन विभावयन्नाह–**

विनय विभावय शाश्वतं हृदि लोकाकाशम् ।
सकलचराचरधारणे, परिणमदवकाशम्, वि० ।।१।। [१४९]

व्याख्या- हे *विनय !* हे विनीतात्मन् ! *हृदि* स्वचित्ते *शाश्वतं* सनातनमविनश्वरं *लोकाकाशं* सर्वदिक्षु लोकसीमापरिमितमाकाशखण्डं *विभावय* विविधभेदैश्चिन्तय । *सकलचराचरधारणे सकलाः* समग्रा निःशेषा इति यावत्, *चराः* स्थानान्तरयायिनो विनश्वराश्च परमाण्वादयः, न चरा न स्थानान्तरयायिनो न सर्वथा विनश्वरा धर्मास्त्यधर्मास्तिमेरुस्वर्गविमानरकादयस्तेषां *धारणे* स्वस्वरूपमर्यादाभाजनीभवने *परिणमन्* तत्तदाधेयाकारावस्था-न्तरत्वं भजन् *अवकाशः* प्रवेशनिर्गमावगाहाश्रयदानत्वं यस्य सतं लोकाकाशं ध्यायस्वेत्यर्थः ॥१॥

❋ ❋ ❋

लसदलोकपरिवेष्टितं गणनातिगमानम् ।
पञ्चभिरपि धर्मादिभिः सुघटितसीमानम्, वि० ॥२॥ [१५०]

व्याख्या- *अलोकपरिवेष्टितं लसत्* न विद्यते लोको धर्माधर्मपुद्गलजीवानामन्वयो यस्मिन् सोऽ*लोकः* केवलमहाना-काशस्थलीभूतोऽवकाशमात्रस्तेन *परि* समन्ताद्*वेष्टितः* स्वोदरमध्ये निवेशितो *लसत्* दीप्यते पञ्चास्तिकायात्मकत्वेन शोभते च तं, *गणनातिगमानं गणनया* संख्यायाऽति*गमतिक्रान्तं मानं* परिमाणं यस्य सोऽसंख्येयः परिमाणेन वर्तते तं, *धर्मादिभिः* प्रोक्तस्वरूपैर्धर्मास्तिकायादिभिः *पञ्चभिरपि* समुदितैः पञ्चसंख्यैरपि न तु क्वचिदेकद्वित्रिभिः *सुघटितसीमानं सुष्ठु* सम्यक् शोभना सुन्दरा *घटिता* रचिता *सीमा*ऽलोकतो भिन्नताबोधिनी मर्यादा यस्य स तम् ॥२॥

❋ ❋ ❋

समवघातसमये जिनैः, परिपूरितदेहम् ।
असुमदणुकविविधक्रियागुणगौरवगेहम्,वि०॥३॥[१५१]

व्याख्या- *समवघातसमये सम्* प्रकर्षातिशयेना*वघातः* सर्वलोकाकाशावयवभूतेषु गगनप्रदेशेषु स्वात्मप्रदेशानां प्रक्षेपणं तस्य यः *समयो*ऽष्टसामयिकोऽवसरस्तस्मिन्, *जिनै*स्तीर्थकरैः सामान्यकेवलिभिश्च, *परिपूरितदेहं परि* समन्तात् दिग्विदिक्षु *पूरितः* समग्रप्रदेशेषु व्यापनरूपेण भृतो *देहः* सकलप्रदेशसमुदय-रूपशरीरं यस्य स एकजीवप्रदेशतुल्यप्रदेशी तं । *असुमदणुकविविधक्रियागुणगौरवगेहं असवो* द्रव्यभावप्राणाः सन्ति एषां तेऽसुमन्तो जीवाः, *अणुकाः* परमाणुद्व्यणुकादिसर्वपुद्गलास्तेषां या *विविधा* गमनावगाहना-दिनानाप्रकाराः *क्रियाः* प्रवृत्तिनिवृत्त्युत्पादव्ययस्थित्यादिरूपाः, *गुणा* ज्ञानादयो वर्णादयश्च तेषां *गौरवं* हानिवृद्ध्यादिरूपं प्राचुर्यं, द्वन्द्वे कृते, तेषां *गेहं* सर्वेषामाश्रयत्वान्निवाससदनं तद्ध्यायस्वेत्यर्थः ॥३॥

प्रोक्तरूपे लोके ध्यातव्यप्रकारान् दर्शयति । ततो यत्र यदाकारवर्तनां वक्ष्ये तत्र तत्तथा भावनीयं भावनाधिकारत्वात् ।

❋ ❋ ❋

एकरूपमपि पुद्गलैः कृतिविविधविवर्तम् ।
काञ्चनशैलशिखरोन्नतं, क्वचिदवनतगर्तम्, वि० ॥४॥ [१५२]

व्याख्या- *एकरूपमपि* इमं लोकं सर्वत्र समग्रपञ्चास्तिकायमयत्वेन एकरूपमपि सर्वत्रैकाकारधारकं वर्तमानमपि *पुद्गलैः* पुद्गलस्कन्धानां विचित्राकारपरिणत्या *कृतविविधविवर्तं कृता* रचिता *विविधा* अनेकभेदैर्विभिन्ना *विवर्ताः* समुदायविभागोत्पादा यस्मिन् स तथा तं आकारभेदयुक्तं भावय। पुद्गलविवर्तमेवाहक्वचिदिति सर्वत्र संबन्धनीयम्, लोकः *क्वचित्* कियत्प्रदेशेषु *काञ्चनशैलशिखरोन्नतं काञ्चनं* नानाजातीयसुवर्णं तन्मयाः *शैलाः* पञ्चमेरुनीलवन्निषधरुक्मिमहाहेमवच्छिखरिलघुहेमवद्वक्षस्कार-मानुषोत्तराञ्जनगिरिरुचककुण्डलगिरिप्रभृतिपर्वताः तेषां *शिखराणि* प्रोक्तान्यपर्वतभूमिस्थजम्बूकल्पवृक्षादीनां त्रिविधानि *तैरुन्नत* उत्तुङ्गो वर्तते यस्तं, *क्वचिदवनतगर्तं* क्वचित् केषुचित्प्रदेशेषु *अवनता* अतिशयेनाधोऽधो निमग्ना *गर्ता* अधालोकादिखण्डा यस्मिन्स तथा तम्॥४॥

❋ ❋ ❋

क्वचन तविषमणिमन्दिरैरुदितोदितरूपम्।
घोरतिमिरनरकादिभिः क्वचनातिविरूपम्, वि० ॥५॥ [१५३]

व्याख्या- *क्वचन* केचित्प्रदेशेषु, *तविषमणिमन्दिरैरुदिततोदितरूपं तविषा* देवलोकास्तेषु यानि *मणिमयानि मन्दिराणि* शाश्वतभावपरिणतानि विमानभुवनभौमेयनगराणि तैः, प्रभाभासुरै*रुदितोदितं* वृद्धादप्यतिशयेन वृद्धिप्राप्तं रूपं सौन्दर्यं यस्य स तथा तं, अथवा *तविषा* भवनव्यन्तरज्योतिःसौधर्मादिचतुर्विध देवलोकसमुद्रेषत्प्राग्भारादिपृथिव्यः, *मणयः* खनिगताभरण विमानभवनभित्तिस्तम्भादिस्थितानि रत्नानि, *मन्दिराणि* चक्रिविष्णुविद्याधरादिनिवाससदनानि, तद्*भाभिरुदितोदितं* रूपं यस्य स तथा तं, *क्वचन* केषुचित्प्रदेशेषु *घोरतिमिरनरकादिभिः घोरा* मलिमसदुर्गञ्छनीयभयङ्करप्रेतवनादयः *तिमिरं* गहनान्धकार-युक्तगुहादि, नरका रत्नप्रभादिपृथ्वीगतसीमन्तकादयः, द्वन्द्वे कृते तैः कृत्वा*ऽतिविरूपोऽतिशयेन* विषमं बीभत्सं भयानकं *रूपं* आकृतिदर्शनं यस्य स तथा तं ॥५॥

❋ ❋ ❋

क्वचिदुत्सवमयमुज्ज्वलं जयमङ्गलनादम्।
क्वचिदमन्दहाहारवं पृथुशोकविषादम् वि०॥६॥[१५४]

व्याख्या- *क्वचित्* केषुचित्प्रदेशेषु स्वर्गराजसमृद्धजनमन्दिरादिपुण्यवद्गृहेषु उ*ज्ज्वलं* सातिशयप्रौढं उ*त्सवमयं* उत्सवा गीतवाद्यनृत्यपुत्रजन्मविवाहविजयप्राप्त्यादिमहामहास्ते प्रचुरा यत्र स तन्मयस्तं *मङ्गलजयनादं मङ्गलानि* श्रेयोमहासमृद्धिसंपादकानि देवगुरुनमनस्तवनपूजनदध्यक्षतादीनि *जयनादा* मागधादिबन्दिवृन्दपठ्यमानजय चिरं जीव चिरं नन्दादिध्वनयो यत्र स तथा तं, *क्वचिदमन्दहाहारवं क्वचित्*केषुचित्प्रदेशेषु नरकनरपशुवधस्थानवियोगिरोरगृहादिषु *अमन्दहाहारवं अमन्दा* अतिमहान्तो *हाहारवा* हा मातः हा तात हा नाथ हा पुत्र इत्यादिरूपा *आरवाः* शब्दा यत्र स तथा तं, *पृथुशोकविषादं पृथू* महाविस्तीर्णौ शोकविषादौ यस्मिन् स तथा तं, *शोको* दौर्मनस्यं *विषादो* दुर्लभाजीविकादिजनितः खेदस्तौ पृथू लोके इत्यर्थः ॥६॥

इयं कथा ऋषिमण्डलप्रकरणटीकायां–

पुर्यामासीदयोध्यायां, जितशत्रुरितीश्वरः । यत्प्रतापजितोऽद्यापि, सविता सेवते नभः ।।१ ।।
तदग्रमहिषी जाग्रद्विजया विजयाह्वया । शीललेखेन्दुलेखेव, यदीयाऽऽह्लादते न कम् ? ।।२ ।।
तस्याश्चतुर्दशस्वप्नसूचितस्तनयोऽजनि । अजिताख्यो द्वितीयोऽर्हन्, जगन्नेत्रसुधाञ्जनम् ।।३ ।।
अथापरोऽनुजस्तस्य, सुमित्रविजयाभिधः । युवराड् यशोमती तस्य, प्रेमपात्रं प्रिया प्रिया ।।४ ।।
तस्याः सूनुरनूनश्रीरभवत् सगराभिधः । क्रमेणोद्वोढराजन्यकन्यौ तौ भ्रातरावथ ।।५ ।।
राज्ये न्यस्याऽजितं पुत्रं, यौवराज्येऽनुजाङ्गजम् । जितशत्रुरलाद् दीक्षां, सानुजोऽध्वा सतां ह्ययम् ।।६ ।।
लोकान्तिकैः सुरैरेत्य, समयं ज्ञापितोऽजितः (जिनः) । सगराय निजं राज्यं, दत्त्वा दानं च वार्षिकम् ।।७ ।।
व्रतमादाय सम्प्राप्तकेवलो व्यहरद् भुवि । सगरः साधिताखण्डषट्खण्डश्चक्रवर्त्यभूत् ।।८ ।।
षष्टिः सहस्रास्तस्यासन्, जह्नुमुख्यास्तनूद्भवाः । तोषितो जह्नुना चक्री, वरं वृण्विति तं जगौ ।।९ ।।
सोऽप्याख्यद् देवपादानां, प्रसादादनुजानुगः । सरत्नः कौतुकं भूमेर्यथा वीक्षे तथाऽऽदिश ।।१० ।।
ततोऽसौ चक्र्यनुज्ञातः, सुबुद्धिसचिवादिभिः । समं चचाल वाचालकोलाहलितभूतलः ।।११ ।।
नानारामपुरग्रामरम्यां भूमिं विलोकयन् । क्रमादष्टापदं(दे) जह्नुः प्राप पापपराङ्मुखः ।।१२ ।।
तत्र चेतश्चमत्कारकारणं पारणं दृशोः । वीक्ष्य स्वर्णमयं चैत्यं, जह्नुः पप्रच्छ मन्त्रिणम् ।।१३ ।।
केनेदं कारितं मन्त्रिन् !, सुबुद्धिरप्यथाब्रवीत् । आसीत् कुमार ! त्वद्वंश्यो, भरतो वृषभाङ्गभूः ।।१४ ।।
तेन वर्द्धकिरत्नेन, कारितं चैत्यमेतकम् । कुर्वेऽहमुर्वी वीक्षस्व, तदित्याह स मन्त्रिणम् ।।१५ ।।
सर्वां निर्वण्य सोऽप्युर्वी कुमारं प्राह नेदृशी । भूरस्ति का(का)प्यतो रक्षां, तीर्थस्यास्य विधीयताम् ।।१६ ।
ततो वर्द्धकिरत्नेनाभितो गिरिमचीकरत् । सहस्रयोजनागाधां, परिखां चक्रिणोऽङ्गजः ।।१७ ।।
पेतुर्नागकुमाराणां, भवनेऽवकरोत्कराः ।
स्वस्याभिभवाज्जग्मुः (स्वस्याभिजग्मु ) सम्भ्रान्तास्ते ज्वलनप्रभं प्रभुम् ।।१८ ।।
भोः कुमार ! किमारब्धं, त्वयेति नागराड् जगौ । सोऽप्याह न पुनः कुर्वे, तीर्थभक्त्या कृतं ह्यदः ।।१९ ।।
नागेन्द्रो द्राग् ययौ नागलोकमेषोऽप्यचिन्तयत् । वारिणाऽन्तर्गडुप्राया, विनेयं परिखा खलु ।।२० ।।
भित्त्वाथ दण्डरत्नेन, जाह्नवीं परिखामसौ । वारिवारैरपूरिष्ट, दिष्टान्तमुपदेष्टृभिः ।।२१ ।।
ततो गेह(हे)पयःपाताद्, भीता नागा निजेशितुः । तदाऽऽचख्युरथैषोऽपि, नागानाहानुशिष्टये ।।२२ ।।
दृग्विषाशीविषाकारधारिणोऽभ्येत्य तेऽपि तान् । भस्मसाच्चक्रिरे सर्वान् सम्यग्दृगवलोकनात् ।।२३ ।
शिबिरे प्रससारोच्चैः, शोककोलाहलो रवः । अन्तःपुरस्त्रियः पेतुः, मुक्तकेशा महीतले ।।२४ ।।
निवार्य मन्त्रिणः शोकं, सर्वमादाय तद्दलम् । प्रस्थाय नगराभ्यर्णं, निरानन्दाः समैयरुः ।।२५ ।।
कथङ्कारमुदन्तोऽयं, स्वामिनो ज्ञापयिष्यते ? । यावद् विमर्शमन्योन्यं, किंकर्त्तव्यतया व्यधुः ।।२६ ।।
तावदेको द्विजः प्राप्तस्तानवस्थाप्य स स्वयम् । स्कन्धयोः शबमाधाय, चक्रिणो द्वारमासदत् ।।२७ ।।
पूत्कूर्वंश्चक्रिणा पृष्टः, प्राहैको मे मृतः सुतः । प्रसद्योज्जीवय स्वामिन्ननेकोपायकोविद ! ।।२८ ।।
तत्प्रत्ययाय वैद्योऽवक्, कदाप्यमृतमर्त्यतः (विप्र ! कस्मादमृत्युतः ) ।
कुलाद् भस्मानय स्वस्य, सूनोर्जीवितहेतवे ।।२९ ।।
भ्रामं भ्राममनेकेषु, कुलेष्वाप न तत् स तु । आगतश्चक्रिणा प्रोक्तो, माऽसमाधिं विधेहि भोः ! ।।३० ।।

ईदृगेव स्वभावोऽस्य, संसारस्यास्थिरात्मनः । अतो देयं मनो धर्मे, सर्वशर्मनिबन्धने ।।३१।।
इत्याद्युपदिशन्तं तं, द्विजः प्राह प्रभो ! जनः । परोपदेशे(श)कुशलो, न पुनः करणे स्वयम् ।।३२।।
चक्र्याह नैवमित्युक्ते, द्विजोऽवक् तर्हि ते सुताः । षष्टिः सहस्रा नागेन्द्रैर्दृष्ट्या दष्टा मृतिं गताः ।।३३।।
वज्रपातमिवाकर्ण्य, कर्णक्रकचवद् वचः । तत् तदा मूर्च्छितश्चक्री, पपात क्षितिमण्डले ।।३४।।
ततः क्रमाप्तचैतन्यः, उपचारैः स शीतलैः । हाहा ! स्वच्छाशया ! वत्सा !, हा विनीताः ! सुखावहाः ! ।।३५।।
स्मारं स्मारं गुणानेवं(षां), वारं वारं वरात्मनाम् । मुक्तकण्ठं रुरोदाश्रुश्रेणिनिःश्रेणितोदरः ।।३६।।
द्विजोऽवक् त्वादृशाः स्वामिन् !, यदि शोकवशंगताः(वदाः) ।
महाविज्ञा महैश्वर्या(महाशूरा), मादृशां तर्हि का कथा ? ।।३७।।
यावन्निवारयेत् शोकाद्, विप्रस्तं युक्तिभिर्मनाक् । पूर्वसङ्केतितास्तावदमात्यादय ऐयरुः ।।३८।।
*चक्री पप्रच्छ तान् सवेऽकस्मात् किं (सर्वान्, कस्मात् ते) निधनं गताः ? ।*
तेऽपि साश्रुमुखाः प्रोचुर्वृत्तान्तं सर्वमादितः ।।३९।।
इतश्चाष्टापदाभ्यर्णवासी तत्राऽऽययौ जनः । रक्ष रक्षेति पूत्कुर्वन्, कुतश्चक्रीति तान् जगौ ? ।।४०।।
देव ! या परिखाऽपूरि, त्वत्पुत्रैर्जाह्नवीजलैः । सा(सं–)प्लावयति नो ग्रामपुरादीनतिविस्तृता ।।४१।।
ततो भगीरथं चक्री(पौत्रं), प्राहिणोद् जह्नुनन्दनम् । वत्स ! गच्छाऽनुनीयैषां, तन्निवारय साध्वसम् ।४२।
अनेनाष्टापदं गत्वा, तपोऽष्टममनुष्ठितम् । आराधनाय नागानां, बलिपूजादिपूर्वकम् ।।४३।।
तदादितो नागबलिर्विचयातो जनतास्वभूत् । विज्ञायावधिनाऽऽयातं, नागेन्द्रं प्राह जह्नुसूः ।।४४।।
युष्मदादेशतो गङ्गामिमां नयामि वारिधौ । तुष्टोऽवोचदसौ कार्यं, यथेच्छं कुरु निर्भयः ।।४५।।
सर्वे निवारिताः सन्ति, नागा भरतवासिनः । दण्डरत्नेन चक्षेप, पूर्वाब्धौ तां ततोऽसकौ ।।४६।।
यत्रासौ मिलिता वार्द्धौ(द्धिं), गङ्गासागरनामकम् ।
अद्यापि यद्(अद्य यावत्)जने(ना)ख्यातं, तत्र तीर्थमभूत् पुनः ।।४७।।
जाह्नवी जह्नुनानीतेत्याख्यातेयं तथाम्बुधौ । भगीरथेन तु क्षिप्ता, तेन भागीरथीत्यपि ।।४८।।
तेनात्राप्यर्चिता नागास्तुष्टैस्तैरपि सोऽर्चितः । राज्याभिषेकं चक्रेऽस्य, क्रमाच्चक्री क्रमागतम् ।।४९।।
स्वयं जिनाजितोपान्ते, प्राव्राजीद् वृजिनोज्झितः । क्षीणाष्टकर्मा परमानन्दानन्दमवाप च ।।५०।।

❋ ❋ ❋

बहुपरिचितमनन्तशो, निखिलैरपि सत्त्वैः ।
जन्ममरणपरिवर्तिभिः कृतमुक्तममत्वैः वि० ।।७।। [१५५]

व्याख्या- *कृतमुक्तममत्वैः कृतं* प्रथममुत्पादितं रचितमिति यावत्, जन्मसंबन्धादिप्राप्त्या, *मुक्तं* पश्चान्मरणवस्तुविनाशादिना त्यक्तं *ममत्वं* देहादिषु मदीयत्वं यैस्ते कृतमुक्तममत्वास्तैः, *जन्ममरण-परिवर्तिभिः जन्ममरणे* प्रसिद्धे ताभ्यां परिवर्तयन्ति पूर्वपूर्वपरिहारेणोत्तरोत्तरग्रहणं कुर्वन्ति ये ते तथा तैः *निखिलैः* समस्तैः *सत्त्वैः* प्राणिभिः *अनन्तशो*ऽनन्तानन्तवारान् कृत्वा *बहुपरिचितं बहुः* सर्वेषु प्रदेशेषु सर्वैः *परिचितः* पुनः पुनर्व्याप्तः यः स तथा तमित्यर्थः ।।७।।

❋ ❋ ❋

इह पर्यटनपराङ्मुखाः प्रणमत भगवन्तम् ।
शान्तसुधारसपानतो धृतविनयमवन्तम् वि० ॥८॥ [१५६]

॥ इति श्रीशान्तसुधारसगेयकाव्ये लोकस्वरूपभावनाविभावनो नामैकादशः प्रकाशः ॥

**व्याख्या– भो भव्या ! यदि यूयं *इह* चातुर्गतिके भवे *पर्यटनपराङ्मुखाः पर्यटनं* परिभ्रमणं तस्मात्*पराङ्मुखा* भग्नपरिणामा जाताः, तर्हि *धृतविनयं धृतः* सम्यक् परिणमितः *विनयः* विनम्रभावः येन स तथाभूतं प्राणिनं, *शान्तसुधारसपानतः* शान्तसुधारसपानस्य प्रदानतः *अवन्तं* भवभ्रमणाद्रक्षणं कुर्वन्तं *भगवन्तं* श्रीमज्जिनं । *प्रणमत* सुभक्त्या नम्रा भवतेत्यर्थः ॥८॥**

भरतेश्वरवृत्तौ उक्तं यासासासावृत्तान्तं –

इतः कोऽपि तदा नाथं तत्राभ्येत्य हृदयेगूढं स्वमीहितं दधानः प्रभोः पुरः स्थितः । प्रभुणोक्तं–पृच्छतु भवान् । स जगौ धन्वी–भगवन् ! या सा सा सैति ? । तदा प्रभुणोक्तं भो धन्विन् ! या सा सा सेव । तदा गौतमः प्रपच्छ भगवन् ! कः प्रश्नोऽयं कृतोऽनेन ? । अस्य प्रत्युत्तरं विस्तारात् कथय । भगवानाह–चम्पापुर्यामेकः स्वर्णकारो धनी । यां यां कन्यां विलोकते स्म ततो ततो धनदानेन व्युवाह सः । क्रमात् पञ्चशती कन्यानामभूत् तस्य गृहे । सर्वासां प्रत्येकमाभरणादीनि भूषणानि कारयामास । यस्या वारो यस्मिन् दिने भवति सा शृङ्गारं करोति । नान्या । इतः कस्मिंश्चित् कार्ये स्वर्णकारे गते सर्वाः शृङ्गारं चक्रुः । तदा ताः कृतशृङ्गारा दृष्ट्वा स स्वर्णकृद् द्विष्टस्तास्ताडयामास । ततस्तासां रक्षार्थे द्वारे एव तिष्ठति स्वर्णकृत् । स कदाऽपि निजे गृहे किमपि मित्रं न भोजयति । स्वयं कस्यापि गृहे न याति । ताः सर्वाः कारागार इव स्वगृहे स्थिताः स्वं स्वं मन्यन्ते । एकदा बलात् केनापि सुहृदा स्वगृहे भोजयितुं स्वर्णकृन्निमन्त्रितः गतः । ताः सर्वा हृष्टाः । कृतस्नानलेपमण्डनाः पश्यन्त्यो दर्पणेषु स्वं स्वं मुखं तस्थुः । तदाऽकस्मात् स्वर्णकृत् तत्रागात् । भार्यास्ताः तथाविधा वीक्ष्य एकां तावत् क्रुधा हन्तु दधावे । तां मस्तके जघान यदा तदाऽन्याभिः पत्नीभिर्विमृश्य स्वप्राणरक्षार्थं दर्प्पणाः क्षिप्ताः । सर्वासां दर्प्पणघातान्मृतः स्वर्णकृदपि । पश्चात्तापपरा ता अपि अग्निप्रवेशादिना स्वमृतिं चक्रुः । ता विपद्य पश्चात्तापेनाकामनिर्जरया च स्त्रीणामेकोना पञ्चशती पल्लयां पुंस्त्वेनोत्पन्नाः । ते च क्रमात् पल्लयां तस्करा बभूवुः । पूर्वमृता स्वर्णकृत्प्रिया कस्यापि रोरस्य विप्रस्य पुत्रोऽभूत् । स्वर्णकारस्तु कस्यचिच्छ्रेष्ठिनः पुत्री जाता । बालायाः पितृभ्यां तस्या बालायाः पालकः कृतः । सा तु बाला शिशुत्वेन रुरोदात्यर्थं स । बालपालको यदा यदा तस्या गुह्ये हस्तं दत्ते तदा तदा सा मुदिता भवति । अन्यथा रौति स्म । तं तथा कुर्वाणं तदा पितृभ्यां वीक्ष्य हक्कितो निष्काशितश्च स्वगृहात् । ततो भ्रमन् एकोनपञ्चशतचौराणां मिलितः । पञ्चशती जाता । सर्वे सम्भूय चौर्यं कुर्वन्ति । एकदा ते चौराः श्रेष्ठिगृहे चौर्यार्थं प्रविष्टाः । तान् धनं गृह्णानान् वीक्ष्य साऽऽकुला श्रेष्ठिपुत्री जगौ–यूयं किं धनमेव गृह्णीत ? । मां स्त्रीं कथ न गृह्णीत ? । ततस्तैः सा जगृहे । स्वस्थाने नीता । गतैस्तैरेकैव पत्नी कृता । सा तु सर्वेषां तेषां रतदानेन न तृप्यति । चौरैर्विमृष्टम्–इयं वराकी एकाकिन्यस्ति । वयं तु बहवः स्मः । तेन मरिष्यति । ततो द्वितीया तैरानीता प्रिया । सा पूर्वस्त्री तां सपत्नीमसहमाना हन्तुमिच्छति । इतो गतेषु चौरे चौर्याय पूर्वभार्याऽतिकोपिनी तां नवीनां कूपे प्रक्षेपयामास । ततस्तैरागतैस्तस्याः स्त्रिया वृत्तान्ते पृष्टे सा पत्नी जगौ–अहं किं तस्या रक्षणे यामिकीकताऽस्मि ? । ते दध्युश्चौराः–अनयैव सा हता । द्विजोऽपि व्यमृशत्–किं मे सा स्वसा ? । यस्या मया पूर्वं योनिं स्पृशता

सुखमभूत् । इहागतोऽस्ति सर्वज्ञ इति ध्यात्वा समागत्यात्र मनसा संशमपृच्छम् । लज्जया भगवन् ! या सा सा सा ? । अस्माभिस्तु प्रोक्तं–या सा सा सैवेति । यतः–

इत्याकर्ण्य स चौरः संविग्नवान् प्रभोः पार्श्वे व्रतं प्राप्य पल्लीं गत्वा प्रबोध्य तांश्चौरान् प्राव्राजयन्निजान् ।

**।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयसतीर्थ्यतिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां शान्तसुधारसटीकायां लोकस्वरूपभावनाविभावनो नामैकादशः प्रकाशः समजनि ।।**

❀ ❀ ❀

# ॥ द्वादश प्रकाश ॥

उक्त एकादशः प्रकाशः । तदन्ते च शान्तसुधारसतो विनयवतां भवभ्रमणाद्रक्षकजिनप्रणाम उपदिष्टः । शान्तरसविनयप्रणामाश्च धर्मसामग्रीप्राप्त्या प्राप्यन्ते । सा चातिदुर्लभाऽतो द्वादशे बोधिदुर्लभभावनां विभावयन्नाह । तस्याश्चायमादिमः श्लोकः–

( मन्दाक्रान्तावृत्तम् )

यस्माद्विस्मापयितसुमनःस्वर्गसंपद्विलास–प्राप्तोल्लासाः पुनरपि जनिः सत्कुले भूरिभोगे ।
ब्रह्माद्वैतप्रगुणपदवीप्रापकं निःसपत्नं, तद्दुष्प्रापं भृशमुरुधियः सेव्यतां बोधिरत्नम् ॥१॥ [१५७]

व्याख्या- हे *उरुधियो !* हे महाविशालबुद्धयो ! युष्माभिः स्वहृदि वक्ष्यमाणं विभाव्यताम् । *यस्माद्वक्ष्यमाणस्वरूपाद् बोधिरत्नाद्* भूयांसो भव्या *विस्मापयितसुमनःस्वर्गसंपद्विलासप्राप्तोल्लासाः विस्मापयिता*श्चित्ते चमत्कारं ग्राहिताः, *सुमनसो* देवाः पण्डिता ज्ञानिनश्चेति यावत्, *यैः स्वर्गसंपदः* इन्द्राहमिन्द्रादिस्वर्गिणां संबन्धिन्यः संपदः स्वर्गसंपदस्तासां ये *विलासाः* शृङ्गारगीतवाद्यनृत्यसुरी-विनोददीप्त्यादयस्तैः *प्राप्तोल्लासाः प्राप्ता* भोग्यत्वेनोपगता *उल्लासाः* प्रकाशा आविर्भावा महानन्दविस्ताराश्चेति यावत्, तथाविधा मनुष्येभ्यः देवत्वेनाभवन् भवन्ति भविष्यन्ति । *पुनरपि* देवभोगभुक्तोत्तरकाले स्वर्गाच्च्युत्वा भूयोऽपि मनुष्यत्वे *भूरिभोगे सत्कुले भूरयो*ऽतिप्रचुरा भोगाः शब्दादिपञ्चविषयजन्यविलासा यस्मिन् तादृशे *सत्कुले* राज्यसमृद्ध्यादिमत्प्रधानवंशे *जनिः* प्रसूतिर्जन्म भवति । तथा यत् *निःसपत्नं* अनन्यसदृशं निर्णीतं *ब्रह्माद्वैतप्रगुणपदवीप्रापकं ब्रह्म* शुद्धनिरञ्जनचैतन्यस्वरूपं *अद्वैतं* निर्भेदप्रकारं *प्रगुणाः* प्रकर्षा *गुणा* ज्ञानादयो यस्यां सा *पदवी* विशिष्टगतिप्राप्तिः तस्याः *प्रापकं* साधन वर्तते । *तत्प्रोक्तगुणं भृश*मतिशयतो *दुष्प्रापं* दुर्लभं *बोधिरत्नं* नरभवादिधर्मसामग्रीं प्राप्य *सेव्यतां* परिपाल्यतामित्यर्थः ॥१॥

उपदेशप्रासादोक्ता अर्हद्दत्तकथा वाच्या–

अचलपुरेशसुतो युवराड्वैराग्येण प्रव्रज्यां प्रतिपद्य विहरन्नवन्त्यां समागात् । मध्याह्ने भिक्षार्थं भूपमन्दिरे गच्छन् जनैरिति प्रोक्तः–''राजपुरोधसोः सुतौ साधुं दृष्ट्वा पीडयतः, अतो नोऽत्र स्थातव्यम् '' । इति श्रुत्वाऽपि निर्भिकस्तत्र गत्वा गाढस्वरं धर्मलाभं स्माह । तदाकर्ण्य एकवेश्मस्थितौ तौ पापग्रहौ तदभ्यर्णमुपेयतुः, अभ्यधत्तां च–''हे साधो ! त्वमस्मत्पुरो नृत्यं विधेहि, आवां तूर्यं वादयावः'' । ततः साधुर्नृत्यं विततान । तौ तूर्यताडनं प्रारेभाते । ततः साधुः प्रोचे–रे कौलिकौ ! सम्यग्वादित्रवादनं युवां न जानीथो जडत्वात्'' । तदाकर्ण्य रुष्टौ तौ मुनिं हन्तुमधावताम् । नियुद्धवेदी साधुस्तु तदङ्गानि सन्धिभ्य उदतारयत् । ऋषिद्विषोस्तयोरेवं शिक्षां दत्त्वा मुनिर्गतः । सद्यो राजपुरोहितौ पुत्रयोर्दुरवस्थां तां वीक्ष्यातिखिन्नौ युवराजर्षिसमीपे समेयतुः । तं मुनिमुपलक्ष्य नृपो व्यजिज्ञपत्–''हे भ्रातः ! स्वभ्रातृव्यं पटूकुरु, क्षमस्व शिशोरपराधम्'' ।

मुनिः प्रोवाच यद्येतावाददाते व्रतं हितम् । तदा तौ सज्जयामि द्राक् कुमारौ नान्यथा पुनः ॥

द्वाभ्यां तत्प्रतिपन्नम् । ततः प्राक् तयोर्लुञ्चनं कृत्वा पश्चात्तौ सज्जयामास । तदनु नृपात्मजो निःशङ्को व्रतमपालयत् । अन्यस्त द्विजत्वाद्दीक्षां पालयन्नपि 'मुनिनाऽहं बलाद्दीक्षितः' ( इति सातिचारं पालयति ) । क्रमात् द्वावपि देवौ जातौ ।

इतश्च कौशांब्यां तापसाख्यश्रेष्ठी स्वगृहोत्करे शूकरो जज्ञे । स स्वसौधादिकं दृष्ट्वा जातिस्मृतिधरोऽजनि । अन्यदा तस्यैव श्राद्धदिने स तत्सुतैर्निजघ्ने, स्वगृह एव स सर्पोऽजनि, सुतैरेव गृहान्तर्भ्रमन् सोऽहिर्हतः स्वसूनोस्तनयोऽभवत्, प्राग्वज्जातिस्मृतिं प्राप्तः स्नुषामम्बां सुतं च तातं कथं वच्मीति चिन्तयन्मूकत्वं स्वीचकार, तेनाशोकदत्तस्थाने मूक इति नाम सर्वत्र प्रसृतम् । अन्यदा चतुर्ज्ञानधराः सूरयो मूकगृहे इमां गाथां शिक्षयित्वा उभौ श्रमणौ मुमुचुः–

तावस किमिणा मूअव्वएण पडिवज्ज जाणिओ धम्मं । मरिऊणं सुअरोरग, जाओ पुत्तस्स पुत्तोसि ।।

इमां गाथां श्रुत्वा मूको विस्मितस्तौ नत्वा पृष्टवान्–''एतद्युवां कथं वित्थः ?'' तावूचतुः–'' उद्यानस्थितास्मद्गुरुवाक्यतः'' । तदनु गुरुपार्श्वे देशनां श्रुत्वा त्यक्तमूकत्वः श्राद्धो जातः ।

इतश्च जातिमदकृत् पुरोहितसुतोऽमरो महाविदेहे जिनेन्द्रमित्यपृच्छत्–''अहं सुप्रापबोधिरस्मि किम् ? अथवा तदितरोऽस्मि ?'' स्वामी स्माह–''त्वं दुर्लभबोधिरसि, इतश्च्युतः कौशाम्ब्यां मूकभ्राता भावी तव मूकाद्धर्मप्राप्तिर्भाविनी'' । इति श्रुत्वा तत्रागत्य मूकं प्राह–''अहं स्वर्गाच्च्युतस्त्वन्मातुर्गर्भे उत्पत्स्ये, अकालेऽपि तदा तस्या माकन्ददोहदो भावी, तद्धेतोः समीपगिरौ मया सदाफलाम्रो रोपितोऽस्ति, सा भृशमाम्राणि यदा याचते तदा तस्याः पुर एतान्यक्षराणि लेखयेः– गर्भस्थमङ्गजमिमं मातर्मम ददासि चेत्तदाऽहं दोहदं पूरयामि इति एतत्स्वीकृते तस्यै फलानि दद्याः, मां च जातं स्वाधीनं कृत्वा जैनं धर्मं विबोधयेः, वैताढ्ये पुष्करिणीगोपितकुण्डलद्वयं मन्त्रामाङ्कितं त्वया दर्शनीयम्, न पुनर्देवभूयं गतोऽपि त्वं मामुपेक्षेथाः'' । इति तद्वाक्ये मूकेनाङ्गीकृते सुरः स्वर्गतः ।

क्रमाच्च्युत्वा मूकाम्बाकुक्षौ समागतः, तस्याश्चाकाले आम्रफलदोहदे जाते स्मृतदेवगीर्मूकः स्माह–''यदि ममामुं गर्भं दत्से तदाऽऽम्राणि ददामि'' । तया तद्वचसि प्रतिपन्ने देवोक्तपर्वतात्तान्यानीय तमपूरयत् । समये सा सुतं सुषुवे । तस्यार्हद्दत्त इत्याह्वां पितरौ मुदा चक्रतुः । ततो मूकस्तं बालं सोदरं स्वयं लालयन् चैत्योपाश्रयेष्वनयत् । स तु मुनीन् वीक्ष्योच्चैररोदीत्, न च तानवन्दत । मूकेन बहुधा नोदितोऽपि साधूनां गन्धमप्यसौ न सेहे । ततः श्रान्तो मूकः साधुसन्निधौ प्रव्रज्य स्वर्गं गतः, अवधिं प्रायुङ्क्त च । स्वानुजं परिणीतचतुःस्त्रियं तमपश्यत्, तत्पूर्वभववाक्यमात्मना स्वीकृतं चास्मार्षीत् । ततः सोऽमरस्तत्प्रतिबोधाय तस्य जलोदरं चक्रे । अर्हद्दत्तस्तद्भारादुत्थातुमपि न शशाक । सर्वेऽपि वैद्याश्चिकित्सितुमक्षमास्तं जहुः । तदा स देवो वैद्याडम्बरं कुर्वन् तत्रागात् । सोऽपि तं वीक्ष्य दीनः स्माह–''हे वैद्य ! मां नीरुजं कुरु'' । वैद्यः स्माह–''तवायं गदोऽसाध्योऽस्ति, तथापि विविधौषधैरहं नूनं शमशमि, नवरं भेषजशस्त्रादेरमुं कोत्थलकं मामकं समुत्पाट्य यावज्जीवं त्वयाऽन्वहमहं सेव्यः'' । तेन तदुक्तं स्वीकृतम् । ततो मायाभिषजा भेषजैः स नीरोगतां नीतः । तदा सत्त्वमुरीकृत्य स तेन साकं चचाल । देवो निजकोत्थलकं वैद्यार्हशस्त्रभृतं तस्योत्पाटनार्थं ददौ, मायया महाभारं च तन्निर्ममे । अर्हद्दत्तोऽपि तं भूरिभारमन्वहमुद्वहन्निति दध्यौ–''कथमयं मया शश्वद्वक्ष्यते'' ? इति चिन्तयन्नन्यदा क्वापि साधून् संयमयोगयुक्तान् ददर्श । तदा तमुद्विग्नमेव सुरो जगौ–''यदि

त्वं प्रव्रज्यां स्वीकुर्यास्तदा मया मुच्यसे'' । इति सुरोक्तं निशम्य भारार्दितः स जगौ–''अहं वज्रसारमहर्निशममुं भारं वाहंवाहं कुब्जीभूतोऽस्मि, तन्मे व्रतं साम्प्रतम्'' ।

ततः सुरो मुनिसन्निधौ तस्मै व्रतं प्रदाप्य स्वयं स्वर्गतः । देवे गते व्रतं हित्वाऽर्हद्दत्तो निजं गृहं जगाम । सुरोऽप्यवधिना तं प्रव्रज्यापरिच्युतमज्ञासीत् । ततः पुनर्जलोदरव्याधिबाधितं तं व्यधात् । भूयस्तथैव परिपाट्या स दीक्षयामास । इत्थं चतुर्थवेलायां पुनस्तं प्रव्राज्य सुरस्तत्स्थिरीकरणाय नित्यं तत्पार्श्वे एवास्थात् । अन्यदा तृणभारधरः सुरस्तेन समं प्रज्वलद्ग्रामे प्रवेशं प्रचक्रमे, तदा देवमर्हद्दत्त एवमब्रवीत–''तृणभारं दधन् प्रदीपनमध्ये कथं यासि ?'' देवोऽवक्–''यद्येतद्वेत्सि तर्हि कोपादिपावकैर्जाज्वल्यमानं गृहवासं कुतो भवान् विशति ?'' तन्निशम्याप्यबुद्धं तं सहादाय पुरो व्रजन् सुरो मार्गं मुक्त्वा भीमारण्यं प्रत्यचालीत्, तदा स स्माह–''किं सुपन्थानं हित्वोन्मार्गं प्रविशसि ?'' स्वर्गी जगौ–''यद्येतज्जानासि त्वं तदा कुतो मुक्तिमार्गं विहाय भवाटवीं विविक्ष्यसि ?'' तथाप्यबुद्धेन तेन सह ''अनिर्वेदः श्रियां मूलम्'' इति ध्यायन् पुरो ययौ । क्वचिच्चैत्ये पूजितं सन्तं व्यन्तरमधोमुखं निपतन्तं दिव्यशक्त्याऽद्राक्षीत् । तदा स जगौ–''यथा यथा लोकैरसौ व्यन्तरो पूज्यते तथा तथाऽधोमुखः पतति, ततोऽस्मादधन्योऽन्यः कोऽपि भूतले न दृष्टः । देवः पुनस्तमेवमवदत्–'' यदुच्चैः संयमस्थाने स्थापितोऽपि पुनः पुनर्द्रुतमधः पतसि, तस्मात्त्वमपि रे दुर्बोधशेखर ! अधन्योऽसि'' । तदाऽर्हद्दत्तः पृष्टवान्–भूयो भूय एवं वदन् त्वं कोऽसि ? मे वद'' । ततः सुरो मूकरूपं दर्शयित्वा तमुवाच सर्वं प्राग्भवस्वरूपम् । तत् श्रुत्वा स पप्रच्छ–''प्राग्भवेऽहं देवोऽभूवं तत्र कः प्रत्ययः ?'' ततः सुरस्तमादाय वैताढ्यपर्वतं ययौ ।

कुण्डलद्वितयं तेन, प्रोक्तपूर्वं स निर्जरः ।
तन्नामाङ्कं समाकृष्य, पुष्करिण्या अदर्शयत् ।।

तद्वीक्ष्य स जातिस्मरणं प्राप, ततो लब्धबोधिर्भावसंयमं प्रत्यपद्यत । इत्थं तं धर्मे स्थापयित्वा त्रिदशः स्वस्थानं ययाविति ।

❋ ❋ ❋

**अथ बोधिप्राप्तिदुर्लभत्वे हेतुमाह–**

( भुजंगप्रयातवृत्तत्रयम् )

अनादौ निगोदान्धकूपे स्थिताना-मजस्रं जनुर्मृत्युदुःखार्दितानाम् ।
परीणामशुद्धिः कुतस्तादृशी स्याद् यया हन्त तस्माद्विनिर्यान्ति जीवाः ।।२।।[१५८]

व्याख्या- *अनादौ* न विद्यते आदिरुत्पत्तेः समयमुहूर्तप्रहर-दिवसमासवर्षादिभिः प्राथम्यं, प्रवाहतोऽप्यपरापरनिगोदोत्पत्त्या सर्वकालं विद्यमानत्वादादेरभावो यस्य सोऽनादिस्तस्मिन्ननादौ *निगोदान्धकूपे* निगोदश्चासावन्धकूपश्च निगोदान्धकूपस्तस्मिन् *अजस्रं* निरंतरं प्रत्येकशरीरेऽवतार-प्राप्त्यन्तरालाभावात्सततं *स्थितानां* निवसतां *निगोदो* हि जिनागमपरिभाषयाऽन्तर्मुहूर्तस्थितिकाङ्गुला-संख्येयमानचर्मचक्षुरदृश्यानन्तजीवमयं सूक्ष्मं शरीरमुच्यते स *एवान्धकूपो*ऽनन्तजीवानामनन्तजन्म-स्थानत्वेनादृश्यतलभागत्वादन्धकूपस्तस्मिन्, *स्थितानां* कृतनिवासानां *जनुर्मृत्युदुःखार्दितानां* जनुषः

भूयो भूय एकस्मिन् श्वासनिःश्वासमात्रे काले सप्तदश जन्मानि, *मृत्यवो*ऽपि जन्मोन्मितानि मरणानि कष्टानि *तैरर्दिताः* सदैव पीडिता ये ते तथा तेषां, *हन्तेति* खेदे *यया* परिणामशुद्ध्या *तस्मात्*प्रोक्तस्वरूप-निगोदान्धकूपात् *जीवाः* साधारणशरीरिप्राणिनः *विनिर्यान्ति* प्रत्येकत्वबादरत्वप्रापणेन निर्गच्छन्ति, *तादृशी* शुभोदयजनिता ततो निर्गमयोग्या शुद्धा *परिणामशुद्धिः* वर्धमानपुण्योदयजनिता तानपेक्ष्याखण्डसुन्दर-परिणतिधारा *कुतः स्यात्* कस्माद्भवेत् ? साधनसामग्र्यभावान्नैव स्यात् । तस्माद्बोधिर्दुर्लभेत्यर्थः ॥२॥

❋ ❋ ❋

ततो निर्गतानामपि स्थावरत्वं, त्रसत्वं पुनर्दुर्लभं देहभाजाम् ।
त्रसत्वेऽपि पञ्चाक्षपर्याप्तसंज्ञि-स्थिरायुष्यवद्दुर्लभं मानुषत्वम् ॥३॥ [१५९]

व्याख्या- *ततो* निगोदराशितः *निर्गतानां* कथञ्चिदकस्मादज्ञाताकामनिर्जराबलादुद्धृतानामपि देह*भाजां* प्राणिनां पृथिव्यादित्वमेव लभते, ततः *स्थावरत्व*मेव भवति प्रायेण । तस्मात् *त्रसत्वं पुनर्दुर्लभं* *त्रसत्वं* द्वित्रिचतुःपञ्चेन्द्रियत्वं तत्पुनः प्रत्येकशरीरित्वे प्राप्तेऽपि *दुर्लभं* दुष्प्रापं भवदसंख्योत्सर्पिण्यवसर्पिणी-प्रमितपृथिव्यादीनां कायस्थितेरन्तरितत्वात् । त्रसत्वाभावे बोधिलाभाभावोऽतोऽपि दुर्लभं । *त्रसत्वेऽपि* त्रसत्वं प्रोक्तरूपं तत्प्राप्ते सत्यपि यथोत्तरं क्रमेण *पञ्चाक्षपर्याप्तसंज्ञिस्थिरायुष्यवत् दुर्लभं,* वच्छब्दः प्रत्येकं संबन्धनीयः, ततः *पञ्चाक्षवत् पञ्च* स्पर्शनादीन्*यक्षाणी*न्द्रियाणि यत्र जन्मनि तत्पञ्चाक्षवदित्येवं सर्वत्र ज्ञेयं, *पर्याप्तय* आहारादिषड्विधाः पूरिता यत्र तत्पर्याप्तिवत्, *संज्ञा* दीर्घकालिककार्यविचारकृन्मनोज्ञानवद्यद्भ वति तत्संज्ञि, *स्थिरायुष्यवत् स्थिरं* दीर्घनिबिडनिश्चलमायुर्जीवितं विद्यते यत्र तत्तथाविधं त्रसत्वं *दुर्लभं,* तदभावे बोध्यभावः, प्रोक्तरूपत्रसत्वं नारकतिर्यग्देवेष्वपि विद्यते, न च तत्र सर्वाङ्गान्वितबोधिलाभोऽस्तीत्यत आह *मानुषत्वं* ततोऽपि सर्वाङ्गसमन्वितं मानुषत्वं मनुष्यजन्मवत्त्वं सुदुर्लभं वर्तते । अत्रैव समग्रधर्म-सामग्रीलाभसंभवोऽस्तीत्यतः प्रमादमपहाय प्रयतो भवेत्यर्थः ॥३॥

❋ ❋ ❋

प्रयत्नायोपदिशन्नाह-

तदेतन्मनुष्यत्वमाप्यापि मूढो, महामोहमिथ्यात्वमायोपगूढः ।
भ्रमन् दूरमग्नो भवागाधगर्ते, पुनः क्व प्रपद्येत तद्बोधिरत्नम् ॥४॥ [१६०]

व्याख्या- *तत्*तस्मात्पूर्वोक्तमनुष्यजन्मदुर्लभविज्ञानात्त्वं *एतत्* मनुष्यत्वं साक्षाद्दृश्यमानं प्राप्तोऽसि, प्रयत्नपरो धर्मं समाचर, तदकरणात्तु त्वमपि *मनुष्यत्वमाप्यापि* मनुष्यजन्मप्राप्तोऽपि *महामोहमिथ्यात्व-मायोपगूढः महामोहो*ऽष्टाविंशतिविधसमग्रमोहोदयः, *मिथ्यात्वं* देवगुरुधर्मेषु विपरीतश्रद्धाभावः, *माया* परवञ्चनवृत्तिः, *तैरुपगूढो*ऽतिशयेन व्याप्तो ग्रस्त इति यावत्, *भवागाधगर्ते भवै*रनन्तजन्मभिर*प्यगाधो*ऽ-लभ्यपारो यद्वा *भव एव* संसार *एवागाधो*ऽलब्धतीरो *भवागाधः* स एव *गर्तो* गम्भीरभूच्छिद्रं तस्मिन्, *दूरमग्नो*ऽतिप्रगाढतरं ब्रुडितो *भ्रमन्* उन्मग्ननिमग्नतां कुर्वन्, *मूढो*ऽज्ञातोपायत्वेन व्याकुलः सन् *पुनर्भूयः* *तद्बोधिरत्नं* पूर्वोक्तमहामहर्घ्यं धर्मसामग्रीचिन्तामणिं *क्व* केषु द्रव्यक्षेत्रकालभावेषु लब्धेषु *प्रपद्येत* प्राप्नुयात् ? न क्वापीत्यर्थः ॥४॥

दृश्या च नन्दनतलवरकथा –

मगधे नन्दनस्तलवरः तस्याद्यश्रीद्वितीयश्रीनाम्न्यै पत्न्यौ । द्वितीयश्रियां रक्तः स तद्गेहेऽवतिष्ठति । अन्यदा कार्येन्यदेशे गत्वा पश्चादागतः प्रथमाया गृह एव तस्थौ । तया प्रगुणितं नानाव्यञ्जनगुणोपेतं भोजनं परमसुन्दरमपि न बहु मन्यते, किमपि तस्मानस उक्तवाँश्च ''किं भुज्यते'' इति । तत उक्तं–द्वितीयश्रिया यद्यत्रं राद्धं तदाऽऽनय किमपि तद्गृहात् शाकं पर्पटं च ।'' साऽपि सपत्नीं शाकमयाचिष्ट । तयोक्तं–''अद्य राद्धंकुतः शाकं ?'' तयाऽऽगत्योक्तं स्वामिने । पुनरुक्तं तेन– ''किञ्चिदुद्धरितादिकमपि मार्गयः ।'' पुनर्गत्वा साऽमार्गयत् । ''कर्मकरेभ्योदत्तं, उद्धरितमति नास्ति'' इति प्रत्युवाच सपत्नी । तदपि तथा स्वपतये निवेदितं । पुनरित्यलपत्– ''तदालयाद्यत्किञ्चित्काञ्जिकप्रमुखमप्यानय'' । ततः कषायिता सा गत्वा बहिः सद्योव्युत्सृष्टं वत्सगोमयं तुवरिचनकपिष्टमिश्रं गृहीत्वा (कृत्वा) किञ्चित्संस्कृत्य ''तद्गृहादानीतं'' इति वदन्ती पवति निन्ये । तलवरस्तुष्टोऽभाणीत्–''अहो मिष्टं ! अहो स्त्रीगुणः ।'' इति । एष स्त्रीस्क्तो यथा गुणदोषविवेक–पराङ्मुखस्तथा यः कचिद्दर्शने रक्तः स विशिष्टगुणदोषौ न वेत्ति, स धर्म नाप्नोति । यतः –

मिथ्यात्वपङ्कमलिन आत्मा विपरीतदर्शनोभवति ।
श्रद्धत्ते न च धर्मं मधुरमपि रसं यथा ज्वरितः ।।

***

## अथ वर्तामानकालवैषम्येण श्रद्धाशिथिलकारिहेतुविद्यमानतादर्शनपूर्वकं दृढश्रद्धायुक्तं भवितव्य–मित्युपदिशति–

( शिखरिणीवृत्तम् )

विभिन्नाः पन्थानः प्रतिपदमनल्पाश्च मतिनः,
कुयुक्तिव्यासङ्गैर्निजनिजमतोल्लासरसिकाः ।
न देवाः सान्निध्यं विदधति न वा कोऽप्यतिशय–
स्तदेवं कालेऽस्मिन् य इह दृढधर्मा स सुकृती ।।५।। [१६१]

**व्याख्या–** ***अस्मिन्*** **प्रत्यक्षमनुभूयमाने** ***कालेऽ*****तिक्लिष्टभावापन्ने पञ्चमारके कलियुगे** ***पन्थानो*** **मोक्षमार्गा** ***विभिन्ना*** **विविधान् भेदान् प्राप्ताः । तान् दृष्ट्वा दोलायमानमानसाः श्रद्धाशैथिल्यं भजन्तीत्येको हेतुः १ । अत्रायं भावः–ईश्वरकारणिका ईश्वरानुग्रहादेव, कालवादिनः कालादेव, स्वभाववादिनः स्वभावादेव, पुरुषाकारवादिनः पौरुषात्, नियतिवादिनो नियतितः, मोक्षादिसकलकार्यसिद्धिं मन्यन्ते ।** ***प्रतिपदं*** **स्थाने स्थाने ग्रामेषु नगरेषु वनाश्रमादिषु** ***अनल्पाश्च*** **अतिप्रभूताः चकारादतिस्वमताग्रहग्रस्ताश्च** ***मतिनो*** **बौद्धसांख्यनैयायिकवैशेषिकजैमिनीयचार्वाकादिमतवादिनः सन्ति । कीदृशास्ते ?** ***कुयुक्तिव्यासङ्गै–र्निजनिजमतोल्लासरसिकाः कुत्सिता*** **वस्तुस्वरूपे विसंवादिन्योऽप्रमाणभूता इति यावत्,** ***युक्तयो*** **न्यायघटनाः, यथेश्वरकृज्जगत् कार्यत्वात् घटवत्, यत्र यत्र कार्यत्वं तत्र तत्र बुद्धिमत्कर्तृकत्वं दृष्टं, यथा घटे कुलालः, तथा चात्र, स च बुद्धिमानीश्वर इत्यत्र कार्यत्वमात्रानुमानप्रतिबद्धा वस्तुस्वरूपानुभव–**

विकलत्वात् कुयुक्तयस्तासां *व्यासङ्गाः* यथार्थवस्तुस्वरूपाविसंवादकविचारान् परित्यज्यैककुयुक्तिपरत्वेनासक्तयस्तैः कृत्वा, *निजनिजमतं* स्वस्वदर्शनपक्षस्तस्य य *उल्लासः* पुष्टिर्वृद्धिश्च तस्मिन् *रसिकास्*तद्रसास्वादलम्पटाः सन्ति, अयं द्वितीयो हेतुः २ । तथा दोलायमानश्रद्धावतां दृढतां येन क्रियते स उपायो न दृश्यते । यतोऽ*स्मिन् काले देवाश्च*तुर्विधा विद्यमाना अपि तेषां तथाऽस्माकं तथाविधपुण्यबलयोग्यताऽभावात् *सान्निध्यं* साहाय्यं *न विदधति* धर्मफलं स्वस्य स्वर्गसंपद्भरप्राप्तिप्रदर्शनादिना धर्मे दृढतां नोत्पादयन्तीति तृतीयो हेतुः ३ । *वा*ऽथवा ममान्येषामपि *कोऽप्य*वधिमनःपर्यायकेवलज्ञानजातिस्मरणादिरूपेष्वन्यतरो*ऽतिशयो* ज्ञानप्रकर्षो *ना*स्ति येन धर्माधर्मफलं स्वर्गनरकादिके गतं स्वकीयान्येषामतीतभवं च दृष्ट्वा धर्मे दृढत्वं भजाम उत्पादयामो वा । *तदेवं* प्रोक्तरूपे स्थिते सति किं विधेयमित्याह–हे आत्मन् ! *इह* वर्तमानावसरे *यः* कश्चित् *दृढधर्मा* निश्चलधर्मश्रद्धावान् त्वया दृश्यते तं दृष्ट्वा भवता *स* धर्मनिश्चलः *सुकृती* अहोऽयं प्रबलपुण्यबली नान्यथैवंविधो भवतीति ध्येयं, तदेव स्वदृढत्वसंपादनोपाय इत्यर्थः ॥५॥

धर्मदृढता विषये वङ्कचूलकथा दृश्या यथा श्राद्धदिनकृत्ये

ढींपुरीति पुर्यां विमलयशोराज्ञः पुष्पचूलाख्यौ पुत्रीपुत्राभूताम् । पुष्पचूलस्तु प्रकृत्योल्लण्ठत्वाल्लोकैर्वङ्कचूल इत्यभिधानं कृतम् । तदौद्धत्यं महाजनादाकर्ण्य राज्ञा क्रोधेन नगरान्निःसारितो महारण्ये गतः । तस्य पत्नी स्वसापि च स्नेहेन तदनुगते । भिल्लैः स स्वपल्ल्यां नीत्वा स्वभूपः कृतः । एकदा तत्र सिंहगुहापल्यां सूरयः प्रापुः । वर्षाकाले वसतिस्तत्पार्श्वे तैर्याचिता । वङ्कचूलः प्राह–मम सीमानं यावद्धर्मो न वाच्यः, मौनेनात्र स्थेयम् । त ऊचुः–भवद्भिर्जीववधो न कार्यः तेन स्वीकृतम् । चतुर्मास्यन्ते विहारसमयस्तस्मै ज्ञापितः । यतः–

समणाणं सउणाणं भमरकुलाणं च गोकुलाणं च । अनिआओ वसईओ सारईआणं च मेहाणं ॥

ततो गच्छद्भिस्तैः सह कश्चित्प्रदेशं गत्वा स्थितः । सूरिस्तमाह–हे भद्र ! त्वममुमभिगहं गृहाण, अज्ञातफलानि नाद्यानि, सप्ताष्टपदान्यपसृत्य घातो देयः, राज्ञः स्त्री न सेव्या ध्वाङ्खमांसं न खाद्यम् इति । सुकरत्वात्तेनातं व्रतैकदेशत्वला, गुरून्नत्वा गृहमगमत् । एकदा स सार्थं चौरैः सह हृत्वाऽरण्ये प्रविष्टः । तत्र क्षुत्क्षामैरन्यलुण्टाकैः किंपाकवृक्षफलानि भुक्तानि, स्वयं त्वज्ञातनामानि मत्वा नादत् । ते तु मृताः ।

ततोऽसौ दध्यौ–अहो नियमफलम् ! ततो रात्रौ स्वगृहे प्रविष्टः पत्न्या सह सुप्तैकनरं वीक्ष्य चुकोप । तं हन्तुमिच्छन् नियमं संस्मृत्य सप्ताष्टपदान्यपसृत्य खड्ग उद्यच्छति तावत्खड्गो द्वारे पश्चात्संघट्टितः । तद्रवेण स्वसा विनिद्रोत्थाय कस्त्वमित्यवदत् । ततः स्वरेण स्वसारं तां ज्ञात्वा पप्रच्छ –कथमयं पुंवेषः कृतः ? साह–नरवेषेण नटनृत्यं विलोक्यात्रैव सुप्ता । तदाकर्ण्य स्वगुरुमश्लाघत । एकदा तत्रागतसूरिशिष्यान्नत्वा जिनप्रासादबिम्बविधापनदेशनां श्रुत्वा तस्यामेव पल्ल्यां चर्मण्वतीनदीतीरे श्रीवीरप्रसादामकारयत्, तत्तीर्थं जातम् । कालान्तरे एको नैगमः सभार्यस्तद्यात्रायै प्रस्थितः । क्रमेण चर्मण्वतीं नदीमुत्तरितुं नावमारूढौ दम्पती । तच्चैत्यशिखरं वीक्ष्य चन्दनादिभृतस्वर्णकच्चोलेन तद्द्रव्यं

क्षेपतुमारब्धवती नैगमस्त्री । तावत्तस्या हस्तात्पतितं (कच्चोलं) जलमध्ये । तदा वणिजाऽभाणि –अहो इदं राज्ञः कच्चोलं ग्रहणके रक्षितं रत्नखचितं, किं प्रत्युत्तरं तस्मै दास्ये ?।

ततस्तदाज्ञया धीवरो मध्ये प्रविष्टः तत्रान्तः श्रीपार्श्वबिम्बाङ्के स्थितं गृहीत्वा दत्तम् । तद्रात्रौ नाविकेन स्वप्नं दृष्टम्–नद्यां क्षिप्ता पुष्पमाला यत्र गत्वा तिष्ठति तत्र बिम्बं संशोध्य एकं वङ्कचूलाय देयम् । तेन तथा कृते स तस्य दानं दत्त्वा श्रीवीरप्रासादस्य बहिर्मण्डपे श्रीपार्श्वबिम्बमस्थापयत् । ततो नव्यं चैत्यं कारयित्वा तद्बिम्बस्थापनार्थ बहिर्मण्डपाद्ग्रहीतुमारभन्ते बहुनराः । परं तद्बिम्बं तत्रैव तस्थौ । अद्यापि तथैवास्ते । पुनर्धीवरेणोक्तम्–स्वामिन् तत्र द्वितीयं बिम्बं सुवर्णरथं चास्ति । ततो वङ्कचुलेन पृष्टा स्वपरिषत्–भो जानीते कोऽप्यनयोर्बिम्बयोर्ज्ञातम् । केनचित्स्थविरेणोक्तम्–देव ! पुरा प्रजापालनृपः शत्रुसैन्येन सार्धं योद्धुं गतः। तदा भीत्या तस्य स्त्री निजं स्वमेतच्च बिम्बद्वयं कनकरथस्थं विधाय जलदुर्गमिति मत्वा चर्मण्वत्यां नौकायां प्रक्षिप्य स्थिता । इतश्च केनचित् खलेन नृपकथाशेषत्वमुक्तम् । ततः सा तां नावमाक्रम्य जलतले प्राक्षिपत् । सा मृत्वा जिनध्यानेन सुरो भूत्वा एतद्बिम्बभक्तो जातो भविष्यति । अन्यथा महिमा कथं स्यात् । तत्रैकं बिम्बं भवद्भिरानीतम् । द्वितीयं तत्रास्ति इति श्रुत्वा तद्बिम्बग्रहणायानेकोपायानकार्षीत् । न च तन्निर्गतम् । श्रूयतेऽद्यापि वर्षमध्ये एकदिनेदर्शनं ददाति । अथ श्रीवीरबिम्बापेक्षया लघीयस्तरं श्रीपार्श्वनाथबिम्बं इति महावीरस्यार्भकोऽयं देवी इति मत्वा वर्षमध्ये एकदिने लोका प्राचीकथन् । सा सिंहगुहापल्ली क्रमान्महापुरं जातम् । अद्यापि श्रीवीरः सचेल्लणपार्श्वनाथः संघैर्यात्रोत्सवैराराध्यते इति ।

अन्यदा वङ्कचुल उज्जयिन्यां राजकोशाद्बाहिर्गोधापुच्छे विलग्य प्राविशत् । कोशो दृष्टः । राजाग्रमहिष्या रुष्टया पृष्टः कस्त्वम्? । तेनोचे–चौरोऽहम् । तयोक्तम्–मा भैषीः, मया सह संगमं कुरु। सोऽवोचत्–का त्वम् ? साप्यूचे –नृपराज्ञ्यहम् । चौरोऽवादीत्–यद्येवं तर्हि ममाम्बाभवसि अतो यामि । इति श्रुत्वा तया स्वनखैः स्वाङ्गं विदार्य पूत्कृतिपूर्वकमाहूता रक्षकाः । तैर्बद्ध्वा रक्षितः । तदा छन्नो नृपोऽप्यचिन्तयत्–अहो स्त्रीचरित्रं कीदृशम्? । ततः प्रभाते सभायां तैः स नृपस्य पुरो नीतः । नृपेण बन्धनान्मोचितः, नत्वोपाविशत् । कथं मन्मन्दिरे त्वं समागतः? इति नृपेण कथिते सति वङ्कोऽवदत्– देव ! चौर्यायाहं प्रविष्टः, पश्चाद्युष्मद्देव्या दृष्टोऽस्मि । यावदन्यन्न कथयति तावत्तुष्टो नृपस्तं पुत्रतयाऽरक्षत् । मार्यमाणां देवीं ररक्ष सः । अहो नियमानां शुभ फलं इत्यजस्रं दध्यौ । एकदा नृपेण युद्धार्थं प्रेषितस्तत्राहवे गाढप्रहारार्दितः सेवकैः नृपाग्रे नीतः बहुवैद्या आकारिताः, तैः काकमांसौषधं प्रोक्तं, स नेच्छति, तदा तन्मित्रजिनदासो भूपेनाहूतः। जिनदासोऽवन्तिं समागच्छन् वने द्वे देव्यौ रुद अद्राक्षीत् । तेन पृष्टे किं रुदिथः? । ताभ्यामुक्तम्– देव्यावावां हि सोधर्मवासिन्नयौ भर्तृवर्जिते काकमांसमनश्नन् आवयोरेष पतिर्भवेत् त्वद्वचसा नियमभङ्गात्तस्य दुर्गतिर्भाविनीति रोदनहेतुः । तच्छ्रुत्वा स आह–अहं तं दृढं करिष्ये । ततः स श्राद्धो नृपप्रेरितोऽपि तं प्राह–

वरं मच्चु वाहि वरं दारिद्दसंगमो । न पुन गहियवयभंगं कज्जमकज्जं च ।।

इत्यादिना विशेषप्रतिपन्नव्रतनियमौऽच्युतकल्पमगमत् । वलमानेन तेन सुर्यौ प्रोक्ते–किमित्याधुनापि रुदिथः? न तावत्स मांसं संग्राहितः । ताभ्यामभिदधे–स चाधिकाराधनावशादच्युतं प्राप्तः, ततो नाभवदस्मद्भर्त्ता । इति श्रुत्वा श्राद्धो गृहमाससादेति । अस्य ढीपुरीतीर्थस्थ निर्मापयिता वङ्कचूलः ।

उक्तोपायेन दृढतां प्राप्य यत्कर्तव्यं तदाह–

( शार्दूलविक्रीडितं वृत्तम् )

यावद्देहमिदं गदैर्न मृदितं नो वा जराजर्जरं,
यावत्त्वक्षकदम्बकं स्वविषयज्ञानावगाहक्षमम् ।
यावच्चायुरभङ्गुरं निजहिते तावद्बुधैर्यत्यतां,
कासारे स्फुटिते जले प्रचलिते पालिः कथं बध्यते? ।।६।। [१६२]

**व्याख्या– *बुधैर्*विवेकवद्भिः पण्डितैः *यावत्* यावति परिमाणे कालेऽद्यापि इदं विद्यमानं देहं कायं *गदैः* कुष्ठभगन्दरवातपित्तकफादिभिः रोगैः *न मृदितं* मर्दयित्वा न चूर्णीकृतम् । *वा*ऽथवा *यावत् जराजर्जरं जरा* वयोहानिस्तया *जर्जरं* जीर्णं *न* भवति । *तु* पुन*र्यावत् अक्षकदम्बक*मिन्द्रियगणं *स्वविषयज्ञानावगाहक्षमं* स्वस्वविषयज्ञानस्यावगाहने व्याप्तुं समर्थं भवति । *यावच्चायुरभङ्गुरं* यावत्स्वायुषोऽभङ्गदशा वर्तते । *तावत्* तत्परिमाणे काले *निजहिते* आत्मनः सुखदायके धर्मे *यत्यतां* भवद्भिः सोद्यमपरैः प्रवृत्यताम् । *कासारे* सरोवरे *स्फुटिते* पद्याभङ्गे प्राप्ते सति *जले* सरोगतनीरे *प्रचलिते* प्रचुरप्रवाहैर्निर्गते सति *कथं* केनोपायेन *पालिः* पद्या *बध्यते* बद्धुं शक्यते ? न कथञ्चित्केनापि बध्यत इत्यर्थः ।।६।।**

उपदेशमालायां शशिप्रभसुरप्रभाऽऽख्यानं वाच्यं–

कुसुमपुरे नगरे जितारिनामा नृपः, तस्य शशिप्रभसुरप्रभनामानौ द्वौ पुत्रौ, शशिप्रभं राज्ये ऽधिरोप्य सुरप्रभं च यौवराज्ये निधाय जितारिर्धर्मोद्यतो बभूव तदवसरे चतुर्ज्ञानधराः श्रीविजयघोषाचार्याः समवसृताः, शशिप्रभसुरप्रभौ च वंदनार्थं निर्गतौ, देशनां श्रुत्वा सुरप्रभः प्रतिबुद्धो गृहमागत्य शशिप्रभं कथयति स्म, हे बंधो ! असारोऽयं संसारः, ततो विषयसुखं त्यक्त्वा, दीक्षां गृहीत्वा तपःसंयमोद्यमः क्रियते, यथा स्वर्गमोक्षावाप्तिः स्यात् । शशिप्रभेणोक्तं भो भ्रातरद्य त्वं केनापि धूर्त्तेन वञ्चितो दृश्यसे, यतः प्राप्तानि विषयसुखानि त्यक्त्वाऽग्रेतनसुखवाञ्छां करोषि त्वं महान् मूर्खः, केन दृष्टान्यग्रेतनसुखानि ? को जानाति धर्मफलं भविष्यति न वा ? सुरप्रभेणोक्तं हे भ्रातः किमिदमुक्तं ? धर्मफलं निश्चितं, प्रत्यक्षदृष्टानि पुण्यपापफलानि, यत एको जीवः स रोगः, एको रूपवान्, एकः कुरूपवान्, एको धनी, एको निर्धनः, एकः सौभाग्यवान्, एको दौर्भाग्यवानित्यादि सर्वं पुण्यपापफलं, एवमनेकप्रकारं बोधितोऽपि शशिप्रभो बहुलकर्मत्वान्न बुद्धः । तदा सुरप्रभो दीक्षां गृहीत्वा तपः संयममाराध्य पञ्चमं ब्रह्मदेवलोकं गतः, शशिप्रभो राज्यं पालयित्वा विषयसुखमग्नो व्रतप्रत्याख्यानं विनाऽविरतः कालं कृत्वा तृतीयपृथिव्यां नारकित्वेनोत्पन्नः, पश्चात्सुरप्रभो देवोऽवधिज्ञानेन पूर्वभवभ्रातरं नरकस्थितं विलोक्य स्नेहतो नरकभूमावागत्य पूर्वभवभ्रातुरग्रे पूर्वभवस्वरूपं कथयामास । भ्रातः पूर्वभवे त्वया मम कथनं न कृतमतो नरके समुत्पन्नः, तेनापि ज्ञानेन स्वपूर्वभवस्वरूपं ज्ञातं । पश्चान्नरकस्थितः शशिप्रभनारकः सुरप्रभदेवं कथयति हे भ्रातर्मया पूर्वं विषयसुखलम्पटेन धर्मो न कृतस्ततो नरके निपतितः, तदधुना त्वं तत्र गत्वा मदीयशरीरे व्यथामुत्पादय ? भूमिपतितं मम पूर्वभवशरीरं कदर्थय ? यथाहं नरकान्नि–सरामि । तदा सुरप्रभदेवेनोक्तं–'किं तेण इति हे भ्रातरधुना तव जीवरहितपूर्वशरीरकदर्थनया को गुणः ? यदि

पूर्वं तपःसंयमाराधनेन तव देहोऽपतिष्यत्तदा त्वं नारको नाऽभविष्यः, अधुना स्वकृतकर्माण्युपभुङ्क्ष्व त्वदीयदुःखाऽपनयने न कोऽपि समर्थ इति कथयित्वा सुरप्रभदेवः स्वर्गलोकं गतः ।

❋ ❋ ❋

### आलस्यं नैव कर्तव्यमिति बोधयति–

( अनुष्टुब्-वृत्तम् )

विविधोपद्रवं देहमायुश्च क्षणभङ्गुरम् ।
कामालम्ब्य धृतिं मूढैः, स्वश्रेयसि विलम्ब्यते ॥७॥ [१६३]

**व्याख्या– देहं शरीरं *विविधोपद्रवं विविधैः* नानाजातीयैरुपद्रवै रोगविद्युज्जलाग्निशस्त्रसर्पश्वापदादि-विघातहेतुभिरनुबद्धं वर्तते । तथापि *आयुश्च* पुनरायुर्जीवितं *क्षणभङ्गुरं* क्षणमात्रेऽकस्मात्काचभाजन-वद्भङ्गप्रापणशीलं, इति ज्ञायमाने तथापि *मूढैरज्ञातभवपरमार्थैः कां* किंनामिकां *धृतिं* धैर्यं वज्रकठोरहृदयत्वं *आलम्ब्य* निर्भयनिश्चिन्ततायै समालम्बनं धारयित्वा *स्वश्रेयसि* आत्मनः कल्याणसंपादने *विलम्ब्यते* आलस्यादिभिरेव कालो निर्गम्यते ? तन्न ज्ञायत इत्यर्थः ॥७॥**

नवपदप्रकरणे स्कन्दकमुनिकथा–

श्रावस्त्यां नगर्यामतिपरिचितचतुर्दशविद्यास्थानः परिव्राजकसमयरहस्यवेदी त्रिदण्डकुण्डि-काद्युपकरणधारी स्कन्दकाभिधानः परिव्राजकः प्रतिवसति स्म, तस्यां च तदा बभूव पिङ्गलकनामा समुप-लब्धजीवाजीवादिपदार्थसार्थपरमतत्त्वो भगवतो वर्द्धमानस्वामिनः सदुपदेशरहस्यश्रावकः प्रधानः शिष्यः, स च कदाचिदुटजव्यवस्थितस्य स्कन्दकपरिव्राजकस्य समीपमुपगत्यैवमुक्तवान् भो भोः स्कन्दक ! किं शाश्वता लोकजीवसिद्धसिद्धिपदार्था अशाश्वता वा ?, केन वा मरणेन म्रियमाणो जीवः संसारं वर्द्धयति ? हापयति वा ?, द्वि त्री वाराः पृष्टश्चैवं यावदसौ मौनमालम्ब्य स्थितस्तावत्पिङ्गलको गतः स्वस्थानम्, अत्रान्तरे तस्या एव नगर्या बहिर्वर्त्तिनि कोष्ठकाभिधानोद्याने समवसृतो भगवन्महावीरतीर्थकरः, आकर्णितो जनपरम्पराप्रवादतः स्कन्दकपरिव्राजकेन, चिन्तितं च त्रिकालदर्शी भगवान् श्रूयते, तद्गत्वा पृच्छामि तदहं यत्पृष्टः पिङ्गलकेन, ततो गृहीत्वा त्रिदण्डकुण्डि– काछत्रपादुकादिनिजोपकरणं प्रस्थितो भगवतो महावीरतीर्थकरस्याभिमुखम् ।

अत्रान्तरे भणितः परमेश्वरेण गौतमस्वामी, यथा गौतम ! द्रक्ष्यसि त्वमद्यपूर्वसङ्गतिकं, गौतम उवाच कं भदन्त! द्रक्ष्यामि ?, भगवतोदितं स्कन्दकपरिव्राजकं, गौतमो बभाण कथम्? ततः स्वामिना निवेदितं यावत्सविस्तरं तदीयमागमनकारणं तावत्समाययौ तमेव देशं स्कन्दकपरिव्राजकः, आभाषितः ससंभ्रमोत्थानपुरस्सरं गौतमेन, यथा स्कन्दक ! स्वागतं ते ? स्वामिना तु पिङ्गलकश्रावकपृच्छा– निर्णयार्थं त्वमागतोऽसीत्यभिधाय स्कन्दक ! द्रव्यपदार्थतया शाश्वता लोकादयोऽतीतानागतादिपर्यायापरापरपरीणत्या त्वशाश्वताः, तथा ज्वलनप्रवेशादिभिर्बालमरणैर्जीवो वर्द्धयति संसारं पण्डितमरणैस्तु भक्तपरि-ज्ञानादिभिर्हापयतीत्यभिहितं, ततस्तथेति प्रतिपद्य स्कन्दकः, पुनः पप्रच्छ भगवन्तं विशेषतो धर्मं, भगवता च प्ररूपितः सविस्तरोऽयं, तं चाकर्ण्य प्रतिपद्य भावसारमेनं गत ईशानदिशं स्कन्दकः, परित्यज्य तत्र परिव्राजकोपकरणमशेषमागतो जिनपतिसमीपं, जगाद च प्रसादं कृत्वा विधेहि मामात्मशिष्यं, तदनु तीर्थकरेण

प्रव्राजितः स्वयमेव स्कन्दको, ग्राहितः सकलां साधुसमाचारीम् अष्टासु प्रवचनमातृषु परं प्रावीण्यमनुप्राप्तो, जातः क्रमेणैकादशाङ्गधारी, विविधतपो–विशेषोद्यतमतिश्चासौ अन्यदा रजन्याः पश्चिमे यामे चिन्तयामास यावन्ममास्ति देहस्य पाटवं यावदेति न जरा मे । यावन्नेन्द्रियहानिर्यावज्जिनसंनिधानं च ।।१।।

तावत्करोमि गुणरत्नसंवत्सरं दुश्चरं तपःकर्म । परिपूर्णा सामग्री दुरवापा येन संसारे ।

अत्रान्तरे विभाता रजनी समुद्गतः कमलवनोद्घाटनं कुर्वाणः सहस्ररश्मिस्ततो गतो भगवदन्तिकं स्कन्दकः, कथितो वन्दनापूर्वकं तीर्थनाथस्य स्वकीयोऽभिप्रायः, स्वामिनाऽनुज्ञातः, प्रारब्धो गुणसंवत्सरं तपः कर्त्तुं, तेन चासौ संजातोऽस्थिचर्मावशेषः, तत्समाप्तौ पुनश्चिन्तितमनेन क्षीणकायोऽहमनेन तपसा संप्रति तच्छ्रेयो मे भगवन्तमापृच्छ्य तदनुज्ञयाऽऽलोचनाक्षामणादिविधिपुरस्सरं पादपोपगमनं प्रतिपत्तुं, तदनन्तरं गत्वा महावीरस्वामिनः समीपं निवेदितः प्रणामपूर्वमात्मीयोऽभिसन्धिः, तदनुमतौ च दत्त्वा जिनेन्द्रस्यालोचनामुच्चार्य तत्समक्षं पञ्च महाव्रतानि कृत्वा सकललोकक्षामणमङ्गीकृत्य निराकारमनशन–प्रत्याख्यानं संविग्नगीतार्थसाधुसहितः समारुह्य विपुलगिरिं तदीयशुद्धशिलातलं विधिना प्रत्युपेक्ष्य प्रमृज्य चानवकाङ्क्षन् कालं स्थितः पादपोपगमनेन, ते चं साधवस्तत्समीपे तावत्स्थिता यावदयमायुःपरिसमाप्त्या परित्यज्येदमसारं मानुषकलेवरं समुत्पेदे द्वादशकल्पे देवत्वेन, तदनन्तरं च विहितकायोत्सर्गादिविधानाः समागत्य स्वामिमूलं समर्प्य च स्वामिनस्तदुपकरणं निवेदितवन्तो भगवतः स्कन्दकसमाधिमरणं, स्कन्दकदेवोऽपि ततश्च्युतो महाविदेहे सेत्स्यतीति ।।

❋ ❋ ❋

**अथ गेयपद्याष्टकेन बोधिदुर्लभभावनां विभावयन्नाह–**

बुध्यतां बुध्यतां बोधिरतिदुर्लभा जलधिजलपतितसुररत्नयुक्त्या ।
सम्यगाराध्यतां स्वहितमिह साध्यतां बाध्यतामधरगतिरात्मशक्त्या, बु० ।।१।। [१६४]

**व्याख्या– *बोधिरतिदुर्लभा बोधि*र्मनुष्यजन्मार्यक्षेत्रावतारादिर्वक्ष्यमाणस्वरूपा धर्मसाधनप्राप्तिसामग्री सा*ऽतिदुर्लभा* अतिशयेन दुःखेन महाकष्टप्रबन्धेनानन्तपुद्गलपरावर्तनमितेन भवभ्रमणेन लभ्यते जीवैरित्यतिदुर्लभा वर्तते इत्येवं भवद्भिः *बुध्यतां बुध्यतां* सम्यग् ज्ञायतां ज्ञायतां तद्वेदनेऽत्यादरः क्रियता–मित्यर्थः । ज्ञापनाय वीप्सा कृता । दृष्टान्तेन दुर्लभतां स्पष्टयति*जलधिजलपतितसुररत्नयुक्त्या जलधिः* समुद्रस्तत्संबन्ध्यगाध*जले पतितं* करतलतो भ्रष्टं सुररत्नं चिन्तामणिरत्नं यथा पुनर्गृहीतुं लब्धुं च दुर्लभं दृश्यते, तथैव मनुष्यभवादिसमस्ततायुक्तधर्मसाधनप्राप्तिर्जीवानामुक्तरत्न*युक्त्या* समुद्रजलपतित–चिन्तामणिन्यायेन प्रमत्तानां पुनर्धर्मसामाग्रीप्राप्तिरतिदुर्लभा तस्मात्तां प्राप्तां *सम्यगाराध्यतां* रागालस्यादि परिहृत्य प्रयत्नपरैरा*राध्यतां* हितैषिभिः परिपाल्यताम् । आराध्य *चेह* समस्ततायां सत्यां *स्वहित*मात्मकार्यं *साध्यतां* निष्पाद्यताम् । *आत्मशक्त्याऽधरगतिर्बाध्यतां, आत्मनो* जीवस्य *शक्तिः* शुभवीर्योल्लासस्तया *अधरगति*र्नारकादिदुर्गतिः सा *बाध्यतां* निराक्रियतामित्यर्थः ।।१।।**

एतद्विषये रत्नदृष्टान्तं दृश्यं –

यथा भोगपुराभिधे नगरे चतुर्विंशतिकनककोटिस्वामी धनावहाख्यः श्रेष्ठी बभूव तस्य च धनवतीनाम्नी प्रियासीत् । तयोः कर्मसारपुण्यसाराभिधौ द्वौ सुतौ जातौ । अथैकदा पित्रा तयोर्भाग्यपरीक्षार्थमेको

नैमित्तिकः पृष्टः । तदा तयोर्हस्तरेखादि विलोक्य तेन नैमित्तिकेनोक्तम्, अयं कर्मसारो जडप्रकृतिर्निष्प्रज्ञो विपरीतबुद्धिश्च भविष्यति । बहूपक्रमेऽपि स भवद्दत्तं सर्वमपि धनं विनाशयिष्यति । नव्यद्रव्योपार्जनाऽभावाच्च स बहुकालं भृशं दारिद्र्यदुःखवान् भावी । अथायं पुण्यसारोऽपि तथैव भावी । तस्यापि भवदर्पितं धनं नाशं प्रयास्यति, नव्यार्जितद्रव्यस्यापि पुनः पुनर्हानिर्भविष्यति । अथ क्रमात्त्यक्तबाल्यभावौ तौ पित्रा पाठनार्थं विज्ञोपाध्यायस्य समर्पितौ । तत्र स पुण्यसारः सुखेन सकला अपि विद्या अधीतवान् । कर्मसारस्य च बहूपक्रमेणापि अक्षरमात्रमपि नायातम् । किं बहूक्तेन ? स वाचनलिखनाद्यपि कर्तुं न शक्नोति । सर्वथा पशुरिव स निष्प्रज्ञो जातः । अथ क्रमेण तौ द्वावपि यौवनं प्राप्तौ । पितृभ्यां च समृद्धतया द्वाभ्यां महेभ्यकन्याभ्यां सह तौ परिणायितौ । ततो मिथः कलहभीताभ्यां पितृभ्यां तौ द्वावपि द्वादशद्वादशकोटिधनं विभज्य दत्वा पृथक् कृतौ ।

ततस्तौ पितरौ तु प्रव्रज्य स्वर्गं गतौ । अथ कर्मसारः स्वजनादिभिर्वार्यमाणोऽपि केवलं निजबुद्ध्यैव व्यापारं कुर्वन् सर्वमपि स्वधनं विनाशयामास । एवं स्वल्पैरेव दिनैः स्वजनकार्पितद्वादशकोटिमितं धनं तेन निर्गमितम् । पुण्यसारस्यापि जनकार्पितं सकलं धनं तस्करैर्मुषितम् । ततस्तावुभावपि दरिद्रीभूतौ स्वजनैरपि त्यक्तौ । तयोर्द्वयोर्भार्ये अपि क्षुधादिपीडिते स्वपित्रोर्गृहयोर्गते । लोका अपि तयोर्निन्दां चक्रुः,यतः–

धनिकस्यालिकमपि सत्यत्वेन प्रकाशमायाति । तस्यैव दुश्चरणमपि सच्चरणं गीयते लोके ।।

गुणवानपि निगुणं चिय गणिज्जए परिजणेण गयविहवो ।
दक्खत्ताइगुणेहिं अलिएहिंवि गहिज्जए सधणा ।।

ततो निर्बुद्धौ अभाग्यावेताविति लोकैरपमानितौ तौ देशान्तरं गतौ । स्थितौ च तत्र पृथक् पृथक् क्वापि महेभ्यगृहयोरन्योपायाभावाद्भृत्यवृत्त्या । यस्य च गृहे स कर्मसारः स्थितः स व्यवहारी दुष्टः कृपणश्रीरभवत् तेन स तस्य प्रोक्तं वेतनमपि न दत्ते । अमुकदिनेऽहं ते दास्यामीति मुहूस्तं स वञ्चयते स्म । एवं बहुभिरपि दिनैः तेनाद्येन बन्धुना किमपि नार्जितम् । द्वितीयेन च बन्धुना कियदर्जितं, परं प्रयत्नतो गोपितमपि तद्धनं केनाचिद्धूर्तेनापहृतम् । एवं तेनाद्येन बन्धुना नानाविधस्थानेषु भृत्यवृत्त्या धातुवादेन सिद्धरसायनेन रोहणाद्रिगमनेन मन्त्रसाधनेन रुदन्त्याद्यौषधीग्रहणेन चैकादशवारान् महोपक्रमकरणेऽपि कुबुद्ध्यादिना वैपरीत्यविधानेन क्वापि धनं नार्जितं, किन्तु तेन तानि दुःखान्येव केवलं सौढानि ।

अपरेण च पुनरर्जितमपि धनं प्रमादादिनैकादशंवारान्निर्गमितम् । ततोऽत्युद्विग्नौ तौ पोतमारुह्य रत्नद्वीपे गत्वा सप्रत्ययरत्नद्वीपदेव्यग्रे मृत्युमप्यङ्गीकृत्य स्थितौ । अष्टमे चोपवासे नास्ति युवयोर्भाग्यमिति तौ देव्या प्रोक्तौ । तत् श्रुत्वा स कर्मसारस्तु तत उत्थितः । पुण्यसारस्य त्वेकविंशत्योपवासैर्दत्तं तया देव्या चिन्तामणिरत्नम् । तदा पश्चात्तापं कुर्वन् स कर्मसारः पुण्यसारेणोक्तः, भो भ्रात ! त्वं मा विषीद ? एतन्मदीयचिन्तारत्नेन तवाप्यभीप्सितं सेत्स्यतीति । अथ तौ द्वावपि हृष्टौ ततो निवृत्य पोते समारूढौ । अथैकदा रात्रौ च राकाशशाङ्कोदये तयोर्वृद्धेनोक्तं, भो भ्रात ! तच्चिन्तारत्नं त्वं स्फुटीकुरु ? यथा विलोक्यते, किं चन्द्रस्य वा तस्य चिन्तारत्नस्याधिकं तेज इति । तदा दुर्दैवप्रेरितेन पोततटस्थेन तेन लघुबन्धुनापि तद्ररत्नं निजहस्ते गृहीत्वा, क्षणं तत्र रत्नं, क्षणं च चन्द्रे दृष्टिं निदधता पातितं तद्ररत्नं रत्नाकरे निजमनोरथैः सह । ततस्तौ द्वावपि निजमनसोरत्यन्तं दुःखितौ स्वपुरं प्राप्तौ ।

❋ ❋ ❋

चक्रिभोज्यादिरिव नरभवो दुर्लभो, भ्राम्यतां घोरसंसारकक्षे ।
बहुनिगोदादिकायस्थितिव्यायते, मोहमिथ्यात्वमुखचोरलक्षे बु० ॥२॥ [१६५]

व्याख्या- भो भो आत्मन् ! कोऽयं स्वहिते प्रमादः ? *घोरसंसारकक्षे घोरो* महाभयङ्करो यः *संसारो* नरकादिभवभ्रमणपरिवर्तस्तद्रूप एव यः *कक्षः* शुष्कमहारण्यस्थली तस्मिन्, *भ्राम्यतां* भ्रमणशीलानां प्राणिनां *नरभवोऽ*कृतधर्माणां भूयो मनुष्यजन्मप्रापणं । *चक्रिभोज्यादिरिव* चक्रेण जयतीति *चक्री* षट्खण्डभरताधिपो ब्रह्मदत्ताभिधो द्वादशस्तद्गृहे स्वसेवकविप्रकारितभोजनस्य *भोज्यादिरिव* भुज्यत इति *भोज्यो* भक्षणीयः पदार्थः स आदिर्यस्य स तथा, *आदि*ना विप्रीभूय भोजनचाणक्यपाशकधान्यराशि-सर्षपोद्धारभूपपुत्रद्यूतवणिग्रत्नानयनकूर्मशरच्चन्द्रदर्शनसमिलायुगरन्ध्रप्रवेशाद्यसंभवितकार्याणि ग्राह्याणि तैरिव *दुर्लभो* दुःप्राप्यो भविष्यति । किंविशिष्टे संसारकक्षे ? *बहुनिगोदादिकायस्थितिव्यायते बह्व्यो*ऽति-प्रभूतानन्तासंख्यकालपरिमाणवत्यो निगोदादिकायस्थितयः *निगोदः* प्रोक्तरूपः स आदिर्यासां ताश्च ताः *कायस्थितयश्च, आदि*ना पृथिव्यप्तेजोवायुवनस्पत्यादिकायस्थितयो ग्राह्याः, ताभि*र्व्यायते* विविधविशेषत-यायते प्रदीर्घविशाले, पुनः किंविधे ? *मोहमिथ्यात्वमुखचोरलक्षे मोहमिथ्यात्वे* पूर्वोक्ते ते *मुखे* प्रधाने यस्मिन् समुदाये, *चोर*स्तस्करवृन्दं तस्य *लक्षं* पदं निवासस्थानं यस्मिन्नीदृशे संसारकक्षे भ्राम्यतां पुनर्नृभवलाभो दुर्लभोऽतः प्राप्तं सफलयेत्यर्थः ॥२॥

आवश्यकनिर्युक्तौ चक्रिभोजवृत्तं–

ब्रह्मदत्तस्यैकः कार्पटिकोऽवलगकः, बह्वीष्वापत्सु अवस्थासु च सर्वत्र सहाय आसीत्, स च राज्यं प्राप्तः, द्वादशवार्षिकोऽभिषेकः कृतः, कार्पटिकस्तत्र प्रवेशमपि न लभते, ततोऽनेनोपायश्चिन्तितः, उपानहो ध्वजे बद्ध्वा ध्वजवाहकैः समं प्रधावितः, राज्ञा दृष्टः उत्तीर्णेनावगूढः, अन्ये भणन्ति–तेन द्वारपालान् सेवमानेन द्वादशे संवत्सरे राजा दृष्टः, तदा राजा तं दृष्ट्वा संभ्रान्तः, अयं स वराको मम सुखदुःखसहायकः, अधुना करोमि वृत्तिं, तदा भणति–किं ददामीति, स भणति–देहि करभोजनं ( करतया यद्भोजनं ) गृहे गृहे यावत् सर्वस्मिन् भरते, यदा निष्ठितं भवेत्तदा पुनरपि तव गृहादारभ्य भुञ्जे, राजा भणति–किं ते एतेन ?, देशं तुभ्यं ददामि, ततः सुखं छत्रच्छायायां वरहस्तिस्कन्धगतो हिण्डिष्यसे, स भणति–किं ममैतावता आडम्बरेण ( उपाधिना ) ?, तदा तत्तस्मै दत्तं ( कर ) भोजनं, ततः प्रथमदिवसे राज्ञो गृहे जिमितः, तेन तस्मै युगलं दीनारश्च दत्तः, एवं स परिपाट्या सर्वेषु राजकुलेषु द्वात्रिंशति वरराज्यसहस्रेषु तेषां च ये भोजिकाः ( ग्रामाधिपतयः ), तत्र च नगरेऽनेकाः कुलकोट्यः, नगरस्यैव स कदाऽन्तं करिष्यति ?, तदा ग्रामेषु तदा पुनर्भरतवर्षस्य, अपि स व्रजेदन्तं न च मानुष्याद्भ्रष्टः पुनर्मानुष्यं लभते ? ।

❋ ❋ ❋

## तल्लब्धेऽप्यार्यक्षेत्रं दुर्लभमतस्तदाह–

लब्ध इह नरभवोऽनार्यदेशेषु यः, स भवति प्रत्युतानर्थकारी ।
जीवहिंसादिपापाश्रवव्यसनिनां माघवत्यादिमार्गानुसारी, बु० ॥३॥ [१६६]

व्याख्या- इह धर्मसाधनसमस्ततायां केनापि पुण्यप्रभावेण *आनार्यदेशेषु* न आर्या हिंसाद्यधर्माचरणप्रधाना ये *देशाः* शकयवनतुरस्कानादयो म्लेच्छजननिवासभूमयस्तेषु, *यो नरभवो* यो

मनुष्यावतारः, *लब्धः* प्राप्तः, *स* नरजन्मलाभः *प्रत्युत* मनोऽभीष्टलाभविपर्यासेन *अनर्थकारी* जीवहिंसादिपापहेतुभवनेन सद्गतिलाभं विनाश्य नरकादिदुर्गतिकारी *भवती*त्यतस्तेन लब्धेनापि किं ? स तु तेषां *जीवहिंसादिपापाश्रवव्यसनिनां* जीवहिंसनानृत-भाषणचोरिमैथुनमहापरिग्रहादिकरणमेव व्यसनं महाविपत्तिकारिण्यासक्तिर्विद्यते येषां तेषां, प्रोक्तलाभो *माघवत्यादिमार्गानुसारी माघवती* सप्तमी नरकपृथिवी सादिर्यासां ता माघवत्यादयः तास्ववतारमनुसरतीत्येवं शीलं यस्य लाभस्य । शेषं सुगमं । अतोऽनार्येषु नरभवलाभो निरर्थक इत्यर्थः ।।३।।

आर्यदेशस्पृशामपि सुकुलजन्मनां, दुर्लभा विविदषा धर्मतत्त्वे ।
रतपरिग्रहभयाहारसंज्ञार्तिभि-र्हन्त मग्नं जगद्दुःस्थितत्वे, बु० ।।४।। [१६७]

व्याख्या- *आर्यदेशस्पृशामपि* धर्मप्रवृत्तियुक्तं क्षेत्रं मगधादिकं ये स्पृशन्ति स्वावतारतः प्राप्नुवन्ति तेषामपि, तर्ह्यन्येषां किं प्रोच्यते? तत्रापि सुतरां दुर्लभो *सुकुलजन्मनां* शुद्धदानादिधर्मप्रवृत्तिवत्कुलेषु लब्धजन्मानस्तेषामपि, *धर्मतत्त्वे*ऽयमेवंविधो धर्मो धर्मत्वमर्हति नान्यथेति, धर्मपरमार्थनिर्धारणे *विविदिषा* विज्ञातुमिच्छोद्भूतिरपि *दुर्लभा* वर्तते तर्हि तथाप्रकारेण धर्मसंपादनस्य किं प्रोच्यते ? *हन्ते*ति हे चेतन ! *रतपरिग्रहभयाहारसंज्ञार्तिभिः रतं* मैथुनं, *परिग्रहो* ममत्वं, *भयानि* इहलोकभयादीनि सप्तविधानि, *आहारो* भोज्यानि क्षीरदधिघृतौदनादीनि, *संज्ञा* तेषां रतादीनां तीव्रतीव्रतरतीव्रतमाद्यभिलाषः तेनोत्पादिता *अर्तयो* महापीडास्ताभिः कृत्वा, *जगद्वि*श्ववासिप्राणिगणः *दुःस्थितत्वे निमग्नं* जगति दुःखाय स्थितं दुःस्थितं तद्भावस्तत्त्वं तस्मिन् धर्मदारिद्र्यरूपजलधौ *निमग्नं* निमज्जितम् । किं धर्मवस्तु ? किं स्वरूपं ? किं मूलं ? कः समाचरणविधिः ? किं फलं ? इत्यादि विचारशून्यत्वेन ब्रुडितं वर्तते, मा त्वमेवंविधो भव प्रदर्शितविचारान् कुर्वन् प्रवर्तस्वेत्यर्थः ।।४।।

परिग्रहे तिलकश्रेष्ठीकथा वाच्या–

अचलपुरेऽभूत्तिलकः श्रेष्ठी तिलकः समृद्धजनराशेः । नानाधान्यान्यसत्कौ संजग्राहाखिलपुरेषु ।। 1 ।।
गोधूमचणकचीनकमुद्गमुकुष्टातसीतिलादीनि । साद्धिकया शस्यानि प्रददे सार्धं च जग्राह ।। 2 ।।
अन्नैरन्नं जगृहे गृहे बहिर्वा धनैश्च धान्यानि । जीवाजीवैरपि स प्रभूतशस्यानि मीलितवान् ।। 3 ।।
दुष्कालेऽपि कराले धान्योपात्तैर्घनैर्धनैर्लोकात् । स हि धान्यमूढकालीमबन्धयत् पुनरपि सुकाले ।। 4 ।।
एवं वर्धितलोभः प्रभूतलाभात्सुभिक्षदुर्भिक्षे । न हि कीटकोटिहिंसामजीगणत्स्वल्पिकामपि सः ।। 5 ।।
अतिधान्यभरारोपात् खरकरभादीनपीमयद्बाढम् तद्वद्बहुधा नवधापरिग्रहाग्रहपरः समभूत् ।। 6 ।।
कोऽप्यन्यदा तदग्रे वदन्निमित्तज्ञ ऐषमः समये । भावि महादुर्भिक्षं श्रेष्ठी तद्वाक्यमाकर्ण्य ।। 7 ।।
सर्वद्रव्यबलेनागृह्णाद्धान्यानि सर्वभेदानि । वृद्ध्याऽप्याकृष्य धनं प्रगुणकणैर्भरितवान् कोशान् ।। 8 ।।
तदभावे स्वगृहानप्यबीभरल्लोभलोलुभ (प) मनस्कः । कौशिक इवान्धकारं दुर्भिक्षागमनमैतत्सः ।। 9 ।।
तावत्प्रवृट्समयात्प्रागेवावर्षदम्बुभृत्पूरः । धाराशरप्रपात्तैर्हृदयं प्रविदारयन्नस्य ।। 10 ।।
अहह मम मुद्गमाषप्रमुखान्नानि प्रणश्य यास्यन्ति । कथमेघनोवृष्टः पापिष्ठः कष्टकृन्मनसः ।। 11 ।।

किं कुर्वे कस्यैतद्वच्मीत्यादि स्वचेतसि ध्यायन् । प्रापाकस्मान्निधनं पापात्मा हृदयसंस्फोटरात् ।। 12 ।।
ये निःपरिग्रहाः – स्युः संतोषसुधारसेन संसिक्ताः । ते स्युर्मुक्तिनितम्बिन्युरः स्थलालङ्कृतौ हारः ।। 13 ।।
नरकप्रथमावन्यामज्ञानोपहतधीरस्वावगमत् । एवमसंतुष्टहृदामस्ति सुखं नैव कुत्रापि ।। 14 ।।

आवश्यकनिर्युक्तौ भये सोमिलकथा–

द्वारिकायां वासुदेवो राजा, वसुदेवस्तस्य पिता देवकी माता, सा काञ्चिन्महिलां पुत्राय स्तन्यं ददतीं दृष्ट्वाऽधृतिं प्रगता, वासुदेवेन पृष्टा–अम्ब ! किमधृतिं प्रकरोषि ?, तया भणितम् जात ! न मम पुत्रभाण्डेन केनचित् स्तन्यं पीतमिति, वासुदेवेन भणिता–माऽधृतिं कार्षीः, इदानीं तव देवतानुभावेन पुत्रसंपत्तिं करोमि, देवताऽऽराद्धा, तया भणितं–भविष्यति तस्या दिव्यपुरुषः पुत्र इति, तथैव जातं । जातस्य च तस्य गजसुकुमाल इति नाम कृतं । स च सर्वयादवप्रियः सुखं सुखेनाभिरमते, सोमिलब्राह्मणदुहिता च रूपवतीति परिणायितः, अरिष्टनेमेश्चान्तिके धर्मं श्रुत्वा प्रव्रजितः, गतश्च भगवता सार्धं, धिग्जातीयस्याप्यप्रीतिकं जातं । कालेन पुनर्भगवता सार्धं, द्वारिकायामागतः ।

श्मशाने च प्रतिमां स्थितः दृष्टश्च धिग्जातीयेन, ततः कुपितेन कुण्डिकाकण्ठं ( पालीं ) मस्तके दत्त्वाऽङ्गारैः तस्य भृतः, तस्य च सम्यगध्यस्यतः केवलं समुत्पन्नम्, अन्तकृच्च संवृत्तः । वासुदेवश्च भगवतोऽरिष्टनेमेश्चरणयुगलं नत्वा शेषांश्च साधून् वन्दित्वा पृच्छति–भगवन् ! क्व गजसुकुमाल इति ?, भगवता कथितं–श्मशाने प्रतिमया स्थित आसीत्, वासुदेवस्तत्रैव गतः, मृतो दृष्टः, कुपितेन भगवान् पृष्टः–केनैष मारित इति ?, भगवता भणितं–यस्यैव त्वां नगरीं प्रविशन्तं दृष्ट्वा शीर्षं स्फुटिष्यतीति । धिग्जातीयोऽपि मानुषान् प्रस्थाप्य यावद्याति तावद्दृष्टोऽनेन प्रविशन् वासुदेवः, भयसंभ्रान्तस्य च तस्य शीर्षं चटदिति शतशर्करं स्फुटितमिति ।

भर्तृहरिचरित्रं तु मैथुने–

अवन्त्यां भर्तृहरी राजा । तत्र विप्रो मुकुन्दो निःस्वो हरसिद्धिं लक्ष्मीहेतव आरराध । तया तुष्टया तस्याल्पपुण्यं मत्वाऽमरफलं ददे । प्रोक्तं च–गृहाणेदं, अनेन भक्षितेन बहु जीव्यते, नीरोगता च भवति । तव भाग्यं नास्त्यत इदं दत्तमस्ति । स च विप्रो गृहे नीत्वा भोक्तुमिच्छन् दध्यौ–इदं फलं यो जगदाधारः स्यात्तस्मै दीयते । एवं विमृश्य राज्ञे दत्तम् । राज्ञा स्वपट्टदेव्यास्तत्प्रभावमुक्त्वा दत्तम् । तया स्वोपपतेर्हस्तिपकस्य प्रभावकथनपूर्वं दत्तम् । कुन्तारेण ध्यातं–मम बहुजीवितेन किम् ? अतो मयाऽभीष्टाया वेश्याया दीयते । ततस्तस्या दत्तम् । वेश्यया चिन्तितं–ममानेन भक्षितेन किम् ? प्रजानाथस्य ददामि । इति विचार्य भर्तृहरये दत्तम् । भर्तृहरिस्तत्फमुपलक्ष्य पप्रच्छ– कुतः समागतमिदम् ? तया नृपदण्डभयाद्यथातथं प्रोक्तम् । ततो हस्तिपकाय पृष्टं तेनापि ताडनभयेन राज्ञीनाम प्रोक्तं । ततो नृपस्तां पप्रच्छ । सा तु भयविह्वला किमप्युत्तरकरणेऽक्षमा जाता । तामवध्यां मत्वा संसारासारतां दधत् भणति स्म–

यां चिन्तयामि सततं मयि सा विरक्ता साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परितुष्यति काचिदन्या धिक् तां च तं च मदनं च इमां च मां च ।।
संमोहयन्ति मदयन्ति विडम्बयन्ति निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।
एताः प्रविश्य सदयं हृदयं नराणां किं नाम वामनयना न समाचरन्ति ।।

एवं ध्यात्वा तृणवद्राज्यं मालवकं त्यक्त्वा नृपो व्रतं जग्राह । योगिसन्न्यासव्रतं कृत्वा भुवि पर्यटन्

क्वचिन्नगरोद्याने एकत्र तापसस्थले गतः । तापसं नत्वा पुरो निषण्णः । तेनानादरे कृते नृपो दध्यौ नूनमयं मायावी वर्तते, प्रच्छन्नमस्य मायां विलोकयामि । ततो नृपो रहःस्थितः । रात्रौ तद्वनवासियोगिना स्वशिखात एकां डब्बिकामाकृष्य तामुद्घाट्य मध्ये जलाञ्जलिः क्षिप्तः । तत्प्रभावात्तत एका सुरूपा स्त्री निःससार । तया सह भोगं विधाय स सुप्तः । ततः स्त्रिया स्ववेणीरक्षित– समुद्गकीतो मन्त्रितजलाञ्जलिच्छोटनेन देवकुमारः प्रकटीकृतः । तेन सह विलस्य पुनस्तं विगोप्य समुद्गकीं वेणीस्थामकरोत् । विगतनिद्रो योग्यपि तथा चकार । तच्चरित्रं सर्वं दृष्ट्वा नृपेण ध्यातम्–

मत्तेकुम्भदलने भुवि सन्ति शूराः केचित्प्रचण्डमृगराजवधेऽपि दक्षाः ।
किं तु ब्रवीमि बलिनां पुरतः प्रसह्य कन्दर्पदर्पदलने विरला मनुष्याः ।।

इति विचार्य श्रीपुरोद्याने गत्वा तरोरधो निद्रया सुप्तः । इतश्च तत्पुरनृपोऽपुत्रको मृतः । प्रकृतिभिः पञ्च दिव्यानि कृतानि । तानि नृपान्तिक आगतानि । नृप उत्थाय तेषां मन्त्र्यादीनां पुर आचष्टः–न मम राज्येन प्रयोजनम् । ततः सर्वे पौरा जगुः– अस्माकं जीवितदानं देहि कृपया । नृपस्तत्प्रार्थनामङ्गीकृत्य तद्राज्यं न्यायेन चकार । पूर्वभूपपुत्रीं सर्वैः प्रसह्य स परिणयितः ।

सापि नवयौवनैकदा गवाक्षस्था एकं श्रेष्ठिपुत्रं वीक्ष्य नेत्रबाणेन तद्धृदयं जघान । सोऽपि राज्ञीमिलनोत्सुक एकां नरप्रमाणां दीपसहस्रमालां दीपिकां मध्यसुषिरां कारयित्वा स्वयं मध्ये स्थितः । ततः संकेतितनरैर्नृपाय तद्दीपिकायाः प्राभृतं कृतम् । नृपेण स्वान्तःपुरे मोचिता । ततः स समयं प्राप्य मध्यतो निःसृत्य राज्ञया सह विषयान् भुक्त्वा पुनस्तन्मध्ये प्रविवेश । अन्यदा तन्नरवाससो दवरको दीपिकायाः काष्ठसन्धितो बहिर्निर्गतः । तं नृपो पश्यति स्म । यथा यथा तमाकर्षति तथा तथा तं दवरकं वृद्धिमन्तं दृष्ट्वा तन्मध्ये जारनरं निश्चित्य मौनमाधाय स्थितः । तदनु स्वगृहे पट्टदेवीहस्तेन रसवतीं कारयित्वा स योगी भोजनाय निमन्त्रितः । ततः षट् पत्रावलीर्मण्डयित्वा नृपेण भोजनार्थमुपविशन् योगीं प्रोचे–स्वामिन् ! स्वशिखागतसमुद्गकीमध्यात्तां स्त्रियं निष्कासय । तेन भयात्तथा कृतम् । ततस्तां स्त्रियं जगाद राजात्वमपि तं पुरुषं पूर्ववत् प्रकटीकुरु तयापि कृतम् । ततः स्वस्त्रियं प्राह–हे प्रमदे ! एतद्दीपिकातस्त्वत्पतिं बहिर्निष्कासय । किमर्थं कारागारे क्षिप्तोऽस्ति ? । तेन सार्धं भोजनं कुरु । तयापि भूपोक्तं कृतम् । ततस्तान् भोजनेन संतोष्यान्तवैराग्यपरो नृपो धिग्धिग्विषयानिति पौराणां पुर उद्घोष्य व्रतं निश्चलं जग्राह । एकेनैव व्रतेन देवत्वं प्राप्तः ।

आहारसञ्ज्ञायांकथारत्नाकरोक्ता द्विजकथा–

एकेन द्विजेन धनिना बहवो द्विजा भोजनाय स्वगृहे आनीताः तेषां मध्ये ये धनिनस्ते गृहमध्ये भोक्तुमुपवेशिताः । ये मध्यमास्ते मध्यस्थाने । ये निर्धनास्ते मण्डपे बहिः । तदा द्विजेन सर्वेषां द्विजानां खण्डक्षीरघृतमण्डकवटकवर्यशाकादि परिवेष्यते । तदा बहिः स्थिता द्विजाश्चिन्तयन्ति–मध्यस्थानां द्विजानां वर्या रसवती परिवेष्यमाणाऽस्ति, न तथाऽस्माकं ततस्तेषां खेदोऽभूत् ।

इतो गृहस्वामिना द्विजेन सर्वे पूर्णहृदया दृष्ट्वोक्तम्–यत एकं वटकं गृह्णाति तस्मै स्पर्द्धकं दास्येऽहम् । ततो बहुषु वटकेषु भक्तेषूक्तम्–य एता मण्डका गृह्णाति तेषां स्वर्णकं दास्ये एवं प्रोचं– प्रोचम् आकण्ठं सर्वे जेमिताः । तत एको विप्रो बहिर्भोक्तुमुपविष्टोऽतीव भृतोदरस्तापेनाक्रान्तो जलाशये प्रविष्टः । घटीद्वयादनुपूर्वप्रविष्टमहिषस्योदरं जलमध्ये तस्य हस्ते लग्नं ततो गृहमध्यजेमितद्विजोदरभ्रान्त्या स द्विजः

प्राह–भो द्विज ! त्वं माहिलओं अथवा बाहिरलो (मध्यभुक्त बहिर्भुक्तः) एवं स्वोदरेऽतीवभृतेऽपि स द्विजोऽतृप्तोऽसिद्धितया गृहमध्यभुक्तद्विजान् सस्मार । एवमतृप्तो द्विजोऽत्र्यां मृत्वा तिर्यग्योनौ उत्पन्नः ।

❋ ❋ ❋

विविदिषायामपि श्रवणमतिदुर्लभं धर्मशास्त्रस्य गुरुसन्निधाने ।
वितथविकथादितत्तद्रसावेशतो विविधविक्षेपमलिनेऽवधाने, बु० ॥५॥ [१६८]

व्याख्या- *विविदिषा*ऽनन्तरोक्तरूपा तस्यां, जातायाम*पि* सत्यां *गुरुसन्निधाने* *गुरु*र्यथार्थधर्मज्ञो धर्मकर्ता धर्मोपदेष्टा च बहुश्रुताचार्यादिस्तत्सन्निधाने तत्समीपे तन्मुखाद्विनिर्गच्छत एवंविधस्य *धर्मशास्त्रस्य* धर्मस्वरूपविधिफलादिप्रतिपादकं यच्छास्त्रं तस्य *श्रवणं* विनयबहुमानादिपुरस्सरं विधिना समाकर्णनं तद*तिदुर्लभं* शुश्रूषुभिरपि न प्राप्यते, तदभावे क्व धर्मप्राप्तिः । श्रवणदौर्लभ्ये हेतुं दर्शयन्नाह- *वितथविकथादितत्तद्रसावेशतो वितथं* विपरीतप्रतिपादनपरं मिथ्याशास्त्रं, *विकथा* स्त्रीभक्ष्यराजदेशचौर-कामादिरूपसरसनीरसेष्टतानिष्टतासदसद्व्यवहारचातुरीविलासादीनां क्रमेण प्रतिपादकानां ग्रन्थानां जनानां चालापरूपा वा, आदिना गीतनृत्यादयो ग्राह्याः, *तत्तत्*तेषां तेषां श्रवणदर्शनाभ्यामुद्भूतो यो *रसः* प्रेमा तेन कृतो य *आवेशो* हृदये व्यासक्त्यानुप्रवेशोऽहङ्कारो वा तस्मात्, *विविधविक्षेपमलिने विविधा* अनेकरूपा ये *विक्षेपा*श्चित्तस्य बहिःसमाकर्षकमनःप्रचाराः तै*र्मलिने* समौत्सुक्याशुद्धे*ऽवधाने* श्रवणोपयोगे सति भाव*श्रवणं दुर्लभ*मित्यर्थः॥५॥

❋ ❋ ❋

**अथ संयमे वीर्योल्लासदौर्लभ्यमाह–**

धर्ममाकर्ण्य संबुध्य तत्रोद्यमं कुर्वतो वैरिवर्गोऽन्तरङ्गः ।
रागद्वेषश्रमालस्यनिद्रादिको, बाधते निहतसुकृतप्रसङ्गः, बु० ॥६॥ [१६९]

व्याख्या- पुण्यबलेन भावात् *धर्ममाकर्ण्य* धर्मश्रवणं विधाय *संबुध्य* भवनैर्गुण्यं ज्ञात्वापि *तत्रोद्यमं कुर्वतो* गृहीतदीक्षो भव्यजीवः संयमोद्यमं कुर्वन्नपि श्रुतिसंयमोद्यमरूपदुर्लभत्रयं प्राप्तोऽपि तस्य *रागद्वेषश्रमालस्यनिद्रादिको रागो* देहोपधिशिष्याहाराद्युपरि मूर्च्छापरिणामः, *द्वेषः* कृत्यकरणे परीषहोपसर्गादिसहनेऽरुचिः, *श्रमः* संयमव्यापारात्क्लान्तिः, *आलस्यं* तपोविनयवैयावृत्त्यादिष्वनुत्साहः, *निद्रा* स्वाध्यायाद्यवसरे जातेऽपि स्वापः, *आदि*पदादक्षमानार्जवामार्दवादयो ग्राह्याः, *अन्तरङ्ग* आभ्यन्तरीयः *वैरिवर्गः* प्रतिपक्षवृन्दं, कीदृशोऽयं ? *निहतसुकृतप्रसङ्गः नितरां हतो* विनाशितः *सुकृतप्रसङ्गः* शुभकरणिविस्तरो येन स तथाविधः *बाधते* संयमवीर्योल्लासभङ्गं विधत्तेऽतो दुर्लभ इत्यर्थः ॥६॥

एतद्विषये मरीचिकथा उपयुक्ता यथा दा नादिकुलकटीकायां –

श्रीमदयोध्यायां श्रीयुगादिदेवकृते कृतायां श्रीऋषभस्वामिसूनुर्नवनिधीश्वरश्चतुर्दशरत्नाधिपति-र्भरतनामा चक्रवर्त्यभूत् । तत्र नयसारो ग्रामचिन्तकजीवः प्रथमस्वर्गाच्च्युत्वा मरीचिव्याप्तदेहत्वान्मरीचिनामा तस्य भरतस्य पुत्रो जातः । क्रमेण वर्धित उद्यौवन आद्ये समवसरणे प्रभोर्महिमानं देवैः क्रियमाणं निरीक्ष्य स्वाम्यन्तिके धर्मं चाकर्ण्य सम्यक्त्वलब्धधीर्व्रतमाददे । सम्यग्ज्ञानवान् पञ्चसमितित्रिगुप्तियुक्तो निष्कषायो

जितेन्द्रियः स्थविराणां पुरोऽङ्गानि पठन्नेकादशाङ्गपाठी ऋषभस्वामिना सार्धं विहरति सम, एवं कियान् कालो गतः ।

एकस्मिन् दिने स मरीचिनामा साधुः स्वेदार्द्रीभूतशरीरस्तृषार्तो ग्रीष्मर्तुना पीडित उष्णांशुखर–किरणतप्तगात्रश्चारित्रावरणोदयादिति चिन्तयति स्म, किं त्यजामि व्रतं? परं त्यक्तव्रतो लोके लज्जामि, अतोऽयं मयोपायो लब्धो येन व्रते कल्मो न भवति, अमी साधवस्त्रिदण्डविरताः, दण्डैर्निर्जितस्य मे करे त्रिदण्डलाञ्छनं भवतु, लुञ्चितकेशा मुनयः, मम क्षुरमुण्डिते शिरसि कलङ्कसूचनाय शिखा भवतु । अमी महाव्रतधराः, ममाणुव्रतानि भवन्तु । अम्युपानहरहिताः, मम पादत्राणं भवतु । मुनियोऽमी निष्कञ्चनाः मम मुद्रिकामात्रेण सकिञ्चनत्वं भवतु । साधवोऽमी विगतमोहाः, मम मोहच्छत्रस्य छत्रं भवतु । साधवोऽमी शीलेन सुगन्धाः, निःशीलत्वेन दुर्गन्धत्वान्मे श्रीखण्डतिलकं भवतु । अमी शुक्लवस्त्रा निष्कषायाश्च महर्षयः मम कषायिणः कषायाणि वासांसि भवन्तु । अमी चारित्रेण पवित्रगात्राः, मम तु मितजलेन स्नानादिकं भवतात् । एवं स्वनिर्वाहहेतवे लिङ्गं विकल्प्य परिव्राज्यं प्रतिपन्नवान् मरीचिः क्लेश कातरत्वात् ।

❋ ❋ ❋

चतुरशीतावहो योनिलक्षेष्वियं, क्व त्वयाकर्णिता धर्मवार्ता ।
प्रायशो जगति जनता मिथो विवदते, ऋद्धिरसशातगुरुगौरवार्ता, बु० ॥७॥ [१७०]

व्याख्या- *अहो !* अपूर्वं महाश्चर्यं हृदये चिन्तय । किं तदित्याह–हे चेतन ! *इयम*नन्तरोक्ता *धर्मवार्ता* धर्ममयवृत्तान्तः *चतुरशीतौ योनिलक्षेषु* परिभ्रमणं कुर्वता *त्वया*त्मना *क्व* कस्यां योनौ *आकर्णिता* श्रवणविषये कृता, न कस्मिन्नपि कुतो न श्रुता । यतो *जगति* विश्वे *जनता* प्राणिगणः *प्रायशो* बाहुल्येन *मिथः* परस्परं *ऋद्धिरसशातगुरुगौरवार्ता* ऋद्धिर्धनकुटुम्बादिसंपद्, *रसा* मधुरादीनां स्वादिष्टता, *शाता* विषयादिजनितसुखशीलता, तेषां *गुरु* महत् *यद्गौरवं* सबहुमानप्रेमपरत्वं तेनै*वार्ता* प्रपीडिता *विवदते* आलापसमालापादि कुरुतेऽतः कारणाभावात्क्व तव धर्मप्राप्तिरित्यर्थः ॥७॥

रसे मंगूसूरिकथा–

मथुरायां मङ्गुनामाचार्यः साधुपञ्चशतीपरिवृत आस्ते । जनास्तदुपदेशगुणेन रञ्जितास्तदा तं युगप्रधानमाहुः । यतः–

> विहाय कार्यान्तरमन्तरायमन्याननादृत्य मुनीनशेषान् ।
> भक्त्या वशीभूत इवातिभूरिः, सूरिं सिषेवे हि जनस्तमेव ॥

ते जनाः स्निग्धमधुराद्यशनादिभिर्नित्यं सेवन्ते । क्रमेण कर्मवशाद्रसलौल्यं जातं, तेन नित्यावासं प्राप । ततः कालान्रे सातगौरवाद्विहारोपदेशादिक्रियालसो जातः, ऋद्धिगौरवान्मिथ्याभिमानी यथार्हविनया–द्यलसोऽभूत्, रसगौरवात्तु क्षेत्रकुलादिसंसक्तीभूय गोचरीगवेषणालसो जातः । क्रमेण तत्रैव मृत्वा नगर–निर्धमनप्रत्यासन्नयक्षायतनाधिष्ठायकत्वेन व्यन्तरो जज्ञे । विभङ्गेनावलोक्य पूर्वभवं सञ्जातपश्चात्तापोऽधुनेदं प्राप्तकालमिति संचिन्त्य साधूनां बहिर्गच्छतां पुरतो यक्षप्रतिमामुखान्महतीं जिह्वां निःसारयामास । प्रतिदिनमेवं करोति । एकदा साहसिकसाधुनैकेन पृष्टम्–"कस्त्वं भो ? कथं रसनामाकृष्य दर्शयसि ?" ततः सविषादं यक्षः प्रकटीभूयोवाच–"अहं धर्माध्वजङ्गभवद्गुरुरार्यमङ्गुनामा प्रमादान्मूलक्षतिं प्राप्य महाव्रतभङ्गं विधायात्र पुरनिर्धमने

यक्षो जातः । भवद्भिरपि महारसलांम्पट्यपरैर्न भाव्यं, जिह्वास्वादेन पतितोऽहम् इति ज्ञापनायैवं करोमि'' इति श्रुत्वा ते सविस्मया रसत्यागतपस्युद्यतधियो बभूवुः ।

ऋद्ध्याम् भरतेश्वरवृत्तौ उक्ता दशार्णभद्रनृपकथा–

अत्रैव भरते दशार्णपुरपत्तने दशार्णभद्रभूपो भुवं शशास । अन्यदा दशार्णपुरोपान्तस्थ –दशार्णगिरौ श्रीवीरः सार्वः समवससार । देवैः स्वर्णरत्नरजतवप्रमयं योजनमितं कपिशीर्षश्रेणीरोचिष्णु चतुःप्रतोलीचारु समवसरणं कृतं । तत्रोपविष्टः प्रभुश्चतुर्मुखश्चतुस्त्रिंशदतिशयशालीचतुष्षष्ठीन्द्रादिद्वादशपर्षदामग धर्मोपदेशदत्ते । तदोद्यानपालो भूपाग्रे श्रीवीरागमं ज्ञापयामास । राजा पारितोषिकं ददौ । तत उत्थाय सप्ताष्टपदानि संमुखं गत्वा प्रभुं स्तौति ।

स्तुत्वेति दध्यौ नृपः–प्रातर्विस्तरादहं प्रभुं वन्दिष्ये । यथा पुरा केनापि न वन्दितः भूपो लोकानां वीरागमनज्ञापनाय पुरे पटहं दापयामास । पुरं पताकातोरणवन्दनमालादिरम्यं दन्दह्यमानागुरु–कर्पूरव्याप्तनभोमण्डलं चाकारयत् । प्रातः सर्वशृङ्गारसारः सिन्धुरारूढो राजा सज्जीबभूव । तत्राष्टादशसहस्र गजाः, चतुरशीतिलक्षाणि वाजिनः, २१ सहस्र रथाः, ९१ कोटि पत्तयः, १६ सहस्र ध्वजाः, मेघाडम्बरछत्राणि पञ्चशतानि, ६९००० श्रीकर्यः, ५०० राज्ञः सुखासनारूढाश्चेलुः । सामन्तसचिवादयोऽपि सशृङ्गाराश्च । स्थाने स्थाने गीतनृत्यादीनि कार्यन्ते । लोका अपि स्वस्वर्द्धिमान –शृङ्गाराश्चेलुः, राजापीदृग् परिवारशाली यांचकेभ्यो रूप्यस्वर्णदुकूलादि दानं ददानः पुष्पप्रकरशोभिराजपथे गर्वाज्जगदपि तृणं मन्यमानः छत्रशाली प्रभुं नन्तुं चचाल । दशार्णाद्रिसमीपे ययौ । ततो यानानि संस्थाप्य तत्र पञ्चाभिगमपूर्वं प्रभुं प्रदक्षिणीकृत्य यथोचितस्थानमुपाविशत् राजा । तदा ह्यष्टो राजा दध्यौ–यथा सर्वर्द्धया प्रभुर्मया नेमे, तथा न केनापीन्द्रादिना चक्रिणा वा वन्दितो भावी । तदा दशार्णभद्रस्य गर्वं सौधर्मेन्द्रोऽवधेर्ज्ञात्वा दध्यौ अहो उत्तमोऽयं भूप एवं गर्वं धत्ते न तद्वरं, यतो लोके गर्वः श्रेष्ठो न । जिनानामनन्तगुणानां सर्वतः पूजा न केनापि कर्तुं शक्यते। ततः शक्रेण भूपगर्वोत्ताराय व्योम्नि दिव्यशक्त्या ६४ सहस्र गजा विचक्रिरे । तत्रैकैकहस्तिनः ५१२ मुखानि । मुखे मुखेऽष्टौ दन्ताः । दन्ते दन्तेऽष्टौवाप्याः । वाप्यां वाप्यामष्टकमलानि । कमले कमले एकैकैव कर्णिका । कर्णिकायामिन्द्रोपवेशाय सिंहासनं तत्रेन्द्रोऽग्रमहिषीयुत उपविशति । कमले कमले लक्षपत्राणि । पत्रे पत्रे द्वात्रिंशद्देवदेवीरचितानि ३२ बद्धनाटकानीन्द्रैः सर्वै कार्यन्ते । प्रथममेकगजे दन्तसंख्या ४०९६, एकगजे वाप्यः ३२७६८, एकगजे पद्मानि २६२१४४, कर्णिकाशक्रोपविशनप्रासादयोः सङ्ख्या २६२१४४, एकगजे पद्मदलानि २६२१४४०००००, एकगजे द्वात्रिंशद्बद्धनाटकसङ्ख्या ८३८८६०८००००० । अतः परं सर्वगजसंख्या ६४००० एकगजमुखानि ५१२ । ३ कोटि २७ लक्ष ६८ सहस्रं मुखसर्वसङ्ख्या । गजस्य एकमुखे ८ दन्ताः । २६ कोटि २१ लक्ष ४४ सहस्रं सर्वगजदन्तसङ्ख्या, दन्ते दन्ते वाप्यः ८ । २०९ कोटि ७१ लक्ष ५२ सहस्रं सर्वगजवापीसङ्ख्या । वाप्यां वाप्यां ८ कमलानि १६७७ कोटि ७२ लक्ष १६ सहस्र सर्वगजकमलसङ्ख्या । कमले कमले लक्षपत्राणि १६ शतलक्षकोटि ७७ लक्षकोटि ७ सहस्रकोटिः १६० कोटयः सर्वगजपत्रसङ्ख्या । पत्रे पत्रे बत्रीसबद्धनाटकं ५३६८ कोटाकोटि ७० लक्षकोटि ९ सहस्रकोटि १२० कोटयः, एवं सर्वमीलने सर्वगजनाटकसङ्ख्या १६ शतलक्षकोटि ७७ लक्षकोटि ७२ सहस्रकोटि १६० कोट्यः कर्णिका । १६७७ लक्षकोटि ७२ सहस्रंकोटी १६० कोटय जिनप्रासादाः । १६७७ कोटि ७२ लक्ष

१६ सहस्रं इन्द्राः। एकैकस्य इन्द्रस्य पार्श्वे ८ अग्रमहिष्यः, १३ सहस्रकोटि ४२१ कोटि ७७ लक्ष २८ सहस्र इन्द्राणी सर्वसङ्ख्या । सर्वगजरूपानां सङ्ख्या ५३६८७०९१२०००००००० । तदेतावद्रूपवान् सौधर्मशक्रो देवदुन्दुभिनादरम्य–श्रीवीरगुणग्रामगर्भनाट्यानि विलोकयन्नभस उत्तीर्य प्रदक्षिणीकृत्य प्रभुं ववन्दे । भूपः तां सौधर्मेन्द्रर्द्धिम्पश्यंश्चित्रलिखित इवासीत्, ततो यदा शक्रो गजादुत्तरितुमैच्छत् तदा गजोऽग्रिमौ पादौ स्वप्रभुं सुखेनोत्तारयितुं पर्वतस्योपरि निम्नीचकार । तदा गजस्याग्रिमौ पादौ आर्द्रपङ्के इव भुवि निमग्नौ । तदेन्द्रो गजादुत्तीर्य प्रभुं ननाम । यत्र गजः पादौ निम्नीचक्रे, तस्य स्थानस्य गजाग्रपदकमिति तीर्थं लोकप्रसिद्ध– मजनि । नृपस्तादृग्विभासुरं शक्रं वीक्ष्य दध्यौ ।

अहोरूपमहोऋद्धि–रहो स्त्रैणं च शक्रस्यः । अहो भक्तिरहो शक्ति–रस्यान्यत्सर्वमप्यहो ।।

मद्विभूतिः शक्रविभूत्यग्रेऽणूयते, अतो मुधैव गर्वः कृतः, जिनः सर्वप्रकारैर्न केनापि पूजितः स्यात् । शक्रस्यार्हति सर्वोत्कृष्टा भक्तिः, अतोऽलं राज्यश्रियाऽनया । यद्यहमधुना दीक्षां न भजे तदा मया सर्वथा हारितमेव । यद्यत्र व्रतं गृह्णामि तदेन्द्रो जित एव । एवं ध्यात्वा भूपस्तत्रैव धीमान् पञ्चभिर्मुष्टिभिर्लोचमकृत स्वयम् । तादृशगजाश्वयुवत्यादिराज्यं–मुक्त्वा प्रभुपार्श्वे संयमं ललौ । ततो मुनिं जातं वीक्ष्य शक्रो भक्त्या नमश्चक्रे प्राह च ।

दशार्णभद्र ! सत्साधो ! संयमश्रीविराजित ! । धन्यस्त्वं येन दुष्पूरा, प्रतिज्ञा पूरिता निजा ।।
पुनः पुनः प्रणूयेति, यतिं नत्वा जिनाधिपम् । संप्राप वासवः स्वर्गे, श्रद्धापूरितमानसः ।।
क्रमात्कर्मक्षयं कृत्वा दशार्णभद्रो मुक्तिं ययौ ।।

शातायां विबुधप्रभसूरिज्ञातं यथा उपदेशप्रासादे–

श्रीविबुधसिंहसूरिः स्वशिष्यगणाश्रितः समस्ताप्तप्रणीतधर्मरतोऽपि एकस्मिन् योगपट्टे परमां प्रीतिं दधाति, तं विना न क्वापि रतिं प्राप । योगपट्टस्तु कटीमामर्यादीकृत्यार्वागूर्ध्वपर्यस्तिकाबन्धनोपकरणं सूत्रादिग्रथितं ज्ञेयम् । तदुपरि मूर्छां न मुञ्चति । जिनैस्तु मूर्छैव समस्तपरिग्रहमूलं प्रोक्तम् । तत्पापमन्यालोचनायामपि न सम्यगालोचितम् । स सूरिः कालं प्राप्यानार्यदेशे अरबम्लेच्छकुले राजात्मजोऽभूत् । तत्रापि योगपट्टाकारः स्वाङ्गे लब्धः । मसलाखुप्रमुखचिह्नसदृशं चिह्नं तादृग्जातं प्रेक्ष्य सर्वेऽपि विस्मयं प्रापुः ।

### उपसंहारमाह–

**एवमतिदुर्लभात्प्राप्य दुर्लभतमं, बोधिरत्नं सकलगुणनिधानम् ।**
**कुरु गुरुप्राज्यविनयप्रसादोदितं शान्तरससरसपीयूषपानम्, बु० ।।८।। [१७१]**

**।। इति श्रीशान्तसुधारसगेयकाव्ये बोधिभावनाविभावनो नाम द्वादशः प्रकाशः ।।**

व्याख्या- *एवं* पूर्वोक्तप्रकारेण *अतिदुर्लभात्* अतिशयेन दुर्लभं कृतप्रयत्नैरपि जनैरप्राप्यमाणं चिन्तामण्यादि तस्मादपि *दुर्लभतमं* समधिकातिशयेन दुर्लभं, सुरेन्द्रैरपी दातुमशक्यं *सकलगुणनिधानं सकलाः* समग्रा मोक्षप्राप्तिपर्यवसाना ये *गुणा* आत्मनो हितप्रकारास्तेषां *निधानं* भाण्डागारं ईदृशं *बोधिरत्नं* नरभवादिरूपधर्मसाधनसंपन्नतां *प्राप्य* लब्ध्वा त्वं *गुरुप्राज्यविनयप्रसादोदितगुरुभिरर्हद्गण–*

भृत्स्वधर्मोपदेशकैः *प्राज्यविनयः* प्रचुरविनयस्तेन, प्रसादपरैः सानुग्रहप्रसन्नैः *उदितं* जगज्जनहितकृते प्रोक्तं *शान्तरससरसपीयूषपानं* सदैव सरसतायुक्तं शान्तरसामृतपानं *कुरु* पिबेत्यर्थः ॥८॥

वाच्या च उपदेशप्रासादोक्ता आर्दकुमारकथा –

मगधेशः श्रेणिको भूपोऽन्यदार्द्रकभूपतेर्निजमन्त्रिणा सह प्राभृतं पूर्वजप्रीतिवृद्ध्यर्थं प्रैषीत् । तत्समीपे प्राभृतं विमुच्य मन्त्री कुशलं पृष्टः प्रश्नोत्तरं कृत्वा स्थितः । अथार्द्रकभूभर्तुः सूनुरार्द्रकुमारः श्रेणिकसचिवं पप्रच्छ–त्वद्भूपपुत्रस्य किं नाम ? । मन्त्रिणाभाणि–धर्मज्ञः पञ्चशतमन्त्रीशोऽभयनामा पुत्रः किमु त्वया नाकर्णितः ? तच्छ्रुत्वा कुमारोऽपि अभयाय मौक्तिकादिकं प्राहिणोत् । मन्त्री तु राजगृहमभ्येतः क्रमात्तत्प्राभृतं द्वाभ्यां दत्त्वाहाभयम्–आर्द्रकुमारस्त्वया सह मैत्रीं चिकीर्षति । ततोऽभयो दध्यौ–नूनं विराधितव्रतोऽसौ अनार्यदेशे जातोऽस्ति । अभव्यो दूरभव्यो वा न मया सह सख्यमिच्छति । यतः समानधर्माणं जायते प्रीतिरङ्गिनाम् । अतोऽर्हद्बिम्बं तत्र प्रेषयामि । तद्दृष्ट्वा स प्रभोत्स्यते । इति ध्यात्वा रत्नप्रतिमां पेटामध्ये प्राभृतमिषेण प्राहिणोत् । सोऽपि तत्र गत्वा रहसि तां पेटां दत्त्वा प्रणम्य गतः । कुमारोऽपि तामुन्मुद्र्य तदन्तःस्थां जिनमुद्रां दृष्ट्वा दध्यौ–इदमाभरणं किं कण्ठे शीर्षे हृदि वा धार्यते ? । दृष्टपूर्वमिदमिति ध्यायन् जातिस्मृतिं प्राप्तः । तथाहि–

इतस्तृतीये भवेऽहं सामायिकः कौटुम्बिको बन्धुमतीपतिरभूवम् । प्रियायुतेन मया वैराग्यादीक्षा गृहीता । अन्येद्युः संयतिनीमध्यस्थां स्ववधूं वीक्ष्य प्राक्तनानुरागेण तस्याः पुरो निजाभिप्रायमाख्यम् । सापि एष मम स्वस्य च व्रतं मा भाङ्क्षीत् इति भियाऽनशनेन स्वर्गता । अहमपि तद्दुःखेनानशनाद्देवसुखं भुक्त्वाऽत्रोत्पन्नः । धन्योऽस्तु मद्गुरुरभयः, येनाहं प्रबोधितः ।

अथाभयदर्शनोत्सुकः पितरं प्राह–तात ! राजगृहं द्रष्टुं यामि । पिता तु तं निषिध्य तस्य रक्षायै पञ्चशतभटान्मुमोच । सोऽपि तान् वञ्चयित्वा पोतमारुह्यार्यदेश आगतः । प्रत्येकबुद्धः स तद्बिम्बमभयाय विसृज्य स्वयं तव भोग्यफलं कर्म समस्ति इति वाण्या देवताभिर्निषिद्धोऽपि सहसा व्रतमग्रहीत् कमाद्वसन्तपुरोद्याने देवकुले कायोत्सर्गेण तस्थौ ।

इतश्च स बन्धुमतीजीवस्तत्पुरवासीभ्यगृहे श्रीमतिर्नाम सुताऽभवत् । सा सखीभिर्युता तत्र रन्तुमाययौ । तत्र बालिका मिथःप्रोचुः–सख्यो वरं वृणुत । ततस्ताः काश्चित् कांश्चिद्वरान् वव्रिरे । श्रीमतिर्जगौ–मयैष मुनिर्वव्रे । तदा व्योमवाणीयं जाता– मुग्धे ! त्वया चारु वृतम् । इत्युक्त्वा सुरो दुन्दुभिगर्जारवपूर्वं रत्नानि ववर्ष । सा च गर्जिभीता मुनेः पादयोरलगत् । मुनिस्त्वनुकूलोपसर्गं मत्वाऽन्यत्र जगाम । तत्र द्रव्यग्रहणाय नृपपूरुषा आजग्मुः । तान्निषिध्य सुरः प्राह–वित्तं त्वस्या वरणके दत्तम् । ततस्तस्याः पिता तद्गृहीतम् । ततः पिता पुत्रीमाह–वत्से ! भृङ्गवद्भ्रमन् स मुनिस्त्वया कथं लप्स्यते ? लब्धोऽपि हि कथं ज्ञास्यते बहुषु भिक्षुषु मध्येऽयं स एवेति । अतस्त्वमन्यं वरं वृणु सा प्राह–तात ! नेदं श्रुतम् ?

सकृज्जल्पन्ति भूपालाः सकृज्जल्पन्ति सज्जनाः ।
सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत्सकृत् ॥

परं तत्पादचिह्नेन तमुपलक्षयामि । तदाप्रभृति स श्रेष्ठी मुनीनां दानं ददौ । एकदा द्वादशवर्षान्ते स मुनिरागतः । तं लक्षणदर्शनादुपलक्ष्य श्रीमतिः प्राह– स्वामिन् ! तदा निष्ठ्यूतवन्मां त्यक्त्वा गत आसीः,

अधुना क्व यास्यसि ? । मुनिर्दिव्या गिरमनुस्मरन् श्रीमतीमुपयेमे । क्रमेण सुते जात आर्द्रकुमारोऽवदत् प्रिये ! तव पुत्रोऽभूत्, अहं तु व्रजामि । तच्छ्रुत्वा श्रीमती तर्कुमादायोपाविशत । तद्वीक्ष्य सुतः प्राह– मातः ! किमिदं त्वया प्रारब्धम् ? । सोवाच–वत्स ! तव पिता तपस्यायै गन्तुमिच्छति, अथ मम तर्कुरेव शरणम् । पुत्रः प्राह–मातः ! मत्पितरं बद्ध्वाहं स्थापयामि । इत्युक्त्वा तर्कुसूत्रेण तत्पादौ वेष्टयन्नित्थमाह– हे तात ! मया त्वं बद्धोऽसि, क्व गमिष्यसि ? इति तच्चेष्टितेनार्द्रज आर्द्रचित्तः पादयोर्वेष्टिततन्तुसंख्यया द्वादशाब्दीं यावद् गृहे तस्थौ । अवधौ पूर्णे पुनर्दीक्षा गृहीत्वा समीरवत् पृथ्व्यां विजहार ।

इतश्च निजजनकेन रक्षार्थं मुक्ता भटाः कुमारमन्वेषयन्तः स्तैन्यन जीवन्तो मुनिना दृष्टाः, धर्मं श्राविताः प्रव्रज्यां जगृहुः । तैर्युक्तस्य वीरवन्दनार्थं गच्छतस्तस्यान्तराले गोशालो मिलितोऽवदत् वृथेदं तपस्तप्यते, शुभाशुभस्य हेतुर्नियतिरेवात्र प्रमाणम् । यतः–

उपक्रमशतैः प्राणी साधयितुं क्षमः । दृश्यते जायमानं तल्लीलया नियतेर्बलात् ।।

मुनिरुवाच–नेदं युक्तम् । द्वाभ्यां कार्यसिद्धिः । यतः–

यथा स्थालीस्थितं भोज्यं कर्मणा प्राप्तमस्ति तत् । तावन्न प्रविशेद्वक्त्रे यावन्नोद्यमवान् करः ।।

इत्यादिना तं निर्वचनीचक्रे । अथ कुमारर्षिर्हस्तितापसाश्रममागमत् । तत्र तापसा नित्यं इभं हत्वा मांसमश्नन्ति । तेषां मतमिदम्–अग्निवनस्पतिकणादिबहुजीवहनने महापापमत एकस्मिन्महाजीववधे बहूनां न घातः । इति मत्वा तापसैरेको वारणो निगडितः । मुनिस्तु तत्सुमुखमाययौ । साधु दृष्ट्वा स हस्ती लघुकर्मतयालानस्तम्भमुन्मूल्य पादौ स्पर्शं स्पर्शं प्रणमति स्म । तदतिशयं वीक्ष्य तापसाः प्रबुद्धा जैनीं वाचं स्वीचक्रुः । ततः श्रीवीरं नत्वा साधुव्रतमाददिरे समवसरणे साभयः श्रेणिक आर्द्रकुमारर्षिं प्रति हस्तिमोचनवृत्तं पप्रच्छ ।

मुनिनोचे महाराज ! न चित्रं करिमोचनम् । दुष्करं तु तन्तुपाशमोचनं प्रतिभाति मे ।।

तत्पृष्टो मुनिस्तर्कुतन्तुवृत्तमुक्त्वाभयं प्रशस्य धर्माशिषं ददौ । ततो मुनिरालोचितप्रतिकान्तः केवलज्ञानं शिवं प्राप ।

**।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणि–सतीर्थ्यतिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां शान्तसुधारस–टीकायां बोधिदुर्लभभावनाविभावनो नाम द्वादशः प्रकाशः समजनि ।।**

❀ ❀ ❀

# ॥ त्रयोदशः प्रकाशः ॥

उक्ता द्वादशभावनाप्रकाशाः । तेषु चात्मवर्तनानुदर्शनरूपा द्वादशानुप्रेक्षाभावनाः प्रोक्ताः । अथ त्रयोदशादिषु ध्यानसौधसमारोहणहेतुभूता मैत्र्यादयश्चतस्रो भावनाः प्रोच्यन्ते । तत्रायं प्रथमः श्लोकः-

( अनुष्टुब्-वृत्तम् )

सद्धर्मध्यानसन्ध्यानहेतवः श्रीजिनेश्वरैः ।
मैत्रीप्रभृतयः प्रोक्ताश्चतस्रो भावनाः पराः ॥१॥[१७२]

व्याख्या- *श्रीजिनेश्वरैः* श्रीमदर्हद्भिः *पराः* प्रकर्षशुभपरिणामजनन्यो *मैत्रीप्रभृतयो* मैत्रीमादीकृत्य *चतस्रश्चतुः*सङ्ख्याका *भावनाः* सदर्थपर्यालोचनाभिरात्मनि विशिष्टधर्मवासनासंपादनरूपाः *सद्धर्मध्यान-सन्ध्यानहेतवः प्रोक्ताः* सत्समीचीनं पूज्यं च, *धर्मध्यानं* धर्ममयं ध्यानमेकाग्रं मनसोऽखण्डधारालक्ष्यं, तस्य *सन्धानमा*त्मनि संश्लिष्टरूपेण परिणमनं तस्य *हेतवः* संसाधिकाः प्रोक्ता जिनेश्वरैरुपदिष्टा इत्यर्थः ॥१॥

✻ ✻ ✻

ता एव नामग्राहमाह-

मैत्री प्रमोदकारुण्य माध्यस्थ्यानि नियोजयेत् ।
धर्मध्यानमुपस्कर्तुं तद्धि तस्य रसायनम्॥२॥[१७३]

व्याख्या- *धर्मध्यानमुपस्कर्तुं धर्मध्यानं* प्रोक्तरूपमुपस्कर्तुं स्वात्मनि परिकर्तुं *मैत्रीप्रमोदकारुण्य-माध्यस्थ्यानि मैत्री* जगज्जने हितबुद्धिः, *प्रमोदो* गुणिनि दृष्टे श्रुते ज्ञाते वा सानन्दभवनं, *कारुण्यं* दुःखितेषूपकारधीः, *माध्यस्थ्यं* निवारयितुमशक्येऽकृत्यकारिणि रागद्वेषपरिहारेणोपेक्षणं, *नियोजयेत्* प्रोक्तधियः प्रवर्तयेत् । *तद्धि हि* निश्चितं, तत्प्रोक्तरूपमैत्र्यादिभावनं *तस्य* सद्ध्यानसन्धानस्य *रसायनं* परममहौषधमुपाय इति यावत्, भवतीत्यर्थः ॥२॥

✻ ✻ ✻

स्वयमेव मैत्र्यादिलक्षणमाह-

( उपजातिवृत्तम् )

मैत्री परेषां हितचिन्तनं यद्, भवेत्प्रमोदो गुणपक्षपातः ।
कारुण्यमार्ताङ्गिरुजां जिहीर्षे-त्युपेक्षणं दुष्टधियामुपेक्षा ॥३॥ [१७४]

व्याख्या– *यद्वक्ष्यमाणरूपं परेषामात्म*व्यतिरिक्तजीवानामपि स्वात्मवत् *हितचिन्तनं* दुःखनिवृत्ति–सुखप्राप्तिध्यानं तन्*मैत्री* मित्रभावो *भवेत्* १ । *गुणपक्षपातः* परेषां ज्ञानविनयदमसुखित्वादि*गुणेषु पक्षपातो* हर्षानन्दसंतुष्टविनोदत्वादिप्रापणं स *प्रमोदो भवेत्* २ । *आर्ताङ्गिरुजां जिहीर्षा कारुण्यं आर्ता* नानाजातीयदुःखैरन्यतरेण पीडिताः ते च ते*ऽङ्गिन*श्चेति प्राणिनस्तेषां या *रुजो* रोगसुखभङ्ग धनहानिधर्म–हीनतादयस्तासां रुजां *जिहीर्षा*ऽपहरणेच्छा *कारुण्यं भवेत्* ३ । *दुष्टाधियामुपेक्षा दुष्टा* परधनपरस्त्री–हिंसाऽन्यायाचरणे परिणता *धी*र्मतिर्येषां ते तथा तेषा*मुपेक्षा* शिक्षयितुमयोग्यत्वेन परिहारवृत्तिरूपेक्षणं *माध्यस्थ्यं भवे*दित्यर्थः ॥३॥

***

अथ मैत्रीभावनां विभावयन्नाह–

सर्वत्र मैत्रीमुपकल्पयात्मन् ! चिन्त्यो 'जगत्यत्र न कोऽपि शत्रुः' ।
कियद्दिनस्थायिनि जीवितेऽस्मिन्, किं खिद्यते वैरिधिया परस्मिन् ॥४॥ [१७५]

व्याख्या– हे *आत्मन् !* त्वं *सर्वत्र* सर्वस्मिन् जीवराशौ *मैत्रीं* प्रोक्तरूपेण मित्रभाव*मुपकल्पय* ऐक्यमात्मनि रचय । *अत्रा*स्मिन्नात्मराशिरूपे *जगति* भुवनत्रये *शत्रु*र्वैरी *कोऽपि* कश्चिदपि जीवः *न चिन्त्यः* त्वया सर्वथा न धारणीयः । *अस्मिन्* वर्तमानजन्मसंबन्धिनि *कियद्दिनस्थायिनि कियतां* शतवर्षादिपरिमितानां *दिना*नामहोरात्राणां *स्थायिनि* स्थितिमति । *जीविते* तव प्राणाधारायुषि *परस्मिन्* स्वस्माद्भिन्ने प्राणिनि *वैरिधिया*ऽरिबुद्ध्या *किं* कस्यै स्वप्रयोजनसिद्ध्यै *खिद्यते* सन्तापः क्रियते । तेन न किञ्चित् सिध्यतीत्यर्थः ॥४॥

उपदेशप्रासादे उदायन–प्रद्योतवृत्तं तु वाच्य–

गान्धारश्राद्धो नित्यार्हत्प्रतिमा विवन्दिषुर्वैताढ्यमूले तपसा तस्थौ । तुष्टा शासनसुरी तदीप्सितम–पूरयत् । प्रसन्ना कामदा अष्टोत्तरशतगुटिकास्तस्मै ददौ । एकां गुटिकामास्ये क्षिप्तवा स दध्यौ–अहं वीतभयपत्तने देवाधिदेवमूर्तिं वन्दितुं यामि इति चिन्तितमात्रेण मूर्त्यन्तिके देवेन नीतः । तां संपूज्य तत्र सुखेनास्थात् । अन्यदा स सुधीरासन्नां मृतिं मत्वा साधर्मिकाया देवदत्ताकुब्जायास्ता गुटिका दत्त्वा स्वयं दीक्षां ललौ । सा रूपार्थिनी एकां मुखे क्षिप्तवा क्षणेन दिव्याकारधरा जाता । अतो उदायन राज्ञा तस्याः सुवर्णाङ्गुलिका इति नाम दत्तम् । पुनः सा एकां गुटिकामास्ये मुक्त्वा दध्यौ– अनुरूपवराभावे मम रूपं वृथा, अयं नृपस्तु मम पितैव, अतश्चण्डप्रद्योतभूपो मम पतिरस्तु तदा सा सुरी प्रद्योतपुरस्तद्रुपमवर्णयत्, नृपस्तस्याः प्रार्थनाकृते दूतमादिशत्, चरस्तत्र गत्वा तामर्थयामास । सा तं प्रत्याह–नृपदर्शनान्तरमुभयोः समीहितं भविष्यति । सोऽपि गत्वा तथैव जगौ । तदाऽनिलवेगगजारूढो निशि तत्रगात् । विपिने उभावपि मिलितौ । नृपेणोक्तम्–हे प्रिये ! त्वं मत्पुरीमेहि कुब्जाह–जिनमूर्ति विना न जीवामि, अतोऽस्याः प्रतिकृतिस्त्वया समानेतव्या, तामिह मुक्त्वा एषा सहैव नीयते ।

ओमित्युक्त्वाऽवन्तीशः स्वनगरे गत्वा जात्यचन्दनमयीं वीरमूर्त्तिमकारयत् । ततोऽवन्तीशेन प्रार्थितकपिलर्षिः पञ्चशतमुनियुतो वासनिक्षेपपूर्वं तां प्रत्यतिष्ठिपत् । ततो विधिना तां मूर्त्तिं संगृह्य

करिराजारूढस्तत्रागत्य तां दास्यै समार्पयत् । सा चैत्यगृहे नूतनां प्रतिमा न्यस्य मूलमूर्त्तिं समादाय राज्ञा सह सौख्येनावन्तीं प्राप । इतश्चोदायिनृपः प्रातर्देवायतनं ययौ, जिनं नत्वा सन्मुखं विलोकयति तदा म्लानमाल्यां मूर्त्तिं दृष्ट्वा दध्यौ इयं मूर्त्तिः काप्यन्या म्लानमाल्यत्वात्सा न भवति, पुनः स्तम्भलग्ना पाञ्चालिकेव या देवदत्ता सापि न दृश्यते, ग्रीष्मे मार्वम्बुवत् करिणो मदोऽत्र निष्ठितश्च दृश्यते, तन्नूनमनिलवेगेनेह चण्डप्रद्योतः समागात् इति ज्ञायते, स द्वयं गृहीत्वा गतः । ततः कुपितो नृपो दशमुकुटबद्धनृपैः सह सबलोऽवन्तीं प्राप । ततो द्वयोर्मिथः समरोऽभूत् । तत उदायनेन शिलीमुखैः प्रद्योतः कुञ्जरात्पातयित्वा हस्तेन धृत्वा बद्धः, तस्य ललाटपट्टे मम दासीपतिः इत्यक्षरावलीं लिलेख तप्तलोहशलाकया, गुप्तिगृहे चाक्षिपत् । तत उदायनः प्रद्योतस्य गृहजिनालये गतः । श्रीजिनवरं नत्वा स्तुत्वा चोपादातुमुपाक्रंस्त, सा स्थानतो न चचाल । नृपतिर्जगौ–हे नाथ ! मया कोऽपराधः कृतः, यत्परमेश्वरो मया सह नैति । तदानीं तदधिष्ठायकः प्राह–हे नृप ! तव पत्तनं पांसुवृष्ट्या स्थलं भावि, ततो नाहं तत्र समेष्यामि, त्वं मा शोचीः । ततः स नृपोऽवन्तिदेशान्न्य–वर्त्तत ।

मार्गस्यान्तराले चतुर्मासकं समागतम् । राजा तत्रैव शिबिरं न्यधात् । तत्र दशपुरं जातम् । अन्यदा पर्युषणापर्वण्युदायने पौषधिके सूदः प्रद्योतनमपृच्छत् नृप ! किमद्य भोक्ष्यसे ? तच्छ्रुत्वाऽवन्तीशः क्षोभादिति दध्यौ–अहो ! अद्य पृष्टं तत्किं कारणम् ? इति मत्वा सूपकारमपृच्छत्–हे सूद ! अद्य प्रश्नस्य हेतुं वद । नृप ! अद्य पर्युषणोत्सवः, मम स्वामी उपोषितोऽस्ति, अतस्त्वदर्थं रसवतीं करिष्यामि ! इति श्रुत्वा नृपः स्माह–त्वया पर्वदिनोक्तेन वरं कृतं ममाप्युपवासोऽद्यास्तु । सूदोऽपि उदायनायाकथयत्, स दध्यौ–अहो ! अस्मिन् कारागारे सति मम पर्युषणा साध्वी न स्यात् । एवमवधार्य तं निष्कास्य क्षमयामास । तस्य भालाङ्कगोपनं स्वर्णरत्नमणिपट्टबन्धेन विदधे । ततोऽवन्तिदेशं ददौ ।

* * *

**सर्वेऽप्यमी बन्धुतयानुभूताः, सहस्रशोऽस्मिन् भवता भवाब्धौ ।**
**जीवास्ततो बन्धव एव सर्वे, न कोऽपि ते शत्रुरिति प्रतीहि ॥५॥ [१७६]**

**व्याख्या- हे आत्मन् ! *अस्मिन्* साक्षादनुभूयमाने *भवाब्धौ* चतुर्गतिरूपसंसारसागरे *अमी* देवनरनारकपृथिव्यादितिर्यक्त्वेषु विद्यमानाः *सर्वेऽपि* सूक्ष्मबादरैकेन्द्रियेभ्य आरभ्य पञ्चेन्द्रियपर्यन्ताः समस्ता अपि, न तु केचिच्छेष*जीवाः* प्राणिनः *भवता* त्वया *सहस्रशो*ऽनन्तवारानपि एकैकेन सह *बन्धुतया* स्वकीयजनकजननीभ्रातृभगिन्यादित्वेन *अनुभूताः* स्वस्मिन् प्रोक्तसंबन्धित्वेन पूर्वं प्रापिताः सन्ति । ततस्तस्मादुक्तहेतुतः *सर्वे* समग्रा अपि *जीवाः बन्धव एव* स्वकीयजननीजनकादिरूपा एव सन्ति, *ते* तव *शत्रु*र्वैरी *न कोऽपि* कश्चिदपि नास्ति । *इति* प्रोक्तप्रकारेण *प्रतीहि* जानीष्वेत्यर्थः ॥५॥**

आवश्यकनियुक्तौ अवन्तिषेणकथा वाच्या–

उज्जयिन्यां वीरप्रभूनिर्वाणरात्रौ एव प्रद्योतो अपि मृतः । प्रद्योतसुतौ द्वौ भ्रातरौ–पालको गोपालकश्च, गोपालकः प्रव्रजितः, पालकस्य राज्ञो द्वौ पुत्रौ अवन्तीवर्धनो राष्ट्रवर्धनश्च । पालकोऽवन्तीवर्धनं राजानं राष्ट्रवर्धनं युवराजं स्थापयित्वा प्रव्रजितः, राष्ट्रवर्धनस्य भार्या धारिणी, तस्याः पुत्रोऽवन्तीषेणः । अन्यदा उद्याने राज्ञा धारिणी सर्वाङ्गेषु विश्वस्ता तिष्ठन्ती दृष्टा, अध्युपपन्नः, दूती प्रेषिता, सा नेच्छति पुनः पुनः

प्रेषते, तथा यथाभावेन भणितं भ्रातुरपि न लज्जसे ?, तदा तेन स मारितः, विभाषा, तस्मिन् विकाले स्वकान्याभरणानि गृहीत्वा कौशाम्ब्यां सार्थो व्रजति तत्रैकस्य वृद्धस्य वणिजः पार्श्वमाश्रिता, गता कौशाम्बीं, । संयत्यः पृष्ट्वा राज्ञो यानशालायां स्थिताः तत्र गता, वन्दित्वा श्राविका प्रव्रजिता । तया गर्भोऽधुनोत्पन्नः मा प्रव्रजिष्यन्तीति तन्नाख्यातं, पश्चात् ज्ञाते महत्तरिकया पृष्टा–सद्भावः कथित यथा राष्ट्रवर्धनस्य भार्याऽहं, संयतीमध्येऽल्पसागारिकं स्थापिता, प्रजनितवती रात्रौ, मा साधुनामुड्डाहो भूदिति नाममुद्रामाभरणानि चोत्क्षिप्य राज्ञोऽङ्गणे स्थापयित्वा प्रच्छन्ना तिष्ठति, अजितसेनेनाकाशतलगतेन मणीनां प्रभा दिव्या दृष्टा, दृष्टश्च, गृहीतः। अनेन अग्रमहिष्यै अपुत्रायै दत्तः स च पुत्रः। सा च संयतीभिः पृष्टा भणति–अवद्रातं जातं तन्मया त्यक्तं, खादितं भविष्यतीति । तदाऽन्तःपुरं गच्छत्यायाति च, अन्तःपुरिकाभिः समं मैत्री जाता, तस्य मणिप्रभ इति नाम कृतं, स राजा मृतः, मणिप्रभो राजा जातः । स च तस्यां संयत्यां नितरामनुरक्तः, स चावन्तिवर्धनः पश्चात्तापेन भ्राताऽपि मारितः साऽपि देवी न जातेति भ्रातृस्नेहेनावन्तीषेणस्य राज्यं दत्त्वा प्रव्रजितः । स च मणिप्रभं कल्पकं मार्गयति, स न ददाति, तदा सर्वबलेन कौशाम्बीं प्रधावितः । सा प्रव्रजिता चिन्तयति–मा जनक्षयो भूदिति रहस्यं भिनमि, अन्तःपुरमतिगता, मणिप्रभमपसार्य भणति किं भ्रात्रा समं कलहयसि ?, स भणति–कथमिति । तदा तं सर्व सम्बन्धमाख्याति, यदि न प्रत्येषि तर्हि मातरं पृच्छ, पृच्छति । कथितं यथावृत्तं राष्ट्रवर्धनसत्कानि चाभरणानि नाममुद्रादीनि दर्शितानि, प्रत्ययितो भणति– यद्यधुनापसरामि तर्हि मेऽयशः । आर्या भणति–अहं तं प्रतिबोधयामि, एवं भवत्विति, निर्गता। अवन्तीषेणाय निवेदितं–प्रव्रजिता द्रष्टुमिच्छति, अतिगता । पादौ दृष्ट्वा ज्ञाताऽन्तःपुरप्रतिहारिणीभिः, पादपतिता प्ररुदिताः, कथितं तस्य तव मातेति, स च पादपतितः प्ररुदितः, तस्यापि कथयति, एष तव भ्राताः द्वावपि बाहाभिर्मिलितो परस्परमालिङ्ग्य प्ररुदितौ, कञ्चित्कालं कौशाम्ब्यां स्थित्वा द्वाप्युज्जयिनीं प्रधावितौ मातापि सह महत्तरिकया नीता ।

❋ ❋ ❋

सर्वे पितृभ्रातृपितृव्यमातृ–पुत्राङ्गजास्त्रीभगिनीस्नुषात्वम् ।
जीवाः प्रपन्ना बहुशस्तदेतत्–कुटुम्बमेवेति परो न कश्चित् ॥६॥ [१७७]

**व्याख्या**– ***सर्वे*** **समग्रा** ***जीवाः*** **प्राणिनः त्वदीय*पितृभ्रातृपितृव्यमातृपुत्राङ्गजास्त्रीभगिनीस्नुषात्वं*** **प्रोक्तभावमेतेऽपि त्वयि प्राप्नुवन् ।** ***बहुशोऽनन्तवारं प्रपन्नाः*** **त्वदाश्रयं स्वीकृतवन्तः ।** ***तदेतत्*** **तत्प्रोक्तकारणतः एतत्सर्वजीववृन्दं** ***कुटुम्बमेव*** **तव परिवार एव वर्तते ।** ***इति*** **हेतोर्न** ***कश्चित्परः*** **शत्रुरस्ति स्वपरिवारत्वा-दित्यर्थः ॥६॥**

धनशर्मामुनिचरित्रं तु यथावश्यकनिर्युक्तौ–

अवन्त्यां धनमित्राभिधो वणिक् श्रीमद्गुरुवाणीं समाकर्ण्य गुरुवैराग्यमग्नो धनशर्माह्वसुतेन सह दीक्षां जग्राह । क्रमेण द्वावपि श्रुतपाठिनौ जातौ अन्यदा व्रतिव्रजैः सह तौ मध्याह्न्दिने एलगपुराध्वनि प्रथितौ । तदा च भीष्मग्रीष्मार्ककरसम्पाततापितः पिपासापीडितो बालः शनैः शनैश्चचाल । अन्ये मुनयोऽग्रतो जग्मुः । धनमित्रमुनिः पुनः सूनोः प्रेमपाशनियन्त्रितः पश्चाच्चचाल । इतश्च तत्र मार्गे तरङ्गिणी समाययौ । तां निरीक्ष्य पिता पुत्रमलपत्–"हे वत्स ! चेष्टया पिपासापराजितं त्वां जानामि, मदभ्यर्णे च प्रासुकमम्भो नास्ति,

तत्किं करोमि ? योग्यक्षेत्रातीतं कालातीतं जलं न कल्प्यते मुनीनाम् । तदिदानीं नदीनीरं पीत्वा तृषां हन्यताम् आपदि धीधनैर्निषिद्धमपि हि कार्यं कार्यं । यदुक्तम्–

**निषिद्धमप्याचरणीयमापदि, क्रिया सती नावति यत्र सर्वथा ।**

**घनाम्बुना राजपथेऽतिपिच्छिले, क्वचिद्बुधैरप्यपथेन गम्यते ।।**

मृत्युदामिमामापदं कथञ्चनोल्लङ्घ्य पश्चात्सद्गुरोः समीपे इदं पापमालोचयः'' । इत्युदीर्य नदीं समुत्तीर्य स इति दध्यौ–''नूनं मद्दर्शने पुत्रो ह्रिया नोदकं पास्यति । ह्रीमानकार्यं कुर्वन् स्वच्छायातोऽपि शङ्कते, अतोऽस्य दर्शनपथादपसरामि'' । इति ध्यात्वा स पुरोऽचालीत् । क्षुल्लोऽथ निम्नगां प्राप, परं तृषार्त इति दध्यौ–''श्रीपरमात्मभिरनेषणीयाशनपानादिग्रहणं निषिद्धम् । यत एषणा त्रिधा–गवेषणा १ ग्रहणैषणा २ परिभोगैषणा ३ आहारोपधिशय्यासु विषये एतास्तिस्रएषणा विशोध्येत् । तत्रोद्गमदोषा आधाकर्मादयः षोडश, उत्पादनादोषा अपि धात्र्यादयस्तावन्त एव १६ इति प्रथमगवेषणायां शोधयेत्, द्वितीयायामेषणादोषान् शङ्कितादीन् दश, तृतीयायां तु अङ्गरादिपञ्चदोषान् शोधयेदिति यतमानो यतिः । अत्र सप्तचत्वारिंशता दोषैरदूषितमत एव नवकोटिविशुद्धमन्नपानाद्याहारमौघिकौपग्रहिकरूपं द्विविधमुपधिं च वसतिं च यन्मुनिरादत्ते सा एषणासमितिः, तद्विमुक्तमनादेयमपि वारि कथञ्चित् पिबामि साम्प्रतम् । पश्चाद्गुरुसन्निधौ प्रायश्चित्तं ग्रहीष्यामि'' । इति विमृश्याञ्जलिना जलं समुत्पाट्य पातुं यावन्मुखस्याग्रे निन्ये तावता सोऽध्यासीत्– ''अधुनाऽहं जलादिजीवानामभयं ददामि ? किं वा तृषाच्छेदनार्थं स्वजीवसौख्यं करोमि ? यदि स्वजीवे ऐहिकं सौख्यं तनोमि तदा परेषां जीवानां महादुःखं स्यात् । तेन चातुर्गतिकसंसारपरावर्तनं प्रवर्धते, तथा चानन्तजिनाज्ञालोपो भवेत् । अपि चामी जीवाः सर्वे आत्मसम्बन्धिनः आत्मकुलं मदीयात्मा एषु कुलेष्वनेकधा संस्थितः । श्रीमद्वीतदोषैस्तु षट्कायजीवानां दया संयमधारकोत्सङ्गे स्थापिता । अथवा श्वभ्रविपाके इतोऽनन्तगुणाधिका तृषा पराधनत्वेन त्वयाऽनन्तशः सोढा । अधुना तु स्ववशोऽसि त्वम् । हे जीव ! किमर्थं स्वात्मगुणभ्रंशं त्वं तनोषि ? अथवा निजैकजीवार्थेऽनेकजीववधभयमपि न समीहसे ? धिग्धिङ्मच्चित्तमोढ्यं प्रत्यक्षं क्षणिकसुखदं तृषाच्छेदरूपं निर्मलशीतलं जलममृतमिव त्वं धारयसि, परं नेदममृतमयं निश्चयेन विषधारापानसमं पानकं ज्ञेयम् । यत एकत्रोदकबिन्दौ असङ्ख्यजन्तून् जिनाः प्रवदन्ति, सेवाललवसमन्वितं तदनन्तजीवात्मकं भवेत् । उक्तं च–

त्रसाः पूतरमत्स्याद्याः स्थावराः पनकादयः । नीरे स्युरिति तद्घाती सर्वेषां हिंसको भवेत् ।।

तत्कियद्भिर्दिनैर्यान्ति रक्षिता अपि ये ध्रुवम् । तान् प्राणान् रक्षितुं दक्षः परप्राणान्निहन्ति कः ।।

सजीवं जीवनमिदं सर्वथा न पास्यामि'' । इति निर्णीय शनैः शनैर्नद्यामञ्जलेर्जलं मुमोच विवेकपूर्वं बहूनां जलजीवानां बाधा न स्यात्तथा । स बालोऽप्यबालधैर्यस्तटिनीमुत्तीर्य तृषया यातुमक्षमस्तत्तीर एवापतत् । तदा दध्यौ सः–''अधुना तृषावेदनीयकर्म कण्ठताल्वादिशोषणं कृत्वा मदात्मगतरत्नत्रयी–सुधाशोषणं वाञ्छति, परं तत्र तव ( स्य ) प्रवेशलेशोऽपि न प्रसरति, समाधि– सन्तोषस्वरूपध्यानमग्ने मयि तव ( स्य ) प्रचारो न स्यादिति प्राचीनपूज्यैर्महदालम्बनं निर्मापितम्'' । इत्यादिशुभध्यानपरो विपद्य त्रिदिवं ययौ ।

हितचिन्तनमेव मैत्री तेन सर्वहितचिन्तनं शिक्षयन्नाह–

( इन्द्रवज्रावृत्तद्वयम् )

एकेन्द्रियाद्या अपि हन्त जीवा, पञ्चेन्द्रियत्वाद्यधिगत्य सम्यक् ।
बोधिं समाराध्य कदा लभन्ते, भूयो भवभ्रान्तिभियां विरामम् ॥७॥ [१७८]

व्याख्या– *हन्तेति* संबोधने हे चेतन ! स दिवसः कदा समेष्यति ? यस्मिन् *एकेन्द्रियाद्या अपि जीवाः सम्यक् पञ्चेन्द्रियत्वाद्यधिगत्य एकं* स्पर्शनाख्यामिन्द्रियं येषां पृथ्वीकायादीनां ते एकेन्द्रिया-द्याश्चतुरिन्द्रियपर्यन्ताः *सर्वेऽपि जीवाः* सांसारिकसत्त्वाः *सम्यक्* सुष्ठु सुन्दरमिति यावत्, *पञ्चेन्द्रियत्वादि* स्पर्शनादिश्रोत्रपर्यन्तेन्द्रियपञ्चकयुक्तजन्मत्वं आदिशब्दात्पर्याप्तत्वसंज्ञित्वमानुषत्वार्यत्वसम्यग्दृष्टित्व-संयमित्वाराधकत्ववीतरागत्वसर्वज्ञत्वं ग्राह्यं *तदधिगत्य* प्रोक्तपञ्चेन्द्रियत्वादि प्राप्य *बोधिं* धर्मसामग्रीं *समाराध्य* सम्यक् सफलां विधाय *भूयः* पुनःपुनर्जायमानानां *भवभ्रान्तिभियां भवे* गतिचतुष्टये *भ्रान्तयः* परिभ्रमणानि ताभ्यो या *भियो* भयानि तासां, *विरामं* विनिवृत्त्यवसानं (विनिवृत्तिः अवसातं ) *कदा* कस्मिन्नहोरात्रादिकाले *लभन्ते* प्राप्नुवन्ति । कदा भवभ्रमणान्तप्राप्ता भविष्यन्तीत्यर्थः ॥७॥

❋ ❋ ❋

या रागरोषादिरुजो जनानां शाम्यन्तु वाक्कायमनोद्रुहस्ताः ।
सर्वेऽप्युदासीनरसं रसन्तु सर्वत्र सर्वे सुखिनो भवन्तु ॥८॥ [१७९]

व्याख्या– *या* वक्ष्यमाणस्वरूपा *जनानां* प्राणिनां *वाक्कायमनोद्रुहः वाचां* वाणीनां *कायानां* शरीराणां *मनसां* च *द्रुहो* दुःखप्रापणेन द्रोहकारिण्यः *रागरोषादिरुजः रागो* यत्र तत्र वस्तुष्वभिलाषो, *रोषो* धर्मेऽननुकूलपदार्थेष्वरुचिस्वभाव, *आदिना* जन्ममरणशोकभयादयो ग्राह्याः ता एव *रुजो* द्रव्यभाव-रोगादिनानाव्याधयः *ताः* सामस्त्येन *शाम्यन्तु* शान्तिं यान्तु । तथा *सर्वेऽपि* जीवा *उदासीनरसं* यत्र रागद्वेषयोः पक्षो नास्ति *तदुदासीनं* समता तस्य *रसं* समतास्वादिष्ठतानुभवनं *रसन्तु* स्वादयन्तु । तथा *सर्वे* समस्तप्राणिनः *सर्वत्र* सर्वद्रव्यक्षेत्रकालभावविषयेऽत्र परत्र जन्मजन्मान्तरेषु *सुखिनः* सुखं प्राप्ता *भवन्त्वित्यर्थः* ॥८॥

वाच्यं च सम्भवजिनपूर्वभव वृत्तान्तं –

अथ धातकीखण्डे ऐरावतक्षेत्रे क्षेमपुर्यां पुर्यां विपुलवाहनो नाम नृपो बभूव । स च प्रजापालको नीतिज्ञ उपायचतुष्टयप्रयोक्ता गुणिपूजको निरभिमानः सर्वज्ञभक्तो देव–गुरुसेवकश्चाऽऽसीत् । तथा सदा स्वाध्यायनिरतो द्वादशविधश्रावकधर्मपरिपालकः सप्तक्षेत्र्यां द्रविणप्रयोक्ताऽर्थिकामदः शत्रून्मूलकश्च बभूव ।

तस्मिंश्च महीनाथे शासति भवितव्यतावशाद् महादुर्भिक्षमभवत् । तस्मिन् कल्पान्तकल्पे दुष्काले चतुर्विधं सङ्घं क्षीयमाणं प्रेक्ष्य स नृपो दध्यौ–"मयेयं सकला धरित्री त्रातव्या । परं किं करोमि ? कालो न स्ववशः । तथाऽपि सङ्घस्त्रातव्य एव" । एवं चिन्तयित्वा स सूदान् समादिशत्–"अतः परं सङ्घभुक्तावशेषमहं भोक्ष्ये । मत्कृते कृतमन्नादि व्रतिनां दातव्यम् । श्रावकाश्च पृथक् सिद्धौदनेन भोजयितव्याः" । तथेति प्रतिपद्य

ते सूदास्तथैव नित्यं विदधुः । राजा च स्वयं तदैक्षिष्ट । तथा स्वयमेषणीयकल्पनीयप्रासुकानि महामुनीनां ददौ । एवं स महामना यावद् दुर्भिक्षकालं सकलसङ्घाय यथाविधि भोजनादि ददौ । तेन सर्वसङ्घस्य वैयावृत्त्यं समाधिं चं कुर्वता नृपेण तीर्थकृन्नामकर्मोपार्जितम् ।

❋ ❋ ❋

**अथ गेयपद्याष्टकेन मैत्रीभावनां विभावयन्नाह–**

विनय विचिन्तय मित्रतां, त्रिजगति जनतासु ।
कर्मविचित्रतया गतिं, विविधां गमितासु, वि० ॥१॥ [१८०]

**व्याख्या– हे *विनय* ! हे विविधनिवृत्तिपरिणामाभिलाषि–चेतन ! *त्रिजगति* त्रिभुवने या *जनताः* प्राणिनां समूहास्तासु समग्रासु *मित्रतां* स्वजनभावेन प्रीतिस्वभावतां *विचिन्तय* विचित्रप्रकारेण प्रेमभावं प्राप्तो भव । किंविधासु जनतासु ? *कर्मविचित्रतया विविधां गतिं गमितासु कर्माणि* स्वयमेव कृतानि स्वकीयानि शुभाशुभानि सातासातादिप्राप्तिहेतुभूतानि तेषां या *विचित्रता* तीव्रतीव्रतरतीव्रतमफल–विपाकयोग्यता तया, *विविधां* नानारूपामेकेन्द्रियादिसूक्ष्माऽपर्याप्तपर्याप्तासंज्ञिसंज्ञ्यादिभेदवतीं *गतिं* नरकादिके गमनागमनस्थितिरूपां *गमितासु* प्रापितासु सर्वत्र सर्वास्वित्यर्थः ॥१॥**

एतद्विषये सुमति–नागिलवृतान्तं वाचनीयं –

मगधदेशे कुशस्थलपुरे जीवाजीवादितत्त्वज्ञौ सुमतिनागिलाख्यौ द्वौ धनाढ्यौ भ्रातरौ स्तः । अन्यदा केनचित्कर्मणा ताभ्यां निर्धनत्वे प्राप्ते परस्परं चिन्तितम्–आवां विभवाभावेऽन्यजनपदे गच्छावः । ततः शुभेऽह्नि निर्गतौ । एकदा मार्गे गच्छद्भ्यां ताभ्यामेकेन श्राद्धेन सह पञ्च साधवो गच्छन्तो दृष्टाः सुसाथ ज्ञात्वा तैः सह तौ गतिं चक्रतुः । एकदा तेषां चेष्टया भाषणेन च कुशीलत्वं चित्ते निधाय नागिलः सुमतिं स्माह आवयोरेभिः सह गमनं नार्हम् । यतः श्रीनेमिजिनमुखतः श्रुतं सूत्रं जहा एवंविहे अणगाररूवे भवंति, ते कुसीले, ते दिट्ठीए वि निरिक्खिउं न कप्पंति । अत् एतान् कुदृष्टीन् मुक्त्वाऽग्रे व्रजावः । ततः सुमतिः वक्रदृष्ट्या प्राह–इमे साधवो गुणिनो दृश्यन्ते, अत एभिः सह आलापगमनादिकं युक्तमेव । ततो नागिलः प्राह–अहं मनसापि साधुदोषग्रहणं न करोमि किंतु–मए भगवओ तित्थयरसगासे एरिसमवधारियं, जहा कुसीले अद्दट्ठव्वे । ताहे भणियं सुमइणा–जारिसो तुमं निब्बुद्धिओ तारिसो कोवि तित्थयरो, जेण तुब्भमेवं वायरियत्ति । एवं वदतस्तस्य नागिलेन स्वहस्तेन मुखं स्थगितम्, ऊचे च–अरे बन्धो ! अनन्तसंसारनिदानं मैवं वद । अहमेषु मध्ये बालतपस्वित्वं जानामि, अनेकगुप्तिविषयादिदोषदूषितत्वात् । अतः सङ्गं मुक्त्वा गच्छामि । सुमतिः प्राह–अहं त्वेषां संगं यावन्न त्यजामि । ततः सुमतिना तत्पार्श्वे दीक्षा गृहीता ।

अथ तेषु मध्ये चत्वारः संसारं भ्रान्त्वा मुक्तिं गमिष्यन्ति । तेषु पञ्चमोऽभव्योऽस्ति । अथ गौतमो जिनं प्राह–स्वामिन् ! सुमतिर्भव्योऽभव्यो वा ? भगवानाह–हे इन्द्रभूते ! सुमतिर्भव्योऽस्ति । गौतमः प्राह–तदा स क्व गतौ गतः ? हे गौतम ! परमाधार्मिकदेवत्वेनोत्पन्नः कुशीलप्रशंसया जिनात्याशातनया च । गौतमः प्राह–भगवन् ! अग्रेऽस्य किं स्वरूपम् । हे गौतम ! तेनानन्तसंसारित्वमर्जितम् ।

हे गौतम ! स सुमतिः परमाधार्मिकतश्च्युत्वान्तरण्डगोलिको नरो भविष्यति । पुनस्तदेव देवत्वम् इत्थं सप्त भवान् यावत् ज्ञेयम् । ततो व्यन्तरत्वं वृक्षत्वं पक्षित्वं स्त्रीत्वं षष्ठनरकत्वं कुष्ठिनरत्वं च । इत्थमनन्तं कालं

परिभ्रम्य कर्मक्षये सार्वभौमपदं प्राप्य प्रव्रज्यां गृहीत्वा मुक्तो गमिष्यति । नागिलस्तु द्वाविंशतितमजिनपार्श्वे दीक्षां प्राप्य मुक्तिं गतः ।

❋ ❋ ❋

**सर्वे ते प्रियबान्धवा, न हि रिपुरिह कोऽपि ।**
**मा कुरु कलिकलुषं मनो, निजसुकृतविलोपि, वि० ॥२॥ [१८१]**

**व्याख्या- *ते* पूर्वोक्ताः *सर्वे* निःशेषाः भवतः *प्रियबान्धवाः* परमवल्लभजननीजनकादिकाः सन्ति । इह जगज्जनेषु *कोऽपि* कश्चिदपि *रिपुः* सर्वत्र केवलशत्रुभावमेव प्राप्त ईदृशो *न हि* नैव विद्यते, किन्तु जनकादित्वं प्राप्त एव सर्वोऽस्ति । अतः कस्मिन्नपि *निजसुकृतविलोपि* स्वपुण्यविनाशि *कलिकलुषं* रागद्वेषादिभिः प्रकृष्टक्लिष्टं *मनो*ऽन्तःकरणं *मा कुरु* मा विधेहीत्यर्थः ॥२॥**

प्रबन्धपञ्चशत्यां उक्तं चन्द्रवतीकथा–

श्रीपुरे चन्द्रभूपस्य पञ्चदश पत्न्योऽभूवन् । तासु मध्ये चन्द्रवती पट्टराज्ञी जिनधर्मे कुशला । अपरासामग्रे वक्ति–भो भगिन्यः ! अस्माभिः पूर्वं पुण्यं कृतं तेन वयं भूपस्य पत्न्योऽभूम । यदि जैनो धर्मः क्रियते तदा वरम् । एवं कथयन्ती जिनप्रासादं कारयामास । तत्रादिदेवप्रतिमा स्थापिता ।

एकदा भगिनीनां पुरः प्रोक्तं–जिनप्रासादप्रतिमाकारणे बहुपुण्यं जायते, यतः–

अङ्गुष्ठमात्रमपि यः प्रकरोति बिम्बं, वीरावसानवृषभादिजिनेश्वराणाम् ।
स्वर्गप्रधानविपुलर्द्धिसुखानि भुक्त्वा, पश्चादनुत्तरगतिं समुपैति धीरः ॥

इत्यादि धर्मोपदेशं पट्टराज्ञीमुखादाकर्ण्य सर्वाभी राज्ञीभिर्जिनालायास्तुङ्गाः कारिताः । चन्द्रवती गुरुणीति कृत्वा स्थापिता इयं पुण्यवतीति ता जल्पन्ति । क्रमाच्चन्द्रवती लोकमुखात्स्वं जिनालयमपरार्हदालयेभ्यो हीनं श्रुत्वा खिन्नाऽऽना दध्यौ । मया पापं कृतं यदासां पार्श्वात्प्रासादाः कारिताः । किं कथमपि प्रासादाः पतन्ति तदा वरम् । एवं सदार्त्तध्यानपरा हृदये परेभ्यः स्वं पापमप्रकाशयन्तीं क्रमादुत्पन्नरोगा मृता ग्रामशुनी जाता । सा च प्रभुप्रासादे प्रविशन्ती ता कष्टापयन्ति बहिर्निष्काशयन्ति ।

एकदा प्रभुबिम्बं दृष्ट्वा जातिस्मृतिं प्राप्याश्रुप्रवाहं मुञ्चन्ती तिष्ठति स्म, न कुत्रापि गच्छति पुनः स्वकृतकर्म निन्दति च तदा केवली तत्रागात् । स च सर्वाभिः पट्टराज्ञीभिर्भूपेन वन्दितः, धर्मोपदेशः श्रुतः । पृष्टं ताभिः अस्मद्गुरुणी चन्द्रवती मृत्वा कुत्रोत्पन्ना ? केवल्यवग्–शुनी या जिनबिम्बं दृष्ट्वाऽश्रु पातयति सैव । ततः पृष्टं कथं पुण्यवत्येवंविधाऽभूत् ? केवल्यवग्–आर्त्तध्यानात् कुत्सितध्यानाच्च । ताभिः पृष्टं कथं ज्ञायते ? केवल्यवग्–भवन्त्यस्तत्र गत्वा पृच्छन्तु, सास्य संज्ञापयिष्यति । ततः केवलिपार्श्वे आनीता । केवल्यवग्परस्मिन् द्वेषं कुर्वन् तिर्यग्पदीया भवति एषा शुनी यथा ततः सर्वो वृत्तान्तः प्रोक्तः । सा चानशनं लात्वा स्वर्गंगता क्रमाद् दिवी यास्यति । ततः सर्वाः राज्ञः पत्न्यो द्वेषं त्यक्त्वा शुद्धं धर्मं कृत्वा प्रान्ते चारित्रं लात्वा सर्वकर्मक्षयान्मुक्तिं गताः ।

❋ ❋ ❋

**यदि कोपं कुरुते परो निजकर्मवशेन ।**
**अपि भवता किं भूयते हृदि रोषवशेन, वि० ॥३॥ [१८२]**

**व्याख्या–** **हे आत्मन् ! *यदि* यदा कदाचित् कोऽपि *परः* स्वस्मादन्यः *निजकर्मवशेन* पूर्वकाले स्वकृतवैरबुद्धिजनकक्रोधमानमोहनीयकर्मोदयवशवर्तित्वेन *कोपं कुरुते* भवत उपरि रोष-युक्तो भवत्यज्ञत्वात् । तर्हि *भवता* प्राप्तविवेकेन त्वयापि *किं रोषवशेन हृदि भूयते* किं रोषवशं हृदयं कर्तव्यम् । न कर्तव्यं परिज्ञातकर्मत्वादित्यर्थः ।।३।।**

क्षपकर्षिवृत्तं तु इदम्–

क्वाप्यनगारः कश्चित्तपोऽतिदुस्तपं मासक्षपणादिकमाचरन् नित्यमुद्यानादिषु सितिः स्वात्मानं ध्यायति । तद्गुणरञ्जिता काचिद्देवता तं मुनिं प्रत्यहं ननाम स्तुतिं विधाय चावोचत्–''हे निर्ग्रन्थ ! मदुचितं कार्यं प्रसद्य कथनीयम्'' । अथैकदा स मुनिः कस्यापि विप्रस्य दुर्वाक्यं श्रुत्वा जातकोपस्तेन समं योद्धुं प्रववृतेतराम् । तेन द्विजेन स क्षुत्क्षामदेहः क्षपको मुष्ट्यादिभिर्हत्वा पृथ्व्यामपात्यत । मुहुर्मुहुर्द्विजेन ताडयित्वा स मुमुचे । ततः क्षपकोऽपि कथञ्चन स्वस्थानमगमत् । अथ विभावर्यां विभाभिर्भासुरा सुरी मुनिपार्श्वे समाजगाम पूर्ववत् तत्पादौ प्रणनाम । क्षपकस्तु तां देवीं न किञ्चिज्जजल्प । अजल्पन्तं तं साधुं देवता पप्रच्छ–''स्वामिन् ! कुतोऽपराधादद्य मां न जल्पसि ?'' ततो वाचंयमोऽप्युच्चैरित्युवाच–''द्विजेन हन्यमानोऽपि यन्नाहं त्वया रक्षितः ममापकारिणश्च तस्य न किञ्चिदपकृतं ततो वाणीमात्रेण प्रीतिकारिणीं त्वां न वादयामि'' । तदाकर्ण्य स्मितविच्छुरिताधरा देव्यभ्यधात्–''यदाऽन्योऽन्यविलग्नयोर्युवयोर्युद्धमभवत्तदा कौतुकदर्शिन्यहमपि तत्रैवाभूवं, किन्तु तदा कोपाविष्टौ तुल्यौ युवां दृष्टौ मया, तेन कः साधकः कश्च द्विज इति नाहमज्ञासिषं, तस्माद्युष्मद्रक्षां विप्रशिक्षां च न व्यधाम्'' । इति श्रुत्वा क्षपकः शान्तकोपाटोप इत्यब्रवीत्–

**''सूनृता प्रेरणा देवि !, त्वयाऽसौ विहिता मम । तदमुष्यातिचारस्य, मिथ्यादुष्कृतमस्तु मे ।।**

❋ ❋ ❋

अनुचितमिह कलहं सतां, त्यज समरसमीन !।

भज विवेककलहंसतां, गुणपरिचयपीन ! वि० ।।४।। [१८३]

**व्याख्या– हे *समरसमीन ! कलहं त्यज,* हे समरससमुद्रगामिमीन जीव ! *कलहं* क्रोधादिक्लेशं *त्यज* परिहर । *सतां* सत्पुरुषाणां कलहादिकरणं, *अनुचितं* उचितं योग्यं न भवति बन्धहेतुत्वात् । *गुणपरिचयपीन ! गुणाः* क्षमादयाशमवैराग्यज्ञानादयस्तेषां यः *परि* सर्वतश्चयो वृद्धिर्गुणपरिचयस्तेन *पीनः* पुष्टस्तत्सम्बोधनं हे गुणपरिचयपीन ! । *विवेककलहंसतां विवेको* हिताहितादिविचारपटुर्भेद-निर्धारकृज्ज्ञानं तद्रूपा या *कलहंसता* क्षीरनीरपृथक्कारिता तां, *भज* परभावतां हित्वा स्वस्वभावतां सेवस्वेत्यर्थः ।।४।।**

द्राविडवारिखिल्लकथा तु यथा उपदेशप्रासादे–

श्रीऋषभदेवपुत्रो द्रविडस्तस्य पुत्रौ द्राविडवारिखिल्यावभूताम् । अन्यदा द्राविडाय मिथिलाराज्यं वालिखिल्याय च लक्षग्रामान् दत्त्वा स्वयं प्रभोः पार्श्वे दीक्षां जग्राह । अन्यदा द्राविडोऽनुजं संपदाधिकं वीक्ष्य तदुन्नतिमसहमानो द्वेषं वहति । अनुजोऽपि तत्स्वरूपं ज्ञातवान् । ततो मिथो द्वेषं वहन्तौ राज्यग्रहणोत्सुको जातौ अन्योऽन्यं छलं पश्यतः । अन्यदा द्राविडेन स्वपुरमध्ये वालखिल्यटिस्य प्रवेशो निषिद्धः । सोऽपि

प्राप्तकोपः स्वसैन्यं युद्धार्थममेलयत् । द्राविडोऽपि सज्जीबभूव । द्वौ मिथः संमुखावागतौ । मध्ये पञ्चयोजनप्रमाणं रणक्षेत्रं मुक्त्वा सेनानिवेशः कृतः । द्वयोरपि सैन्ययोः प्रत्येकं दशलक्षं गजानां दशलक्षं तुरङ्गाणां दशलक्षं रथानां दशकोट्यः पदातीनां चाभूवन् । ततो निर्धारितदिने सङ्ग्राम चक्रुर्गजा गजैः पदातयः पदातिभिः । एवमन्वहं कुर्वन्ति । इत्थं च सप्त मासान् यावत् युध्यमानयोः सैन्ययोः सुभटानां द्वादशकोट्यः क्षयं ययुः । ततो वर्षाकाले समायाते युद्धतो निवृत्तौ तृणपर्णादिभिः कुटीरकान् कृत्वा तस्थतुः ।

क्रमाद्वर्षर्तौ निवृत्ते सर्वधान्यौषधे पाण्डुरतां प्राप्ते एको द्राविडः सपरिकरो वनद्धर्यवलोकनार्थं निर्गतः । तत्र विमलमतिनाम्ना सचिवेन प्रेरितस्तापसाश्रमं गतः । तत्र जटामुकुटभूषितं वल्कलवस्त्रपरिधानं पर्यङ्कासनस्थितं सुवल्गुनामानं कुलपतिं बहुभिस्तापसैः परिकरितं शान्तं दान्तं वीक्ष्य भूपस्तं ननाम । मुनिरपि ध्यानं मुक्त्वा नृपमाशीर्वचनेनाभिनन्दति स्म । ततस्तापसोऽनुग्रहबुद्ध्या धर्मशिक्षां प्राह–राजन् ! अयं संसारसागरोऽनन्तदुःखजलापूर्णः कामक्रोधादिमकरसमूहैरतिभयंकरो लोभवडवानलो जगद्ग्रसनलालसः । अत्र विषयावर्तेषु मग्नाः सर्वे सुरासुरनरेश्वराद्याः कथमपि निर्गमं न प्राप्नुवन्ति । राज्यं तु प्रान्ते नरकप्रदम् । ततो न युज्यते तवापि एतेन नरकार्थकारिणा राज्यलोभेन भ्रात्रा सह महानर्थकारणं युद्धम् । खण्डमात्रपृथ्व्या लोभेन ये बन्ध्वादिजनान् विनाशयन्ति तेऽनन्तदुःखान्याप्नुवन्ति । न युज्यते तव श्रीयुगादीशपौत्रस्य कलहकरणम् । इति श्रुत्वा नृपः प्राह–स्वामिन् ! पूर्वं भरतबाहुबल्यादयोऽपि कारणवशात्परस्परं विग्रहं कृतवन्तः, तर्ह्यस्माकं को दोषः ? मुनिः स्माह–हे नृप ! भरतेशेन पूर्वजन्मनि साधूनामाहारदानभक्त्या चक्रित्वमुपार्जितम् । बाहुबलिना तु वैयावृत्यकरणाद्बाहुबलमर्जितम् । ततस्ताभ्यां स्वस्वकर्मफलं प्राप्तम् । चक्रिणा चक्रस्याप्रवेशाद्युद्धं कृतं, बाहुबलिना तु ध्यातम्–पितृदत्तं राज्यमयं गृहीतुमिच्छति, किमहं निर्बलो–ऽस्मि ? तातपादान्मुक्त्वाऽन्यान्न नमामि । एवं सत्यपि देववाक्यात्प्रबुद्धौ तौ स्वात्मानं तारितवन्तौ । तत्तादृशानां पुरुषसिंहानां स्पर्धा न कार्या ।

इति श्रुत्वा लज्जितः संजातपश्चात्तापो मुनिं प्राह–मुने ! मया मूढेनाज्ञानेन तयोरस्मत्पितृव्ययोः समानता गृहीता, सा न प्राप्नोति, कदापि काचमणिश्चिन्तामणेः प्रभावं किं प्राप्नोति ? उद्धृतोऽहं त्वया नरकपातात्, उन्मीलिता मम विवेकदृष्टिः । इत्युक्त्वा स्वयं बन्धुं क्षामयितुं प्रस्थितः । वारिखिल्लोऽपि अग्रजमभिमुखमायान्तं वीक्ष्य संमुखं गत्वा ज्येष्ठपादयोर्लुठति स्म । तेन समुत्थाप्य स्नेहेनालिङ्गितः । अनुजः स्माह–भ्रातः ! त्वं मे ज्येष्ठबन्धुर्मद्राज्यं गृहाण । अग्रजोऽपि गद्गदगिरा प्राह–भ्रातः ! किं राज्येन ? अनित्याः कामभोगाः, दुर्गतौ पततां प्राणिनां धर्मं विना नास्ति किञ्चिदन्यच्छरणं, ततोऽङ्गीकार्यं मया व्रतं, भवन्तं क्षामयितुमिहागतोऽस्मि । अनुजः स्माह–भ्रातः ! यदि त्वया सर्वथा श्रेयस्करं व्रतमाद्रियते तदा मयाऽपि तदेवाङ्गीकर्तव्यम् । ततः स्वं स्वं पुत्रं राज्ये न्यस्य स्वस्वमन्त्रिसहितौ दशकोटिपुरुषैः समं तौ तत्तापसपार्श्वे व्रतं जगृहतुः ।

❋ ❋ ❋

**शत्रुजनाः सुखिनः समे, मत्सरमपहाय ।**

**सन्तु गन्तुमनसोऽप्यमी, शिवसौख्यगृहाय, वि० ॥५॥ [१८४]**

**व्याख्या–** *शत्रुजना* ये मयि वैरबुद्धियुक्ताः प्राणिनस्तेऽपि *मत्सरमपहाय* विरोधमानसं धियं च विहाय *समे* समभावे प्राप्ताः सन्तः *सुखिनः सन्तु । अमी* शत्रुजना अपि *शिवसौख्यगृहाय* मोक्षसुख–

भावसदनप्राप्तये *गन्तुं* यातुं समातुराः *मनसो*ऽभिलाषिणः सन्तु भवन्त्वित्यर्थः ॥५॥

दृश्या नागदत्तकथा यथा दानादिकुलके

नागदत्तकुमारः सद्गुरुसमीपे व्रतं जग्राह । ततः स गुरुं व्यजज्ञपद् हे प्रभो ! मम पूर्वकर्मवशात्तिर्यगयोनितः समागतत्वात्क्षुधावेदना भृशं बाधते, तेनाहमल्पममि तपःकर्म कर्तुं न शक्नोमि, तस्मात्कारणादहमत्र जन्मनि क्रोधपरित्यागं करोमि, गुरुभिरूक्तं साधूक्तं त्वया तपःकर्म विनापि केवलं क्रोधपरित्यागेन केवलज्ञानं लप्स्यते । इति गुरुवाक्यं निशम्य सम्यक् क्षमायां यतमानो निरतीचारं चारित्रं पालयन् गुरुसेवातत्परो विजहार, परं क्षुधावेदनीयकर्मोदयात्तस्य सूर्योदयादर्वागेव क्षुधा लगति, तेन नमस्कारसहितमात्रमपि प्रत्याख्यानमतिदुष्करं, तस्मात्प्रातरेवाशनं करोमि, असौ मुनिर्गड्डुकमितं कूरमश्नात्यतो लोके कूरगडुक इति नाम प्रसिद्धं बभूव । अथ तत्र गच्छे चत्वारः साधवस्तीव्रतपस्विनः सन्ति, तत्रैको मासोपवासी १, द्वितीयो द्विमासोपवासी २, तृतीयस्त्रिमासोपवासी ३,चतुर्थश्चतुर्मासोपवासी च ४ । ते चत्वारोऽप्ययं नित्यभोजीति कृत्वा कूरगडुमुनये ईर्ष्यां कुर्वन्ति । अन्यदा रात्रौ प्रथमं विधिना स्वाध्यायं कृत्वा कूरगडुमुनिः स्वात्मानं निन्दयामास यथा–

**धिग्मामविरतस्वल्प–तपःकर्मविवर्जितम् । कथङ्कारमशेषाणि, कर्माण्येष्यन्ति मे क्षयम् ॥१०॥**

**चत्वारः साधवः कायोत्सर्गस्थाः प्रवरा अमी । एकद्वित्रिचतुर्मास–तपः कुर्वन्ति सेऽनिशम् ॥११॥**

इत्याद्यात्मनिन्दां कुर्वन् धर्मध्यानं च ध्यायंस्तस्थौ। अत्रान्तरे शासनदेवताप्रभूतभूषणभूषितशरीरा निशि तत्र समागत्य तांश्चतुरोऽपि मुक्त्वा कूरगडुकमुनिमानमत्, दूरे स्थित्वा चैवं जगाद हे कूरगडुक–भावमुने ! त्वं चिरं जय ।इत्याद्यनेकविधां स्तुतिं विधाय यावत्पश्चाद्वलिता तावत्तैश्चतुर्भिः क्षपकैः क्रुधाकुलैः करे धृत्वा भाषिता हे देवि ! पवित्रेषु देवेषु परमो विवेकः श्रूयते, तर्हि त्वमस्मांस्तपस्विनोऽवगण्यैनं नित्यं त्रिकालभोजिनं कथमवन्दथाः? सा बभाषे भोः साधवो ! यूयं मुधा कोपं मा कुरूत, अहं भावतपस्विनो वन्दे, तादृशश्चायं, यूयं तु भावतपस्विनो न किन्तु द्रव्यतपस्विनोऽतोऽहं युष्मानतिक्रम्यैवं महामुनिं प्रणता, अस्यैव भावतपस्वित्वं वर्तते, तद्भवद्भिः प्रातर्ज्ञास्यते, इत्युक्त्वा सा स्वस्थानं गता, ते चत्वारोऽपि कोपाटोपव्याकुलास्तस्थुः । अथ प्रभातसमये आवश्यकं कृत्वा कूरगडुकसाधुः शुद्धान्नपानमानीय गुरोर्दर्शयित्वा तेषां तपस्विनामदर्शयत् । ततस्तेषां क्रुधा ज्वलतां मुखे श्लेष्मागतः, स मुनिभिस्तस्मिन्नशने क्षिप्तः, यतः क्रोधाकुलानां कार्याकार्यविचारणा न स्यात् । ततः स कूरगडुकसाधुश्चिन्तयति, यथा–

धिग्मां प्रमादिनं स्वल्पं तपःकर्मोज्झितं सदा । वैयावृत्त्यमपि ह्येषां मया कर्तुं न शक्यते ॥

प्रमादोऽयं ममैवैषां श्लेष्मा यदशनेऽपतत् । यच्छ्लेष्ममात्रकाभावादेषां श्लेष्मा पतत्विह ॥

तपः कर्तुमशक्तः सन् वैयावृत्यकृतावपि । चत्त्वं मन्दायसे जीव भाविनी का गतिस्तव ॥

इत्याद्यात्मनिन्दां कुर्वन् शून्यचित्ततया तदशनमाददानः धर्मध्यानाच्छुक्लध्यानं गतः, तेन समुज्ज्वलं केवलज्ञानं प्राप्तम् । तदानीं तत्र त्रिदशाः समागताः, तैः केवलमहोत्सवः कृतः । ततस्तत्र सुराः कनकमयं कमलं विरचयामासुः, तत्र संनिविष्टं कूरगडुककेवलिनं देवाः स्तुवन्ति, यथा–

**हे कूरगडुकमुने ! केवलज्ञानभास्कर, जय त्वमिति जल्पन्तः प्रातिहारं व्यधुः सुराः ॥१५॥**

अथ ते चत्वारः क्षपका एतत्स्वरूपं प्रेक्ष्य प्रशान्तीभूताः परस्परमेवं प्राहुरहो निशि देवतया प्रोक्तं

तत्तथ्यमेवात्र अयमेव भावतपस्वीन, यतः क्षमावान्, वयं तु द्रव्यतपस्विनो यतः क्रोधाध्मातमानसाः तथास्माभिरेतस्य भूर्याशातना कृतात्र तेनास्माकं का गतिर्भविनी ? अथ श्रीकूरगडुककेवलिन एव पादानाश्रायामः स एवास्मान् भवार्णवादुत्तारयिष्यतीति विचार्य ते चत्वारोऽपि तपस्विनः पादयोर्गत्वा स्वान् स्वानपराधान् प्रादुष्कुर्वन्तः श्रीकूरगडुककेवलिनं क्षामयामासुः । एवं त्रिकरणशुद्धया क्षामयतां तेषामपि महात्मनां लोकालोकप्रकाशनपरं केवलज्ञानमुत्पन्नम् । एवं ते पञ्चापि केवलिनो बभूवूः । अथ श्रीकूरगडुककेवली मह्यां विहृत्य भव्यान् प्रतिबोध्य तैश्चतुर्भिः क्षपकैः सार्धं सिद्धिसौधमधिरोहति स्म ।

❋ ❋ ❋

सकृदपि यदि समतालवं, हृदयेन लिहन्ति ।
विदितरसास्तत इह रतिं, स्वत एव वहन्ति, वि० ॥६॥ [१८५]

**व्याख्या– *यदि* यदा संसारिणः सत्त्वाः कथमपि *सकृदपि* एकशोऽप्यास्तामनेकवारं, *समतालवं* समतारसस्य *लवं* लेशं बिन्दुमात्रमिति यावत्, *हृदयेन* मनोभावेन *लिहन्ति* रसास्वादं लभन्ते । *तत* एकदास्वादनतो *विदितरसा* विज्ञातसमतासुखरसास्वादाः सन्तः *इह* समतारसे *स्वत एव* परप्रेरणानिरपेक्षस्वस्वभावतः स्वयमेव *रतिं* प्रीतिं *वहन्ति* प्राप्नुवन्तीत्यर्थः ॥६॥**

मृगापुत्रज्ञातं तु इदं–

सुग्रीवपुरीशपुत्रो मृगापुत्रः प्रासादगवाक्षे स्थितो नगरस्वरूपमालोकयन् शमगुणागारमेकमनगारं पश्यन्निर्निमेषदृष्ट्या विलोकयन् जातिस्मृतिं प्राप, पुराकृतं श्रामण्यं संस्मृत्याम्बापितरावुपागम्येदं वाक्यमब्रवीत्–

**सुयाणि मे पंच महव्वयाणि, नरएसु दुक्खं च तिरिक्खजोणिसु ।**
**निव्विण्णकामो म्हि महण्णवाओ, अणुजाणह पव्वइस्सामि अम्मो ॥**

इत्यादिना देहभोगोपभोगादीनामनित्यत्वमुक्त्वा प्रव्रज्याज्ञां ययाचे, तदा पितृभ्यां श्रामण्य–पालनमनेकयुक्त्या यावज्जीवं दुष्करं दर्शितम्–"त्वमतिसुकुमारः श्रामण्यं पालयितुं न क्षमोऽसि, इन्द्रियमनसां दुर्जयत्वात्, लोहमययवचर्वणवद्दुष्करं चारित्रम्, दीप्तामग्निशिखां पातुमिव मन्दरगिरेस्तुलारोपणमिव वा तारुण्ये संयमोद्वहनं सुदुष्करम्, पश्चाद्वार्धके चरणाचरणं न्याय्यम्" । मृगापुत्र ऊचे–"हे पितरौ ! इह लोके निःस्पृहस्य न किञ्चिदपि दुष्करम्, यच्चतुर्गतिषु अनेकवेदना मयाऽनुभूता वागगोचराः, यतः–

**सव्वभवेसु असाया, वेअणा वेइआ मए । निमिसंतरमित्तं पि, जं साया नत्थि वेयणा ॥**

येन मया ईदृश्यो नरकादिव्यथाः सोढास्तस्य कथं दीक्षा दुष्करा ? इत्यसौ मया ग्राह्यैव । प्रव्रज्याया यः साम्यगुणसुखास्वादः स एव महाधारः । तेन दीक्षा गृहीता ।

❋ ❋ ❋

किमुत कुमतमदमूर्च्छिता, दुरितेषु पतन्ति ।
जिनवचनानि कथं हहा, न रसादुपयन्ति, वि० ॥७॥ [१८६]

**व्याख्या– *उत* वितर्के, विचारयेऽहं *किमि*ति किंनामकं तत्कारणं भविष्यति यदुद्दिश्यैते जनाः *कुमतमदमूर्च्छिता दुरितेषु पतन्ति, कुमतानि कुत्सितानि* पापहेतुकान्यज्ञानादिमयत्वेन निन्दनीयानीति यावत्, *मतान्य*विचारितया संमतिभूतस्वस्वदर्शनपक्षाः तत्प्राप्ते *मदो* "वयमेव धर्मज्ञा" इत्यादिरूपो**

**जातोऽभिमानः तेन *मूर्च्छिता* मोहिताः सन्तः *दुरितेषु* पापकर्मबन्धेषु तत्फलभूतेषु बहुलसंसारित्वनरकादिषु च *पतन्ति* हीनत्वाधोगत्यादिषु समुत्तरन्ति । *हहा* महाकष्टं *कथं* केनोद्देशेनेति *जिनवचनानि* जिनागमोपदेशान् । *रसात्* प्रीत्याः प्रेमभरादिति यावत्, *नोपयन्ति* न प्राप्नुवन्तीत्यत एते वराका भवे कथं भविष्यन्ति ? तत्कारणमेषां मिथ्यात्वोदयमेव मन्य इत्यर्थः ।।७।।**

आवश्यकनिर्युक्तौ निह्नवरोहगुप्तवृत्तान्तं तु इदं–

अन्तरञ्जिका नाम पुरी, तत्र भूतगुहं नाम चैत्यं, तत्र श्रीगुप्ता नाम आचार्याः स्थिताः, तत्र बलश्रीर्नाम राजा, तेषां *श्रीगुप्तानां स्थविराणां अतिश्राद्धो* रोहगुप्तो नाम शिष्यः, *अन्यग्रामे* स्थितः, ततः स उपाध्यायं वन्दितुमायाति, एकश्च परिव्राट् लोहपट्टेनोदरं बद्ध्वा, जम्बूशालां गृहीत्वा हिण्डते, पृष्टो भणति–ज्ञानेनोदरं स्फुटति तत् लोहपट्टेन बद्धं, जम्बूशाखां च यथाऽत्र जम्बूद्वीपे नास्ति मम प्रतिवादीति, ततस्तेन पटहो निष्काशितो – यथा शून्याः परप्रवादाः, तस्य लोकेन पोट्टशाल एव नाम कृतं, स पटहो रोहगुप्तेन वारितः, अहं वादं ददामीति, ततः, स प्रतिषिध्य गत आचार्यसकाशम् ।

आलोचयति–एवं मया पटहो विनिवारितः, आचार्या भणन्ति–दुष्ठु कृतं, यतः स विद्याबली, वादे पराजितोऽपि विद्याभिरुत्तिष्ठते, तस्येमाः सप्त विद्याः, तद्यथा–

विच्छुय सप्पे मूसग मिई वराही य कायपोआई ।
एयाहिं विज्जाहिं सो उ परिव्वायओ कुसलो ।। 137 ।। भाष्य.।

स भणति–किं शक्या अधुना निवारितुम् ? , ततः स आचार्येण भणितः–पठितसिद्धा इमाः प्रतिपक्षविद्या गृहाण, तद्यथा–

मोरी नउली बिराली वग्घी सीही उलुगी ओवाई ।
एयाओ विज्जाओ गेण्ह परिवाय महणीओ ।। 138 ।। भाष्य.।

विधया सह रजोहरणं च तस्मायभिमन्त्र्य दत्तं, यद्यन्यदपि उत्तिष्ठते तदा रजोहरणं भ्रामयेस्ततोऽजय्यो भविष्यसि, इन्द्रेणापि शक्ष्यसे नो जेतुं, तदा ता विद्या गृहीत्वा गतः सभां, भणितं चानेन–एष किं जानाति ?, एतस्यैव पूर्वपक्षो भवतु, परिव्राट् चिन्तयति–एते निपुणास्तत एतेषामेव सिद्धान्तं गृह्णामि, यथा मम द्वौ राशी तद्यथा–जीवाश्च अजीवाश्च, तदा इतरेण चिन्तितं–एतेनास्माकमेव सिद्धान्तो गृहीतः, तेन तस्य बुद्धिं परिभूय त्रयो राशयः स्थापिताः–जीवा अजीवा नोजीवाः, तत्र जीवाः संसारस्थाः, अजीवा घटादयः, नोजीवा गृहकोकिलाछिन्नपुच्छादयः, दृष्टान्तो दण्डः, यथा दण्डस्यादिर्मध्यमग्रं च, एवं सर्वे भावास्त्रिविधाः, एवं स तेन निष्पृष्टप्रश्नव्याकरणः कृतः, तदा स परिव्राट् रुष्टो वृश्चिकान् मुञ्चति, तदा स तेषां प्रतिपक्षान् मयूरान् मुञ्चिति, तदा तैर्हतेषु वृश्चिकेषु पश्चात्सर्पान् –

मुञ्चति, इतरस्तेषां प्रतिघाताय नकुलान् मुञ्चति, तदोन्दुरान् तेषां मार्जारान्, मृगान् तेषां व्याघ्रान्, तदा शूकरान् तेषां सिंहान्, काकांस्तेषामुलूकान्, तदा पोताक्यस्तासामोलवकान्, एवं यदा न शक्नोति तदा गर्दभी मुक्ता, तेन च सा रजोहरणेनाहता, सा परिव्राज उपरि हदित्वा गता, तदा स परिव्राट् हील्यमानो निष्काशितः, ततः स परिव्राजकं पराजित्य गत आचार्यसकाशम्, आलोचयति– यथा जित एवम्, आचार्या आहुः–कथं तदोत्तिष्ठता न भणितं–न सन्ति राशयस्त्रय इति, एतस्य बुद्धिं परिभूय मया प्रज्ञापिताः, इदानीमपि

गत्वा भण, स नेच्छति, मा मेऽपभ्राजना भूदिति, पुनः पुनर्भणितो भणति–को वाऽत्र दोषः ? यदि त्रयो राशयो भणिताः, सन्त्येव त्रयो राशयः, आचार्या आहुः–आर्य ! असद्भावस्तीर्थकरस्याशातना च, तथापि न प्रतिपद्यते, ततः स आचार्येण समं वादं ( कर्तुं ) लग्नः, तदा आचार्या राजकुलं गता भणन्ति–तेन मम शिष्येणापसिद्धान्तो भणितः, अस्माकं द्वौ एव राशी, इदानीं स विप्रतिपन्नः तत् यूयमावयोर्वादं शृणुत, प्रतिश्रुतं राज्ञा, ततस्तयो राजसभायां राजपुरत आपनितः ( वादः ), यथैको दिवसस्तथोत्थाय २ षण्मासी गता, तदा राजा भणति–मम राज्यं अवसीदति, तदाचार्यैर्भणितम्–इच्छया मयेयच्चिरं कालं धृतः, अधुना पश्यत कल्ये दिवसे आगते निगृह्णामि, तदा प्रभाते भाति–कुत्रिकापणे परीक्ष्यतां, तत्र सर्वद्रव्याणि सन्ति, आनय जीवान् अजीवान् नोजीवांश्च, तदा देवतया जीवा अजीवाश्च दत्ता, नोजीवा न सन्ति, एवमादिचतुश्चत्वारिंशेन शतेन पृच्छानां निगृहीतः ।

ततो निगृहीतः षडुलूकः, गुरुणा तस्य मस्तके श्लेष्मकुण्डिका भग्ना, ततो निर्धाटितः, गुरुरपि पूजितो, नगरे च घोषणां कृतं–वर्धमानस्वामि जयतीति । तेनापि स्वभस्मखरण्टितेनैव वैशेषिकं प्रणीतं, तच्चान्यान्यैः ख्यातिं नीतं, तच्चोलूकप्रणीतमित्युच्यते, यतः स गोत्रेणोलूक आसीत् ।

❋ ❋ ❋

**उपसंहारमाह–**

परमात्मनि विमलात्मनां, परिणम्य वसन्तु ।
विनय समामृतपानतो, जनता विलसन्तु, वि० ॥८॥ [१८७]

**॥ इति श्रीशान्तसुधारसगेयकाव्ये मैत्रीभावनाविभावनो नाम त्रयोदशः प्रकाशः ॥१३॥**

**व्याख्या- हे विनय ! हे विनीतात्मन् ! त्वं चिन्तय *विमलात्मनां* सज्ज्ञानदृष्टिमञ्जनानां चेतांसीत्यध्याहृत्य संबन्धनीयं, चेतांसि *परमात्मनि* शुद्धनिरञ्जनपूर्णब्रह्मस्वस्वरूपे *परिणम्य* परिपक्वनिर्भेदरूपतां प्राप्य *वसन्तु* निवासं कुर्वन्तु । हे सुविनीतात्मन् ! त्वमिति भावय इमाः *जनताः* सर्वजीवसमूहाः *समामृतपानतो विलसन्तु* समतामृतपानाद्विलसन्तु रमणं कुर्वन्त्वित्यर्थः ॥८॥**

दृश्या अच्चङ्कारी भट्टाकथा –

क्षितिप्रतिष्ठपुरे धनश्रेष्ठी । तस्य भद्राख्या गेहिनी अभवत् । तयोः सुता अष्टौ, तदुपरि भट्टिकानामा दुहितैका बभूव । एकदा श्रेष्ठिना स्वजनसमक्षमुक्तम्–मदीयेयं सुता केनापि न चुङ्कारयितव्या । तेनाच्चङ्कारीभट्टेतिनाम्ना प्रसिद्धा जाता । अन्यदा तत्कमनीययौवनं राज्ञो मन्त्रिणा वीक्ष्य तज्जनकपार्श्वे मार्गिता । श्रेष्ठिनाऽभाणि–योऽस्या वाक्यं नोल्लङ्घयति तस्याहं दास्ये, नान्यस्य । तेनापि स्वीकृतं । ततः शुभे लग्ने विवाहो जातः । तया सह वैषयिकसौख्येन कतिपयदिनान्युदलङ्घयत् । ततस्तया भर्तुरग्रे प्रोक्तम् प्राणेश ! अस्तमिते रवौ अधिकारिणा त्वया क्वापि न गन्तव्यं मत्प्रीत्या प्रयोजनं चेत् । तेन तद्वाक्यं प्रतिपन्नम् । अन्यदा राज्ञा पृष्टं भो मन्त्रिन् ! त्वं प्रत्यहं किं सकाले गृहे यासि ? । तेन यथास्थिते प्रोक्ते राज्ञा किञ्चिन्मिषं कृत्वा विनोदाय यामयुग्मं संस्थाप्य ततो विसृष्टः स गृहे ययौ । तया द्वारं नियन्त्रित दृष्टा

प्राह–प्रिये ! द्वारमपावृणु ! नृपाज्ञया स्थितो न स्वेच्छया । परवशे मयि न कोपः कार्यः । इति पुनः पुनरुच्यमानं तत् श्रुत्वा कोपेन द्वारमपावृत्य दृशौ प्रतार्य गृहान्निर्गता पितृगृहं यान्ती चौरेण गृहीता । वस्त्राभरणानि संगृह्य सा पल्लीस्वामिने दत्ता । पल्लीशेन भोगार्थं भृशं कदर्थिता सा प्राह–प्राणत्यागेऽपि नाहं शीलं खण्डयामि, त्वं मुधा प्रयत्नं करोषि यथोषरे वर्षणम् ।

शीलवत्याः शापभयेन विरक्तो भिल्लः कस्यचिन्नरस्यान्तिके तां व्यक्रीणात् । तेन बब्बरकुले कारुकगृहे विक्रीता । तेनापि भोगार्थं प्रार्थिता । तया तस्योक्तं न कृतम् । स पुनराह त्वमन्नवसनादिसुखमिच्छसि चेत्तदा मदुक्तं प्रमाणीकुरु । सा तृतीयाकारज्ञापि निश्चयं नामुचत् । ततः कृद्धः स स्त्रीशरीरतो रुधिरमाकृष्यैकत्र भाण्डे न्यधात् । तत्रोत्पन्नकृमिकाणां रुधिरैर्वस्त्राणि रञ्जयति । रक्तस्रावेणेयं पाण्डुरोगा जाता । शीलं न भग्नम् ।

इतश्च तन्नगरे वाणिज्यार्थं समागतेन तस्या ज्येष्ठसहोदरेण तत्र भ्राम्यता सा भगिनी दृष्टा । स धनपालस्तस्मै धनं दत्त्वाऽमोचयत् । स्वसारं गृहीत्वा.स निजपुरं ययौ । अथ भर्ता तां प्रत्यानीय सर्वस्वस्वामिनीं व्यधात् । ततस्तया मरणाऽन्तेऽप्यहं कोपं न करोमीति प्रतिज्ञा कृता । अथ तन्नगरवने कायोत्सर्गस्थित–मुनिपतिदेहः केनचिद्वह्निना दग्धः । तस्य चिकित्सार्थं कुञ्चिकश्रेष्ठिनाऽन्यन्मुनियुगलं लक्षपाकतैलार्थ–मच्चङ्कारीगृहे प्रेषितम् । तेन तैलं याचितम् । सा दास्यै तैलघटमानय इत्यादेशं ददौ । अत्रान्तरे इन्द्रेण सेति प्रशंसिता–सम्प्रति भुवनेऽच्चङ्कारीभट्टासदृशः कोऽपि क्षमावान्नास्ति । तदिन्द्रवाक्यमश्रद्दधानो नास्तिको देवस्तस्या गृह समागतः । स दास्याः करादेकं कुम्भं देवशक्त्याऽपातयत् । ततो द्वितीयः कुम्भ आनायितः । सोऽपि पातितः । एवं तृतीयेऽपि भग्ने सा तुर्यं स्वयमानयत् स तु शीलमाहात्म्यतो न भग्नः तया तैलं दत्तम् । ततो मुनिनोक्तम्–भो भद्रे ! अस्माकं कृते तव घटानां भङ्गतो गुरुर्व्ययो जज्ञे । दास्यां त्वया कोपो न कार्यः किञ्चिद्विहस्य सोचे–भगवन्मया क्रोधमानयोः फलं प्रागनुभूतम् किं तदिति तेन पृष्टे सा निजस्वरूपं तस्मै न्यवेदयत् । तन्निशम्य स सुरः प्रत्यक्षीभूय तामिन्द्रस्य वृत्तान्तं जगौ । पूर्वभग्नांस्तैलघटान् सज्जीकृत्य तां प्रशस्य स्वर्णवृष्टिं कृत्वा स्वस्थानं गतः । मुनियुगलमपि तस्या उपबृंहणां कृत्वा तत्तैलेन साधुं पटूचक्रे । सापि गर्वोज्झिता श्राद्धधर्मं प्रपाल्यान्ते समाधिना मृत्वा देवसुखानि भुक्त्वा मोक्षं यास्यति ।

**।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणि–सतीर्थ्यतिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां श्रीशान्त–सुधारसटीकायां मैत्रीभावनाविभावनो नाम त्रयोदशः प्रकाशः समजनि ।।**

❀ ❀ ❀

## ।। चतुर्दशः प्रकाशः ।।

उक्तस्त्रयोदशः प्रकाशः । अथ चतुर्दशः प्रोच्यते । तस्य चायं संबन्धः–त्रयोदशे प्रकाशे मैत्री कथिता, मैत्रीभावितात्मा गुणवान् भवति । गुणवांस्तु परगुणान् स्तुवन् प्रमुदितो भवतीत्यनेन संबन्धेनायातां प्रमोदभावनां विभावयन्नाह । तस्याश्चायमादिमः श्लोकः–

( स्रग्धरावृत्तम् )

धन्यास्ते वीतरागाः, क्षपकपथगतिक्षीणकर्मोपरागा-
स्त्रैलोक्ये गन्धनागाः, सहजसमुदितज्ञानजाग्रद्विरागाः ।
अध्यारुह्यात्मशुद्ध्या, सकलशशिकलानिर्मल-ध्यानधारा-
माराान्मुक्तेः प्रपन्नाः, कृतसुकृतशतोपार्जितार्हन्त्यलक्ष्मीम् ।।१।। [१८८]

व्याख्या- हे चेतन ! ये *क्षपकपथगतिक्षीणकर्मोपरागा* ये सुकृतिनः *क्षपकपथगतिः क्षपकाः* समूलकाषकषणविनाशेन विनाशकाः तेषां *पंथा* मोहनीयकर्मतरुकन्दनिष्कासनरूपमार्गः तस्मिन् या *गतिः* क्षपकश्रेण्याध्वारोहणरूपा प्राप्तिस्तया *क्षीणो* निःसत्ताकीकृतः *कर्मोपरागो* जीवेन्दोः कर्मराहुग्रा-समालिन्यं येषां ते तथाविधाः, *वीतरागाः वीतो* नष्टो *रागः* समग्राभिलाषो येषां ते वीतरागाः सर्वथेच्छारहिता इति यावत्, *ते धन्याः* कृतपुण्याः, एवं सर्वत्र धन्यशब्दसंबन्धः कार्यः, *त्रैलोक्ये गन्धनागाः* य एव *त्रैलोक्ये* त्रिभुवनजनसमूहे *गन्धनागा* विहारपवनगन्धप्रसरमात्रप्रभावादेव प्रशमितरोगोपद्रवमारीततिरूपक्षुद्रगजेषु गन्धहस्तिनस्ते *धन्याः* । *सहजसमुदितज्ञानजाग्रद्विरागाः सहजं* पूर्वजन्मान्तरात्सार्धमागतनादितः स्वभावभूतमपरोपदिष्टं *ज्ञानं* मतिश्रुतावधि-त्रिविधं परोक्षप्रत्यक्षविषयबोधस्तेन *जाग्रत्* गर्भावतारस-मयादारभ्य जागरायमाणो *विरागो* भवनिवासाद्विरक्तता येषां *ते धन्याः* । तथा ये *आत्मशुद्ध्या आत्मनो* जीवस्य *शुद्धिः* सद्विवेकात्प्रवर्धमानोज्ज्वलक्षमार्जवादिनिर्मलपरिणतिस्तया, *सकलशशिकलानिर्मलध्यान-धारामध्यारुह्य कृतसुकृतशतोपार्जितार्हन्त्यलक्ष्मीं मुक्तेराराात्प्रपन्नाः, सकलः* परिपूर्णमण्डलपूर्णिमासत्कः *शशी* चन्द्रस्तस्य याः *कलाः* समग्रकान्तिभरयुक्तरश्मयस्तासामिव या *निर्मला* चलनादिसर्वदोषवर्जितविमला *ध्यानयोर्धर्म्यशुक्लयोर्धारा*ऽन्यान्यान्तर्मुहूर्तपरिमाणरूपाणां ध्यानानामखण्डा सन्ततिः तां, *अध्यारुह्य आधिक्येन* प्रवर्धमानगुणप्रकर्षत्वेना*रुह्य समारोहणं* कृत्वा सुकृतानां शतानि सुकृतशतानि, *कृतानि* निष्पादितानि *सुकृतशतानि तैरुपार्जिता* स्वहस्तप्राप्तकृता *आर्हन्त्यलक्ष्मीं* अर्हतां *लक्ष्मीः* सर्वपूज्यत्व-प्रातिहार्यातिशयसमन्वितत्वादिरूपा विभूतिः सा आर्हन्त्यलक्ष्मीस्तां, प्राप्य ये *मुक्ते*र्मोक्षस्य *आरान्* आरा भवसमुद्रान्निर्गच्छतां निरपायनिर्गममार्गाः क्षायिकगुणरत्नत्रयादिलाभरूपास्तीरप्रदेशास्तान्, *प्रपन्नाः* संप्राप्तास्ते *धन्याः* सफलीकृता वरा इत्यर्थः।।१।।

उपदेशप्रासादे नन्दनर्षिवर्णनं तु इदम् –

इह भरते छत्रिकापुर्या जितशत्रुतो भद्रादेव्या नन्दनो नाम नन्दनोऽजनिष्ट । यौवने क्रमेण पितुः साम्राज्यं लब्ध्वा जन्मतश्चतुर्विंशतिमब्दलक्षीं व्यतीत्य नन्दनः पोट्टिलाचार्यसमीपे धर्ममित्यशृणोत्–

ज्ञानमेव बुधाः प्राहुः, कर्मणां तापनात्तपः । तदाभ्यन्तरमेवेष्टं, बाह्यं तदुपबृंहकम् ।।1 ।।

बुधाः कर्मणामात्मप्रदेशसंश्लिष्टानां तापनात्तीक्ष्णं ज्ञानमेव तपः प्राहुः, तत्तपोऽन्तरङ्गं प्रायश्चि– तादिकमिष्टं बाह्यमनशनादिकं तदुपबृंहकं तत्प्रशंसकमाभ्यन्तरतपोवृद्धिहेतुः द्रव्यतपो भावतपसः कारणमेव, तेन तदिष्टम् ।

तदेव हि तपः कार्यं, दुर्ध्यानं यत्र नो भवेत् । येन योगा न हीयन्ते, क्षीयन्ते नेन्द्रियाणि च ।।2 ।।

इत्यादिधर्मदेशनया प्रबुद्धो विरक्तः सूरिसमीपे व्रतमाददे । मासोपवासैः सततैः स श्रामण्यं प्रकर्षयन् गुरुणा सार्धं ग्रामादिषु व्यहार्षीत् । उभाभ्यामपध्यानाभ्यां वर्जितः, त्रिभिर्दण्डैर्गौरवैः शल्यैश्च रहितः सदा, द्वाणचतुष्कषायः, चतुःसंज्ञात्यक्तः, चतुर्विकथामुक्तः, चतुर्धर्मासक्तः, चतुर्विधोपसर्गैरस्खलितोद्यमः, पञ्चमहाव्रतधाम, पञ्चप्रकारस्वाध्यायग्रामः प्रतिवासरं समितिपञ्चकं बिभ्राणः, दुःसहामपि परीषहपरम्परां सहमानो निरीहो नन्दनमुनिर्वर्षलक्षं तपोऽकरोत्, एकादशलक्षाणि अशीतिसहस्राणि मासक्षपणानि चकार, तत्रैव भवे जिननामकर्म निकासितं कृतं च, यतः–

अर्हद्भक्त्यादिभिः स्थानैर्विंशत्या हि महातपाः । दुरर्जमर्जयामास, तीर्थकृन्नामकर्म सः ।।3 ।।

मूलतोऽपि हि निष्कलङ्कं श्रामण्यं चरित्वाऽऽयुःपर्यन्तसमये आराधनामिति व्यधात् यतः–

राशावव्यवहाराख्येऽनन्तजन्तुप्रघट्टनात् । यया मे कर्म कृत्तं तां, पीडामप्यनुमोदये ।।4 ।।

जिनानां प्रतिमाचैत्यभृङ्गारमुकुटादिषु । यो मे कायो, पृथ्वीमयः जज्ञे तमनुमोदये ।।5 ।।

जिनानां प्रतिमाचैत्यभृङ्गारमुकुटादिषु । यो मे जलमयः कायः, प्रायस्तमनुमोदये ।।6 ।।

धूपाङ्गारे च दीपे च, जिनानां पुर एव हि । मम तेजोमयः कायो, जातस्तमनुमोदये ।।7 ।।

धूपोत्क्षेपेऽर्हतां सङ्घे, श्रान्ते वातार्थवर्त्मसु । यो मे वायुमयः कायो, ववौ तमनुमोदये ।।8 ।।

मुनीनां पात्रदण्डेषु, जिनार्चाकुसुमेषु च । यो मे द्रुममयः कायोऽभवत्तमनुमोदये ।।9 ।।

क्वापि सत्कर्मयोगेन, जिनधर्मोपकारकः । आसीत्त्रसमयः कायो, यो मे तमनुमोदये ।।1 0 ।।

तथा श्रीवीरचरित्रे–

ज्ञानाचारोऽष्टधा प्रोक्तो, यः कालविनयादिकः । तत्र मे कोऽप्यतिचारो, योऽभून्निन्दामि तं त्रिधा ।।1 1 ।।

यः प्रोक्तो दर्शनाचारो, ऽष्टधा निःशङ्कितादिकः । तत्र मे योऽतिचारोऽभूत्, त्रिधाऽपि व्युत्सृजामि तम् ।।1 2 ।।

या कृता प्राणिनां हिंसा, सूक्ष्म वा बादराऽपि वा । मोहाद्वा लोभतो वाऽपि, व्युत्सृजामि त्रिधापि तान् ।।1 3 ।।

हासभीक्रोधलोभाद्यैर्यन्मया भाषितं मृषा । तत्सर्वमपि निन्दामि, प्रायश्चित्तं चरामि च ।।1 4 ।।

अल्पं भूरि च यत्क्वापि, परद्रव्यमदत्तकम् । आत्तं रागादथ द्वेषात्, तत्सर्वं व्युत्सृजाम्यहम् ।।1 5 ।।

तैरश्चं मानुषं दिव्यं, मैथुनं मयका पुरा । यत्कृतं त्रिविधेनापि, त्रिविधं व्युत्सृजामि तत् ।।1 6 ।।

बहुधा यो धनधान्यपश्वादीनां परिग्रहः । लोभदोषान्मयाऽकारि, व्युत्सृजामि त्रिधाऽपि तम् ।।1 7 ।।

पुत्रे कलत्रे मित्रे च, बन्धौ धान्ये धने गृहे । अन्येष्वपि ममत्वं यत्, तत्सर्वं व्युत्सृजाम्यहम् ।।1 8 ।।

इन्द्रियैरभिभूतेन, यदाहारश्चतुर्विधः । मया रात्रावुपाभोजि, निन्दामि तमपि त्रिधा ।।1 9 ।।

क्रोधो मानो माया लोभो, रागो द्वेषो कलिस्तथा । पैशुन्यं परनिर्वादोऽभ्याख्यानमपरं च यत् ।।2 0 ।।

चारित्राचारविषयं, दुष्टमाचरितं मया । तदहं त्रिविधेनापि, व्युत्सृजामि समन्ततः ।।21 ।।
यस्तपः स्वतिचारोऽभूत्, बाह्येष्वभ्यन्तरेषु च । त्रिविधं त्रिविधेनापि, निन्दामि तमहं खलु ।।22 ।।
धर्मानुष्ठानविषये, यद्वीर्यं गोपितं मया । वीर्याचारातिचारं च, निन्दामि तमपि त्रिधा ।।23 ।।
हतो दुरुक्तश्च मया, यो यस्याहारि किञ्चन । यस्यापाकारि किञ्चिद्वा, मम क्षाम्यतु सोऽखिलः ।।24 ।।
यश्च मित्रममित्रो वा, स्वजनोऽरिजनोऽपि वा । सर्वः क्षाम्यतु मे सर्वं, सर्वेष्वपि समोऽस्म्यहम् ।।25 ।।
तिर्यक्त्वे सति तिर्यञ्चो, नारकत्वे च नारकाः । अमरा अमरत्वे च, मानुषत्वे च मानुषाः ।।26 ।।
ये मया स्थापिता दुःखे, सर्वे क्षाम्यन्तु ते मम । क्षाम्याम्यहमपि तेषां, मैत्री सर्वेषु मे खलु ।।27 ।।
जीवितं यौवनं लक्ष्मी, रूपं प्रियसमागमः । चलं सर्वमिदं वात्यानर्तिताब्धितरङ्गवत् ।।28 ।।
व्याधिजन्मजरामृत्युग्रस्तानां प्राणिनामिह । विना जिनोदितं धर्मं, शरणं कोऽपि नापरः ।।29 ।।
सर्वेऽपि जीवाः स्वजना, जाताः परजनाश्च ते । विदधीत प्रतिबन्धं, तेषु को हि मनागपि ।।30 ।।
अर्हन्तो मम शरणं सिद्धसाधवः । उदीरितः केवलिभिर्धर्मः शरणमुच्चकैः ।।31 ।।
चतुर्विधाहारमपि, यावज्जीवं त्यजाम्यहम् । उच्छ्वासे चरमे देहमपि हि व्युत्सृजाम्यहम् ।।32 ।।
दुष्कर्मगर्हणां जन्तुक्षामणां भावनामपि । चतुःशरणं च नमस्कारं चानशनं तथा ।।33 ।।
एवमाराधनां षोढा, स कृत्वा नन्दनो मुनिः । धर्माचार्यानक्षमयत्, साधून् साध्वीश्च सर्वतः ।।34 ।।
षष्टिं दिनान्यनशनं, पालयित्वा समाहितः । पञ्चविंशत्यब्दलक्षपूर्णायुः सोऽममो मृतः ।।35 ।।

प्राणतस्वर्गे समुत्पन्नः ।

आयुर्विंशतिसागरोपममितं सोऽपूरि देवाग्रणीः,
पर्यन्तेऽपि विशेषतः प्रतिकलं देदीप्यमानः श्रिया ।
मुह्यन्ति ह्यपरे त्रिविष्टपसदः षण्मासशेषायुषः,
क्वाप्युच्चैर्ननु तीर्थकृद्दिविषदोऽत्यासन्नपुण्योदयाः ।।36 ।।

ततश्च्युत्वा श्रीवीरजिनेश्वरश्चरमतीर्थकृद्बभूवेति ।

❋ ❋ ❋

**तेषां कर्मक्षयोत्थैरतनुगुणगणैर्निर्मलात्मस्वभावै,**
**र्गायं गायं पुनीमःस्तवनपरिणतैरष्टवर्णास्पदानि ।**
**धन्यां मन्ये रसज्ञां जगति भगवतस्स्तोत्रवाणीरसज्ञा-**
**मज्ञां मन्ये तदन्यां वितथजनकथां कार्यमौखर्यमग्राम् ।।२।। [१८९]**

व्याख्या- *तेषां* मुक्तेस्तीरप्रपन्नानां *कर्मक्षयोत्थैः कर्माणि* ज्ञानदर्शनावरणमोहनीयान्तरायप्रभृतीनि तेषां यः *क्षयो* विनाशस्तस्मादुत्थैः समुद्भूतैः *अतनुगुणगणैः* न तनवोऽनल्पा अलघवो ये *गुणगणाः* प्रभूता गुणराशयस्तैः, *निर्मलात्मस्वभावैः निर्मलाः* कर्मलेपदोषमलवर्जिता *आत्मस्वभावा आत्म*नश्चिद्घनजीवस्य ये *स्वभावाः* पूर्णज्ञानदर्शनानन्दावर्णरसस्पर्शमयत्वादिनिजसहजस्वरूपास्तैः, *स्तवनपरिणतैः* स्तूयन्ते एभिस्तानि *स्तवनानि* स्तुतयस्ताभिः *परिणताः* स्वकल्याणेच्छया प्रोक्तगुणगणान् गृहीत्वा सत्कविः (गायं गायं) समुद्गीय समुद्गीय *अष्टवर्णास्पदानि* दन्तोष्ठतालुकण्ठजिह्वोरुमूर्धनासिकारूपस्थानानि

*पुनीमः* पावनीकुर्मः । *जगति* विश्वे *भगवतः स्तोत्रवाणीरसज्ञा* या *भगवतो*ऽर्हदादिगुणसंपूर्णस्य महापुंसः *स्तोत्रवाणी* स्तुतिस्तवनादिकर्तव्यतारूपवाग्व्यापारपरा *रसज्ञा* जिह्वा वर्तते तां *रसज्ञां* रसज्ञानवतीं रसनां *धन्यां* गुणज्ञां कृतार्थं च *मन्ये* जानामि । *तदन्यां* प्रोक्तगुणरसनातो भिन्नां *वितथजनकथां* धर्मविमुखविपरीतबुद्धिजनास्तेषां या कथा *वितथजनकथा* तां *कार्यमौखर्यमग्नां* तत्कर्त्री या *मौखर्यं* मुखरता वाचालता तस्यां *मग्ना* लीना तां, *अज्ञां* अरसज्ञां *मन्ये* जानामीत्यर्थः।।२।।

परमार्हत्कविधनपालकथा तु यथा उपदेशप्रासादे–

धारानगर्या लक्ष्मीधरविप्रस्य द्वौ तनुजन्मानौ धनपालशोभनाह्वौ जातौ । एकदा तस्य गृहे न्यस्तो निधिर्बहु विलोकिलोऽपि न लभ्यते । अन्यदा वेदानामपि ज्ञातारस्तत्रागता जिनेश्वरसूरयो लक्ष्मीधरेण पृष्टा ऊचुः–यद्येकं पुत्रमस्माकं ददासि तदा तव निधिं दर्शयामः । तेनापि प्रतिपन्ने गुरुपादैरहिवलयचक्राम्नायेन निधिर्दर्शितः । क्रमादन्त्यावसरे तेन स्वप्रतिज्ञा पुत्राभ्यां ज्ञापिता । सखेदं पितरं वीक्ष्य शोभनःप्राह–अहं त्वामनृणं करिष्यामि । ततस्तन्मृते स्वजनमनापृच्छ्यैव गुरुपार्श्वे दीक्षां जग्राह । ततो धनपालभयेन गुरुभिर्मालवे विहारो निषिद्धः । शोभनो महाविद्वान् जिनस्तुतिकरणव्यग्रमना विहरणाय गतः भृतपात्रमोचनसमये दृषत्पात्रमादायागतो गुर्वभ्यर्णे ! तत् दृष्ट्वा तत्स्पर्धाकारिभिर्हसितः–अहो ! अस्य महालाभोदयो जातः । ततः शोभनेन गुरुं प्रति यथास्थितं प्रोक्तम् । तच्छ्रुत्वा काव्यानि दृष्ट्वा गुरुर्जहर्ष । अन्यदा गुरुराह–भोः शिष्य ! त्वं तत्र गत्वा जैनद्वेषिणं धनपालं बोधय । तदङ्गीकृत्य शोभनस्तत्र गतः । अवन्त्या द्वारे प्रविशन् धनपालेन दृष्टः । तेन हास्यात्प्रोक्तम्– गर्दभदन्त भदन्त ! नमस्ते । साधुःप्राह–मर्कटकास्य वयस्य ! सुखं ते ? । इति मुनेर्वचश्चातुर्यान्निर्जितोऽस्मीति विचिन्त्यावक्–कस्य गृहे वसतिस्तव साधो ! । साधुराह–यस्य रुचिस्तस्य गृहे मम वसतिः । ततस्तं विद्वांसं मत्वा धनपालः स्वगृहे समुत्तताार । ततः स्वौकसि भोक्तुमुपविशता तेन मुनिः स्मृतः, अशनायाकारितश्च । तस्मिन्नेवाहनि केनापि वैरिणा मोदके विषं क्षिप्तमासीत्, तद्दीयमाने मुनिनोक्तम्–न कल्पतेऽयम् । सोऽवक्–किमन्तर्विषमस्ति ? साधुनोक्तम्– एवमेव । ततो धनपालेन परंपरया वैरिक्षिप्त विषं विज्ञाय स्वजीवितरक्षकं मुनिं प्राह–भवद्भिः कथं ज्ञातम् ? मुनिना प्रोक्तम्– पूर्वसूरिवचसा ज्ञातम् । तथाहि–

दृष्ट्वान्नं सविषं चकोरविहगो धत्ते विरागं दृशो–
हंसः कूजति सारिका च वमति क्रोशत्यजस्रं शुकः ।
विष्टां मुञ्चति मर्कटः परभृतः प्राप्नोति मृत्युं क्षणात्,
क्रौञ्चो माद्यति हर्षवांश्च नकुलः प्रीतिं च धत्ते द्विकः ।।

तेनेमं मोदकं वीक्ष्य पञ्जरस्थोऽयं चकोरो नयने न्यमीलयत्, इत्यादिना मया ज्ञातम् । तन्निशम्य विस्मितो धनपालः । पुनर्दध्यानीतम् । साधुः प्राह–त्रिदिनीयमिदमपि न कल्पते । बुधोऽवक् किमत्र जीवाः सन्ति ? एवमेव इत्युक्त्वा साधुना दध्नि यावकरसं मुक्त्वा जीवा दर्शिताः । ततः प्रासुकं ददौ । ततो मुनिं प्रत्याह–भगवन् ! युष्मान् दृष्ट्वा भूयो भूयो मम भ्राता स्मरति । साधुरवक्–हे सखे ! तव समीपे त्वद्भ्रातै–वास्ति । इति वाक्येन सप्रत्ययः स मुमुदे । ततः शोभनस्तं निश्चलं श्रावकं कृत्वाऽन्यत्र विजहार । धनपालः पञ्चशतपण्डितेषु मुख्योऽजनि ।

अन्यदा भोजः पञ्चशतीपण्डितयुतः पापर्द्ध्यै गतः । तत्रैकं हरिणमेकेन बाणेन हतवान् । ततः पलायमानान् श्वापदान् वीक्ष्य राजा कविराजं प्राह–

किं कारणं तु कविराज ! मृगा यदेते, व्योम्न्युत्पतन्ति विलिखन्ति भुवं वराहाः ।
देव ! त्वदस्त्रचकिताः श्रयितुं प्रयान्ति, एके मृगाङ्कमगमादिवराहमन्ये ।।

ततो राजा धनपालं प्राह–त्वं ममाखेटकं वर्णय । स आह–

रसातलं यातु यदत्र पौरुषं, कुनीतिरेषाऽशरणो ह्यदोषवान् ।
निहन्यते यद्बलिनातिदुर्बलो, हहा महाकष्टमराजकं जगत् ।।
पदे पदे सन्ति भटा रणोत्कटा, न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं तन्नृपतेः कुविक्रमं, कृपाश्रये यः कृपणो मृगे मयि ।।

इति निर्भर्त्सनात् क्रुद्धो नृपो धनपालस्य दृष्टौ दृष्टिं दत्त्वा प्राह–किमेतत् ? इत्युक्ते धनपालः प्राह–

वैरिणोऽपि हि मुच्यन्ते प्राणान्ते तृणभक्षणात् । तृणाहाराः सदैवैते हन्यन्ते पशवः कथम् ? ।।

इति श्रुत्वा संजातकृपेण तेन धनुर्बाणभङ्गं विधाय मृगयाकरणसंधानं विधाय स्वकारितसरसि गतवान् । तत्रापि नृपवाक्यतः कविराजेन सरोवर्णनं कृतम्, तद्यथा–

हंसैर्युक्तः प्रशस्तैस्तरलितकमलैः प्राप्तरङ्गैस्तरङ्गै–
र्नीरैरन्तर्गभीरैश्चटुलबककुलग्रासलीनैश्च मीनैः ।
पालीरूढद्रुमालीतलसुतशयितस्त्रीप्रणीतैश्च गीतै
र्भाति प्रक्रीडनाभिः क्षितिप ! तव चलच्चक्रवाकस्तटाकः ।।

ततो नृपाज्ञया सम्यग्धर्मी प्राह–

एषा तटाकमिषतो वरदानशाला, मत्स्यादयो रसवती प्रगुणा बभूव ।
पात्राणि यत्र बकसारसचक्रवाकाः, पुण्यं कियद्भवति तत्र वयं न विद्मः ।।

तत्रापि नृपो द्वितीयदृष्टौ दृष्टिं ददौ । ततो यज्ञे हन्तुमानीतस्यच्छागस्य दीनां गिरमाकर्ण्य किं पशुरसौ व्याहरतीति नृपेण पृष्टः । कविराजः प्राह–

अस्मान् हन्तु पदे पदे बलिकृते दग्धांश्च(ग्धा च) जग्धैस्तृणै–
रस्मत्कुक्षिररक्षदक्षमनुजैर्नामोच्यते पश्विति ।
आवां जामिकलत्रभेदविकलाः तत्क्षुत्पिपासा वयं,
तेनास्मान्नय देव देवसदनं प्रार्थन्त्यजास्त्वामिति ।।

ततो राजा धनपालमवक्–पण्डित ! अयं किं कथयति ? ।

सोऽवक् –

नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया,
संतुष्टस्तृणभक्षणेन सततं साधो ! न युक्तं तव ।
स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो,
यज्ञं किं न करोषि मातृपितृभिः पुत्रैस्तथा बान्धवैः ।।

तच्छ्रुत्वा क्रोधेन राजा धनपालमवक्–अरे ! किं वदसि ? स उवाच–स्वामिन् ! सत्यं वच्मि–

यूपं कृत्वा पशून् हत्वा कृत्वारुधिरकर्दमम् । यद्येवं गम्यते स्वर्गे नरके केन गम्यते ।।

किञ्च हे देव ! मांसलुब्धै राक्षसनिभैर्विप्रैरीदृशयस्प्रशंसां कृत्वा त्वं कुमार्गे नीतोऽसि ।

ईदृक्पशुवधे नैव कश्चन धर्मोऽस्ति, प्रत्युत केवलं महापापमेव । शास्त्रेष्वपि सत्ययज्ञ ईदृशो भणितः–

सत्यं यूपस्तपो ह्यग्निः कर्माणि समिधो मम । अहिंसामाहुतिं दद्यादेवं यज्ञः सतां मतः ।।

स्वर्गः कर्तृक्रियाद्रव्यविनाशे यदि यज्विनाम् । तदा दवाग्निदग्धानां फलं स्याद्भूरि भूरुहाम् ।

निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते । स्वपिता यजमानेन किं न तस्मिन्निहन्यते ।।

तच्छ्रुत्वा क्रुद्धो नृपस्तं सपरिकरं हन्तुं ध्यातवान् । धनपालेन तन्मनोगतं सर्वं विज्ञातं, परं स्वनियमं न तत्याज । ततो नृप ईश्वरप्रासादे गतः । धनपण्डितं विना सर्वेऽपि शिवं प्रणेमुः । तदा नृपस्तं प्राह–त्वं शिवस्य कथं प्रणामं न करोषि ? । स प्राह –

जिनेन्द्रचन्द्रप्रणिपातलालसं, मया शिरोऽन्यस्य न नाम नाम्यते ।

गजेन्द्रगल्लस्थलदानलोलुपं, शुनो मुखे नालिकुलं निलीयते ।।

तच्छ्रुत्वा राजा विशेषतः क्रोधारुणनेत्रो यावत् पुरद्वारे समागच्छति, तावदेका वृद्धा नारी बालिकाहस्तविलग्ना कम्पमाना सुंमुखी आगता । तां वीक्ष्य भूपः पण्डितान् प्राह–एषा शिरःकरादिकं कथं धूनयति ? तदा विज्ञोऽवक्–

कर कंपावइ सिर धुणे बुढ्ढी काहू कहेइ ।

हंकारं ता यम भणइ, नंनंकार करेइ ।।

अन्यः प्राह–

जरायष्टिप्रहारेण कुब्जीभूता हि वामना ।

गतं तारुण्यमाणिक्यं निरीक्षते पदे पदे ।।

राज्ञोक्तम्–हे वक्रमते धनप ! किं पृच्छतीयं बालिका जरतीम् ? । ततो नृपक्रोधत्यागाय स उवाच स्वामिन् ! इमां कन्यां प्रति जरती प्रश्नोत्तरं ददाति। तद्यथा–

किं नन्दी किं मुरारिः किमु रतिरमणः किं नलः किं कुबेरः

किं वा विद्याधरोऽसौ किमु च सुरपति किं विधुः किं विधाता ।

नायं नायं न चायं न खलु न हि न वा नापि नासौ न वैष

क्रीडां कर्तुं प्रवृत्तः स्वयमिह हि हले ! भूपतिर्भोजदेवः ।।

इदं काव्यं श्रुत्वा भोजः प्रसन्नः प्राह–मार्गय पण्डित ! धनपालोऽवक्–दृष्ट्यादिकं मामकीनमपहृतं मह्यं देहि । राजावक्–मया तु तव किमपि न गृहीतं स प्राह–स्वामिन् ! त्वया हरिणीवधे सरोवर्णनादिके चैकादिनेत्रकर्षणं ध्यातं, अतो भावतो गृहीतं । ततो राजा हृष्टः कोटिदानं ददौ, प्राह च ज्ञानेन त्वं सर्वज्ञपुत्रो जातः श्रद्धाभवनात् ।

एकदा भोजेन स पृष्टः–तवाधुना किं व्यग्रमानसं विद्यते ? ।पण्डित आचष्ट–मयाऽधुना श्रीयुगादिचरितं बध्यते । ततः पूर्णे जाते राजा चरितं शृण्वन् दध्यौ–अस्यार्थरसो भूमौ मा पततु । इति धिया पुस्तकस्याधो हेमपात्रममण्डयत् । सुधेव तदर्थरसं पिबन् दिनं निशामपि व्यतीतां नैव जानाति स्म । पूर्णं श्रुत्वा राजा जगौ–यदि विनीतास्थानेऽवन्तिः स्थाप्यते भरतस्थानेऽहं स्थाप्ये,

आदिदेवस्थाने चेश्वरः स्थाप्यते, तदायं ग्रन्थो वर्यः स्यात्, स्वर्ण सुरभिवत् । एवं चेत्त्वं कुरु, तदा तुभ्यं कोटिद्रव्यं दीयते । इति श्रुत्वा धनपो जगौ–

मेरुसर्षपयोर्हंसकाकयोः खरतार्क्ष्ययोः ।
अस्त्यन्तरमवन्त्यादेरयोध्यादेश्च भूपते ! ।।

अहो ! एवं वदतस्तव जिह्वा शतखण्डं कथं नाप्ता ? ततो रोषा पुनः प्राह पण्डितः–

हे दोमुह य निरक्खर लोहमइ य नाराय किंत्ति भणिमो । गुंजाहि समं कणयं तुल्लं न गओसिं पायलं ?

इति निजनिन्दां श्रुत्वा क्रुद्धो राजा तं मूलग्रन्थं भस्मीचकार । अथासौ द्विधा निर्वेदभाक् सशोको गृह आगतः । ततः पुत्र्या तिलकमञ्जर्या पृष्टम्–तात ! किं दुःखं ? तेन सर्वं प्रोक्तं, पुत्री प्राह–लिख्यतां ग्रन्थः, मम मुखे समेति । ततो हृष्टः पुनः पुस्तकं लिखित्वा तिलकमञ्जरीति नाम दत्तम् । ततोऽन्यदाऽन्यग्रामे गतो धनपालः । एकदा भोजसभायां केनचित् पण्डितेन सर्वेऽपि विद्वांसस्तिरस्कृताः । भूपो विखिन्नः स्वयं गत्वा धनपालं संमान्य समानीतवान् । तमागतं श्रुत्वा स विद्वान् रात्रौ नष्ट्वा गतः । ततो जैनधर्मस्य प्रशंसा जाता । ततो धनपालोऽपि सुखेन तस्थौ । क्रमाद्धर्ममाराध्य स्वर्भुवं गतः ।

❋ ❋ ❋

**निर्ग्रन्थास्तेऽपि धन्या गिरिगहनगुहागह्वरान्तर्निविष्टा,**
**धर्मध्यानावधानाः समरससुहिताः पक्षमासोपवासाः ।**
**येऽन्येऽपि ज्ञानवन्तः श्रुतविततधियो दत्तधर्मोपदेशाः**
**शान्ता दान्ता जिताक्षा, जगति जिनपतेः शासनं भासयन्ति।।३।। [१९०]**

**व्याख्या- ये *निर्ग्रन्था* मुनयः *गिरिगहनगुहागह्वरान्तर्निविष्टाः गिरौ* पर्वतशिखरे *गहने* साधारणजनदुष्प्रवेशे वनदेशे *गुहायां* सिंहादिश्वापदाकीर्णे वननिकुञ्जे *गह्वरे* गिरिगर्ते द्वन्द्वे कृते एतेषामन्त*र्मध्ये* *निविष्टाः* समासीनाः । ये च *धर्मध्यानावधाना* धर्मध्याने दत्तोपयोगाः । ये च *समरससुहिताः* स्वात्मरूपे तृप्ताः। ये च *पक्षमासोपवासाः* पक्षतपो मासतपः इत्यादितपःकृत्ये तत्पराः। *येऽन्येऽपि* पूर्वोक्तेभ्यो व्यतिरिक्ताः *ज्ञानवन्तो*ऽवध्यादिज्ञानं प्राप्ताः। ये च *श्रुतविततधियः श्रुतेन* द्वादशाङ्गचतुर्दशपूर्वदशपूर्वादिना *वितता* विशाला *धी*र्बुद्धिर्येषां ते । तथा ये च *शान्ता* जितकषायाः, *दान्ता* दमितान्तःकरणाः, *जिताक्षा* जितेन्द्रियगणाः, प्रोक्तगुणभाजः सन्तः *जगति* भूमण्डले *जिनपते*र्जिनेश्वरस्य *शासनं* तीर्थं *भासयन्ति* प्रभावाढ्यत्वेन दीपयन्ति *तेऽपि* सर्वे *धन्या* इत्यर्थः ।।३।।**

श्रेणिक–चेल्लणा–साधुवृत्तान्तवाच्यं यथा उपदेशप्रासादे–

राजगृहे श्रेणिकनृपः बौद्धधर्मासक्तः बौद्धाचार्यं गुरुं नित्यमुपास्ते । प्रत्यहं बौद्धालये गत्वाभूपस्तद्धर्मं शृणोति श्रद्दधाति च, चेल्लणायाः पुरो नित्यं तं बौद्धं प्रशंसति । बौद्धाचार्यस्तु नित्यमित्थं कपटवृत्तिं करोति, तद्यथा–तेन स्वशिष्या इति शिक्षिताः 'यदाऽहं प्रत्युशादिकाले गतो गर्भगृहे तिष्ठामि तदा युष्माभिर्मद्दर्शनार्थं समेतानां नृपादीनां कथनीयं–अस्मद्गुरुस्तु सदा स्वर्गे गच्छति इन्द्रादीनां धर्मवार्ताज्ञापनाय, तदनु–समेति' । अन्यदा नृपस्तत्र गतो गृहमध्ये गुरुमदृष्ट्वा शिष्यान् पप्रच्छ । तेऽप्याहूः–''गुरुर्व्योममार्गेण स्वर्गाधिपपार्श्वे गतः'' । ततो नृपश्चेल्लणायै तद्वार्तां निवेदयामास । परं चेल्लणा तु आजन्म श्रावककुलोत्पन्नत्वात्तदुक्तं न श्रद्धत्ते । एकदा नृपो बलात्कारेण राज्ञीं सार्थे गृहीत्वा गुरुगृहे समेतः तदा चेल्लणयाऽपि स्वसेवका उक्ताः यदा वयं बौद्धगृहे स्थितिं कुर्मस्तदा यथा नृपो न वेत्ति तथा

बौद्धालयमग्निज्वालासमन्वितं विधेयम्, पश्चाद्धागतो वह्निर्मोच्यः । अथ दम्पती बौद्धशिष्यमुखात् गुरोः स्वर्गगमनं श्रुत्वा तत्र किञ्चित् स्थितौ । तदा राज्ञी नृपं प्राह–''हे स्वामिन् ! अद्यात्र तिष्ठावावां स्वर्गादवतरतां गुरूणां स्वरूपं पश्याव'' । ओमित्युक्त्वा नृपस्तत्र *यावत् स्थितस्तावदग्निज्वालया भयभ्रान्तो विह्वलो गुरुर्गुप्तस्थलतः* शीघ्रं निःसृत्य सलज्जो न्यग्मुखो बहिराययौ । तदा नृपेण पृष्टम्–''यूयमद्य स्वर्गता न वा ?'' स प्राह–''अद्य तु नाहं गतः, नित्याभ्यासाच्छिष्यैः स्वर्गमनं प्रोक्तमस्ति'' । ततः सभार्यो नृपो गृहे गतः । परं तस्य चित्तमनेकविकल्पमयं जातम् । सो नृपो राज्ञीं पप्रच्छ–''किमिदं जातम् ? अकस्मादग्न्युपद्रवः कुतो निःसृतः ? अतस्त्वया कारितोऽयं ज्ञायते'' । साऽऽह–''स्वामिन् ! शृण्वेकं ज्ञातम्–

एकत्र पुरे द्वाविभ्यौ । तद्भार्ये द्वे सार्धं सगर्भे जाते । तदा ताभ्यामिभ्याभ्यां परस्परमिति निश्चितं–''यदि द्वे सुते ( सुतौ वा ) प्रसुवाते तदा न, यदा तु पुत्रपुत्र्यौ स्यातां तदा मिथः पाणिपीडनं कार्यम्'' । तस्य लिखनं कृतम् । क्रमादेकस्याः पुत्री जाता, द्वितीयस्याः सर्पः प्रसूतः । ततस्तौ यौवनं प्राप्तौ । सर्पजनकेन राजादिसमक्षं सर्वेषां पार्श्वे न्यायं कारयित्वा सर्पाय सा सुता परिणायिता । रात्रौ वासमन्दिरे द्वावपि पृथक्पल्यङ्के श्याते । इतश्च सर्पशरीरतो दिव्यरूपो नरो निःसृत्य तया समं भोगं चकार, पश्चात्तस्मिन्नेव कलेवरे प्रविवेश । इत्थं नित्यं भवति तद्वार्ता तया स्त्रिया स्वजनाय ज्ञापिता तदा लब्धलक्ष्यनरेण प्रोक्तम्–''यदा स्वयं कलेवरं मुक्त्वा त्वां सेवते तदा तत्कलेवरमग्निना सहसा भस्मसात्कार्यं, ततः सर्पकलेवरं विना स क्व प्रवेशं करिष्यति ? मूलस्वरूपं प्रकटं भविष्यति'' । ततः कन्याप्तमर्त्येन तथा कृतं, ततो देवकुमारस्तेनैव रूपेण तत्र स्थितिं चकारेति ।

तद्वत् हे नृप ! युष्मद्गुरुर्नित्यं स्वर्गगमनार्हं दिव्यं मलादिरहितं स्वर्गसुरसदृशं विधाय नूतनं शरीरं कृत्वा मूलदेहं गेहे मुक्त्वा तत्र गतः स्यात्, नान्यथा । अतो मयापीदं चेष्टितं कृतं यदि मूलशरीरं सर्पतनुवद्भस्मीभूतं स्यात्तदा उत्तरशरिरेणैव सर्वेषां दर्शनं जायते तदा वरं, लोकोत्तररूपं तु दुर्लभमस्ति इतिबुद्ध्या मया इदं व्यधायि, परं न किमपि दृष्टम्, अग्निज्वालाभिः पराभूतो गृहादेव निर्गतः विह्वलवदनवचनः, अतो हे नृप ! सर्वमेतत् व्यलीकं ज्ञेयम्'' । इत्थं श्रुत्वापि धूर्तव्युद्ग्राहितचित्तत्वात् नृपो मनागपि बौद्धदृष्टिरागं नात्यजत् । यतः–

कामरागस्नेहरागावीषत्करनिवारणौ । दृष्टिरागस्तु पापीयान्, दुरुच्छेद्यः सतामपि ।।

अन्यदा नृपेण बौद्धगुरुर्भोजनाय निमन्त्रितः । तदा बौद्धगुरूपानहौ राज्ञया सेवकपार्श्वादानाय्य तच्चर्मखण्डान् सूक्ष्मान् कृत्वा शाकादिद्रव्येषु चर्मचूर्णं छन्नं निहितम् । बौद्धगुरुणा सुस्वादमध्ये न किञ्चिज्ज्ञातम् । ततो गृहचलनसमये उपानहाववीक्ष्यान्वेषिते, तथापि नाप्ते । तदा चेल्लणया नृपः प्रोक्तः–''स्वामिन् ! युष्मद्गुरुर्ज्ञानी न वा ? यदि ज्ञानी तदा किमन्वेषणं कारयति ? यदि चाज्ञानी तदाऽधुना भुक्तं पक्वान्नादि तन्नामापि न स्मृतिपथमेष्यति, अतो हे नृप ! किमिदं दाम्भिका विदन्ति ? जैनगुरव एव समस्तविचारदक्षाः सन्ति'' । ततः स विषण्णः स्वगृहं गतः । आकण्ठं यावद्भुक्तं, तेन वमनं जातं, तन्मध्ये चर्मखण्डान् वीक्ष्य नृपाय ज्ञापितं बौद्धेन । राजा प्राह–''मत्कारितभोजनमध्ये न किमपि ध्येयम्'' । तद्वार्ता पत्न्यै ज्ञापिता । साऽऽह–''युष्मद्गुरुर्ज्ञानिनाम्ना पूज्यते, एतावन्मात्रमपि न जानाति ?'' तच्छ्रुत्वा नृपो मौनं चकार ।

अथ नृपश्चेल्लणां स्वमतद्वेषिणीं ज्ञात्वा तदवलेपनिवारणाय स्वसेवकान् प्राह–''यूयं प्रेतभूमितो मृतबालशवमेकं तत्कालीनमानीय सूपकाराय दत्तम्'' । तैस्तथा कृतम् । नृपेण तद्बालमांसादिना क्षीरादिकं

कारितम् । ततोऽनुचरा जैनमुनीनामाकारणाय प्रेषिताः । चेल्लणयाऽप्यनुमानेन किञ्चिज्ज्ञात्वा नृपः पृष्टः–"स्वामिन् ! अद्यौत्सुक्यचलचित्तमस्ति ?" नृपः प्राह–"राष्ट्रादिचिन्तया, नान्येन कारणेन" । ततो नृपः सूपकारस्थले गत्वा स्थितः, राज्ञ्यपि साध्वागमनमार्गोपरि गवाक्षे स्थिता । इतश्च साधुरेको नृपसेवकदर्शितमार्गेणागच्छन् दृष्टः । तदा राज्ञी दध्यौ–"निःस्पृहोऽयं मुनिर्मदभिमुखं नावलोकयिष्यति, ईर्यापरत्वात्, अतः काञ्चित्कलां वितनोमि" । ततो यदा मुनिर्गवाक्षाधोभागे समेतस्तदा राज्ञया उन्नतौ करौ कृत्वा कपाटौ खडखडायितौ । साधुना तदोर्ध्वं विलोकितं, चेल्लणया शीघ्रं प्रणम्य द्वे अङ्गुली ततस्तिस्रोऽङ्गुलयो दर्शिताः, तदा मुनिरेकामङ्गुलिमदर्शयत् । अस्यार्थोऽयंराज्ञया पृष्टमङ्गुलिसंज्ञया 'द्विज्ञानं वा त्रिज्ञानं वा युष्माकमस्ति' ?, तदा साधुनोक्तं संज्ञया 'एकयुक्तं त्रिकं' एतावता चत्वारि ज्ञानानि सन्ति इति । ततः सा हृष्टा पुनः फिट्टावन्दनं चकार । ततो मुनिस्तत्र गतः । नृपो बहुमानपूर्वं तद्बालमांसान्वितमाहारं दातुमुद्यमं चकार । मुनिस्तु ज्ञानदृष्ट्याऽभक्ष्यमयोग्यं तदशनं मत्वा प्राह–"हे भूप ! नास्मद्योग्यमिदमशनं, वयं मुनयो निर्दोषाहारिणः" । श्रुत्वेति भूपः प्राह–" हे पूज्य ! कथमयमाहारः सदोषः ? राजगृहनिष्पन्नः, अतो मनोहरोऽस्ति, यदि सदोषस्तर्हि तं दोषं प्रकाशय" मुनिः प्राह–"हे नृप ! त्वया निष्पादितं कृत्यं त्वमध्यक्षं वेत्सि, दम्भं विधाय प्रच्छदनं तव नार्हं, परं मुनीनां तु अचित्तमप्याहारं सदोषं ग्रहीतुं न कल्पते तहि बालमांसपेश्यादिनिष्पन्नं सततं जीवोत्पत्तिस्थलं कथमपि न घटते" । इतिमुनिवचसा सञ्जातप्रत्ययो ज्ञानिनं नत्वाऽऽह–"हे पूज्य ! त्वज्ज्ञानं त्वद्धर्मस्त्वत्क्रिया चेति सर्वमपि सत्यम्" । इत्यादि स्तुत्वा हर्षनिर्भरः सम्यक्त्वाभिमुखो भूप एत्य चेल्लणां प्राह–"हे भार्ये ! त्वद्गुरुः परमज्ञानी, मयाऽद्य परीक्षा कृता" । ततश्चेल्लणया पृष्टः स भूपः सर्वमाचष्ट । श्रुत्वाऽऽह–"स्वामिन् ! निःस्पृहस्यैतादृशस्य ज्ञानिनोऽन्तो न ग्राह्यः, एतादृशा मुनयो न ज्ञातोः" । ततो नृपपृष्टा सा सर्वं तत्स्वरूपं जगाद । इत्यादियुक्त्या तया बोधितो भूपो जैनधर्मरसिकोऽभूत् ।

ततो भूपः स्वसेवकमशिक्षयत्–"त्वमेकां सुरूपां लावण्यादिगुणाश्रितां सूर्यकान्तिनाम्नीं वारवधूमादायोपवने कामदेवकुलचैत्ये रात्रौ व्रज । तत्र चैत्ये केनापि धर्ममिषेणामुकमुनिं प्रलोभ्य संस्थाप्य त्वया बहिर्निः सृत्य द्वारे पिधाय तालकं दृढं देयम् । अनेकचुवाचन्दनतल्पतूलिकादिभोगसामग्री मध्ये विरचनीया" । ततस्तेन तथा कृतम् । मुनिर्निर्दम्भस्तत्राविशत् । निर्गमनमार्गमदृष्ट्वा मुनिर्दध्यौ–"अहो ! अनाभोगेन मोहजालेऽहं पतितः । अस्या हावभावादिभ्यो न तिलतुषमात्रं मे भयम् । परं प्रभातेऽपभ्राजना शासनस्य भाविनीति खाट्करोति" ।

ततो वेश्ययाऽनेकधा स विडम्बितोऽपि स्वधैर्यं नामुचत् । दध्यौ च–"प्राग्मया द्वेषेण कारणे उत्पन्ने इदमयोग्यमाचरितम्, अधुना रागेण क्रियते तदा महाव्रतगुणहानिः स्यात्, अतो नार्हं मम यावज्जीवपर्यन्त–देवगुरुसाक्षिस्वीकृतपञ्चमहाव्रतभञ्जनं, पालनं च सुयोग्यम्" । इति ध्यात्वा स स्वसाधुवेषं रजोहरणादिकं दीपाग्निना भस्मीचकार, भावलिङ्गमध्यात्मामृतेन सम्यग्बभारेति । अग्रे लाभं दृष्ट्वा तद्रक्षां स्वाङ्गेऽलेपयत् । अवधूतवेषेण कूर्मवत्स्वेन्द्रियाणि संगोप्य समग्ररात्रौ स्वध्यानतत्परः स्थितः । वेश्या तु स्वपराक्रमं समस्तं प्रदर्श्य श्रान्ताऽन्योपायमलभमाना निद्रां चकार । अथ प्रभाते स्वपत्न्याद्यनेकजनपरिवृतो भूपस्तत्र समागात् । सेवकेन तत्तालोद्घाटनं कृतं, मध्यतः "अलक्ष्यनिरञ्जनजगन्नाथाय नमः" इति शब्दं महता स्वरेण कुर्वन्नग्नयोगधारी अविकारी सोऽवधूतो भस्मच्छन्नसर्वगात्रोऽलमस्तसमो निःसृतः । तं वीक्ष्य सर्वे चमत्कृताः । तदा पत्नी नृपं प्राह–"स्वामिन् ! युष्मदुक्तं व्यलीकं जातम्, अयं तु कश्चिद्योगी निःसृतः, न जैनसाधुरूपवान्" । ततो नृपः

स्वोपजीविनं पप्रच्छ—"त्वया किमेतद्विपर्ययः कृतः ?" स आह—"स्वामिन् ! मया तु युष्मदाज्ञानुसारेणैव सर्वं विहितं, तदनु सञ्जातस्वरूपं नाहं वेद्मि" । पुनः क्ष्मापो वेश्यां स्माह—"कथय रात्रिवृत्तम्" । "स्वामिन् ! किं वच्मि ? अहं भोगाय सर्वं सामर्थ्यं विस्तार्य श्रान्ता, अनेन तु महायोगशक्तिरप्सरोभिरप्यस्खलनीया दर्शिता, त्रिभुवन एतादृशो महामुनिर्नास्ति" । इत्यादि सर्वं ज्ञातं निशम्य प्रबुद्धः स्वचित्तं वित्तं पुरजनाँश्च जैनधर्ममयाँश्चकार ।

❋ ❋ ❋

दानं शीलं तपो ये विदधति गृहिणो भावनां भावयन्ति,
धर्मं धन्याश्चतुर्धा, श्रुतसमुपचितश्रद्धयाऽऽराधयन्ति ।
साध्व्यः श्राद्ध्यश्च धन्याः श्रुतविशदधिया, शीलमुद्भावयन्त्य-
स्तान्सर्वान्मुक्तगर्वाः, प्रतिदिनमसकृद्भाग्यभाजः स्तुवन्ति ॥४॥ [१९१]

व्याख्या- *ये* वक्ष्यमाणगुणभाजः *दान*मभयसुपात्रादिपञ्चविधं, *शीलं* देशतः सर्वतो वा ब्रह्मचर्यं, *तपो*ऽनशनादि द्वादशविधं, *विदधति* कुर्वन्ति । *भावनाम*नित्यादिकां तीर्थोद्धरणदीनोद्धरणादिशुभमनोरथरूपां भावनां *भावयन्ति* चेतसा चिन्तयन्ति । तथा *श्रुतसमुपचितश्रद्धया* आगमानुसारिण्या पुष्टनिश्चलश्रद्धया *चतुर्धा धर्मं* चतुर्विधं धर्मं प्रोक्तरूपं *आराधयन्ति* शुद्धविधिना पालयन्ति । ते *गृहिणः* श्राद्धा *धन्याः* । तथा *साध्व्यो* व्रतिन्यः *श्रादध्यश्च* देशतो व्रतिन्यो नार्योऽपि याः *श्रुतविशदधिया* आगमोपदेशेन कृतशुद्धया श्रद्धया, *शीलं* समग्रधर्माचरणं ब्रह्मव्रतं च, *उद्भावयन्त्यो* निर्दोषपालनया शोभयन्त्यस्ता *धन्या* भाग्यवत्यः। ये च *तान्* पूर्वोदितान् *सर्वान्* जिनादिश्राविकापर्यन्तान्, *मुक्तगर्वाः* त्यक्ताभिमानाः, *भाग्यभाजः* पुण्यशालिनः, *प्रतिदिनं* दिने दिने, *असकृद*नेकवारं *स्तुवन्ति* सद्गुणख्यापनेन वर्णयन्ति तेऽपि *धन्या* इत्यर्थः ॥४॥

विजय—विजयाकथा एतद् विषये—

कच्छदेशेऽर्हद्दासः श्रेष्ठी । तस्य पत्नी अर्हद्दास्यासीत् । तयोर्विजयाभिधस्तनयः । स च गुरोः पार्श्वेऽधीते स्म । तेनैकदा शीलमाहात्म्यं निर्ग्रन्थमुखाच्छ्रुतम् । तद्यथा—

**अमराः किङ्करायन्ते सिद्धयः सहसंगताः । समीपस्थायिनी संपच्छिलालंकारशालिनाम् ॥**

इत्याकर्ण्य स्वदारसंतोषव्रतं गृहीतं विजयेन । स्वदारा अपि शुक्लपक्षे न सेव्या इति नियम-वांस्तस्थौ । इतस्तत्रैव पुरे धनावहधनश्रियोः सुता विजयानाम्नी । सैकदा शीलवर्णनं श्रुत्वा स्वपतिसंतोषव्रते कृष्णपक्षे स्वपतिरति न सेव्य इत्यभिग्रहं जग्राह । ततो घुणाक्षरन्यायाद्दैवसूत्रितयोस्तुल्यरूपयोस्तयोरेव विवाहोऽभूत् । ततो रात्रौ स्वावासमन्दिरे सज्जितषोडशशृङ्गारा नव्यभव्यवस्त्रा सा स्वाम्यभ्यर्णमाययौ । विजयस्तां सुलोचनां व्याजहार—

त्वं च मे हृदयं जीव उच्छ्वासः प्राण एव वा । संसारसुखसर्वस्वं प्राणिनां हि प्रियाजनः ।
त्वं प्रिया चेच्चकोराक्षि ! स्वर्गलोकसुखेन किम् ? । त्वं प्रिया यदि मे न स्यात्स्वर्गलोकसुखेन किम् ॥

परं हे शुभे ! शुक्लपक्षे त्रिधा शीलं सर्वतः पूर्वं मया गृहीतम् । अथ तस्य पक्षस्य त्रयो दिवसा अवशिष्टाः । ततो लीलामनुभविष्यावः । श्रुत्वेति सा भृशं ग्लानिं प्राप्ता । तेन म्लानिहेतुं पृष्टा साऽभाषिष्ट—'स्वामिन्मम कृष्णपक्षस्य नियमोऽस्ति' । तदाकर्ण्य भृशं खेदमानसं पतिं वीक्ष्य सा ब्रुते स्म—'हे

नाथापरां प्रियां परिणीय भोगान् भुङ्क्ष्व । पुंसां प्रियाः प्रभूता भवन्ति । यथा वसुदेवस्य द्वासप्ततिः स्त्रीसहस्रम् । चक्रिणां च द्विनवतिसहस्रैकलक्षस्त्रीणामन्तःपुराणि'' । श्रुत्वेति तां प्राह–''हे सुशीले ! प्रसह्य मातापितृभ्यामहं दीक्षातो निवार्य परिणायितः । न विषयसेवनादायुर्वृद्धिर्जगत्सु महत्त्वं वा सर्वजीवेभ्य आधिक्यं वा । केवलं मनस्यौत्सुक्यमात्रं स्यात् । यतो विशेषावश्यकवृत्तौ–''

नग्नः प्रत हवाविष्टः कुणन्तीमुपगृह्यताम् । गाढायासितसर्वाङ्गः स सुखी रमते किल ।।

पक्षिपश्वादयोऽपि विषयं सेवन्ते । किमस्मिंस्तत्त्वम् । तथा च हे सुभ्रु ! देवभवेष्वगणितविषया भुक्ता बहुवर्षाणि । यत उक्तं लोकप्रकाशे –

दोवाससहस्स ठिई विसया होहिउ उड्ढदेवाणं । पणसयपणसयहाणी, जोहसियवणभवणवासाणं ।।

अन्यच्च हे पद्माक्षि ! यत्संसारे स्रक्चन्दनाङ्गनादिकं पुद्गलजनितं विनाशि परसंयोगोद्भवं सौख्यं तत्त्वतो दुःखरूपमेव मनः संकल्पजत्वादौपचारिकत्वाच्च । यतः श्रीमज्जिनभद्रैरुक्तम्–

विसयसुहं दुक्खं चिय दुक्खपडिआरआ तिगच्छव्व । तं चिय उवयाराओ न उवयारो विणा तत्थं ।।

विषयसुखं दुःखमेव नूनं दुःखप्रतिकारः क्वाथपानडम्भदानादिचिकित्सा इव । तच्चौपचारिकं सौख्यं किंचित्तथ्यम् पारमार्थिकसौख्यं तु वस्तु विना न स्यात् । आत्मीयानन्दरोधकं सातासाताक्रमतो जातं तत्सौख्यरूपं को व्यपदिशति । उक्तं च–

सायासायं दुक्खं तव्विरहम्मि य सुहं जओ तेणं । देहिंदियसुक्खदुक्खं सुक्खं देहिंदियाभावे ।।

परं च हे मृगाक्षि ! दुःखप्रदे विषये मम मनो न रोचते । यत उक्तम्–

विषस्य विषयाणां च पश्यतां महदन्तरम् । उपभुक्तं विषं हन्ति विषयाः स्मरणादपि ।।

अतो हे सुन्दरि ! त्रिधा आजन्म शीलं गाङ्गयस्येव गाङ्गयपावनं नित्यशो मेऽस्तु । परमावाभ्यां स्वरूपपमिदं पितादीनामपि न ज्ञापनीयम् । कोऽपि वृत्तान्तमिमं ज्ञास्यति तदावश्यं दीक्षामादास्यावः इत्थं निश्चयमाधाय तौ दम्पती स्वजीवितमिव शीलं दधतुः । एकत्र शयने रात्रौ सुप्तयोस्तयोर्न कश्चिदपि मदनोन्मादो जायते । सदा रहसि शीलगुणवर्णनमेवाकुर्वाताम् । एवं भावचारित्रपात्रयोस्तयोः समयो व्यतिचक्राम ।

अस्मिन्नवसरे चम्पायां केवली विमलनामा साधुः समवासरत् । तद्देशनां जिनदासश्रेष्ठी श्रुत्वा निजाभिग्रहं जगाद–भगवन् ! चतुरशीतिसाधुसहस्राणां पारणं कारयामि । मनोरथोऽयं कदा सफलो भावी । इति श्रुत्वा केवली प्राह– एतावतां मुमुक्षूणां युगपत्संगमः कथं भविता ? दैवात्कर्हिचिदियत्सु मिलितेषु साधुषु अम्बरपुष्पवच्छुद्धान्नपानसामग्री दुर्लभा । अतः कच्छदेशस्थयो–र्विजयाविजयश्रेष्ठिदम्पत्योरश–नादिभिर्भक्तिं कुरु । तेन भूरिपुण्यं भवति । यतः–

चउरासीइसहस्स समणाणं पारणेण जं पुण्णं । तं किण्हसुक्कपक्खेसु सीलपियकंतभत्तेण ।।

श्रुत्वैवं जिनदासेन तत्स्वरूपं पृष्टः केवली तयोर्वृत्तमभाणीत् । ततो जिनदासो भक्तिभरस्तत्र गत्वा तयोर्भक्तिं वाचामगोचरां चक्रे । तेन तत्र नागराणां तयोर्दुश्चरचरित्रं प्रोक्तम् । तदा पितादिभिर्ज्ञातम् । पूर्णमनोरथः स श्राद्धः स्वगृहं ययौ । तौ दम्पती तु जातपूर्णप्रतिज्ञौ दीक्षामादाय मुक्तिभाजौ बभूवतुः !

आस्तां सम्यक्त्वयुक्तगुणवन्नारीस्तवनं, किंतु सारतावद्गुणं मिथ्यादृशामप्यनुमोदयन्नाह–

( उपजातिवृत्तम् )

मिथ्यादृशामप्युपकारसारं, सन्तोषसत्यादिगुणप्रसारम् ।
वदान्यता वैनयिकप्रकारं, मार्गानुसारीत्यनुमोदयामः ॥५॥ [१९२]

व्याख्या– *उपकारसारं उपकारो*ऽन्येषामपि हितसुखादि–संपादनस्वभावः स *सारः* प्रधानो यस्य स तथा तं, *सन्तोषसत्यादिगुणप्रसारं सन्तोषो* येन तेन यथा तथा न्यूनपूर्णादिना सन्तुष्टिभवनस्वभावः, *सत्यं* हितमितयाथार्थ्यादिवचनं, *आदि*पदात् क्षमार्जवमार्दवनिःस्पृहत्वादयो ग्राह्याः, त एव *गुणाः* स्वपरहितफलजीव–धर्माः तेषां यः *प्रसरो* विस्तारस्तं, तथा *वदान्य*ता दातृत्वं, *वैनयिकप्रकारं विनयो* नम्रवृत्तिः स एव वैनयिकस्तत्*प्रकार*प्राप्तं गुणं, *मार्गानुसारी* अहोऽस्य मिथ्यादृशोऽपि मोक्षमार्गस्यानुकूलता वर्तते *इति* कृत्वा*ऽनुमोदयामः* ज्ञात्वा हृदयेन सानन्दा भवाम इत्यर्थः ॥५॥

कथारत्नाकरे विक्रमनृपकथा–

एकदा शीतर्तौ दुष्टेनाऽविनीतेन वाजिनाऽपहृतो विक्रमादित्यो वने गतः, मृते च तस्मिन् वाजिनि राजा रात्रावेकस्य तरोस्तले सावधानतया तस्थौ । तदा च तद्वनवास्येको वटवासिदेवो विक्रमादित्योऽयं परदुःखकातर इति ख्यातिं वहन्नस्ति, तेनाऽस्य परीक्षां करोमीति दध्यौ । तदैव जरतीं भृशं कृशाङ्गीं शीतेन कम्पमानां तत्राऽऽगतामेकां गां राजाऽपश्यत् । अहो ईदृशीयं वराकी गौरनेन शीतेन मरिष्यतीति ध्यात्वा स्वपटेन तां पिधाय, कृपाणपाणौ तस्मिन् राजनि तां गां रक्षति सत्येकः करालः केसरी तत्राऽऽययौ, तां चाऽऽहन्तुमुत्फालितं तं राजोचे–अरे ! मयि गोप्तरि कथमेनां हन्तुं त्वं प्रभविष्यसीत्युक्ते सिंहः स्माह दारुणाऽनेन शीतेनेयं गौरवश्यं मरिष्यति, सप्तदिनभवक्षुधया च मांसाऽशनलुब्धोऽहमपि मरिष्यामि । तेनेमां दत्त्वा मां जीवय ! इत्थं च तव परोपकारित्वं समीचीनं भविष्यति ।

तत् श्रुत्वा राज्ञोक्तम्– हे सिंह ! म्रियतां जीवतु वेयं गौः, परं तव न दास्ये, किं च यदि तवाऽऽमिषं विलोक्यते, तदेदं मद्वपुर्भवत्सादस्तीति वदन्तं तं सिंहः स्माह– हे भूप ! त्वं पञ्चमो लोकपालः, तेन जीवन्नपि त्वं प्रजानां हितं करिष्यसि, अतो लोकान्तर्गमनतत्परां ममेमां गां दत्त्वा हितं कुरुष्वेत्युक्ते मत्कायेनैव तव हितं भूयादित्यभिधाय राज्ञा तस्मै स्वं वपुर्ढौकितम् । हन्तुमागते च तस्मिन्नधोमुखस्य राज्ञः शिरसि पुष्पवृष्टिरभूत् । तदा च राजा न तां गां, न च तं सिंहमपश्यत् । इतस्तत्र प्रकटितः स सुरोऽपि स्वं स्वरूपं निवेद्य राजानं च पुरे नीत्वा तिरोदधे । राजाऽपि प्रभाते विस्मितः सन् सचिवादीनां तद्वनवृत्तान्तं निवेद्य सुखमनुभवति स्म ॥

( स्रग्धरावृत्तम् )

जिह्वे प्रह्वीभव त्वं सुकृतिसुचरितोच्चारणे सुप्रसन्ना,
भूयास्तामन्यकीर्तिश्रुतिरसिकतया मेऽद्य कर्णौ सुकर्णौ ।
वीक्ष्याऽन्यप्रौढलक्ष्मीं द्रुतमुपचिनुतं लोचने रोचनत्वं
संसारेऽस्मिन्नसारे फलमिति भवता जन्मनो मुख्यमेव ॥६॥ [१९३]

व्याख्या- हे *जिह्वे* ! हे रसने ! *त्वं* स्वसौभाग्यवृद्ध्यै *सुप्रसन्ना* कस्यचिदप्यपवादाद्युच्चरण-दोषमलवर्जितसन्तुष्टा सती *सुकृतिसुचरितोच्चारणे* सुष्ठु शोभना *कृतिः* पवित्रधर्मः पुण्याचरणं चास्ति एषामिति सुकृतिनस्तेषां यानि *सुचरितानि* दानशीलतपः-संयमज्ञानवैराग्यादिसमाचरणानि तेषां *यदुच्चारणं* सानन्दजल्पनं तस्मिन्नहोनिशकरणे *प्रह्वीभव* नम्रा आसक्ता सज्जा सदोद्यमवतीति यावत् *भव* प्रवृत्तिमती तिष्ठ । *अद्य* सांप्रतजन्मनि *मे* मम *कर्णौ* श्रवणद्वयं *अन्यकीर्तिश्रुतिरसिकतया अन्यकीर्तिः अन्येषां* आत्मव्यतिरिक्तानां या *कीर्ति*र्निर्मलगुणजन्ययशःख्यातिः तस्या या *श्रुतिः* परजनैः क्रियमाणयाः समाकर्णनं तस्यां या *रसिकता* प्रेमपरता तया, कृत्वा *सुकर्णौ* श्रवणसावधाननिर्माणसाफल्ययुक्तौ भूयास्तां भवेताम् । *अन्यप्रौढलक्ष्मीं वीक्ष्य अन्येषां* स्वस्माद्भिन्नानां शत्रुमित्राणां *प्रौढां* महाविशालां *लक्ष्मीं* धनकुटुम्बपूजामहिमरूपारोग्यादिसंपदं प्रेक्ष्य *लोचने* मम नेत्रयुग्मं, *द्रुतं* शीघ्रं *रोचनत्व*मुत्तमरुचिजननत्वं *उपचिनुतं* प्रवृद्धिं प्राप्यताम् । *अस्मिन्* दृश्यमाने *असारे* तृप्तिरूपसारवर्जिते *संसारे* भवे *भवतां* रसनाश्रवणचक्षुषां *जन्मनो* रचनोद्भवस्य *मुख्यं* प्रधानं *फलं* कार्यमेतदेवेत्यर्थः ।।६।।

मन्नहजिणाणं वृत्तौ कृष्णप्रसङ्गं तु इदं-

अन्यदा सौधर्मेन्द्रो निजसभायां प्राह-'भो देवाः ! श्रीकृष्णः कस्याप्यवगुणं न जल्पति ।' तच्च श्रुत्वा कश्चित्सुरः परीक्षार्थमागत्य कृष्णस्य मार्गे गच्छत एकः श्वा मृतः श्यामो दुर्गन्धो विकृतस्तेन, कृष्णोऽपि तं तथाविधं दृष्ट्वा सतानवगुणान्मुक्त्वा दन्तनैर्मल्यं प्रशंसितवान् । यथा-

''दोषजालमपहाय मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपहाय गृह्णते वारिधेः सलिलमेव वारिदाः ।।'

तद् दृष्टवा [ स देवस्तुष्टः सन् शक्रप्रशंसनवृत्तान्तकथनपूर्वकं 'हे महाभाग ! वरं वृणु' इति केशवमुवाच कृष्णोऽपि] प्राह – 'भो देव ! यदि तुष्टोऽसि तदा तथा कुरु यथा सर्वजनानां रोगो न भवति ।'

''उपकर्तुं प्रियं वक्तुं र्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ।।''

''अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।।''

देवेन चन्दनभेरी समर्पिता प्रोक्तं चास्याः शब्देनु षण्मासान् जने रोग न भविष्यन्तीत्युक्त्वा सुरस्तिरोदधे ।

❋ ❋ ❋

( उपजातिवृत्तम् )

प्रमोदमासाद्य गुणैः परेषां, येषां मतिः मज्जति साम्यसिन्धौ ।
देदीप्यते तेषु मनःप्रसादो, गुणास्तथैते विशदीभवन्ति ।।७।। [१९४]

व्याख्या- *येषां* सुज्ञपुरुषाणां *मति*र्बुद्धिः *परेषां* स्वस्मादन्यगुणिजनानां *गुणैः* प्रोक्तरूपैः *प्रमोदं* हर्षोल्लासं *आसाद्य* प्राप्य *साम्यसिन्धौ* समताभावरूपे सन्तोषसमुद्रे *मज्जति* मग्नतां प्राप्ता भवति । *तेषु*

परगुणज्ञजनेषु विषये *मनःप्रसादो* मनसः शुद्धिः *देदीप्यते* अतिशयेन समुज्ज्वलतां प्राप्तः सन् शोभते, *तथा एते गुणा* अनुमोदिता गुणाः प्रोक्तस्वरूपाः *विशदीभवन्ति* पूर्वं मलिना अपि निर्मलशुद्धरूपा भवन्तीत्यर्थः ।।७।।

एतत् हि शालमहाशालवृत्तैः ज्ञायते—

पृष्ठचम्पाधिपपुत्रौ सालमहासालौ युवराजौ बभूवतुः । अन्यदा तत्र श्रीवीरः समवासार्षीत् । महर्द्ध्या तौ सार्वं वन्दितुं जग्मतुः । तत्र श्रीसार्वं नत्वा धर्मं श्रुत्वा विरक्तात्मानौ गृहं गतौ स्वजामेये गाङ्गिलं राज्ये न्यस्य जिनान्तिके प्राव्राजिष्टाम् । स्थविरपार्श्वेऽन्यूनमेकादशाङ्गीसूत्रं पेठतुः । अन्यदा जिनाज्ञां लात्वा श्रीमदाद्यगणभृता सह स्वजनप्रतिबोधार्थं पृष्ठचम्पायामाययतुः । श्रुत्वा गाङ्गिलभूपोऽपि वन्दितुमगात् । तत्र श्रीचतुर्ज्ञानी गणभृद्धर्मदेशनां प्रारेभे ।

गणधरदेशनां निशम्य विरक्तधीर्गाङ्गिलनृपः स्वाङ्गजं राज्ये न्यस्य पितृभ्यां सहितः प्राज्यैरुत्सवै र्व्रतमाददे । ततः सालमहासालौ इति दध्यतुः—''धन्या इमेऽस्मद्भगिनीभगिनीपतिभागिनेया अचिरेण सर्वविरतिं प्राप्ताः'' । ते त्रयोऽपीत्थं दध्युः—

एताभ्यां हि वयं पूर्वं , राज्यश्रीभाजनीकृताः । इदानीं तु महानन्दप्रापकं प्रापितं व्रतम् ।।

इत्यादिलोकोत्तरध्यानमग्नाः क्षपकश्रेणिमाश्रिताः पञ्चमज्ञानमासदन् ।

❋ ❋ ❋

**अथ गेयपद्याष्टकेन प्रमोदभावनां विभावयन्नाह—**

विनय ! विभावय गुणपरितोषं, निजसुकृताप्तवरेषु परेषु ।
परिहर दूरं मत्सरदोषं, विनय ! विभावय गुणपरितोषम् ।।१।। [१९५]

**व्याख्या— हे *विनय* ! हे विनीत ! मुमुक्षो ! त्वं *गुणपरितोषं* परेषां सुखित्वादिगुणेषु परितोषं *परि* सर्वतः *तोषं* सन्तुष्टचित्तत्वं *विभावय* पुनः पुनश्चिन्तय धारय कुरुष्वेति यावत् । केन साधनेनेत्याह— *निज—सुकृताप्तवरेषु निजानि* स्वयं निष्पादितानि पूर्वाधुनिकजन्मभिः *सुकृतानि* सदाचारासेवनानि तैरा*प्तं* प्राप्तं *वरत्वं* पुण्यादिना प्रधानत्वं यैस्ते तथा तेषु, *परेषु* स्वभिन्नप्रकृष्टपुण्यवत्प्राणिषु *मत्सरदोषं मत्सरः* परेषां सुखर्द्ध्यादिष्वसहनस्वभावता दूरमत्यन्तं *परिहर* स्वात्मन्यभावं कुर्वित्यर्थः ।।१।।**

वाच्यं च गौतमाष्टापदगमनवृत्तं यथा श्राद्धदिनकृत्ये —

जिनेनाद्योदितं यो हि, जिनान्नमति भूचरः । स्वलब्ध्याष्टापदं गत्वा, स हि तद्भवसिद्धिकः ।।

इति देवगिरं श्रुत्वा जिनाज्ञां लात्वाऽष्टापदं प्रति प्रतस्थे गणधरगौतमः ।

इतश्च कोडिन्नदिन्नसेवालास्तापसास्त्रयः प्रत्येक पञ्चशतीतापसान्विता 'अष्टापदारोहान्मुक्तिः स्यात्' इति विभोर्वचो जनाननाच्छ्रुत्वा पूर्वं तं प्रति प्रस्थिताः सन्ति । तेषूपवासतपोभृत् प्रथमः सपरिच्छ—दस्तस्याद्रेरादिममेखलां कन्दादिभोजनो भेजे । षष्ठकारी द्वितीयस्तु पक्वपत्रादिभोजनः सतन्त्रस्तस्य भूभृतो द्वितीयां मेखलां प्राप । शुष्कसेवालभोजी तृतीयस्तु अष्टमतपाः सपरिकरस्तस्याद्रेस्तृतीयां मेखलां प्राप । न तु क्लिश्यमानोऽपि कोऽपि तस्य गिरेः शिरोऽगात् ।

अथ ते तापसा आयान्तं गौतमं प्रेक्ष्याचिन्तयन्–''तपःकृशाङ्गा अपि यत्र वयमारोढुं न क्षमास्तत्रायं स्थूलयतिः कथमारोक्ष्यति ?'' । तेष्वेवं चिन्तयत्स्वेव गौतमो जङ्घाचारणलब्धऽर्करश्मीनालम्ब्य संचरँस्तूर्णं तेषामुपर्यगात्, क्षणाददृश्यतामगात् । विस्मयं गतास्त ऊचुः–'अस्य शिष्या भविष्यामः' । गौतमस्तु शैलमौलौ भरतकारितं चैत्यं ददर्श, तत्र चतुर्विंशतिं जिनान्नत्वा 'जगचिन्तामणि जगनाह०' इति स्तुत्वा चैत्यान्निर्गत्य रात्रिवासायाशोकतरोस्तल उवास । इतश्च धनदः शक्रदिक्पालोऽर्हतो नन्तुं तत्रागात् । जिनान्नत्वा गणिनं प्रणम्येति देशनामशृणोत्–

महाव्रतधरास्तीव्रतपःशोषितविग्रहाः । तारयन्ति परं ये हि, तरन्तः पोतवत्स्वयम् ।।

तच्छ्रुत्वा श्रीदो दध्यौ–

अन्तप्रान्ताशनत्वे हि नेदृक् स्यादङ्गसौष्ठवम् । इति वैश्रवणः किञ्चिज्जहास विकसन्मुखः।।

ततस्तदाकूतं ज्ञात्वा पुण्डरीकाध्ययनं प्रकाशितम्–

कृशोऽपि पश्य दुर्ध्यानात्, कण्डरीको ययावधः। पुष्टोऽपि पुण्डरीकस्तु, शुभध्यानात्सुरोऽभवत् ।।

ततो धनदः क्षामयित्वा स्वाश्रयं ययौ । तदा श्रीदसामानिको वज्रस्वामिजीवः सम्यक्त्वं प्राप । तं चान्य जृम्भकामरं भाषन्ते ।

प्रभाते गिरेरुत्तरन् गौतमस्तैः प्रोचे–''त्वं नो गुरुः, वयं तव शिष्याः'' । गणी स्माह–'' युष्माकमस्माकं च गुरुः श्रीवीर एव'' । ततस्ते देवार्पितवेषा गौतमान्तिकं प्राव्रजन् । ततस्तत्पारणार्थं प्रासुकपायसभृतं पतद्ग्रहमानीय विधिवत् परिपाट्या तान्निवेश्य यथाकाममक्षीणमहानस्या लब्ध्या– भोजयत् । तदा सेवालभक्षिणामेकोत्तरा पञ्चशती तद्गुणग्रामस्तुतिमग्ना भुञ्जाना एव क्षणात् केवलज्ञानमुज्ज्वलं प्रापुः । अथ सर्वेषु तृप्तेषु गणेशः स्वयं बुभुजे । तान् सहादाय पुरः प्राचलत् । क्रमात् समवसरणभुवमीयुषां डिन्नादीनामाप्तस्य प्रातिहार्यलक्ष्मीं पश्यतां षष्ठकारिणां पञ्चशतीमितानां केवलज्ञानमुत्पेदे । तावतामेव कोडिन्नप्रमुखाणां तत्क्षणं सर्वज्ञं पश्यतां पञ्चमज्ञानं जज्ञे ।

❋ ❋ ❋

**दिष्ट्यायं वितरति बहुदानं वरमयमिह लभते बहुमानम् ।**
**किमिति न विमृशसि परपरभागं यद्विभजसि तत्सुकृतविभागम् वि० ।।२।।[१९६]**

व्याख्या– *अयं* देवदत्तादिः *दिष्ट्या* भाग्यबलिष्ठतया *बहुदानं बहु* सुप्रचुरं *दान*मभयसुपात्रादिकं *वितरति* ददातीत्यतो धन्योऽयं, *अयं* यज्ञदत्तादिः *इह* मनुष्यलोके धर्मिन्यायिसदाचारिपुण्यत्वादिना *बहुमानं* सत्कारपूजाप्रतिष्ठादिकं *लभते* प्राप्नोति तद्वरं श्रेष्ठं मन्येऽस्य योग्यत्वात्, *किमिति* हे जीव ! त्वं, *इति* प्रोक्तप्रकारं *किं* कस्मान्न *विमृशसि* न चिन्तनविषये प्रणिदधासि नाङ्गीकरोषीति यावत् । तत्किमित्याह–*परपरभागं* परस्य सुकृतिनो देवदत्तादेः *परभागंपरं* प्रकृष्टमुत्तमोत्तममं *भागं* सेवाभक्तिदातृत्व–बहुमानादिहेतुप्रकर्षपुण्यकर्मोदयं तत्स्वहृदयेऽनुमोदय, *यद्य*स्मात्परसुकृतानुमोदनात् *तत्सुकृतविभागं विभजसि तत्त*स्य पुण्यकार्यकर्तुर्यत्सुकृतं शुभकृत्यसेवनफलं तस्य *विभागं* विशिष्टो भागोऽनुमोदन–परिणामहेतोः तुल्यफलं फलार्धं फलत्रिभागादिरूपोपार्जनं *विभजसि* लभसे इत्यर्थः ।।२।।

नवपदप्रकरणे बलदेवमृगख्यातं–

प्राग्वृत्तान्तकथनपूर्वकं प्रतिबोधितो बलदेवस्त्याजितो हरिकलेवरं, कारितो नदीद्वयपुलिने सत्कारमस्य, अत्रान्तरे भगवता अरिष्ठनेमिना विज्ञाय बलदेवस्य प्रव्रज्यासमयं प्रेषितो विद्याधर– श्रमणो, दत्ता तेन तस्य प्रव्रज्या, तामादाय तुङ्गिकागिरिशिखरे घोरतपश्चरणं कर्त्तुमारब्धः, एष प्रायेण च मासान्मासात्तृणकाष्ठ–हारकादिभ्यो भक्तपानप्राप्तौ प्राणयापनां करोति ।

अन्यदा मासपारणकदिने भिक्षार्थं नगरमेकं प्रविष्टे तस्मिन्नेका कामिनी समुपारूढप्रौढयौवना पानीयादानायावटतटनिकटवर्त्तिनी तद्रूपातिशयसमाक्षिप्तमनस्कतया समासन्नवर्तिनं स्वबालकमपि रुदन्तमजानती घटककर्णभ्रान्त्या तद्गलक एव समाधाय रज्जुं कूपे प्रक्षेप्तुमारब्धा, समीपवर्तिना चान्येन सोपालम्भं निर्भर्त्स्य विरूक्षाक्षरैर्ग्राहिता प्रतिबोधं त्याजिता श्वासावशेषं गर्भरूपम् अयं च वृत्तान्तो जातो दृष्टिगोचरचारी बलदेवमुनेः विषण्ण एष मनसा हा धिग् विरूपं मे रूपं यदित्थं दृष्टमाचापि स्त्रीणां मोहहेतुतयाऽसमञ्जसकारयितृ, तदिदानीं ममेदमेवोचितं यद्विजनारण्यावस्थानमिति विचिन्तयन्नेव स्त्रीजनाकुलेषु ग्रामनगरादिवसिमस्थानेष्वाहारार्थमपि मया न प्रवेष्टव्यमिति घोराभिग्रहं गृहीत्वा तत एव स्थानादनुपात्तभिक्ष एव विनिवृत्त्यानेकशशकशूकरकुरङ्गादिविविधश्वापदनिकेतनं वनं विवेश, तत्रस्थस्य चामुष्य कदाचिद्दिनदशकात्कदाचिद्दिनपञ्चदशकादेवमादिव्यधावनेन तन्मार्गागन्तृसार्थादिभ्यः संपद्यते कोऽपि कदाचिदप्याहारो, जायते तेन प्राणयापना, एवं च गच्छत्सु केषुचिद्दिवसेषु तस्य निर्व्याजप्रशमधनस्य महामुनेरुद्वीक्षणेन प्रपेदिरे वनचरा अपि बहवो भद्रकभावादिगुणसन्ततिं, न केवलं नरास्तिर्यञ्चोऽपि, एकश्च कुरङ्गशावः सततत दवलोकनोत्पन्नकर्मलाघनवसमुद्भूतजातिस्मरणोऽनवरतमेव तत्सेवाचिकीर्षया क्षणमपि न मुमोच तत्पार्श्वम्, अपि च गच्छति गच्छति तिष्ठति तिष्ठति चाश्नति चाश्नति मुनीन्द्रे । भक्तिपरीतः स मृगो निजमित्रे सुहृदिवाव्याजः ।

अन्येद्युश्च तस्यामेवाटव्यां नृपादेशेन गन्त्रीसमन्वित उपात्तोदात्तसंबलकः प्रासादोपयोगिकाष्ठग्रहणाय रथकार एकः समागत्य महातरुमेकमर्द्धकृत्तं कारयित्वा निशातकुठारकरैः कर्मकरैः संपन्ने प्रहरद्वयदिवसे तस्यैवार्द्धच्छिन्नस्य तरोश्छायायामुपविश्य प्रारब्धायां तल्लोकैर्भोजनवेलायां समायाते तस्मिन् महामुनौ मासोपवासकारणे तं देशं समाविशन्तमालोक्य भिक्षानिमित्तं तत्पृष्ठलग्ने चागते भक्तिभरावनम्रशिरसि प्रमोदेन परिपृच्छ्यमाने हरिणशिशुके परमश्रद्धया धन्योऽहम् अहो! यस्य ममास्मिन्नपि निर्जनारण्ये समापन्नाया–माहारवेलायां प्रगुणीकृतेषूवितद्रव्येषु तिरस्कृतचिन्तामण्यादि–माहात्म्यो वनविहारिहरिणकैरप्येवमाराध्यमानो महामुनिराहारार्थी समाजगामाभ्यर्णमित्यतिशायिना बहुमानेन समुद्भिन्नसर्वाङ्गबहलपुलककण्टकितकायः समुत्थायोचितद्रव्यहस्तो यावत्तं प्रतिलाभयितुं समारेभे, सोऽपि द्रव्याद्युपयोगं दातुमारब्धः सारङ्गकोऽपि पुण्यभागेष मनुष्यरूपो यः संजातसमग्रसामग्रीक एवमेनं महातपस्विनं प्रतिलाभयितुमुद्यतः अहं तु तिर्यग्जातिः उपारूढगाढीभक्तिकोऽपि किं करोमि? न खल्वपुण्यभाजां वेश्मसु पतन्ति वसुवृष्टयः, एवं चिन्तयितुं प्रवृतः तावदकाण्डप्रचण्डपवना– नेकविधपरावर्त्तनाभिर्बृहत्कटत्कारभज्यमानः सोऽर्द्धच्छिन्नः पादपो भवितव्यतावशेन निपतितस्तेषामेव रथकारादीनां त्रयाणामुपरि तदभिघातेन प्राप्तस्त्रयोऽपि पञ्चत्वं गता ब्रह्मलोकदेवलोकं दानपात्रभावानुमोदना– ध्यवसानमाहात्म्यैः। उक्तश्च

कर्त्तुः स्वयं कारयितुः परेण, चित्तेन तुष्टस्य तथाऽनुमन्तुः ।
साहाय्यकर्त्तुश्च शुभाशुभेषु, तुल्यं फलं तत्त्वविदो वदन्ति ।।

❋ ❋ ❋

**येषां मन इह विगतविकारं, ये विदधति भुवि जगदुपकारम् ।**
**तेषां वयमुचिताचरितानां नाम जपामो वारंवारम् वि० ।।३।। [१९७]**

**व्याख्या- *इह* मनुष्यलोके *येषां* मुमुक्षूणां *मनश्चित्तं विगतविकारं विगतो* विनष्टो *विकारो* रागद्वेषादिपरिणामो यस्य तत्तथा तथा *ये* बहुश्रुतादयो *भुवि* विश्वे *जगदुपकारं* सर्वजनस्योपकारं *विदधति* कुर्वन्ति, *तेषां* प्रोक्तगुणभाजां, *उचिताचरितानां उचितं* स्वस्यानुरूपं योग्यं *आचरितं* कर्तव्यमस्ति येषां ते तथा *तेषां* प्रोक्तरूपाणां *नाम* अभिधानाक्षराणि *वयं वारंवारं* बहुशो *जपामो* भजाम इत्यर्थः ।।३।।**

परमार्हतकुमारपालनृपकथा यथा प्रबन्धपञ्चशत्यां –

कुमारपालभूपालो द्वासप्ततिं भूपान् स्वाम् आज्ञां ग्राहयामास ।
कर्णाटे गुर्जरे लाटे, सौराष्ट्रे कच्छसैन्धवे । अच्चायां चैव भम्भेर्यां, मालवे मारवे तथा ।।
कौङ्कणे च तथा राष्ट्रे, कारे जालन्धरे पुनः । सपादलक्षे मेवाडे, दीपे कासीतटे पुनः ।।

एतेषु देशेषु अमारिं प्रवर्तयामास भूपः । १४ देशेष्वपरेषु धनदानेन मैत्रीकरणेन च । १४४४ (१४४०) नवीना जिनप्रासादा दण्डकलशमण्डिताः । १६०० जीर्णोद्धारा भूपेन कारिताः । सप्त तीर्थयात्रा कृता च । २१ ज्ञानकोशा लेखिताः । ७२ लक्ष रुदतीद्रव्यपत्रं पाटितम् । ९८ लक्षद्रव्यम् औचित्ये । (औदार्ये) दत्तम् । भग्नसाधर्मिकस्य १००० दीनारदानम् । एकस्मिन् वर्षे कोटिदीनारदानम् । एवं १४ वर्षेषु १४ कोटिदानम् ।

एकदा कुमारपालभूपो धर्मं श्रीहेम(चन्द्र)सूरिपार्श्वेऽशृणोत्–"धर्मं जग्राहेति सम्यक्त्वं प्रथमं जग्राह । त्रिकालं श्रीजिनार्चा, अष्टमीचतुर्दश्योः पौषधोपवासः पारणकदिने दृष्टिगोचरागतानामास्तिकानां यथार्हं दानेन सन्तोषः, सार्द्धं गृहीतपौषधानां सार्द्धं पारणककरणं, साधूनां संविभागकरणं, प्रत्यहं त्रिभुवनदेवविहारे स्नात्रोत्सवः श्रीहेम(चन्द्र)सूरीणां पादयोर्वन्दनकदानं, ततोऽनुक्रमेण साधुवन्दनं, पूर्वप्रतिपन्नपौषधानां यथार्हवन्दनं । प्रथमव्रते अमारि प्रवर्त्तनं । मारिः केनापि स्वयं च न वक्तव्या, मारिरित्यक्षरे विस्मृत्या जल्पने उपवासः । द्वितीयव्रते विस्मृत्याऽसत्यभाषणे आचाम्लतपः । तृतीयव्रते मृतधनोज्झनं । चतुर्थव्रतेऽतः परं पाणिग्रहणाऽकरणं । चतुर्दश्यां शीलं, परस्त्रीसहोदरः । पञ्चमव्रते षट्कोटयः कनकस्य तारस्याष्टौ कोटयः रत्नानां दशशतानि, तुलानां, ३२ घृतमणसहस्रं, ३२ सहस्रमणतैलं, ३ लक्षमूटकशालिः, युगन्धर्यादिधान्यानां प्रत्येकं ११ लक्षाश्च, ११ सहस्रगजाः, २००० उष्ट्राः, १८ लक्षसुभटाः, ५०० यानपात्र (त्राणि), ५०० शकटवाहिन्यः, २०००० गावः, ५०० गृहाणि, ५०० हट्टाः, ५०० सभाः इत्यादि ।"

षष्ठे व्रते वर्षाकाले पत्तनात् दशयोजनात् पुरतो गमननिषेधः । सप्तमे व्रते मद्याऽऽमिषमध्वादिनिषेधः, देवादत्तफलभक्षणनियमः । अष्टमे व्रते सप्तव्यसननिषेधः । नवमे व्रते सामायिकग्रहणं मौनेन, गुरोर्वर्जं । दशमे व्रते चतुर्मासे कटकाऽकरणं । एकादशमे (व्रते) रात्रौ कायोत्सर्गकरणे मर्कोटकादिरिरचलनं । द्वादशव्रते गुरुभ्यो दानं दत्त्वा साधर्मिकैः सह जेमनं, पौषधशालाचिन्ताकारकस्य । पञ्चशततुरङ्गमदानं ।

❋ ❋ ❋

अहह तितिक्षागुणमसमानं पश्यत भगवति मुक्तिनिदानम् ।
येन रुषा सह लसदभिमानं झटिति विघटते कर्मवितानम्, वि० ॥४॥ [१९८]

व्याख्या- *अहह* महाचमत्कारकारणं यूयं पर्यालोचयत किं तदित्याह*भगवति* जिनेश्वरे *मुक्तिनिदानं मुक्तेर्मोक्षस्य निदानं* शुक्लध्यानालम्बनत्वेन मुख्यसाधनं *तितिक्षागुणमसमानं तितिक्षा* क्रोधाभावेन परकृतापमानोपसर्गादिप्राणवियोगफलकशीतोष्णक्षुत्तृट्दंशादिद्वन्द्वसहनशीलता क्षमा सैव *गुणो* हितप्राप्ति-प्रकारस्तं, *असमानं* कीदृशं ? अतुलं अनन्यसदृशं समताभावं तं *पश्यत* हृदयदृशा विलोकयत, *येन* तितिक्षागुणेन *लसदभिमानं लसन्* वृद्धिं गच्छन् वर्धमान इत्यर्थः *अभिमानः* अभिनवकर्मणां ज्ञानावरणीया-द्यष्टानां निदानं, निश्चितसन्ततमुख्यबन्धहेत्वनादियोग्यत्वजीवस्वभावस्तदपि *रुषा सह* क्रोधक्षयेण सार्धमेव *झटिति* शीघ्रमेकहेलया *विघटतेऽन्यप्रयत्नं* विनैव क्षमामात्रादेव स्वतो विनश्यतीत्यर्थः ॥४॥

एतदुपरि सनत्कुमारवृत्तं वाच्यं यथा धर्मोपदेशकर्णिकायां –

अथ वैराग्यपरेण सनत्कुमार चक्रिणापि विमृष्टं, नूनं रूपयौवनादि क्षणविनश्वरमेव । ततः किमनेन पापहेतुराज्येन ? अति विचार्य तेन चक्रिणा श्रीविनयन्धराख्यगुरोः समीपे दीक्षा गृहीता । गीतार्थः सन्नेकाकित्वेन प्रतिमादितपःपरः स विजहार। कृतषष्ठाष्टमादितपा गोचरचर्यया परिभ्रमन् लुक्षाहारपरोऽसावेकदा तक्रं लब्धवान् । अथैवंविधकदर्याहारेण तस्य शरीरे सप्त व्याधयः समुत्पन्नाः, यथा–

शुष्ककच्छुज्वरश्वासाः कासश्चान्नारूचिस्तथा । अक्षिदुःखं दन्तदुःखं सप्तैतेऽत्यन्तदारूणाः ॥२॥

एवं सप्तविधरोगदुःखं स सप्तवर्षशतानि यावदसहत । वैराग्युतः स राजर्षिर्निजव्याधिप्रतीकारं न करोति । अथान्यदा पुनरपीन्द्रेण सभासमक्षं तस्य वैराग्यप्रशंसा कृता । तदा द्वौ देवौ तत्परीक्षार्थं वैद्यरूपं *विधाय तस्य राजर्षेः समीपं समुपागतौ। तं नत्वा च ताभ्यां कथितं, भो मुने ! आवां त्वदीयरोगचिकित्सां* कर्तुमिच्छावः । मुनिनोक्तमहं मे बाह्यरोगस्य प्रतीकारं नेच्छामि, केवलमन्तरङ्गरोगचिकित्सामेवाहं वाञ्छामि । ताभ्यामुक्तं तत्त्वावां न बोधवः । तदा मुनिनोक्तं बाह्यरोगचिकित्सां त्वहमपि जानामि, इत्युक्त्वा तेन मुनिना कुष्ठाभिभूता निजाङ्गुलिरेका स्वश्लेष्मणा विलिप्य रोगरहिता स्वर्णवर्णा कृता । तद् दृष्ट्वा तस्य प्रशंसां विधाय तौ देवौ स्वस्थाने प्राप्तौ । अथैवं तपसैव क्षीणशरीरः स राजर्षिः ? शुभध्यानपरः कालं विधाय तृतीयदेवलोके गतः ।

❋ ❋ ❋

अदधुः केचन शीलमुदारं, गृहिणोऽपि परिहृतपरदारम् ।
यश इह सम्प्रत्यपि शुचि तेषां विलसति फलिताफलसहकारम् वि० ॥५॥[१९९]

*व्याख्या- केचन* कियन्तः *गृहिणोऽपि* गृहस्थश्राद्धा अपि *परिहृतपरदारं परिहृता* वर्जिताः *परदाराः* परपरिगृहीताः स्त्रियो यस्मिंस्तत्तथाविधं, *उदारं* निरतिचारत्वेन श्रेष्ठं *शीलं* देशतः सर्वतश्च ब्रह्मचर्यं, *अदधुर्धृतवन्तः* धारयन्ति च तेषां गृहिणामपि सुदर्शनसुभद्रादीनां, *इह* मनुष्यलोके *शुचि* पवित्रं *फलिताफलसहकारं फलितं* फलसमृद्धिसम्प्राप्तं *अफलं* पुष्पितं *सहकार*माम्रतरुसदृशं *यशः* कीर्तिः *सम्प्रत्यपि* वर्तमानसमयेऽपि *विलसति विशेषेण* दीप्तं सत् शोभते इत्यर्थः ॥५॥

सुदर्शनश्रेष्ठि कथा वाच्या—

चम्पायां नगर्यां दधिवाहनो राजा, अभया प्रधानादेवी, अभय ( ऋषभ ) दासश्रेष्ठी:, अर्हद्दासी भार्या, महिषीरक्षपाल: सुभगनामा, सोऽन्यदा महिषीर्गृहीत्वाऽटव्यां गतो यावता पश्यति चारणमुनि शीतकाले नदीतीरे निरभ्रे कायोत्सर्गेण स्थितं निरावरणं, विस्मितश्च तेन, कथं रजनीं यापयिष्यति ?, बहुमानपुरस्सरं महिषीसमन्विता रजन्यां तमेव साधुं चिन्तयन्नास्ते, अतिप्रभाते महिषीर्गृहीत्वा गतो यावद् दृष्ट:, तत: पादयो: पतित: उपविष्टश्चासन्नं यावत् सूर्य उद्गत: ततो नमो अरिहंताणमिति भणित्वा उत्पतित आकाशे, ततो महामन्त्रोऽयमिति ज्ञात्वा सुभगेन महिषीरक्षकेण नमस्कारो बहुमानबुद्ध्या गृहीत: पठितुमारब्धो, यावद् गृहमागत: तावत् श्रेष्ठिना निवारित:, विधानेन पठ्यते, तेनोक्तं तात ! जिनेन्द्रनाम मोक्तं न शक्नोमि, मया सर्वकालमेष महामन्त्र: पठितवच:, श्रेष्ठिना चिन्तितं पुण्यभागेष यस्येदृशी नमस्कारस्योपरि भक्ति:, तत: श्रेष्ठिनोक्तम्—एवं भवतु, एष नमस्कारस्तव: मङ्गलं पूज्य:, पठितव्य:, ततो महिषीर्गृहित्वा गङ्गातीरे वारसगतस्ताश्चोत्तीर्य गङ्गापरकूले मदा दृष्टाश्च तेन, ततो नमस्कारं पठित्वा कृतस्तत्र प्रक्षेपो, जलमध्ये काष्ठमासीत् तेनोदरे विद्धो मृतश्च ऋषभश्रावकभार्याया अर्हद्यास्या उदरे उत्पन्न: ।

मासे पञ्चमे तस्या दोहदोऽभूदिति, जिनायतने महिमा दृश्यते, कृतश्च श्रेष्ठिना । कालेन दशस्वपि दिक्षूद्योतं कुर्वाणो दारक: प्रसूत:, नाम च कृतं सुदर्शन इति, यावद् द्वासप्ततिकलाकुशल:, चतु:षष्टिविज्ञानयुक्तश्च, ततो विरक्तकामोऽपि सागरदत्तश्रेष्ठिदारिका मनोरमा नाम रतिसदृशी तां पितृभ्यां विवाहित:, प्रव्रज्यां गृह्णता श्रेष्ठिना च तस्यैव बाहुबन्ध: कृत:, तत्रैव तस्य कपिलब्राह्मण: पुरोहितो मित्रं, भार्या तस्य कपिला, सा च भतु: सकाशाद्सुदर्शनस्य गुणगणोत्कीर्त्तनं श्रुत्वा अनुरागं गता, चेकान्तं विज्ञाय कपिलब्राह्मणशरीरकारणव्याजेन स आह्वायित आगतश्च, तया चोम्—अभ्यन्तरेऽपवरिकायां प्रविश, प्रविष्टे चात्मना सद्भावकथनं च कृतं, सुदर्शनेन चिन्तितं—नान्यो निर्गमोपाय:, तत उक्तं पुरुषनेपथ्येन तिष्ठामि नपुंसक: सन्, ततो मुक्त: निर्गत: ।

अन्यदा राज्ञा उद्यानमहोत्सव: प्रारब्ध: सह सुदर्शनकपिलाभ्यां, अभयादेवी कपिला ब्राह्मणी मनोरमा चात्मीययानवाहनारूढा: परिवारसमन्विताश्चलिता:, तत: कपिलाब्राह्मण्या उक्तम्—कैषा देवी पुत्रसमन्विता छत्रचामरयानादिभिर्युक्ता ?, अभयादेव्योक्तम्—मनोरमा पुत्रसमन्तिवा सुदर्शनभार्या, तयोक्तम्—एष षण्ढक: कथं पुत्रोत्पत्ति: ?, तयोक्तं कथं त्वया ज्ञातं यथैष षण्ढक: ?, कपिलाब्रह्मण्या कथित आत्मीयो वृत्तान्त:, तयोक्तं विचक्षणा त्वम्, एष कामदेव: स्वदारसंतुष्ट:, सा च परपुरुषगन्धमपि नेच्छत्यास्तां परिभोगं, त्वं वञ्चिता अनेन, ततस्तयोक्तं त्वं पण्डिता यद्येनं कामयसे, तत: तया प्रतिज्ञा कृता धात्रीना उक्तं स परस्त्रीगन्धमपि नेच्छति, ततोऽनिवर्त्तकं निर्बन्धं ज्ञात्वा तया आश्वासिता, असौ पर्वदिने पौषध करोति कायोत्सर्गप्रतिमां च ।

तत: कामदेवप्रतिमाव्याजेन पण्डिताधात्रया प्रवेशितोऽभयादेव्या अपवरके, तया च भणितोऽनेकै: प्रकारैर्यावत् नेष्टं तद्वच: मौनमालम्ब्य स्थित: तत: पूतकारपूर्वकं ग्राहीत: प्राहरिकै:, राज्ञो दर्शित:, वध्य आलापितो, मनोरमाऽपि एतद् व्यतिकरं ज्ञात्वा देवताऽऽराधनार्थं कायोत्सर्गेण स्थिता, शूलिका देवेन सिंहासनं कृतं, खड्गभिघातास्त्वाभरणानि, राज्ञ: कथितं, स्वयमेव गतो हस्तिस्कन्धारूढो नगरं प्रवेशित: पृष्ट सन् राज्ञा न किंश्चित् कथयति, ततोऽभयप्रदानपूर्वकमुक्तं, गृहं गतेन मनोरमया सह गृहीता प्रव्रज्या, देवी चोद्बन्धनं कृत्वा मृता, पाटलिपुत्रे व्यन्तरी उत्पन्ना श्मशाने, पण्डिता धात्री च कृतापराधा गता पाटलिपुत्रे

देवदत्तावेश्यां समाश्रित्य स्थिता सुदर्शनगुणोत्कीर्त्तनं च करोति, सोऽपि गीतार्थः एकलविहारी तत्रैव नगरे आगतो देवकुलिकायां स्थितो दृष्टः पण्डिताधात्रया परिज्ञातश्च कथितो देवदत्ताया यथैष सुदर्शनो भिक्षाव्याजेन गृहमागतो हावभावैः कामोत्कोचकैरुपसर्गयितुमारब्धो न चचाल,ततः श्मशाने नीत्वा मुक्तः, दृष्टः तया भद्रव्यन्तर्या, उपसर्गितो न क्षुभितः, प्रशस्ताध्यवसायस्य सप्तमदिने केवलाज्ञानमुत्पन्नं, ततो देवैर्महिमा कृतः, व्यन्तरी देवदत्ता धात्रीपण्डिता च, उपशान्ता सुदर्शनोऽपि कालेन मोक्षं गतः ।

❋ ❋ ❋

**या वनिता अपि यशसा साकं, कुलयुगलं विदधति सुपताकम् ।**
**तासां सुचरितसञ्चितराकं दर्शनमपि कृतसुकृतविपाकम्. वि० ॥६॥ [२००]**

व्याख्या- *याः* काश्चन *वनिताः* स्त्रियो*ऽपि यशसा साकं यशसा*-सुशीलसदाचारगाम्भीर्यक्षमा-विनयादिस्वगुणजन्यकीर्तिप्रसरेण *साकं* सार्धमेव *कुलयुगलं कुलयोः* पितृवंशश्वशुरवंशयोर्*युगलं* युग्मं तत्तथाभूतं *सुपताकं* शोभनाः *पताका* जननयनहृदयानन्दजनकशोभावर्धकध्वजश्रेणयस्ताभिर्मण्डितं सदनमिव शोभितं यस्मिंस्तत्तथाभूतं *विदधति* कुर्वन्ति । *तासां* प्रोक्तगुणशालिनीनां *सुचरितसञ्चितराकं सुष्ठु* सुन्दराणि *चरितानि* व्रतदानाद्याचरणानि तान्येव *सञ्चितराकं* संगृहीतं राशीकृतं *राकं* काञ्चनं तत्तथाभूतं *दर्शनमपि तासां* कर्तव्यमुखदेहोपकरणादीनां विलोकनमपि *कृतसुकृतविपाकं* सम्प्रापितपुण्यफलं मन्य इत्यर्थः ॥६॥

सुभद्रासतीकथा तु यथा नवपदप्रकरणे –

चम्पायां नगर्यां सुभद्रा श्राविकाऽतीव सर्वज्ञशासनभावितान्तःकरणा मिथ्यादृष्टिना परिणीता, स च तदनुवृत्त्या श्रावकः संजातः सर्वं तत् कुलं बुद्धभक्तं, तस्याः छिद्राणि अन्वेषयति, सुभद्रा च जिनभवनं गत्वा चैत्यादिपूजां कृत्वा धर्म्मश्रवणादि कृत्वा ततः आगच्छति, एतानि च मानुषाणि भर्तुः कथयन्ति, यथैषा दुष्टशीला चैत्यभवने साधुसमीपे बृहतीं वेलां तिष्ठति, स च तद्वचो न श्रद्धत्ते, अन्यदा जिनकल्पधारी क्षपको भिक्षार्थमेकः प्रविष्टः तद्गेहं, अक्ष्णोः कणुकप्रवेशं दृष्ट्वा तया च जिह्वया निष्कासितं, तिलको ललाटे लग्नः साधोः, ताभिश्च तद् भर्तुर्दर्शितं, ततः प्रतनुरागोऽसौ संजातो विपरिणतश्च, बलवानिन्द्रियग्रामः पण्डितोऽप्यत्र मुह्यति इति वचनात्, तया च ज्ञातो व्यतिकरः सर्वोऽपि, चिन्तितं च दर्शनलाघवेन महोड्डाहः, ततः स्थिता अभोजनेन रात्रौ शासनदेवताऽऽराधनार्थं कायोत्सर्गेणागतया देवतया कथितं यथा चम्पानगरीद्वाराणि त्वया चालनीकृतोदकेन लोकसमन्वितया उद्घाटनीयानि, ततः शासनोन्नतिर्भविष्यति, इति भणित्वा गता, प्रभातसमये नगरद्वाराणि विघट्टितानि नोद्घटन्ते लोकैः, ततो वचनमाकाशे संजातं या सती चालनीकृतोदकेन स्वगृहान्निर्गत्य प्लावयिष्यति सा उद्घाटयिष्यति यावत् सर्वाभिः स्त्रीभिः स्वगृहे चालनीकृतोदके परीक्षा कृता, तदा सुभद्रया भर्तुरात्मीयं सामर्थ्यं दर्शितं, नन्दिघोषश्च कृतो, गता पूर्वद्वारे उद्घाटितं नमस्कारं पठित्वा, दक्षिणं पश्चिमं च, तत उत्तरद्वारे गत्वा आत्मसांनिध्यं दर्शयित्वोक्तं या मया सदृशी सा उद्घाटयिष्यति, सर्वासां ननन्द्रादीनां मषीकूर्चको दत्तः, तदद्यापि तद् द्वारं तथैव स्थितमिति, अहो सर्वज्ञशासनप्रभाव इति लोकप्रभावना कृतेति ।

❋ ❋ ❋

**तात्त्विकसात्त्विकसुजनवतंसाः, केचन युक्तिविवेचनहंसाः ।**
**अलमकृषत किल भुवनाभोगं, स्मरणममीषां कृतशुभयोगम्. वि० ॥७॥ [२०१]**

व्याख्या- ये *केचन* केऽपि नरमुकुटमणयः पुरुषाः *तात्त्विकसात्त्विकसुजनवतंसा* याथार्थ्यानारोपितवस्तुस्वरूपं *तत्त्वं,* स्वयं तत्त्वं विदन्ति परेभ्य उपदिशन्ति ये ते *तात्त्विकाः, सात्त्विका* धर्मादिवस्तुनिर्धारणे संपादने च सद्व्यवसायो विद्यते येषां ते सात्त्विकाः, *सुजनाः* न्यायधर्मज्ञानादिसमृद्धा ये जनाः प्राणिनस्ते तथा तेषु ये*ऽवतंसा* मूर्धन्यास्तेषां तथा ये *युक्तिविवेचनहंसाः युक्तयः* स्वशास्त्रेतरशास्त्रवचनानां युक्तायुक्तत्वपरीक्षणे वस्तुस्वरूपेण सह घटनाः तासां *विवेचनं* यथार्थायथार्थयोर्निर्धारणं पृथक्करणं तस्मिन् *हंसाः* क्षीरनीरयोरसंयुक्तत्वकारकमरालचञ्चुधर्मधियस्तेषां, *किल भुवनाभोगमलमकृषत किल* सकलजनप्रसिद्धं *भुवनाभोगं भुवनानां* जगत्त्रयाणां *आभोगः* परिपूर्णहृदयभावस्तं प्रोक्तगुणैः *अलमत्यर्थं* अकृषत आकर्षितवन्त आकर्षन्ति आकर्षयिष्यन्ति, तेषाम*मीषां* प्रौढपुण्यलभ्यानां दूरासन्नवर्तिनां *स्मरणं* चिन्तनमप्यस्माकं *कृतशुभयोगं* दत्तपुण्यबन्धमस्तीत्यर्थः ।।७।।

नन्दिषेणवृत्तं यथा त्रिषष्ठीशलाकापुरुषचरित्रे –

इतश्चैकः पुरा विप्रः प्रारेभे यष्टुमध्वरं तत्र दासं न्ययुंक्तैकं दासोऽप्येवं तमब्रबीत् ।। ३१७ ।।
ददासि यदि मे शेषं तदा स्थास्यामि नान्यथा । विप्रोऽपि तत्प्रेपेदेऽथ दासोऽस्थाद्यज्ञवाटके ।। ३१८ ।।
शेषं लब्धं स दासोऽपि साधुभ्यः प्रददौ सदा । तत्प्रभावेण देवायुर्बद्ध्वा मृत्वा दिवं ययौ ।। ३१९ ।।
दासजीवो दिवश्च्युत्वा श्रेणिकस्य सुतोऽभवत् । नन्दिषेणः स विप्रस्तु बभ्रामनेकयोनिषु ।। ३२० ।।
स्वामिदेशनयाऽन्येद्युर्बुद्धो व्रतजिघृक्षया । आपप्रच्छे नन्दिषेणः कथञ्चिच्छ्रेणिकं नृपम् ।। ३२१ ।।
स पित्राऽनुमतोऽचालीद् व्रतादानाय वेश्मतः । ऊचे देवतया चैवमन्तरीक्षतलस्थया ।। ३२२ ।।
किमुत्सुकायसे वत्स ! प्रव्रज्याग्रहणं प्रति ? । चारित्रावारकं भोगफलं कर्मास्ति यत्तव ।। ३२३ ।।
किञ्चित्कालं प्रतीक्षस्व गृहे तत्कर्मणः क्षये । प्रव्रज्यां प्रतिपद्येथा नाकाले फलति क्रिया ।। ३२४ ।।
चारित्रावारकं कर्म साधुसंगजुषो मम । करिष्यति किमित्युक्त्वा स ययौ स्वामिनोऽन्तिके ।। ३२५ ।।
तथा निषिद्धो भर्त्राऽपि रभसेन भृशायितः । प्रत्यपादि परिव्रज्यां तत्पादकमलान्तिके ।। ३२६ ।।
षष्ठाष्टमप्रभृतीनि तप्यमानस्तपांसि सः । व्यहार्षीत्प्रभुणा सार्धं ग्रामाकरपुरादिषु ।। ३२७ ।।
स सूत्रमर्थं सूत्रार्थं नित्यमेव व्यभावयत् । निषण्णो गुरुपादान्ते सहमानः परीषहान् ।। ३२८ ।।
भोग्यकर्मोदयाद्भोगेच्छां भवन्ती बलादपि । रोद्धुं तपोभिः स्ववपुः क्रशयामास सोऽधिकम् ।। ३२९ ।।
स इन्द्रियविकाराणां निकारायानुवासरम् । चकाराऽऽतापनां घोरां श्मशानादिषु भूमिषु ।। ३३० ।।
बलादपि विकारेषु भवत्स्विन्द्रियरोषणः । स्वमुद्बद्धुं समारेभे प्रव्रज्याभङ्गकातरः ।। ३३१ ।।
बन्धच्छेदं चकारास्य देवता व्रतवारणी । स्वमाघ्नानस्य शस्त्रेण शस्त्रं कुण्ठीचकार च ।। ३३२ ।।
विषं मुमूर्षोरदतस्तस्यावीर्यं चकार सा । वह्नौ च विशतो वह्निमह्नायाऽकृत शीतलम् ।। ३३३ ।।
आत्मानं सोऽथ शैलाग्रादपातयदथान्तरे । तं धृत्वा देवतोवाच न किं स्मरसि मद्वचः ? ।। ३३४ ।।
नालं भोग्यफलं कर्माऽभुक्त्वा क्षेप्तुं जिना अपि । तत्प्रतीपं मुधैव त्वमेवमुत्तिष्ठसेऽन्वहम् ।। ३३५ ।।
इत्युक्तः स तयैकाकिविहारपरिकर्मभृत् । भिक्षार्थं निर्जगामैकश्चिकीर्षुः षष्ठपारणम् ।। ३३६ ।।
अथाऽनाभोगदोषेण वेश्यावेश्म विवेश सः । धर्मलाभ इति वाचमुवाच च महामुनिः ।। ३३७ ।।
न नोऽर्थो धर्मलाभेन द्रम्मलाभोऽस्तु केवलम् । इति वेश्या सोपहासविकारा प्रत्युवाच तम् ।। ३३८ ।।

असौ वराकी हसति किं मामिति विचिन्त्य सः । कृष्टा नीव्रतृणं लब्ध्या रत्नराशिमपातयत् ।। ३३६ ।।
द्रम्मलाभोऽयमित्युक्त्वा स तस्मान्निर्ययौ गृहात् । ससंभ्रमा साऽपि वेश्याऽनुधाव्येति तमभ्यधात् ।। ३४० ।।
तपो दुष्करमुज्झेदं भोगान् भुंक्ष्व मया सह । त्यक्ष्यामि सर्वथा प्राणान् प्राणनाथाऽहमन्यथा ।। ३४१ ।।
भूयो भूयस्तयेत्युक्तो भोगान् दुःखान् विदन्नपि । भोग्यकर्मवशात्तस्याः प्रत्यादि वचोऽथ सः ।। ३४२ ।।
दशाधिकान् वाऽनुदिनं बोधयिष्यामि नो यदि । तदाऽऽदास्ये पुनर्दीक्षां प्रतिज्ञामिति चाकृत ।। ३४३ ।।
त्यक्तर्षिलिङ्गः सोऽवात्सीत्तद्गृहे चिन्तयन् सदा । दीक्षानिषेधिकां वाचं देवताया जिनस्य च ।। ३४४ ।।
भोगान् सह तयाऽभुङ्क्त सोऽन्वहं च जनान्दश । प्रबोध्य भव्यान् दीक्षार्थं प्रैषीदुपजिनेश्वरम् ।। ३४५ ।।
क्षीणेऽन्यदा भोगफले तस्य बोधयतः सतः । नवाबुधअनाष्टंकजातीयो दशमो न तु ।। ३४६ ।।
तस्मिन्नबुध्यमाने सा वेश्या रसवतीं कृताम् । आचख्यौ नन्दिषेणाय समयज्ञा मुहुर्मुहुः ।। ३४७ ।।
सोऽपूर्णाभिग्रहो भोक्तुं नोत्तस्थौ किं तु सादरम् । तं टंकं बोधयन्नस्थाद् गीर्भिर्विविधभङ्गिभिः ।। ३४८ ।।
तदा चोवाच तं वेश्या प्राक्सिद्धान्नं विरस्यभूत् । भूंयो निष्पन्नमस्त्यन्नं किं विलम्बयसि प्रभो ! ।। ३४६ ।।
नन्दिषेणोऽप्यवोचत्तां बोधितो दशमो न हि । अहमेवाद्य दशमः प्रव्रजिष्यामि तत्पुनः ।। ३५० ।।
इत्युक्त्वा तां नन्दिषेणो भुक्तं भोग्यफलं विदन् । निर्गत्य स्वामिनः पार्श्वे प्रव्रज्यां पुनराददे ।। ३५१ ।।

आलोच्य तद् दुश्चरितं महात्मा, समं जिनेन्द्रेण स नन्दिषेणः ।।
कुर्वन्विहारं निशितं व्रतं च, प्रपालयन्देवभुवं जगाम ।।

❋ ❋ ❋

**अथोपसंहारमाह-**

इति परगुणपरिभावनसारं, सफलय सततं निजमवतारम् ।
कुरु सुविहितगुणनिधिगुणगानं, विरचय शान्तसुधारसपानम् वि० ।।८।। [२०२]

**।। इति श्रीशान्तसुधारसगेयकाव्ये प्रमोदभावनाविभावनो नाम चतुर्दशः प्रकाशः ।।१४।।**

**व्याख्या- *इति* प्रोक्तप्रकारेण *परगुणपरिभावनसारं परे*ऽन्ये स्वस्माद्भिन्ना जनाः तेषां ये *गुणाः* परोपकारप्राधान्यादयः तेषां *यत्परिभावनं* स्वमनसि तैः रमणरतिभजनं तदेव *सारं* सफलत्वकारणं यस्य स तथा तं, *निजं* स्वकीयं *अवतारं* जन्म *सततं* निरन्तरं परिभावयन् *सफलय* सार्थकं कुरु । *सुविहितगुणनिधिगुणगानं कुरु* तथा *सुविहितं* आवश्यकादिसर्वकृत्यं येषां ते तथा त एव *गुणनिधयो* गुणनिधानानि तेषां *गुणगानं* सद्गुणोत्कीर्तनं *कुरु* विधेहि । *शान्तसुधारसपानं विरचय* रागादिविकारविरहितो भूत्वा शान्तस्वभावे विविधप्रेमभरेण विनोदं भजेत्यर्थः।।८।।**

सम्प्रतिनृपवृत्तान्तं तु इदं यथा दानादिकुलकटीकायां –

आर्यमहागिरयः गच्छेन सममेकदा कौशाम्ब्यामागताः, साधुबाहुल्याद्वसतेः सङ्कीर्णत्वाच्च पृथक्पृथक् स्थिता तदानीं दुर्भिक्षे प्रवर्तमाने महर्द्धिक्षे श्राद्धा अशनपानखादिमस्वादिमादि बहुधा वितरन्ति स्म, अन्यदा

कस्यापि श्रेष्ठिनो गृहे साधवो भिक्षायै ययुः तदैको रङ्कस्तेषां पृष्ठस्थोऽन्नं बहुप्रकारं वितीर्यमाणं वीक्ष्य मार्ग जगौ भो मुनयः ! अहं बुभुक्षितोऽस्मि, दीनो दुःस्थो दुर्भगश्चास्मि, म्रियेऽहं, तेन मे किञ्चिद्भोजनं दीयताम्? साधवो जगुर्गुरवो जानन्ति, वयं तु तदधीनाः स्वयं दातुं किमपि नेश्वराः, ततो मुनिभिः सार्धं रङ्को गुर्वन्तिके गतः, गुरुपार्श्वे गत्वा च भोजनमयाचत, तदा गुरूभिरतिशयज्ञानवद्भिस्तस्याग्रेतनं भवं दृष्ट्वा प्रोक्तं भो भिक्षुक ! त्वं चेद् व्रतं भजसे, तदास्मत्पार्श्वाद्भक्तं लभसे, तदा स रङ्कऽचिन्तयद्यथा –

अचिन्तयदयं रङ्कश्चिरं कष्टं सहाम्यहम् । तद्वरं कष्टं यथेष्टं मया यत्र भुज्यते ।।७ ।।

रङ्कः प्राह मम संयमं ददतु, ततो गुरूभिस्तस्मै संयमश्रीर्विश्राणिता, अल्पायुर्मत्वा तस्यान्नपानदानेन भोजयित्वा भाववृद्धये साध्वीप्रतिश्रये साधुयुतः स रङ्कसाधुः प्रेषितः, साध्वीभिर्महेभ्यप्रियापुत्रीयुताभिश्च वन्दितः स रङ्कमुनिः, तदा ध्यातं तेनाहो धर्मस्य साम्राज्यं ! मया यत्कदाचिद् दृष्टं नान्नं तद्भुक्तम्, एवंविधाः साध्व्यादयो मामद्यदीक्षितं वन्दन्ते ।

एवं वर्धमानभावः स रङ्कः पश्चादुपाश्रयमागतः सुखेन सर्वं दिनं निनाय, रात्रौ त्वकस्माद्बलिष्ठा-हाराजीर्णत्वादूर्द्ध्वाधोवमनादिभिर्विशुचिका जाता, ग्लानीभूतो रङ्कसाधू रात्रौ गुरूभिर्निर्यामितो निधनं गतः, पुनर्यत्र स उत्पन्नस्तदाह–

अवन्त्यां श्रेणिकराजपट्टे कूणिकः, तत्पट्टे उदायीः, तत्पट्टे नवनन्दाः, तत्पट्टे चन्द्रगुप्तः, तत्पट्टे बिन्दुसारः, तत्पट्टेऽशोकश्रीः, तस्य सुतः कुणालः स कुणालो बालत्वेनान्धः, तत्पत्नी धारिणी, तस्याः कुक्षौ समुत्पन्नोऽसौ रङ्कसाधुजीवः, रङ्कासाधुजीवः जातमात्र एवं पितामहेन दत्तराज्यं सः सम्प्रतिनामा राजाऽभूः ।

**।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणि-सतीर्थ्यतिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां श्रीशान्त-सुधारसटीकायां प्रमोदभावनाविभावनो नाम चतुर्दशः प्रकाशः समजनि ।**

❀ ❀ ❀

## ॥ पञ्चदशः प्रकाशः ॥

उक्तश्चतुर्दशः प्रकाशः । अथ पञ्चदशः प्रोच्यते । तस्य चायमभिसंबन्धः । चतुर्दशे प्रमोदभावना प्रोक्ता तां च भावयन् करुणाञ्चितहृदयो भवति । स च कारुण्यं भावयतीत्यतः कारुण्य-भावानां विभावयन्नाह- तस्याश्चायमादिमः श्लोकः-

( मालिनीवृत्तम् )

प्रथममशनपानप्राप्तिवाञ्छाविहस्ता-स्तदनु वसनवेश्मालङ्कृतिव्यग्रचित्ताः ।
परिणयनमपत्यावाप्तिमिष्टेन्द्रियार्थान् सततमभिलषन्तः स्वस्थतांक्वाश्नुवीरन् ॥१॥[२०३]

व्याख्या- तावच्चित्तस्वास्थ्ये दुर्लभं दर्शयति । येऽप्राप्तकारुण्यास्ते दुःखिनः सन्तः *प्रथमं* प्रभूत-निर्धनतायामादौ *अशनपान-प्राप्ति-वाञ्छा-विहस्ता अशन*मोदनादि *पानं* स्वादुशीतलजलदुग्धसिताद्राक्षा-पानीयमदिरास्वादि तयोरप्राप्तयोः *प्राप्तिस्तस्या वाञ्छा*ऽभिलाषस्तेन *विहस्ताः* समातुरत्वेन व्याकुला भवन्ति । *तदनु वसनवेश्मालङ्कृतिव्यग्रचित्ताः तदनु* कथञ्चिज्ज्ञाताशनपानप्राप्तेः पश्चात् *वसनानि* चीनांशुककम्बलादीनि *वेश्मानि* धवलगृहाट्टालकापणादीनि *अलङ्कृतयः* कटककुण्डलनूपुरादयः तासां प्राप्तये *व्यग्रचित्ताः* विविधान्यग्राणि स्त्रीपुत्रदुहितृस्नुषादिचिन्तनीयवस्तूनि येषां चित्तेषु ते व्यग्रचित्ता व्याकुला भवन्ति । तथा कथञ्चिद्वस्त्रादिप्राप्तौ सत्यां *परिणयनमपत्यावाप्तिमिष्टेन्द्रियार्थान् परिणयनं* स्वपरविवाहमिच्छन्तः, *अपत्यावाप्तिं* सन्तानप्राप्ति मिच्छन्तः *इष्टेन्द्रियार्थान् इष्टान्* स्वस्य प्रियान् *इन्द्रियार्थान्* शब्दरूपगन्धरसस्पर्शान् पञ्चेन्द्रियविषयभोगान् *सततमभिलषन्तो* निरन्तरं पूर्वोक्तसर्ववस्तुप्राप्तिचिन्ता-व्याकुलाः सन्त आशु शीघ्रं *स्वस्थतां* मनःस्थैर्यं *क्व अश्नुवीरन् क्व* प्राप्नुवन् लभेरन् ? न क्वापि । अप्राप्तस्थैर्ये मनसि कीदृशी करुणेत्यर्थः ॥१॥

सक्तुब्राह्मणकथा यथा पञ्चतन्त्रे –

अस्ति कस्मिंश्चिदधिष्ठाने स्वभावकृपणो नाम ब्राह्मणः । तेन भिक्षार्जितैः सक्तुभिर्भुक्तोद्धरितैः कलशः संपूरितः । तं च कलशं नागदन्तेऽवलम्ब्य तस्याधस्तात् खट्वां निधाय सततमेकदृष्ट्यावलोकयन् रात्रौ चिन्तयामास-सक्तुभिः परिपूर्णोऽयं तावद् घटो वर्तते । तद् यदि दुर्भिक्षं भविष्यति तदा रूपकाणां शतमस्मिननुत्पत्स्यते । ततश्च तेनाजाद्वयमहं ग्रहीष्ये । ततः षण्मासे षण्मासे प्रसववशादजायूथं भविष्यति ततोऽजाभिर्गावः । गवां प्रसवात् तदपत्यविक्रयं करिष्यामि । ततो गोभिर्महिष्यः महिषीभिर्वडवाः वडवाप्रसवतो मम प्रभूता अश्वा भविष्यन्ति । तेषां विक्रयात् प्रभूतं सुवर्णं भविष्यति । सुवर्णेन चतुःशालं गृहं संपत्स्यते । ततश्च कश्चिन् मम गृहमभ्येत्य प्राप्तवरां रूपाढ्यां कन्यां प्रदास्यति । तस्याः पुत्रो भविष्यति । तस्याहं सोमशर्मा इति नाम करिष्यामि । ततस्तस्मिञ्जानुचलनयोग्ये संजातेऽहं पुरःतं गृहीत्वाश्वचलस्थपृष्ठदेशे समुपविश्या-

वधारयिष्यामि । एतस्मिन्नन्तरे सोमशर्मा मां दृष्ट्वा जनन्या उत्सङ्गाज्जानुप्रचलनपरोऽश्वानां समीपवर्ती गमिष्यति । ततोऽहं ब्राह्मणीं कोपादभिधास्यामि गृह्यतां गृह्यतां बालकः । सापि गृहकर्मव्यग्रतयास्मद्वचनं न श्रोष्यति । ततोऽहं समुत्थाय पादप्रहारेण तां ताडयिष्यामि । एवं तेन तद्ध्यानावस्थितेन पादप्रहारस्तथा मुक्तः यथा घटो भग्नः । घटान्तर्वर्तिभिः सक्तुभिश्च पाण्डुरतां गतः ।।

❋ ❋ ❋

( शिखरिणीवृत्तम् )

उपायानां लक्षैः कथमपि समासाद्य विभवं,
भवाभ्यासात्तत्र ध्रुवमिति निबध्नाति हृदयम् ।
अथाकस्मादस्मिन् विकिरति रजः क्रूरहृदयो,
रिपुर्वा रोगो वा भयमुत जरा मृत्युरथवा ।।२।।[२०४]

**व्याख्या- *कथमपि* महता कष्टप्रबन्धेन *उपायानां लक्षैः उपायाः* धनादिप्राप्तेः साधका वाणिज्यविदेशगमनखनिखननादयस्तेषां यानि *लक्षाणि* सुतरामतिप्रभूतानि तैः, कृत्वा *विभवं* पुण्यसंबन्धानुसारेण प्रचुरलक्ष्मीं *समासाद्य* प्राप्य *भवाभ्यासात्* अनादितोऽनन्तभवधनप्रेमपरिचयात् *तत्र* धनोपरि *ध्रुवमिति* क्षणविनश्वरमप्येतद्धनं ध्रुवं मे सदास्थायि कथं भवेदित्येवं *हृदयं* मानसं *निबध्नाति* संधाय यावत्तिष्ठति तावत्तस्य कथा जीवनवार्ता प्रबन्धे तथा*ऽस्मिन्* धनसंग्रहे, *अकस्मात्* अचिन्तितमेकपदे *क्रूरहृदयः* दुष्टचित्तः *रिपुः* शत्रुः *वा*ऽथवा *रोग* आशुविनाशकशूलादिव्याधिर्वा, *उत* अथवा *भयं* परचक्राद्यापतनं *जरा* वयोवार्धक्यं, *अथवा मृत्युर्*मरणं *रजो* धूलीं *विकिरति* विक्षिपति सर्वं विनाशं नयति । तदा तस्य कारुण्यं क्व संभवतीत्यर्थः ।।२।।**

कुचिकर्णकथा यथा योगशास्त्रटीकायां –

ग्रामः सुघोषो नामाऽभवन्मध्ये मगधनीवृतः । कुचिकर्णाभिधानश्च ग्रामणीस्तत्र विश्रुतः ।।१।।
गवां शतसहस्राणि तस्य संजज्ञिरे क्रमात् । बिन्दुना बिन्दुना हन्त भ्रियते हि सरोवरम् ।।२।।
गोपालानां पालनाय सोऽर्पयामास गास्ततः । भव्या मम न ते भव्या इत्ययुध्यन्त ते बहिः ।।३।।
कुचिकर्णो विभज्यैता आर्पयत् कस्यचित् सिताः । कृष्णाः कस्यापि कस्यापि रक्ताः पीताश्च कस्यचित् ।।४।।
पृथक् पृथगरण्येषु गोकुलानि न्यवेशयत् । भुञ्जानो दधि–पयसी सोऽवसत्तेषु च क्रमात् ।।५।।
अन्वहं वर्धयामास गोष्ठे स गोधनम् । अतृप्तो दधिपयसोः सुराया इव दुर्मदः ।।६।।
तस्या भवदथाजीर्णमध ऊर्ध्वं सरद्रसम् । प्रदीपनान्तः पतितस्येव दाहो महानभूत् ।।७।।

हा धेनवो हानवतर्णकाश्च, हा शाक्वरा वः क्व कदा च लप्स्ये ।
स गोधनैरेवमतृप्त एव, मृत्वाऽथ तिर्यग्गतिमासाद ।।८।।

❋ ❋ ❋

( स्रग्धरावृत्तम् )

स्पर्धन्ते केऽपि केचिद्दधति हृदि मिथो मत्सरं क्रोधदग्धा,
युध्यन्ते केऽप्यरुद्धा धनयुवतिपशुक्षेत्रपद्रादिहेतोः।
केचिल्लोभाल्लभन्ते विपदमनुपदं दूरदेशानटन्तः,
किं कुर्मः किं वदामो, भृशमरतिशतैर्व्याकुलं विश्वमेतत् ॥३॥ [२०५]

व्याख्या– अस्मिन् जगति कारुण्यवर्जिता जीवाः *केऽपि* कियन्तः मिथः परस्परं *स्पर्धन्ते* स्वस्मिन् संहर्षिताः सन्तः परेभ्यः समधिका भवितुमिच्छन्ति परेषां पराभवकामनाभृतश्च वर्तन्ते । *केचिच्च क्रोधदग्धाः* कोपाग्निना भस्मीकृतविवेकजीवना *मिथो मत्सरं* परेषां सुखादिवृद्ध्यसहनस्वभावतां *हृदि* चित्ते *दधति* मनसा निर्धारयन्तस्तिष्ठन्ति । तथा *केऽपि* प्रोक्तेभ्योऽन्ये *धनयुवतिपशुक्षेत्रपद्रादिहेतोः धनं* काञ्चनादि, *युवतिः* कुमारी स्वपरविवाहिता वा स्त्री, *पशुर्*गजवाजिवृषभादिः, *क्षेत्राणि* सस्योत्पत्तिभूमयः *पद्राणि* ग्रामनगरादीनि, *आदि*ना राज्यमण्डलादयो ग्राह्याः, द्वन्द्वे कृते एतषां *हेतोः* संहरणविनाशादिकारणातः, *अरुद्धा* अनिवार्यक्रोधग्रस्ताः, *युध्यन्ते* पाण्डवकौरवादिवत्सङ्ग्रामयन्ति । तथा *केचित्*प्रोक्तेभ्योऽपरे *लोभा*द्धनाशावशात् *दूरदेशानटन्तो* दूरे जलधिमहारण्यं समुल्लङ्घ्य स्थिता ये *देशा* जनपदास्तान्, *अटन्तः* परिभ्रमणं कुर्वन्तः *अनुपदं* स्थाने स्थाने *विपदं* महापत्तिं लभन्ते प्राप्नुवन्ति । तथाभूते जगति करुणोत्पादय वयं *किं कुर्मः* किंनामकं समर्थोपायमाश्रयामः ? *किं वदामः* किंनामकं जगद्धितमुपदेशं दद्मः ? तन्न जानीमः । *एतत्*प्रत्यक्षदृश्यमानं *विश्वं* भुवनत्रयं *अरतिशतैः* पीडोद्वेगदुःखानां शतशः समूहैः *भृशमत्यर्थं व्याकुलं* करुणास्पदविह्वलं वर्तते इत्यर्थः ॥३॥

स्पर्धाविषये विनोदकथासङ्गृहीता बुद्धिसिद्धिकथा–

एकस्मिन् ग्रामे जरत्यौ परस्परं सख्यौ बुद्धिसिद्धिनाम्न्यो सर्वदा दुःस्थिते अभूताम् । तस्माच्च ग्रामाद् बहिः साधिष्ठानोऽभीप्सितधनदाता प्रथितो लोके यक्षोऽस्ति । एकदा बुद्धिनामा स्थविरा तं यक्षं सम्यगारराध, तद्यथा, त्रिसन्ध्यमपि देवकुलं प्रममार्ज, नित्यमपूर्वं नेवेद्यं ढौकयामास । यक्षस्तुतोष जजल्प च, 'तुष्टोऽस्मि ते वृद्धे ! याचस्व किञ्चित् ।' वृद्धाप्युवाच–'यदि तुष्टस्तदा तद् देहि येन मे निश्चिन्ता वृत्तिर्भवति ।' यक्षोऽवोचत्–'हे बुद्धे ! निश्चिन्ता भव, एकैकं दीनारं त्वं मदंघ्रिस्थं दिने दिने प्राप्स्यसि ।' तदादि सा दिने दिने दीनारमेकैकं लभते । अधिकाधिकामृद्धिं बभजे । पूर्वं दण्डीखण्डनिवसना, तदा दुकूलानि पर्यधात् । पूर्वमलब्धकाञ्जिकलवाक्पथितानि, तदा स्निग्धानि दुग्धानि भुङ्क्ते स्म । पूर्वं तृणकुटीरकगृहा, तदा गवाक्षशालाभासुरे सौधेऽवात्सीत् । पूर्वं खण्डन– दलनजलवहनादिभिः परगृहे कार्यकरा, तदानीं दासीभिः सुरूपाभिरसेवि । सिद्धिस्तादृशीं बुद्धेः संपदं दृष्ट्वा द्वेषिणी व्यचिन्तयत् 'कुतोऽस्या ईदृग् विभूतिः ? भवतु, अस्यास्तावदहं सखी, विश्वास्य प्रक्ष्यामि ।' इति विचिन्त्य सिद्धिरुपबुद्धि ययौ । 'कुतस्तवेयं समृद्धिः ?, इति पृष्टवती । बुद्धिरप्यार्यहृदया यक्षतोषोद्भवं विभवमचकथत् । सिद्धिः स्वस्थानं गता । यक्षं सविशेषमाराधयामास देवकुले सोपानमण्डसमारचनाङ्गणस्वस्तिकस्नपनविविधपुष्पपूजनधूपो त्क्षेपणनैवेद्य–दानतश्चरणादिभिः क्रियाभिः । एवमहर्निशं सेव्यमानः स यक्षः सिद्धिमुवाच, 'तुष्टोऽस्मि ते पुण्यवति । याचस्व यथेच्छम् ।' अथ सा यक्षमुवाच–'यन्मे सख्यै त्वया दत्तं तन्मे द्विगुणं देहि ।' 'एवमस्तु' इत्यभिधाय

यक्षोऽलक्ष्योऽभूत् । सिद्धिरपि बुद्धेः सकाशादधिकविभूतिभरेण बभ्राजे । बुद्धिस्तामधिकां दृष्ट्वा पुनर्यक्षं सिषेवे । यक्षोऽपि तस्यै तद्द्विगुणं धनं ददिवान् । सिद्धिः पुनर्यक्षमाराधयत् । स तुष्ट ऊचे च 'याच याच ।' एवं यक्षवचः श्रुत्वा सिद्धिरत्यन्तद्वेषान्धा दध्यौ–'यत् किञ्चिदहं प्रार्थयिष्ये बुद्धिर्यक्षमाराध्य तद्द्विगुणं प्रार्थयिष्यते स्पर्धं च महान्तं वहति मया सह तस्मात् तत् किमपि याचे यस्माद् द्विगुणं याचितं ध्रुवमस्यै महतेऽनर्थाय स्यात् ।'इति धिया साऽयाचीत्, 'यक्ष ! मे चक्षुः काणं कुरु ।' यक्ष आख्यत् 'एवमस्तु' काणा सिद्धिरासीत् । सातिशयर्द्धिः सिद्धितरभ्रमत् । बुद्धिस्तां समृद्धिं पष्यन्ती पुनर्यक्षमाराध्य सिद्धेर्द्विगुणं ययाचुषी । यक्षः 'ओम्' इत्याह च । सा चान्धाऽभूद् बुद्धिः ।

रुद्राचार्यकथा यथा धन्यकुमारचरित्रे मात्सर्यविषये –

कस्मिंश्चिद् देशे पुरा प्रभूतगुणगणाऽलङ्कृततनुः बहुश्रुतो बहुपरिवारः पञ्चाचारपालनतत्परो रुद्रनामा आचार्योऽभूत् । अथ तस्य गच्छे सर्वत्र विदितकीर्तयश्चत्वारः साधवोऽभवन्, ते दानादिमूर्त्तिधराश्चत्वारोऽत्युज्ज्वला धर्मभेदा इव शोभन्ते । तेषां चतुर्णां मध्ये आद्यो बन्धुदत्तनामा मुनिर्वादलब्धिसमन्वितः । द्वितीयः प्रभाकरा–भिधानः, योऽर्हच्छासनाऽरविन्दविकाशनतरणितुल्यः सदा मासोपवासाद्यतिदुष्करतपस्तत्परः ।

तृतीयो मुनिः सोमिलो नाम्ना नैमित्तिकानामग्रणीः अष्टाङ्गनिमित्तशास्त्रकुशलो हस्तरेखात्रयमिव अमोघं त्रिकालस्वरूपं वेत्ति । चतुर्थः कालकाभिधानो मुनिः, येनाऽतिगाढदुष्करक्रियया कृत्वा त्रिजगत्कण्टकः प्रमादचरटो जितः । तत्र गुणरागिणो ये लोकास्ते तस्य मुनेर्यदा विशेषेण पूजासत्कारादि कुर्वन्ति तदा तदुत्कर्षमसहमानो रुद्राचार्यो हृदि खेदमावहति ।

अन्यदा तत्र रुद्राचार्यसमीपे कुसुमपुरतः श्रीसङ्घप्रहितं मुनियुगलं समागतम् । रुदाचार्यं वन्दित्वा स्थितम् । तदा रुद्राचार्येणागमनकारणं पृष्टम् । तावाहतुः–''स्वामिन् ! सम्प्रतिकाले एक षट्तर्की विद्वान् भिदुरनामा वादी प्रतिग्रामं बहून् वादिनो जित्वा पाटलिपुत्रकं समागतोऽस्ति । अथ स तार्किको जितकाशितया जैनमुनीनपि जेतुमिच्छति, अतो तं दुर्वादिनं जेतुं भवद्भिस्त्वरितमागन्तव्यम् । इत्येवं वचः श्रीसङ्घ आज्ञापयति, अतोऽनुल्लङ्घ्यं सङ्घशासनं कर्तव्यं भवति'' । एवमागन्तुकमुनिमुखाच्छ्रुत्वा उन्मुद्रविद्यासमुद्रो रुद्राचार्यः पाटलिपुत्रगमनाय प्रगुणोऽभूत्, यावता रुद्राचार्यस्तत्र गमनाय प्रवृत्तस्तावताऽपशकुनैः क्षुतादिभिर्बाढं वारितः । तेन रुद्राचार्यस्तु तत्रैव स्थितः, ततो वादिवृन्ददमनसमर्थबन्धुदत्तं तं दुर्वादिनं जेतुमादिशत्, ततो बन्धुदत्तमुनी रुद्राचार्यादेशं प्राप्य पाटलिपुत्रं प्रति प्रस्थितः । अविच्छिन्नप्रयाणैः पाटलिपुरं गत्वा परवादिनाऽ–धिष्ठितां राजसभामासदत् । बन्धुदत्तमुनिर्न्यायवाचा प्रतिवादिनं जिगाय, जयश्रीर्लब्धा । पुरे तु 'जितं जैनैर्जितं जैनैः' इत्युद्घोषणा प्रवृत्ता । राज्ञा बहु सन्मानितो बन्धुदत्तमुनिः । राजा धर्मरुचिश्च जातः ।

ततो महामहोत्सवपुरस्सरमाचार्यं प्रति चलितः । कियद्भिर्दिनै रुद्राचार्यमुपागात् । तत्र जैनमार्ग–कुशलैर्भट्टैर्बहुधा बिरुदैः स्तूयमान उपाश्रयं प्रविष्टः । अनेकैस्तदेकोत्कर्षवर्षिभिर्बिरुदव्रातैर्विद्धकर्णः सकर्णोनीतिनिपुणोऽपि रुद्राचार्यो रोषमुद्रितोऽभूत् । ततो रुद्राचार्यो बन्धुदत्तस्य गुणश्लाघाकरणं तु दूरेऽस्तु परन्तु सम्भाषणम्, आगमनोदन्तमपि नाऽपृच्छत्, यस्माद् महतामपि असूयावशाद् मौढ्यं भवति । अथ गुरुणाऽसत्कृतो बन्धुदत्तः पठने मन्दादरो जातः, पठनाभ्यासोऽनेन त्यक्तः । क्रमेणाऽनभ्यासाज्जडोऽभवत् ।

इतश्च साकेतपत्तने निष्कृपः कृपणः क्रूरः सर्पस्यानुज इवाऽदर्शनीयः कृपनामा नृपोऽस्ति । स राजा कुशास्त्रश्रवणाद् विभ्रान्तचित्तो न कदापि पापात् श्रान्तो भवति । साकेतपुरवार्तां श्रुत्वा निमित्तज्ञानकुशलः

सोमिलर्षी रुद्राचार्यं प्रति इत्युवाच–'हे स्वामिन् ! यदि भवताऽऽदेशः क्रियते तदाऽहं निमित्तभाषणकलया साकेतपुराधीशं कृपनृपं प्रतिबोधयामि' । इति श्रुत्वा गुरूणापि तस्य दुष्टराज्ञः प्रतिबोधनायाऽऽज्ञा दत्ता ।

अथ करुणासमुद्रः सोमिलर्षिः साकेतपुरं गतः । तत्र च राज्ञो मुख्यमन्त्रिणो गृहे स्थितः । तस्मिन्नेव दिवसे राज्ञा कारिते नव्यावासे प्रवेशाय द्विजैर्लग्ने समर्पिते नृपो गृहप्रवेशाय सामग्रीं कारयामास । तदा निमित्तज्ञानकुशलः सोमिलर्षिर्निमित्तबलेन भाव्यशुभोदयनिर्णयं कृत्वा सचिवाय इत्युवाच–'भो मन्त्रीश्वर ! त्वयाऽद्य प्रविशन् राजा वार्यः, यतोऽकाले विद्युत्पातयोगेन तत् पतिष्यति । अद्य निशीथसमये विद्युत्पातो भविष्यति, तस्य निवारयिता न कोऽप्यस्ति, तच्च साभिज्ञानं ते कथयामि यतो मदुक्तमिदं सत्यमेव बुध्येत, यदद्य रात्रौ मूर्तिमत्काल इव व्यालः स्वप्ने दृष्टोऽस्ति, अस्मादभिज्ञानाद् मदुक्तं सत्यं मन्यताम् । अतो निर्णयं कृत्वा पश्चाद् यथास्वहितमाचरणीयम्' । एतादृशं मुनिवाक्यं श्रुत्वा मन्त्रिणा सर्वं मुनिभाषितं भूभुजे निवेदितम् । राजापि तत् श्रुत्वा विस्मितचित्तो विचारयति स्म–'अहो मुनेर्ज्ञानं दृश्यताम् ! रात्रौ मया दृष्टं स्वप्नं कथं ज्ञातवान् ? अतः कारणादग्रेतनमपि विद्युत्पातादिकं सर्वं सत्यमेव भविष्यति, ततो मया नवमन्दिरे प्रवेशो न करणीयः' । एवं मनसि निर्धार्य मुहूर्तकाले संजाते सभयो राजा नवं धाम न जगाम । तस्तिन्नेव रात्रौ विद्युत्पातात् प्रासादः पपात ।

ततो राज्ञा प्रासादपतनाद् मुनेर्ज्ञानातिशयं वीक्ष्य हृदि निर्णीतं यद् जैनात् परः कोऽपि ज्ञाता नास्ति । अथ प्रभाते संजाते दूरीकृतमिथ्यात्वकदाग्रहो राजा सात्मप्राप्ततपस्क्रियं सोमिलं मुनिमाहूय भूमिमिलन्मौलिस्त्रिकरणशुद्ध्या वन्दितवान् मुनिनोक्तं जैनधर्ममूरीचकार, परमार्हतमार्गाराधकश्च जातः । बहुना लोकेनापि मिथ्याभिनिवेशं त्यक्त्वा श्रीजिनधर्मोऽङ्गीकृतः । सोमिलमुनिः रुद्राचार्यसमीपमागतः । सर्वेणापि च लोकेन सोमिलर्षिः प्रशंसितः । बहुमानपूर्वकं दुर्वादिनिराकरणव्यतिकरो निवेदितः । भक्त्युत्सेकेन कृतां पुनः पुनः श्लाघां श्रुत्वा रुद्राचार्यो हृदयेऽसूयादोषात् प्रज्ज्वलति, यथा यथा सोमिलर्षिकृतशास्त्रोन्नतिं शृणोति तथा तुषारहतपद्मवद् मुखम्लानिमाप्नोति । ततो द्वेषवशाद् लोकिकव्यवहारेणापि क्षेमागमनवार्तामपि न पृच्छति ।

तदा ते प्रभाकरादयः पूर्वोक्ताश्चत्वारो मुनिवरा अन्येऽपि च गच्छगताः सुविहितसाधवो रुद्राचार्यस्य निरादरमसूयाक्व (ज्व) लनं च दृष्ट्वा योग्या अपि अकृतयथार्थश्लाघया हतोत्साहाः स्वस्वगुणेषु शैथिल्यमाप्ताः । ततोऽसौ रुद्रो गुणिदोषोत्पन्नकिल्बिषत्वेन अनालोचिततत्पापो मृत्वा किल्बिषसुरेष्वगात् । देवजातिषु चण्डालतुल्य उत्पन्नस्तेन देवसभायां प्रवेशमपि न प्रापत् । चिरं देवेषु जातिहीनतया तिरस्कारदुःखं भुक्त्वा ततश्च्युत्वा द्विजगृहे जन्ममूकः पुत्रोऽजनि । पूर्वकृतकर्मोदयाद् रोगाक्रान्तो दरिद्रश्च अनेकदुःखाभिभूतो मृत्वा भवे चिरतरं भ्रान्तः । यद्येवमागमतत्त्वज्ञः समस्तश्रुतवेत्ता आचार्यगुणधार्यपि च रुद्राचार्य एकयैव गुणेर्ष्यया घोरं दुःखं प्राप्तस्तदा ध्माताऽयोगोलककल्पानां तु का कथा ? ।

युद्धे कोणिक कथा–

देवार्पितदिव्यकुण्डलाष्टादशचक्रहारवासोभिः सहितः सेचनकद्विपः श्रीश्रेणिकेन हल्लविहल्लयोर्दत्तः । कोणिको रुष्टः । तेन स्वपिता प्रपञ्चेन काष्ठपञ्जरे न्यस्तः । क्रमेण नृपे परलोकं गते कोणिकोऽशोको नवां चम्पापुरीं निवेश्य कालादिदशभ्रातृयुतस्तत्र स्थितः । अन्यदा पद्मावतीराज्ञीनित्याग्रहान्नृपो हारादितुर्यकं ताभ्यामयाचत । बुद्धिमन्तौ तावशुभायेति मत्वा स्वसारं सर्वमादाय स्वमातामहचेटकमहाराजपार्श्वे निशि

जग्मतुः । कोणिकेन दूतेन तौ याचितौ । राजाद–दौहित्रौ शरणायातौ कथमर्पयामि ? । दूतवाक्यश्रवणोद्भवरोषः कोणिकः सुभटत्रयकोटीयुतो निजबलतुल्यकालादिदशकुमारयुतश्च चेटकं प्रत्यचालीत् । चेटकोऽप्यष्टदश–भूपालवृतोऽन्वचलत् । मिथो युद्धं जातं, प्रथमयुद्धे चेटकेन सुरार्पितशरेण कालः कालनिलयमनायि । तत उभावपि विरेमतुः । एवं दशभिर्दिनैर्दशभिः कोणिकबान्धवा निहताः । नियमत्वादेकमेव बाणं प्रत्यहं युद्धे मुञ्चति विशालाधिपः । ततो बन्धुशोकाम्बुधिमग्नकोणिकेन तं दुर्जयं मत्वाऽष्टमतपसा सौधर्मेन्द्रचमरेन्द्रा– राधनं कृतम् । तत्रागत्य ताभ्यामभाणि–आवयोः संयतः साधर्मिकोऽस्त्यतस्तवावां देहरक्षां करिष्यावः ।

तदनु चमरेण महाशिलाकण्टकं रणमपरं च रथमुशलाख्यं दत्तम् । प्रथमयुद्धे कर्करोऽपि निक्षिप्तः । शिलायते, कण्टकश्च शस्त्रायते तदा चतुरशीतिलक्षवीराणां वधो जातः द्वितीयदिने षण्णवतिशतसहस्राणं च । त्रिभिरपि चेटकनृपेण समं समरं चक्रुः । ततो विहस्तश्चेटको नागरथिपौत्रं श्राद्धधर्मकर्मठं षष्ठभक्तभोजिनं *विक्रमिणं वरुणं सेनापतिं प्राह–हे सुभट ! त्वामाजौ सज्जीभव । स्वामिवचः प्रमाणमिति प्रोच्य स तद्बलेन* सह समरं चकार । भवितव्यतया तत्सेनान्या पतत्रिणा प्रथमं तद्वचसा स वरुणो मर्मणि विद्धः । तदनु द्वित्रिक्रमं स्वरथं समाक्रम्य वरुणोऽपि तं हत्वा महाहवान्निरगात् । ततो दर्भसंस्तारके निषद्यालोचितप्रतिक्रान्तः समाधिना मृत्वारुणाभविमाने चतुष्पल्यायुष्कः सुरोऽजनि, विदेहे मोक्षमेष्यति । विशेषेणायं वृत्तान्तः पञ्चमाङ्गतो ज्ञेयः ।

ततश्चेटकमुक्तो बाणः कोणिकाग्रे शक्रेण वज्रकृतकवचे आस्फाल्य भुव्यपतत् । सत्यप्रतिज्ञः पुनर्नामुचत् द्वितीयं बाणम् । द्वितीयेऽपि दिने बाणो मुधाऽभूत् । ततश्चेटको विशालायामविशत् । ततो हल्लविहल्लौ रात्रौ सेचनकारूढौ तद्बलं निहत्य सत्वरं प्रत्यागच्छतः । स्वबलं ताभ्यां बहु हन्मानं वीक्ष्य तेन स्वसैन्यस्य परितः खादिराङ्गरपूर्णा खातिका रहः कारिता । ततस्तौ द्वावपि सिन्धुराधिरूढौ तदुपकण्ठं समीयतुः । स करी विभङ्गतश्छन्नां ज्वलत्खातिकां दृष्ट्वा मैतौ विनशतामिति मत्वा पुरःपदमपि नाधत्त । ताभ्यामङ्कुशेनाहत्य करी भाषितः–रे दुरात्मन् ! सम्प्रति प्रतिकूलतां धत्से तन्नार्हम् । तद्वाक्यानन्तरं तौ निजकुम्भादुत्तार्यात्मानं खातिकायामपातयत् । तत्तापेन गजो विपेदे । प्रथमं स्वर्गं गतश्च ।

हस्तिनं मृतं वीक्ष्य विलक्षौ तौ चिन्तयतः स्म–अहो ! पशुतोऽप्यावामधन्यौ, ययोरीदृशी मतिः किं चानेकपापात् कथं छुटिष्यावः । इति संवेगपरौ शासनदेव्या वीरपार्श्वे मुक्तौ संयमं जगृहतुः । तपस्तप्त्व सर्वार्थसिद्धिं जग्मतुः ।

ततः कोणिको मनसीमां सन्धां व्यधात्–यदि विशालां खरकलितशरैर्न खनामि, तदाग्निं विशामि । इति कृतप्रतिज्ञोऽपि पुरीमादातुमक्षमो विषसाद । तावद्गुर्वाज्ञालोपादरुष्टा देवी व्योमस्था राजानं प्राह–

समणे जह कुलवालए मागहिया गणिअं गमिस्सए ।
राया य असोगचंदए वेसालं नगरीं गहिस्सए ।।

ततो मागधिकां वेश्यामाकार्य राज्ञा प्रोक्तम् । तया च प्रतिपन्नम् । पश्चात्सा कपटश्राविका वने तं प्रणम्य भणतिस्थाने स्थाने चैत्यानि साधूंश्च वन्दित्वा भोजनं कुर्वे । यूयमत्र श्रुतास्ततो वन्दनार्थमागता । अनुग्रहं कुरु । प्रासुकमेषणीयं भक्तं गृहाण । इति भणित्वा मोदका नेपालगोटकचूर्णमिश्रा दत्ताः । ततोऽतिसारो जातः । ततस्तया लघ्वीभिरन्याभिः सह तस्य वैयावृत्त्यं तथा कृतं, यथा वशीस्यात् पश्चात्तया स कोणिकान्ते नीतः । राजा तमाह–तथा कुरु, यथा पुरी गृह्यते । राजन् ! प्रमाणं इत्युक्त्वा स पुरीमध्यं गतः । सर्वत्र भ्रमन्

मुनिसुव्रतस्वामिस्तूपं दृष्ट्वाऽचिन्तयत्–अस्य प्रभावेण परबलैरियं पुरी न भज्यते । तदमुष्य भङ्गे उपायं विदधामि । ततो नागरैस्तं मुनिं वीक्ष्य पृष्टं–कदा नगररोधोऽपगमिष्यति ? । तेनोक्तम्–यदैनं स्तूपं यूयं पातयिष्यथ तदा । तैस्तथा कृतम् । स्तूपं भज्यमानमालोक्य स पापः प्रत्ययोत्पादनाय गत्वा द्विक्रोशीपरतः परबलमानाययत् । तत्प्रत्ययानसारादाकूर्मशिलं यावत् पातितम् । एवं द्वादशवर्षान्ते लोकैर्गोपुराण्युद्घाटितानि । ततः सहसागत्य कोणिकस्तामभनक् । निवृत्तो रणः यदस्यामवसर्पिण्यां प्रागपीदृशो नासीत् । यतस्तस्मिन्नाहवे विपन्ना एका कोटीरशीतिलक्षाः सुभटानाम् । तत्र दश सहस्राण्येकस्या मत्सिकायाः कुक्षाववातरन् । एको देवलोके । एकः सुकुले । शेषास्तु तिर्यग्नरकगतौ । ततश्चेटकनृपः पुरीतो निर्गच्छंस्तेनाभाष्यतः–भोः पूज्य मातामह ! ब्रूहि, कमादेशं करोम्यहम् ? स प्राह–दौहित्र ! क्षणमेकं विलम्बस्व, वाप्या जले स्नानं कृत्वा समेमि । तेन प्रतिपन्ने चेटको गलेऽयःपुत्तलिकां बद्ध्वा समाधिपरो यावद्वाप्यन्तरे न्यपतत्, तावद्धरणेन्द्रेण पतन् करसंपुटाभ्यां विधृत्य स्वभुवनमानिन्ये । तत्र विहितानशनः सहस्रारकल्पे शक्रतुल्यो जातः ।

दोहित्रस्तस्य सुज्येष्ठासूनुः सत्यकिखेचरः । निनाय नीलवन्ताद्रौ समग्रं नगरीजनम् ।।

ततः कोणिकोऽपि स्वप्रतिज्ञामापूर्य चम्पायां प्राविशत् । कूलवालकोऽपि देवगुर्वाशातनापरो मागधिकासंगोद्भवपापेनानेकदुर्गतिभाग् भविष्यति ।

✼ ✼ ✼

( उपजातिवृत्तत्रयम् )

स्वयं खनन्तः स्वकरेण गर्ता, मध्ये स्वयं तत्र तथा पतन्ति ।
तथा ततो निष्क्रमणं तु दूरेऽ- धोऽधःप्रपाताद्विरमन्ति नैव ।।४।। [२०६]

**व्याख्या– भो भव्या ! अयं विश्वजनः तथा तेन प्रकारेण *स्वकरेण* निजहस्तेन आत्मनैवेति यावत्, *गर्तां* महाखातिकां *स्वयं* स्वकीयेनारम्भप्रवृत्तिस्वभावेन नेश्वरादिप्रेरणया *खनन्तो*ऽलब्धाधस्तनतलप्रदेशं विदारयन्तः यथा येन तलप्राप्त्यभावेन । *ततो* गर्तामध्यभागात् *निष्क्रमणं तु* निर्गमस्तु दूरेऽस्तु *परन्तु अधोऽधःप्रपातादपि नैव विरमन्ति* नीचैर्नीचैर्गच्छन्नैव विरमन्ति, नीचैर्गमनस्यापि अवसानं नैव प्राप्नुवन्ति, सुतरामनन्तसंसारत्वं व्रजन्तीत्यर्थः ।।४।।**

उपदेशप्रासादे कौरववृत्तं –

वनवासे त्रयोदशवर्षातिक्रमे कौरव–पाण्डवयोः कलहं आयति विरसं मत्वा सन्धये श्रीकृष्णो दुर्योधनं प्राह पाण्डवोदितम् –

इन्द्रप्रस्थं यवप्रस्थं माकन्दी वरुणावतम् । देहि मे चतुरो ग्रामान् पञ्चमं हस्तिनापुरम् ।।

इत्थं पञ्चग्राममार्गणे दुर्योधनोऽवदत्–

सूच्यग्रेण सुतीक्ष्णेन या भिद्यते च मेदिनी । तदर्धं तु न दास्यामि विना युद्धेन केशव ।।

पुनर्हरिः प्राह–युद्धे कुलक्षयो जयसंशयः श्वभ्रपतनं च स्यात् इत्यादिना बोधितोऽपि स नाबुध्यत् प्रत्युत कृष्णेऽपि बन्धानाद्यचिन्तयत् ।

युद्धं जातं । तत्तु प्रसिद्धं एव ।

✼ ✼ ✼

प्रकल्पयन्नास्तिकतादिवाद- मेवं प्रमादं परिशीलयन्तः ।
मग्ना निगोदादिषु दोषदग्धा दुरन्तदुःखानि हहा सहन्ते ॥५॥ [२०७]

व्याख्या- *हहा* महाकष्टं अज्ञाः सद्बोधविकला मिथ्यादृष्टयो व्याकरणतर्कसाहित्यादिभिर्लब्ध-वादशक्तयो यथार्थवस्तुस्वरूपसारज्ञानवर्जिता वाचाटा इति यावत्, *नास्तिकतादिवादं प्रकल्पयन् नास्तिकता* पञ्च भूतचतुष्टयं वा विहायान्यः कश्चिदात्माख्यः पदार्थो नास्तीत्येवं वदन्नास्तिकस्तद्भावस्तत्ता साऽऽदिर्यस्य स तथा *आदि*पदादात्मा कर्ता न भवति, भोगी तु भवति, सर्वज्ञो नास्ति, वेदवाक्यैर्धर्मनोदना, मोक्षो न ज्ञानात्मकज्ञानं, प्रकृतिधर्मः, सा तु जडात्मिकेत्यादयो बोध्याः, इत्यादि वदनं *वाद*स्तं, *प्रकल्पयन्* स्वस्वेष्टशास्त्रादिरूपेण रचयन्, *एवं* प्रोक्तवादादिना *प्रमादं* मिथ्यात्वरागद्वेषादिप्रमत्ततां *परिशीलयन्तः* समाचरन्तः *दोषदग्धाः* पूर्वोक्तदोषकृशानुना प्रज्ज्वलितसद्विचारदेहाः *निगोदादिषु निगोदः* साधारण-शरीरवनस्पतिरादिना प्रत्येकवनपृथिव्यादिनरकादयो ग्राह्याः तेषु, *दुरन्तदुःखानि* दुःखेनान्तोऽवसानं येषां तानि *दुरन्तानि दुःखानि* जन्ममरणादिकष्टानि *सहन्ते* वेदयन्तीत्यर्थः ॥५॥

द्वाविंशतिगोष्ठिकानां भवभ्रमणवर्णनं –

पञ्चमपट्टधरः श्रीयशोभद्रगुरुः, तद्विनेयो भद्रबाहुः श्रुतकेवली, तच्छिष्योऽग्निदत्तनामा मिथिलोद्याने प्रतिमां प्रतिपन्नस्तपश्चरति स्म । इतो द्वाविंशतिर्गोष्ठिकनरा मद्यमांसासक्ताः कामलतया वेश्यया सह कुचेष्टां तन्वन्तः प्रत्यहं वने क्रीडन्ति स्म । मदान्धा एकदा तं साधुं वीक्ष्यातितीक्ष्णशस्त्रहस्तास्तद्वधार्थं युगपद्दधारिवे । ते सर्वेऽन्धकूपे सहसा पतिता । अन्योऽन्यशस्त्रापहता मृत्युना गृहीताः । साधूस्तान् पश्यन् दध्यौ–हा हा ! अकृतसुकृता अकाले मृताः । इति ध्यात्वा कायोत्सर्गं पारयित्वा यशोभद्रादिगुरुसमीपे समागतः । तेषां पुरो विनेयोऽग्निदत्तो द्वाविंशतिगोष्ठिकनराणां प्रेत्यगत्यादिकं पप्रच्छ । तदा सूरिराट् त्रिज्ञानोपयुक्तो दृष्टिवादाद्भावितार्थो यशोभद्राह्वः श्रुतोपयोगं प्रयुञ्जानस्तेषां बहुयोनि–परिभ्रमणं प्राह–हे अग्निदत्त ! ते द्वाविंशतिनरास्तव वधार्थं धावन्तोऽन्धकूपे पतितास्तां गणिकां काङ्क्षमाणा अन्तर्मुहूर्तमात्रतदध्यवसायेन मृता गणिकाकामलतादक्षिणस्तनबिण्टप्रदेशे स्वकृतनखक्षते कृमित्वेनोत्पन्नाः, तेन स्तनवेदनाऽति-प्रादुर्भूता । चिकित्सका औषधादिभिः खेदं गता हारिताः । एको वैद्यो लब्धोपाय उरोजं विदार्य ये द्वाविंशतिकृमयो द्वीन्द्रिया अस्थिमांसशोणितबद्धाशास्तान् जलभाजने. मुमोच । वैद्यस्तान् वेश्याया अदर्शयत् । स्तनस्तु व्रणसंरोहिण्या सज्जीकृतः । वैद्यस्य सा बहुदानं ददौ ।

अथ तेषु कृमिषु पूर्वबद्धानुरागात्करुणां दाती सा दध्यौ–इमे वराक मदीयकरस्पर्शान्मरिष्यन्ति, अतोऽहं पुरपरिखापतितश्वशबे गत्वा मुञ्चामि । ततस्ते भषणकोष्ठके क्षिप्ताः ।

यतः– तत्थऽवि ते दुवीस कीमकीडगा आतपच्छुहातण्हाभिभूया समाणा अंतमुहुत्तपहुत्तेहिं कालगया । (१)

ततस्ते साधारणवनस्पतौ मुस्ताकन्दत्वं प्राप्स्यन्ति, तत्र खन्यमाना मृताः पृथ्व्यादिपञ्चकैकेन्द्रियेषु जघन्यमध्यमस्थितिका भविष्यन्ति । ततस्ते कामलताकुक्षौ गण्डोलत्वेनोत्पत्स्यन्ते, तत्र विरेचनाद्विपन्नास्ते वेश्यामलद्वारेण निर्गतास्तत्रैव पुरीष उत्पत्स्यन्ते, तत्रान्तमुहूर्तायुष्यं त्रीन्द्रियसंबन्धि भुक्त्वा विपन्नाः सन्तो वेश्योच्चारे तत्रैव चतुरिन्द्रिया भविष्यति । यतः– तीसे कामलयाए उच्चारे पासवणे खेलजल्लसिंघाणवंतसे

सत्तवार विगलिंदियाण ताणं जहाकम्मं पाविहि त्ति । इत्थ–मुगुणतीसभववत्तव्वया । (२) ततः पुनस्ते द्वाविंशतिस्त्रिंशत्तमे भवे तद्वेश्याशौचगृहे निर्धमने मण्डूकत्वेन संमूर्छिष्यन्ति, तत्र दिनपृथक्त्वायुष्यमति–क्रम्यैकत्रिंशत्तमे भवे वेश्यागृहे गर्भजोन्दरा भविष्यन्ति । तत्र मासपृथक्त्वायुःक्षयेण द्वात्रिंशत्तमे भवे तद्गणिकागृहद्वारे तन्मलोत्सर्गमाहरन्तो गर्ताशूकरा भविष्यन्ति ।

तत्र वर्षपृथक्त्वस्थितिक्षयेण त्रयस्त्रिंशत्तमे भवेऽवन्तिदेशे श्वपाककुलेषूत्पत्स्यन्ते । उक्तं च– तेण ते दुवीस सोवागा वुड्ढिं पत्ता दुमसठाणे दीहदंताला लंबोदरा गुलियरासिसन्निकासा अदंसणिज्जा जणाणं दुगंछा उप्पायमाणा सकामकुसला आविहोहिंति । (३) अत्रान्तरे हे अग्निदत्त ! सा गणिका वृद्धिं प्राप्ता द्रव्यं स्वधर्मस्थाने संस्थाप्य परिव्राजिकादीक्षां धर्मं चाङ्गीकृत्य मिथिलातो निर्गत्य काशीजनपदमध्य–स्थितगङ्गानद्युपकण्ठस्थतपस्विनामन्तिके शौचमूलं धर्मं चचार । क्रमेण पर्यटन्त्यवन्तिदेशस्थितसिप्रसरित्तटे आगता । तत्रानेकजनानां पुरः शौचमूलं धर्मं प्रादुष्करिष्यति । तदुक्तं च– सेऽवि सोए दुविहे पन्नत्ते दव्वसोए १ भावसोए २ अ । दव्वओ उदयमट्टियाए य भावओ दज्झेहि य मंतेहि य जेणं अम्हं किमवि असुई भवइ सव्वं मट्टियाहिं लिंपइजजइ । तओ सुहोदएण पक्खालिंज्जइ । ततेण सा असुई भवइ १ । एवं खलु सत्ता जलभिसेयसत्ता परमपयं गच्छंति । (४)

ततस्ते द्वाविंशतिश्वपाकास्तं धर्मं श्रुत्वा रसिका भविष्यन्ति, विशेषतो जैनमुनिचैत्यानां प्रत्यनीका अवर्णवादिनो भविष्यन्ति । ततो वैराग्यं गतास्ते पञ्च वर्षाणि यावत्परिव्राजकदीक्षां तत्पार्श्वेऽङ्गीकृत्यायुःक्षयेण तत्रैवावन्त्यां चतुस्त्रिंशत्तमे भवे भाण्डकुलेषूत्पत्स्यन्ते । तत्रानेकजनसमीपे भाण्डचेष्टां कुर्वाणा जीविष्यन्ति ।

अन्यदा कुशस्थलभूपपुरो भाण्डचेष्टया सर्वेषां हास्यं जनयन्तोऽष्टमतपःपारणे गोचर्यर्थं निर्गतमेकं साधुयुगलं प्रेक्ष्य पुरोहितवचसा तन्मुनियुगलं हिलयिष्यन्ति, तथापि मौनावलम्बि तत्साधुयुग्मं वीक्ष्य स्वयमेव ते भाण्डाः श्रान्ता मुनियुगलं विसर्जयिष्यन्ति । ततो हे अग्निदत्त ! ते भाण्डा एकत्र सुप्ता अकस्मादकालविद्युत्पातेन मृत्युं प्राप्स्यन्ति । ततः पञ्चत्रिंशत्तमे भवे मध्यविषये भिन्नभिन्न– कुलेषूत्पत्स्यन्ते । उक्तं च–मज्झविसएसु पुढो पुढो कुलेसु चउद्दसविज्जापरया दिया समुपज्जइस्संति । तत्तेण दुवीस दिया धाराउरे जन्नदत्तदियामंतणेण जण्णवाडम्मि ठिया पिहितदुवारा दवेहिं सिप्पीहवणे करेमाणे वज्जग्गिणा उद्विएणं दउ्डाहुत्ता अट्टज्झाणोवगया पिवासासोसीयकंठा सिप्पानईदहम्मि मच्छ होहिंति । (३) एवं जलचराणां मध्ये सप्तभववक्तव्यता, ततः खेचरयोनिषु नवभववक्तव्यता, ततः स्थलचरयोनिमध्य एकादशभवक्तव्यता ज्ञेयेति, एवं द्वाषष्टिभव–ग्रहणम् । तत्र द्वाषष्टितमे भवे ते द्वाविंशतिगोष्ठिकनरा मृगत्वं लप्स्यन्ते । तत्र वनदवाग्निना दग्धास्त्रिषष्टितमे भवे मध्यविषयेषु भिन्नभिन्नश्रावककुले समुत्पत्स्यन्ते । तत्रोन्मुक्तबाल्यावस्था धृष्टाः परवञ्चकाः पूर्वभव–मिथ्यात्वभावतो जिनमार्गप्रत्यनीका देवगुरुनिन्दकाश्च भाविनः । बहूनां नरनारीणं पुरतः कथयिष्यन्ति–

अश्मधातुभिर्घटितप्रतिमापूजनं व्यर्थ, हिंसानिदानत्वात्, इत्यादियुक्त्या चैत्यतीर्थागमोत्थापनं विधास्यन्ति । अथ सा तपस्विनी अष्टसप्ततिवर्षाणि यावद्गृहवासं षड्विंशतिवर्षाणि यावत्परिव्राजक–मार्गानुरक्ता सर्वायुश्चतुरुत्तरशतवर्षमितं भुक्त्वा सप्तदिनानशनेन मृत्वा वानव्यन्तरस्य सुवत्सस्य दक्षिणेन्द्रस्य देशोनपल्यार्धायुष्का सुवत्सा नाम्नी देवी भविष्यति । तत्र विभङ्गज्ञानेन पूर्वबहुभवसंबन्धिनस्तान् द्वाविंशतिं वणिजो दृष्ट्वा सा देवी हृष्टा तुष्टा तेषां सर्वत्र साहाय्यं विधास्यतीति । देवीप्रभावात्ते सर्वर्द्ध्या वृद्धिं

प्राप्स्यन्ति । तदनु सर्वलोकानां पुरो बाढमुद्घोषयिष्यन्ति–भोः ! पश्यतास्मद्धर्मफलं प्रत्यक्षं, वयं महासौख्यमनुभवामः, यूयमप्यस्मद्धर्मादरं कुरुत, किं स्यादश्मबिम्बार्चया षट्कायोपमर्दिकया ? । एवं ते द्वाविंशतिर्भ्रष्टश्राद्धा अनेकजनान् कुमार्गे पातयिष्यन्ति । तत्समये स्वामिप्ररूपितश्रुतहीलनं भविष्यति, श्रमणानां निर्ग्रन्थानां नोदयपूजासत्कारा भविष्यन्ति, अतिदुष्करं च धर्मपालनं भविष्यति । ततस्ते द्वाविंशतिर्वणिज आयुरवसानसमये षोडशरोगातङ्काभिभूता आर्तध्यनोपगताः कालं कृत्वा घर्मायाः प्रथमपृथिव्याः प्रथमप्रस्तटे दशसहस्रवर्षस्थितिकनारकित्वं प्राप्स्यन्ति । ततः परमनेकयोनिषु भ्रमिष्यन्ति । इति दुर्लभबोधिनः श्रीमज्जिनागमहेलिकाश्चेति ।

❋ ❋ ❋

**श्रृण्वन्ति ये नैव हितोपदेशं न धर्मलेशं मनसा स्पृशन्ति ।**
**रुजः कथङ्कारमथापनेया–स्तेषामुपायस्त्वयमेक एव ॥६॥ [२०८]**

**व्याख्या- येऽनिर्दिष्टनामधेयाः *हितोपदेशं* धर्ममयहितशिक्षां *नैव श्रृण्वन्ति* अयमेवात्मनः कल्याणप्राप्तेरुपायोऽस्तीति हितधिया नैवाकर्णयन्ति, तथा *ये धर्मलेशं मनसा न स्पृशन्ति धर्मस्य* दानादिचतुर्विधस्य *लेश*मेकादिभेदं देशतोऽपि, *मनसा* "धर्म एव सकलकल्याणदोऽस्तीति" श्रद्धयापि *न स्पृशन्ति* न स्वीकुर्वन्ति । *अथै*वं स्थिते *तेषां* प्रोक्तस्वरूपाणां *रुजो* जन्मजरामरणकर्मविकारादिरोगाः *कथङ्कारं* केनौषधोपायालम्बनेन कृत्वा, *अपनेया* निवार्याः ? नान्येन केनापि निवार्याः सन्ति । कुत एवं ? यत*स्तेषां* निवारणे *उपायस्तु* निवृत्तिसाधनं तु, *एकोऽ*द्वितीयो*ऽयमेव* अयमनन्तरनिर्दिष्टो हितश्रवणधर्मस्वीकार एव, स तु सुतरां परिहृत इत्यर्थः ॥६॥**

गोष्ठामाहिलवृतं तु इदं–

दशपुरे तोसलीपुत्रशिष्याः । आर्यवज्रस्वामिपार्श्वेऽधीतानि साधिकानि नव पूर्वाणि यैः, तथा स्वल्पमतिशिष्यान् ज्ञात्वा क्रमेणानुयोगा यैः पार्थक्येन स्थापिताः, तथा सीमन्धरवचसा निगोदपृच्छार्थं ये देवेन्द्रैर्वन्दिताः, ईदृशा आर्यरक्षितसूरया विचरन्तो दशपुर आगताः । इतश्च मथुरायां नास्तिकवादी समुत्थितः । तत्र च प्रतिवादिनः कस्यचिदभावात्सर्वसङ्घेनार्यरक्षितसूरय एव साम्प्रतं युगप्रधाना इति कृत्वा प्रस्तुतव्यतिकरकथनाय साधुसङ्घाटकः प्रेषितः । सूरयो वृद्धत्वाद्गन्तुमक्षमा वादलब्धिधरं गोष्ठामाहिलं प्रैषयत् । तेन तत्र गत्वा निग्रहीतोऽसौ वादी । ततः श्रावकैस्तत्रैव चतुर्मासीं कारितः । इतश्च सूरयो निजायुः प्रान्तमासन्नं विज्ञाय दध्युः–योग्यस्यैव विनेयस्य गणधारिता देया, यतः–

वूढो गणधरसद्दो गोयमाईहिं धीरपुरिसेहिं । जो तं ठवइ अपत्ते जाणंतो सो महापावो ॥१॥

पदयोग्यस्तु दुर्बलिकापुष्पमित्र एवास्ति, शेषस्तु साधुवर्गो मम मातुलं गोष्ठामाहिलं वाऽनुजं फल्गुरक्षितं वा समीहते । ततश्च सर्वमपि तीर्थमुपवेश्य संबोधयन्ति । तद्यथा–इह किल त्रयो घटाः, तत्रैको वल्लानां, द्वितीयस्तैलस्य, तृतीयस्तु घृतस्य । तेषु चावाङ्मुखेषु कृतेषु वल्लाः सर्वेऽपि निर्गच्छन्ति, तैलं तु किञ्चिद्घटस्य लगति, घृतं तु बहुतरं लगति । तदहं दुर्बलिकापुष्पमित्रं प्रति सूत्रार्थोभयमाश्रित्य वल्लघटकल्पः संजातः, मद्गतसमस्तयोरपि तयोस्तेन गृहीतत्वात् । फल्गुरक्षितं प्रति तैलघटतुल्योऽहं संपन्नः, सर्वयोरपि सूत्रार्थयोस्तेनागृहीतत्वात् । गौष्ठामाहिलं तु प्रति घृतघटकल्पोऽहं, बहुतरयोः सूत्रार्थयोर्मम पार्श्वेऽ–

वस्थानात् । अत आद्य एव भवतां सूरिर्भवतु । तत इच्छाम इति भणित्वा तैः सर्वैरिदं प्रतिपन्नम् । पक्षद्वयस्याप्यनुशास्तिं दत्त्वा सूरयो भक्तं प्रत्याख्याय स्वर्गं गताः ।

तद् गोष्ठामाहिलेन श्रुतम् । ततो मथुरातः समागतेन पृष्टमनेन यथा को गणधरः स्वपदे सूरिभिर्निवेशितः ? तत सर्वैर्वल्लघटादिज्ञातान्युक्तानि । तच्छ्रुत्वाऽतीव दुर्मनाः पृथगुपाश्रये स्थितः सूरिदोषान् जग्राह । साधून् व्युद्ग्राहयति, वक्ति च– किं यूयं निष्पावकुम्भकल्पस्यास्याभ्यर्णे श्रुताम्नायं गृह्णीथः ? अन्यदा सूरिशिष्यो विन्ध्यनामा कर्मप्रवादपूर्वस्य चिन्तनिकां करोति ।

क्षीरनीरन्यायेन वह्नितप्तायोगोलकन्यायेन च जीवप्रदेशैः सह कर्मसंबन्ध इति विन्ध्यसमीपे श्रुत्वा तथाविधकर्मोदयादभिनिवेशेन विप्रतिपन्नोगौष्ठामाहिलः प्राह–ननु सदोषइदं वाक्यं जीवकर्मणोस्तादात्म्यसंबन्धोऽविभागेन जीवप्रदेशवत्, तदा सर्वदैव जीवानां सकर्मकत्वान्मोक्षाभावः, तस्मान्मदीयं वाक्यं युक्तम्–यथा कर्म स्पृष्टं सर्पकञ्चुकवत् स्पर्शनमात्रेणैव संयुक्तम्, अथ बद्धं वह्नयः पिण्डादिन्यायेनालोलीभूतमेव जीवं समन्वेति अनुगच्छति, एवं मोक्षापत्तेः । इति श्रुत्वा जातशङ्को विन्ध्यः सूरिं पप्रच्छ । सूरयः प्रोचुः– प्रागुक्तं तदेव तथ्यम् । यतः–

जीवो हि स्वावगाहाभिर्व्याप्त एवाम्बरे स्थितम् । गृह्णाति कर्मदलिकं जातु न त्वन्यदेशगम् ।।
अथात्माऽन्यप्रदेशस्थं कर्मादायानुवेष्टयेत् । यद्यात्मानं तदा तस्य घटते कञ्चुकोपमा ।।

इति गुरूदितं विन्ध्येन माहिलायोक्तं । तेन नाङ्गीकृतं । गुरुणा स्वयमाभिमुख्येनेत्थं चोदितः । बोधितोऽपि स्वाभिनिवेशं न जहौ । अथैकदा विन्ध्यसाधुर्नवमपूर्वे मुनेः प्रत्याख्यानमेवमवर्णयत्यावज्जीवं सर्वप्रत्याख्यानं त्रिविधत्रिविधेन विधेयं । इति श्रुत्वा माहिलो जजल्प–ननु प्रत्याख्यानं सर्वमपि यावज्जीवादिपरिमाणं विना कार्यं, अवधिसहितं त्वाशंसादिदोषदूषितं भवेत्, यथा पूर्णे प्रत्याख्याने देवलोकादौ सुराङ्गनासंभोगादिभोगानहं सेविष्ये, परिणामेऽशुद्धे प्रत्याख्यानमशुद्धं, ।

आशंसारहितत्वेन तत्सावधिकं प्रत्याख्यानं न दोषाय कायोत्सर्गनिदर्शनेन । एवं युक्तिभिः प्रज्ञापितोऽपि यावदसौ न किमपि श्रद्धत्ते तावत्पुष्पमित्राचार्यैरन्यगच्छगतबहुश्रुतस्थविराणामन्तिके नीतः । ततस्तैरप्युक्तोऽसौ– यादृशं सूरयः प्ररूपयन्ति, आर्यरक्षितसूरिभिरपि तादृशमेव प्ररूपितं, न हीनाधिकम् ।

ततो गौष्ठामाहिलेनोक्तं–किं यूयमृषयो जानीथ ? तीर्थकरैस्तादृशमेवोक्तं यादृशमहं प्ररूपयामि । ततः स्थविरैरुक्तं–मिथ्याभिनिविष्टो मा कार्षीस्तीर्थकराशातनां, न किमपि त्वं जानासि । तेन न स्वीकृतम् । ततः सर्वेण हि सङ्घेन देवताऽऽह्वानार्थं कायोत्सर्गो विहितः । ततो भद्रका काचिद्देवता समागता, सा वदति–आज्ञां ददातु, किं करोमि ? ततः सङ्घः प्रस्तुतमर्थं जानन्नपि सर्वजनप्रत्ययनिमित्तं ब्रवीति–महाविदेहं गच्छ, तीर्थकरं पृच्छ–किं सङ्घो यद्भणति तत्सत्यमुत यद्गोष्ठामाहिलो भणति तत्सत्यम् ? ततस्तया प्रोक्तं–मम महाविदेहे गमनागमनं कुर्वन्त्याः प्रत्यूहविघातार्थमनुग्रहं कृत्वा कायोत्सर्गं कुरुत, येनाहं गच्छामि । सङ्घेन तथैव कृतम् । साऽपि तत्र गत्वा पृष्ट्वा चागता ब्रवीति यदुत तीर्थकरः समादिशति–श्रीवीरमुक्तिप्राप्तेश्चतुरशीत्यधिकपञ्चशतवर्षेष्वतीतेषु सप्तमो निह्नवो भावी, सोऽयं माहिलो मिथ्यावादी । एतच्छ्रुत्वा माहिलो जगौ–नन्वल्पर्द्धिकेयं वराकीनामैतस्या न तत्र गमनशक्तिः इति । एवमपि यावदसौ न किञ्चिन्मन्यते तावत्सङ्घबाह्यः कृतः, अनालोचिताप्रतिक्रान्तश्च कालं गतः ।

उक्तोपदेशं प्रकृते नियोज्य फलितार्थं दर्शयति–

( अनुष्टुब्वृत्तम् )

परदुःखप्रतीकारमेवं ध्यायन्ति ये हृदि ।
लभन्ते निर्विकारं ते सुखमायतिसुन्दरम् ।।७।।[२०९]

व्याख्या– *ये* कृतिनः *परदुःखप्रतीकारं* परेषां दुःखानां निवारणं *हृदि* स्वमनसि *एवं* पूर्वोक्तप्रकारेण *ध्यायन्ति* चिन्तयन्ति *ते* सज्जनमूर्धन्याः *आयतिसुन्दरं* आगामिनि काले कल्याणावहं *निर्विकारं* अविनश्वरं *सुखं* परमानन्दं *लभन्ते* इत्यर्थः ।।७।।

जगडूशाह–जगतसिंह वृत्तं तु इदं–

भद्रेश्वरे माण्डलभूपो राज्यं चक्रे । पत्तने वीसलराजः सेवां करोति । सालगश्रेष्ठिनः श्रीदेवी पत्नी, पुत्रा जगडू–पद्मराज–मल्लाह्वा–बभूवुः ।

एकदा गुरुभिः संवत् १३१५, १३१६, १३१७ वर्षत्रये भवि दुर्भिक्षं ज्ञातम् । ततो भाषासमित्या जगडूसाधुर्ज्ञापितः । ततो जगडूसाधुः ग्रामे ग्रामे पुरे पुरे वणिक्पुत्रान् धान्यमूढकलक्षप्रमाणान् संग्राहयामास । ततस्तस्मिन् दुष्काले समागते ११२ महासत्रागारा मण्डितास्तेषु मनुष्यसह–स्रदशपञ्चाशज्जिमन्ति । राजानः सीदन्तोऽभवन् धान्यं विना, अष्टौ मूढकसहस्राणि वीसलदेवस्य राज्ञः पत्तनस्वामिनो ददौ, द्वादशमूढकसहस्रान् हममीरभूपस्यार्पितवान् । इतो गीजनीसुरत्राणो जगडूसमीपे धान्यं याचितुमागतः तदा जगडूः संमुखं गतः सुरत्राणेनोक्तम्–को जगडूः ? जगडूः प्राह हूं जगडू । ततः सुरत्राणः प्राह–न्यायेन त्वं जगत्पिता यतस्त्वया जगदुद्धृतं धान्यदानात् ततो धान्यं याचितं सुरत्राणेन । जगडूः प्राह गृह्यताम् । ततः कोष्ठगारे रङ्कनिमित्तमित्यक्षराणि वीक्ष्य सुरत्राणः प्राह–अहं पश्चाद्यास्यामि रङ्कनिमित्तधान्यं न ग्रहीष्ये । ततो जगडूः अस्य रङ्कनिमित्तव्यतिरिक्तम् एकविंशतिमूढकमितं धान्यं सुरत्राणाय ददौ ।

अट्ठय मूढसहस्सा वीसलरायस्स बारहम्मीरे । इगवीसा सुरताणे तइं, दिद्धा जगडू दुब्भिक्खे ।।५।।
दानसाल जगडूत्रणी, केती हुई संसारि । नउकरवाली मणी अड तेहिं अग्गला विआरि ।।६।।

सत्रागारे पत्तनपार्श्वस्थे राजा वीसलो गतस्तत्र मनुष्यान् विंशतिसहस्रमितान् जिमतो दृष्ट्वा राजा जगडूसाधुं प्रति प्राह–अन्नं तवात्रास्तु घृतं मम परिवेष्यताम् । तथा कृते घृते निष्ठिते राज्ञा वीसलराज्ञा ( राजेन ) तैलं पर्यवेष्यते ( पर्यवेष्यत ) पुरा जगडूः स्वस्मिन्सत्रागारे घृतं पर्यवेषयति ( त् ) ततोऽन्यदा राजा जगडूपार्श्वात् जी–जी कारयत् । श्रुत्वा चारणः प्राह–

वीसल तूं विरुइ करइ, जगडू कहावइ जी । तुं जमावइ फातेलसुं ( ? ) उअ जमावइ घीइ ।।७।।

ततो जगडूसाधुः १०८ जिनप्रासादान् कारयामास श्रीशत्रुंजये सविस्तरा ( र ) यात्रात्रयं चकार वर्षमध्ये साधर्मिकवात्सल्याष्टकं संघार्चाष्टकं अनेके दीनदुःस्था उद्धारिता धान्यदानात् ।

साधर्मिकवात्सल्यफलं मुक्तिशर्मप्रापकं श्रुत्वा जगसिंहसाधुर्देवगिरौ ३६० प्रमाणाः ( णान् ) स्वतुल्यव्यवहारिणो धनव्यवसायादिसान्निध्यकरणादिभ्यः साधर्मिकांश्चक्रे, ततः प्रतिदिनमेकैकस्मिन् गृहे पक्वान्नादिरसवती निष्पाद्यते । तत्र सकुटुम्बा सर्वे श्राद्धा जिमन्ति स्म । तत्र दिनं प्रति ( प्रतिदिनं ) ७२

सहस्रद्रव्यव्ययो भवति । एवं प्रतिगृहे जिमतः वर्षप्रान्ते द्वितीयवारं वारकः समायाति, ततो धर्मकृत्यं कुर्वाणेन जगत्सिंहसाधुना भरतदण्डवीर्यराजानौ स्मारितौ ।

✻ ✻ ✻

**अथ गेयपद्याष्टकेन करुणाभावनां विभावयन्नाह–**

सुजना भजत मुदा भगवन्तं, सुजना भजत मुदा भगवन्तम् ।
शरणागतजनमिह निष्कारण–करुणावन्तमवन्तं रे, सुज० ।।१।। [२१०]

**व्याख्या– हे *सुजनाः* सुतरां गुणसमृद्धा ये *जनाः* पुरुषास्ते सुजनास्तेषां संबोधनं हे सुपुरुषा ! यूयं *मुदा* सानन्दया भक्तया *भगवन्तं* सर्वदर्शिनं जिनेश्वरं *भजत* सेवध्वं सेवध्वं, किंविशिष्टं ? *इह* सर्वजीवराशौ *निष्कारणकरुणावन्तं निष्कारणं* प्रत्युपकारजनकं पुत्रादिसंबन्धमनपेक्ष्यैव कृपास्वभावादेव पालयन्तं तथा *शरणागतजनं* प्रपन्नशरणमुपदेशार्हभव्यजनसमूहं *अवन्तं* सन्मार्गदर्शनेन दुर्गतिदुःखेभ्यो रक्षां कुर्वन्तं इत्यर्थः ।।१।।**

आवश्यक निर्युक्तौ गोशालकवृत्तान्तं तु इदं–

विहरंश्च तत्काले कूर्मग्रामे आतापयति, तस्य च जटायाः षट्पदिका आदित्यकिरणतापिताः पतन्ति, जीवहिताय पतिता एव शीर्षे क्षिपति, तद्गोशालो दृष्ट्वाऽपसृत्य तत्र गतो भणति–किं भवान् मुनिर्मुणित आहोश्वित् यूकाशय्यातरः ?, अथवा किं स्त्री पुरुषो वा ?, एकशः द्वौ त्रीन्वारान्, तदा वैश्यायनो रुष्टस्तेजो निसृजति, तदा स्वामिना तस्यानुकम्पनार्थाय वैश्यायनस्य चोष्णतेजः प्रतिसंहरणार्थं अत्रान्तरे शीतला तेजोलेश्या निस्सारिता, सा जम्बूद्वीपं भगवतः शीतला तेजोलेश्याऽभ्यन्तरतो वेष्टयति, इतरा तां पर्यश्नति, सा तत्रैव शीतलया विध्यापिता ।

✻ ✻ ✻

क्षणमुपधाय मनः स्थिरतायां, पिबत जिनागमसारम् ।
कापथघटनाविकृतविचारं, त्यजत कृतान्तमसारं रे, सु० ।।२।। [२११]

**व्याख्या– *मनश्चित्तं क्षणं* स्वल्पकालमपि *स्थिरतायां* निश्चलैकाग्रताभावे *उपधाय* निवेश्य संस्थाप्येति यावत्, *जिनागमसारं* जिनसिद्धान्तानां सारं परमार्थज्ञानामृतं *पिबत* समास्वादनं कुरुत । तथा *कापथघटना विकृतविचारं कापथा* मोक्षमार्गे विघ्नकारिणः कुमार्गाः तेषां *घटना* युक्तयो रचना इति यावत्, ताभिः *विकृताः* सर्वथा नित्यत्वानित्यत्वादिभिर्विपरीता *विचारा* वस्तुपर्यालोचनप्रकारा यत्र स तथा तं, *असारं* परमार्थवर्जितं, *कृतान्तं* प्रोक्तरूपं शास्त्रं तत् *त्यजत* परिहरतेत्यर्थः ।।२।।**

ऋषिमण्डलप्रकरणे मदनरेखाकथा–

अस्तीह भ(भा)रते वर्षेऽवन्तीजनपदेऽद्भुतम् । पुरं सुदर्शनाभिख्यं, निर्जितस्वःपुरं श्रिया ।।१।।
राजा मणिरथस्तत्र, युवराड् युगबाहुकः । प्रिया मदनरेखाऽस्य, रूपलावण्यदीर्घिका ।।२।।
तस्याश्चन्द्रयशाः सूनुरनूनगुणसेवधिः । राजा मदनरेखायां, रागादिदमचिन्तयत् ।।३।।
चेद् रेमे नैतया सार्धं, तदा मे निष्फलं जनुः । ततस्तदर्थमेतस्यै, प्रैषीत् पुष्पफलादिकम् ।।४।।

ज्येष्ठप्रसाद इति सा, निर्विकारा तदाददे । अन्येद्युर्मदनरेखां, रहो मणिरथोऽवदत् ।।५।।
भद्रे ! मां पुरुषत्वेन, प्रपद्य स्वामिनी भव । मद्राज्यस्येति साऽवोचत्, पुंस्त्वमस्त्येव पार्थिव ! ।।६।।
स्वकर्मणैव षण्डस्त्रीभावशून्यस्य ते पुनः । स्वामित्वं युवराट्पत्न्याः, कः क्षमो हर्त्तुमत्र मे ? ।।७।।
अन्यच्च मृत्युमिच्छन्ति, सन्तोऽकृत्यं न कुर्वते । तत् त्यज त्वं महाराजाकार्यं भजस्व सत्पथम् ।।८।।
तत् श्रुत्वा चिन्तितं तेन, पाप्मना मामियं ध्रुवम् । नेच्छति भ्रातरि सति, हन्मि तं स्यात् ततो मतम् ।।९।।
अन्येद्युर्मदनरेखा, स्वप्ने दृष्ट्वा निशाकरम् । भर्त्तुराख्यच्च सोऽप्याह, प्रिये ! भाव्यद्भुतः सुतः ।।१०।।
तदैवाऽऽविरभूद् गर्भस्तृतीये मासि चाभवत् । जिनार्चा–मुनिदानादौ, दोहदोऽस्याः सुकर्मजः ।।११।।
सम्पूर्णदोहदा गर्भं, दधाना सा सती सुखम् । अनैषीत् समयं पत्युः, प्रेमानुस्यूतमानसा ।।१२।।
वसन्तेऽन्येद्युरुद्याने, जगाम युगबाहुराट् । व्यग्रत्वाद् भक्तपानाद्यैस्तस्यास्तमगमद् रविः ।।१३।।
काष्ठासु प्रसृतं ध्वान्तं, युगबाहू रति(त)श्रमात् । सुप्तो रम्भागृहे सार्द्धं, प्रियामदनरेखया ।।१४।।
अथो मणिरथो दुष्टश्चिन्तयामास चेतसि । अद्याऽऽस्ते शोभनोपायो, युगबाहुविशाशने ।।१५।।
एकं स बहिरुद्याने, स्थितोऽन्यत् चाल्पसेवकः । तृतीयं रजनी(निर्)ध्वान्तं, चतुर्थं हन्मि तेन तम् ।।
चिन्तयित्वेत्युपादाय, मण्डलाग्रं स उग्रधीः । उद्यानेऽगमदेकाकी, दृष्टः पृष्टोऽङ्गरक्षकैः ।।१७।।
विश्वस्तं घातयत्येनं, माऽनुजं मेऽपरः परः । इत्यागतः पुरान्तस्तं, लात्वा यास्यामि साम्प्रतम् ।।१८।।
दम्भाद् रम्भागृहं सोऽगाद्, युगबाहुः ससम्भ्रमम् । उत्थाय प्रणमन्नुक्तस्तेन यावः पुरान्तरे ।।१९।।
जनापवादमुत्सृज्याविचार्यानार्यकार्यताम् । स पुरान्तर्गमव्यग्रस्तेन स्कन्धे हतोऽसिना ।।२०।।
तद्व्यथार्त्तः पपातोर्व्यां, सोऽथो मदनरेखया । पूच्चक्रेऽभ्येयुराकृष्टखड्गास्तस्याङ्गरक्षकाः ।।२१।।
प्रमादात् मत्कराद् भद्रे !, पपातासिर्भिया सृतम् । ज्ञात्वा तच्चेष्टितं भृत्यैर्नीतो मणिरथः पुरेः ।।२२।।
तैश्चन्द्रयशसः प्रोक्तं, क्रन्दन्नुच्चैः स आगमत् । वैद्यानादाय तैश्चक्रे, व्रणकर्मार्तितः परम् ।।२३।।
नेत्रे निमीलिते रुद्धा, वाग् निश्चेष्टमभूद् वपुः । रुधिरोद्धारतः श्वेता, युगबाहोरभूत् तनुः ।।२४।।
अन्त्यावस्थोचितं ज्ञात्वा, कामरेखा ततः पतिम् । स्थित्वा तत्कर्णयोर्मूलमुवाचैवं मृदुस्वरम् ।।२५।।
राजन् ! कस्योपरि द्वेषं, मा कुर्याः प्रीतिमङ्गिषु । भजस्व चतुःशरणं, निर्वृतिं चेतसो भज ।।२६।।
स्वकृतं दुष्कृतं निन्द, सह व्यसनमागतम् । निमित्तमात्रमत्र स्यात्, परः स्व(स्वं) कर्म भुज्यते ।।२७।।
पाथेयं परलोकस्य, स्मराऽर्हन्तं गुरुं वृषम् । दुष्टान्यष्टादश स्पष्टं, पापस्थानानि वर्जय ।।२८।।
पितृ–मातृ–भ्रातृ–पत्रादिकं सङ्गव्रजं त्यज । स्मर पञ्चनमस्कारं, सारं श्रीजिनशासने ।।२९।।
तत् कृताञ्जलिना सर्वं, प्रपन्नं युगबाहुना । ममार च नमस्कारजापसारः समाधिना ।।३०।।
स देवलोके गतः ।

✻ ✻ ✻

**परिहरणीयो गुरुरविवेकी, भ्रमयति यो मतिमन्दम् ।**
**सुगुरुवचः सकृदपि परिपीतं, प्रथयति परमानन्दम् रे, सु० ।।३।। [२१२]**

**व्याख्या-** *यो* विपरीतधर्मोपदेष्टा *अविवेकी* स्वपरहिताहितसत्यासत्यादीनामविशेषज्ञो *गुरुः* प्रव्रजितोऽप्रव्रजितो वा शास्त्रवक्ता *परिहरणीयः* परिवर्जनीयः, तन्मुखाद्धर्मशास्त्रं न श्रोतव्यम् । कुतो

यतो हेतोः । यो वक्ता *मतिमन्दं मत्या* बुद्धया *मन्दो*ऽशीघ्रग्राही परमार्थवेदनेऽनिपुणस्तं, *भ्रमयति* वस्तुस्वरूपान्यथाप्रतिपादनेनाधर्मेऽपि धर्मधीसंपादनाद् भ्रान्तिं जनयति । ततः स च भ्रान्तश्च द्वावपि भवावर्ते भ्रमतः, तस्मात्परिहरणीयः । *सुगुरुवचः* सद्गुरोरुपदेशस्तु *सकृदपि परिपीतं सकृदे*कदापि परि समस्तश्रवणसामग्र्या *पीतं* कर्णाञ्जलिभिः पानीकृतं *परमानन्दं* मोक्षसुखोल्लासं *प्रथयति* विस्तारयति, येन संसारान्निस्तरतीत्यर्थः ।।३।।

सुगुरुविषये चण्डरुद्राचार्यकथा यथा उत्तराध्ययनसूत्रे –

उज्जयिन्यां पुरि स्नात्रोद्याने नन्दनसन्निभे । चण्डरुद्राभिधः सूरिः सगच्छः समवासरत् ।।१।।
अनाधिकक्रियादोषात् स्वगच्छीयतपस्विनां । दर्शं दर्शं स चाकुप्यत् प्रकृत्याप्यतिरोषणः ।।२।।
भूयसां वारणं ह्येषां, मयैकेनातिदुष्करम् । परं रोषातिरेकान्मे, स्वहितं न हि जायते ।।३।।
ध्यात्वेति सूरिरेकान्, तस्थौ सद्ध्यानहेतवे । तप्तिं विहाय शिष्याणां, स्वाध्यायध्यानतत्परः ।।४।। युग्मम्
इतश्चोज्जयिनीवासी, व्यवहारिसुतो युवा ।। आगात्कुम्कुमलिप्ताङ्गो, नवोढस्तत्र मित्रयुक् ।।५।।
साधून् दृष्ट्वा परीहास–पूर्वकं तान् प्रणम्य च । सोऽवादीद्भगवतो मे, धर्मं ब्रूत सुखाकरम् ।।६।।
वैहासिकोऽयमिति ते, ज्ञात्वा नो किञ्चिदूचिरे । ततो भूयः स निर्ग्रन्थान्, सोपहासमभाषत ।।७।।
दौर्भाग्याद्भार्यया त्यक्तो, विरक्तोऽहं गृहाश्रमात् । तत् प्रसद्य भवाम्भोधि–तारकं दत्त मे व्रतम् ।।८।।
धूर्त्तः प्रतारयत्यस्मा–न्नर्मवाक्यैर्मुहूर्मुहुः । तद्धृष्यतामसौ सम्यक्, चिन्तयित्वेति ते जगुः ।।९।।
गुरोरधीना न वयं, स्वयं दीक्षादि दद्महे । तदाश्रय व्रताय त्व–मस्मद्गुरुमितः स्थितम् ।।१०।।
श्रुत्वेति सवयस्योऽथ, सोऽव्रजत्सूरिसन्निधौ । अब्रवीत्तं च वन्दित्वा, सोपहासं कृताञ्जलिः ।।११।।
गृहव्यापारतो भग्नो, लग्नोऽस्मि त्वत्पदाब्जयोः । तत्प्रवाजय मां स्वामिं–स्तिष्ठामि ससुखं यथा ।।१२।।
सहास्यामिति तद्वाचं, श्रुत्वा कोपातिरेकतः । सूरिर्जगौ व्रतेच्छुश्चे–त्तदा भस्मानय द्रुतम् ।।१३।।
ततस्तत्सुहृदैकेना–नीते भस्मनि साधुराट् । तं गृहीत्वा स्वबाहुभ्यां, लोचं कृत्वा ददौ व्रतम् ।।१४।।
तद्विलोक्य विषण्णास्त–द्वयस्यास्तमथाभ्यधुः । मित्र ! सद्यः पलायस्व, धाम यामो वयं यथा ।।१५।।
आसन्नसिद्धिकः सोऽथ, लघुकर्मेत्यचिन्तयत् । कथं गच्छाम्यहं गेहं, स्ववाचा स्वीकृतव्रतः ।।१६।।
प्रमादसङ्गतेनापि, या वाक् प्रोक्ता मनस्विना । सा कथं दृषदुत्कीर्णा–क्षरालीवाऽन्यथा भवेत् ।।१७।।
नर्मणापि मया लब्धं, रक्षणीयं ततो व्रतम् । जहाति द्युमणिं को हि, विनायासमुपस्थितम् ।।१८।।
ध्यात्वेति भावसाधुत्वं, स सुधीः प्रत्यपद्यत । यथास्थानं ततो जग्मु–स्तद्वयस्या विषादिनः ।।१९।।
विनेयोऽथावदत्सूरिं, भगवन् ! बंधवो मम । श्रामण्यं मोचयिष्यन्ति, तद्यामोऽन्यत्र कुत्रचित् ।।२०।।
गच्छो महानसौ गच्छन्, प्रच्छन्नमपि यज्जनैः । ज्ञायते तद् द्वयोरेवा–ऽऽवयोर्गमनमर्हति ।।२१।।
सूरिः प्रोवाच यद्येवं, तदाऽध्वानं विलोकय । यथा रजन्यां गच्छामः, सोऽप्यालोक्य तमाययौ ।।२२।।
प्रतस्थेऽथ निशीथिन्यां, सूरिर्नूतनशिष्ययुक् । पुरो याहीति गुरुणा, चोक्तः शिष्यो ययौ पुरः ।।२३।।
अपश्यन्निशि वृद्धत्वात्, स्थाणुना स्खलितो गुरुः । वेदनाविह्वलो जज्ञे, ज्वलद्रोषभराकुलः ।।२४।।
हा दुष्टशिष्य ! सन्मार्गो, न व्यलोकीति विब्रुवन् ! दण्डेन शिष्यं शिरसि, कृतलोचे जघान सः ।।२५।।

तत्प्रहारस्फुटन्मौलि–निर्गच्छद्रुधिरोऽपि सः । न व्यब्रवीन्नाप्यकुप्यत्, प्रत्युतैवमचिन्तयत् ।।२६।।
स्वगच्छमध्ये ससुखं, तिष्ठन्तोऽमी महाशयाः । अधन्येन मया दुःख–भाजनं विहिता हहा ! ।।२७।।
आजन्मसौख्यदाः शिष्या, गुरोः स्युः केऽपि धीधनाः । आद्य एव दिनेऽहं तु, जातोऽसातकरो गुरोः ।।२८।।
स्थाण्वादिना गुरोः पीडा, माभूद्भूयोऽपि भूयसी । ध्यायन्निति प्रयत्नेन, स चचाल शनैः शनैः ।।२९।।
तस्यैवं व्रजतः शुद्धा–शयस्य समतानिधेः । महात्मनः समुत्पेदे, निशायामेव केवलम् ।।३०।।
अथ प्रभाते संजाते–ऽभ्युदिते च दिवाकरे । सूरिणा ददृशे शिष्यो, रुधिरालिप्तमस्तकः ।।३१।।
ततः शान्तरसाचान्त–स्वान्तः सूरिरचिन्तयत् । अहो ! नवीनशिष्यस्या–ऽप्यमुष्य क्षान्तिरुत्तमा ।।३२।।
क्रोधध्मातेन मयका दण्डेनैवं हतोऽपि यह । नातनोद्वाङ्मनोदेहै वैगुण्यं किञ्चिदपप्यसौ ।।३३।।
विरप्रव्रजिस्यापि रोषदोषांश्च जानतः । प्राप्ताचार्यपदस्यापि धिग्मे प्रबलकोपतां ।।३४।।
इयच्चिरं सुदुष्पालं पालितं मयकाव्रतं । परं तन्निष्फलं जज्ञे कोपात्तन्मे ऽमुनाकृतं ।।३५।।
भवनाभिरिति भाविनचित्तः सोऽपि केवलमवाप मुनीन्द्रः ।
एवमुत्कटरुषोऽपि मुटो ष्र्यु मौक्षिदाः सविनयाः सुविनेयाः ।।३६।।

कुगुरूपरि कथारत्नाकरोक्ताकुशलद्विजकथा –

सुरसरित्समीपवर्तिनि नन्दीसरग्रामे लोकव्यवहाराऽकुशलः कुशलाभिधः पाठको द्विजः, अन्यदा तेन स्वयमुप्तयवक्षेत्रे स्वर्गादुत्तीर्य यवांश्चरन्ती सुरगवी निशि ददृशे । अथैकस्मिन्नह्नि दिवं व्रजन्त्यास्तस्याः पुच्छं पाणिभ्यां दृढमवलम्ब्य स दिवं गतः । तत्र च वासवमुख्यान् देवान्, पौलोमीप्रमुखा अप्सरसः, पारिजातप्रभृतीन् कल्पभूरुहान्, नन्दमुद्यानं, नन्दीसरसरः, उच्चैः श्रवसं हयम्, ऐरावणं दन्तिनं, सुधर्मा सभां, सुधाभोज्यं, भूरीणि मणिस्वर्णमण्डितानि च विमानानीति सर्वां यथाशास्त्रं स्वर्लोकसमृद्धिं समीक्ष्य स विस्मयमाप ।

अहो ! धन्याऽसौ गौर्ययाऽहं जीवन् दिवमानीतः, इत्यात्मानं धन्यं मन्यमानमेनं द्विजन्मान–मागतमालोक्य सर्वोऽपि स्वर्लोकलोकः कौतुकेन वस्त्रालङ्कारसत्कारेण बहुमन्यते स्म । अथ मनुष्यलोकमागन्तुमनसोऽस्य देवलोकागमनाऽभिज्ञानार्थं पौलोम्या पीयूषमोदका दत्ताः । तदानीं तान् मोदकानास्वाद्य देवलोकदिदृक्षुस्तन्मोदकस्वादलुब्धश्च तत्परिवारस्तत्र गमनोपायमप्राक्षीत् । तेन कथितं – आदावहं गोपुच्छं पाणिभ्यां गाढं गृह्णामि, ततो मत्पादावन्यः, तत्पादौ चाऽपरः एवं सुखेन स्वर्लोकं यास्याम इति मूर्खमुख्यस्याऽस्य धिया दिवं गच्छद्भिस्तत्परिजनैः कियन्मिता मोदका [ इति ] स पृष्टः, निरक्षरशेखरेण तेनापि सुरगवीपुच्छं हित्वा स्वौ बाहू च वितत्य मोदकप्रमाणे दर्शिते सर्वेऽप्युपर्युपरि पतिता मृताश्च । इति कुगुरुपार्श्वे न गन्तव्यम् ।

❋ ❋ ❋

**कुमततमोभरमीलितनयनं, किमु पृच्छत पन्थानम् ।**
**दधिबुद्ध्या नर जलमन्थन्यां किमु निदधत मन्थानम् रे, सु० ।।४।। [२१३]**

**व्याख्या– भो भव्याः *कुमततमोभरमीलितनयनं कुत्सितं* मिथ्यात्वाज्ञानहिंसादिभिर्दूषितत्वादसारभूतं *मत*मभिप्रेतदर्शनं शास्त्रज्ञानं च यत्त*त्कुमतं* तदेव तद्रूपं वा य*स्तमोभरो*ऽन्धकारराशिस्तेन *मीलिते* पटलद्वयसंपुटीकृते वर्तेते *नयने* नेत्रे यस्य गुरोः स तथाभूतस्तं, *पन्थानं* मोक्षमार्गं *किमु पृच्छत* किमु**

**कया विचारणया संभावनया वा *पृच्छत* अस्यादर्शनस्य मुखान्मोक्षमार्गं ज्ञातुमिच्छत । हे *नर* ! हे विद्वज्जन ! *जलमन्थन्यां* जलभृतायां *मन्थन्यां* मथनिकायां विशालमुखोदरायां बृहत्कुम्भ्यां गोलीती लोके, *किमु* वितर्के वितर्कयत यूयं किं *दधिबुद्ध्या* एतद्दधीति धिया विलोडनाय *मन्थानं* तुन्दं रवैयमिति लोके *निदधत* निक्षिपत इत्यर्थः ।।४।।**

मरिचिशिष्यकपिलवृत्तं यथा दानादिकुलके –

मरीचिः श्रीऋषभदेवनिर्वाणादूर्द्ध्वं साधुभिः सार्ध विहरन् भव्यान् प्रबोध्य साधुसन्निधौ प्राहिणोत् । सोऽन्यदा व्याधिग्रस्तोऽसंयमीति कृत्वान्यसाधुभिरपाल्यमानो मनस्येवमचिन्तयत्, अहोऽमी साधवो निर्दाक्षिण्याः कृपोज्झिताः परमार्थपराङ्मुखा विनीतमपि मां नेक्षन्ते, तर्हि मम पालनं दूरेऽस्तु, अतः कश्चिच्छिष्यं करोमि, यो मम परिचारको भवति । एवं ध्यायन् विधिवशात्स स्वस्थो जातः, तस्य कपिलनामा कश्चित्कुलपुत्रको मिलितः, तं च धर्मार्थिनं ज्ञात्वा मरीचिरार्हतं धर्ममकथयत । तेनोक्तं त्वमेवंविधं किं धर्मं न करोषि ? मरीचिनोक्तमहं धर्मं कर्तुं न समर्थः, कपिलेनोक्तं त्वन्मार्गे किं धर्मो न विद्यते ? तं जिनधर्मालसं ज्ञात्वा स्वशिष्यमिच्छन्निति जगौ, जिनमार्गे यथा धर्मोऽस्ति तथा मम मार्गेऽपि धर्मो विद्यते, इत्याकर्ण्य स मरीचिशिष्यो जातः ।

अनेन दुर्भाषितेन मरीचिः सागरकोटाकोटिमितं संसारमार्जयत् । तच्छिष्यः कपिलो मिथ्याधर्मो–पदेशकोऽभवत् । एवं मरीचिः संसारं समुपार्ज्य विहितानशनस्तदनालोच्य मृतस्तुर्यभवे ब्रह्मलोके दशसागरायुः सुरोऽभवत् कपिलोऽपि सूर्यादिशिष्यान् स्वकीयमाचारमुपदिश्य मृत्वा ब्रह्मलोके देवोऽभवत्, स कपिलदेवोऽ–वधिज्ञानेन ज्ञात्वा भूतलेऽभ्येत्य शिष्यमोहात्स्वयं कृतं साङ्ख्यमतं सूर्यादिशिष्यानबोधयत्, तद्दिनादारभ्यास्मिन् लोके साङ्ख्यमतं प्रवृत्तम् ।

✻ ✻ ✻

अनिरुद्धं मन एव जनानां जनयति विविधातङ्कम् ।
सपदि सुखानि तदेव विधत्ते आत्मारामामशङ्कम् रे, सु० ।।५।। [२१४]

**व्याख्या– हे चेतन ! त्वमाश्रवप्रवृत्तं मानसं रोधय । किमर्थमित्याहयतो *जनानां* प्राणिनां, *अनिरुद्धं* पञ्चविषयप्रवृत्तेरनिषिद्धं *मन*श्चित्तमेव न त्वन्यत् *विविधातङ्कं विविध*मनेकभेदभिन्नं *आतङ्कं* रोगसन्तापसन्देहभयादिकं *जनय*त्युत्पादयति। *तदेव* मन एव यदि *आत्मारामं* चेतनस्वरूपमेवारामं रमणवाटीकां *भजे*त्तदा *अशङ्कं* सन्देहरहितं यथा स्यात्तथा *सपदि* भवनसमकालमेव *सुखानि* सर्वशर्माणि *विधत्ते* कुर्यादित्यर्थः ।।५।।**

प्रसन्नचन्द्रर्षिकथा वाच्या एतद्विषये यथा दानादिकुलके –

अन्यदा भगवान् श्रीमहावीरः राजगृहे ययौ, स्वामिनं समागतं श्रुत्वा राजगृहेश्वरो राजा श्रेणिकस्तत्प्रणामायाचलत्, मार्गे तपःकृशं रविदृशमेकेन पादेन भूस्पृशमेवंविधं प्रसन्नचन्द्रराजर्षिं वीक्ष्य श्रेणिको राडेवं कथयत्यहोऽयं महर्षेर्महति ध्याने उत्कर्षो वर्तते यः शैलवन्निश्चलः स्थितोऽस्ति । एवं मार्गे ध्यायन् नृपः

स्वामिनं नत्वा पप्रच्छ स्वामिन् ! मार्गेमया ध्यानस्थितो महामुनिर्वन्दितः, यद्येष महामुनिस्तस्मिन् समये विपद्येत तर्हि कुत्रोत्पद्यते ? स्वामिनोक्तं सप्तमीं भुवं, राजा दध्यौ साधोः क्वेदृग्गतिः ? परं मया सम्यग्नश्रुतं, क्षणान्तरे पुनः पृष्टं प्रभोऽधुना स साधुर्यदि म्रियेत तदा कां गतिं साधयेत् ? भगवतोक्तं सर्वार्थसिद्धिं, तत् श्रुत्वा नृपो जगौ हे भगवान् ! पूर्वापरवाक्ययोः कथं विरोधः ? भगवानाह राजन् श्रूयताम् ? सदसद्गतिकारणं शुभाशुभध्यानविशेष एव न पुनर्कायक्लेशादिक्रिया, राज्ञोक्तं तत्कथम् ? स्वाम्याह त्वदनीकस्य मुखे सुमुखदुर्मुखनामानौ द्वौ नरावीयतुः, द्वावपि मिथ्यादृशौ स्वैरवादिनौ तथास्थं तं मुनिं वीक्ष्यसुमुखो दुर्मुखं प्रत्युवाचास्य मुनेः स्वर्गापवर्गौ हस्तगौ वर्तेते, य एवंविधे शुक्लध्याने समारूढो वर्तते । ततस्तं प्रति दुर्मुखो बभाषे भो मित्रैतस्य कथामपि वृथा मा कृथाः, अस्य मुनेर्मुखावलोकनेन महत्पापं जायते, यतोऽसौ भूरक्षां दूरीकृत्य पृथिवीभारं त्यक्त्वा केशभारमपि च त्यक्त्वा बालसुते पृथ्वीभारं समारोप्य स्वयं दीक्षामादाय वनमाश्रितः कायोत्सर्गेण स्थितो राज्यभारत्रस्तो रजोहरणं समाश्रितः, यतः–

राज्यादिदानीं चम्पेश–दधिवाहनसंहतैः । सूनुः सोऽस्य च निर्घृणैः सचिवैर्मारयिष्यते ॥
इत्थं मिथ्यात्वदावाग्नि–शिखाभिर्दुर्मुखोक्तिभिः । दग्धध्यानतरुर्दध्यौ स महर्षिरमर्षतः ॥

अहो मया ये महामात्या आबाल्यादपि पालितास्ते मन्त्रीश्वरा मम पुत्रराज्यं परावर्तयिष्यन्ति, साम्प्रतं यदि तत्राहं भवेयं तदा सर्वान् मम शत्रून् निहन्मि, इत्यादिमलिनध्याने जातव्रतविस्मृतिर्मनस्येव योद्धुं प्रवृत्तः, तस्मिन् समये त्वया पृष्टमतो मयोक्तं सप्तमनरकपृथ्वीयोग्यः, ततस्त्वयि गतेऽस्य मनसा सङ्ग्राम कुर्वतः सर्वाणि शस्त्राणि क्षीणानि, तदा प्रसन्नचन्द्रराजर्षिणा शिरस्त्राणेनैव शत्रुं हन्मीति धिया शिरसि करो व्यापृतः, तदा लोचितं स्वमस्तकं ज्ञात्वा स्मृतव्रतः स प्रतिबुद्धस्तदानीं पुनरायातसंवेगो दध्यावहो ! मया क्रोधपरवशेन धर्मध्यानावसरे आर्तरौद्रध्यानयोगादात्मा मलिनीकृतः, एवं मनस्येवालोचितप्रतिक्रान्तो मनसैव बद्धानि पापानि मनसैव क्षिप्त्वा सर्वार्थसिद्धियोग्यो बभूव, तावत्त्वया पृष्टमतो मयोक्तं सर्वार्थ–सिद्धियोग्य इति । एवं स्वामी यावत्कथयति तावदाकाशे दिव्यो देवदुन्दभिध्वनिरभूत्, पुनः श्रेणिकेन राज्ञा पृष्टं हे भगवन् ! किमेष देवदुन्दुभिनादो भवति ? प्रभुरभाषत–शुद्धेन ध्यानेन प्रसन्नचन्द्रो राजर्षिः केवली जातः देवास्तस्य केवलिमहिमानं कुर्वन्ति, तत्र समुद्भूतोऽयं दुन्दुभिध्वनिर्निशम्यते । एवं भगवद्वाक्यमाकर्ण्य श्रेणिको दध्यौ धन्य एष प्रसन्नचन्द्रमहामुनिर्यः क्षणेनाशुभध्यानयोगेन सप्तमपृथिव्यायोग्यं कर्म समुपार्ज्य पुनः शुभभावनया तत्क्षपित्वा सर्वार्थसिद्धियोग्यं कर्म समुपार्जयत् ततः सकलकर्मक्षयं कृत्वा केवलज्ञानमवाप ।

इति "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" सत्यसिद्धजातम् ।

❋ ❋ ❋

**परिहरताऽऽश्रवविकथागौरवमदनमनादिवयस्यम् ।**
**क्रियतां सांवरसाप्तपदीनं, ध्रुवमिदमेव रहस्यं रे, सु० ॥६॥ [२१५]**

**व्याख्या–** भो भव्याः *अनादिवयस्यं* अनादिमित्रं सहचारि, *आश्रवविकथागौरवमदनं आश्रवाः* प्रोक्तरूपाः, *विकथा* देशकथादिकोक्तरूपाः, *गौरवम्* समृद्ध्यादिबहुमानरूपं, *मदनः* कामः, समाहारद्वन्द्वे

**कृते तत् *परिहरत* वर्जयत तथा *सांवरसाप्तपदीनं संवरो* मनइन्द्रियकषाययोगानां निरोधस्तस्येदं *सांवरं* एव *साप्तपदीनं* मित्रं *क्रियतां* विधीयतां, *ध्रुवं* निश्चितम् । *इदं* प्रोक्तरूप*मेव रहस्यं,* धर्मस्य जन्मनः शास्त्रस्य च सारमित्यर्थः ॥६॥**

हरिकेशीबलकथा दृश्या –

गङ्गातीरे स्मशानस्वामी बलकोट्टो नाम श्वपाकोऽभूत्तस्य द्वे भार्ये गौरी गान्धारी च । तत्र स गौर्याः कुक्षौ समेतः प्राग्भवजातिमदात्कालो विरूपश्च जातः, सोऽन्त्यजानामपि हसनीयो बलनामा भण्डनकुशलो विषतरुरिव द्वेष्यो बहूनामुद्वेगकृदवर्धत । अन्यदा बन्धूनां गोष्ठीपराणां मध्ये डिम्भैः सह भण्डचेष्टादिभिः कलहायमानस्तैर्बहिष्कृतः पार्श्वेऽस्थात् । तावत्तत्राहिर्निःसृतः, तैः सहसोत्थाय सविष इति हतः । क्षणेन दीपकसर्पो निःसृतः, ततस्तैः स निर्विष इति कृत्वा मुक्तः । बलेन तद्वीक्ष्याचिन्ति–''यद्विषभृदहिर्हन्यते दीपकोऽहिर्मुच्यते तर्हि सर्वः कोऽपि स्वदोषैरेव क्लेशभागिति भद्रकैरेव भाव्यम्'' इति ध्यायन् जातजातिस्मृतिः स्वविमानवासं दृष्टं च जातिमदं भावयन् संविग्नः साधुपादमूले धर्मं श्रुत्वा सम्बुद्धः, प्रव्रज्य विहरन् तिन्दुकोद्याने यक्षालये प्रतिमास्थस्तस्थौ । यक्षस्तस्य भक्तो जातः ।

एकदा तत्र चैत्ये कौशलिकराजस्य दुहिता भद्राख्या बह्वीभिः सखीभिर्वृताऽऽगता । यक्षं नत्वा सर्वाः क्रीडार्थं प्रवृत्ताः । वरालिङ्गनमिषेण स्तम्भान् जगृहुः । तत्र सहसा कायोत्सर्गस्थं मुनिमेव स्तम्भं ज्ञात्वा तमालिङ्ग्य राजदुहित्रोक्तम्–''मयाऽयं वरो वृतः'' । क्षणेन कालं विकरालं मुनिं दृष्ट्वा पूच्चक्रे थूथूकारं चकार । तेन रुष्टो यक्षस्तां वक्रमुखीं ग्रथिलाङ्गं परवशां चक्रे । राजादिपरिवारेण यक्षाय प्रार्थनाकृतान्तरः प्राह–''यदीयं स्त्री मुनिं पतित्वेन स्वीकरोति तदा मुञ्चामि'' । सा जीवत्वसाविति तस्मै दत्ता । सा स्वजनैरनुज्ञाता यक्षालये स्थिता साधोरनुकूलमुपसर्गं चकार । मुनिस्तु नैच्छत् । साऽपसृता । यक्षेण सर्वा रात्रिं विडम्बिता, पुनः पुनर्मुनिरूपं यक्षरूपं च दर्शयित्वा विप्रतारिता । प्रातः साधुर्नेच्छतीति यक्षोक्त्या ज्ञात्वा सा खिन्नमनाः पितृगृहं ययौ । पुरोहितेन दृष्ट्वा राज्ञे प्रोक्तम्–''इयमृषिपत्नी द्विजेभ्यः कल्पते । राज्ञा सा तस्मै दत्ता । स पत्नीं कृत्वा सप्रियो यज्ञमारेभे । अथ हरिकेशाख्यश्वपाककुलजो बलो नाम जितेन्द्रियो भिक्षार्थमेकदा द्विजानां यज्ञपाटके प्राप्तः । तं तपस्विनमायान्तं वीक्ष्य द्विजा म्लेच्छा इव तमुपहसन्ति–''को रे त्वं बीभत्सरूपो द्रष्टुमनर्हः कया वाञ्छयाऽत्रागतोऽसि ? अपसरास्मद्दृष्टेः'' इत्याकर्ण्य रुष्टो यक्षो मुनिदेहेऽवतीर्य प्राह–''श्रमणोऽहं परार्थनिष्पन्नस्यैवान्नस्यार्थे इहागतोऽस्मि, प्रभूतमन्नं निष्पन्नमस्ति, तन्मध्याच्छेषावशेषमुद्धरितं मह्यं साधवे दीयताम्'' ।

एवं यक्षेणोक्ते याज्ञिकाः प्राहुः–इदं सिद्धभोजनं द्विजानां देयं न तुभ्यं शूद्राय दास्यामः । जगत्सु द्विजसदृशं पुण्यक्षेत्रं नास्ति, तत्रोप्तं बीजं महाफलं स्यात्'' । यक्षः प्राह–यूयं यज्ञे हिंसका आरम्भरक्ता अजितेन्द्रिया अतः पापक्षेत्रं, न महाव्रतितुल्यं सुपेशलं धर्मक्षेत्रं विश्वे'' । इत्थमध्यापकं यक्षेण निर्मुखीकृतं ज्ञात्वा तच्छात्राः प्राहुः–''अस्मदुपाध्यायानां प्रत्यनीकोऽसि त्वम् अतो नैव तुभ्यं दास्यामः, अन्यथा तु कदाऽपि अनुकम्पया किञ्चिदन्तप्रान्तादि दद्मः'' । यक्ष आह–

समिईहि मज्झं सुसमाहियस्स, गुत्तीहि गुत्तस्स जिइंदियस्स ।
जइ मे न दाहित्थ अहेसणिज्जं, किमज्ज जन्नाण लभित्थ लाभं ॥

मह्यं यदि न दास्यथैषणीयं किञ्चित्तर्हि हे आर्या यज्ञानां लाभं न लप्स्यध्वे । इति श्रुत्वाऽध्यापकाश्छात्रान् प्राहुः–"यष्टिमुष्ट्यादिभिस्ताडयित्वा निष्कासयत" । ततस्ते वेगेन धाविता मुनिं घ्नन्ति दण्डाद्यैः । तदा भद्रया निषिद्धाः–"भोः कुमारा नायं कदर्थनार्हो मुनिः । यतः–

देवाभिओगेण निओइएणं, दिन्ना मु रन्ना मणसा न झाया ।
नरिंददेविंदभिवंदिएणं, जेणामि वंता इसिणा स एसो ।।

देवाज्ञया राज्ञा दत्ताऽपि येनास्म्यहं त्यक्ता स एष ऋषिर्ज्ञेयः । यतः–

महायसो एस महाणुभागो, घोरपरक्कमो अ ।
मा एयं हीलह अहीलणिज्जं, मा सव्वे तेएण भे निद्दहिज्जा ।।

मा एनं यतिं निन्दत । अयं हि रुष्टो मा सर्वांस्तेजसा तपसा भे भवतो निर्धाक्षीत् भस्मसात्करोतु" इति श्रुत्वा यक्षे दध्यौ–"एतदुक्तं मृषा मा भूत् इति तान्निवारयामि । यतः–

एयाइं तीसे वयणाइं सोच्चा, पत्तीइ भद्दाइ सुभासियाइं ।
इसिस्स वेयावडियट्ठयाए, जक्खा कुमारे विणिवारयंति ।।

ततो यक्षो रुष्टोऽन्तरिक्षेऽनन्तरूपैः कृत्वा तानुपसर्गकारकान् विदन् रुधिरं वमतश्चकार । भूयो भद्रेदमाह–"हे छात्राः ! यथा गिरिं नखैः खनथ, अयोलोहं दन्तैः खादथ, जातवेदसं पादैर्हथ, ये यूयं भिक्षुमवगणयथ, तन्मूर्खकृत्यं नार्हम् । अथ यूयं जीवितं धनं वा यदीच्छथ तदा शिरः प्रणामपूर्वं शरणं प्रपद्यध्वम्" । अथ स यज्ञाचार्यः सोमदेवः सभार्य ऊर्ध्वमुखान्निर्गतजिह्वानेत्राँश्छात्रान् काष्ठोपमान् वीक्ष्य तमृषिं प्रसादयति–"हे भगवन् ! अस्मदपराधं क्षमस्व । यतः–

बालेहि मूढेहि अयाणएहिं, जं हीलिया तस्स खमामि भंते ।
महप्पसाया इसिणो भवंति, न हु मुणी कोहपरा भवंति ।।

अथ मुनिराह–

पुव्विं च इण्हिं च अणागयं च, मणप्पदोसो न मे अत्थि कोइ ।
जक्खा हु वेयावडियं करंति, तम्हा हु एए निहया कुमारा ।।

पुरा इदानीमस्मिन् कालेऽनागते चाल्पोऽपि मनः प्रद्वेषो मम नास्ति नासीत् न भविष्यति च, यस्माद्यक्षो वैयावृत्त्यं करोति तस्माद्येनैते कुमारा नितरां हताः" । ततोऽध्यापकः प्राह–"हे पूज्य ! यूयं धर्मज्ञा न क्रोधपराः स्यात्, परं वयं युष्माकमेव पादौ शरणं समागताः स्मः । इदं प्रभूतमन्नं शाल्यादिकं भुङ्क्ष्व । भुङ्क्त्वाऽस्माकमनुग्रहं कुरु" । तदा मुनिर्मासक्षपणपारणे शुद्धं भक्तपानं जग्राह । तदा सुरेण सर्वे कुमाराः सज्जीकृताः पञ्च दिव्यानि च कृतानि । तदा तेऽपि द्विजा हृष्टाः प्राहुः–"हे पूज्य ! वयं बाह्यस्नानादिधर्मस्पृहा युष्माभिरङ्गीकृतयागादितत्त्वं न जानीमः । यतः–

के ते जोई के व ते जोइठाणा, का ते सूया किं च ते कारिसंगं ।
का ते एहा कयरा ते संति भिक्खू, कयरेण होमेण हुणासि जोइं ।।

हे पूज्य ! ते तव यजनविधौ किं ज्योतिरग्निः ? किं ते तव ज्योतिःस्थानम् ? यत्र ज्योतिर्विधीयते ? काः ते श्रुचो घृतादिप्रक्षेपिका दर्व्यः ? किं ते कारीषाङ्गम् अग्न्युद्दीपनकारणं येनासौ सन्धुक्ष्यते ? काश्च समिधो याभिरग्निः प्रज्वाल्यते ? कतरा का शान्तिश्च दुरितोपशमहेतुरध्ययनपद्धतिः ? कतरेण कस्य

सम्बन्धिना होमेन हवनविधिना जुहोषि आहुतिभिः प्रीणयसि ज्योतिरग्निम् ?'' । मुनिराह–

''तवो जोई जीवो जोइठाणं, जोगा सुया सरीरं कारिसंगं ।
कम्मेहा संजमजोगा संती, होमं हुणामि इसिणं पसत्थं ।।

तप आहारमूर्छात्यागो ज्योतिरग्निः, कर्मेन्धनदाहकत्वात् । जीवो ज्योतिस्थानं, ज्योतिषस्तदाश्रयत्वात् । योगा मनोवाक्कायाः शुचस्ते शुभव्यापाराः स्नेहस्थानीयाः । शरीरं करीषाङ्गं, कर्म एधाः, संयमयोगाः शान्ति, इत्यादिहोमेन जुहोमीति'' ।

अथ स्नानस्वरूपं पृच्छति–''कस्ते ह्रदः ? किं च ते शान्त्यै पापोपशमाय ? किमिदं तीर्थं पुण्यक्षेत्रं शान्तितीर्थम् ? अथवा किंरूपाणि ते सन्ति तीर्थानि संसाराब्धितारणानि ? कस्मिन् वा स्नातः शुचीभूतो रजः कर्म जहासि त्वम् ? तत्किमस्माकमिव तवापि ह्रदतीर्थं शुद्धिस्थानमन्यद्वेति न विद्मः । हे यक्षपूजित ! आचक्ष्व, वयं भवतः सकाशे ज्ञातुमिच्छामः'' । मुनिराह–

धम्मे हरए बंभे संतितित्थे, अणाविले अत्तपसन्नलेसे ।
जहिं सिण्हाओ विमलो विसुद्धो, सुसीइभूओ पजहामि दोसं ।।

इत्यादिशुभवाक्यैः प्रबुद्धा द्विजा जैनधर्मं प्रापुः । मुनिरप्यन्यत्र विहरन् कर्मक्षयेण परमपदं प्रापेति ।

**सह्यत इह किं भवकान्तारे गदनिकुरम्बमपारम् ।**
**अनुसरताहितजगदुपकारं, जिनपतिमगदङ्कारं रे, सु० ।।७।। [२१६]**

**व्याख्या- भो भद्रा ! यूयं इह दृश्यमानेऽनेकदुःखपूर्णे *भवकान्तारे* संसाररूपमहारण्ये, *अपार*मनन्तं *गदनिकुरम्बं* रोगसमूहः *किमि*ति कथं ? *सह्यते* तत्पीडां सहमाना दुःखिनः किं तिष्ठथ ? *आहितजगदुपकारं आहितः* संपादितः *जगतो* भुवनस्योपकारः द्रव्यभावरोगहरणरूपः येन स तं, *जिनपतिं* जिनेश्वरं, *अगदङ्कारं* आरोग्यकारिणं *अनुसरत* समाश्रयध्वमित्यर्थः ।।७।।**

गौतमहालिकवृत्तं त्रिषष्ठीशलाकापुरूषचरित्रे –

इतश्च यः सुदंष्ट्राहिकुमारो नौजुषः प्रभोः । उपसर्गानकृत स क्वचिद् ग्रामेऽभवद्धली ।।
स कृष्याजीवकोऽन्येद्युः सीरेण क्रष्टुमुर्वराम् । यावत्प्रवृत्तस्तावत्तं श्रीवीरो ग्राममाययौ ।।
स्वामिना तस्य बोधाय प्रेषितो गौतमोऽवदत् । किमिदं क्रियते ? दैवनियुक्तमिति सोऽब्रवीत् ।।
भूयोऽपि गौतमोऽवोचत् क्षुद्रजीविकयाऽनया । जीवतस्तव किं सौख्यं किं वा सुचरितं भवेत् ! ।।
न केवलमिहैवेदं कष्टकृद्भद्र ! कर्म ते । प्राणातिपातभूयिष्ठं कष्टायान्यभवेष्वपि ।।
कर्मणोऽमुष्य कष्टस्य कष्टं लक्षांशतोऽपि हि । क्रियते धर्मकार्ये चेत्कष्टान्तः स्यात्तदा खलु ।।
इत्यादि गौतमेनोक्तः स ऊचे साध्वहं त्वया । बोधितोऽद्य भवोद्विग्नं परिव्राजय मां ततः ।।
प्रबुद्ध इति विज्ञाय गौतमस्तमदीक्षयत् । गन्तुं श्रीवीरपादान्ते समं तेन चचाल च ।।
पप्रच्छ हालिकर्षिस्तं गन्तव्यं भगवन् ! क्व नु । गौतमोऽप्यवदत् साधो ! गन्तव्यमुपमद्गुरु ।।
हालिकोऽप्यब्रवीदेवं न तुल्यः कोऽपि ते ध्रुवम् । तवापि किं गुरुः कोऽपि ! स स्यात्कीदृशो ननु ? ।।
अथाख्यद्गौतमोऽस्तीह मम विश्वगुरुर्गुरुः । चतुस्त्रिंशदतिशयः सर्वज्ञश्चरमो जिनः ।।
तच्छ्रुत्वा हालिकमुनिः सर्वज्ञे प्रीतिमुद्वहन् । उपार्जयद्बोधिबीजं प्रययौ चानुगौतमम् ।।

प्रभुं प्रेक्ष्य च संक्रुद्धः सिंहादिभववैरतः । सोऽवोचद्गौतममुनिं भगवत् ! कोऽयमग्रतः ? ॥
जगाद गौतमोऽसौ मे धर्माचार्यो जिनेश्वरः । सोऽप्यूचे चेद्गुरुस्तेऽसौ तदा नार्थस्त्वयाऽपि मे ॥
त्वद्दीक्षयाऽप्यलमिति स रजोहरणादिकम् । त्यक्त्वा ययौ निजक्षेत्रे सीरादि पुनराददे ॥
स्वामिनं गौतमो नत्वा पप्रच्छ भगवन्निदम् । आश्चर्यमेष विद्वेषी लोकानन्देऽपि यस्त्वयि ॥
प्रतिपन्नं स्वयमपि व्रतं प्रोज्झितवानसौ । युष्मदालोकनादेव कारणं तत्र नाथ ! किम् ? ॥
मय्यसौ प्रीतिमान् पूर्वं गुरुर्मेऽसावितीरिते । त्वयि नाथ ! झगित्येव द्वेष्यजायत मय्यपि ॥
स्वाम्यथाऽऽख्यन्मया सिंहो यस्त्रिपृष्ठेन दारितः । क्रोधात् स्फुरंस्त्वया साम्ना शान्तः सारथिना मम ॥
तत्प्रभृत्येष मद्द्वेषी जज्ञे स्निग्धः पुनस्त्वयि । तत्प्रैषयं गौतम ! त्वां बोधिबीजकृतेऽस्य हि ॥

**उपसंहारमाह–**

शृणुतैकं विनयोदितवचनं, नियताऽऽयतिहितरचनम् ।
रचयत सुकृतसुखशतसन्धानं शान्तसुधारसपानम् रे, सु० ॥८॥ [२१७]

**॥ इति श्रीशान्तसुधारसगेयकाव्ये कारुण्यभावनाविभावनो नाम पञ्चदशः प्रकाशः ॥**

**व्याख्या– भो भव्या ! *नियतायतिहितरचनं नियतं* निश्चितं अवश्यम्भावेनेति यावत्, *आयत्यामा*गामिनि काले फलप्रापणे *हितरचनं हित*मात्मनः कल्याणं तस्य *रचना* निष्पादनं यस्मिंस्तत्तथाभूतं, *एक*मद्वितीयं *विनयोदितं विनयेन* निभृतवादिनाऽचलवचनवक्त्रऽर्हता *उदितं* प्रोक्तं *यद्वचनं* उपदेशस्तत् *शृणुत* । *सुकृतसुखशतसन्धानं सुकृतानि* पुण्यानि सदाचरणानि च *सुखानि* नरामरमोक्षशर्माणि तेषां *शतानि* सुप्रभूततरसंख्याभिः संख्येयानि तेषां यत्*सन्धानं* आत्मनि संयोजनं तत्तथाभूतगुणं, *शान्तसुधारसपानं शान्तो* रागाद्यभावभवविरक्तिमोक्षाभिलाषादिमान् जीवस्वभावः स एवाजरामरकारि*सुधारस*स्तस्य पानं प्रेमभरेणास्वादनं तत् *रचयत* कुरुतेत्यर्थः ॥८॥**

मरणान्तकष्टसहनोपरि सागरचन्द्रदृष्टान्तं –

द्वारवत्यां बलदेवसूनुर्निषधः, तस्य सुतः सागरचन्द्रोऽभूत् । इतस्तत्रैव धनसेनराजस्य सुता कमलामेला, सा उग्रसेनपुत्रस्य नभसेनस्य दत्ता । इतश्च नारदो नभसेनगृहेऽगमत् । विवाहव्यग्रचित्तेन नारदो नार्चितः, तेन क्रोधेन निषधं प्रति प्रोक्तं यादृशं स्वरूपं कमलामेलायास्तादृशं भुवनत्रयेऽपि नास्ति । सागरचन्द्रेणोक्तम्–सा कस्यचिद्दत्ता ? नारदेनोक्तम्–दत्ता परं नाद्यापि परिणीता । तच्छ्रुत्वा तद्दिनादारभ्य सर्वत्र तन्नामजापं कुर्वन्नास्ते । ततः स ऋषिः कन्यान्तिकं गतः । कन्यया पृष्टः किमप्याश्चर्यं दृष्टम् ? स प्राह दृष्टमाश्चर्यद्वयं मया सागरचन्द्रे सुरूपत्वं नभसेने तु कुरूपत्वम् । ततो झटित्येव सा सागरचन्द्रानुरक्ता जाता नित्यं तं ध्यायति । अथ चिन्तासागरे मग्नः सागरचन्द्रः शाम्बकुमारेण दृष्टः । ततस्तस्य पृष्ठे स्थित्वा शाम्बोऽयमिति ज्ञात्वा प्रोक्तं सत्यमेतत्त्वमेव मम कमलदलदीर्घलोचनां तां मेलयिष्यसि, कोऽत्रार्थे क्षमः ? ततः प्रद्युम्नपार्श्वाद्वाक्छलपतितेन तेन शाम्बेन प्रज्ञप्तिविद्या याचिता । विवाहदिवसे च बहुभिर्यादवैः परिवृतेन तेन पितृगृहादाकृष्य बहिरुद्याने नीता । तत्पाणिग्रहणं सागरचन्द्रेण सह कारितम् । ततः कन्यापितृश्वशुरपाक्षिकाः सर्वत्रान्वेषयन्तो वने विद्याधरवृत्तान्तं वीक्ष्य कृष्णं प्रति प्रोचुः । ततो हरिः क्रुद्धः

ससैन्यस्तत्रायचौ । शाम्बोऽपि वैक्रियलब्ध्या कृतानेकरूपो महद्युद्धं चकार । पश्चात्शाम्बो मूलरूपेण कृष्णांह्रौ निपपात । ततो हरिणा सागरचन्द्रस्यैव दत्ता । नभसेनस्तत:प्रभृति सागरस्योपरि द्वेषं वहति । छलमन्वेषयति । अन्यदा श्रीनेमिपार्श्वे प्रतिपन्नश्रावकव्रतः संविग्नः सागरचन्द्रः श्मशाने पर्वदिने पौषधप्रतिमया स्थितः । नभसेनेन तत्र भ्रमता देवाद्ददृशे । अङ्गारभृता ठीबी तन्मस्तके तेन पापिना मुक्ता । स तमुपसर्गं सहमानः प्रज्वलितकायोऽष्टमस्वर्गे सुरोऽजनि ।

**।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयसतीर्थ्य-तिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां श्रीशान्तसुधारस-टीकायां करुणभावनाविभावनो नाम पञ्चदशः प्रकाशः।।**

❀ ❀ ❀

## ॥ षोडशः प्रकाशः ॥

व्याख्यातः पञ्चदशः प्रकाशः । अथ षोडशो व्याख्यायते । तस्य चायमभिसंबन्धः- पञ्चदशे करुणाभावना भाविता, तां च भावयन् सर्वेषु करुणायुक्तत्वेन सदृशपरिणामी भवति । यः सर्वत्र समपरिणामी रागादिपक्षपातविरहितत्वाद्यथार्थतत्त्वग्राहित्वाच्च स मध्यस्थो भवतीत्यतः षोडशे माध्यस्थ्यभावनां विभावयन्नाह । तस्याश्चायमादिमः श्लोकः-

( पञ्चापि शालिनीवृत्तानि )

श्रान्ता यस्मिन् विश्रमं संश्रयन्ते रुग्णाः प्रीतिं यत्समासाद्य सद्यः ।
लभ्यं रागद्वेषविद्वेषिरोधा-दौदासीन्यं सर्वदा तत्प्रियं नः ॥१॥ [२१८]

व्याख्या- भो भव्या ! यूयं तन्माध्यस्थ्यप्रीता भवत । किं तदित्याह-*यस्मिन्* माध्यस्थ्ये प्राप्ते सति, अस्मिन् जगति *श्रान्ताः* रागद्वेषमोहादिजन्यसंतापभरैः परिक्षीणा अपि जना *विश्रमं* पूर्वोक्तसन्तापभरविरमणेन खेदाभावं *संश्रयन्ते*ऽतिशयेन प्राप्नुवन्ति । तथा *रुग्णाः* रोगैः समन्वितत्वेन रुक्प्रपीडितास्तेऽपि यस्मिन् *प्रीतिं* देहरागरोगद्वेषशमनात्प्रेमरसमास्वादयन्ति । भूयोऽपि रुग्णवद्व्याख्येयो रुग्णस्य द्व्यर्थत्वात् । तथा यन्माध्यस्थ्यं *रागद्वेषविद्वेषिरोधात् रागद्वेषौ* प्रसिद्धौ तावेव *विद्वेषिणौ* हितविनाशकशत्रू तयो *रोधो*ऽनुद्भवो निराकरणं च तस्माज्जीवाः *समासाद्य* प्राप्य । *सद्यः* शीघ्रं, *औदासीन्यं* रागद्वेषपक्षपातविरहभावं *लभन्ते* समास्वादयन्ति । तन्माध्यस्थ्यं *नो*ऽस्माकं *सर्वदा* निरन्तरं सर्वकालं *प्रियमिष्टं* भवत्वित्यर्थः ॥१॥

कम्बलशम्बलज्ञातं –

इहैव जम्बूद्वीपे द्वीपे निवासिजनजनितहर्षप्रकर्षे श्रीभारते वर्षे समस्ति समस्तवस्तुविस्तार- मधुरा मथुरा नाम नगरी, यस्यां मनुष्यश्रुतिसौख्यकारिविरावभृद्धंसकभासमाना समुल्लसत्पीनपयोधरान्तः सस्त्रीराजिभातिबहिर्वनीव । तस्यामनवरतसुगुरुवदनानिर्यदमृतायमानविशुद्धान्तदेशनाश्रवणसञ्जात- जिनशासदृढवासो जिनदासो नाम श्रावकः प्रतिवसति स्म । यस्य मानससरोवरमध्ये गुर्वपूर्वतरभक्तितरङ्गे सद्विचारचतुरः शुचिपक्षः खेलनं स्म तनुते जिनहंसः । तस्य निरन्तरदेवगुरुचरणपरिचरणसमुपार्जित- गण्यपुण्यनिवासीभूता समासीत्साधुदासी नाम प्रेयसी ।

श्रीमज्जिनाज्ञासुदशासनाथे, पुण्यक्रियास्नेहभराभिरामे ।
यच्छीललीलायितदीप्रदीपे, पतङ्गपोतायितमाप मारः ॥

एकदा ताभ्यां सद्गुरुपादमूले सम्यक्त्वमूलानि द्वादश व्रतानि स्वीकुर्वद्भ्यां सावद्यभीरुतया सर्वथा चतुष्पदपरिग्रहपरिहाररूपोऽभिग्रहो जगृहे, तश्च निरतीचारप्रतिपालयद्भ्यां सुखेन समयोऽतिवाह्यते स्म । कदाचित्काचिदेकाऽऽभीरी स्निग्धमधुरदधिभाण्डशिरस्का जिनदासावासमाससाद, साधुदास्यपि डिण्डीर-

पिण्डपरिपाण्डुरं दध्युपादाय सादरमाभीरीमुदीरयामास–सखि ! प्रत्यहमेवास्मद्गृहे दध्यानीय विक्रेतव्यं, दास्यामि तवेप्सितं द्रव्यं, तयाप्याभीरीकयोपदेशवत्तद्वचः प्रतिपन्नं, ततः सा सततं दध्याद्यानयन्ती साधुदास्या वेषवारादिप्रदानेन सत्कृता सख्यमभजत् । यतः–

दानेन सत्त्वानि वशीभवन्ति, दानेन वैराण्युपयान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानात्तस्माद्धि दानं सततं प्रदेयम् ।।

अन्यदाऽऽभीर्या स्वसुताविवाहमहे सपत्नीको जिनदासो न्यमन्त्र्यत, तेनापि क्षणमपि मम नास्त्यागमनावसर इति निषिध्य मुधिकयैव विवाहोपयोगीनि वस्तूनि तस्यै ददिरे, तैर्वस्तुभिः सरङ्गः करग्रहमहः समजनि, साप्याभीरी स्वस्यानृण्यमभीप्सुर्निजपरिजनयुता त्रिहायणौ गङ्गातरङ्गधवलौ कम्बलशम्बलनामानौ वृषभौ श्रेष्ठिने उपदीचकार, मास्म भून्मम नियमभङ्ग इति तेन निवारितापि सा तद्गृहे कीलकेतौ वृषभौ निबध्य स्वधामं जगाम ।

श्रेष्ठ्यपि निजगृहागतस्तौ तथास्थौ निरीक्ष्य क्षणं विषद्य चेति चिन्तयामास, यद्येतौ मुञ्चामि तदा पामरनरप्रेरिताऽरुन्तुदतोदनप्रहारविधुरशीरौ हलशकटवाहनव्यथामनुभविष्यतः, स्थापितौ तु मम नियमभङ्गाय भविष्यतः अतः कथमहं तयाऽभीर्या मूर्खस्नेहेन सङ्कटावटे पातितः, तथापीमावनुकम्पयातः परं परिपालनीयाविति विमृश्य श्रेष्ठी तौ वृषभौ प्रासुकतृणजलादिनाऽनुदिनं पुपोष, अथ पर्वतिथिषु कृतोपवासं गृहीतपौषधं पठित–धर्मशास्त्रपुस्तकवाचनपरं जिनदासं दृष्ट्वा तौ पशू अपि सत्सङ्गतिवशाज्जातचैतन्यौ दीयमानमपि तृणादिकं नाभुञ्जाताम् यतः–

सङ्गः सर्वात्मना त्याज्यः, स चेत्त्यक्तुं न शक्यते । स सद्भिः सह कर्त्तव्यः, सन्तः सङ्गस्य भैषजम् ।।

ततः श्रेष्ठी तयोर्वृषभयोरीदृक् स्वरूपं कृपयैवेयन्तं कालं मया पालितौ सम्प्रति तु विशिष्टध–र्म्मावबोधात्साधर्म्मिकौ जाताविति सञ्चिन्त्य च तौ वृषौ सहोदराविव मनोहराहारेणापूपुषत्, उभयथापि वृषपोषनिरतस्य तस्य यान्ति स्म वासराः ।

अथैकदा भिण्डीरगणयक्षयात्रोत्सवे प्रवृत्ते नागरिकलोकैरहमहमिकया वाहकेल्यां प्रारब्धायां कश्चिज्जिनदासस्य परमवयस्यस्तमनापृच्छ्यैकोदरजातवत्समानौ गिरिशृङ्गवत्तुङ्गपीवरस्कन्धावरिष्ठरत्न–वत्सुस्निग्धमुग्धशृङ्गौ चामरवल्लसत्पुच्छौ वायुवदधिकवेगौ पुण्डरीककमलवद्धवलौ कौतुकवशादादाय शकट्यामयोजयत्, ततः स गतकृपस्तच्छरीरसुकुमारतानभिज्ञोऽरुन्तुदतोदननोदनेन तुरगादप्यधिकतरं रयं तौ पृषौ कारयन् प्रतिज्ञापूर्वमपूर्वानपि पौरपरम्पराधुरीणान् विधुरयन्, सर्वत्र जयपताकामवाप्य पुनः श्रेष्ठिगृहे बद्ध्वा यथागतमगमत् जिनदासोऽपि कृतजिनपूजः सत्पात्रनिवेशितवित्तो भोजितपरिजनस्तयोर्धुरन्धरयोः पोषाय हारिचारिकरः समाजगाम, तावप्यारप्रहारनिःसरद्रुधिरधाराखरण्टितशरीरौ दीर्घनिश्वासान् विमुञ्चन्तौ निःसहावुदश्रू वीक्ष्य श्रेष्ठी सकष्टमाचष्ट–हा ! केन पातकिना मामननुज्ञाप्यैतौ वृषावीदृगवस्थामवापितौ ? तदनु श्रेष्ठी सशोक इव तयोस्तापव्यापनिराकरणाय शर्करामिश्रक्षीरशिशिरकरम्भकादि वस्तु पुरस्तान्निवेशितवान्, तावप्यत्यन्तव्यथाविधुरितशरीरौ तस्मिन् दृक्पातमपि न चक्राते ।

अनशनकृतमती श्रेष्ठिनाप्यनुमानेनाशनपराङ्मुखौ तौ वृषौ ज्ञात्वा भक्तप्रत्याख्यानं कारितौ, ताभ्यामपि शुभायतिभ्यां पथ्यमिव तदङ्गिकृतम्, श्रेष्ठ्यपि परित्यक्तापरव्यापारः संसारासारतां प्रकटयन्नाराधनापुरस्सरं पञ्चपरमेष्ठिनमस्कारमहामन्त्रं तयोः श्रुतिपथपथिकतामनैषीत्, तावप्यमृतमिव तं निजकर्णपुटाभ्यां निपीय

समाधिनाऽऽयुः परिपूर्य नागकुमारेषु देवत्वेनोपपद्येताम्, अथ कम्बलशम्बलौ नागकुमारावधिज्ञानेन बेडायामारूढस्य भगवतः श्रीवर्द्धमानस्य मिथ्यादृष्टिना सुदाढनागकुमारेण क्रियमाणं जीवितान्तोपद्रवं विज्ञाय जन्मकृत्यञ्च विमुच्य रयादाजग्मतुः, तयोस्त्वेकः सुदाढेन सार्द्धं युद्धं चकार, द्वितीयस्तु भगवदधिष्ठितां नावं पद्मिनीमिव करसम्पुटेनोद्धृत्य सरित्परतीरमनैषीत्, ततो महर्धिकोऽपि सुदाढनागकुमारोऽत्यन्ता-सन्नच्यवनसमयगलद्बलस्ताभ्यां नूतनदेवाभ्यां निर्जितः शृगाल इव पलायांचकार, तावपि कम्बलशम्बलौ नागकुमारौ भगवतः श्रीमहावीरस्वामिन उपरि गन्धोदकपुष्पवृष्टिं विधाय भक्त्या तत्पादारविन्दद्वन्द्वमभिवन्द्य च धाराहतकदम्बपुष्पवद्रोमाञ्चितोङ्गौ स्वस्थानमगच्छतां, तदनु जिनदासश्रेष्ठ्यपि तयोर्वृषभयोर्विपत्त्यनन्तरं विशिष्य शश्वदर्हदुक्तशास्त्रपरिशीलनेन कतकफलक्षोदेनेवात्मानं जलमिव निर्म्मलीकृत्यावसाने समाधिपरः सदारः सुरपुरमलञ्चकार ।

❋ ❋ ❋

**मध्यस्थानां खेदकारणमेव नास्तीत्याह–**

लोके लोका भिन्नभिन्नस्वरूपा भिन्नैर्भिन्नैः कर्मभिर्मर्मभिद्भिः ।
रम्यारम्यैश्चेष्टितैः कस्य कस्य तद्विद्वद्भिः स्तूयते रुष्यते वा ॥२॥ [२१९]

**व्याख्या– विद्वांसो मध्यस्थाः स्वहृदये वक्ष्यमाणप्रकारं भावयन्ति । किमित्याह *लोके* भुवनत्रये *लोकाः* प्राणिनः *मर्मभिद्भिः भिन्नैर्भिन्नैः कर्मभिः, मर्मभिद्भिः मर्माणि* जीवस्थानानि सन्धिमिलापहितप्राप्त्यादि-स्थानानि तानि *भिन्दन्ति* विदारयन्ति विनाशयन्तीति यावत् यानि तानि तथा, तैर्मर्मभिद्भिः, *भिन्नैर्भिन्नैः* कर्कशकर्कशतरकर्कशतमभेदप्राप्तैः *कर्मभि*र्ज्ञानावरणीयादिभिः शुभाशुभैः कृताः *भिन्नभिन्नस्वरूपा, भिन्नं भिन्नं* विरूपविरूपतरविरूपतमत्त्वेन सुरूपसुरूपतरसुरूपतमत्त्वेन क्रूरशान्तदुःखिसुखिसधननिर्धनदुर्मति-सुमत्यादित्वेनान्यत्वमन्यत्वं प्राप्तं *स्वरूपं* आकारस्वभावः येषां ते तथाविधाः सन्तीत्यतः *रम्यारम्यैश्चेष्टितैः रम्याणि* सुन्दराणि दानादिरूपाणि *अरम्याण्य*सुन्दराणि वधादिरूपाणि यानि *चेष्टितानि* क्रियाप्रवृत्तय-स्तैस्तत्*विद्वद्भि*स्तत्त्वविद्भिर्मध्यस्थैः *कस्य कस्य* रम्यक्रियाकारिणः *स्तूयते* प्रशस्यते । *वा*ऽथवा *कस्य कस्या*रम्यकर्तव्यविधायिनो *रुष्यते* कोपनिन्दादि क्रियते, स्वेष्टसाधनव्याघातहेतुभूते द्वे ज्ञात्वा न कस्यापि स्तुतिर्वा निन्दा *वा* कार्या विद्वद्भिरित्यर्थः ॥२॥**

कथारत्नाकरे द्विजानां कथा–

हरिस्थले ग्रामे अधीततर्क–ज्योतिष–लक्षण–वैद्यकशास्त्रा अपि लोकव्यवहारविवेकविकलाश्चत्वारो द्विजन्मतनवः सुहृदो वसन्ति स्म । अन्यदा ते चत्वारो ऽपि स्वस्वविद्यागर्वभाजः परदेशं कौतुकाऽवलोकनाय स्वपुरतश्चलन्ति स्म । क्वाऽपि च पुरे भोजनार्थं तस्थिवांसः । अथ ते तार्किक–नैमित्तिक–लाक्षणिक–वैद्याः क्रमेण घृताऽऽनयनबलिवर्दचारणाऽन्नपाचन–शाकग्रहण– रूपेषु स्वस्वकार्येषु प्रवृताः, तेषु चैकस्तार्किको घृतमादायाध्वन्यागच्छन्निति दध्यौ, कं घृताधारं पात्रं वा पात्राधारं घृतम्? इति वितर्क्य तद्घृतपात्र-मधोमुखमकरोत् तेन तद् घृतं च भुवि न्यपतत् । अथ द्वितीयो बलिवर्दचारको बलिवर्देषु हरिततृणाङ्कुरोत्करचरणवशादतिदूरं गतेषु ज्योतिःशास्त्रं पश्यति स्म, ममाऽमी वृषा अन्धे वा केकराक्षे वा

चिपटाक्षे वा दिव्यचक्षुषि वा नक्षत्रे गताः ? चरे वा स्थिर वा लग्ने गताः ? इति यावच्चिन्तयति तावत्ते वृषभा दवीयांसोऽभवन् ।

तृतीयो वैयाकरणोऽन्नपाचनक्षणे 'खद्खद्' इति शब्दं कुर्वाणां खिच्चडिकां निभाल्येति दध्यौ, अहो ! असौ शब्दः कस्मिन् व्याकरणे केन सूत्रेण निष्पन्नः ? इति ध्यायत्येव तस्मिन्नपि सा खिच्चडिका दग्धा । अथ चतुर्थोऽपि शाकग्रहणार्थं गच्छंश्चतुष्पथे रम्भाफलाऽऽम्रफल–त्रपुषी–कर्क्कटिका–सर्षप–जीवन्ती–तिबुकादीन् बहून् शाकादीन् दृष्ट्वेति चिन्तयाञ्चक्रे, अहो ! अमिभिर्वात–पित–कफ–श्लेष्म–त्रिदोषादिमहारोगनिबन्धनैः शाकैरलम् ।

निम्बो वातहरः कलौ सुरतरुः शाखाप्रशाखाकुलः<br>
पित्तघ्नः कृमिनाशनः कफहरो दुर्गन्धनिर्नाशनः ।<br>
कुष्ठव्याधिविषापहो व्रणहरो द्राक्पाचनः शोधनो<br>
बालानां हितकारको विजयते निम्बाय तस्मै नमः ।।2।। (शा.)

इति वैद्यकशास्त्राऽभिहितबहुगुणनिम्बतरुशाकमादायाऽऽययौ ।एवमधीतशास्त्रा अपि लोकव्यवहार–विकलाश्चत्वारोऽपि ते स्वस्वाऽर्थभ्रंशभाजो बभूवुः ।

* * *

**अथोदाहरणेन माध्यस्थ्यं दृढयन्नाह–**

मिथ्या शंसन्वीरतीर्थेश्वरेण, रोद्धुं शेके न स्वशिष्यो जमालिः ।<br>
अन्यः को वा रोत्स्यते केन पापात्–तस्मादौदासीन्यमेवात्मनीनम् ।।३।। [२२०]

**व्याख्या– भो भव्याः स्वश्रेयोऽर्थिभिर्भवद्भिर्मध्यस्थैरेव स्थेयम् । यतो *स्वशिष्यः* स्वहस्तदीक्षितः *जमालिः* कुलिनोऽपि मिथ्यात्वोदयेन *मिथ्या शंसन्* स्वस्य भवनिपातकारणमसत्यं प्ररूपयन् *वीरतीर्थेश्वरेण* भगवता श्रीवर्धमानतीर्थपतिना सर्वबोधनप्रकारज्ञेनापि *रोद्धुं* निवारयित्तुं *न शेके* न शक्यते स्म, अनिवर्त्यकदाग्रहप्राप्तं ज्ञात्वोपेक्षितः, तर्हीतरेषामनिवर्त्यकदाग्रहनिषेधे का शक्तिः? न कापि । अतो माध्यस्थे स्थेयं, *तस्मा*दुक्तहेतोः, *अन्यः* सामान्यज्ञाता *कः* कस्कः *वा*ऽथवा *केन* साधनविशेषेण *पापा*त्कदाग्रहाघराशेः *रोत्स्यते* निषेत्स्यते । तत *औदासीन्यमेव* प्रोक्तरूपमाध्यस्थ्यमेव *आत्मनीनं* आत्मसर्वहितकरं आत्मबुद्ध्या समाचरणीयमित्यर्थः।।३।।**

उपदेशमालोक्तजमालिवृत्तान्तं –

कुण्डपुरे नगरे कश्चिन्महर्द्धिको जमालिनामा क्षत्रियः परिवसति, यौवनं प्राप्तः श्रीमहावीरपुत्रीपाणिग्रहणं चकार, अन्या अपि राजकन्यास्तेन परिणीताः, पञ्चविषयानुपभुञ्जन्नेकदा श्रीमन्महावीरवन्दनार्थं स गतः, देशनां श्रुत्वा संसारासारतां ज्ञात्वा राजकुमाराणां पञ्चभिः शतैः सार्द्धसमहोत्सवं स चारित्रं जग्राह, सुदर्शनयापि बहुस्त्रीपरिवारेण चारित्रं गृहीतं, पञ्चशतान्यपि राजकुमाराणां जमालेः शिष्यत्वेन समर्पितानि, स एकादशांगान्य–धीतवान्, षष्ठाष्ठमादितपः कुर्वन् भगवत्समीपमागत्य भिन्नविहाराज्ञां मार्गितवान्, परं भगवता न दत्ता, ततो भगवदाज्ञां विनैव पञ्चशतशिष्यपरिवृतोऽसौ बहिर्विजहार विहरन्नेकदा श्रावस्त्या कोष्टकवने समवसृतः, तत्र

जमालिशरीरे महाज्वरः समुत्पन्नः तद्वेदनामसहमानः शिष्यमाकार्य संस्तारयेत्यादिष्टवान् तदा शिष्येणापि स प्रारब्धः,पुनरपि वेदनामसहमानः पृष्टवान्, संस्तारकः कृत ? शिष्येणोक्तं कृतः स्वयमागतो विलोक्य शिष्यमुक्तवान् त्वया संस्तारकः क्रियते, कृत इत्यसत्यं कथमुक्तं ? शिष्येणोक्तं भगवद्वाक्यं 'कडमाणे कडे' इति क्रियमाणं कृतमेवेति श्रुत्वा जमालिः प्रोवाच, हे शिष्य ! एतद्भगवद्वचनमसत्यं, यतः प्रत्यक्षेणेदं विरुद्धं दृश्यते, अतीतवर्त्तमानकालयोर्महान् विरोधः, अतः करणानन्तरं कृतमित्युच्यते, न तु क्रियमाणं कृतमिति तदा शिष्येणोक्तं यथा कश्चिच्चलनायोद्यतो ग्रामबहिःप्रदेशे स्थितोऽपि चलित इत्युच्यते, स्तोकेऽपि भग्ने भाजने भग्नमितिशब्दव्यवहारः श्रूयते, स्तोकेऽपि स्फटिते वस्त्रे स्फटितशब्दव्यवहारः, तथा क्रियमाणमपि कृतमिति कथ्यते, 'कडमाणे कडे' इति निश्चयसूत्रं यदा प्रथमसमये कार्योत्पत्तिर्न मन्यते, तदा द्वितीयेऽपि न, एवं तृतीयाद्येष्वपि न, तदांत्यसमये कार्यसिद्धिरिष्टा, एवं सति प्रथमादिसमयानां वैयर्थ्यं स्यात् न ह्यंत्यसमये एव सर्वकार्यसिद्धिर्दृश्यते, इत्यादियुक्त्वा बोधितोऽपि स न कदाग्रहं मुमोच तदा शिष्यैरयोग्योऽयं जिनवचनोत्थापकः स्वकीयमतस्थापको निह्नव इति भणित्वा केचन शिष्या भगवत्समीपमागताः, पश्चाज्जमालिरपि नीरोगी जातो विहारं कुर्वन् चंपानगर्यां भगवत्समीपमागत्य कथयतिस्म, नाहं भवच्छिष्यवच्छद्मस्थः, अहं केवली भगवानस्मि तदा श्रीगौतमेन पृष्ट , यदि त्वं केवली वर्तसे तदा कथय ? लोकः शाश्वतोऽशाश्वतो वा ? जीवः शाश्वतोऽशाश्वतो वेति तदा जमालिः प्रत्युत्तरं दातुमसमर्थस्तूष्णीं स्थितः, गौतमेनोक्तं भो जमाले त्वं केवलीति नाम यदि धारयसि, तत्कथमुत्तरं दातुं न शक्नोषि अहं छद्मस्थोऽप्येतज्जानामि तच्छृणु ? लोको द्विधा शाश्वतोऽशाश्वतश्च तत्र द्रव्यतः शाश्वतो नित्यः, उत्सर्पिण्यवसर्पिण्यादिकालप्रमाणेनाऽशाश्वतश्च तथा जीवोऽपि द्रव्यतो नित्यः, देवमनुजतिर्यग्नरकगतिपर्यायतोऽनित्यश्चेति, एतदश्रद्दधानो जमालिर्विहरन् श्रावस्त्यां गतः, सुदर्शनासाध्व्यापि जमालिमतमङ्गीकृतम्, विहरमान् एकदा सा तन्नगरमध्ये ढङ्कनाम्नो भगवदुपासकस्य कुम्भकारस्य शालायां स्थिता सा लोकानामग्रे जमालिमतस्वरूपं कथयति तद् ढङ्केनापि श्रुतं मनसि च स चिन्तयति, विलोकयत कर्मवैचित्र्यं यदियं भगवत्पुत्र्यपि कर्मवशतोऽसत्यं प्ररूपयति, तदिमां चेत्केनाप्युपायेन प्रबोधयामि तदा महत्फलं भवतीति विचार्यैकदा पौरुषीमध्ये स्वाध्यायं कुर्वत्याः सुदर्शनासाध्व्याः शाटिकोपरि तेनैकोऽङ्गारो निक्षिप्तः, शाटिकायां च द्वे त्रीणि छिद्राणि जातानि, तानि दृष्ट्वा सुदर्शनयोक्तं भो श्रावक ! किमिदं कृतं ? मदीयेयं शाटिका ज्वालिता, ढङ्केनोक्तं मैवं वद ? भगवन्मतमेतत्, भगवता हि ज्वलितुमारब्धं ज्वलितमिति कथितं भवतां तु समग्रज्वलनानंतरं ज्वलितमिति मतं, अतो मन्यस्व भगवद्वचनं सत्यं, इति ढङ्कबुद्ध्या सुदर्शनयापि तत्सत्यमिति प्रतिपन्नं जमालिसमीपमागत्य कथयतिस्म, भगवद्वाक्यं सत्यं, भवन्मतं तु प्रत्यक्षेणाऽसत्यं, इत्थमुक्तेऽपि कर्मवशतस्तेन न प्रतिपन्नं, पश्चात्सुदर्शनापि भगवत्समीपे समागत्य मिथ्यादुष्कृतं दत्वा चारित्रं प्रपाल्य केवलज्ञानमवाप्य मोक्षं जगाम, जमालिस्तु निह्नवः सन् बहुदिनानि कष्टं विधाय पञ्चदशदिवसान् यावदनशनं विधाय विराधकत्वात्किल्बिषदेवत्वेनोत्पन्नः, ततश्च्युत्वा स बहुकालं संसारपरिभ्रमणं करिष्यति ।

* * *

अर्हन्तोऽपि प्राज्यशक्तिस्पृशः किं, धर्मोद्योगं कारयेयुः प्रसह्य ।
दद्युः शुद्धं किन्तु धर्मोपदेशं यत्कुर्वाणा दुस्तरं निस्तरन्ति ॥४॥ [२२१]

व्याख्या– *प्राज्यशक्तिस्पृशः* महाशक्तिसमन्विताः, *अर्हन्तो* जगत्त्रयविजयकरणसमर्था जिनेश्वरा *अपि किं क्व प्रसह्य* बलाद्देहादिसामर्थ्यात् *कस्यचिद्धर्मोद्योगं* धर्मोद्यमं *कारयेयुः* अप्रवर्तमानं प्रवर्तयेरन्न प्रवर्तयेयुर्जनानिति शेषः, किन्तु किं तर्हि कुर्युरित्याह *शुद्धं* यथार्थस्वरूपं यथायोग्यं यथा हितप्रापकं निर्दोषं भवति तथारूपं *उपदेशं* विधिनिषेधोभयात्मकं *धर्म*मार्गकथनं *दद्युः* जिनेश्वराः कुर्युः । *यत्कुर्वाणाः* यदर्हदुपदिष्टं *कुर्वाणा* विदधाना भव्यजना *दुस्तरं* दुःखेन तरणीयं भवसागरं *निस्तरन्ति* नितरां सुखेन पारं गच्छन्तीत्यर्थः ।।४।।

भरतेश्वरवृत्तौ मेघकुमारवृत्तं–

राजगृहपुरे श्रेणिकभूपस्य धारिणी पत्नी बभूव । धारिण्याः पुत्रो मेघकुमाराह्वोऽभूत् । स क्रमात् प्राप्तयौवनो भूपपुत्रीरष्टौ श्रेणिकेन परिणायितः । अन्येद्युः पुराद् बहिः समवसृतं श्रीमहावीरं नन्तुं गतो मेघकुमारो धर्म्मं श्रुत्वा प्राप्तवैराग्योऽष्टौ प्रियास्त्यक्त्वा संयमं जग्राह । ग्रहणासेवनाशिक्षायै श्रीवीरेण स्थविरायार्पितो मेघकुमारः । अपरस्मिन् ग्रामे गत्वा स स्थविरैः स्थितः । रात्रौ द्वारि मेघकुमारः शायितः । प्रविशद्भिर्निर्गच्छद्भि–र्मेधकुमारः पद्भ्यां तथा घट्टितो यथा खिन्न एवं दध्यौ–पुरा अमी साधवो मयि सादरा अभूवन्, अधुना तु लेष्टवन्मां संघट्टयन्ति । पूर्वं मे क्व सुखावासः ? । दुःखावासो मयाऽयं कथं सहिष्यते ? प्रभाते प्रभुमापृच्छ्य गृहवासं पुनर्ग्रहीष्यामि । ततो रवावुदिते स स्थविरो मेघकुमारयुतः प्रभुं नन्तुं ययौ । प्रभुणा मेघकुमारमनोभावं ज्ञात्वोक्तम्–

को चक्कवट्टिरिद्धिं, चइउं दासत्तणं समभिलसइ । को व रयणाइ मुत्तुं, परिगिण्हइ उवलखंडाइं ।।
णेरइआणवि दुक्खं, झिज्झइ कालेण किं पुण नराणं ! ता न चिरं तुमं होही, दुक्खमिणं मा समुव्वियसु ।।
जीयं जलबिन्दुसमं, संपत्तीओ तरङ्गलोलाओ । सुमिणयसमं च पिम्मं, जं जाणसु तं करिज्जासु ।।
वरमग्गिमि पवेसो, वरं विसुद्धेण कम्मुणा मरणं । मा गहियव्वयभङ्गो, मा जीअं खलिअसीजस्स ।।
**सूइहिं अग्गिवन्नाहिं भिज्जमपणस्स जंतुणो । जारिसं जायए दुक्खं, गब्भे अट्ठगुणं तओ ।।**

वत्स मेघ ! रात्रौ त्वमतीव पीडितोऽसि । परमात्मीयौ पूर्वभवौ श्रृणु । पश्चाद्यथा रोचते तुभ्यं तथा कुरु । अतस्तृतीयभवे वैताढयपर्वतभुवि षड्रदः सहस्रहस्तिनीपरिवृतो हस्ती सुमेरूप्रभाभिधः सितवर्णः त्वमभूः । अवाद्धीतोऽन्यदा करिणीविहाय तृषाक्रान्तो भ्रमन्नितस्ततः सरो दृष्ट्वा पयः पातु प्रविष्टः तदाऽप्राप्तनीरः पङ्के मग्नः । प्रत्यर्थिदन्तिभिरतीव कदर्थितस्तथा यथा वेदनया सप्तमदिने मृत्वा अशित्युत्तरशतमायु पालयित्वा विन्ध्यभूमावुत्पन्नो हस्ती । तत्रापि चतुर्दन्तो दन्ती मेरूप्रभाभिधः सप्तशतहस्तिनीपरिवारवृतोऽभूस्त्वम् । दवं वीक्ष्यान्यदा प्राप्तजातिस्मृतिः पूर्वभवं स्मृत्वा वर्षात्यये वल्लीवृक्षतृणादिमुन्मूल्य च सर्वं दूरे क्षिप्त्वास्वपरिवारपरिवृतो योजनमात्रं स्थण्डिलमकार्षीः । अन्येद्युर्दवं जाज्वल्यमानं दृष्ट्वा भीतः स्वं पौरूषं विमुच्य करिण्यादिपरिवारं च स्वकृते स्थण्डिलेऽविशस्त्वम् । तत्र स्थण्डिलं बहुभिः श्वापदैर्निश्छिद्रं पूर्णम् । एकदा त्वया कण्डूयनेच्छया एकः पाद उर्ध्वं कृतः । कण्डूयित्वापुनः पादं मुञ्चन् पदस्थाने शशकं स्थितं दृष्ट्वा कृपया पादस्तथैव रक्षितः । दिनद्वयान्ते दवानले उपशमिते शशकेऽन्यत्र गते यावत्त्वया पादो मुक्तः तावद्गिरिकूटवत् पतितः । जीवदयाध्यानान्मृतो हस्ती । स त्वं मेघकुमारनामा भूपपुत्रोऽभूः । तदा त्वया दया कृता । इदानीं

किं वीरवाणीश्रुत्वा तेन चिन्तितं ? धिगस्तु मम, अतः परं नेत्रे मुक्त्वा शरीरचिन्ता न कार्या मया । एवं स्थिरीकृतो मेघकुमारश्चिरं दीक्षां पालयित्वा विलये त्रिदशोऽजनि । ततश्च्युत्वा महाविदेहे मुक्तिं गमिष्यति ।।

तस्मादौदासीन्यपीयूषसारं वारं वारं हन्त सन्तो लिहन्तु ।
आनन्दानामुत्तरङ्गत्तरङ्गैर्जीवद्भिर्यद्भुज्यते मुक्तिसौख्यम् ।।५।। [२२२]

**व्याख्या- *हन्ते*त्यामन्त्रणे हे *सन्तो* ! भो भोः सुज्ञसज्जनाः *तस्मा*दुक्तहेतुतः, *औदासीन्यपीयूषसारं* औदासीन्यं प्रोक्तस्वरूपं माध्यस्थ्यं तदेव *पीयूष*मजरामरारोग्यविधायिनी सुधा तस्य यत्*सारं* तत्त्वपरीक्षणे ग्रहणादरे चातिवर्यं दार्ढ्यं स्थैर्यं चेति यावत् तत्, *वारं वारं* भूयो भूयो *लिहन्तु* समस्वादन्ताम् कुत एवमुपदिशतीत्याह- *यद्य*स्मादौदासीन्यसारसमास्वादनाज्जीवाः *जीवद्भि*रायुरादिप्राणान् धारयद्भि वर्तमानभवेऽप्यास्तां मोक्षप्राप्तावित्यपेरर्थः, *आनन्दाना*माह्लादविशेषाणां, *उत्तरङ्गत्तरङ्गैः* उदधिकाधिकोपर्युपरिसमुच्छलद्भिः *तरङ्गैः* सुखोल्लासलहरीभिः *मुक्तिसौख्यं* मोक्षसुखस्वभावं *भुज्यते* समास्वाद्यते प्राप्यते तर्हि तेन माध्यस्थ्यमेव सेवनीयमित्यर्थः ।।५।।**

दानादिकुलकवृत्तौ स्थूलिभद्रचरित्रं-

वररुचिषड्यन्त्रेन शकटालमन्त्री मारितः श्रीयकैः तदा राज्ञा प्रोक्तं भो श्रीयक ! तातस्तु पूज्यः, अतस्त्वयैतत्सुन्दरं न कृतं, विरूपं चाचरितं, श्रीयकः प्राह स्वामिन् ! तेन स्वर्णेनापि किं स्याद्यत्कर्णत्रोटाय भवेत् ? तद्वचनं श्रुत्वा तुष्टो राजा तं समस्तमुद्राव्यापारं समादिशत् तदा नृपं श्रीयकः प्राह हे देव ! स्थूलभद्राभिधो मम ज्येष्ठो बन्धुः सौभाग्यैकनिधी रूपेण मन्मथोपमो दाने कल्पतरु-तुल्योऽस्ति, तमाकार्येमां मुद्रिकां देहि । स्थूलभद्रो मुद्रायोग्योऽस्ति, नाहं, यतोऽसौ वृद्धबान्धवोऽहं तु लघीयान्, राज्ञोक्तं स तव बान्धवः कुत्रास्ति ? यतः समाकार्यते, तेनोक्तं स तु साम्प्रतं कोशागृहे वर्तते, तस्य च तत्र संस्थितौ द्वादश वर्षाणि सञातानि, राज्ञा वेश्यागृहात्स्थूलभद्रः समाकारितो भाषितश्च भो स्थूलभद्र ! तव जनककरस्थामिमां मुदिकां गृहाण । तव जनकवत्त्वमपि सर्वमुद्राव्यापारी भव । तेनोक्तं राजन्नालोच्याहं मुद्रिकां ग्रहीष्यामि, राज्ञोक्तं वाटिकान्तर्गत्वा विचारय । तेनापि तत्रैव गत्वा विचारितमहो धिक्संसारस्वरूपं, यत्र मे जनकस्येदृशी गतिर्जाता, ममाप्येवं भविष्यति, यस्मिन् राज्यकार्ये लग्नः पुमान् कृत्याकृत्यं न वेत्ति, स्वजनपरिजनादिकं चापि न वेत्ति, मम भ्रात्रा मम जनको हतः, धिक्संसारस्वरूपम् ! यतः-

हीं संसारसहावं चरियं नेहाणुरायरत्तावि । जे पुव्वह्ने दिठा ते अवरह्ने न दीसन्ति ।।४।।
संसारम्मि असारे सुहं वाहिवेयणापउरे । जाणन्तो इह जीवो न कुणइ जिणदेसियं धम्मं ।।५।।

धन्यास्ते महात्मानो य एवंविधं संसारस्वरूपं ज्ञात्वा संसारविरक्ता व्रतसाम्राज्ये सुस्थिताः सुरासुरमनुजवृन्दवन्दिता से स्वं परांश्च तारयन्ति, अतोऽहमपि जैनीं दीक्षां सर्वार्थसाधिनीं वाञ्छितार्थदायिनीं च सेवे, इति चिन्तयित्वा तत्कालं स्थूलभद्रश्चिकुरलुञ्चनमकरोत्, रत्नकम्बलकृत- रजोहरणमण्डितः स सभामध्ये समभ्येत्य राज्ञः पुरतो धर्मलाभाशिषं ददौ, राज्ञोक्तं भो स्थूलभद्र ! त्वया किमालोचितं, तेन स्वं शिरो दर्शितम् । ततो राज्ञोक्त भो महात्मस्त्वया साध्वालोचितं, साधु समाचरितं चेत्यादि वर्णयित्वा राजा

तत्पादयोर्निपतितः, स्थूलभद्रोऽपि धर्मलाभं दत्त्वा राजमन्दिरान्निर्गतः, श्रीसम्भूतिविजयाचार्यसमीपे च गत्वा सर्वसावद्यव्रतमग्रहीत्, ज्ञानाराधनतत्परश्च स गुरुणा समं विजहार ।

❋ ❋ ❋

**अथ गेयपद्याष्टकेन माध्यस्थ्यभावनां विभावयन्नाह-**

अनुभव विनय सदा सुखमनुभव औदासीन्यमुदारम् रे।
कुशलसमागममागमसारं कामितफलमन्दारम् रे, अनु० ॥१॥ [२२३]

**व्याख्या- हे *विनय !* हे गुणानुयायिचेतन ! उदारमितर-सर्वसुखेभ्यः प्रधानं, *औदासीन्यं सुखं सदाऽनुभव* उदासीने मध्यस्थस्वभावे भवं संपन्नं यत्त*दौदासीन्यं, सुख*मानन्दस्वभावं त्वं *सदा* निरन्तरं सर्वकालम*नुभव* स्वरूपेण प्रीतिरसोत्पादनेन च वेदय । कीदृक् तदित्याह *कुशलसमागमं कुशलः* सर्वाकल्याणवर्जितो मोक्षस्तस्य *समागमः* संगतिः रागद्वेषपक्षाभावान्मुक्तात्मतुल्यस्वभावत्वात् यस्मिन् स तं, *आगमसारं आगम*स्याध्ययनश्रवणमननरूपस्यं *सारं* निष्पक्षपातेन तत्त्वस्य परीक्षणग्रहणादर-स्वभावत्वान्म्रक्षणतुल्यं । *कामितफलमन्दारं कामितफलस्य* स्वाभीष्टकार्यसिद्धे*र्मन्दारं* कल्पवृक्षभूतं समुद्दिष्टकार्यं तेषामवश्यमेव निष्पद्यतेऽतो माध्यस्थ्यं भजेत्यर्थः ॥१॥**

अवन्तिसुकुमालकथा तु यथा आवश्यकनिर्युक्तौ –

आर्यसुहस्तिनोऽपि उज्जयिनीं जीवत्प्रतिमावन्दका गताः, उद्याने स्थिताः भणिताश्च साधवः–वसतिं मार्गयतेति, तत्रैकः संघाटक सुभद्रायाः श्रेष्ठिभार्याया गृहं भिक्षायातिगतः पृष्टास्तया–कुतो भगवन्तः ?, तैर्भणितंसुहस्तिनः, वसतिं मार्गयामः, यानशाला दर्शिताः, तत्र स्थिताः, अन्यदा प्रदोषकाले आचार्या नलिनीगुल्ममध्ययनं परिवर्त्तयन्ति, तस्या पुत्रोऽवन्तीसुकुमालः सप्ततले प्रासादे द्वात्रिंशता भार्याभिः सममुपललति, तेन सुप्तावबुद्धेन श्रुतं नैतन्नाटकमिति भूमेर्भूमिमुत्तीर्णः श्रृण्वन्, बहिर्निर्गतः, क्व । इदृशमिति जातिःस्मृता, तेषां मूलं गतः, कथयति–अहं अवन्तीसुकुमाल इति नलिनीगुल्मे देवोऽभवं, तस्मायुत्सुकोऽस्मि प्रव्रजामि, असमर्थऽहं श्रामण्यमनुपालयितुं इङ्गिनीं करोमि, तेऽपि माता तेनापृष्टेति नेच्छन्ति, स्वयमेव लोचं करोति, मा स्वयंगृहीतलिङ्गो भूदिति लिङ्ग दत्तं, श्मशाने कंथारकुटङ्क, तत्र भक्तं प्रत्याख्यातं, सुकुमालयोः पादयोः रुधिरगन्धेन शिवायाः सशिशुकाया आगमनं, एकं पादं शिवा खादति, एकं शिशवः प्रथमे यामे जानुनी द्वितीये ऊरुणी उदरं कालगतः, गन्धोदकपुष्पवर्षं, आचार्येभ्य आलोचना, भार्याणां परम्परकेण पृच्छा, आचार्यैः कथितं, सर्वर्ध्या स्नुषाभिः समं गता स्मशानं, प्रव्रजिताश्च, एका गर्भिणी निवृत्ता।

❋ ❋ ❋

परिहर परचिन्तापरिवारं, चिन्तय निजमविकारम् रे ।
वदति कोऽपि चिनोति करीरं चिनुतेऽन्यः सहकारम् रे,अनु० ॥२॥ [२२४]

**व्याख्या- हे आत्मन् ! त्वं *परचिन्तापरिवारं परेषामा*त्मनो भिन्नशरीरधनस्वजनादीनां *चिन्तापरिवारं* रक्षणार्जनपालनादिकृते समुद्भवद्विकल्पजालं *परिहर* वर्जय मा कुरु, *अविकारं* समुद्भवविगमादिविकाररहितं *निजम*विनश्वरमात्मस्वरूपं *चिन्तय* ध्यायस्व । *कोऽपि* कश्चिदज्ञो *वदति* ममास्मिन् पक्षपातो नास्ति**

**यथास्थितमेव मयोक्तं इति जल्पति, न तु पक्षपातं मुञ्चति, स *करीरं* दुःखकङ्टकाकीर्णमविश्रामपदं पापराशिकरीरतरुं *चिनोति* समुपार्जयति। *अन्यो*ऽमायावी मध्यस्थोऽपक्षपातित्वेन *सहकारं* सुखसंपादक-सच्छायमधुरफलिनं पुण्यमाकन्दं *चिनुते* समुत्पादयन् वर्ततेऽतो यद्रोचते तत्कुर्वित्यर्थः ॥२॥**

नवपदप्रकरणे चाणक्य-सुबन्धुवृत्तं उक्तं-

पाटलिपुत्रे नगरे उदायिनृपमरणानन्तरोपविष्टनापितनन्दराजान्वयपर्यन्ते चन्द्रगुप्तराजकुले चाणक्ये महत्तमे स्थापिते नवमनन्दसम्बन्धी महत्तमः सुबन्धुनामा निष्कासितः, पुनरपि बिन्दुसारराज्येन लब्धप्रसरः समागतः, चाणक्यस्तु वृद्धः संजातः, तथापि बिन्दुसारः तं बहु मन्यते । अन्यदा बन्धुमहत्तमेनानुपलक्षेण मातृमरणं कथितं, तव माता अनेन उदरविदारणं कृत्वा मारिता, तेन च धात्री माता पृष्टा, तया तदेव प्रतिपादितं, कारणं न कश्चिज्जानाति, ततोऽज्ञातकारणतया रोषं ग्राहितः, प्रभाते अदृष्टिदानादिना अप्रतिपत्तिः कृता, अपमानितो गृहं गतः, पिशुनप्रवेशादिकं कारणं मानुषाणां कथितं, द्रव्यं धर्म्मस्थाने दत्त्वा मानुषाणि धर्मे नियोज्य मारणात्मकान् वासान् विषययोगितान् समुद्गके प्रक्षिप्य मध्ये भूर्जपत्रं निधाय मञ्जूषायामतियत्नेनापवरकमध्ये निधाय आत्मना गोकरीषोपरि अनशनं प्रतिपद्य पादपोपगमनेन स्थितः ।

द्वितीयदिने राज्ञा वार्त्ता लब्धा यथा चाणक्योऽनशनं प्रतिपन्नः, ततः सुबन्धुना बिन्दुसारः उक्तो यथा पितुर्महत्तमस्य पूजा कर्तुं युज्यते, ततश्चायं समीपं गत्वा क्षामितः पूजितश्च राज्ञा, सुबन्धुनापि पुष्पादिपूजां कृत्वा धूपं चोद्ग्राह्याङ्गारस्तत्रैव गोकरीषे प्रक्षिप्तस्तेन च दग्धो मृतश्च देवत्वेनोत्पन्नः । सुबन्धुनापि गृहं तस्य सम्बधी राजादेशेन गृहीतं, प्रविष्टो यावदपवरक उद्घाटितः मध्ये मञ्जूषायाः समुद्गको, यावद्वासान् सुगन्धीन् दृष्ट्वा नासिकाग्रे दत्त्वा पश्चाद् भूर्जितं वाचितं यावद् भूर्जार्थोऽवधारितः, वासगन्धमाघ्राय यः स्नानविलेपनताम्बूलपुष्पविषयादिकं करिष्यति यत्यनुष्ठानेन न स्थास्यति स शीघ्रं प्राणाँस्त्यक्ष्यति, ततो मरणभयभीतेन आत्मीयः पुरुषो गन्धानाघ्राय स्त्रीसेवादिकं कारितः मृतः, ततश्चिन्तितं म्रियमाणेन मारितोऽहं, प्राणभयभीतः शिरस्तुण्डमुण्डनादिकं कृत्वा स्नानगन्धताम्बूलादि परित्यज्यं यतिवत् स्थित इति ।

योऽपि न सहते हितमुपदेशं तदुपरि मा कुरु कोपम् रे ।
निष्फलया किं परजनतप्त्या, कुरुषे निजसुखलोपम् रे, अनु० ॥३॥ [२२५]

**व्याख्या- हे आत्मन्! त्वं *योऽपि* कश्चित्कदाग्रही *हितोपदेशं* यथार्थवस्तुस्वरूपमयजिनाद्यवहित-धर्मोपदेशं *न सहते* सत्यत्वेन न श्रद्धात्यपि, तदनुष्ठानं तु दूरेऽस्तु, सत्येन रोचयत्यपि न *तदुपरि कोपं मा कुरु* तस्योपरि रुष्टो मा भव । कुतोऽयं निषेधः? यतो *निष्फलया* स्वपरोपकारसिद्धिरहितया *परजनतप्त्या* अन्यजनानां चिन्तया सन्तापेन च *निजसुखलोपं* स्वात्मनः सुखविनाशं *किं* निरर्थकं *कुरुषे* विदधासीत्यर्थः ॥३॥**

उपदेशप्रासादे कालकाचार्यवार्ता -

उज्जयिन्तां श्रीकालिकाचार्याः सदोद्यतविहारिणोऽभवन् । तेषां पार्श्वस्थाः शिष्यास्तु सर्वे पार्श्वस्थतां दधुः, साध्वाचारेऽप्यनुपयोगाः । तान् सूरयो नित्यं शिक्षयामासुः, परं ते तु शुनो लाङ्गूलवद् वक्रतां न तत्यजुः । ततस्ते खिन्ना दध्युः-एतेषां सारणादिभिर्मे स्वाध्यायोऽसीदति, कश्चिदप्येषां मद्वाक्यैर्गुणो न

जायते । अत्र वृद्धवाक्यानुसारेणं श्रुतप्रबन्धो लिख्यते–एकदा श्रीसीमन्धरजिना इन्द्रेण पृष्टाः–स्वामिन् भरतक्षेत्रेऽधुना कोऽपि तादृशो विद्वान् वर्तते यः पृष्टो युष्माभिः प्रोक्तं निगोदस्वरूपं वर्णयति ? प्रभुः प्राह–हे इन्द्र ! आर्यकालिकसूरयोऽधुना मदुक्तानुसारेण श्रुतपाठबलेन तथैव कथयन्ति । तत इन्द्रो जराजर्जरिताङ्गं विधाय शनैः शनैः पुरो व्रजन् यष्टिकाधारं कृत्वा गुरुपार्श्वं समेयाय, अयस्कारभस्त्रेव श्वासोच्छ्वासान् वहन् गुरुन्नत्वा पप्रच्छ–स्वामिन् ! अहं वृद्धो जरामग्नो जातः, इदानीं कियत्परिमाणं ममायुः शेषं विद्यते ? मत्करेखां शास्त्रानुसारेणावलोक्य कथयितुं प्रसीद । पुत्रकलत्रादिभिर्दूरोत्सारितो–ऽहमेकाकी कष्टेन दिनानतिवाहयामि । यूयं षड्जीवनिकायदयापरा मय्यनुग्रहं कुरुत । इति दीनवाक्यानि श्रुत्वा गुरवः करावलोकनं कुर्वन्तः किञ्चित्तस्य चेष्टायथार्थभाषणादिभिस्तथा किञ्चिद्दत्तश्रुतोपयोगेन चाद्यकल्पाधिपं विज्ञाय मौनं दधुः ।

स प्राह–स्वामिन् ! अहं जरापीडितोऽस्ति, बहुवेलां स्थातुं न शक्तः, शीघ्रं वाचं प्रयच्छ, अथोत्तरकालं कियन्मितं जीवितं मेऽस्ति ? पञ्च वर्षाणि यावत् ? किं वा न्यूनमधिकं वा ? गुरुराह– अधिकतरम् स स्माह–किं दश वर्षाणि यावत् ? गुरुः–एतेभ्योऽपि महदधिकतरम् । स स्माह–किं तर्हि विंशतिवर्षाणि ? किं वा त्रिंशद्वर्षाणि ? उत चत्वारिंशद्वर्षाणि ? स्वामिन् ! ब्रूहि सत्यम् । गुरुः प्राह–किं पुनः पुनः पृच्छ्यते ? युष्मदीयमायुरङ्कगगनादतिरिक्तमपरिमितमस्ति । मुनिसुव्रतस्वामिशासने त्वयेन्द्रत्वं लब्धं, वर्तमानचतुर्विंशतिकान्तिमचतुर्जिनानां पञ्चकल्याणकोत्सवस्त्वया विहितोऽस्ति, आगामिचतुर्विंशतिकाजिनानां कतिपयानां वन्दनार्चनां करिष्यसि, अतः किञ्चिन्न्यूनद्विसागरोपममितमायुर्विद्यते । इति श्रुत्वा हृष्टो निगोदादि–स्वरूपमापृच्छ्य गतसंदेहः श्रीसीमन्धरप्रणीतप्रशंसां तस्मै निवेद्य प्राह–स्वामिन् ! मत्सदृशं कार्यं समादिश । गुरुराह–धर्मरतानां सङ्घानां निर्विघ्नतां विधेहि । ततः स स्वधिया दिव्यं मनोहरमुपाश्रयद्वारमन्यत्र दिशि संस्थाप्य द्रुतं स्वर्ययौ ।

इतश्च गुरुशिष्या भिक्षार्थं पुरमध्ये गता अभवँस्ते समेयुः, गुरुं प्राहुश्च–स्वामिन् ! किं द्वारमन्यत्र परावर्तितम् ? यूयमपि विद्याश्चर्यत्ववीक्षणेषु सस्पृहास्तर्ह्यस्मादृशां को दोषः ? गुरु प्राह सर्वंयथास्थितं वृत्तान्तमिन्द्रागमनादिकम् । ततस्ते प्रोचुः–अस्माकमपीन्द्रदर्शनं दर्शय । गुरुः स्माह–न देवेन्द्रो मद्वचनानुगः, किंतु स्वेच्छया समागतो गतश्च, अत्रार्थे कदाग्रहो नोचितः । ततस्ते विनेयाश्च्युतविनया आहारादिकं न तन्वन्ति । ततो गुरव उद्विग्ना निशावसाने तान् सुप्तान्मुक्त्वा शय्यातरश्राद्धाय परमार्थं निवेद्य नगर्या निर्ययुः । विहरन्तः स्वयं स्वर्णभूमौ ययुः ।

❋ ❋ ❋

**सूत्रमपास्य जडा भाषन्ते केचन मतमुत्सूत्रं रे ।**
**किं कुर्मस्ते परिहृतपयसो, यदि पीयन्ते ( पिबन्ति ) मूत्रं रे, अनु० ॥४॥[२२६]**

**व्याख्या– *केचन* कियन्तो *जडा* मूर्खशिरोमणयः *सूत्रं* सुशास्त्राधारं, *अपास्य* परिहृत्य *भाषन्ते* स्वच्छयैव यद्वा तद्वा जल्पन्ति । तथा केचन *उत्सूत्रं* शास्त्रविरुद्धमिदमिति जानन्तोऽपि *मतं* स्वाभिप्रेतमेव प्ररूपयन्ति । तत्र वयं *किं कुर्मः* ? यत्तेऽज्ञाः *परिहृतपयसः परिहृतं* त्यक्तं *पयो* मधुरदुग्धं यैस्ते, तथा भूत्वा *यदि मूत्रं* प्रस्रवणं स्वरुच्या *पीयन्ते* तर्हि पिबन्तु, का नो हानिरित्यर्थः ॥४॥**

उपदेशप्रासादे दिगम्बरमतस्थापकशिवभूतिवक्तव्यं तु इदं –

रथवीरपुरे शिवभूत्याह्वः क्षत्रियः सहस्रयोधी । तत्र राजसेवां कुर्वति नृपो दध्यौ–अस्य वीर्यादिगुणान् परीक्षेऽहम् । ततः श्यामचतुर्दश्यां पशुमेकं वारुणीं च तस्य दत्त्वैवं प्रोक्तम्–त्वमेकाकी निशीथे प्रेतवने बलिं दत्त्वा समागच्छ । स रात्रौ तत्र गतः । अनेकभूतप्रेतैर्भापितः, परं रोमोद्भेदोऽपि तस्य नाभूत् । नृपस्तं शूरमवबुध्य बह्वीं वृतिं ददौ ।एकदा पार्थिवेन दक्षिणमथुरानृपजयार्थं सहस्रनराः प्रेषिताः, उत्तरमथुरानृपजयार्थमेकः शिवभूतिः प्रेषितः, स क्षणेन जित्वाऽऽगात् । ततः सहस्रमल्ल इति नाम कृत्वा नृपो वरं याचस्व इति तं प्राह । सोऽप्यूचे–हे प्रभो ! मम स्वातन्त्र्यं देहि । नृपेण दत्ते स राजप्रासादाद्विलासान् कुर्वन् नगरमध्ये पर्यटति । रात्रौ स प्रहरद्वयेऽतिक्रान्ते गृहमागच्छति । तत एतदीयभार्या तन्मातरं भणतिनिर्वेदिताऽहं त्वत्पुत्रेण । न खल्वेष रात्रौ वेलायां कदाचिदप्यागच्छति, तत उज्जागरकेण क्षुधया च प्रत्यहं बाध्यमाना तिष्ठामि । तयोक्तम्–वत्से ! त्वमद्य स्वपिहि, अहं जागरिष्यामि । ततः स मध्यरात्रौ समेत्य प्रोक्तवान्–द्वारमुद्घाटय । ततः प्रकुपितया मात्रा प्रोक्तम्–हे दुर्जन ! यन्निशीथे यतेतस्यां वेलायां द्वाराण्युद्घाटितानि सन्ति तत्र गच्छ ।

श्रुत्वेत्यतिक्रोधपरेण पर्यटताऽपावृतद्वारः साधूपाश्रयो दृष्टः, तेषां पार्श्वे तेन वन्दित्वा व्रतं याचितम् ।तैश्च राजवल्लभो मात्रादिभिरमुत्कलितश्चेति न दत्तम् । ततः खेलमल्लकाद्रक्षां गृहीत्वा तेन स्वयमेव लोचः कृतः । कृष्णसूरिसाधुभिर्लिङ्गं समर्पितम् ।कालान्तरेण कृष्णाचार्येण सह विहरँस्तत्रागात् ।राज्ञा सहस्रमल्लाय रत्नकम्बलो दत्तः । तत आचार्यैः शिवभूतिरुक्तः–किमनेन साधूनामनेकपापहेतुना गृहीतेन ? ततस्तेन संगोप्य मूर्च्छया धृतः, प्रत्यहं संभालयति ( रक्षति ) । गुरुभिर्मूर्छितोऽयमत्रेति ज्ञात्वा तस्मिन् क्वापि गते । तत्कम्बलरत्नं पाटयित्वा साधूनां पादप्रोञ्छनकादीनि कारितानि ततो ज्ञातव्यतिकरः कषायितस्तिष्ठति । अन्यदा सूरयो जिनकल्पिकान् वर्णयन्ति–ते जिनकल्पिका द्विविधाः, एके पाणौ भुञ्जते, अन्ये तु पात्रकेऽश्नन्ति, तेऽपि प्रत्येकं जिनैर्द्विधा प्रोक्ताः, एके स्वल्पसचेलका अन्ये त्वचेलकाः इति श्रुत्वा शिवभूतिना प्रोक्तम्–यद्येवं तर्हि किमिदानीं बहूपधिः परिगृह्यते ? स जिनकल्पः किं न क्रियते ? गुरुर्जगौ–भारते श्रीवीरपौत्रेण श्रीजम्बूस्वामिना समं जिनकल्पादिदशवस्तुव्युच्छेदोऽभूत्, संहननाद्यभावात्साम्प्रतमसौ कुर्तुं न शक्यते एव ।

ततोऽसाववक्–अल्पसत्त्वानां व्युच्छिन्नोऽसौ, न मादृशां, मादृशो हि महासत्त्वोऽधुनाऽप्यमुं कर्तुमीष्टे, मोक्षार्थिना सकलपरिग्रहस्त्याज्य एव किं पुनरनेन कषायमूर्छादिदोषनिधिना परिग्रहानर्थेनेति । अचेलका जिनेन्द्राः, अतोऽचेलतैव सुन्दरेति । ततो गुरुणा प्रोक्तम्–हन्त यद्येवं तर्हि देहेऽपि कषायभयमूर्छादयो दोषाः कस्यापि संभवन्तीति सोऽपि व्रतग्रहणानन्तरमेव त्याज्यः । यच्च श्रुते निष्परिग्रहत्वमुक्तं तद्धर्मोपकरणेषु मूर्छा न कर्तव्येति, न पुनः सर्वथा धर्मोपकरणस्य त्यागः । अथ जिनेन्द्रा अपि सर्वथा नाचेलकाः सव्वेऽवि एगदूसेण निग्गया जिणवरा चउवीसं ( १ ) इत्यादि–वचनात् । तदेवं गुरुणा स्थविरैश्च यथोक्तादिभिर्वक्ष्यमाणाभिश्च युक्तिभिः प्रज्ञाप्यमानोऽपि तथाविधकषायमोहोदयान्न स्वाग्रहान्निवृत्तोऽसौ । किंतु चीवराणि परित्यज्य निर्गतः । ततश्च बहिरुद्याने व्यवस्थितस्य तस्योत्तरा नाम भगिनी वन्दनार्थं गता । सा च त्यक्तचीवरं तं भ्रातरमालोक्य स्वयमपि चीवराणि त्यक्तवती । ततो भिक्षार्थं नगरमध्ये प्रविष्टा गणिकया दृष्टा । तत इत्थं

विवस्त्रां बीभत्सामिमां वीक्ष्य माऽस्माँल्लोकस्त्याक्षीत् इत्यनिच्छन्त्यपि तया वस्त्रं परिधापिताऽसौ । तत एष व्यतिकरोऽनया शिवभूतये निवेदितः । ततोऽनेन विवस्त्रा योषिन्नितरां बीभत्याऽतिलज्जनीया स्यात् इति विचिन्त्य प्रोक्ताऽसौ–तिष्ठत्वमित्थमपि, न त्यक्तव्यं च त्वया वस्त्रम् ।

अथानेके जैनसाधवस्तं प्रतिबोधयन्ति । यस्मात्त्रिभिरेव स्थानैर्वस्त्रधारणमनुज्ञातमागमे नैकान्ततः । उक्तं च–तिहिं ठाणेहिं वत्थं धारज्जा–हिरिवत्तियं १ दुगंछावत्तियं २ परिसहावत्तियं ३ ।(२) तत्र ह्रीर्लज्जा संयमो वा प्रत्ययो निमित्तं यस्य तत् । तथा जुगुप्सा लोकविहिता निन्दा सा प्रत्ययो यस्य तत् । तथा परीषहाः शीतोष्णदंशमशकादयः प्रत्ययो यत्र तत् । इत्युक्तहेतवे वस्त्रं धार्यम् । तेन न स्वीकृतं ।

❋ ❋ ❋

पश्यसि किं न मनःपरिणामं, निजनिजगत्यनुसारम् रे ।
येन जनेन यथा भवितव्यं, तद्भवता दुर्वारम् रे, अनु० ॥५॥ [२२७]

**व्याख्या- हे चेतन ! त्वं *निजनिजगत्यनुसारं* भाविनी या निजा स्वकीया *गति*र्जन्मान्तरप्राप्तिः तस्या *अनुसारं* सदृशं वर्तमानं जनानां *मनःपरिणामं* हृदयाकूतं *किं न पश्यसि* केन कारणेन न विलोकयसि ? स्वचेतसा तद्विलोक्य माध्यस्थ्यं भज । कोऽत्र परमार्थ इत्याह येन हेतुना *येन जनेन यथा भवितव्यं येन* केनचिदनिर्दिष्टनामधेयेन *जनेना*वश्यं विपाकेन वेदितव्यनिकाचितकर्मवता प्राणिना *यथा* येन सुखित्वदुःखित्वसुरनरनैरयिकत्वादिना प्रकारेण *भवितव्यं* नियमेन भविष्यत्येव, तस्य तथा *तन्नि*यतभाविभवनं *भवता* त्वयोपायोल्लापिना *दुर्वारं* दुष्करनिवार्यमिति माध्यस्थ्यमेव भजनीय-मित्यर्थः ॥५॥**

नियतभाविभवनं कृष्णमृत्युदर्शितं कथानकं तु इदं यथादानादिकुलके –

कृतनिदानद्वैपायनेन लोकैः सह द्वारिकाज्वालिता अथ तौ रामकृष्णौ द्वारिकातो निर्गतौ शरीरादात्मनाविवेककौ, कस्मिंश्चिद्गिरिशिखरे गतौ, तत्र स्थितौ तौ द्वारिकां नगरीं ज्वलन्तीं षण्मासान् यावद्व्यलोकयतः । ततस्तस्यां भूमौ सागरेण विलुप्तम् । ततस्तौ रामकृष्णौ तत्स्थानान्निर्गत्य क्रमेण कौशाम्बीकानने गतौ, तत्रैकस्य वटस्याधः पृथिवीशिलापट्टके निषण्णौ । तदा तृषाक्रान्तः कृष्णो बलभद्रं ययाचे, भो बान्धव ! मां तृषा बाधते, तस्मान्मदर्थं जलमानय । ततो बलदेवो वनदेवान् संस्मृत्य कृष्णं बान्धवं तान् समर्प्य तत्र शिलायां सुप्तमेकाकिनं मुक्त्वा स्वयमेकाकी जलमानेतुं जलाश्रयं गतः, अहो विधिर्बलीयान्, यः कृष्णो पूर्वं देवसहस्रैर्वेष्टितोऽभूत्तथा राज्ञीसहस्रैः परिवृतोऽभूत्तथा दासदासीभिरावृतोऽभूत्सोऽयं श्रीकृष्णः साम्प्रतं महावने एकस्य वटवृक्षस्याध एकाकी शिलायां सुप्तो वर्तते, धिग्संसारस्वरूपं ! यतः –

ही संसारसहावं चरियं नेहाणुरायरत्तावि । जे पुव्वन्ने दिठ्ठा ते अवरन्ने न दीसन्ति ॥

अथ तस्यां शिलायां सुप्तस्य श्रीकृष्णस्य निद्रा समागता । इतश्च यो जराकुमारः पूर्वं द्वारिकातो निर्गतो द्वादशवर्षाणि यावद्वनाद्वनं बभ्राम सोऽकस्माद्दैववशात् कथमपि तत्रागतः, हरिं शिलायां सुप्तं पीताम्बरावृतं निद्रामुपागतं निरीक्ष्य स्वर्णमृगभ्रान्त्या तेन जराकुमारेण तस्योपरि तीक्ष्णो बाणो मुक्तः, तेन बाणेन वामपादतले विद्धो जागरितो जनार्दन एवमवादीत्–कोऽसौ भोऽप्रार्थ्यको यो मां सुप्तं निद्रावशमुपगतं तीक्ष्णेन बाणेन हन्ति? यः कोऽपि वीरमानी स्ववीरत्वं मन्यते स मम पुरो भूत्वा स्वं वीरत्वं दर्शयतु । तद्धरिणोक्तं श्रुत्वा

जराकुमारः श्रीकृष्णं ज्ञात्वात्मानं निन्दन् द्वादशवर्षाणि वने भ्रमणं वृथा कथयंस्त्वरितं तत्र समागतः, बन्धोश्चरणयोर्निपति सः, तदा श्रीकृष्णेन स बाहुभ्यां धृत्वा भृशं समालिङ्गितः, ततस्तेन पृष्टो द्वारिकावृत्तान्तो हरिणा मूलादारभ्य सर्वोऽपि निवेदितः तद्धरिणोक्तं श्रुत्वा जराकुमारेण भृशं रुदितं, तदा हरिणोक्तं हे बन्धो ! भगवता श्रीनेमिनाथेन यदुक्तं तज्जातं, किमत्र शोचनं! यद्भावि तद्भवति, नात्र विचारहेतुः । हरिणेत्याद्युक्त्वा तोषितो जराकुमारः, भाषितश्च भो बान्धव! ममेदं कौस्तुभरत्नं त्वं गृहाण । तद् गृहीत्वा पाण्डुमथुरायां गत्वैतत्सकलमपि वृत्तान्तं पाण्डवानामग्रे निवेदयेः, एतदलङ्कारं च दर्शयेर्यथा तेषाभिज्ञानं दृष्ट्वा निश्चयो भवति, तथा तव राज्यादिकं किञ्चिद्ददाति, यदि त्वमितो न यास्यसि तदा बलभद्रस्त्वां निश्चयेन हनिष्यति । तत् श्रुत्वा भीतो जराकुमारो रुदन् शीघ्रं पाण्डुमथुरां प्रति चलितः ।

अथ श्रीकृष्णो बाणोद्धरणं विधाय व्रणे पट्टबन्धं च कृत्वैवं दध्यौ, धन्यास्ते मम बान्धवाः पुत्रा राज्ञयो ये सर्वसङ्गपरित्यागं कृत्वा मोहमल्लं वशीकृत्य मोक्षं जग्मुः । अहं पुनरधन्यो यः संसारसागरे मग्नः: स्वकृतकर्मणेदृशीं दशां प्राप्तः । एवंविधया लेश्यया तृतीययां नरकपृथिव्यां गन्तुं न शक्यते, अतो विधिना तस्य कृष्णस्य लेश्यापरावर्तो विहितः, तेन प्राणान्तसमये हरिश्चिन्तयामास यथाहो पापिना द्वैपायनसुरेण किमकार्यं कृतम्? एवंविधोऽप्यहं यदि तं पापिनं सुराधमं कथमपि पश्यामि तर्हि निश्चयेन तं हत्वा यमातिथिं कृत्वा वैरनिर्यातनं करोमीति ध्यायन्नप्रत्याख्यानकं क्रोधमनन्तानुबन्धित्वेन परिणमय्या निधनं गतः । एवं स मृत्वा वालुकाप्रभायां नरकपृथिव्यामुज्ज्वलके नरकावासे नारकत्वेनोत्पन्नः । अहो कर्मणां गतिः ! एवंविधः पुमाननया रीत्या मृत्वा नरके याति ।

❋ ❋ ❋

**रमय हृदा हृदयङ्गमसमतां, संवृणु मायाजालम् रे ।**
**वृथा वहसि पुद्गलपरवशता-मायुः परिमितकालम् रे, अनु० ॥६॥ [२२८]**

**व्याख्या- हे चेतन ! त्वं *मायाजालं* जीवमत्स्यबन्धनविधायिनी *माया* छलवृत्तिरूपकपटचिन्तन-भाषणसमाचरणं सैव *जालं* जन्तुग्राहकपाशः तत् *संवृणु* संक्षिप्तं कुरु निरोधयेति यावत् । *हृदयङ्गमसमतां हृदयङ्गमा* मनोहरा युक्तियुक्तेति यावत्, तादृशी या *समता* सर्वत्र तुल्यपरिणामिता तां, *हृदा* हृत्कजेन सह *रमय* क्रीडय । *पुद्गलपरवशतां पुद्गलाः* रागद्वेषमनोवाक्कायादयस्त एवात्मनो विजातीयत्वेन *परे*ऽन्ये तेषां या *वशता* नियन्त्रणा तदधीनवर्तना तां, *वृथा वहसि* स्वार्थं विनैव प्राप्नोषि । कुत एवं? यतस्त*वायु*र्जीवितं *परिमितकालं* पञ्चाशत्षष्टिवर्षं यावन्मितकालं विद्यते, परवशेन स्वार्थं संपादयितुं न शक्नोषीत्यर्थः ॥६॥**

क्षेमर्षिशिष्यकृष्णर्षिचरित्रं यथोपदेशप्रासादे-

मालवदेशे धारायां सिन्धलभूपोऽभूत् । तत्र क्षेमर्षिः पञ्चभिः सप्तभिः ककारैः खकारैः कूरकंसारकाङ्गकोद्रवकरम्बकइरकर्पटां खारेकखुडहडीखर्जूरखाण्डखीचडम्, एवं गकारैः गहुङ्गोल-गुन्दगुन्दवडाङ्गणागोलागोरस इत्याद्यपरैरपि वर्णैः पारणं चकार । तपःप्रभावात्सर्वेऽप्यभिग्रहाः पूर्णाः । एतेऽभिग्रहा न दुष्करा इत्युदग्रमभिग्रहं जग्राह-यदि मिथ्यात्वी राज्यभ्रष्टः कान्दविकापणे मध्याह्ने पर्यस्तिकासनस्थः पत्तित्वं प्राप्त कृष्णत्वमितान् केशान् विवृण्वन् एकविंशतिमितान्मण्डकान् शातकुन्ताग्रेणदास्यति तदा पारणं कुर्वे, नान्यथा ।

**न्हाणविय रावल·कन्हडो, केशि गलंतइ मणदुम्मणो**
**भल्लइं इगवीस मंडा देइ, तओ खिमरिषी पारणं करेइ ।।**

इत्यभिग्रहवान्मुनिरष्टदिनसहितान् त्रीन्मासानतिचक्राम । अन्यदा मध्याह्ने कृष्णपत्तिस्तथा स्थितो भिक्षायै यान्तां मुनिमाकार्य "एहि भिक्षो ! तवाशां पूरयामि" इत्युवाच । मुनिस्तच्छ्रुत्वा गतः । कृष्णः कुन्ताग्रेण मण्डकान् लात्वा यावद्दत्ते तावन्मुनिना "गणय" इत्युक्ते "तव भाग्ये यावन्तः स्युस्तावन्तः, किं गण्यन्ते ?" इति कृष्णेनोक्तम् । मुनिना "मेऽभिग्रहोऽस्त्येकविंशत्या" इत्युक्ते एकविंशतिर्गणितास्तेन । स तद्वीक्ष्यातीव चमत्कृतो मुनिमित्युवाच–"मुने ! त्वं ज्ञानी, ममायुः कियदस्ति ? अहं स्वगोत्रिभिर्महा– राज्यान्निष्कासितः, तान् जेतुं सिन्धुलनृपं सेवे" । इति श्रुत्वा यतिरुवाच–"तव षण्मासायुः" इति श्रुत्वा वैराग्याद्दीक्षां लात्वा षण्मासान् तपस्तप्त्वा स्वराप कृष्णर्षिः ।

❋ ❋ ❋

अनुपमतीर्थमिदं स्मर चेतनमन्तःस्थितमभिरामम् रे ।
चिरं जीव विशदपरिणामं, लभसे सुखमविरामम् रे, अनु० ।।७।। [२२९]

**व्याख्या– हे *चेतन !* हे प्राणिन् ! त्वं इदमौदासीन्यं अभिराममतिशयेन रमणीयं, *अनुपम*मन्यैरुपमातुमशक्यं *अन्तःस्थितं* स्वासन्नतरमात्मनि प्रतिष्ठितं *तीर्थं* भवसिन्धोर्निरपायनिगमनतटं *विशदपरिणामं* शुद्धनिर्मलस्वहितफलदं *स्मर* ध्यायस्व, तेन ध्यानेन त्वं हे *जीव* ! हे आत्मन् ! *चिरं* चिरकालपर्यन्तं *अविरामं* निरन्तरं निरवसानं *सुखमा*नन्दं *लभसे* प्राप्नोषीत्यर्थः।।७।।**

इलापुत्राख्यानं तु इदं –

कस्मिंश्चिदेको ग्रामेऽभूद्, द्विजो धर्मं निशम्य सः । चारित्रं सद्गुरोरन्ते, सकलत्रोऽप्युपाददे ।।1 ।।
तेपाते तौ तपस्तीव्रं, परं प्रेम मिथो महत् । विचिकित्सां ब्राह्मणीति, चक्रे स्त्रीशूद्रसङ्गजाम् ।।2 ।।
मृत्वोत्पन्नावुभौ देवौ, तदनालोचितागसौ । इतश्च भारतेऽत्रैवाभूदिलावर्द्धनं पुरम् ।।3 ।।
तत्रेलानामतः सातिशया देव्यस्ति विश्रुता । तां सेवतेतरामेका, सार्थवाही सुतार्थिनी ।।4 ।।
कुक्षौ तस्यास्ततश्च्युत्वोत्पेदे जीवो द्विजन्मनः । इलापुत्र इति नाम, कृतमुत्सवपूर्वकम् ।।5 ।।
ब्राह्मण्यभूद् विचिकित्सावशात् लङ्खकुले सुता । द्वावप्युद्यौवनं प्राप्तौ, मन्मथद्रुमदोहदम् ।।6 ।।
लङ्खपुत्रीमिलापुत्रो, नृत्यन्तीमन्यदैक्षत । प्राग्भवप्रेमतस्तस्यां, भृशं रागार्दितोऽभवत् ।।7 ।।
सुहृद्भिः प्रार्थिता साऽस्य, लङ्खमुख्यास्ततोऽवदन् । यच्छामः कथमप्येनां, नाक्षयो निधिरेव नः ।।8 ।।
चेद् विद्यां शिक्ष्य(क्ष)तेऽस्माकं, साकं भ्रमति चैष नः । तदैनां लभते स्वर्णतोलितामपि नान्यथा ।।9 ।।
ततः कर्मवशाद् रागात् स्वीचक्रे तदिलासुतः । श्रेष्ठं श्रेष्ठिकुलं त्यक्त्वा, तन्निषेवेऽधमं कुलम् ।।1 0 ।।
तद्विद्यां शिक्षितः सम्यग्, विवाहायार्जितुं धनम् । बेन्नातटपुरं प्राप्तो, ययाचेऽवसरं नृपात् ।।1 1 ।।
दत्त्वावसरमेतस्मै, स्वान्तःपुरपरीवृतः । राजा सनागरोऽद्राक्षीत्, तत्कृतं नाट्यमीदृशम् ।।1 2 ।।
पूर्वमूर्ध्वीकृतस्तत्र, महान् वंशोऽस्य चोपरि । फलकं प्रान्तयोस्तस्य, द्वौ द्वौ स्तो लोहकीलकौ ।।1 3 ।।
फलकान्तरसौ स्थित्वा, हस्तोपात्तासिखेटकः । मूलच्छिद्रयुतोपानद्द्वयं परिदधात्यथ ।।1 4 ।।
सप्ताग्रतोमुखान्युच्चैः, सप्त पश्चान्मुखान्यपि । उत्पत्योत्पत्य गगनेऽप्रमत्तः किरणान्यदात् ।।1 5 ।।

पादुकाच्छिद्रयोरन्तः प्रवेशयति कीलकौ । कथञ्चिद् पतति ततश्चेद् याति शतखण्डताम् ।।16।।
सर्वे दानोन्मुखास्तस्य, रञ्जिताः कलयाऽभवन् । अदातरि परं राज्ञि, पूर्वं नो कश्चिदप्यदात् ।।17।।
सा गीतं गाथकीवृन्दवृता गायति सुस्वरम् । अद्वैतरूपां तां वीक्ष्य, नृपो रागार्दितोऽभवत् ।।18।।
राजाऽऽहोत्पतनं नैव, दृष्टं भोः ! कुरु तत् पुनः । एवं द्वित्रिचतुर्वरं, कृतं तेन कलावता ।।19।।
परं लङ्खसुतारक्तो, म्रियते चेत् पतत्ययम् । पश्चात् परिणयाम्येनामिति दध्यौ नृपो हृदि ।।20।।
साधुकारः कृतो लोकैरदातरि नृपे ततः । दध्यौ नटो मां कन्यार्थे, मृतमिच्छति राड् ध्रुवम् ।।21।।
इतश्चेलासुतोऽद्राक्षीद्, वंशस्थो धनिनां गृहे । स्त्रीभिरद्भुतरूपाभिर्दीयमानौदनान् मुनीन् ।।22।।
तद्रुपादौ परं तेषां, न मनः किन्तु भक्तगम् । तद्वीक्ष्याचिन्तयदसौ, दुष्कर्मावरणक्षयात् ।।23।।
अहो ! निःस्पृहताऽमीषां, नीरागाणां महात्मनाम् । धिङ् मां केयमवस्था मे, कुलीनस्याकुले स्थितिः ।।
शुभध्यानवशादेवं, वंशाग्रस्थोऽपि केवलम् । लेभे ज्ञानमिलापुत्रो, योगस्याहो ! विशिष्टता ।।25।।
लङ्खपुत्री नृपो राज्ञी, त्रयोऽप्येवं विरागतः । लेभिरे केवलज्ञानं लिङ्गं च देवतार्पितम् ।।26।।
स्वर्णाम्बुजीभूतवंशोपरि तिष्ठन्निलासुतः । भविकान् बोधयामास, तत्रस्थान् धर्मदेशनात् ।।27।।

❋ ❋ ❋

परब्रह्मपरिणामनिदानं स्फुटकेवलविज्ञानम् रे ।
विरचय विनयविवेचितज्ञानं, शान्तसुधारसपानम् रे, अनु० ।।८।। [२३०]

।। इति श्रीशान्तसुधारसगेयकाव्ये माध्यस्थ्यभावनाविभावनो नाम षोडशः प्रकाशः ।।

व्याख्या– हे विनय ! हे विनीतात्मन् ! पूर्वोक्तमौदासीन्यं *परब्रह्मपरिणामनिदानं परं* प्रकृष्टं *ब्रह्म* निर्विकारं निरञ्जनं शुद्धचैतन्यं तद्रूपः यः *परिणाम*श्चेतनस्य तेन रूपेण परिणमनभवनं तस्य *निदानं* परमसाधनं वर्तते । तथेदमेव *स्फुटं* स्पष्टं *केवलं* रागादिपरिणतिमिश्रतारहितं *विज्ञानं* विशिष्टज्ञानमेव वर्तते तथेदमेव *विवेचितज्ञानं विवेचितं* यथार्था-यथार्थशुद्धाशुद्धादितया निर्धार्य पृथक्कृतं येन *ज्ञानं* शास्त्ररचितरूपं जनहृदि परिणतं भाषितरूपं च तथाभूतं वर्तते । तथेदमेव षोडशप्रकाशैर्दर्शित-ज्ञानपरिणतिरूपं *शान्तसुधारसपानं* भवति । *तद्विरचय* निरन्तरं विधेहीत्यर्थः ।।८।।

।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यश्रीमुक्तिविजयगणिसतीर्थ्य-तिलकमुनिश्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचितायां श्रीशान्तसुधारस-टीकायां माध्यस्थ्यभावनाविभावनो नाम षोडशः प्रकाशः समजनि ।।

❋ ❋ ❋

## । अथ प्रशस्तिः ।

( स्रगधरावृत्तद्वयम् )

एवं सद्भावनाभिः सुरभितहृदयाः संशयातीतगीतो-
न्नीतस्फीतात्मतत्त्वास्त्वरितमपसरन्मोहनिद्राममत्वाः।
गत्वा सत्त्वा ममत्वातिशयमनुपमां चक्रिशक्राधिकानां
सौख्यानां मङ्क्षु लक्ष्मीं परिचितविनयाः स्फारकीर्तिं श्रयन्ते ।।१।। [२३१]

व्याख्या– *एवं* षोडशभिः प्रकाशैः प्रोक्तप्रकारेण *सद्भावनाभिः सत्यः* समीचीनाः समुज्ज्वलपरिणामोत्पादनप्रवणाः *भावना* वस्तुतत्त्वपर्यालोचनात्मका आत्मनश्चिन्तनाध्यवसायास्ताभिः *सुरभितहृदयाः सुरभितान्यधिवासितानि हृदयानि* मनांसि येषां ते तथाविधाः सन्तः *संशयातीतगीतोन्नीतस्फीतात्मतत्त्वाः संशया* नानाजातीयसन्देहास्तैर*तीतं* सुनिश्चितकृतत्वाद्रहितं, *गीतं* समुत्कीर्तितं, *उन्नीतं* ज्ञानिभिर्यादृशं महत्त्वं प्रोक्तं तादृशं, *स्फीतं* गुणसमृद्धं व्याप्त*मात्मतत्त्वं* येषां ते तथाविधाः सन्तः *त्वरितं* शीघ्रं *अपसरन्मोहनिद्राममत्त्वाः अपसरन्ती* सुदूरमपुनर्भावितया सत्तातो विनश्यन्ती, *मोहनिद्राममत्वे* **मोहोऽज्ञानादिरूपस्त**दात्मिका *निद्रा* सुषुप्त्यादिरूपा *ममत्वं* पौद्गलिकचेतनरूपस्वभिन्नदेहगेहवनितापुत्रादिपदार्थेषु मदीयत्वबुद्धिर्येषां ते तथाविधाः सत्त्वाः भावनाभावितमतिप्राणिनः, *अममत्वातिशयं गत्वा* निर्ममत्वस्वभावप्रकर्षाधिक्यं प्राप्य *परिचितविनयाः* प्रचुरतरसमर्जितविनीतभावाः *चक्रिशक्राधिकानां चक्रिणः* षट्खण्डभरतक्षेत्राधिपतयः, *शक्राः* सौधर्मेन्द्रादयो देवेश्वराः, *अधिका* अहमिन्द्रा ग्रैवेयकानुत्तरसुरास्तेषां *सौख्यानां* सुखान्यानन्दविशेषास्तेषां भावा उपभोगतया प्राप्तयस्तद्रूपाणां, *अनुपमां* उपमातुमशक्यामनन्यसदृशीमिति यावत् तां । *लक्ष्मी*मानन्दसंपदं *मङ्क्षु* सत्वरं *श्रयन्ते* प्राप्नुवन्ति । तथा *स्फारकीर्तिं स्फाराम*तिशयत उदारां विशालामिति यावत्, *कीर्तिं* सुयशोराशिं *श्रयन्त* इत्यर्थः ।।१।।

दुर्ध्यानप्रेतपीडा प्रभवति न मनाक्काचिदद्वन्द्वसौख्य-
स्फातिः प्रीणाति चित्तं प्रसरति परितः सौख्यसौहित्यसिन्धुः ।
क्षीयन्ते रागरोषप्रभृतिरिपुभटाः सिद्धिसाम्राज्यलक्ष्मीः
स्याद्वश्या यन्महिम्ना विनयशुचिधियो भावनास्ताः श्रयध्वम् ।।२।। [२३२]

व्याख्या– भो भव्या ! *यन्महिम्ना* यासां सुभावितसद्भावनानां *महिमा* प्रभावः स तथा तेन महिम्ना हेतुना *दुर्ध्यानप्रेतपीडा मनाक् न प्रभवति* दुष्टे *ध्याने* आर्तरौद्ररूपे दुर्ध्याने ते एव *प्रेतौ* पिशाचौ ताभ्यां समुत्पादिता या पीडा कष्टविशेषः सा *मनाक्* लेशमात्रापि न प्रभवति न पराभवं कर्तुं शक्नोति । तथा *काचिदद्वन्द्वसौख्यस्फातिश्चित्तं प्रीणाति* काचिदनिर्वचनीया अद्वन्द्वसौख्यस्फातिः अद्वितीयसुखभाववृद्धिः चित्तं मानसं प्रीणाति पोषयति । तथा *सौख्यसौहित्यसिन्धुः परितः प्रसरति* सुखभावतृप्तिसमुद्रः सर्वतो दिक्षु विदिक्षु प्रसरति विस्तरति । तथा *रागरोषप्रभृतिरिपुभटाः क्षीयन्ते* रागद्वेषकामहर्षलोभ–

मायामोहादिरूपकर्मशत्रुसैन्यं नाशं यान्ति । *सिद्धिसाम्राज्यलक्ष्मीर्वश्या स्यात्* एकच्छत्रमोक्षराज्यरूपात्मर्द्धिः स्वाधीना स्यात् । *ताः* प्रोक्तप्रभावा *भावना* अनित्यताद्याः पूर्वप्रदर्शिताः *विनयशुचिधियो* विनीतता–परिणामप्रक्षालितबुद्धयः सन्तः *श्रयध्वं* यूयं भजतेत्यर्थः ।।२।।

( पथ्यावृत्तम् )

श्रीहीरविजयसूरीश्वरशिष्यौ सोदरावभूतां द्वौ ।
श्रीसोमविजयवाचकवाचक–वरकीर्तिविजयाख्यौ ।।३।। [२३३]

व्याख्या– *श्रीहीरविजयसूरीश्वरस्य शिष्यौ* विनेयौ *श्रीसोमविजयवाचकश्रीकीर्तिविजयवाचकाख्यौ* द्वौ तौ द्वौ पाठकौ *सोदरौ* समानोदरजातौ गृहित्वेऽपि भ्रातरौ । *अभूताम*जायेतामित्यर्थः ।।३।।

( गीतिद्वयम् )

तत्र च कीर्तिविजयवाचकशिष्योपाध्याय–विनयविजयेन ।
शान्तसुधारसनामा संदृष्टो भावनाप्रबन्धोऽयम् ।।४।। [२३४]

व्याख्या– चः पादपूरणे । *तत्र* तयोर्मध्ये *श्रीकीर्तिविजय–वाचकशिष्येण* उपाध्यायविनयविजयाख्येन । *अयम*नन्तरप्रोक्तः *शान्तसुधारसनामा* शान्तसुधारसाभिधानः *भावनाप्रबन्धो* भावनानामर्थरचनामयो ग्रन्थः *संदृष्टो* विलोकितः कथित इत्यर्थः ।।४।।

शिखिनयनसिन्धुशशिमितवर्षे हर्षेण गन्धपुरनगरे ।
श्रीविजयप्रभसूरिप्रसादतो यत्न एष सफलोऽभूत् ।।५।। [२३५]

व्याख्या– एष प्रोक्तग्रन्थरचनात्मकः यत्न उद्यमः । *शिखि* ३ *नयन* २ *सिन्धु* ७ *शशि* १ मितवर्षे सप्तदशशते त्रयोविंशे वर्षे गन्धपुरनगरे गन्धारबन्दरे *श्रीविजयप्रभसूरिप्रसादतः* तेषां प्रतप्यमाने समये हर्षेण सानन्देन *सफलोऽभूत्* फलवत्तां प्राप्त इत्यर्थः ।।५।।

( उपजातिवृत्तम् )

यथा विधुः षोडशभिः कलाभिः संपूर्णतामेत्य जगत्पुनीते ।
ग्रन्थस्तथा षोडशभिः प्रकाशैरयं समग्रैः शिवमातनोतु ।।६।। [२३६]

व्याख्या– *यथा* येन न्यायेन *विधुश्चन्द्रः षोडशभिः कलाभिः* षोडशसंख्याप्रमिताभिः कलाभिः स्वविमानविभागैः *संपूर्णतामेत्य* राहोरावरणतां विहाय स्वविमानस्य सकलां प्रभां प्राप्य जगत् *पुनीते* निखिलभूमण्डलमानन्दयति प्रकाशयति । तथा तेनैव न्यायेनायं *ग्रन्थः* शान्तसुधारससशास्त्रं भव्यानां *समग्रैः* समस्तैः *षोडशभिः प्रकाशैः* पूर्वोक्तैः *शिवं* मोक्षं कल्याणपरम्परां च *आतनोतु* विस्तारयत्वित्यर्थः ।।६।।

( इन्द्रवज्रावृत्तम् )

यावज्जगत्येष सहस्रभानुः पीयूषभानुश्च सदोदयेते ।
तावत्सतामेतदपि प्रमोदं ज्योतिःस्फुरद्वाङ्मयमातनोतु ।।७।। [२३७]

व्याख्या– *यावत्कालपर्यन्तं एष* दृश्यमानो जगत्प्रसिद्धः *सहस्रभानुः* सहस्रकिरणः सूर्यः, पीयुषभानुश्च सुधारश्मिश्चन्द्रः *जगति* भूमंडले *सदा* निरन्तरं *उदयेते* प्रकाशं कुर्वाते । *तावदेतदपि वाङ्मयं* शास्त्रं *स्फुरज्ज्योतिः* सदाविलसज्ज्ञानं *सत्पुरुषाणां प्रमोद*मानन्दं *आतनोतु* विस्तारयत्वित्यर्थः ।।७।।

श्रीबुद्धिविजयविनेयौ मुक्तिवृद्धिविजययुतगणधुर्यौ ।
मुनिपश्रीवृद्धिविजयशिष्याणुना बुधगंभीरविजयेन ।।
शान्तसुधारसपानश्रद्धामुग्धेन दृब्धेयं टीका ।
वसुरसाहिकुलचन्द्रमितवर्षे निजपरोपकृते च भक्त्या ।।

।। इति श्रीतपागच्छीयसंविग्नशाखीयपरममुनिश्रीबुद्धिविजयमुख्यशिष्यश्रीमुक्तिविजयगणि-सतीर्थ्यतिलकमुनि श्रीवृद्धिविजयचरणयुगसेविना पण्डितगम्भीरविजयगणिना विरचिता शान्त-सुधारसटीका ।।

## ।।श्रीशान्तसुधारसः समाप्तः।।

## परिशिष्ट - १

# कथानुक्रमणिका

| गाथा | कथा | ग्रन्थ |
|---|---|---|
| | **प्रथमभावना (अनित्यभावना)** | |
| १ | रौहिणेयचौरः | कथारत्नाकरः |
| २-४ | हरिभद्रसूरिः | मन्न्हजिणाणं |
| ५ | ब्रह्मदत्तचक्री | उदेशप्रासादः |
| ६ | अभयकुमारः | योगशास्त्रम् |
| ९ | भरतचक्री | विवेकमञ्जरी |
| १० | भोजराज-विज्ञचौरः | प्रबन्धपञ्चशती |
| ११ | नग्गतिप्रत्येकबुद्धः | उपदेशप्रासादः |
| १२ | लक्ष्मणमृत्युः | - |
| १३ | रामवनवासः | विवेकमञ्जरी |
| १४ | करकण्डूप्रत्येकबुद्धः | उपदेशप्रासादः |
| १६ | द्विमुखः प्रत्येकबुद्धः | उपदेशप्रासादः |
| १७ | सगरपुत्रमृत्युः | उपदेशप्रासादः |
| १८ | चन्दनमलयगिरिः | उपदेशप्रासादः |
| १९ | जयघोषद्विजः | उपदेशप्रासादः |
| २० | अर्जुनमालाकारः | प्रबन्धपञ्चशती |
| | **द्वितीया भावना (अशरणभावना)** | |
| २१ | सुभूमचक्री उपदेशमाला | |
| २२ | अपराजितभव (नेमिजिन) | त्रिषष्ठीशलाकापुरुषचरित्रम् |
| २३ | सेडूकविप्रः | मुनिपतिचरित्रम् |
| २४-२५ | सुधर्मनृपः | उपदेशप्रासादः |
| २६ | कूणिकः | उपदेशचिन्तामणिः |
| २७ | अनिलवेगविद्याधरः (भरत-बाहुबली युद्धे) | उपदेशप्रासादः |
| २८ | अट्टनमल्लः | उत्तराध्ययनसूत्रम् |
| २९ | सत्यकिविद्याधरः | उपदेशमाला |
| ३० | देविलासुतः | आवश्यकनिर्युक्तिः |
| ३१ | सुलसः (कालसौकरिकसुतः) | उपदेशमाला |

| | | |
|---|---|---|
| ३२ | सुलसाश्राविका | उपदेशप्रासादः |

## तृतीया भावना (संसारभावना)

| | | |
|---|---|---|
| ३३ | मधुबिन्दुः | उपदेशमाला |
| ३४ | धनश्रेष्ठी | प्रबन्धपञ्चशती |
| ३५ | प्रसन्नचन्द्रराजर्षिः | उपदेशमाला |
| ३६ | गोशालकभवस्थितिः | उपदेशप्रासादः |
| ३८ | चन्दनबाला | त्रिषष्ठीशलाकापुरुषचरित्रम् |
| ३९ | अञ्जनासुन्दरी | उपदेशप्रासादः |
| ४० | महेश्वरदत्तः | ऋषिमण्डप्रकरणम् |
| ४२ | अर्हद्दत्तः | उपदेशप्रासादः |
| ४३ | आमफलासक्तनृपः | – |
| ४४ | उरभ्रः | उत्तराध्ययनसूत्रम् |
| ४५ | उदायननृपः | उपदेशप्रासादः |

## चतुर्थी भावना (एकत्वभावना)

| | | |
|---|---|---|
| ४६ | नन्दमणिकारः | उपदेशप्रासादः |
| ४७ | जिनपाल–जिनरक्षितौ | ऋषिमण्डलप्रकरणम् |
| ४८ | शीलवती | कथारत्नाकरः |
| ४९ | चिलातीपुत्रः | भरतेश्वर–बाहुबलीवृत्तिः |
| ५० | नमिराजर्षिः (प्रत्येकबुद्धः) | उपदेशप्रासादः |
| ५२ | माधवगोपालः | उपदेशतरङ्गिणी |
| ५३ | मम्मणश्रेष्ठी | उपदेशप्रासादः |
| ५४ | बलदेवचेष्टा (कृष्णमृत्यौ) | उपदेशमाला |
| ५५ | सुबुद्धिमन्त्री | उपदेशप्रासादः |
| ५६ | रूपसेना | कथारत्नाकरः |
| ५७ | धन्या–ऽणगारः | दानादिकुलकानि |
| ५८ | पुण्डरिकनृपः | उपदेशमाला |

## पञ्चमी भावना (अन्यत्वभावना)

| | | |
|---|---|---|
| ५९ | काष्ठतापसः | उपदेशप्रासादः |
| ६० | शिवमुनिः | मुनिपतिचरित्रम् |
| ६१ | चन्द्रः | प्रबन्धपञ्चशती |
| ६२ | सौमिलिकः | आवश्यकनिर्युक्तिः |

| | | |
|---|---|---|
| ६४ | पुरोहितसुतः | उत्तराध्ययनसूत्रम् |
| ६६ | भरतभ्रातरः | उपदेशमाला |
| ६७ | रूपसेन–सुनन्दे | धन्यचरित्रम् |
| ६८ | निर्मोहकुटुम्बः | प्रबन्धपञ्चशती |
| ६९ | मिडासनृपः | – |
| ७० | वणिक् | आवश्यकनिर्युक्तिः |
| ७१ | क्षुल्लकमुनिः | उपदेशप्रासादः |

**षष्ठी भावना (अशुचिभावना)**

| | | |
|---|---|---|
| ७२ | गोविन्दः | कथारत्नाकरः |
| ७३ | कालीदेवी | उपदेशप्रासादः |
| ७४ | विक्रमयशानृपः | उपदेशप्रासादः |
| ७५ | कदम्बविप्रः | प्रबन्धपञ्चशती |
| ७७ | मल्लिनाथः | त्रिषष्ठीशलाकापुरुषचरित्रम् |
| ७८ | विटः | नन्दीसूत्रम् |
| ७९ | सनत्चक्री | उपदेशमाला |
| ८० | मोदकप्रियकुमारः (सुरूपः) | पिण्डनिर्युक्तिः |
| ८१ | लोढकः (मृगापुत्रः) | उपदेशप्रासादः |
| ८२ | श्रीधरश्रेष्ठी | प्रबन्धपञ्चशती |

**सप्तमी भावना (आश्रवभावना)**

| | | |
|---|---|---|
| ८५ | जिनमती | नवपदप्रकरणम् |
| ८६ | चम्पकश्रेष्ठी | उपदेशप्रासादः |
| ८८ | कण्डरिकः (अविरतौ) | दानादिकुलकानि |
| | जितशत्रुः (स्पर्शविषये) | उपदेशसप्ततिः |
| | अङ्गरूहः (रसनविषये) | उपदेशसप्ततिः |
| | नरवर्मा (घ्राणविषये) | उपदेशसप्ततिः |
| | लोलाक्षः (चक्षुरिन्द्रियविषये) | उपदेशसप्ततिः |
| | सुभद्रा (श्रोत्रविषये) | उपदेशसप्ततिः |
| | पीठ–महापीठौ (मनोदण्डे) | – |
| | कुरूटो–त्कुरुटौ (वचनदण्डे) | उपदेशप्रासादः |
| | चण्डकौशिकसर्पः (क्रोधे) | नवपदप्रकरणम् |
| | सागराचार्यः (माने) | उपदेशप्रासादः |

| | | |
|---|---|---|
| | मल्लिनाथः (मायायां) | त्रिषष्ठीशलाकापुरुषचरित्रम् |
| | सागरश्रेष्ठी (लोभे) | उपदेशप्रासादः |
| ९० | कुवलयप्रभसूरिः (सावद्याचार्यः) | उपदेशप्रासादः |
| ९१ | अङ्गारमर्दकाचार्यः (कुगुरुविषये) | उपदेशप्रासादः |
| | सिंहगुफावासीमुनिः (कुमत्यौ) | दानादिकुलकानि |
| | *नागश्री (कुक्रियायां)* | उपदेशप्रासादः |
| ९२ | महाशतकः | उपदेशप्रासादः |
| ९३ | ललिताङ्गः | उपदेशमाला |
| ९४ | द्विजसुतः | उपदेशसप्ततिः |
| ९५ | द्रमकः (मनोदण्डे) | नवपदप्रकरणम् |
| | चन्द्रा–सर्गौ (वचनदण्डे) | उपदेशप्रासादः |
| | द्वौ सुहृदौ (कायदण्डे) | प्रबन्धपञ्चशती |
| ९६ | वसुदेवः | उपदेशमाला |
| ९७ | नन्दः | नवपदप्रकरणम् |

**अष्टमी भावना (समवंभावना)**

| | | |
|---|---|---|
| ९८ | क्षुल्लकमुनिः | धर्मोपदेशकर्णिका |
| ९९ | प्रियङ्करमुनिः (संयमे) | पिण्डनिर्युक्तिः |
| | वारत्तकमुनिः (दर्शने) | पिण्डनिर्युक्तिः |
| | गोविन्दसाधुः (चित्तस्थैर्ये) | – |
| १०० | भीमतापसः (क्षमायां) | प्रबन्धपञ्चशती |
| | बाहुबली (मार्दवे) | त्रिषष्ठीशलाकापुरुषचरित्रम् |
| | अङ्गर्षिः (आर्जवे) | आवश्यकनिर्युक्तिः |
| | कपिलकेवलिः (संतोषे) | उपदेशप्रासादः |
| १०१ | सुव्रतमुनिः (मनोगुप्तौ) | आवश्यकनिर्युक्तिः |
| | तापसत्रयः (वचनगुप्तौ) | उपदेशप्रासादः |
| | पद्मरथराजा (कायगुप्तौ) | उपदेशप्रासादः |
| १०२ | शैलकपन्थकौ | उपदेशमाला |
| १०४ | नागदत्तः | भरतेश्वरबाहुबलीवृत्तिः |
| १०५ | बाहुबली | त्रिषष्ठीशलाकापुरुषचरित्रम् |
| १०७ | सिद्धर्षिगणी | पुरातनप्रबन्धसङ्ग्रहः |
| १०८ | मृगावती | भरतेश्वरबाहुबलीवृत्तिः |

| | | |
|---|---|---|
| ११० | कपिलकेवलिः | उपदेशप्रासादः |

**नवमी भावना (निर्जराभावना)**

| | | |
|---|---|---|
| ११४ | ढण्ढणमुनिः | दानादिकुलकानि |
| ११५ | दृढप्रहारी | ऋषिमण्डलप्रकरणम् |
| ११७ | विष्णुकुमारमुनिः | उपदेशप्रासादः |
| ११९ | माषतुषमुनिः | विवेकमञ्जरी |
| १२० | क्षेमर्षिः | उपदेशप्रासादः |
| १२१ | क्षुल्लकः (अनशने) | – |
| | स्कन्दकाचार्यशिष्यः (कायक्लेशे) | नवपदप्रकरणम् |
| | कूर्मः (संलीनतायां) | उपदेशप्रासादः |
| १२२ | अतिमुक्तकमुनिः (प्रायश्चित्ते) | भरतेश्वरबाहुबलीवृत्तिः |
| | नन्दिषेणमुनिः (वैयावृत्ये) | भरतेश्वरबाहुबलीवृत्तिः |
| | सेनश्रेष्ठीः (स्वाध्याये) | मन्नहजिणाणं |
| | चन्द्रावतन्सकनृपः (कायोत्सर्गे) | उपदेशप्रासादः |
| | दुर्बलिकापुष्पमित्रमुनिः (ध्याने) | ऋषिमण्डलप्रकरणम् |
| | निम्बकमुनिः (विनये) | आवश्यकनिर्युक्तिः |
| १२५ | जिनदासः | उपदेशप्रासादः |

**दशमी भावना (धर्मस्वाख्यातभावाना)**

| | | |
|---|---|---|
| १२६ | सङ्गमः (दाने) | दानादिकुलकानि |
| | कुमार–देवचन्द्रौ (शीले तपसि च) | प्रबन्धपञ्चशती |
| | जीर्णश्रेष्ठी (भावे) | उपदेशप्रासादः |
| १२७ | अत्रिगुप्तिगुप्तमुनिः (सत्ये) | उपदेशप्रासादः |
| | नागदत्तः (क्षमायां) | दानादिकुलकानि |
| | भारवाहकः (मार्दवे) | उपदेशप्रासादः |
| | पुष्पशालसुतः (आर्जवे) | आवश्यकनिर्युक्तिः |
| | वसुभूतिः (ब्रह्मचर्ये) | उपदेशप्रासादः |
| | शुभङ्करविप्रः (निर्लोभे) | उपदेशप्रासादः |
| १३१ | मूलदेवः | श्राद्धदिनकृत्यम् |
| १३२ | सुबाहुकुमारः | श्राद्धदिनकृत्यम् |
| १३३ | रावणः | उपदेशप्रासादः |
| १३६ | जीवानन्दवैद्यः | दानादिकुलकानि |

| | | |
|---|---|---|
| १३८ | दामन्नकः | उपदेशप्रासादः |
| १३९ | सीता | कथारत्नाकरम् |
| १४० | धनसार्थवाहः | दानादिकुलकानि |
| १४१ | सोमवसुः | धर्मोपदेशकर्णिका |

**एकादशी भावना (लोकस्वरूपभावना)**

| | | |
|---|---|---|
| १४७ | कुबेरदत्ता | नवपदप्रकरणम् |
| १५४ | सगरपुत्राः | ऋषिमण्डलप्रकरणम् |
| १५६ | यासासासा | भरतेश्वरबाहुबलीवृत्तिः |

**द्वादशी भावना (बोधीदुर्लभभावना)**

| | | |
|---|---|---|
| १५७ | अर्हद्दत्तः | उपदेशप्रासादः |
| १६० | नन्दनतलवरः | उपदेशप्रासादः |
| १६१ | वङ्कचूलः | श्राद्धदिनकृत्यम् |
| १६२ | शशिप्रभ–सुरप्रभौ | उपदेशमाला |
| १६३ | स्कन्दकमुनिः | नवपदप्रकरणम् |
| १६४ | रत्नदुष्यन्तः | धर्मोपदेशकर्णिका |
| १६५ | चक्रिभोजवृत्तम् | आवश्यकनिर्युक्तिः |
| १६७ | तिलकश्रेष्ठी (परिग्रहे) | – |
| | सोमिलद्विजः (भये) | आवश्यकनिर्युक्तिः |
| | भर्तृहरिः (मैथुने) | उपदेशप्रासादः |
| | द्विजः (आहारे) | कथारत्नाकरम् |
| १६९ | मरीचिः | दानादिकुलकानि |
| १७० | मङ्गूसूरिः (रसगारवे) | उपदेशप्रासादः |
| | दशार्णभद्रः (ऋद्धिगारवे) | भरतेश्वरबाहुबलीवृत्तिः |
| | विबुधप्रभसूरिः (शतागारवे) | उपदेशप्रासादः |
| १७१ | आर्द्रकुमारः | उपदेशप्रासादः |

**त्रयोदशी भावना (मैत्रीभावना)**

| | | |
|---|---|---|
| १७५ | उदायन–चण्डप्रद्योतौ | उपदेशप्रासादः |
| १७६ | अवन्तीषेणः | आवश्यनिर्युक्तिः |
| १७७ | धनशर्मा | आवश्यनिर्युक्तिः |
| १७९ | विपुलवाहनभवः (संभवजिन) | – |
| १८० | सुमति–नागिलौ | उपदेशप्रासादः |

| | | |
|---|---|---|
| १८१ | चन्द्रवती | प्रबन्धपञ्चशती |
| १८२ | क्षपकर्षिः | उपदेशप्रासादः |
| १८३ | द्राविड–वारिखिल्लौ | उपदेशप्रासादः |
| १८४ | नागदत्त (कूरगडु) | दानादिकुलकानि |
| १८५ | मृगापुत्रः | उपदेशप्रासादः |
| १८६ | रोहगुप्तः निह्नवः | आवश्यकनिर्युक्तिः |
| १८७ | अच्चङ्कारीभट्टा | – |

## चतुर्दशी भावना (प्रमोदभावना)

| | | |
|---|---|---|
| १८८ | नन्दनऋषिः (श्रीवीरजिन) | उपदेशप्रासादः |
| १८९ | धनपालकविः | उपदेशप्रासादः |
| १९० | श्रेणिक–चेलणा–साधुवृत्तं | उपदेशप्रासादः |
| १९१ | विजय–विजये | उपदेशप्रासादः |
| १९२ | विक्रमादित्यनृपः | कथारत्नाकरः |
| १९३ | कृष्णगुणग्राहीत्वं | मन्नहजिणाणं |
| १९४ | शाल–महाशालौ | उपदेशप्रासादः |
| १९५ | गौतमाष्टापदगमनं | श्राद्धदिनकृत्यम् |
| १९६ | बलदेव–रथकार–कथा | नवपदप्रकरणम् |
| १९७ | कुमारपालनृपः | प्रबन्धपञ्चशती |
| १९८ | सनत्चक्री | धर्मोपदेशकर्णिका |
| १९९ | सुदर्शनश्रेष्ठी | नवपदप्रकरणम् |
| २०० | सुभद्रासती | नवपदप्रकरणम् |
| २०१ | नन्दिषेणमुनिः | त्रिषष्ठीशलाकापुरुषचरित्रम् |
| २०२ | सम्प्रतिनृपः | दानादिकुलकानि |

## पञ्चदशी भावना (कारुण्यभावना)

| | | |
|---|---|---|
| २०३ | सक्तुब्राह्मणः | पञ्चतन्त्रे |
| २०४ | कुचिकर्णः | योगशास्त्रम् |
| २०५ | बुद्धि – सिद्धी (स्पर्धायां) | विनोदकथासंग्रहम् |
| | रुद्राचार्यः (मात्सर्ये) | धन्यचरित्रम् |
| | कोणिकः (युद्धे) | उपदेशप्रासादः |
| २०६ | कौरव–कृष्ण संवादं | उपदेशप्रासादः |
| २०७ | २२ गोष्ठिकाः | उपदेशप्रासादः |

| | | |
|---|---|---|
| २०८ | गोष्ठामाहिलः | उपदेशप्रासादः |
| २०९ | जगडूशाह–जगत्सिंहौ | प्रबन्धपञ्चशती |
| २१० | गोशालकः | आवश्यकनिर्युक्तिः |
| २११ | मदनरेखा | ऋषिमण्डलप्रकरणम् |
| २१२ | चण्डरुद्राचार्यः (सुगुरौ) | उत्तराध्यनसूत्रम् |
| | अकुशलद्विजः (कुगुरौ) | कथारत्नाकरः |
| २१३ | कपिलः (मरीचिशिष्यः) | दानादिकुलकानि |
| २१४ | प्रसन्नचन्द्रराजर्षिः | दानादिकुलकानि |
| २१५ | हरिकेशीबलः | उपदेशप्रासादः |
| २१६ | हाल्किः | त्रिषष्ठीशलाकापुरुषचरित्रम् |
| २१७ | सागरचन्द्रः | उपदेशप्रासादः |

**षोडशी भावना (माध्यस्थभावना)**

| | | |
|---|---|---|
| २१८ | कम्बल–सम्बलदेवौ | – |
| २१९ | द्विजा | कथारत्नाकरः |
| २२० | जमालिः | उपदेशमाला |
| २२१ | मेघकुमारः | भरतेश्वरबाहुबलीवृत्तिः |
| २२२ | स्थूलिभद्रः | दानादिकुलकानि |
| २२३ | अवन्तिसुकुमालः | आवश्यकनिर्युक्ति |
| २२४ | चाणक्य–सुबन्धू | नवपदप्रकरणम् |
| २२५ | कालकाचार्यः | द्रप०ता० |
| २२६ | शिवभूतिः | उपदेशप्रासादः |
| २२७ | कृपणमृत्युः | दानादिकुलकानि |
| २२८ | कृष्णर्षिः | उपदेशप्रासादः |
| २२९ | इलापुत्रः | ऋषिमण्डलप्रकरणम् |

# परिशिष्ट-२
## उपयुक्तग्रन्थाणि

| ग्रन्थः | ग्रन्थकारः | टीकाकारः |
|---|---|---|
| आवश्यकनिर्युक्तिः | श्रीभद्रबाहुस्वामी | आचार्यश्रीहरिभद्रसूरिः |
| भरतेश्वरबाहुबलीवृत्तिः | पूर्वाचार्यः | श्रीशुभशीलगणी |
| धन्यचरित्रम् | श्रीज्ञानसागरसूरिः | |
| विनोदकथासंग्रहः | श्रीराजशेखरसूरिः | |
| कथारत्नाकरः | श्रीहेमविजयगणी | |
| प्रबन्धपञ्चशती | श्रीशुभशीलगणी | |
| पुरातनप्रबन्धसंग्रहः | पूर्वाचार्यः | |
| नवपदप्रकरणम् | श्रीदेवगुप्तसूरिः | लघु-स्वोपज्ञः बृहत्-उपाध्यायश्रीयशोदेवः |
| ऋषिमण्डलप्रकरणम् | श्रीधर्मघोषसूरिः | श्रीपद्ममन्दिरगणी |
| विवेकमञ्जरी | श्रीआसडकविः | श्रीबालचन्द्राचार्यः |
| श्राद्धदिनकृत्यम् | श्रीदेवेन्द्रसूरिः | स्वोपज्ञः |
| दानादिकुलकानि | श्रीदेवेन्द्रसूरिः | श्रीदेवविजयोपाध्यायः |
| धर्मोपदेशकर्णिका | अज्ञातकर्तृकः | |
| उपदेशमाला | श्रीधर्मदासगणी | श्रीरामविजयगणीः |
| उपदेशप्रासादः | श्रीलक्ष्मीसूरिः | स्वोपज्ञः |
| पञ्चतन्त्रम् | पूर्वाचार्यः | |
| त्रिषष्ठीशलाकापुरुषचरित्रम् | श्रीहेमचन्द्राचार्यः | |
| मन्नह-जिणाणं | पूर्वाचार्यः | राजमाणिक्यगणी |
| योगशास्त्रम् | श्रीहेमचन्द्राचार्यः | स्वोपज्ञः |
| मुनिपतिचरित्रम् | पूर्वाचार्यः | |
| उपदेशचिन्तामणिः | श्रीजयशेखरसूरि | स्वोपज्ञः |
| उत्तराध्ययनसूत्रम् | विविधकर्तृकः | श्रीभावविजयगणीः |
| उपदेशतरङ्गिणी | श्रीरत्नमन्दिरगणी | |
| नन्दीसूत्रम् | श्रीदेवर्षिगणी | श्रीमलयगिरिसूरिः |
| पिण्डनिर्युक्तिः | श्रीभद्रबाहुस्वामी | श्रीहरिभद्राचार्यः |
| उपदेश सप्ततिः | श्रीसोमधर्मजीगणी | |

# शुद्धिपत्रक

| पृष्ठ | पङ्क्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ४ | ६ | शोभनाघ्यान | शोभना घ्यान |
| ७ | ६ | सद्ध–ावना | सद्भावना |
| १४ | २५ | कि कुर्वन्ति | किं कुर्वन्ति |
| १६ | २२ | राक्रम्याणं | राक्रम्यमाणं |
| १८ | ४,१२,२६ | मलयागरि | मलयागिरि |
| १९ | ३,९ | मलयागरि | मलयागिरि |
| १९ | ६ | कटिति | झटिति |
| २२ | ७ | हंठा | हठा |
| २२ | २५ | तत्पारिक्षाये | तत्परिक्षायै |
| २३ | १ | पातक | पातकं |
| २३ | २ | कोंगी | कोऽङ्गी |
| २३ | २७ | सम्बध | सम्बन्धो |
| २४ | २० | घातकी | धातकी |
| २५ | ११ | ...भुक्त | ...भुक्तो |
| २५ | १६ | न्नदनः | नन्दनः |
| २८ | ४ | सतास्मिन्नेव | स तस्मिन्नेव |
| २८ | २९ | प्रजा | प्रजां |
| २८ | ३० | चरट | चरटं |
| २९ | १७ | मयनदः | मयनरः |
| २९ | ३१ | महाजन शरणं | महाजनशरणं |
| २९ | ३१ | गच्छातिबालेः | गच्छति बालः |
| २९ | ३१ | मोयति | मोटति |
| ३१ | १ | द्वादश चक्रिणः | द्वादशचक्रिणः |
| ३१ | १० | यैभ्य... | येभ्य... |
| ३१ | १० | तैनृत्यपि | तैर्नृत्यति |
| ३४ | १ | जर्जरङ्गकम् | जर्जरमङ्गकम् |
| ३४ | १८ | रतीय | रतीव |
| ३४ | १९ | बुध्ध्या | बुद्ध्या |
| ३४ | १९ | दापिंता | दापिता |
| ३५ | ५ | सत्यकये | सत्यक्ये |
| ३५ | ७ | पूर्वपचसु | पूर्वपञ्चसु |
| ३६ | १२ | रामविजगणि | रामविजयगणि |
| ३६ | २१ | यद्दुःख | यद्दुःखं |
| ३६ | ३० | श्राद्धधर्म | श्राद्धधर्मं |
| ३८ | १२ | तचाहवे | तत्राह्वे |
| ३९ | ९ | सकाशाद्द | सकाशाद् |
| ३९ | २३ | हस्तीतं | हस्ती तं |
| ३९ | २६ | मधुडपो | मधुमण्डपो |

| पृष्ठ | पङ्क्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ४० | २४ | व्यवीत्वा | व्यतीत्वा |
| ४१ | १२ | सध्याराग सौन्दर्य | सध्यारागसौन्दर्यं |
| ४६ | १७ | श्रेष्ठ्यगाद्वाहिः | श्रेष्ठ्यगाद् बहिः |
| ४८ | ३ | तामलिप्त्यारव्यापूर्यां | तामलिप्त्याख्या पूर्यां |
| ४८ | ५ | ...भवच् | भवत् |
| ४८ | १४ | स्रीष्वार्द्रहद् | स्रीष्वार्द्रह्रद् |
| ५१ | ३० | ...नृप सेवां | नृपसेवां |
| ५५ | १ | मद्ग्टहे | मद्गृहे |
| ५५ | १२ | तच् श्रुत्वा | तच्छ्रुत्वा |
| ५६ | १३ | तथेव | तथैव |
| ५७ | ३ | पश्च पुचाश्च | पञ्चपुत्राश्च |
| ५७ | ३३ | ऽइतश्चिलाती | इतश्चिलाति |
| ५९ | १ | तहति | दहति |
| ६१ | २६ | सार्द्ध | सार्द्धं |
| ६४ | ६ | राजसुत | राजसुतः |
| ६५ | ३ | भोगसमर्थ ज्ञात्वा | भोगसमर्थं ज्ञात्वा |
| ६५ | २८ | देहधारणार्थ | देहधारणार्थं |
| ६८ | २६ | स्नाय | स्नानाय |
| ७० | ५ | सुवर्णपुरुष | सुवर्णपुरुषं |
| ७१ | ५ | पयआ नेतुं | पयआनेतुं |
| ७३ | ७ | स्यदन्धंकरणो | स्यादन्धकरणो |
| ७३ | ३० | कर्तु | कर्तुं |
| ७४ | ७ | ..कारेणाप्यं | ..करेणाप्ययं |
| ७८ | १५ | पञ्चशतल्यां | पञ्चशतत्यां |
| ७८ | १५ | ..कुटुम्ब कथा | ..कुटुम्बकथा |
| ७९ | १२ | लोभीच | लोभी च |
| ८० | १० | यावदृगृहीतं | यावद् गृहीतं |
| ८१ | १९ | पढन्ति | पठन्ति |
| ८४ | ५ | स्नपिता | स्नापिता |
| ८६ | २१ | पूर्या | पूर्यां |
| ८६ | २१ | कदम्बः अति | कदम्बोऽति |
| ८६ | २३ | वस्चाञ्चलो | वस्त्राञ्चलो |
| ८६ | २८ | मशुचि विधते | मशुचिविद्यते |
| ८८ | २ | वैजयंन्तात् | वैजयन्तात् |
| ८८ | १६ | नगरान्मन | नगरान्मम |
| ८८ | २७ | मल्यपि | मल्ल्यपि |
| ९१ | २२ | त्यक्त्वास | त्यक्त्वा स |
| ९६ | ४ | ...त्यभि धायोचित् | ...त्यभिधायोचित् |

| पृष्ठ | पङ्क्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ९८ | २५ | सर्वानप्यातान् | सर्वानप्येतान् |
| ९८ | २८ | ..सप्तति.. | सप्ततिका.. |
| १०० | ४ | बभुब | बभूव |
| १०१ | ३२ | चरितरेतैरेक्षय | चरितैरेतैरेष |
| १०३ | ५ | विकसद्धामानश्यच्च्यामास्यता.. | विकसद्धामानश्यच्छयामास्यता.. |
| १०३ | १३ | उच्चे | ऊचे |
| १०४ | २० | सार्द्ध | सार्द्धं |
| १०५ | ४ | क्षल्लकः क्षुपक | क्षुल्लकः क्षपक |
| १०९ | ६ | अणेगत्त | अणेगतं |
| १०९ | २९ | ..सेनसूरः.. | ..सेनसूरिः.. |
| १११ | २१ | त्वयेत्थ | त्वयेत्थं |
| १११ | २१ | सावोचद्रे | सावोचदरे |
| ११२ | ५ | एकबिन्दु | एकबिन्दुः |
| ११२ | १० | सुद्धं | शुद्धं |
| ११३ | १ | ...ज घन | ...जघन |
| ११३ | २१ | विलास विभ्रशन् | विलासविभ्रमान |
| ११३ | २८ | द्वांरा | द्वारे |
| ११४ | २५ | घाटी | धाटी |
| ११४ | १४ | ..क्षेमसागर.. | ..क्षेमराज.. |
| ११७ | १७ | वैराग्यरस | वैराग्यरसः |
| ११७ | २४ | वसुदेव नामा | वसुदेवनामा |
| ११७ | २४ | बद्ध निदानत्वात् | बद्धनिदानत्वात् |
| ११७ | २५ | वसुदेव | वसुदेवः |
| ११८ | १८ | तथा वि–धाचार्य | तथांविधाचार्य |
| १२० | ९ | कामग्गाहो | कामग्गहो |
| १२० | १५ | चत्वारिश् वर्षान्ते | चत्वारिंशवर्षान्ते |
| १२० | २० | बह्यौ | बहौ |
| १२० | २० | ऽ – थावशिष्टे | ऽथावशिष्टे |
| १२० | २१ | निजाङ्ग | निजाङ्गं |
| १२१ | २४ | पारणार्थ | पारणार्थं |
| १२२ | ४ | क्षपक साधु | क्षपकसाधु |
| १२२ | २६ | परस्पर कलहः | परस्परकलहः |
| १२२ | २७ | .... स्यसि युद्धम् | ...स्यसियुद्धं |
| १२३ | १ | यथोत्क्त भिक्षा... | यथोक्तभिक्षा... |
| १२३ | १ | संयमानुष्ठान परायणः | संयमानुष्ठानपरायणः |
| १२३ | ३ | केवलज्ञान लक्ष्मी | केवलज्ञानलक्ष्मी |
| १२३ | १६ | भाव परिणतः | भावपरिणतः |
| १२३ | १६ | पारग गुरुकृपया | पारगगुरुकृपया |
| १२४ | ६ | सर्वंयतः | सर्वं यतः |
| १२५ | २८ | प्रत्येक बुद्ध जातः | प्रत्येकबुद्धजातः |
| १२७ | १३ | वस्चिका | वस्त्रिका |
| १२८ | १४ | श्राद्धोऽपश्च | श्राद्धोऽन्यश्च |
| १३१ | २ | अच | अत्र |
| १३१ | ६ | अधूना | अधुना |
| १३३ | १० | सुविमर्शाभ्याऽसाभ्यां | सुविमर्शाभ्यासाभ्यां |
| १३५ | १६ | चण्डप्रधोतः | चण्डप्रद्योतः |
| १३६ | ७ | प्रतिक्रमणादि सर्वां | प्रतिक्रमणादिसर्वां |
| १३६ | १४ | सर्प | सर्पं |
| १३६ | १५ | र्वत्या मृगावत्योल्कं | मृगावत्योक्तं |
| १३७ | १५ | कपिल केवलिना | कपिलकेवलिना |
| १३९ | १७ | द्वारिका नगर्या | द्वारिका नगर्यां |
| १३९ | २० | नाम्रा | नामा |
| १४० | ५ | भिक्षार्थ | भिक्षार्थं |
| १४० | २८ | ..नात्मान | ..नात्मानं |
| १४३ | १७ | द्वादश वर्षाणि | द्वादशवर्षाणि |
| १४६ | २२ | पञ्च मासा | पञ्चमासा |
| १४६ | २३ | पञ्च मोदकान् | पञ्चमोदकान् |
| १५० | १६ | विनय | विनयं |
| १५१ | ८ | शुद्ध धर्मं | शुद्धधर्मं |
| १५१ | ११ | जगद्गुरो | जगद्गुरो |
| १५१ | ११ | दगमुट्ठ | दगमट्टी |
| १५२ | १३ | अय | अयं |
| १५२ | २१ | .. स्त तो.. | .. स्ततो.. |
| १५४ | १३ | श्राद्धधर्म | श्राद्धधर्मं |
| १५४ | १५ | निम्बक पुचः | निम्बकपुत्रः |
| १५४ | २२ | द्वादश भूमिः | द्वादशभूमिः |
| १५८ | ३१ | मार्ग | मार्गं |
| १६१ | ३१ | स्वपूर्वभव स्वरूपं | स्वपूर्वभवस्वरूपं |
| १६१ | ३३ | सद्यगुरु | सद्योगुरु |
| १६२ | १२ | पञ्च महाव्रतानि | पञ्चमहाव्रतानि |
| १६२ | २२ | तदर्थ | तदर्थं |
| १६२ | २३ | चिकालवस्ताञ्छक... | चिकालवस्तावावाञ्छक... |
| १७३ | २७ | कतुमिवाग्रत | कर्तुमिवाग्रत |
| १८२ | १७ | मचरितं | माचरितं |
| १८७ | २२ | पल्लया | मल्लयां |
| १९० | २१ | गर्भ | गर्भं |
| १९३ | ४ | यद्यचं | यद् |
| १९३ | ७ | उद्धरितमति | उद्धरितमपि |
| १९३ | ९ | पचति | पतिं |
| १९३ | १० | स्वीस्क्तो | स्त्रीसक्तो |

| पृष्ठ | पङ्क्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १९३ | ११ | धर्म | धर्मं |
| १९४ | १२ | दृढता विषये | दृढताविषये |
| १९४ | २० | त्वममुमभिगहं | त्वममुमभिग्रहं |
| १९४ | २२ | ...तेनातं | ...तेनात्तं |
| १९४ | २२ | एकदेशत्वला | एकदेशत्वं |
| १९५ | २५ | रुद | रुदन्त्यौ |
| १९५ | २६ | वासिन्नयौ | वासिन्यौ |
| १९७ | २१ | कुण्डि का | कुण्डिका |
| १९८ | १० | पञ्च महा... | पञ्चमहा... |
| १९९ | ३१ | तद्ररत्नं | तद्रत्नं |
| २०० | २४ | द्वात्रिंशति वर... | द्वात्रिंशतिवर... |
| २०० | ३० | आनार्य | अनार्य |
| २०१ | २२ | ...मुकुष्टा... | ...मुकुष्ठा... |
| २०२ | २१ | बहु जीव्यते | बहुजीव्यते |
| २०४ | २५ | दा नादि | दानादि |
| २०५ | २४ | कालान्रे | कालान्तरे |
| २०६ | ६–७ | पर्षदामग... | ...पर्षदामग्रे... |
| २०६ | १७ | ह्यष्टो | हृष्टो |
| २०६ | २५ | द्वात्रिंशद्वद्ध... | द्वात्रिंशद्बद्ध |
| २०९ | ७ | स्तैन्यन | स्तैन्येन |
| २११ | ४ | रोगसुखभङ्ग धनहानिधर्म | रोगसुखभङ्गधनहानिधर्म |
| २११ | १७ | जिनमूर्ति | जिनमूर्तिं |
| २१४ | ८–१० | गवेषणा | गवैषणा |
| २१४ | १० | ..मेषणा | ..मैषणा |
| २१५ | २२ | पूर्वभव वृतान्तं | पूर्वभववृतान्तं |
| २१७ | १८ | खिन्नऽऽना | खिन्नऽऽनना |
| २१८ | ३० | वालखिळ्यरिस्य | वारिखिल्यस्य |
| २१९ | ३ | सङ्ग्राम चक्रु | सङ्ग्रामं चक्रु |
| २२० | २७ | चत्वं | च त्वं |
| २२४ | १६ | गृह समागतः | गृहे समागतः |
| २२६ | ५ | प्रायश्चि तादि... | प्रायश्चितादि... |
| २२६ | १६ | कृत्तं | कृतं |
| २३५ | १९ | स्वरूपपमिदं | स्वरूपमिदं |
| २३८ | ४ | शाल | साल |
| २३८ | २६ | प्रत्येक पञ्च | प्रत्येकपञ्च |
| २४० | १० | माचापि | मात्रापि |
| २४१ | ३० | मर्कोटकादिरिरचलनं | मर्कोटादिभिरचलनं |
| २४३ | २५ | गन्धमपि | गन्धमपि |
| २४३ | २६ | पौषध | पौषधं |
| २४५ | ३ | मुज्झेदं | मुञ्चेदं |
| २४५ | ११ | ...प्रेपेदे | प्रपेदे |
| २४७ | १ | मार्ग | मार्गे |
| २४८ | १४ | सन्तानप्राप्ति मिच्छन्तः | सन्तानप्राप्तिमिच्छन्तः |
| २५० | २८ | सिद्धिरूपबुद्धि | सिद्धिरूपबुद्धिं |
| २५० | ३० | धूपो त्क्षेप | धूपोत्क्षेप |
| २५१ | १३ | धाम | धामं |
| २५२ | २० | लोकिक | लौकिक |
| २५३ | १ | राजाद | राजाह |
| २५३ | २ | ...ऽप्य... | ऽप्य... |
| २५३ | १८ | खादिराङ्गर | खादिराङ्गार.. |
| २५५ | ५ | पञ्चभूत चतुष्टयं वा | पञ्चभूतचतुष्टयं वा |
| २५६ | ९ | ...तष्यस्वि... | ...तपस्वि... |
| २५९ | ११ | भवि | भावि |
| २५९ | १५ | ..हममीर.. | ..हमीर.. |
| २६३ | ८ | मनोदेहै वैगुण्यं | मनोदेहैवैगुण्यं |
| २६३ | ९ | वीरप्रव्रजी | चीरप्रव्रजी |
| २६३ | १२ | मुटो र्ष्यु मौक्षिदाः | गुरोः स्यु मौंक्षदा |
| २६४ | २८ | राजर्षि वीक्ष्य | राजर्षिं वीक्ष्य |
| २७१ | २३ | जिनशासदृढ.. | जिनशासनदृढ.. |
| २७१ | २४ | ..मुपाजित | ..मुपार्जिता |
| २७४ | १ | स्थिर | स्थिरे |
| २७८ | २१ | लिङ्ग दत्तं | लिङ्गं दत्तं |
| २८० | १४ | गगनादि | गणनादि |
| २८१ | २२ | कुर्तं | कर्तुं |
| २८२ | ५ | धारज्ञा | धारिज्जा |
| २८२ | २६ | दिठ्ठा | दिट्ठा |
| २८३ | ५ | बान्ध्व ! | बान्धव ! |
| २८५ | ३ | ...गाथकीवृन्द... | ...गायकीवृन्द... |
| २९३ | २२ | अचिगुप्ति | त्रिगुप्ति |
| २९६ | १० | हाल्कि | हालिक |
| २९६ | १३ | ...सम्बल... | ...शम्बल... |
| २९६ | २० | द्रप०ता० | उपदेशप्रासादः |
| २९६ | २२ | कृपणमृत्यु | कृष्णमृत्यु |
| २९४ | २३ से २७ | उपदेशसप्ततिः | उपदेशसप्ततिका |
| २९१ | | उपदेशसप्ततिः | उपदेशसप्ततिका |
| २९७ | | उपदेशसप्ततिः | उपदेशसप्ततिका |
| २९७ | २४ | शातागाखे | शातागारवे |

यदि भवभ्रमखेदपराङ्मुखं,
यदि च चित्तमनन्तसुखोन्मुखम् ।
श्रृणुत तत्सुधियः शुभभावनाऽमृतरसं
मम शान्तसुधारसम् ॥३॥

BHARAT GRAPHICS - Ahmedabad-1
Ph. : 079-22134176, M : 9925020106